೧೦. ಭಾಷ್ಯಸಂಗ್ರಹ (ಅಣುಭಾಷ್ಯ)ದಲ್ಲಿ ತಮ್ಮ ಸ್ವರೂಪ ಸಾಮರ್ಥ್ಯವನ್ನು ತಿಳಿಸಲು ಅಪರಿಮಿತ ಅರ್ಥರಾಶಿಯನ್ನು ಪ್ರಕಟಿಸಿರುವಿರಿ. ಇದು ಶ್ರೀಕೃಷ್ಣ ತನ್ನ ಚಿಕ್ಕ ಬಾಯಿಯಲ್ಲಿ ಅನಂತ ಬ್ರಹ್ಮಾಂಡವನ್ನು ತೋರಿಸಿದಂತಿದೆ.

೧೧. ತಮ್ಮ ಯಮಕಭಾರತ ಗ್ರಂಥವು ಅಪೂರ್ವ ಚಿತ್ರಕಾವ್ಯವಾಗಿ ಅತ್ಯಾಶ್ಚರ್ಯಕಾರಕವಾಗಿದೆ. ಮಹಾಭಾರತದ ಅರ್ಥಸಂಗ್ರಹವಾಗಿ ಶಬ್ದಾಲಂಕಾರದಿಂದ ವಿರಾಜಿಸುತ್ತಿದೆ.

೧೨. ತಮ್ಮಿಂದ ರಚಿತವಾದ ಇತರ ಸುಭಾಷಿತ, ಸ್ತೋತ್ರ, ಸದಾಚಾರ, ಕಲ್ಪಾದಿ ಉತ್ತಮ ಗ್ರಂಥಗಳು ಎಷ್ಟಿವೆ ಎಂದು ಎಣಿಸಲಸಾಧ್ಯ. ಇದು ಸಮುದ್ರದಲ್ಲಿ ಅಡಗಿರುವ ರತ್ನಗಳನ್ನು ಹೇಗೆ ಎಣಿಸಲಸಾಧ್ಯವೋ ಹಾಗೆ ಇರುವದು.

ತ್ರಿವಿಕ್ರಮ ಪಂಡಿತರ ಪ್ರಾರ್ಥನೆ - ಆನಂದತೀರ್ಥರ ಅನುವ್ಯಾಖ್ಯಾನ ರಚನೆ

ಅನೇಕ ಗ್ರಂಥಗಳ ನಿರ್ಮಾತೃಗಳಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರನ್ನು ಮತ್ತೊಂದು ಗಂಭೀರವಾದ, ಅನೇಕ ಯುಕ್ತಿಸಹಕೃತವಾದ, ಸಕಲ ಶಾಸ್ತ್ರಾರ್ಥ ಸಂಗ್ರಾಹಕವಾದ, ಮಂದಮತಿಗಳ ಮತಿಗೆಟಕುವ ಹೊಸದೊಂದು ಗ್ರಂಥವನ್ನು ರಚಿಸಿ ಅನುಗ್ರಹಿಸಿರೆಂದು ತ್ರಿವಿಕ್ರಮಪಂಡಿತರು ಪ್ರಾರ್ಥಿಸಿಕೊಂಡರು. ಇದರ ಫಲವಾಗಿ 'ಅನುವ್ಯಾಖ್ಯಾನ'ವೆಂಬ ಅಮೃತವು ಸಜ್ಜನರ ಪಾಲಿಗೆ ದೊರಕಿತು. ಇದು ಸುಜನರಿಗೆ ಅಮೃತದಂತೆ ಆನಂದವನ್ನು, ದುಷ್ಟವಾದಿಗಳ ಗರ್ವವೆಂಬ ಗಿರಿಗೆ ವಜ್ರಾಯುಧವು ಆಗಿರುವದು. ಸರ್ವಸಮರ್ಥರಾದ ಶ್ರೀಮದಾನಂದತೀರ್ಥರು ನಾಲ್ಕು ಶಿಷ್ಯರಿಗೆ ನಾಲ್ಕು ಅಧ್ಯಾಯವನ್ನು ಏಕಕಾಲಕ್ಕೆ ಹೇಳುತ್ತಾ ಲೀಲಾಜಾಲವಾಗಿ ಈ ಕೃತಿಯನ್ನು ರಚಿಸಿದರು. ಇದು ಇವರು ಭಾವಿಚತುರ್ಮುಖರೆಂಬುದಕ್ಕೆ ನಿದರ್ಶನವಾಗಿದೆ. ಇದಕ್ಕೆ ಸಹಕಾರಿಯಾಗಿ ಪಂಡಿತೋತ್ತಮರಿಂದಲೂ ತಿಳಿಯಲಶಕ್ಯವಾದ ಯುಕ್ತಿಗಳನ್ನು ಸ್ಪಷ್ಟೀಕರಿಸಲು 'ನ್ಯಾಯವಿವರಣ' ವೆಂಬ ಮತ್ತೊಂದು ಗ್ರಂಥವನ್ನು ರಚಿಸಿದರು.

ಮಹಾಮಹಿಮೋಪೇತ ವಿಷ್ಣುತೀರ್ಥರು

ಶ್ರೀಪೂರ್ಣಪ್ರಜ್ಞರಂತಹ ಪುತ್ರರತ್ನರನ್ನು ಪಡೆದ ಮಧ್ಯಗೇಹದಂಪತಿಗಳು ಆಚಾರ್ಯರ ದಿವ್ಯ ದರುಶನ, ಕಥಾಶ್ರವಣಾದಿಗಳಿಂದ ಅಜ್ಞಾನಾದಿಗಳನ್ನು ಕಳೆದುಕೊಂಡು ನಿರ್ಮಲಚಿತ್ತರಾಗಿ ಅನಾಯಾಸ ಮರಣ ಹೊಂದಿ ವೈಕುಂಠವಾಸಿಗಳಾದರು. ಪಾಜಕದಲ್ಲಿ ಮಾತಾಪಿತೃಗಳ ಜೊತೆಯಲ್ಲಿದ್ದ ಆಚಾರ್ಯರ ಸೋದರ ವಿಧಿವಶದಿಂದ ಧನದನಾದಿಗಳನ್ನು ಕಳೆದುಕೊಂಡರು. ವೇದ ಜ್ಞಾನಿಗಳಾದ ಇವರು ವೈರಾಗ್ಯಗೊಂಡು ಶ್ರೀಮದಾಚಾರ್ಯರ ಬಳಿಗೆ ಸಂನ್ಯಾಸ ಸ್ವೀಕರಿಸಲೆಂದು ಬಂದರು. ಸಂನ್ಯಾಸಿಯಾಗಲು ಪರಿಪರಿಯಾಗಿ ಬೇಡಿಕೊಂಡರು. ಆಗ ಚಾತುರ್ಮಾಸ್ಯಕಾಲವಾಗಿತ್ತು. ಸಂನ್ಯಾಸ ಸ್ವೀಕಾರ ನಿಷಿದ್ಧವಾಗಿದ್ದರಿಂದ ಸಕಾಲ ಬರಲೆಂದು, ಆಜ್ಞೆಯಂತೆ

ಪಾಜಕಕ್ಕೆ ಮರಳಿದರು. ಆದರೆ ಇವರ ಮನಸ್ಸು ಕಾಯಲು ಸಿದ್ಧವಿರಲಿಲ್ಲ. ರಾಮನಿಗಾಗಿ ಭರತನು ಕಾದಂತೆ, ಮಧ್ವಾನುಜರು ಮಧ್ವರನ್ನೇ ಮನದಲ್ಲಿ ಸ್ಮರಿಸುತ್ತಾ ತನ್ಮಯರಾದರು. ಸಕಲ ಭೋಗಭಾಗ್ಯಗಳನ್ನು ತೊರೆದರು. ಊಟಮಾಡಲಿಲ್ಲ. ನಿದ್ರೆ ಮಾಡಲಿಲ್ಲ. ವಿನೋದ ಮರೆತರು. ಸುಖದಿಂದ ನಗಲೂ ಇಲ್ಲ. ಇವೆಲ್ಲವನ್ನು ಬಲ್ಲ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಚಾತುರ್ಮಾಸ್ಯ ಕಳೆದು, ಜಯಸಿಂಹ ಭೂಪಾಲನನ್ನು ಸಮಾಧಾನಿಸಿ ತಾವು ಅವತರಿಸಿದ ಪುಣ್ಯಭೂಮಿ ಪಾಜಕಕ್ಕೆ ಬಂದರು. ಸಂನ್ಯಾಸಕ್ಕೆ ಅರ್ಹರಾಗಿ, ಪರಿಶುದ್ಧರಾಗಿದ್ದ ಅನುಜನಿಗೆ ಎಲ್ಲ ವಿಧಿಗಳನ್ನು ಪೂರೈಸಿದ ಮೇಲೆ ಯತಿದೀಕ್ಷೆಯನ್ನನುಗ್ರಹಿಸಿದರು. ರಹಸ್ಯವಾಗಿ ರಹಸ್ಯವಾದ ಪರಬ್ರಹ್ಮತತ್ತ್ವೋಪದೇಶವನ್ನು ಮಾಡಿದರು. ಶ್ರೀಮದಾನಂದತೀರ್ಥರ ಪೂರ್ಣಾನುಗ್ರಹಕ್ಕೆ ಪಾತ್ರರಾದ ಇವರಿಗೆ 'ಶ್ರೀವಿಷ್ಣುತೀರ್ಥ' ಎಂಬ ನಾಮಕರಣ ಮಾಡಿದರು.

ಶ್ರೀವಿಷ್ಣುತೀರ್ಥರು ಸದಾ ಶಾಸ್ತ್ರಶ್ರವಣದಲ್ಲಿ ಇಲ್ಲವೆ ಅನುವಾದದಲ್ಲಿ ಇಲ್ಲವೆ ಮನನದಲ್ಲಿ ಹೀಗೆ ಕಾಲವನ್ನು ಸಾರ್ಥಕ ಪಡಿಸುತ್ತಿದ್ದರು. ಅವರಲ್ಲಿದ್ದ ಗುರುಭಕ್ತಿ ಅಪಾರ, ಇಂದ್ರಿಯನಿಗ್ರಹ ಊಹಾತೀತ, ಗುರುಶುಶ್ರೂಷೆ ಅನ್ಯಾದೃಶವಾಗಿದ್ದಿತು. ಇಂತಹ ಯತಿಪುಂಗವರ ಸುಚರಿತೆಯನ್ನು ವರ್ಣಿಸಲಸಾಧ್ಯವಾದುದೆಂದು ನಾರಾಯಣ ಪಂಡಿತಾಚಾರ್ಯರೆ ಒಪ್ಪಿಕೊಂಡು ಯಥಾಮತಿ ತಾವು ಶುದ್ಧರಾಗಲು ಮಾತ್ರ ವರ್ಣಿಸುವುದಾಗಿ ತಿಳಿಸಿರುವರು. ಇಂತಹ ಮಹಾಮಹಿಮರ ಸ್ಮರಣೆ ಪಾವನ. ನಂತರ ಪ್ರಣವಾದಿ ಮಂತ್ರಸಿದ್ಧರಾದ, ಮಹಾಮೇಧಾವಿಗಳಾದ ವಿಷ್ಣುತೀರ್ಥರು ಆಚಾರ್ಯರ ಶ್ರೇಷ್ಠ ಶಿಷ್ಯರಾಗಬಯಸಿ ಸಿದ್ಧಾಂತ ಪ್ರಚಾರ ಮಾಡತೊಡಗಿದರು. ಉತ್ತರ ಭಾರತ ಸಂಚರಿಸಿ ಗಂಗಾದಿತೀರ್ಥಗಳಲ್ಲಿ ಮಿಂದು ಇನ್ನು ಪವಿತ್ರರಾದರು. ತಪಸ್ಸಿದ್ಧಿಯನ್ನು ಪಡೆದಿದ್ದ ಇವರು ಹರಿಶ್ಚಂದ್ರ ಪರ್ವತಕ್ಕೆ ಅದೃಶ್ಯರಾಗಿ ತೆರಳಿ ತಪಸ್ಸನ್ನಾಚರಿಸಿದರು. ಮತ್ತೆ ಭೋಜನಾದಿಗಳನ್ನು ತೊರೆದರು. ಐದುದಿನಕ್ಕೊಮ್ಮೆಯಂತೆ ಪಂಚಗವ್ಯ ಪ್ರಾಶನ ಮಾಡುತ್ತಿದ್ದರು. ನಂತರ ಅದನ್ನು ತೊರೆದು ಬರಿ ಬಿಲ್ವಪತ್ರ, ಜಲದಿಂದ ತೃಪ್ತರಾಗಿ, ಶಿಲೆಯ ಮೇಲೆ ಆಸೀನರಾಗಿ ಕಠೋರ ತಪಸ್ಸನ್ನಾಚರಿಸ ತೊಡಗಿದರು. ಪ್ರಾಣಾಯಾಮಾದಿಗಳಿಂದ ಯೋಗಸಿದ್ಧಿಯನ್ನು ಪಡೆದರು. ಭಗವಂತನನ್ನು ಏಕಚಿತ್ತದಿಂದ ಧ್ಯಾನಿಸಿ ಸಮಾಧಿಸ್ಥಿತಿಯನ್ನು ತಲುಪಿದರು. ಬೇರಾವುದನ್ನು ಕಾಣದೆ ಭಗವಂತನನ್ನೇ ಕಾಣುವವರಾದರು. ಅಪರೋಕ್ಷ ಜ್ಞಾನಿಗಳಾದ ವಿಷ್ಣುತೀರ್ಥರಿಗೆ ಮಧ್ವವಲ್ಲಭನಾದ ಶ್ರೀನಾರಾಯಣನು ಮಾಡಿದ ಪರಮಾನುಗ್ರಹವು ಯಾರ ಮನಕ್ಕೂ ನಿಲುಕದು. ಅತೀರಹಸ್ಯವಾದ್ದರಿಂದ ನಾರಾಯಣಪಂಡಿತರು ಮುಂದೆ ವರ್ಣಿಸಲಿಲ್ಲ.

ಪೂರ್ಣಪ್ರಜ್ಞರ ಪರಮಾನುಗೃಹೀತ ಪದ್ಮನಾಭತೀರ್ಥರು ಹಾಗೂ ಇತರ ಶಿಷ್ಯರು

ಗೋದಾವರೀತೀರದಿಂದ ಆಗಮಿಸಿದ ಪಂಡಿತವರೇಣ್ಯರು ಶೋಭನಭಟ್ಟರು. ಚತುಃಶಾಸ್ತ್ರಕೋವಿದರು. ಅಂದಿನ ವಿದ್ವಾಂಸರಲ್ಲಿ ಮೊದಲ ಶ್ರೇಣಿಯ ಪಂಡಿತೋತ್ತಮರು. ಒಮ್ಮೆ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಮುಖದಿಂದ ಸೂತ್ರಭಾಷ್ಯದ ಶ್ರವಣವಾಯಿತು. ಚಿಂತನೆಯಲ್ಲಿ ಪರಿವರ್ತನೆಯಾಯಿತು. ಮಧ್ವಶಾಸ್ತ್ರದಲ್ಲಿ ಆಸಕ್ತಿ ಹೊಂದಿ ಇತರ ಮತಗಳಲ್ಲಿ ಅನಾಸಕ್ತಿ ಬಂದು, ಮಧ್ವಶಾಸ್ತ್ರವನ್ನು ಸೋದಾಹರಣೆ ಮೂಲಕ ಪ್ರಚಾರ ಪ್ರಾರಂಭಿಸಿದರು. ಆಚಾರ್ಯರಿಂದ ಸಂನ್ಯಾಸ ಪಡೆದು ಪದ್ಮನಾಭತೀರ್ಥರಾದರು. ಇವರಲ್ಲಿಯ ಸಿದ್ಧಾಂತದೀಕ್ಷೆ, ಗುರುಭಕ್ತಿ, ವೈರಾಗ್ಯ, ಮೇಧಾಶಕ್ತಿ, ತಪಶ್ಶಕ್ತಿ ಮುಂತಾದವುಗಳನ್ನು ಕಂಡ ಶ್ರೀಮದಾನಂದತೀರ್ಥರು ಮಂಗಳಕರವಾದ ವೇದಾಂತವಿದ್ಯೆಯನ್ನು ಉಪದೇಶಮಾಡಿದರು. ಇವರು ಶಾಸ್ತ್ರಸಾಗರದಲ್ಲಿ ತಿಮಿಂಗಿಲದಂತಿದ್ದು, ದುರ್ಮತಗಳನ್ನು ಖಂಡಿಸುತ್ತಾ, ಸಿದ್ಧಾಂತವನ್ನು ಪ್ರಚಾರಮಾಡತೊಡಗಿದರು. ಸಿಂಹದಂತಿದ್ದ ಪದ್ಮನಾಭ ತೀರ್ಥರು ಮಾಯಾವಾದಿಗಳನ್ನು ನಿರ್ಮೂಲವಾಗಿ ಖಂಡಿಸಿ ಸತ್ಸಿದ್ಧಾಂತ ದುಂದುಭಿಯನ್ನು ಎಲ್ಲೆಡೆ ಮೊಳಗಿಸಿದರು. ಶ್ರೀಪದ್ಮನಾಭತೀರ್ಥರು ಜ್ಞಾನಕ್ಕೆ ಸಾಗರದಂತಿದ್ದರು. ಆಚಾರ್ಯರ ಅನುವ್ಯಾಖ್ಯಾನವೆಂಬ

ಶ್ರೇಷ್ಠಗ್ರಂಥಕ್ಕೆ ಸನ್ನ್ಯಾಯರತ್ನಾವಲಿ ಎಂಬ ಟೀಕೆಯನ್ನು ರಚಿಸಿದರು. ವೇದ ಪ್ರವಚನಾಚಾರ್ಯರಾದ ಇವರು ಆಚಾರ್ಯಮಧ್ವರ ಕೀರ್ತಿಯನ್ನು ಎಲ್ಲೆಡೆ ಪ್ರಸರಿಸಿದರು. ಇವರು ಶ್ರೀಮದಾಚಾರ್ಯರ ನಂತರ ವೇದಾಂತ ಸಾಮ್ರಾಜ್ಯವನ್ನು ಅಲಂಕರಿಸಿದ ಮಹನೀಯರು.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರಿಗೆ ಶ್ರೀವಿಷ್ಣುತೀರ್ಥರು ಮತ್ತು ಶ್ರೀಪದ್ಮನಾಭತೀರ್ಥರಿಗಿಂತ ಮುಂಚೆಯು ಹಾಗೂ ಅನಂತರವೂ ಅನೇಕ ಶಿಷ್ಯರಿದ್ದರು. ನಾನಾದೇಶದವರಾಗಿದ್ದ ಅವರಲ್ಲಿ ಸಂನ್ಯಾಸಿಶಿಷ್ಯರು ಹಾಗೂ ಗೃಹಸ್ಥಶಿಷ್ಯರೂ ಇದ್ದರು. ಇವರಲ್ಲಿ ಸಂನ್ಯಾಸಿ ಶಿಷ್ಯರೆಂದರೆ ಶ್ರೀಹೃಷೀಕೇಶತೀರ್ಥರು, ಶ್ರೀಜನಾರ್ದನತೀರ್ಥರು, ಶ್ರೀನರಸಿಂಹತೀರ್ಥರು, ಶ್ರೀ ಉಪೇಂದ್ರತೀರ್ಥರು, ಶ್ರೀನರಹರಿತೀರ್ಥರು, ಶ್ರೀಮಾಧವತೀರ್ಥರು, ಶ್ರೀಅಕ್ಷೋಭ್ಯತೀರ್ಥರು ಹೀಗೆ ಹೇಳಬಹುದು. ಇವರಲ್ಲದೆ ಶ್ರೀವಾಮನತೀರ್ಥರು, ಶ್ರೀರಾಮತೀರ್ಥರು, ಶ್ರೀಅಧೋಕ್ಷಜತೀರ್ಥರು ಮೊದಲಾದವರು ಇದ್ದರು. ಇವರುಗಳು ಭೂಮಿಗಿಳಿದುಬಂದ ಸೂರ್ಯ-ರಂತಿದ್ದರು. ವೈರಾಗ್ಯಶಾಲಿಗಳಾಗಿ, ಸಿದ್ಧಾಂತದಲ್ಲಿ ದೀಕ್ಷೆ, ಇಂದ್ರಿಯನಿಗ್ರಹ, ವಿಷ್ಣುಭಕ್ತಿ, ಸಮೃದ್ಧಜ್ಞಾನಿಗಳು ಆಗಿದ್ದರು. ಇಷ್ಟಲ್ಲದೆ ಅನೇಕ ಭಕ್ತರು ಶ್ರೀಮದಾಚಾರ್ಯರ ಶಾಸ್ತ್ರದಲ್ಲಿ ಶ್ರದ್ಧೆಯುಳ್ಳವರಾಗಿ ಯಥಾಯೋಗ್ಯ ಅಧ್ಯಯನ ಮಾಡಿದವರೂ ಆಗಿದ್ದರು. ಜೊತೆಗೆ ಸಹಸ್ರಾರು ಗೃಹಸ್ಥ ಶಿಷ್ಯರು ಇದ್ದರು. ಪ್ರಮುಖರಾದ ಲಿಕುಚವಂಶಜರು, ಆಯಾದೇಶ ಸಂಚಾರದಲ್ಲಾದ ಸಜ್ಜನ ಭಕ್ತಾದಿಗಳು. ಈ ಎಲ್ಲರಿಗೂ ವಿಷ್ಣುಭಕ್ತಿ ವೃದ್ಧಿಸುವಂತೆ ಮಾಡಿ, ಆನಂದದಾಯಕವಾದ, ಇಹಪರಗಳಲ್ಲಿ ಸುಖಕೊಟ್ಟು ಕಡೆಗೆ ಮೋಕ್ಷವನ್ನೆ ಕೊಡಿಸುವ ಸಿದ್ಧಾಂತವನ್ನು ಶ್ರೀಮದಾಚಾರ್ಯರು ಸಜ್ಜನರಮೇಲಿನ ಕರುಣೆಯಿಂದ, ಭೂಮಿಗಿಳಿದು ಅವತರಿಸಿ ಬಂದು ಉದ್ಧರಿಸಿದರು. ಇಂತಹ ಆನಂದತೀರ್ಥರ ಆನಂದದಾಯಕ ಕಲ್ಪದ್ರುಮವನ್ನು ಯಾರು ತಾನೆ ಸೇವಿಸರು.

ಹೀಗಿರುವಲ್ಲಿ ಚಾತುರ್ಮಾಸ್ಯ ವ್ರತಕಾಲವು ಸಮೀಪಿಸಿತು. ಕಣ್ವತೀರ್ಥದ ಬಳಿಯ ಏಕವಾಟ ಗ್ರಾಮದ ಗ್ರಾಮಸ್ಥರು ಬಹುವಾಗಿ ಶ್ರೀಮದಾಚಾರ್ಯರನ್ನು ಪ್ರಾರ್ಥಿಸಿಕೊಂಡಾಗ, ಆಚಾರ್ಯರು ಅಲ್ಲಿರುವ ಶ್ರೇಷ್ಠವಾದ ಮಠದಲ್ಲಿ ವಾಸಮಾಡಿದರು. ಶ್ರೀಮದಾನಂದತೀರ್ಥರೇ ಅಮೃತಮುಖರು. ಅಮೃತಕಾಂತಿ-ಯುಕ್ತರು. ಅವರ ಬಳಿಯಲ್ಲಿ ಬಂದ ಭಕ್ತರ ಸಂಸಾರ ದುಃಖಗಳನ್ನು ನಿವಾರಿಸುವಲ್ಲಿ ಅಮೃತಹಸ್ತರು, ಅಮೃತಸಿದ್ಧರು. ಇಷ್ಟಲ್ಲದೇ ಶ್ರೀಮದಾನಂದತೀರ್ಥರನ್ನವಲಂಬಿಸಿ, ಅವರ ಸೇವೆ ಮಾಡುವ ಭಕ್ತರ ಸೇವಕರಾದರೂ ಪರಮಾನುಗ್ರಹಮಾಡುವವರು ಇವರೇ ಆಗಿರುವರು.

ಷೋಡಶ ಸರ್ಗದ ಕಥಾಸಾರ

ಈ ಮಹಾವೇದಾಂತ ಕಾವ್ಯದ ಈ ಸರ್ಗದಲ್ಲಿ ಕವಿಗಳು ಶ್ರೀಮದಾನಂದತೀರ್ಥರ ವಿವಿಧ ಮಾಹಾತ್ಮ್ಯ ವೈಭವಗಳನ್ನು ಯಥಾರೀತಿಯಾಗಿ ವರ್ಣಿಸಿರುವರು. ಹತ್ತನೆಯ ಸರ್ಗದಲ್ಲಿ ನಿರೂಪಿಸಿರುವಂತೆ ಇಲ್ಲಿಯೂ ಶ್ರೀಮಧ್ವರ ವೈವಿಧ್ಯಮಯವಾದ ಮಹಿಮೆಗಳ ಸಂಗ್ರಹವಿದೆ. ಪೂರ್ಣಪ್ರಜ್ಞ ವಿಜಯವು ಆಚಾರ್ಯರಲ್ಲಿ ಅವರು ಪ್ರತಿಪಾದಿಸಿದ ಸಿದ್ಧಾಂತದಲ್ಲಿ ಅಚಲವಾದ ಶ್ರದ್ಧಾಭಕ್ತಿಗಳನ್ನು ಹುಟ್ಟಿಸಿ ಭಗವಂತನ ಅನುಗ್ರಹವನ್ನು ತಂದುಕೊಡುವಲ್ಲಿ ಸಂಶಯವಿಲ್ಲ. ಶ್ರೀಮದಾಚಾರ್ಯರ ಜೀವನದುದ್ದಕ್ಕೂ ಸಂಘಟಿಸಿದ, ದಿವ್ಯವಾದ ಅದ್ಭುತವಾದ, ಅಶದೃಶವಾದ, ಭಗವಂತನ ಮಹಿಮಾದ್ಯೋತಕವಾದ ಮಹಿಮೆಗಳನ್ನು ನಾರಾಯಣ ಪಂಡಿತರು ಕ್ರಮವನ್ನನುಸರಿಸಿದ್ದರೂ ಕೆಲವನ್ನು ಮಾತ್ರ ಸೂಚಿಸಿ ಸುಂದರ ಶೈಲಿಯಲ್ಲಿ ಪ್ರಹರ್ಷಣೀವೃತ್ತದಲ್ಲಿ ನಿರೂಪಿಸಿರುವರು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಅನೇಕ ಮಹಿಮೆಗಳನ್ನೊಳಗೊಂಡ ಈ ಸರ್ಗದಲ್ಲಿ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ದೇವವೃಂದದಿಂದ ಸಮ್ಮಾನಿತರಾಗಿ ಅದೃಶ್ಯರಾಗುವವರೆಗೂ ವರ್ಣಿಸಿ ಶ್ರೀ ಸುಮಧ್ವವಿಜಯವನ್ನು ವಿಜಯಮಹೋತ್ಸವವನ್ನಾಗಿಸಿರುವರು.

ಒಮ್ಮೆ ಅನೇಕ ಭಗವದ್ಭಕ್ತರಾದ ವಿದ್ವಾಂಸರ ಸಮಾಗಮವಾಗಿತ್ತು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಮೇಲಿನ ಅತಿಶಯ ಭಕ್ತಿಯುಳ್ಳ ಪ್ರಿಯಪಂಡಿತ ಶಿಷ್ಯರೊಬ್ಬರು ಸಂಸಾರ ಬಂಧನದ ಮೋಚನೆಗೆ ಕಾರಣವಾದ ಆನಂದತೀರ್ಥರ ಪರಮೋತ್ತಮವಾದ ಮಹಿಮೆಗಳನ್ನು ವೇದಾಂತ ಶಾಸ್ತ್ರವೆಂಬಂತೆ ವರ್ಣಿಸಿದರು.

ವೇದಪ್ರಾಮಾಣ್ಯ ಸಮರ್ಥನೆ

ಗೋಮತೀ ನದೀ ತೀರದಲ್ಲಿ ವೇದಗಳನ್ನು ದ್ವೇಷಿಸುವ, ಬಹುವಾಚಾಳುವಾದ ಒಬ್ಬ ಶೂದ್ರರಾಜನಿದ್ದ. ಆ ಪ್ರದೇಶದ ಸಂಚಾರದಲ್ಲಿದ್ದ ಆಚಾರ್ಯರನ್ನು ಕಂಡ. ಅನಂತ ಕೀರ್ತಿ ಹೊಂದಿದ್ದ, ವೇದ ಪ್ರಾಮಾಣ್ಯವನ್ನು ಸಮರ್ಥಿಸುವ, ಪೂರ್ಣಪ್ರಜ್ಞರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರನ್ನು ಕುರಿತು 'ವೇದವಾಕ್ಯಗಳು ಉನ್ಮತ್ತವಾಕ್ಯಗಳಿದ್ದಂತೆ ಅಪ್ರಮಾಣ, ಫಲಸಿದ್ಧಿಸದಿರುವುದರಿಂದ' ಎಂದ. , ಶ್ರೀಮದಾಚಾರ್ಯರು ಮಂತ್ರಸಿದ್ಧಿಗೆ ಯೋಗ್ಯತೆ ಇರಬೇಕೆಂದರು. ಇದನ್ನು ಒಪ್ಪದ ಮೂರ್ಖರಾಜನಿಗೆ ಸರ್ವಜ್ಞರಾದ ಆಚಾರ್ಯರು ಕೂಡಲೇ ಧಾನ್ಯಗಳ ಬೀಜವನ್ನು ತಮ್ಮ ಬೊಗಸೆಯಲ್ಲಿ ತೆಗೆದುಕೊಂಡು 'ಯಾ ಓಷಧೀಃ' ಎಂಬ ಸೂಕ್ತವನ್ನು ಪಠಿಸಿದರು. ಪರಮಾಶ್ಚರ್ಯ! ತಕ್ಷಣವೇ ಅಂಕುರಿಸಿ ಎಲೆ ಹೂವುಕಾಳು ಉತ್ಪತ್ತಿಗೊಂಡದ್ದನ್ನು ತೋರಿಸಿದರು. ವೇದ ಪ್ರಾಮಾಣ್ಯವನ್ನು ಸಮರ್ಥಿಸಿದರು.

ಸ್ವಯಂ ಪ್ರಕಾಶ

ಒಮ್ಮೆ ರಾತ್ರಿ ಸಮಯದಲ್ಲಿ ಶಿಷ್ಯರಿಗೆ ಪಾಠಹೇಳುತ್ತಿರುವಾಗ ದೀಪವು ಶಾಂತವಾಯಿತು. ಕರುಣಾಸಾಗರರಾದ ಶ್ರೀಮದಾಚಾರ್ಯರು ತಮ್ಮ ಪಾದದ ಹೆಬ್ಬೆರಳಿನ ಉಗುರಿನ ಕೊನೆಯ ಭಾಗದಿಂದ ಪ್ರಕಾಶವನ್ನು ಹೊರ ಹೊಮ್ಮಿದರು. ಆ ಪ್ರಕಾಶದಲ್ಲಿ ಪಾಠವನ್ನು ಮುಂದುವರೆಸಿದರು. ವಿದ್ಯುತ್ತಿನ ಅಭಿಮಾನಿಯಾದ ಭಾರತೀದೇವಿಯ ಪತಿಗೆ ಇದೇನಾಶ್ಚರ್ಯ!

ಭೀಮನ ನೆನಪು

ಸರ್ವಜ್ಞರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಸಂಚಾರ ಕ್ರಮೇಣ ಭದ್ರಾನದಿ ತೀರಕ್ಕೆ ಬಂದರು. ಅಲ್ಲಿ ಪ್ರವಾಹವನ್ನು ತಡೆಯಲು ನಿರ್ದಿಷ್ಟ ಸ್ಥಳದಲ್ಲಿಡಬೇಕಿದ್ದ ಒಂದು ದೊಡ್ಡ ಬಂಡೆಯನ್ನು ಸಾವಿರಾರು ಜನರಿಂದ ತರಲಾಗದೆ ಮಧ್ಯದಲ್ಲಿರಿಸಿದ್ದರು. ಇದನ್ನು ಕಂಡ ಆಚಾರ್ಯರು 'ಜನರಿಗುಪಕಾರವಾಗುವ ಈ ಶಿಲೆಯನ್ನು ಏಕೆ ಸರಿಯಾದ ಸ್ಥಳದಲ್ಲಿರಿಸಲಿಲ್ಲ' ಎಂದು ಅಲ್ಲಿಯ ಜನರನ್ನು ಪ್ರಶ್ನಿಸಲಾಗಿ, ಜನರು 'ಯತಿ ಶ್ರೇಷ್ಠರೇ! ಭೀಮಸೇನನು ಪ್ರಯತ್ನಿಸಿದರಾಗಬಹುದೇನೋ' ಎಂದರು. ಕೃಪಾಪೂರ್ಣರಾದ ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರು, ಅನಾಯಾಸದಿಂದ ಊಹಿಸಲೂ ಆಗದ ದೊಡ್ಡ ಬಂಡೆಯನ್ನು ಇಡಬೇಕಾದ ಸ್ಥಳದಲ್ಲಿರಿಸಿದರು. ಈ ಶಿಲೆಯನ್ನು ಈಗಲೂ ಪ್ರತ್ಯಕ್ಷ ಕಾಣಬಹುದು.

ಸೂರ್ಯಗ್ರಹಣ-ಸಮುದ್ರಕ್ಕೂ ಉತ್ತಮರಾದ ಶ್ರೀ ಮಧ್ವರು

ಅಂದು ಅಮಾವಾಸ್ಯೆ ದಿನ, ಸೂರ್ಯಗ್ರಹಣದಿಂದಾಗಿ ಪರ್ವಕಾಲವಾಗಿತ್ತು. ಸಮುದ್ರ ಸ್ನಾನಕ್ಕಾಗಿ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ತಮ್ಮ ಸಂನ್ಯಾಸ ಗೃಹಸ್ಥ ಅನೇಕ ಶಿಷ್ಯ ಪರಿವಾರದೊಡನೆ ಸಮುದ್ರಸ್ನಾನಕ್ಕೆಂದು ಸಮುದ್ರತೀರಕ್ಕೆ ಬಂದಾಗ ಕಂಡದ್ದು ಸಿಂಧುರಾಜನ 'ಘನಘನಘೋಷಘೋರವೇಷಃ' ಆದ ಅಲೆಗಳು. ಸರ್ವಜ್ಞಾಚಾರ್ಯರ ಪಾದಕ್ಕೆ ತಾಕಿ ಸಾಷ್ಟಾಂಗ ನಮಸ್ಕಾರ ಮಾಡುವಂತಿದ್ದಿತು. ಇಲ್ಲಿ ಕವಿಗಳು ಸಮುದ್ರಕ್ಕೂ ಶ್ರೀಮದಾಚಾರ್ಯರಿಗೂ ಹೋಲಿಸಿ ಸಮುದ್ರಕ್ಕಿಂತಲೂ ಉತ್ತಮರೆಂದು ಸ್ತುತಿಸಿರುವುದು ಅತ್ಯುತ್ತಮವಾಗಿದೆ. ನಂತರ ಸರ್ವಜ್ಞರು ಗಂಭೀರ ಧ್ವನಿಯಲ್ಲಿ ಋಗ್ವೇದದ ಸೂಕ್ತಗಳ ವ್ಯಾಖ್ಯಾನ ಮಾಡಿದರು. ಪರ್ವಕಾಲದಲ್ಲಿ

ಸಮುದ್ರಸ್ನಾನವನ್ನಾಚರಿಸಿ ಸಮುದ್ರಕ್ಕೆ ಹೆಚ್ಚಿನ ಪಾವಿತ್ರ್ಯಕೊಟ್ಟರು. ಆದರೆ ಸಮುದ್ರದ ಅಲೆಗಳ ಆರ್ಭಟವನ್ನು ತಾಳಲಾರದ ಭಕ್ತರಿಗೆ ಸ್ನಾನಾದಿಗಳಿಗೆ ಅಡಚಣೆಯುಂಟಾಯಿತು. ತಕ್ಷಣವೇ ಸರ್ವಸಮರ್ಥರಾದ ಆಚಾರ್ಯರು ತಮ್ಮ ಕಟಾಕ್ಷಮಾತ್ರದಿಂದ ಆರ್ಭಟಿಸುತ್ತಿದ್ದ ಸಮುದ್ರವನ್ನು ತಡೆದು ಕೆರೆಯಂತಾಗಿಸಿದರು.

ಗಂಡವಾಟ ಸೋದರರ ಪರಾಜಯ

ಒಂದು ದಿನ ಗಂಡವಾಟನೆಂಬುವನನ್ನು ಆಚಾರ್ಯ ಮಧ್ವರ ಬಲಪರೀಕ್ಷಿಸಲೆಂದು ಕೆಲಜನರನ್ನು ಕರೆತಂದು, ಅವರ ಸೇವೆಗೆಂದು ನಿಯೋಜಿಸಲಿಚ್ಛಿಸಿದರು. ಇದನ್ನರಿತ ಆಚಾರ್ಯರು ಸೋದರನ ಜೊತೆ ಬಂದ ಗಂಟವಾಟನನ್ನು ತನ್ನ ಬಲಪ್ರದರ್ಶಿಸಲು ಹೇಳಿದರು. ತಕ್ಷಣವೇ ಅಲ್ಲಿಯ ಶ್ರೀಕಾಂತೇಶ್ವರ ದೇವಾಲಯದ ಅತಿಭಾರವಾದ (೩೦ ಜನರಿಂದ ಹೊತ್ತ) ಧ್ವಜಸ್ಥಂಭವನ್ನು ಇವನೊಬ್ಬನೇ ಹೊತ್ತಿದ. ತೇಗಿನ ಮರವನ್ನಲ್ಲಾಡಿಸಿ ಕಾಯಿಗಳನ್ನುದರಿಸಿದ ನಂತರ ಆಚಾರ್ಯರ ಅಪ್ಪಣೆಯಂತೆ ಇವರ ಕಂಠವನ್ನು ಒಟ್ಟಿಗೆ ಇವರಿಬ್ಬರೂ ಅದುಮಲು ಪ್ರಯತ್ನಿಸಿದರು. ಆಚಾರ್ಯರಲ್ಲಿ ಯಾವ ಪರಿವರ್ತನೆ ಕಾಣದೆ ಕಂಠವು ಇನ್ನು ಗಡುಸಾಗತೊಡಗಿತು. ಅತಿಬಲರು ಅತಿಯಾಗಿ ಬೆವೆತು ಬೆಂಡಾಗಿ ನೆಲಕ್ಕುರುಳಿದರು. ಆ ಸಮಯದಲ್ಲಿ ಸ್ಪಷ್ಟವಚನಗಳನ್ನಾಡುತ್ತಿದ್ದ ಬಲಭೀಮರೇ ಆದ ಮಧ್ವರು ಮತ್ತೆ ಇವರನ್ನು ಪರೀಕ್ಷಿಸಲು ತಮ್ಮ ಹೆಬ್ಬೆರಳನ್ನು ನೆಲದಮೇಲಿಟ್ಟು ಎತ್ತಲು ಹೇಳಿದರು. ಪ್ರಬಲಶಕ್ತರಾದ ಈ ಜಟ್ಟಿಗಳಿಂದ ಅಲುಗಾಡಿಸಲೂ ಆಗದೆ ನಿರ್ವಿಣ್ಣರಾದರು. ಹನುಮಭೀಮರಾಗಿ ಬಲಪ್ರದರ್ಶಿಸಿದ ಇವರಿಗೆ ಇದೇನೂ ಆಶ್ಚರ್ಯವಲ್ಲ.

ಒಮ್ಮೆ ಒಬ್ಬ ಸಣ್ಣ ವಟುವಿನ ಮೇಲೆ ಸ್ಥೂಲದೇಹದವರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಕೂತು ನರಸಿಂಹ ದೇವಾಲಯದ ಸುತ್ತಲೂ ಪ್ರದಕ್ಷಿಣೆ ಮಾಡಿದರು. ಇದು ಮೂರು ಲೋಕದವರಿಗೂ ಆಶ್ಚರ್ಯವನ್ನುಂಟು-ಮಾಡಿತು. ಲಘಿಮಾ, ಗರಿಮಾದಿ ಐಶ್ವರ್ಯಗಳನ್ನು ಹೊಂದಿದವರಾದ ಪೂರ್ಣಪ್ರಜ್ಞರಿಗೆ ಈ ಸಿದ್ಧಿಯು ಲೋಕಪ್ರಸಿದ್ಧಿತಂದು ಜಗತ್ತಿಗೆ ಸಕಲಗುಣಪೂರ್ಣರೆಂದು ಅರಿವಾಯಿತು.

ಪೂರ್ವವಾಟನ ಗರ್ವಭಂಗ

ಇನ್ನೊಂದು ಪ್ರಸಂಗದಲ್ಲಿ ಅಂದಿನ ಸುಪ್ರಸಿದ್ಧ ಬಲಶಾಲಿಯಾದ ಪೂರ್ವವಾಟನೆಂಬುವನು ಆಚಾರ್ಯರ ಕಂಚು ಧ್ವನಿಯಂತಹ ಕಂಠಧ್ವನಿಯನ್ನು ನಿಯಂತ್ರಿಸಲು ಬಂದ. ಆಚಾರ್ಯರ ಅನುಜ್ಞೆಯಂತೆ ಕತ್ತನ್ನು ಹಿಸುಕಲಾರಂಭಿಸಿದ. ಅನಾಯಾಸದ ಮಂದಹಾಸದಿಂದಿದ್ದ ಆಚಾರ್ಯರನ್ನು ತಡವಿದ ಈ ಬಾಹುಬಲಿಯು ಆಯಾಸವಾಗಿ ಬೆವೆತು ನೆಲಕ್ಕೆಬಿದ್ದದ್ದು ತಡವಾಗಲಿಲ್ಲ. ಹಿಂದಿನಂತೆ ಇವನ ಪ್ರಯತ್ನವು ವ್ಯರ್ಥವಾಗಿ ಆಚಾರ್ಯರ ಕಂಠಧ್ವನಿಯು ಹೆಚ್ಚುತ್ತಾ ನೆರೆತವರಿಗೆ ಆಶ್ಚರ್ಯವನ್ನುಂಟುಮಾಡಿತು.

ಭೀಮನನ್ನು ನೆನೆಪಿಸಿದ ಮಧ್ವರು

ಶಿವಾಗ್ನಿ, ವಾಸುದೇವ, ಉಗ್ರ, ಅಮೋಘ ಮೊದಲಾದ ಬ್ರಾಹ್ಮಣರು ಜೊತೆಗೆ ಇತರ ಜಟ್ಟಿಗಳು ಸೇರಿ ಒಟ್ಟಿಗೆ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಬಲ ಪರೀಕ್ಷಿಸಲು ಬಂದು ಒಟ್ಟಿಗೆ ಸೋತು ಉಸುರು ಬಿಟ್ಟರು. ಆಚಾರ್ಯರ ಒಂದು ರೋಮಕೂಪವನ್ನು ಕೀಳಲಾಗಲಿ ಅಲುಗಾಡಿಸಲಾಗಲಿ ಆಗಲಿಲ್ಲ. ಒಮ್ಮೆ ಇವರ ಮೂಗಿನ ತುದಿಗೆ ಮುಷ್ಟಿಗಳಿಂದ ಪ್ರಯತ್ನಪೂರ್ವಕ ಬಲವಾಗಿ ಗುದ್ದಿದರು. ಯಾವ ವಿಚಲತೆ ಕಾಣದೆ ಪ್ರಸನ್ನ ಮುಖಾರವಿಂದತೆ ಕಂಡರು. ಹೀಗೆ ತೋರಿದ ಅನೇಕ ಪ್ರಸಂಗಗಳಲ್ಲಿ ಇವರು ಭೀಮರೆಂದೇ ನೆನೆಪಿಸುವಂತಿದ್ದಿತು.

ಪಾರಂತಿಯಲ್ಲಿ ಅವ್ಯವಸ್ಥೆಯನ್ನು ಸುವ್ಯವಸ್ಥೆ ಗೊಳಿಸಿದ್ದು

ದ್ವಾಪರದಲ್ಲಿ ಭೀಮರಾಗಿದ್ದಾಗ ದ್ರೌಪದಿ ಹಾಗೂ ಸಹೋದರರೊಡನೆ 'ಪಾರಂತಿ' ಎಂಬಲ್ಲಿ ಐದು ರೂಪಗಳ ಶ್ರೀಹರಿಯನ್ನು ಪ್ರತಿಷ್ಠಾಪಿಸಿ, ನಿತ್ಯದ ಪೂಜಾದಿಗಳಿಗೆ ವ್ಯವಸ್ಥೆ ಮಾಡಿದ್ದರು. ಅದೇ ಸ್ಥಳಕ್ಕೆ ದಯಮಾಡಿಸಿದ ಶ್ರೀಮಧ್ವರು ಅಲ್ಲಿ ಪೂಜೆ ನೈವೇದ್ಯಾದಿಗಳು ತಪ್ಪಿದ್ದನ್ನು ಕಂಡು, ತಕ್ಷಣ ಗ್ರಾಮಸ್ಥ ಮುಖಂಡರ ಸಂಮುಖದಲ್ಲಿ ಅಲ್ಲಿಯ ರಾಜನನ್ನು ಕರೆಯಿಸಿ ಸಕಲ ವೈಭವಗಳು ನಡೆಯುವಂತೆ ಸುವ್ಯವಸ್ಥೆಯನ್ನು ಮಾಡಿದರು. ಹಿಂದೆ ಪರಿವಾರದೊಡನೆ ಶ್ರೀಹರಿಯನ್ನು ಪೂಜಿಸಿದ್ದನ್ನು ಹರಿಯ ಹಿರಿಮೆಯನ್ನು ಸ್ಮರಿಸಿದರು.

ಶ್ರೀ ಪೂರ್ಣಪ್ರಜ್ಞರ ವಿಜಯ

ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರು ಸಂಚರಿಸುತ್ತ 'ಸರಿದಂತರ' ಎಂಬ ಪ್ರದೇಶ ತಲುಪಿದರು. ಆಗ ಗ್ರೀಷ್ಮಕಾಲ-ವಾಗಿತ್ತು. ಆದರೆ ಅಲ್ಲಿಯ ಕೆರೆಯು ಒಣಗಿ, ಆರ್ತರಾಗಿದ್ದ ಜನರನ್ನು ಕಂಡು, ಕರುಣಾಮಯಿಗಳಾದ ಆಚಾರ್ಯರು ತಕ್ಷಣವೇ ಮೇಘಗಳನ್ನು ಬರಿಸಿ ಮಳೆಯನ್ನು ತರೆಸಿದರು. ಆ ಕೆರೆ ನೀರಿನಿಂದ ತುಂಬಿತು. ಜನರ ಮನ ಹರ್ಷದಿಂದ ತುಂಬಿತು. ಸಜ್ಜನರು ಆಶ್ಚರ್ಯಗೊಂಡು ಆಚಾರ್ಯರ ಅನುಗ್ರಹವನ್ನು ಸದಾ ಆಘ್ರಾಣಿಸುತ್ತಿದ್ದರು.

ಶ್ರೀಮದಾಚಾರ್ಯರ ಕೀರ್ತಿಯನ್ನು ಸಹಿಸದ ದುರ್ಜನರು ಆಚಾರ್ಯರನ್ನು ಕೊಲ್ಲಲು ಪ್ರಯತ್ನಿಸಿ ಗ್ರಾಮದ ಶೂದ್ರ ಒಡೆಯನಿಗೆ ದುರ್ಬೋಧನೆ ಮಾಡಿದರು. ಯೋಚಿಸದ ಅವನು ಆಚಾರ್ಯರನ್ನು ಮುಗಿಸಲು ಬಂದು, ಅವರ ಮಹಿಮೆ ತಿಳಿದು ಪ್ರಯತ್ನಿಸಿದ್ದು ತಪ್ಪೆಂದು ತಿಳಿದು ನಮಿಸಿ ಸ್ಮರಿಸಿದ.

ಸಂಚಾರದಲ್ಲಿ ಕೊಕ್ಕಡವೆಂಬ ಧನ್ವಂತರಿ ದೇಗುಲ ಗ್ರಾಮಕ್ಕೆ ಆಗಮಿಸಿದರು. ಒಬ್ಬ ಏಕಾಂತಭಕ್ತ ಇಡೆಪಾಡಿತ್ತಾಯ ಎಂಬ ಬ್ರಾಹ್ಮಣ. ಅವನ ಶ್ರದ್ಧಾಭಕ್ತಿಗೆ ಮೆಚ್ಚಿದವರಾದ ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರು ಅವನ ಶ್ರೇಯಸ್ಸಿಗೆಂದು ಶ್ರೀಕೃಷ್ಣಾಮೃತ ಮಹಾರ್ಣವ ಎಂಬ ಉತ್ತಮ ಗ್ರಂಥವನ್ನು ರಚಿಸಿಕೊಟ್ಟರು.

ಶ್ರೀ ಪೂರ್ಣಪ್ರಜ್ಞರು ಉಜಿರೆ ಎಂಬ ಗ್ರಾಮಕ್ಕೆ ಆಗಮಿಸಿದರು. ಅಲ್ಲಿಯ ವಿದ್ವಾಂಸರು ತಾವೇ ಸರ್ವಜ್ಞ, ಸರ್ವಶ್ರೇಷ್ಠರೆಂದು ಭಾವಿಸಿದವರಾಗಿ ದುರಹಂಕಾರಿಗಳಾಗಿದ್ದರು. ಅಲ್ಲದೆ ಪರಿಪೂರ್ಣ ಪ್ರಮಿತಿಗಳಾದ ಆಚಾರ್ಯರಿಗೆ ಯಜ್ಞಯಾಗಾದಿಗಳಲ್ಲಿ ಅಧಿಕಾರವಿಲ್ಲದ ಕಾರಣ, ಅದರ ಜ್ಞಾನ, ಕ್ರಮಾದಿಗಳ ಅಜ್ಞಾನವಿದೆ ಎಂದು ಭಾವಿಸಿ, ಹೇಗಾದರೂ ಸೋಲಿಸಬೇಕೆಂದು 'ಛಂದಸಾಂವೈ' ಇತ್ಯಾದಿ ವೇದಬ್ರಾಹ್ಮಣ ಭಾಗಗಳಿಗೆ ಅರ್ಥ ಹೇಳಲು ಪ್ರಶ್ನಿಸಿದರು. ಸರ್ವಜ್ಞ ಶಿರೋಮಣಿಗಳಾದ ಆಚಾರ್ಯರು ಅವರಿಗೂ ತಿಳಿಯದ ಅನೇಕಾರ್ಥಗಳನ್ನು ಮಂತ್ರಗಳ ವಿಧಿವಿಧಾನಗಳನ್ನು ವಿವರಿಸಿದರು. ಅವರ ಅದ್ಭುತ ಪರಿಪೂರ್ಣ ಪಾಂಡಿತ್ಯವನ್ನು ಕಂಡು ಉತ್ತರಿಸಲಾಗದೆ ಅಲ್ಲಿಂದ ಓಡಿಹೋದರು. ಲೋಕದಲ್ಲಿ ಋಕ್ಕುಗಳ ಅರ್ಥವು ಸ್ಥಿರವಾಗಿರಲೆಂದು ಸಜ್ಜನರ ಮೇಲಿನ ಕರುಣೆಯಿಂದ ಕರ್ಮನಿರ್ಣಯವೆಂಬ ಗ್ರಂಥವನ್ನು ಬರೆದರು.

ಹೀಗೆ ಶ್ರೀಮದಾನಂದತೀರ್ಥರು ತಿಳಿಯಬಯಸಿದವರಿಗೆ ಜ್ಞಾನಪ್ರದರಾಗಿ, ನಿರ್ಗತಿಕರಾಗಿ ಬಂದವರಿಗೆ ಐಶ್ವರ್ಯಾದಿ ಪ್ರದರಾಗಿ, ಜಗತ್ತಿಗೆ ತ್ರಾಣರಾದ ವಾಯುದೇವರ ಅವತಾರರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಮೋಕ್ಷಮಾರ್ಗವನ್ನು ತೋರಿ ಸಜ್ಜನರಿಗೆ ಆನಂದವನ್ನುಂಟುಮಾಡಿದರು. ಆಚಾರ್ಯರು ತೋರಿದ ಮಹಿಮೆಗಳು ಅವರಿಗೆ ಅತಿ ಸಾಮಾನ್ಯವಾದರೂ ಭಕ್ತರಿಗೆ ಗುರುಭಕ್ತಿ ಪ್ರವರ್ಧಕವಾಗಿವೆ. ವಿಶ್ವಗುರುಗಳಾದ ಆಚಾರ್ಯ ಮಧ್ವರ ನಿರಂತರ ಚಿಂತನ ಮಂಥನ, ಕೃತಿಗಳ ಪಠಣಪಾಠಣ, 'ಗಮನಾಸ್ಯಸಂಖ್ಯಾದಿ ಲೀಲಾಃ ಸ್ಮೃತಿಮಾತ್ರೇಣ ಭವಾಪವರ್ಗ ಧಾತ್ರೀ'ಯಾಗಿದೆ. ಹೀಗೆಂದು ನಾರಾಯಣ ಪಂಡಿತರು 'ಮನೋವಿಶುದ್ಧ್ಯೈ ಚರಿತಾನುವಾದಃ' ಎಂದತೆ ನಿರೂಪಿಸಿರುವರು.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ದಿವ್ಯಚರಿತೆಯನ್ನು ದೇವಾದಿ ದೇವತೆಗಳು ನಿತ್ಯ ಶಿರಸ್ಸಿನಲ್ಲಿ ಧರಿಸಿರುವರು. ಗಂಧರ್ವರು ದೇವಸಭೆಗಳಲ್ಲಿ ಗಾನ ಮಾಡುವರು. ಶ್ರೀಪೂರ್ಣಪ್ರಜ್ಞಾಚಾರ್ಯರ ಪಾವನ ಚರಿತೆ ಪಾವನ ಗಂಗೆಗಿಂತಲೂ ಶ್ರೇಷ್ಠವಾದುದು. ಹೀಗೆ ಸ್ಮರಿಸಿ, ಸ್ತುತಿಸಿ, ನಲಿಸಿ, ನರ್ತಿಸಿದ ದೇವತಾವೃಂದ ಋಷಿಮುನಿ ಗಂಧರ್ವಗಣಗಳೊಂದಿಗೆ ಆಚಾರ್ಯರ ದಿವ್ಯಾಕೃತಿಯನ್ನು ಕಾಣಲು ಜೋಡಿಸಿದ ಕೈಗಳನ್ನು ಮೇಲಕ್ಕೆತ್ತಿದವರಾಗಿ ವಿಮಾನಾರೂಢರಾಗಿ ಆಕಾಶದಲ್ಲಿ ಕಾಂತಿಯುಕ್ತರಾಗಿ ಮಿಲಿತರಾದರು.

ಭೂಲೋಕದ ಅಭೂತಪೂರ್ವ ಕ್ಷೇತ್ರವಾದ ಅನಂತಾಸನನ ದಿವ್ಯಸನ್ನಿಧಿಯಲ್ಲಿ ಉತ್ತಮ ಸದ್ಗುಣಭರಿತ ಶಿಷ್ಯವೃಂದದಿಂದ ಪರಿವೃತರಾದ, ಮಂಗಳಕೀರ್ತಿಯಿಂದ ಶೋಭಿತರಾದ, ಅಗಣಿತಗುಣಗಳ ಗಣಿಯಾದ, ಜ್ಞಾನಭಕ್ತಿವೈರಾಗ್ಯಾದಿಗಳ ನಿಧಿ ಹೊಂದಿದ್ದವರಲ್ಲಿ ಪ್ರಥಮರಾದ, ಆನಂದದಾಯಕ ಶಾಸ್ತ್ರ ಪ್ರಚುರರಾಗಿ ಐತರೇಯೋಪನಿಷತ್ತನ್ನು ವ್ಯಾಖ್ಯಾನ ಮಾಡುತ್ತಿದ್ದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರನ್ನು ನೆರೆತ ಸುರಶ್ರೇಷ್ಠರು ಗಗನದಿಂದ ಸಂದರ್ಶಿಸಿ ನಮಸ್ಕಾರ ಮಾಡಿದರು. ಶ್ರೀಪೂರ್ಣಪ್ರಜ್ಞರನ್ನು ಕಂಡು ಧನ್ಯರಾದ ಸುರೋತ್ತಮರು 'ಪರಮಗುರುಗಳಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರೇ! ನೀವು ಸಚ್ಛಾಸ್ತ್ರದಿಂದ ದುಷ್ಟಶಾಸ್ತ್ರಗಳೆಂಬ ಕತ್ತಲನ್ನು ನಿವಾರಿಸಿದಿರಿ. ಶ್ರೀ ನಾರಾಯಣನ ಗುಣಗಣಗಳನ್ನು ಸಜ್ಜನರಿಗೆ ತಿಳಿಸಿದಿರಿ. ಜೀವೋತ್ತಮರಾದ ನೀವು ನಮ್ಮನ್ನು ರಕ್ಷಿಸಿರಿ' ಎಂದರು. ಶ್ರೀರಾಮಚಂದ್ರನಿಗೆ ಪ್ರಿಯರಾದ ಹನುಮಂತದೇವರಿಗೆ ನಮಸ್ಕಾರ, ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಇಷ್ಟರಾದ ಭೀಮಸೇನದೇವರಿಗೆ ನಮಸ್ಕಾರ, ಶ್ರೀವೇದವ್ಯಾಸರಿಗೆ ಪ್ರೀತಿಪಾತ್ರರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರಿಗೆ ನಮಸ್ಕಾರ. ನಮಗೆ ಜ್ಞಾನಪ್ರದರಾಗಿ, ದುಷ್ಟಶಿಕ್ಷಕರಾಗಿ ಜಯಿಸಿರಿ. ಹೀಗೆ ಕೊಂಡಾಡಿದರು.

ಹೀಗೆ ಅಂತರಿಕ್ಷದಲ್ಲಿ ಮಿಲಿತರಾದ ರುದ್ರೇಂದ್ರಾದಿದೇವತೆಗಳು - ಗುರುಗಳಾದ ಮಧ್ವಾಚಾರ್ಯರ ಮಹಾವಿಜಯೋತ್ಸವವನ್ನು ಸನ್ಮಾನಿಸುತ್ತಾ ಜಯಜಯಕಾರಗಳನ್ನು ಹಾಕುತ್ತಿರಲು, ಎಲ್ಲರೂ ನೋಡುತ್ತಿದ್ದಂತೆಯೇ ಶ್ರೀನಾರಾಯಣನ ಪರಮಪ್ರೀತಿಪಾತ್ರರಾದ ಶ್ರೀಮದಾನಂದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯರ ಮೇಲೆ ದೇವಲೋಕದ ಪರಿಮಳಭರಿತವಾದ ಪುಷ್ಪವೃಷ್ಟಿಯು ಆಯಿತು. ಪುಷ್ಪರಾಶಿಯಿಂದ ಅದೃಶ್ಯರಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಅದ್ಯಾಪಿ ರೂಪ್ಯಪೀಠದಲ್ಲಿ, ಬದರಿಯಲ್ಲಿ ವಿರಾಜಮಾನರಾಗಿರುವರು. ಅವರ ಗ್ರಂಥಗಳಲ್ಲಿ ಸದಾ ನೆಲೆಸಿಸಿರುವರು.

ಶ್ರೀನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯಕೃತ ಶ್ರೀಸುಮಧ್ವವಿಜಯವು ವೇದಾಂತ ಮಹಾಕಾವ್ಯ. ವಿಶ್ವಗುರುಗಳಾದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಜೀವನ ಚರಿತ್ರೆಯ ಬಗ್ಗೆ ಅಧಿಕೃತವಾಗಿ ತಿಳಿಸುವ ಲೋಕೋತ್ತರ ಕಾವ್ಯ. ಈ ಗ್ರಂಥವು ಮಂತ್ರತುಲ್ಯವಾಗಿ, ಸಕಲಾಭೀಷ್ಟಪ್ರದವಾಗಿ ಮಾಧ್ವ ಪರಂಪರೆಯಲ್ಲಿ ನಿತ್ಯಪಾರಾಯಣ ಗ್ರಂಥವಾಗಿ ಮಾನ್ಯವಾಗಿದೆ.

ಶ್ರೀ ಸುಮಧ್ವವಿಜಯವು ಶ್ರೀಮದಾಚಾರ್ಯರ ಪರಂಪರೆಯಲ್ಲಿ ವಿರಾಜಮಾನರಾದ ಎಲ್ಲ ಪರಮಹಂಸರಿಂದಲೂ ಹಾಗೂ ಸಮಸ್ತ ಗೃಹಸ್ಥ ಟೀಕಾಟಿಪ್ಪಣೀಕಾರರಿಂದಲೂ ಸರ್ವಮಾನ್ಯತೆ ಪಡೆದಿದೆ.

ಈ ಗ್ರಂಥದ ಪಾರಾಯಣದಿಂದ ಮುಖ್ಯವಾಗಿ ಶ್ರೀಹರಿಯಲ್ಲಿ ಭಕ್ತಿ ಉಂಟಾಗಿ ಭಗವದನುಗ್ರಹಕ್ಕೆ ಕಾರಣವಾಗುವುದು. ಶ್ರೀ ಸುಮಧ್ವವಿಜಯದ ಪಾಠ, ಪ್ರವಚನ, ಪಾರಾಯಣದಿಂದ ಸಜ್ಜನರ ಮನೋಭಿಷ್ಟವು ಸಿದ್ಧಿಸುವುದು. ಸಕಲ ದುರಿತಗಳು ನಾಶವಾಗುವವು.

ಜಗತ್ತಿಗೆ ಅತೀಶ್ರೇಷ್ಠವಾದ ಸಿದ್ಧಾಂತವನ್ನು ನೀಡಿದ ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯರು ಸರ್ವಮಾನ್ಯರಾಗಿ, ಸಜ್ಜನರಿಗೆ ಮೋಕ್ಷಮಾರ್ಗವನ್ನು ತೋರಿಸಿದ ಅಸಾಮಾನ್ಯ ಎಕೈಕ ದಾರ್ಶನಿಕರು.

ಇಂದಿಗೂ ವೇದಾಂತಶಾಸ್ತ್ರವನ್ನು ಅಧ್ಯಯನ ಮಾಡುವವರು 'ಶ್ರೀಸುಮಧ್ವವಿಜಯ'ದ ಕಾವ್ಯದಿಂದಲೇ ಪ್ರಾರಂಭಿಸುವುದು ಸಂಪ್ರದಾಯದಲ್ಲಿ ಸ್ಥಿರವಾಗಿದೆ. ಭವರೋಗವನ್ನು ಕಳೆಯುವ ದಿವ್ಯೌಷಧಿಯಾಗಿದೆ. ಐಹಿಕ-ಆಮುಷ್ಮಿಕ ಫಲಕೊಡುವ ಕಲ್ಪವೃಕ್ಷ ಕಾಮಧೇನುವಾಗಿದೆ.

ಶ್ರೀಸುಮಧ್ವವಿಜಯವನ್ನು ಪ್ರತಿನಿತ್ಯ ಸಂಪೂರ್ಣ ಪಾರಾಯಣ ಮಾಡುವ ನಿಯಮವನ್ನು ಇಟ್ಟು ಕೊಂಡವರು ಅನೇಕರಿದ್ದಾರೆ ಎಂಬ ಮಾತು ಸಾರ್ವಕಾಲಿಕ ಸತ್ಯವಾಗಿದೆ.

''ಆಚಾರ್ಯಾಃ ಶ್ರೀಮದಾಚಾರ್ಯಾಃ ಸಂತು ಮೇ ಜನ್ಮ ಜನ್ಮನಿ''

ಎ.ಬಿ. ಶ್ಯಾಮಾಚಾರ್
ಎಸ್.ಆರ್. ಪಾಂಡುರಂಗಿ

ಂಂಂ

सुमध्वविजय विषयानुक्रमणिका

प्रथमः सर्गः	श्लोकसङ्ख्या
मङ्गलाचरणम्	१-३
पित्रे त्रिविक्रमपण्डिताय प्रणामः	४
हनुमदवतारवर्णनम्	९-२७
भीमावतारवर्णनम्	२७-४४
सुरद्वेषिणां मनसः उद्वेगः, असत् शास्त्रप्रचारार्थं कलियुगे जन्म, असत् शास्त्रप्रचारः	४५-५५
द्वितीयः सर्गः	
चतुर्मुखब्रह्मादिदेवैः असत् शास्त्रप्रचार निवारणाय विष्णवे प्रार्थना	१
विष्णुना वायवे अवताराय आदेशः । वायुना भगवदाज्ञायाः भक्त्या अङ्गीकारः	२-४
वेदान्तस्य सम्यग् ज्ञानाय सज्जनानामार्तभावः	५
रजतपीठपुरे वायोः अवतारस्य पूर्वसूचना	६-८
श्री मध्वाचार्यस्य मातापित्रोः वेदवतीमध्यगेहभट्टयोः वृत्तान्तः	९-२२
श्री मध्वाचार्यस्य अवतारः	२३-२७
शिशोः जातकर्मादि, वासुदेव इति नामकरणं च	२८-२९
पूर्वालयनामकेन गोदानम्, अनन्तेश्वराय वासुदेवस्य समर्पणम्	३०-३१
रात्रौ प्रयाणावसरे आगतेन पिशाचेन बालकस्य महिमावर्णनम्	३२-३४
बालक वासुदेवेन कुलत्थभक्षणम्	३५-४२
अव्यक्तवाणीरिङ्खणादि बाल्यभाववर्णनम्	४३-४४
ऋषभेण सह वनगमनम्, मातापित्रोः चिन्ता	४५-४९
तिन्त्रिणी बीजदानेन पितुः ऋणपरिहारः	५०-५२
बालक वासुदेवस्य अभिनन्दनम्, सज्जनानामानन्दः	५३-५४
तृतीयः सर्गः	
बन्धुगृहे उत्सवे व्यापृतयोः मातापित्रोः अज्ञातेन वासुदेवेन कुडुवूरुताळेकुडी देवालयौ गत्वा अन्ततो रजतपीठपुरे अनन्तेश्वर मन्दिरगमनम् । अन्विष्य आगताय पित्रे 'भगवान् नारायणः एव मम सहचरः आसीत' इति कथनम्	१-१६
वासुदेवस्य विमानगिरौ सञ्चारसमयेपि चण्डिका सहचारिणी आसीत्	१७

वासुदेवस्य अक्षराभ्यासः १८-२०
पौराणिकस्य शिवभट्टस्य प्रवचने दोषं निरूप्य तत्परिहारः २१-२७
लिकुचशब्दार्थनिरूपणम् २८-३०
वासुदेवस्य उपनयनम्, अग्निं गुरुं च परिचर इति पित्रा उपदेशः ३१-३७
सर्परूपिणः असुरस्य संहारः ३८-४०
वासुदेवस्य गुरुकुलवासः, वयस्यैः सह क्रीडादिकम् ४१-५२
गुरुपुत्रस्य शिरोवेदना परिहारः ५३
गुरवे ऐतरेयोपनिषदः रहस्यार्थनिरूपणम् ५५
दुष्टान् दमय दमय विष्णोः गुणान् कथय कथय इति देवैः प्रार्थना ५६

चतुर्थः सर्गः

गुरुकुल वासानन्तरं वासुदेवेन सज्जनहिताय दुरागमनिरासाय सन्यासस्वीकारसङ्कल्पः १-५
अच्युतप्रेक्षवृत्तान्तः, वासुदेवस्य अच्युतप्रेक्षं प्रति गमनम् ६-१३
मातापितृभ्यां सन्यासं मा स्वीकुरु इति प्रार्थना, वासुदेवेन सन्यासस्वीकारस्य
दृढसंकल्पः, अनुजस्य जन्म, सन्यासस्वीकारः १५-३१
अच्युतप्रेक्षेण प्रणवोपदेशः, पूर्णबोध इति नामकरणम् दण्डधारणम्,
अनन्तेश्वरेण अच्युतप्रेक्षाय पूर्णबोधस्य अर्पणम् ३२-३९
मध्वसरोवराय गङ्गायाः आगमनम् ४०-४२
वासुदेवपण्डितस्य पराभवः, अच्युतप्रेक्षेण इष्टसिद्धेः प्रवचनम्, तत्र वासुदेवेन आघपद्ये
एव द्वात्रिंशत् दोषाणां प्रदर्शनम्, अच्युतप्रेक्षस्य मनसि मायावादविषये संदेहाङ्कुरः ४३-४७
पूर्णबोधेन प्रवचनम् ४७-४८
श्रीमद् भागवतस्य पाठनिर्णयः, भागवतपञ्चमस्कन्धगद्यभागस्य निरर्गलं प्रवचनम् ४९-५३
पूर्णबोधस्य कीर्तेः सूर्यचन्द्रकिरणा इव सर्वत्र प्रसारः ५४

पञ्चमः सर्गः

पूर्णबोधस्य वेदान्तसाम्राज्ये अभिषेकः, आनन्दतीर्थः इति नामकरणम् १-२
अनुमानेन तत्त्वातत्त्वे साधयितुं न शक्यते इति सोदाहरणं प्रदर्शनम्, अनुमानतीर्थः
इति नाम्ना गौरवप्रदर्शनम् ३-७
वादिसिंह बुद्धिसागरयोः पराभवः ८-१६
शाङ्करभाष्यप्रवचनम्, दोषाविष्करणं च १७-१९

ब्रह्मसूत्राणां सम्यगर्थनिरूपणम् २०-२२
ब्रह्मसूत्रभाष्यरचनाय अच्युतप्रेक्षादिभिः प्रार्थना २३-२९
विष्णुमङ्गलाय प्रयाणः, द्विशतकदलीफलभक्षणम्, पयस्विनीतीरे दुर्गायाः अवतरस्मरणम् ३०-३७
तिरुवनन्तपुरगमनम्, अनन्तपद्मनाभदर्शनम् तत्र वेदान्तसूत्रप्रवचनम् ३७
'कुदुपुस्तूरु' वंशे जातेन संकरेण सूत्रभाष्यं येन न रचितं तस्य सूत्रप्रवचने न
अधिकारः इत्याक्षेपः, अस्मदुक्तौदोषाश्चेत् वद किमधिकाराक्षेपेण इति उत्तरम् ३७-३९
पूर्णबोधस्य महापुरुषलक्षणयुक्तत्वनिरूपणम्, कुदुपुस्तूरेण दण्डभङ्गप्रतिज्ञा ४०-४१
श्रीमध्वाचार्यैः कन्याकुमारीक्षेत्रगमनम् रामेश्वरगमनं च, तत्र विद्वत्सभासु वादिनां
पराजयः रामेश्वरे चातुर्मास्यम् । ४२-४६
श्रीरङ्गक्षेत्रगमनम्, श्रीरङ्गनाथदर्शनम्, दक्षिणभारतस्य दिग्विजयं परिसमाप्य
पुनः पयस्विनीतीरमागमनम् तत्रत्यविद्वज्जनैः सामान्यजनैश्च पूर्णबोधस्य दर्शनम् ४७-५२

षष्ठः सर्गः

आनन्दतीर्थैः ऐतरेयसूक्तप्रवचनम्, श्रुतीनामर्थत्रयम्, भारतं दशार्थम्,
विष्णुसहस्रनाम शतार्थमिति निरूपणम्, विश्वशब्दस्य शतार्थनिरूपणम् १-१०
ऋग्वेदगतदानसूक्तार्थनिरूपणम्, पृणं् दाने इति धातुना पृणीयात् इति पदस्य
व्युत्पत्तिसमर्थनम् । ११-१६
अपालाशब्दस्य अतितरुणी इत्यर्थनिरूपणम्, श्वित्रिणी इति अर्थस्य निराकरणम् १७-१९
आनन्दतीर्थस्य सर्वज्ञत्वम्, दक्षिणदिग्विजयसमाप्तिः २०-२३
द्रौपद्याः श्रुतेश्च श्लेषेण वर्णनम्, भीमेन यथा द्रौपद्याः क्लेशपरिहारः प्रतिज्ञातः
तथा श्रुतेः अपार्थक्लेशपरिहारप्रतिज्ञा २४-३१
गीताभाष्यरचना ३२
बदरीयात्रारम्भः, मार्गे नानातीर्थेषु स्नात्वा पावनीकृत्वा गङ्गां तीर्त्वा बदरीक्षेत्रगमनम् ३३-३७
श्रीमन्नारायणाय गीताभाष्यसमर्पणम्, 'शक्तितः' इति पदस्थाने 'लेशतः'
इति पदं प्रयोक्तुं आदेशः, शिष्येभ्यः गीताभाष्यप्रवचनम् ३८-४२
अलकनन्दायां स्नानम्, काष्ठमौनव्रतानुष्ठानम्, श्रीवेदव्यासैः स्वाश्रमाय आगन्तुम् आह्वानम् ४३-४५
शिष्येभ्यः सन्देशं दत्वा व्यासाश्रमगमनारम्भः अनुगच्छतः सत्यतीर्थस्य
हस्तसंज्ञया निवर्तनादेशः ४६-५३
वायुवेगेन गमनम्, हिमालयवर्णनम् ५४-५७

सप्तमः सर्गः

हिमवत्पर्वते व्यासाश्रमदर्शनम् व्यासाश्रमवर्णनम् १-४
व्यासाश्रमं प्रविशतः श्री आनन्दतीर्थस्य वर्णनम् ५-१०
बदरीवृक्षवर्णनम् ११-१३
बदरीवृक्षस्य अधः वेदिकायां उपविष्टस्य श्रीवेदव्यासस्य परितः उपविष्टानां मुनीनां च वर्णनम् १४-४७
श्री वेदव्यासस्य समीपं गत्वा स्तुत्वा प्रणामानुष्ठानम्, श्रीवेदव्यासेन आनन्दतीर्थस्य आलिङ्गनम् ४८-५५
श्री वेदव्यासशिष्यैः आनन्दतीर्थाय यथोचितासनदानम् अर्घ्यपाद्यादिदानम् ५६-५८
विष्णुवाय्वोः अवतारभूतयोः श्रीवेदव्यासानन्दतीर्थयोः स्तुतिः ५९

अष्टमः सर्गः

श्रीवेदव्यास आनन्दतीर्थयोः गुरुशिष्यत्वप्रशंसा, श्री आनन्दतीर्थेन श्रीवेदव्यासात् इतिहास पुराणपञ्चारात्रादि सकल सत् शास्त्राध्ययनम् १-५
श्री वेदव्यासेन सह नारायणाश्रमगमनम्, श्रीनारायणस्य दर्शनम्, श्रीनारायणस्य सृष्टिकर्तृत्वादि महिमा वर्णनम् ६-१४
मत्स्यकूर्मवराहनरसिंहावामनपरशुरामावतारवर्णनम् १५-१८
श्रीरामावतारकृष्णावतारयोः महिमासाम्यवर्णनम् १९-३४
महिदासयज्ञधन्वन्तरिमोहिनीदत्तात्रेयकुमारऋषभहंसावतारवर्णनम् ३५-४०
परमात्मनः दशशतसहस्रानन्तरूपेभ्यः नमनम् एवमनेकरूपोपि एकरूपः इति निवेदनम् ४१
श्रीनारायणाय प्रणामः श्रीनारायणवेदव्यासयोः परस्परमालिङ्गनम्, विविधालापाः ४२-४३
श्रीनारायणेन श्री आनन्दतीर्थाय ब्रह्मसूत्रभाष्यरचनादेशः ४४-५३
त्रयः आम्नायाः इव, त्रयः पावकाः इव, त्रयो लोकाः इव, श्रीनारायण श्रीवेदव्यास श्री आनन्दतीर्थाः रेजिरे इति वर्णनम् ५४

॥ श्री वेदव्यासाय नमः ॥

॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यगुरुभ्यो नमः ॥

श्रीमत्कविकुलतिलकनारायणपण्डिताचार्यविरचितः

सुमध्वविजयः

प्रथमः सर्गः

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ॥ १ ॥

श्रीनारायणपण्डिताचार्यविरचिता भावप्रकाशिका

नमो जयात्मने यन्त्रे द्विजराजस्फुरच्छ्रिये ।
हरेरजस्य प्रिय ते हरये परमात्मने ॥

श्रीविश्वपतितीर्थविरचिता पदार्थदीपिकोद्बोधिका

श्रीमन्तं विट्ठलं नत्वा पूर्णबोधेष्टदैवतम् ।
श्रीमध्वविजयव्याख्यादीपमुद्बोधयाम्यहम् ॥

श्रीमन्नारायणपरमानुग्रहपात्रभूतस्य सकलसुरगुरोः श्रीमुख्यप्राणस्यावतारलीलां वर्णयितुकामा नारायणपण्डिताचार्याः शिष्टाचारपरंपराप्राप्तमखिलेष्टसाधनमिष्टदेवतानमस्कार-रूपं मङ्गलं कृत्वा सन्निहितशिष्यशिक्षार्थं ग्रन्थादौ निबध्नन्ति ॥ **कान्तायेति** ॥ कान्ताय रमणीयाय । कल्याणाः शोभनाः ये गुणाः ज्ञानानन्दबलैश्वर्यादिशुभधर्माः तेषां एकं मुख्यं यद्धाम मन्दिरम् तस्मै । निरतिशयगुणानां मुख्याश्रयायेत्यर्थः गुणैकदेहायेत्यपि । दिवोऽन्तरिक्षस्य नाथो द्युनाथः । 'दिव उत्' इत्युत् । नवो नूतनो यो द्युनाथः सूर्यः उद्यदादित्य इति यावत् । तेन प्रतिमा समाना प्रभा यस्य तस्मै । 'प्रख्यः प्रकाशः प्रतिमः

प्रकारस्तुल्यस्समः सन्निभ इत्यभिन्नाः' इति हलः। अखिलस्य समस्तजगतः कारणाय कारणभूताय। अखिलस्य जगत्सम्बन्धिसृष्ट्याद्यष्टकस्य कारणायेति वा। श्रयन्ते ब्रह्मादय एनामिति श्रीर्लक्ष्मीः, तस्याः प्राणनाथाय भर्त्रे। 'रमणः प्राणाधिनाथोऽनुगः' इति हलः। यद्वा, श्रियौ लक्ष्मीभारत्यौ, ते च प्राणो मुख्यप्राणः स च श्रीप्राणास्तेषां नाथाय, स्वामिने। अनेन गुणप्रधानभावेन परशुक्लत्रयवन्दनं च कृतं भवति। अरविरुद्धा दोषविरुद्धाः नारा गुणाः नैकधेत्यादिवन्न समासत्वात् 'नलोपो नञ' इति नञ एव लोपविधानान्न नलोपः। अत एव 'तस्मान्नुडचि' इति न नुट्। नाराणामयनमाश्रयस्तस्मै। 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इत्युक्तेः। नरादुत्पन्ना नारा आपस्ता अयनमाश्रयो यस्य तस्मा इति वा। पूर्वपदात्संज्ञायामगः' इति णत्वम्। 'नमस्करोमि, 'नमस्पुरसोर्गत्योरिति' सः। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'त्युक्तेर्नमस्करोति देवानिति प्रयोगाच्च नारायणं नमस्करोमीति भाव्यम् न नारायणायेति वाच्यमिति चेन्न 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति सूत्रेणाप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थीविधानादत्र चतुर्थ्युपपत्तेः। तथा च नारायणं प्रसादयितुं नमस्करोमीत्यर्थः। अत एव, 'नमस्कुर्मो नृसिंहाय' 'स्वयम्भुवे नमस्कृत्य' इत्याद्यभियुक्तप्रयोगाः सुप्रसिद्धाः। अस्मिन् सर्गे प्रायः उपजातिवृत्तम्। 'स्यादिन्द्रवज्रा यदि तौ जगौ गः'। 'उपेन्द्रवज्रा जतजास्ततो गौ'। अनन्तोरदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इत्युक्तेः। अनुप्रासप्रचुरमिदं काव्यम्॥ १॥

श्रीछलारिशेषाचार्यविरचिता मन्दोपाकारिणी

लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान्।
गुरून्मूलादिपरमान्वन्दे विद्यागुरूंस्तथा॥ १॥
छलारिनरसिंहार्यशिष्यः शेषाभिधो बुधः।
प्रवक्ति मध्वविजयं मन्दोपकृतये स्फुटम्॥ २॥

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मन इत्युक्तेः हरिभक्तिवत् गुरुभक्तेरपि पुरुषार्थसाधनत्वेन संपाद्यत्वात् वायोश्च महागुरुत्वात्तत्र भक्त्युत्पादनार्थं वाय्ववतारभूतहनुमद्भीममध्वानां माहात्म्यप्रतिपादकं प्रारिप्सिततया

चित्तसन्निहितं काव्यमारभमाणः श्रीमन्नारायणपण्डिताचार्यः शिष्टाचारपरम्पराप्राप्तं निर्विघ्नेन परिसमाप्तिप्रचयादिहेतुं स्वेष्टदेवताप्रणामं विधाय सज्जनशिक्षार्थं ग्रन्थादौ निबध्नाति ॥ **कान्तायेति** ॥ कान्ताय मनोहराय । कान्तं च कमनं कम्रं कमनीयं मनोहरमिति धनञ्जयः । कल्याणगुणैकधाम्ने कल्याणाः मङ्गलरूपाः । कल्याणं मङ्गलं शुभं इत्यमरः । गुणा ज्ञानानन्दादयः कल्याणाश्च ते गुणाश्च कल्याणगुणाः तेषामेकं मुख्यं धाम आश्रयः । यद्वा कल्याणगुणा एव एकं केवलं धाम देहो यस्य स तथोक्तस्तस्मै । एके मुख्यान्यकेवला इत्यमरः । धाम देहे गृहे रश्मावितिं विश्वः । नवद्युनाथप्रतिमप्रभाय नवः नूतनः नवीनो नूतनो नव इत्यमरः उद्यन् इति यावत् नवश्चासौ द्युनाथश्च सूर्यश्च तस्य प्रतिमा सदृशी प्रभा दीप्तिर्यस्य स तथोक्तस्तस्मै । अखिलकारणाय अखिलस्य समस्तजगतः निमित्तकारणाय । श्रीप्राणनाथाय श्रीर्लक्ष्मीः । कमला श्रीर्हरिप्रियेत्यमरः । प्राणः मुख्यवायुः तयोर्नाथाय स्वामिने । यद्वा श्रियः लक्ष्म्याः प्राणनाथाय वल्लभाय विष्णवे नमस्करोमीत्यन्वयः । डुकृञ् करण इति धातोः लट् परस्मैपदं करोमि कुर्वः कुर्मः इति रूपम् । वृत्तं तु उपजातिः 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' । 'उपेन्द्रवज्रा जतजास्ततो गौ' इन्द्रवज्रोपेन्द्रवज्रयोर्वृत्तयोरस्मिन् श्लोके समावेशात् । 'अनन्तोरदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति तल्लक्षणात् अस्मिन्सर्गे प्रायः उपजातिवृत्तम् ॥ १ ॥

अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्म ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय ॥ २ ॥

भावप्रकाशिका – **कृष्णाय** वासुदेवाय वेदव्यासाय च । **नित्यं** सततम् । अनाकुलं गोकुलं अविनाशिवाग्जातं वेदः ॥ २ ॥

पदार्थदीपिकोद्बोधिका – एवं गुणप्रधानभावेन परशुक्लत्रयवन्दनं कृत्वा कलिमलध्वंसिनौ व्यासकृष्णौ प्रणमति **अनाकुलमिति** ॥ येन श्रीवेदव्यासेन पालितं रक्षितं यत्पालितं, अत एव नित्यमविनाशि गोकुलं वाक्समूहः 'कुलं कुल्ये गणे गेहे देहे जनपदेऽन्वयः' इति हेमचन्द्रः वेद इत्यर्थः । आकुलं न भवतीत्यनाकुलं स्वरवर्णादिव्यत्यासरहितं सदित्यर्थः । आविलो विनष्टो न भवतीत्यनाविलः आत्मा स्वरूपं यस्य तदनाविलात्म अपपाठादिना स्वरूपतिरोधानरहितं सदित्यर्थः । उल्ललास उच्चैः शुशुभे ।

'लस श्लेषणक्रीडनयोः, इत्यस्माल्लिट्। नीरं जलं ददातीति नीरदो मेघः। 'आतोऽनुपसर्गे क' इति कर्तरि कः 'ततश्चातो लोप इटि च' इत्यालोपः। तद्वन्नीला भाः कान्तिर्यस्य तस्मै 'नीरक्षीरांबुशम्बरम्' इत्यमरः। कृष्णाया द्रौपद्याः रमणस्य भर्तुः भीमस्य प्रियस्तस्मै। 'कृष्णा तु द्रौपदी नीला हार क्रूरासु कथ्यते' इति विश्वः। तस्मै प्रसिद्धाय, कृष्णाय वेदव्यासाय नमः। 'कृष्णो नीले नले कलौ। शूद्रे काके पिके व्यासे ध्वान्तपक्षेऽर्जुने हरा'विति यादवः। यादवकृष्णपक्षे तु यत्पालितं येन श्रीकृष्णेन पालितं गोकुलं गवां समूहः नन्दगोपावासस्थानं वा। 'व्रजन्यां गोकुलं गोष्ठं' इति हलः। नित्यं सर्वदा अनाकुलं शत्रुभ्योऽसम्भ्रान्तं सत्। अनाविलात्म पूतनाकेश्यादिभ्योऽविनष्टस्वरूपम् सदुल्ललास सम्यग् शुशुभे। नीरदनीलभासे मेघश्यामकान्ताय, कृष्णारमणप्रियाय द्रौपदीपतिपाण्डवप्रियाय तस्मै कृष्णाय नम इति केवलप्रकृतश्लेषः॥ २॥

मन्दोपकारिणी – इदानीं वेदव्यासश्रीकृष्णौ एकोक्त्या प्रणमति॥ **अनाकुलमिति**॥ तस्मै कृष्णाय श्रीवेदव्यासाय नम इत्यन्वयः। वाच्यवन्मेचके कृष्णे भवेत्कृष्णोऽर्जुने हरौ। व्यासकोकिलयोर्ध्वाक्षे कृष्णश्चमरिलोहयोरिति विश्वः। कथंभूताय नीरदनीलभासे नीरं जलं नीरक्षीरांबुशंबरमित्यमरः तत् ददातीति नीरदो मेघः नीरदवत् नीला श्यामा भा दीप्तिः यस्य सः नीरदनीलभाः तस्मै। भाश्छविद्युतिदीप्तय इत्यमरः। पुनः कथंभूताय कृष्णाय कृष्णारमणप्रियाय कृष्णायाः द्रौपद्याः। कृष्णा तु द्रौपदी नीला हारक्रूरासु दृश्यत इति विश्वः। रमणाः भर्तारः धर्मादयः पाण्डुपुत्राः तेषां प्रियाय प्रीतिविषयाय तस्मै। कस्मै यत्पालितं येन वेदव्यासेन पालितं रक्षितं नित्यं अनादि अपौरुषेयमिति यावत्। गोकुलं गवां वाचां कुलं समूहं वेदसमूह इति यावत् अनाकुलं व्यत्यासरहितं अनाविलात्म आविलः कलुषः न भवतीत्यनाविलः। कंलुषोनच्छ आविल इत्यमरः स्वच्छ इति यावत् आत्मा स्वरूपं यस्य तत्तथोक्तं तादृशं सत् उल्ललास शुशुभे तस्मै कृष्णायेति संबन्धः। लस् विकास इत्यतो लिट् परस्मैपदं ललास लेसतुः लेसुः इति रूपम्। श्रीकृष्णपक्षे तु तस्मै कृष्णाय वसुदेवपुत्राय नम इति योजना। कथंभूताय नीरदनीलभासे कृष्णारमणप्रियायेति इदं विशेषणद्वयं पूर्ववद्व्याख्येयं तस्मै। यत्पालितं येन कृष्णेन पालितं संरक्षितं गोकुलं गवां धेनूनां कुलं समूहः। यूथं गौर्वाचि वृषभे चन्द्रे

वाग्भूदिग्धेनुषु स्त्रियामिति रत्नमाला। गोकुलं नन्दादिगोपावासस्थानं वा । नित्यमजस्रं अनाकुलं उद्वेगरहितं भयरहितमिति यावत्। अनाविलः निर्मलः आत्मा स्वभावो यस्य तत् तथोक्तं सत् उल्ललास बभौ ॥ २ ॥

अपि त्रिलोक्या बहिरुल्लसन्ती तमो हरन्ती मुहुरान्तरं च ।
दिश्याद्दृशं नो विशदां जयन्ती मध्वस्य कीर्तिर्दिननाथदीप्तिम् ॥३॥

पदार्थदीपिकोद्बोधिका – श्रीमदाचार्याणां कीर्तिं वर्णयितुकामस्तां प्रति तद्वर्णनोपयुक्तज्ञानदृष्टिं याचते **अपीति**। त्रयाणां लोकानां समाहारस्त्रिलोकी तस्याः। 'अकारान्तोत्तरपदो द्विगुस्त्रियामिष्टः' इति स्त्रीत्वात् 'द्विगो'रिति ङीप्। बहिरपि उल्लसन्ती शोभमाना। मुहुः पुनः पुनरपि। अन्तरे भवमान्तरम् मानसमित्यर्थः, 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनी'ति वैजयन्ती। तमोऽज्ञानम् हरन्ती। अत एव दिननाथदीप्तिं सूर्यप्रकाशं जयन्ती अतिशयाना मध्वस्य कीर्तिर्नोऽस्मभ्यम्। विशदां निर्मलाम्। दृशं ज्ञानदृष्टिं दिश्यात् प्रदिशतु। दिश अतिसर्जने आशीर्लिङ्। सूर्यदीप्तिस्त्रिलोक्या बहिर्न भाति। नाप्यान्तरं तमो हरति। नैवं मध्वकीर्तिरिति दिननाथदीप्तिं जयन्ती इत्युक्तमिति भावः । व्यतिरेकः ॥ ३ ॥

मन्दोपकारिणी – इदानीं मध्वाचार्यकीर्तिवर्णनेन स्वस्य निर्मलज्ञानप्राप्तिं प्रार्थयते ॥ **अपीति** ॥ मध्वस्य आनन्दतीर्थस्य। मध्व आनन्दतीर्थः स्यादित्युक्तेः। कीर्तिर्यशः नः अस्माकं, विशदां निर्मलां दृशं ज्ञानदृष्टिं दृक् ज्ञाने ज्ञातरि त्रिष्वित्यमरः दिश्यात् प्रदिशतु। 'दिश् अतिसर्जन' इत्यतः आशीर्लिङ् परस्मैपदं दिश्यात् दिश्यास्तां दिश्यासुः इति। कथंभूता कीर्तिः दिननाथदीप्तिं दिनानां दिवसानां नाथः अधिपः सूर्यः ''दिनानामधिपः सूर्यः'' इति वचनात् तस्य दीप्तिं प्रभां जयन्ती तिरस्कुर्वती तदपेक्षया अतिशयितेति यावत्। अतिशयमेव उपपादयति। त्रिलोक्या इति त्रिलोक्याः त्रयाणां लोकानां भुवनानां समाहारस्त्रिलोकी तस्याः। इयं पञ्चमीविभक्तिः। बहिरपि उल्लसन्ती प्रकाशमाना मुहुः पुनः आन्तरं अन्तर्विद्यमानं तमः अज्ञानं हरन्ती नाशयन्ती। दिननाथदीप्तिस्तु त्रैलोक्यात् बहिर्न शोभते किन्तु त्रिलोक्यन्तर एव, नापि आन्तरं तमो हरति किन्तु बाह्यमेव तमः अन्धकारं परिहरति। अतः मध्वस्य कीर्तेः दिननाथस्यापेक्षया अतिशयितत्वमिति भावः ॥ ३ ॥

तमोनुदाऽऽनन्दमवाप लोकस्तत्त्वप्रदीपाकृतिगोगणेन ।
यदास्यशीतांशुभुवा गुरूंस्तांस्त्रिविक्रमार्यान् प्रणमामि वर्यान्॥ ४ ॥

भावप्रकाशिका – तमस्तु अज्ञानकारणम्। तत्त्वप्रदीपात्मको ग्रन्थः तेजोगणश्च, वस्तुतत्त्वानां प्रदीपाकृतिः ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – स्वपितॄन् त्रिविक्रमपण्डिताचार्यान् प्रणमति **तम इति ॥** लोको जनः। 'लोकस्तु भुवने जने' इत्यमरः। येषां त्रिविक्रमाचार्याणामास्यं मुखं यदास्यं, तदेव शीतांशुः शीतकिरणश्चन्द्रः तस्माद्भवतीति तेन। तमोऽज्ञानं नुदतीति तमोनुत् तेन, 'क्विप् च' इति कर्तरि क्विप् अज्ञाननाशकेनेत्यर्थः। तत्त्वं श्रीविष्ण्वादिचराचरतत्त्वं प्रदीपयति प्रकाशयतीति तत्त्वप्रदीपः। श्रीमदाचार्यकृतब्रह्मसूत्रभाष्यव्याख्यानरूप तत्त्वप्रदीपिकाख्यो ग्रन्थः। स एवाकृतिः स्वरूपं यस्य स तत्त्वप्रदीपाकृतिः स चासौ गोगणो वाक्समूहश्च तेन। आनन्दः सन्तोषः तं अवाप। आप्लृ व्याप्तौ लिट्। वर्यान् उत्तमान्। त्रिविक्रमाश्च ते आर्याश्च त्रिविक्रमार्यास्तान्। त्रिविक्रमाख्यगुरूनित्यर्थः। प्रणमामि नमस्करोमि। 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वम्। अर्थान्तरे तु, शीतांशुभुवा चन्द्रादुत्पन्नेन, तमोनुदा अन्धकारनाशकेन। तत्त्वमबाधिततत्पदार्थस्वरूपं तस्मिन्, विषयसप्तमीयम्। प्रदीपवत्प्रकृष्टदीपवदाकृतिर्यस्य स तत्त्वप्रदीपाकृतिः, स चासौ गोगणो रश्मिसमूहश्च तेन । लोकश्चराचरात्मकं विश्वं यथाऽऽनन्दमाप्नुयात्तद्वद्यन्मुखादुत्पन्नेन तत्त्वप्रदीपाख्यग्रन्थेन जन आनन्दमवाप तान् त्रिविक्रमपण्डिताचार्यान् नमामीत्यभिप्रायः रूपकम्॥ ४ ॥

मन्दोपकारिणी – इदीनीं स्वपितॄन् प्रणमति ॥ **तम इति ॥** अहं तान् गुरून् पितॄन्। गुरुर्निषेकादिकरे पित्रादौ सुरमन्त्रिणीति विश्वः। त्रिविक्रमार्यान् त्रिविक्रमाख्याश्च ते आर्याः पण्डिताश्च तान् ऋ गतौ इति धातोः ''ऋहलोर्ण्यत्'' इति कर्तरि ण्यत्प्रत्यये आर्या इति रूपम् । ततश्च गत्यर्थानां ज्ञानार्थकत्वात् आर्याः पण्डिता इति व्याख्यातम्। प्रणमामि प्रकर्षेण भक्त्याद्यतिशयेन नमामि नमस्करोमि। नमु प्रव्हत्वे शब्दे चेत्यतो लट् परस्मैपदं नमामि नमावः नमामः। कथंभूतान् गुरून् वर्यान् उत्तमान् , लोकः जनः 'लोकस्तु भुवने जन इत्यमरः' तमोनुदा तमः अज्ञानं नुदति नाशयतीति तमोनुत् तेन। यदास्यशीतांशुभुवा येषां त्रिविक्रमपण्डिताचार्याणां आस्यं वदनम्। वक्त्रास्ये वदनं

तुण्डमाननं लपनं मुखमित्यमरः। तदेव शीतांशुः शीताः शीतलाः अंशवः किरणाः यस्य सः। किरणोस्रमयूखांशुरित्यमरः। शीतांशुश्चन्द्रः शीतांशोर्भुवा उत्पन्नेन तत्त्वप्रदीपाकृतिगोगणेन तत्त्वप्रदीपाख्या च सा आकृतिश्च समीचीनग्रन्थश्च तत्त्वप्रदीपाकृतिः गवां वाचां गणः समुदायः गोगणः तत्त्वप्रदीपाकृतेः गोगणः तत्त्वप्रदीपाकृतिगोगणः तेन आनन्दं सुखं अवाप प्राप्तवान्। आप्लृ व्याप्ताविति्यतो लिट् परस्मैपदं अवाप अवापतुः अवापुः इति। यथा चराचरात्मकलोकः तमोनुदा तमः अन्धकारं नुदति नाशयतीति तमोनुत् तेन शीतांशुभुवा चन्द्रादुत्पन्नेन तत्त्वप्रदीपाकृतिगोगणेन तत्त्वे तत्तत्पदार्थस्वरूपविषये प्रदीपाकृतिः प्रदीपवत् आकृतिः आकारो यस्य स तथोक्तः दीपवत्प्रकाश इत्यर्थः स चासौ गोगणश्च रश्मिसमूहश्च तेन। गौः स्वर्गे वृषभे रश्मावितिि विश्वः आनन्दं अवाप्नुयात् तथा यन्मुखादुत्पन्नेन तत्त्वप्रदीपनाम्ना ग्रन्थेन जनः आनन्दं अवाप तान् त्रिविक्रमार्यान् प्रणमामि इति भावः ॥ ४ ॥

मुकुन्दभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरन्तरायै।
गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलाम् ॥ ५ ॥

भावप्रकाशिका – अवताराणां लीलाम् ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – एवमिष्टदेवतागुरुवन्दनादिकं विधाय प्रयोजनाभिधानपूर्वकं चिकीर्षितं प्रतिजानीते **मुकुन्देति ॥** गुरुषु भक्तिर्गुरुभक्तिस्तस्या जायत इति गुरुभक्तिजा तस्यै 'पञ्चम्यावजाता'विति डः। मुचं मोक्षं ददातीति मुकुन्दः तस्मिन् या भक्तिस्तस्यै 'तादर्थ्ये चतुर्थी' गुरुभक्त्यर्थमित्यर्थः। हरिभक्तेर्गुरुभक्तिजत्वञ्च 'गुरुद्वारा प्रसादकृदहं' 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' 'अगम्यत्वाद्धरिस्तस्मिन्नाविष्टो मुक्तिदो भवेदि'त्यादिप्रमाणसिद्धम्। प्रयोजनान्तरञ्चाह निरन्तरेति। निर्गतमन्तरं व्यवधानं यस्याः सा निरन्तरा तस्यै। सतां सज्जनानां प्रसत्यै प्रसन्नतायै च। सकलसुरगुरुश्रीमुख्यप्राणस्यावतारलीलावर्णनेन सन्तोऽपि सन्तुष्टा भविष्यन्ति। तत्सन्तोषश्च श्रीमुख्यप्राणानुग्रहविशेषद्वारा श्रीहरिभक्तिविशेषहेतुः। सा च अपरोक्षज्ञानहेतुरित्यतः सुरादिसकलसत्प्रीत्यर्थश्चेति भावः। विश्वगुरोः सर्वजगद्गुरोः श्रीमुख्यवायोः। अतिशयेन गुर्वी गरीयसी

ताम्। 'द्विवचनविभज्योपपदे तरबीयसुना'वितीयसुन्। 'प्रियस्थिर' इत्यादिना गुरुशब्द-स्यगरित्यादेशः। उगित्वान्ङीप्। विशुद्धां निर्दोषामवतारलीलां हनुमदादिप्रादुर्भावानां लीलां वक्ष्यामि। वच परिभाषणे लृट्॥ ५॥

मन्दोपकारिणी – यदर्थमिष्टदेवतादिनमस्कारः कृतः तत् इदानीं प्रतिजानीते॥ **मुकुन्दभक्त्या** इति॥ विश्वगुरोः विश्वस्ये समस्तस्य मुक्तियोग्यजनस्य गुरोर्ज्ञानोपदेशकस्य गरीयसीं अतिशयेन गुरुतमामिति यावत्। विशुद्धां निर्दोषां अवतारलीलां अवताराणां हनुमदाद्यवताराणां लीलां कर्मचरितमिति यावत्। लीलाविलासक्रिययोरिति विश्वः। वक्ष्यामि वदिष्यामि वच् परिभाषण इत्यतो लृट् परस्मैपदं वक्ष्यामि वक्ष्यावः वक्ष्यामः इति। कस्मै प्रयोजनाय गुरुभक्तिजायै गुरोर्भक्तिः गुरुभक्तिः गुरुभक्तेर्जायत इति गुरुभक्तिजा तस्यै मुकुन्दभक्त्यै मुकुन्दे भक्तिः मुकुन्दभक्तिः तस्यै तादर्थ्ये चतुर्थी मुकुन्दभक्त्यर्थम्। भक्तिर्नाम माहात्म्यज्ञानपूर्वकसुदृढस्नेहः। मुकुन्दभक्तेर्गुरुभक्तिजन्यत्वात्, अप्यच्युतो गुरुद्वारा प्रसादकृदहं त्वित्यादिप्रमाणसिद्धम्। निरन्तरायै अविच्छिन्नायै। सतां सज्जनानां प्रसत्यै प्रसादाय च। सकलमुक्तियोग्यजनगुरूत्तमश्रीमुख्यप्राणावतारचरित्रवर्णनेन सन्तोऽपि सन्तुष्टा भवन्ति। तत्सन्तोषश्च सज्जनानुग्रहद्वारा हरिभक्तिहेतुः सा च मोक्षहेतुरिति भावः॥ ५॥

तां मन्त्रवर्णैरनुवर्णनीयां शर्वेन्द्रपूवैरपि वक्तुकामे।
संक्षिप्तुवाक्ये मयि मन्दबुद्धौ सन्तो गुणाढ्याः करुणां क्रियासुः॥ ६॥

भावप्रकाशिका – 'बळित्था तद्वपुषे धायि दर्शतं', 'भूषन्न योधि बभ्रुषु नम्रते, तां सुते कीर्तिं मघवन्महित्वा' इति सूक्तानि। 'विष्णोः पदे परमे मध्व उत्सः, विद्वान् मध्व उज्जभारा दृशे कं' इत्यादयो मन्त्रवर्णाः। गुणग्राहित्वादयो गुणास्तैराढ्याः॥ ६॥

पदार्थदीपिकोद्बोधिका – शर्वेन्द्रादिदेवश्रेष्ठैः बळित्थेत्यादिवेदजातेन वर्णनीयामव-तारलीलामयमल्पेन वाक्येनावर्णयदिति सन्तो न कुप्यन्तीत्याशयवान् तत्कृपामर्थयते। **तामिति**॥ शर्वेन्द्रौ रुद्रेन्द्रौ पूर्वौ आदी येषां तैः। कर्तरि तृतीया। मन्त्रवर्णैः बळित्थेत्यादिवेदैः। करणे तृतीया। 'कर्तृकरणयोस्तृतीये'त्यनुशासनात्। अनुवर्णनीयां

अनुवर्णयितुं योग्याम् अवतारलीलां वक्तुं काम इच्छा यस्य तस्मिन्। मन्दा अल्पा बुद्धिर्यस्य तस्मिन्। अत एव संक्षिप्तु संक्षेपशीलं वाक्यं यस्य तस्मिन्। 'त्रसिगृधिधृषिक्षिपेः क्नुः' इति समूपूर्वात्क्षिपेस्ताच्छील्ये क्नुः प्रत्ययः। मयि। गुणैः महत्त्वदयालुत्वादिगुणैराढ्याः सम्पन्नास्सन्तो महान्तः करुणां दयां क्रियासुः कुर्वन्तु। डुकृञ् करणे लिङ्॥ ६॥

मन्दोपकारिणी – तामिति॥ शर्वेन्द्रपूर्वैरपि शर्वः रुद्रश्च इन्द्रः शचीपतिश्च शर्वेन्द्रौ तौ पूर्वौ आदी येषां ते तथोक्ताः तैः सुरैरिति शेषः। मन्त्रवर्णैः वेदैः करणैः 'बळित्था तद्वपुषे धायि दर्शतं 'भूषन्न योधि बभ्रूषु नम्नते तां सुते कीर्तिं मघवन्महित्वा' 'विष्णोः पदे परमे मध्व उत्सः' विद्वान् मध्व उज्जभारा दृशे कं' इत्याद्यैरित्यर्थः। अनुवर्णनीयां अनुवर्णयितुं योग्यां तां अवतारलीलाम्। वक्तुकामे वक्तुं वर्णयितुं काम इच्छा यस्य स तथोक्तस्तस्मिन्। इच्छा मनोभवः काम इत्यमरः। मन्दबुद्धौ मन्दा अल्पा अल्पविषयिणि इति यावत् बुद्धिर्मतिर्यस्य स तथोक्तः तस्मिन्। अत एव संक्षिप्तुवाक्ये संक्षिप्तूनि संक्षेपणशीलानि स्वल्पानीति यावत् वाक्यानि पदसमूहरूपाणि यस्य स तथोक्तस्तस्मिन् मयि। गुणाढ्याः गुणैः दोषग्राहित्वसारग्राहित्वदयालुत्वादिभिः आढ्याः सम्पन्नाः सन्तः उत्तमाः जनाः। 'सच्छब्द उत्तमं ब्रूयात्' इत्युक्तेः। करुणां कृपां क्रियासुः कुर्वन्तु। डु कृञ् करण इत्यस्माद्धातोः कर्मणि आशीर्लिङ् परस्मैपदं क्रियात् क्रियास्तां क्रियासुरः इति। बहुवाक्यैर्वर्णनीयां वायोरवतारलीलां अल्पवाक्यैरकथयदिति महान्तो न कुप्यंत्विति भावः। इन्द्रवज्रावृत्तं लक्षणं तु प्रथमश्लोके उक्तम्॥ ६॥

उच्चावचा येन समस्तचेष्टाः किं तत्र चित्रं चरितं निवेद्यम्।
किन्तूत्तमश्लोकशिखामणीनां मनोविशुद्धयै चरितानुवादः॥ ७॥

पदार्थदीपिकोद्बोधिका – सर्वचेष्टकस्य वायोरवतारलीलायाः साकल्येन वर्णयितुमशक्यत्वान्मनोविशुद्धयर्थत्वेन वेदगणप्रतिपादितचरित्राणामनुवादमात्रं लेशतः क्रियत इत्याह। **उच्चेति॥** येन श्रीमुख्यप्राणेन उच्चाः महापर्वतोद्धरणाद्याः ताश्च अवचाः अल्पतृणाद्युद्धरणाद्यास्ताश्च, उच्चावचाः मयूरव्यंसकादिवत्समासः। समस्तचेष्टाः समस्तप्राणिनां व्यापाराः स्युरिति शेषः। कारकाणां प्रयोगे तु क्रियाभावेऽस्ति तिष्ठतीऽति वचनान्नाध्याहारो दोषः।

सर्वेषां जीवानां देहेन्द्रियनियमनार्थं सर्वजीवान्तर्गतेन येन मुख्यप्राणेन सर्वचेष्टा भवन्तीत्यर्थः। तत्रैवं सर्वप्रवर्तकस्य चरितेषु किं चरितं किं कर्म चित्रम् इदं चित्रमिति निवेद्यं निवेदयितुं शक्यं वर्णयितुं शक्यमित्यर्थः। तत्कृतानां सर्वेषामपि चरितानां चित्रत्वादिदं चित्रमिति विशिष्य वर्णयितुमशक्यमिति भावः। तर्हि न वर्णनीयमित्याशयेन शङ्कते। **किन्त्विति** ॥ उत्तरमाह उत्तमेत्यादिना। उत्तमः श्लोकः कीर्तिर्येषां तेषु शिखामणय इव चूडायाः रत्नानीव तेषां। 'पद्ये यशसि च श्लोक' इत्यमरः। श्रीहरिभक्तानां मध्येऽत्युत्तमानामित्यर्थः। चरितानुवादः चरित्राणामनुवर्णनम् 'भाव' इति सूत्रेण भावार्थे घञ्। मनोविशुद्धयै तादर्थ्ये चतुर्थी, चित्तशुद्ध्यर्थमित्यर्थः। स्यादिति योज्यम् ॥ ७ ॥

मन्दोपकारिणी – उच्चेति ॥ येन मुख्यवायुना उच्चावचाः उच्चाः पर्वतोद्धारणाद्याः अवचाः तृणोद्धारणाद्याः उच्चाश्चावचाश्चेति द्वन्द्वः। अनेकप्रकारा इति यावत्। उच्चावचं नैकभेदमित्यमरः। समस्तचेष्टाः समस्तव्यापाराः सर्वप्राणिनां स्युरिति शेषः। सर्वेषां देहेन्द्रियनियामकतया सर्वान्तर्गतेन येन वायुना सर्वे व्यापारा यत्प्रेरणया भवन्ति तत्र एवं सर्वप्रवर्तकवायुचरितेषु मध्ये किं चरितं कर्म चित्रम् आश्चर्यमिति निवेद्यं निवेदयितुं वर्णयितुं शक्यम्। तत्कृतानां सर्वेषामपि चरितानां चित्रत्वात् इदं चित्रमिति विशेषतो वर्णयितुं न शक्यमिति भावः। तर्हि न वर्णनीयं किमित्याशङ्कते किंत्विति तस्योत्तरमाह **उत्तमेति** ॥ उत्तमश्लोकशिखामणीनां उत्तमः पुण्यकरः श्लोकः यशः येषां ते उत्तमश्लोकाः। पद्ये यशसि च श्लोक इत्यमरः। तेषां शिखामणयः चूडामणयः शिरोरत्नभूता इत्यर्थः। उत्तमा इति यावत्। तेषां चरितानां चरित्राणां अनुवादः अनुवर्णनं मनोविशुद्धयै मनसः हृदयस्य विशुद्धयै। तादर्थ्ये चतुर्थी। रागद्वेषादिदोषपरिहारार्थं स्यात् अतो वर्णनीयमिति भावः ॥ ७ ॥

मालाकृतस्तच्चरिताख्यरत्नैरसूक्ष्मदृष्टेः सकुतूहलस्य।
पूर्वापरीकारमथापरं वा क्षाम्यन्तु मे हन्त मुहुर्महान्तः ॥ ८ ॥

भावप्रकाशिका – अपरं वा अपरपूर्वीकारं वा ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – यथा कश्चिन्मालाकारोऽनर्घरत्नानि दृष्ट्वा सम्भ्रान्तः सन् तद्ग्रथने आनुपूर्वीं विहाय पूर्वापरीकारादिकं कुर्यात्, तद्वत् अहमपि स्वतो मन्दबुद्धिः सन्

अनेकश्रुतिप्रतिपादितश्रीमुख्यप्राणस्य चरितारव्यरत्नानि दृष्ट्वा सम्भ्रान्तः सन् तद्वर्णनविषये यदि पूर्वापरीकारादिकं कुर्यां तदा महान्तोऽनुकम्पया तत्क्षाम्यन्त्वित्याशयवानाह **मालेति**॥ महान्तः सज्जनाः तस्य वायोः यानि चरितानि कर्माणि तानीति आख्या नाम येषां तानि तथोक्तानि तानि च तानि रत्नानि च तैः। करोतीति कृत् मालायाः कृत् तस्य। 'क्विप् च' इति कर्तरि क्विपि'ह्रस्वस्य पिति कृति तुक्' इति तुक्। दृष्टिर्दर्शनं 'स्त्रियां क्तिन्', इति भावे क्तिन्। सूक्ष्मा च सा दृष्टिश्च न विद्यते सूक्ष्मदृष्टिः साकल्येन सर्वार्थविषयकज्ञानं यस्य तस्य। सकुतूहलस्य ससंभ्रमस्य मे मम। पूर्वस्य पूर्वं वर्णनीयस्य चरित्रस्य अपरीकारः अपरीकरणं पश्चाद्वर्णनमित्यर्थः। अथ अथवा अपरं वा पश्चाद्वर्णनीयस्यादितो वर्णनं वेत्यर्थः। मुहुः पुनः पुनः क्षाम्यन्तु। 'क्षमूष् सहने' लोट्। हर्षद्योतकं हन्तेत्येतत् 'हन्त हर्षेऽनुकम्पायां' इत्यमरः। पूर्वापरीकारकरणादौ निमित्तमुक्तमसूक्ष्मदृष्टेरिति, असूक्ष्मदृष्टित्वेऽपि सम्यग् विमर्शेन पूर्वापरीकारादिकं परिहर्तुं शक्यत इत्यत उक्तं सकुतूहलस्येति। सकुतूहलस्य न विचारावसर इति भावः। रूपकम्॥ ८॥

मन्दोपकारिणी – मालेति॥ महान्तः सज्जनाः। तच्चरिताख्यरत्नैः तस्य श्रीमुख्यप्राणस्य चरितानीति आख्या नाम येषां तानि तथोक्तानि तान्येव रत्नानि पद्मरागमौक्तिकादिमणयः तैः। रत्नं मणिर्द्वयो रश्मजातौ मुक्तादिकेऽपि चेत्यमरः। मालाकृतः मालां स्रजं करोति रचयतीति मालाकृत् तस्य। मे मम। पूर्वापरीकारं पूर्वस्य प्रथमतो वर्णनीयस्य चरितस्य अपरीकारं पश्चाद्वर्णनं अपरं प्रकारान्तरं च पश्चाद्वर्णनीयस्य चरितस्यादितो वर्णनमपि चेत्यर्थः। हन्त अनुकम्पायां हर्षणे वा। हन्त हर्षेऽनुकम्पायामित्यमरः। मुहुः भृशं क्षाम्यंतु सहन्तु ''क्षमूष् सहन'' इत्यतो लोट् परस्मैपदं क्षाम्यतु क्षाम्यतात् क्षाम्यतां क्षाम्यंतु इति। पूर्वापरीकरणस्य निमित्तमाह असूक्ष्मदृष्टेरिति। सूक्ष्मा गुह्यार्थविषयिणी च सा दृष्टिर्ज्ञानं न विद्यते सूक्ष्मदृष्टिर्यस्य स तथोक्तः तस्य। दृष्टिर्ज्ञानेक्ष्णि दर्शन इत्यमरः। अत एव पूर्वापरीकारादिकं सम्भावितमिति भावः। असूक्ष्मदृष्टेरपि परामर्शेन पूर्वापरीकारादिकं परिहर्तुं शक्यत इत्याशङ्क्य तदशक्यमित्याह सकुतूहलस्येति। सकुतूहलस्य कुतूहलं कौतुकं औत्सुक्यमिति यावत् तेन सहितस्य। कुतुकं च कुतूहलमित्यमरः। सन्तोषयुक्तत्वादेवापरामर्शावसर इति भावः। यथा कश्चिन्मालाकारः

अनर्घ्यरत्नानि दृष्ट्वा सम्यक् सम्भ्रमयुक्तः सन् क्रमं विहाय पूर्वापरीकारादिकं कुर्यात् तद्वत् अहमपि स्वतो मन्ददृष्टिः सन् चरिताख्यरत्नानि दृष्ट्वा सम्भ्रमान्तःकरणः सन् यदि पूर्वापरीकारादिकं कुर्यां तर्हि महान्तोऽनुकम्पया तत् मुहुः क्षाम्यंत्विति ॥ ८ ॥

श्रीवल्लभाज्ञां ससुरेन्द्रयाञ्चां सम्भाव्य सम्भाव्यतमां त्रिलोक्याम् ।
प्राणेश्वरः प्राणिगणप्रणेता गुरुः सतां केसरिणो गृहेऽभूत् ॥ ९ ॥

भावप्रकाशिका – तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः । भरद्वाजादयो धन्यं पुत्रं केसरिणो ददुः ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – वायोरवतारलीलां वक्ष्यामीत्युक्तं तत्र हनुमदवतारस्य प्राथमिकत्वात्तत्प्रादुर्भावकथनपूर्वकं तल्लीलां वक्तुमारभते । **श्रीवल्लभेत्यादिना ॥** प्राणिनां जीवानां गणः समूहस्तस्य प्रणेता प्रेरकः । प्राणिगणस्येति कर्मणः शेषत्वविवक्षायां तृजन्तेन प्रणेतृशब्देन 'षष्ठी'ति षष्ठीतत्पुरुषः । 'कर्तृकर्मणोः कृती'ति कृल्लक्षणषष्ट्यास्तृजकाभ्यां कर्तरि चे'ति षष्ठीसमासप्रतिषेधात् । सतां गुरुः हितोपदेष्टा । प्राणेश्वरः सर्वजीवाधीश्वरः । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति यादवः । सुरेन्द्राणां सुरश्रेष्ठानां रुद्रादीनां याञ्चा हे स्वामिन् ! भुव्यवतीर्य राक्षससंहारं कुर्विति प्रार्थना तया सहिता ससुरेन्द्रयाञ्चा ताम्। त्रिलोक्याम् । अतिशयेन सम्भाव्या सम्भाव्यतमा तां 'अतिशायने तमबिष्ठना'विति तमप् । श्रीवल्लभाज्ञां श्रीकान्ताज्ञां सम्भाव्य आदृत्य केसरिणः केसरिनाम्नो वानरस्य गृहे भार्यायाम् अञ्जनादेव्यां 'जाया च गृहिणी गृहम्' इति हलः । अभूत् मुख्यवायुना अनुग्रहपूर्वकमञ्जनायाः स्पर्शनमात्रात्प्रादुर्भूतः । 'तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः । भारद्वाजादयो धन्यं पुत्रं केसरिणो ददुः' ॥ इति वचनान्मुनीनां वरादेव केसरिपुत्रत्वं प्राणो भेज इत्यतः केसरिपुत्रत्त्वमौपचारिकम् ॥ ९ ॥

मन्दोपकारिणी – वायोरवतारलीलां वक्ष्यामीत्युक्तं तत्र हनुमदाख्यावतारस्य प्राथमिकत्वात्तल्लीलां वक्तुमारभते ॥ **श्रीवल्लभाज्ञामित्यादिना ॥** प्राणिगणप्रणेता प्राणिनां चेतनानां प्राणी तु चेतनो जन्मीत्यमरः गणाः बहुविधाः समुदायास्तेषां प्रणेता नायकः । अधिभूर्नायको नेतेत्यमरः प्रेरक इति यावत् । सतां मुक्तियोग्यानां गुरुः ज्ञानोपदेष्टा ।

प्राणेश्वरः प्राणानामिन्द्रियाभिमानिसूर्यादिदेवतानां ईश्वरः श्रेष्ठः मुख्यप्राण इति यावत्। केसरिणः केसरिनाम्नो वानरस्य गृहे भार्यायाम्। गृहिणी गृहमित्यमरः। अभूत् प्रादुरभूत्। भू सत्तायामित्यतो लुङ् परस्मैपदं अभूत् अभूतां अभूवन्। किं कृत्वा ससुरेन्द्रयाञ्चां सुरेन्द्राः देवश्रेष्ठाः तेषां याञ्चा प्रार्थना तया सहिताम्। त्रिलोक्यां लोकत्रये संभाव्यतमां संभावयितुं बहुमानयितुं योग्या संभाव्या अतिशयेन संभाव्या संभाव्यतमा तां सर्वैः अवश्यमङ्गीकरणीयामित्यर्थः। श्रीवल्लभाज्ञां श्रियः वल्लभस्य दयितस्य नारायणस्य आज्ञां कार्यं कुर्वित्येवंरूपां वाचं संभाव्य आदृत्य अङ्गीकृत्येति यावत्॥ ९॥

ये ये गुणा नाम जगत्प्रसिद्धा यं तेषु तेषु स्म निदर्शयन्ति।
साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः॥ १०॥

भावप्रकाशिका – पराक्रमोत्साहमतिप्रतापैः सौन्दर्यमाधुर्यदयानयैश्च। गांभीर्यचातुर्य-सुवीर्यधैर्यैर्हनूमतः को ह्यधिकस्त्रिलोक्याम्॥ प्रवीविविक्षोरिव सागरस्य लोकान् दिधक्षोरिव पावकस्य। लोकक्षयेष्वेव यथान्तकस्य हनूमतः स्थास्यति कः पुरस्तात्॥ ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं साध्यति वै कपीन्द्रः। न ह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव इति श्रीमद्वाल्मीकिरामायणे उत्तरकाण्डे॥ १०॥

पदार्थदीपिकोद्बोधिका – तस्य हनुमच्छब्दवाच्यत्वे निमित्तमाह। **य इति**॥ ये ये गुणानाम गुणशब्दवाच्याः जगत्प्रसिद्धाः लोकेषु प्रसिद्धाः। 'इन्द्रे शौर्यं बलं वायौ कान्तिश्चन्द्रमसि क्षमा पृथिव्याम्' इत्यादिप्रकारेण तत्र तत्र प्रख्याता इत्यर्थः। यद्वा नामेत्यव्ययं प्रसिद्धार्थे वर्तते 'सिद्धिरुत्पत्तिर्ज्ञप्तिर्वा' इत्युक्तेः प्रसिद्धशब्दः प्रमित इत्यर्थे वर्तते। तथा च जगत्प्रसिद्धाः इन्द्रादिलोकेषु प्रमिताः ये ये गुणा नाम गुणा इति प्रसिद्धा इति वा तेषु तेषु गुणत्वेन प्रसिद्धेषु यं केसरिपुत्रं कवयो निदर्शयन्ति स्म, दृष्टान्तमकुर्वन्। 'लट् स्म' इति भूतार्थे लट्, 'दृशिर् प्रेक्षणे' लट्। साक्षात् निरुपचारेण। महान्तो ये भागवता भगवद्भक्तास्तेषु प्रबर्हः श्रेष्ठस्तम्। 'मुख्यं पुरोगं प्रवरं प्रबर्हम्' इति हलः। श्रीमन्तं कान्तिमन्तमेनं केसरिपुत्रं हनुमन्तं हनुमच्छब्दवाच्यमाहुर्वदन्ति। ब्रूञ् व्यक्तायां वाचि लट्। 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इत्याहादेशः। 'हनुशब्दो ज्ञानवाची' इति वचनात् ज्ञानवाचिहनुशब्दोऽलक्षितसकलगुणवत्त्वात् हनुमानिति जगत्प्रसिद्धोऽभूदिति भावः॥ १०॥

मन्दोपकारिणी – ये य इति॥ ये ये गुणा नाम गुणशब्दवाच्यत्वेनेत्यर्थः। जगत्प्रसिद्धाः सन्ति तेषु गुणत्वेन जगत्प्रसिद्धेषु धर्मेषु महान्त इत्यध्याहारः यं केसरिपुत्रं निदर्शयन्ति स्म दृष्टान्तमकुर्वन्। निपूर्वात् दृशिर् प्रेक्षण इत्यतो लट् परस्मैपदं दर्शयति दर्शयतः दर्शयन्ति। स्मशब्दयोगेन लटो भूतार्थकत्वम्। तमेनं केसरिपुत्रं हनुमन्तं हनुमन्नामकं आहुः वदन्ति। ब्रूञ् व्यक्तायां वाचीत्यतो लट् परस्मैपदं आह आहतुः आहुरिति। यस्मात् हनुशब्दवाच्याः सर्वेऽपि ज्ञानादयो धर्माः अस्मिन् केसरिपुत्रे सन्तीति ज्ञानिप्रत्यक्षसिद्धम्। 'ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे' इत्युक्तेः। हनुशब्दस्य ज्ञानवाचित्वात् हनुशब्देन वैराग्यभक्त्यादिसर्वेषां गुणशब्दवाच्यानां उपलक्षणया ग्रहणात्। हनुरस्यास्तीति हनुमानिति व्युत्पत्त्या ज्ञानोपलक्षितसर्वगुणाश्रयत्वस्य प्रतीतेः एनं केसरिपुत्रं हनुमन्तं वदन्तीति भावः। कथंभूतं एनं साक्षात् मुख्यतः महाभागवतप्रबर्हं भगवतः इमे भागवताः भगवद्भक्ता इत्यर्थः। महान्तश्च ते भागवताश्च महाभागवताः तेषु प्रबर्हं मुख्यम्। मुख्यवर्यवरेण्याश्च प्रबर्होऽन वरार्घ्यवदित्यमरः। पुनः किम्भूतं श्रीमन्तं श्रीः कान्तिः सम्पत् अस्यास्तीति श्रीमान् तम्। श्रीः पद्मा कान्तिसम्पदोरिति धनञ्जयः। इन्द्रवज्रावृत्तम्॥ १०॥

कर्माणि कुर्वन् परमाद्भुतानि सभासु दैवीषु सभाजितानि।
सुग्रीवमित्रं स जगत्पवित्रं रमापतिं रामतनुं ददर्श ॥ ११॥

पदार्थदीपिकोद्बोधिका – तृतीयावतारलीलां सप्रपञ्चं विवक्षुः आद्यावतारलीलां संक्षेपेण तावद्वक्तुमारभते **कर्माणीत्यादिना**॥ परमाणि च तानि अद्भुतानि च अत्याश्चर्याणीत्यर्थः। देवानां सम्बन्धिन्यो दैव्याः तासु दैवीषु सभासु सभाजितानि मानितानि कर्माणि 'राहुनिग्रहः, सूर्यरथेन सह महामेरुपरिवर्तनमित्यादिकर्माणि' कुर्वन्। सुग्रीवमित्रं सुग्रीवस्यानिमित्तोपकारी स हनुमान् जगत्पवित्रं जगति शुद्धं पूत्रः 'संज्ञाया'मिति करणेऽर्थे इत्रच्। निर्दोषमित्यर्थः। राम इति तनुः स्वरूपं यस्य तं रमापतिं श्रीरामं ददर्श। सीतान्वेषणव्याजेन ऋष्यमूकगिरिं प्रत्यागतं श्रीरामं तत्र ददर्शेति भावः॥ ११॥

मन्दोपकारिणी – कर्माणिति॥ परमाद्भुतानि परमं अत्यन्तं अद्भुतानि

आश्चर्याणि। दैवीषु देवानां सम्बन्धिन्यः दैव्यः तासु सभासु सभाजितानि आदृतानि कर्माणि चरितानि कुर्वन्। सुग्रीवमित्रं सुग्रीवस्य तन्नामकस्य वानरस्य मित्रं सखा। अथ मित्रं सुहृत्सखेत्यमरः। मित्रशब्दो नित्यनपुंसकः। सः हनुमान् जगत्पवित्रं जगति पवित्रं शुद्धं जगत् लोकं पावयति पवित्रीकरोति स्वदर्शनादिनेति जगत्पवित्रस्तमिति वा। रामतनुं रामाख्या राघवरामाख्या तनुः अवतारः यस्य तम्। रमापतिं रमायाः इन्दिरायाः पतिं भर्तारम् धवः प्रियः पतिर्भर्तेत्यमरः। ददर्श दृष्टवान्। दृशिर् प्रेक्षण इत्यतो लिट् परस्मैपदं ददर्श ददृशतुः ददृशुः ॥ ११ ॥

पादारविन्दप्रणंतो हरीन्द्रस्तदा महाभक्तिभराभिनुन्नः।
अग्राहि पद्मोदरसुन्दराभ्यां दोर्भ्यां पुराणेन स पूरुषेण ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – दृष्ट्वा च प्रणतं हनुमन्तं श्रीराम उत्थापितवानित्याह। **पादेति** ॥ तदा महती या भक्तिः सैव भरो भारः तेन अभिनुन्नः अभितः प्रेरितः। महतीशब्दस्य 'पुंवत्कर्मधारये'ति पुंवद्भावे 'आन्महत' इति आत्वम्। 'भरोऽतिशयभारयो'रिति वैजयन्ती। अत एव पादावरविन्दे इव कमले इव तयोः प्रणतः हरीन्द्रः कपीन्द्रः स हनुमान्, पुरा आदिकाले अनति चेष्टत इति पुराणस्तेन पूरुषेण श्रीरामेण। 'पुरुषाः पूरुषा नराः' इत्यमरः। पद्मस्य यदुदरमन्तर्भागः तद्वत्सुन्दरौ रमणीयौ ताभ्यां दोर्भ्यां हस्ताभ्यां अग्राहि गृहीत उत्थापित इति यावत्। यथा महाभारमुद्वहन्नशक्तत्वात्पतन् कश्चित्केनचिदाशु गृह्यते तद्वदिति श्लेषाभिप्रायः। उपमा ॥ १२ ॥

मन्दोपकारिणी – **पादारविन्देति** ॥ तदा रामदर्शनकाले महाभक्तिभराभिनुन्नः महती च सा भक्तिश्च महाभक्तिः स एव भरः भारः भरोऽतिशयभारयोरित्यमरः तेन नुन्नः प्रेरितः। अत एव पादारविन्दप्रणतः पादौ चरणे अरविन्दे इव पद्मनीव । वा पुंसि पद्मं नलिनमरविन्दं महोत्पलमित्यमरः। तयोः प्रणतः प्रकर्षेण नतः प्रह्वः । हरीन्द्रः हरीणां वानराणां इन्द्रः ईशिता चन्द्रे सूर्ये यमे विष्णौ वासवे दर्दुरे हये। मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृत इति धनञ्जयः। भद्रेन्द्र इन ईशितेति च। स हनूमान् पुराणेन पुरातनेन। पुराणप्रतनप्रत्नपुरातनचिरन्तना इत्यमरः। पूरुषेण रामेणेत्यर्थः। पद्मोदरसुन्दराभ्यां पद्मस्य कमलस्य उदरवत् अन्तस्थदलवत् सुन्दराभ्यां मनोहराभ्यां दोर्भ्यां

कराभ्यां अग्राहि गृहीत उत्थापित इति यावत्। ग्रह उपादान इत्यतः कर्मणि लुङ् आत्मनेपदं अग्राहि अग्राहिषातां अग्राहिषत इति ॥ १२ ॥

अदार्यसालावलिदारणेन व्यापादितेन्द्रप्रभवेन तेन।
प्राद्योतनिप्रीतिकृता निकामं मधुद्विषा संदिदिशे स वीरः ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – स्वबलपरीक्षार्थं सुग्रीवप्रदर्शितसप्तसालविदारकेण स्वमित्र सुग्रीवप्रीत्यर्थं वालिनिग्रहं कृतवता श्रीरामेण सीतान्वेषणार्थं हनुमान् प्रेषित इत्याह। **अदार्येति** ॥ अदार्याणां श्रीरामेतरैर्दारयितुमनर्हाणां सालानां सालवृक्षाणां आवलेर्दारणं विदारणं येन तेन। इन्द्रात्प्रभव उत्पत्तिर्यस्येति इन्द्रप्रभवः। प्रभवतीति प्रभवः पचाद्यच्। इन्द्रात्प्रभव इति वा। व्यापादितः संहृत इन्द्रप्रभवो वाली येन तेन। अत एव निकामं नितरां, प्रद्योतनस्य सूर्यस्यापत्यं पुमान् प्राद्योतनिः सुग्रीवस्तस्य प्रीतेः कृत् करोतीति कृत् तेन। द्वेष्टीति द्विट् 'सत्सूद्विष' इत्यादिना कर्तरि क्विप्। मधोः मधुनामकदैत्यस्य द्विट् शत्रुः तेन। 'शत्रुः सपत्नो भ्रातृव्यः प्रत्यनीको द्विषन्मत' इति हलः। तेन श्रीरामेण वीरः स हनुमान् सन्दिदिशे सीतान्वेषणार्थं सम्प्रेषितः। दिश अतिसर्जने कर्मणि लिट् ॥ १३ ॥

मन्दोपकारिणी – अदार्येति ॥ अदार्यसालावलिदारणेन दारयितुं शक्याः दार्याः न दार्याः अदार्याः रामेतरैरभेद्या इत्यर्थः। ते च ते सालाश्च तालवृक्षाश्च तेषामावलिः पङ्क्तिः तस्या दारणं भेदनं येन स तथोक्तः। अत्र ''सालः पादपमात्रे स्यादि''त्यभिधानात् साल-शब्दस्य सामान्यवाचित्वेऽपि वृक्षविशेषाः तालवृक्षा ग्राह्याः रामायणोक्तेः। वीथ्यालिरावलिः पंक्तिरित्यमरः। व्यापादितेन्द्रप्रभवेन इन्द्रात्प्रभव उत्पत्तिर्यस्य स इन्द्रप्रभवः व्यापादितः हिंसितः इन्द्रप्रभवो वाली येन स तथोक्तस्तेन। अत एव निकामं नितराम्। प्राद्योतनि-प्रीतिकृता प्रद्योतनः सूर्यः, प्रद्योतनो दिनमणिरित्यमरः। प्रद्योतनस्यापत्यं पुमान् प्राद्योतनिः सुग्रीवः तस्य प्रीतिं हर्षं करोतीति प्रीतिकृत् तेन। मधुद्विषा मधोः मधुनाम्नः द्विट् शत्रुः तेन रामेण वीरः पराक्रमी। शूरो वीरश्च विक्रान्त इत्यमरः आरब्धान्तगामीति यावत्। स हनुमान् सन्दिदिशे सीतान्वेषणार्थं प्रेषितः। संपूर्वादिश् आज्ञापने इत्यस्मात्कर्मणि लिडात्मनेपदं दिदिशे दिदिशाते दिदिशिरे ॥ १३ ॥

कर्णान्तमानीय गुणग्रहीत्रा रामेण मुक्तो रणकोविदेन ।
स्फुरन्नसौ वैरिभयङ्करोऽभूत् सत्पक्षपाती प्रदरो यथाऽग्र्यः ॥ १४ ॥

भावप्रकाशिका – गुणग्रहीत्रा दोषेतरग्राहिणा ज्याकर्षणेन च। पक्षो भागः पतत्रं च ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – सीतान्वेषणार्थं लङ्कां प्रति गच्छन्तं हनूमन्तं श्रीरामशर-साम्येन वर्णयति। **कर्णान्तमिति ॥** गुणान् पराक्रमादिशुभधर्मान् गृह्णाति तच्छील इति, तेन। गुणानां ग्रहीता तेनेति वा। घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः' इतिवच्छेष-षष्ठ्याः समासः। 'पराक्रमे दक्षयशःप्रतापैः सौजन्यमाधुर्यनयानयैश्च। गाम्भीर्यचातुर्य-सुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकस्त्रिलोक्याम् ॥ प्रजां मिमङ्क्षोरिव सागरस्य लोकान् दिधक्षोरिव पावकस्य। सर्वं जिहीर्षोरिव चान्तकस्य हनूमतः स्थास्यति कः पुरस्तात्' ॥ इत्याद्युत्तररामायणप्रसिद्धगुणान् जानता वदता वेति भावः। गुणो मौर्वी च। गुणग्रहीत्रा मौर्वीग्राहिणा । रणे युद्धे कोविदेन चतुरेण श्रीरामेण। कर्णस्यान्तः समीपं तं, 'अन्तोऽस्त्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिक' इति वैजयन्ती आनीय मौर्वीकर्षको रामः यथा मौर्वीं कर्णान्तमाकृष्य बाणं मुञ्चति तद्वत् सीतां प्रति रहसि वक्तव्यमभिज्ञारूपं प्रमेयमङ्गुलीयप्रदानपूर्वकं वक्तुं कर्णान्तिकमानीयेति भावः। रामेण मुक्तः प्रेषित इति भावः। स्फुरन् शोभमानः। सत्सु पक्षपातः स्वीयताग्रहः सत्पक्षपातः सोऽस्यास्तीति तथोक्तः। शरोऽपि सत्पक्षेण शोभनपत्रेण पातो गमनं तद्वान्। असौ हनुमान्। अग्र्यः 'आर्जवनिशितत्वादिगुणयुक्तत्वेन श्रेष्ठः'। प्रदरः श्रीरामशरो यथा तद्वत् वैरिभयङ्करः रावणादिशत्रुभयङ्करः। भयशब्दोपपदात् कृञः कर्तरि 'मेघर्तिभयेषु कृञ' इति खशि 'अरुर्द्विषदजन्तस्य मुम्' इति मुम्। अभूत्। श्लिष्टविशेषणोपमा ॥ १४ ॥

मन्दोपकारिणी – कर्णांतमिति ॥ गुणगृहीत्रा ''पराक्रमौदार्ययशःप्रतापैः सौजन्य-माधुर्यनयानुनायैः। गांभीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतो न ह्यधिकस्त्रिलोक्यामित्यादिरूपहनुमद्-गुणान् गृहीत्रा जानता । रणकोविदेन रणे युद्धे कोविदेन सुधिया युद्धकरणविषये महाज्ञानिनेत्यर्थः। सन् सुधीः कोविदो बुध इत्यमरः। कर्णांतं कर्णस्य श्रोत्रस्यान्तं समीपम् अन्तं पदार्थसामीप्य इति धनञ्जयः आनीय प्राप्य रहसि वक्तव्यं वक्तुमिति भावः। मुक्तः

प्रेषितः। स्फुरन् शोभमानः। सत्पक्षपाती सत्सु पक्षपातः स्नेहोऽस्यास्तीति तथोक्तः। असौ हनूमान् वैरिभयङ्करः वैरिणामरीणाम्। रिपौ वैरिसपत्नारीत्यमरः। भयङ्करः भीतिजनकः अभूत्। तत्र दृष्टान्तमाह प्रदर इति। गुणगृहीत्रा गुणः मौर्वी, मौर्वी ज्या सिञ्जिनी गुणः इत्यमरः तां गृहीत्रा धृतवता मौर्वीकर्षकेणेति यावत्। रणकोविदेन रामेण कर्णान्तमानीय मुक्तः सत्पक्षपाती सन्तः शोभमानाश्च ते पक्षाः पक्षिपतत्राणि च सत्पक्षाः सत्पक्षैः पातः गमनं अस्यास्तीति स तथोक्तः। गरुत्पक्षच्छदाः पत्रमित्यमरः। अग्रयः ऋजुत्वनिशितत्वादिगुणयुक्तत्वेन श्रेष्ठः प्रदरः शरः। प्रदरः शरशंखयोरिति विश्वः यथा वैरिभयङ्करोऽभूत्तथेत्यर्थः॥ १४॥

गोभिः समानन्दितरूपसीतः स्ववह्निनिर्दग्धपलाशिराशिः।
अहो हनूमन्नववारिदोऽसौ तीर्णाम्बुधिर्विष्णुपदे ननाम ॥ १५॥

भावप्रकाशिका – गोभिर्वाग्भिरद्भिश्च। सीता सीरजा सस्यं च। पलाशिनो वृक्षा मांसादाश्च॥ १५॥

पदार्थदीपिकोद्बोधिका – लङ्कां प्रविश्य रामान्तिकमागतं हनुमन्तं मेघसाम्येन वर्णयति। **गोभिरिति॥** गोभिः वाग्भिः। सीताया रूपं रूपसीता। 'राजदन्तादिषु परम्' इति पूर्वप्रयोगार्हस्यापि सीताशब्दस्य परनिपातः। समानन्दिता सन्तोषिता रूपसीता येन सः। यद्वा समानन्दितं रूपं यस्याः तादृशी सीता येन सः। अथवा। रूपेण शब्देन सीतारूपसीताशब्दमात्रेण सीतेत्यर्थः सीताप्रतिकृतिरिति यावत्। रूपं स्वभावे सौन्दर्ये नामके पशुशब्दयो'रिति विश्वः। समानन्दिता रूपसीता शब्दमात्रेण सीताशब्दवाच्या येन स इति वा। स्वस्य वह्निः स्ववह्निः स्वपुच्छवह्निरित्यर्थः। तेन निर्दग्धः पलाशिराशिः पलं मांसमश्नन्ति तच्छीला इति पलाशिनो राक्षसाः तेषां राशिः समूहो येन सः 'पलं पिशितमामिष'मिति हलः। असौ हनूमान् नववारिद इव नूतनमेघ इव हनूमन्नववारिदः 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इति उपमानोत्तरपदसमासः। तीर्णः उत्तीर्णः, अम्बुधिः समुद्रो येन सः तथा सन् विष्णुपदे श्रीरामस्य पादस्तस्मिन् ननाम नमश्चकार॥ यथा कश्चिन्मेघो गोभिर्जलैः समानन्दितं रूपं स्वरूपं यासां ताः, सीताः सस्यानि येन सः। 'सीता सस्ये हलाध्वनि' इति वैजयन्ती। स्ववह्निः स्वीयविद्युद्वह्निस्तेन निर्दग्धः

पलाशिराशिर्वृक्षसमूहो येन स तथा सन् 'अनोकहः कुटः सालः पलाशी द्रुद्रुमागमा' इत्यमरः। तीर्णाम्बुधिर्वायुवशादुत्तीर्णसमुद्रः सन् विष्णुपदे आकाशे 'वियद्विष्णुपदं वा तु' इत्यमरः नमेत् तत्र लीनो भवेत्तद्वदिति श्लेषाभिप्रायः। अहो आश्चर्यं हनुमच्चरितमित्यर्थः। उपमा ॥ १५ ॥

मन्दोपकारिणी – गोभिरिति ॥ गोभिः वचोभिः। समानन्दितरूपसीतः समानन्दितं सन्तोषितं रूपं स्वरूपं यस्याः सा सीता जानकी येन स तथोक्तः। स्ववह्निनिर्दग्ध-पलाशिराशिः स्वेन स्वकीयेन स्वपुच्छगेनेत्यर्थः। आत्मीये स्वोस्त्रियान्धन इत्यमरः। वह्निना अग्निना निर्दग्धः भस्मीकृतः पलं मांसं अश्नन्ति भुञ्जन्तीति पलाशिनः राक्षसाः। स्याच्चामिषे पलमित्यमरः। तेषां राशिः पुञ्जः। स्यान्निकायः पुञ्जराशीत्यमरः। स्ववह्निनिर्दग्धः पलाशिराशिर्येन स तथोक्तः। असौ हनूमन्नववारिदः हनुमदाख्यः नवः नूतनः वारिदो मेघः। तडित्वान्वारिदोऽबुभृदित्यमरः। तीर्णांबुधिः पुनरपि उत्तीर्णः अम्बुधिः समुद्रः येन स तथा। विष्णुपदे विष्णोः रामस्य पदे पादे ननाम नमश्चकार। णमु प्रह्वत्वे शब्दे च इत्यतो लिट् परस्मैपदम्। पदं शब्दे च वाक्ये च व्यवसायापदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोर्लक्ष्म-वस्तुनोरिति विश्वः॥ मेघपक्षे तु॥ गोभिः जलैः। भूवाग्वारिषु गौर्मत इति विश्वः। समानन्दितरूपाः आप्यायितस्वरूपाः सीताः सस्यानि येन स तथोक्तः। अत्र सीता लाङ्गलपद्धतिरित्यमरकोशोक्तेः लाङ्गलपद्धतिवाचकेन सीताशब्देन लक्षणया लाङ्गल-पद्धत्युत्पन्नसस्यानि गृह्यन्त इति ज्ञेयम्। स्ववह्निनिर्दग्धपलाशिराशिः स्ववह्निना विद्युल्लक्षणवह्निना निर्दग्धः पलाशिनां द्रुमाणां राशिर्येन स तथोक्तः। पलाशी द्रुद्रुमागमा इत्यमरः। एवंभूतः सन् तीर्णांबुधिः वायुवशात् समुद्रमतीत्य देशान्तरङ्गतः सन् यथा विष्णुपदे आकाशे वियद्विष्णुपदंवापीत्यमरः ननाम तत्र लीनोऽभवत् तद्वदिति श्लोकाभि-प्रायः। अहो आश्चर्यं हनुमच्चरितमिति भावः। अहो हीति च विस्मय इत्यमरः॥ १५ ॥

अपक्षपाती पुरुषस्त्रिलोक्यामभोगभोक्ता पतगाधिराजम्।
विश्वम्भरं बिभ्रदसौ जिगाय त्वरापराक्रान्तिषु चित्रमेतत् ॥ १६ ॥

भावप्रकाशिका – अपक्षपातित्वं सत्सु गुणानुकूल्येन स्थितिः। भोगो नामाहिशरीरं च॥ १६ ॥

पदार्थदीपिकोद्बोधिका – रावणनिग्रहार्थं श्रीराममुदूह्य लङ्कां प्रति गच्छन्तं हनुमन्तं वर्णयति। **अपक्षेति**॥ पक्षाभ्यां पतत्राभ्यां पतति तच्छील इति पक्षपाती स न भवतीत्यपक्षपाती। पक्षपातो वात्सल्यमस्यास्तीति पक्षपाती सत्सु तत्तद्योग्यतानुसारेण वृत्तेः पक्षपाती न भवतीत्यपक्षपातीति वा। पुरुषः । गरुडस्तु पक्षाभ्यां पतति तच्छील इति पक्षपाती। भोगानां स्त्रीसम्भोगादिजनितसौख्यानां भोक्ता अनुभविता भोगभोक्ता स न भवतीत्यभोगभोक्ता। हनुमतो नैष्ठिकब्रह्मचारित्वादिति भावः। गरुडस्तु भोगभोक्ता सर्पशरीराणां भोक्ता 'भोगो राज्ये धने सौख्ये पालनाभ्यवहारयोः। फणे देहे च सर्पाणां' इति वैजयन्ती। असौ हनुमान् विश्वं जगत् बिभर्तीति विश्वम्भरस्तं श्रीराममम्। 'संज्ञायां भृतॄ' इत्यादिना खचि 'अरुर्द्विषदि'त्यादिना मुम्। बिभ्रत् रावणनिग्रहार्थं लङ्कां प्रति गमनसमये वहन् सन् 'नाभ्यस्ताच्छतु'रिति नुमभावः। त्वरा वेगास्ताश्च पराक्रान्तयः पराक्रमाः, ताश्च तासु। अधिकश्चासौ राजा चाधिराजः। 'राजाहः सखिभ्यष्टच्' इति टच्। स्वतिभ्यामेवेति नियमात् 'न पूजना'दिति निषेधानवकाशः। पतगानां पक्षिणामधिराजोऽधिपतिस्तम् गरुडं जिगाय जितवान्। जि जये लिट्। एतद्धनूमतो गरुडपराभवनं त्रिलोक्यां चित्रमाश्चर्यम्। विश्वम्भरभगवद्वाहकत्वं गरुडस्याप्यस्ति तथाप्यभोगभोक्तुरपक्षपातिनो हनुमतः भोगभोक्तुः पक्षपातिनो गरुडस्य जयः चित्रमिति भावः। विभावनाव्यतिरेकौ॥ १६॥

मन्दोपकारिणी – अपक्षपातीति॥ असौ हनूमान्। त्वरापराक्रान्तिषु त्वराः वेगाश्च पराक्रान्तयः पराक्रमाश्च तासु विषये। पतगाधिराजं पतगाः पक्षिणः तेषामधिराजः पतगाधिराजः गरुडः। राजाहः सखिभ्यष्टच् इति टच् प्रत्ययः। तं जिगाय जितवान्। जी जय इत्यतः कर्तरि लिट् परस्मैपदं जिगाय जिग्यतुः जिग्युः। एतत् हनुमतः गरुडजयरूपं कर्म चित्रं आश्चयम् । आलेख्याश्चर्ययोश्चित्रमित्यमरः। कुतः, हनुमान् पुरुषः पुरुषपराक्रमवान् अपक्षपाती पक्षाभ्यां पातः गमनं अस्यास्तीति पक्षपाती न पक्षपाती अपक्षपाती गरुडस्तु पक्षाभ्यां पतति गच्छतीति पक्षपाती अभोगभोक्ता भोगानां स्त्र्यादिविषयभोगानां भोक्ता उपभोक्ता तादृशो न भवतीति अभोगभोक्ता ब्रह्मचर्यनिरतत्वादिति भावः। गरुडस्तु भोगान् सर्पदेहान् भुङ्क्ते। भोगः सुखे स्त्र्यादिभृतावहेश्च

फणकाययोरित्यमरः। विश्वंभरं नारायणं रामम्। विश्वंभरः कैटभजित् इति विष्णुपर्यायामरः। बिभ्रत् वहन्। यद्यपि भगवद्वाहनत्वेन विश्वंभरवाहकत्वं गरुडस्याप्यस्ति तथापि भोगरहितस्य पक्षाभ्यां पतनरहितस्य हनूमतः भोगभोक्तुः पक्षाभ्यां पतनशीलस्य गरुडस्य जयः आश्चर्यमिति भावः॥ १६॥

निबध्य सेतुं रघुवंशकेतुभ्रूभङ्गसम्भ्रान्तपयोधिमध्ये।
मुष्टिप्रहारं दशकाय सीतासन्तर्जनाग्र्योत्तरमेषकोऽदात्॥ १७॥

पदार्थदीपिकोद्बोदिका – सेतुबन्धनपूर्वकं लङ्कां गतस्य युद्धं वर्णयति। **निबध्येति॥** एष एव एषकः स्वार्थे कः। यद्वा 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि त्यदाद्यत्वे पररूपत्वे च सति एषक इत्यकजन्तः। कप्रत्ययपक्षे त्यदाद्यत्वानुपपत्तिः। विभक्तेः कप्रत्ययेन व्यवधानात्। कप्रत्ययान्तानां सर्वनामसञ्ज्ञाभावात्। अकच्प्रत्ययस्य तु टेः प्राग्विधानाद्विभक्तेरव्यवधानेन त्यदाद्यत्वोपपत्तिरिति केचित्। तद्रीत्या अकजन्तो वा। हनूमान्, रघोर्यो वंशस्तस्मिन्केतुरिव ध्वज इव रघुवंशकेतुः रघुकुलश्रेष्ठ इत्यर्थः। तस्य भ्रुवोर्भङ्गेन विक्षेपेण सम्भ्रान्तस्य पयोधेः समुद्रस्य मध्ये 'उत्पताके ध्वजे केतुः' इति वैजयन्ती। सेतुं निबध्य दिनत्रयेऽप्यनुपगामिनं समुद्रं दृष्ट्वा श्रीरामो रक्तनयनान्तं समुद्रे युयोज। तेन प्रक्षुब्धेन समुद्रेण मयि सेतुं निबध्य याहीति प्रार्थितस्य श्रीरामस्याज्ञया दक्षिणसमुद्रे सेतुं निबध्य तेन च लङ्कां गत्वेति भावः। सीताया यत्सन्तर्जनं भार्या भवेत्यादिस्ववाक्याश्रवणनिमित्तकभर्त्सनं तस्य अग्र्योत्तरं उत्तरमिव प्रतिवाक्यमिवाचरति उत्तरति। उत्तरतीत्युत्तरः 'उपमानादाचारे' इत्यधिकृत्य 'सर्वप्रातिपदिकेभ्यः किब्वा वक्तव्य इति किपि 'सनाद्यन्ता धातव' इति धातुसंज्ञायां पचाद्यच्। अजन्तत्वाच्च 'वाजन्तश्च' इति पुल्लिङ्गता। अग्र्यः सीतासन्तर्जनस्योचितत्वेन श्रेष्ठः य उत्तरस्तं, मुष्टिना प्रहारस्तं, दश कानि शिरांसि यस्य तस्मै रावणाय अदात्। दा दाने लुङ्॥ १७॥

मन्दोपकारिणी ॥ निबद्धचेति॥ एषकः एष एव एषकः। स्वार्थे कप्रत्ययः। एष हनुमान्। रघुवंशकेतुभ्रूभङ्गसम्भ्रान्तपयोधिमध्ये रघोः रघुराजस्य वंशे सन्ततौ केतुः ध्वजस्थानीयः। ग्रहभेदे ध्वजे केतुरित्यमरः। राम इत्यर्थः। तस्य भ्रुवौ तयोर्भङ्गः विक्षेपः

तेन सम्भ्रान्तः उद्विग्नः भीत इत्यर्थः। स चासौ पयोधिः समुद्रश्च तस्य मध्ये सेतुं निबध्य बन्धयित्वा कपिसैन्यस्य लङ्कां प्रति गन्तुं योग्यं मार्गविशेषं पर्वतादिभिः कृत्वेति यावत्। दशकाय दशसङ्ख्याकानि कानि शिरांसि यस्य सः दशकः तस्मै रावणाय। कं शिरो जलमाख्यातमिति वररुचिः। मुष्टिप्रहारं मुष्टिना प्रहारं उरसि ताडनं अदात् दत्तवान्। दा दान इत्यतो लुङ् परस्मैपदं अदात् अदातां अदुः। कथंभूतं मुष्टिप्रहारं सीतासन्तर्जनाग्र्योत्तरं सीतायाः जानक्याः सन्तर्जनस्य भर्त्सनस्य अग्र्यं समीचीनं उत्तरम्॥ १७॥

जाज्वल्यमानोज्ज्वलराघवाग्नौ चक्रे स सुग्रीवसुयायजूके।
आध्वर्यवं युद्धमखे प्रतिप्रस्थात्रा सुमित्रातनयेन साकम् ॥ १८॥

पदार्थदीपिकोद्बोधिका – यज्ञे ह्यध्वर्य्वादयो भवेयुः। अस्मिन् युद्धाख्ययज्ञे च हनूमदादयोऽध्वर्य्वादयो जाता इत्याह। **जाज्वल्येति॥** स हनुमान्। पुनः पुनरतिशयेन वा ज्वलतीति जाज्वल्यमानः 'ज्वल दीप्ताविति धातोः 'धातोरेकाचः क्रियासमभिहारे यङ् इति पौनः पुन्ये भृशार्थे वा ''यङि सन्यङो''रिति द्वित्वे हलादिशेषे दीर्घोऽकित इत्यभ्यासदीर्घे धातुसञ्ज्ञायां कर्तरि 'लटः शतृशानचा'विति शानचि आने मुगिति मुक्। तथा च अतिशयेन देदीप्यमान इत्यर्थः। उत्कृष्टतया ज्वलतीत्युज्ज्वलः स चासौ राघवाग्निश्च। जाज्वल्यमान उज्ज्वलराघवाग्निर्यस्मिन् तस्मिन्। सुग्रीवः सुयायजूकः शोभनयजमानो यस्मिन् तस्मिन् 'इज्याशीलो यायजूक' इत्यमरः। युद्धमेव मखो यज्ञस्तस्मिन्। प्रतिप्रस्थात्रा प्रतिप्रस्थातृव्यापारयुक्तेन सुमित्रातनयेन लक्ष्मणेन साकं सार्धम् अध्वर्योः सम्बन्धि आध्वर्यवं तद्व्यापारं चक्रे कृतवान्। रूपकम्॥ १८॥

मन्दोपकारिणी –॥ जाज्वल्यमान इति॥ स हनूमान् जाज्वल्यमानोज्ज्वलराघवाग्नौ जाज्वल्यमानः अत्यन्तं ज्वलन् रावणस्य क्रुध्यन्निति यावत् उज्ज्वलः प्रकाशमानः। रघोर्गोत्रापत्यं पुमान् राघवः। जाज्वल्यमानश्चासौ उज्ज्वलश्चासौ राघवः रामचन्द्रश्च स एवाग्निः यस्मिन् स जाज्वल्यमानोज्ज्वलराघवाग्निः तस्मिन्। सुग्रीवसुयायजूके सुग्रीवाख्यः सु पूज्यः समीचीन इति यावत् यायजूकः यजमानः यस्य स तथोक्तः तस्मिन्। सुः पूजायां भृशार्थेष्विति विश्वः। युद्धमखे युद्धं मख इव यज्ञ इव तस्मिन्। सप्ततंतुर्मखःक्रतुरित्यमरः। प्रतिप्रस्थात्रा प्रतिप्रस्थातृनामकऋत्विग्भूतेन सुमित्रातनयेन सुमित्रायाः

तनयेन पुत्रेण लक्ष्मणेन। आत्मजस्तनयः सूनुः सुतः पुत्र इत्यमरः। साकं सह। आध्वर्यवं अध्वर्योः अध्वर्युनामकऋत्विजः इदं आध्वर्यवं अध्वर्युव्यापारमित्यर्थः। चक्रे कृतवान् डुकृञ् करण इत्यतो लिडात्मनेपदं चक्रे चक्राते चक्रिरे। यज्ञे हि अध्वर्व्वादयः ऋत्विजः भवेयुः यजमानश्च स्यादग्निश्च भवेत्, युद्धाख्ययज्ञे च राम एवाग्निः, सुग्रीवो यजमानः, हनूमान् अध्वर्युः, प्रतिप्रस्थाता लक्ष्मणः, अङ्गदादयः होत्राग्नीध्रादयः ऋत्विज इति ज्ञेयम्। इन्द्रवज्रावृत्तम्॥ १८॥

रामार्चने यो नयतः प्रसूनं द्वाभ्यां कराभ्यामभवत्प्रयत्नः।
एकेन दोष्णा नयतो गिरीन्द्रं सञ्जीवनाद्याश्रयमस्य नाभूत्॥ १९॥

पदार्थदीपिकोद्बोधिका – इन्द्रजिद्बद्धकपीनामुज्जीवनार्थं लङ्कां प्रति गन्धमादनपर्वतमानयतोऽस्य रामार्चनार्थं पुष्पानयने यावान्प्रयासस्तावानपि नाभूदित्याह **रामार्चन इति॥** रामस्यार्चनं पूजा तस्मिन्। तादर्थ्ये सप्तमी। रामार्चनार्थमित्यर्थः। कराभ्यां हस्ताभ्यां प्रसूनं पुष्पं नयतः आनयतः यः प्रयत्नोऽभवत्। एकेन दोष्णा हस्तेन सञ्जीवनं मृतसञ्जीवन्याख्यमौषधमादिर्येषां तेषामाश्रय आधारः तम्। गिरीन्द्रं गन्धमादनं नयतः लङ्कां प्रत्यानयतः अस्य हनूमतः स प्रयत्नः नाभूत् न बभूव॥ १९॥

मन्दोपकारिणी – रामार्चन इति॥ रामार्चने तादर्थ्ये सप्तमी रामस्य अर्चने पूजार्थं द्वाभ्यां कराभ्यां प्रसूनं कुसुमम्। प्रसूनं कुसुमं सुममित्यमरः। नयतः उद्धरतः यः प्रयत्नः प्रयासः अभवत् आसीत्। भू सत्तायां लङ् परस्मैपदम्। सः प्रयत्नः एकेन दोष्णा हस्तेन सञ्जीवनाद्याश्रयं सञ्जीवनः सञ्जीवननामकः औषधवृक्षः स एव आद्यः आदिर्येषां ते सञ्जीवनाद्याः वृक्षाः तेषामाश्रयः तम्। पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याः इत्यमरः। गिरीन्द्रं गिरीणां पर्वतानां इन्द्रः श्रेष्ठस्तं गन्धमादनपर्वतं नयतः उद्धृत्य नयतः नाभूत्। मृतसञ्जीवनाद्यौषधार्थं गन्धमादनपर्वतमेकेन हस्तेन उद्धृत्य गृहीत्वा च गच्छतो हनुमतः पुष्पोद्धरणादौ यावान् प्रयासस्तावानपि नाभूदिति भावः॥ इन्द्रवज्रावृत्तम्॥ १९॥

स दारितारिं परमं पुमांसं समन्वयासीन्नरदेवपुत्र्या।
वह्निप्रवेशाधिगतात्मशुद्ध्या विराजितं काञ्चनमालयेव॥ २०॥

पदार्थदीपिकोद्बोधिका – रावणादीन् हत्वा सीतया सार्धमयोध्याभिमुखतया यान्तं श्रीराममनुजगामेत्याह— **स इति**॥ स हनूमान्। दारिताः संहता अरयो रावणादिशत्रवो येन तम्। वह्नौ यः प्रवेशस्तेनाधिगता जनैर्ज्ञाता आत्मनः स्वस्य शुद्धिः पातिव्रत्यशुद्धिर्यस्यास्तया। नरदेवपुत्र्या जनकपुत्र्या सीतया। काञ्चनस्य सुवर्णस्य विकारः काञ्चनी। सा च सा माला च। 'पुंवत्कर्मधारयजातीयदेशीयेषु' इति पुंवद्भावः। तयेव। काञ्चनमालयेत्यादौ 'इवेन नित्यसमासो विभक्त्यलोपश्च' इत्यस्य 'कचाचितौ विष्व-गिवागजौ गजौ' इत्यादिप्रयोगान्यथानुपपत्त्या 'मणीव रोदसी' इत्यादिवच्छन्दोविषयत्वेन व्याख्यातत्वाद्भिन्नपदत्वं द्रष्टव्यम्। विराजितं शोभमानम्। परमं सर्वोत्तमं पुमांसं पुरुषं श्रीरामं अन्वयासीत् अनुययौ। 'या प्रापणे' लुङ्। उपमा॥ २०॥

मन्दोपकारिणी – **स_इति**॥ स हनूमान्। दारितारिं दारिताः निहताः अरयः रावणकुम्भकर्णादिवैरिणः येन स तथोक्तस्तम्। रिपौ वैरिसपत्नारीत्यमरः। परमं सर्वोत्तमं पुमांसं पुरुषम्। स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरा इत्यमरः। राममित्यर्थः। समन्वयासीत् सम्यक् अनुसृत्य ययौ रावणादीन् हत्वा अयोध्याभिमुखं यान्तं अनुययावित्यर्थः। 'या प्रापण' इत्यतो लुङ् परस्मैपदं अयासीत् अयासिष्टां अयासिषुः। कथम्भूतं पुमांसं वह्निप्रवेशाधिगतात्मशुद्ध्या वह्नौ जाज्वल्यमानाग्नौ प्रवेशेन अधिगता जनैः सम्यक् ज्ञाता आत्मनः स्वस्याः शुद्धिः परपुरुषसङ्गराहित्यादिरूपा यस्याः सा तथोक्ता तया वह्निप्रवेशाधिगतात्मशुद्ध्या। नरदेवपुत्र्या नरदेवस्य जनकराजस्य पुत्र्या सीतया। विराजितं शोभमानं कयेव काञ्चनमालयेव सुवर्णमालिकयेव सुवर्णस्य अग्नौ प्रक्षेपणेन यथा शुद्धिरवगम्यते एवं सीताया अपि अग्निप्रवेशेन निर्दोषत्वं सवैर्जनैरवगतमिति भावः॥ २०॥

श्यामं स्मितास्यं पृथुदीर्घहस्तं सरोजनेत्रं गजराजयात्रम्।
वपुर्जगन्मङ्गलमेष दृग्भ्यां चिरादयोध्याधिपतेः सिषेवे ॥ २१॥

पदार्थदीपिकोद्बोधिका – अयोध्यायां च 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्युक्तनवविधसेवां, श्रीराम-मनिमिषदृग्भ्यां सदा पश्यन् चकारेत्याह— **श्याममिति**॥ एष हनूमान् स्मितं मन्दहासो-पेतमास्यं मुखं यस्य तत्। पृथू स्थूलौ पुष्टाविति यावत्। दीर्घौ आयतौ हस्तौ यस्य तत्।

सरसि जातं सरोजं 'सप्तम्यां जनेर्डः' इति डः। सरोजवत् पद्मवन्नेत्रे यस्य तत्। गजानां राजा गजराज ऐरावतस्तस्य यात्रेव यात्रा गमनं यस्य तत्। जगतो मङ्गलं यस्मात्तत् स्वविषयकश्रवणमननार्चनादिना जगतो मङ्गलप्रदमित्यर्थः जगति मङ्गलमिति वा। अयोध्याधिपतेः श्रीरामस्य वपुः शरीरं दृग्भ्यां दृष्टिभ्यां चिराद्दीर्घकाले 'दीर्घकाले चिराच्चिर' मिति वैजयन्ती। सिषेवे षेवृ सेवने लिट्॥ अनिमिषदृग्भ्यां तद्दर्शनपूर्वकं नवविधसेवां चकारेति भावः॥ २१॥

मन्दोपकारिणी – श्याममिति॥ एषः हनूमान् 'श्यामं कृष्णवर्णं' कृष्णे नीलासितश्यामेत्यमरः। स्मितास्यं स्मितं मन्दहासयुक्तमास्यं वदनं यस्य तत्तथोक्तं तत्। पृथुदीर्घहस्तं पृथू स्थूलौ दीर्घौ जानुपर्यन्तं लम्बमानौ हस्तौ पाणी यस्य तत्तथोक्तं तत्। सरोजनेत्रं सरोजवत् कमलवत् नेत्रे नयने यस्य तत्तथोक्तं तत्। गजराजयात्रं गजराजस्य गजश्रेष्ठस्य यात्रावत् गमनवत् यात्रा यस्य तत्तथोक्तं तत्। यात्रा तु यापनेऽपि स्यात् गमनोत्सवयोस्त्रियामिति मेदिनी। जगन्मङ्गलं जगतां लोकानां मङ्गलं श्रवणदर्शनादिभिः शुभं यस्मात्तत्तथोक्तं तत्। कल्याणं मङ्गलं शुभमित्यमरः। श्रेयस्करमित्यर्थः। अयोध्याधिपतेः अयोध्यायाः तन्नामकनगर्याः अधिपतेः स्वामिनः रामस्य। वपुर्गात्रम्। गात्रं वपुः संहननमित्यमरः। दृग्भ्यां चक्षुर्भ्याम्। ईक्षणं चक्षुरक्षिणी दृग्दृष्टी चेत्यमरः। सिषेवे। षेवृ सेवायामित्यस्मात् लिडात्मनेपदं सिषेवे सिषेवाते सिषेविरे। दृग्भ्यामित्युपलक्षणं, श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् इत्युक्त-श्रवणादिकमपि ग्राह्यम्। हनुमान् बहुप्रकारेण रामसेवां चकारेति भावः॥ २१॥

राज्याभिषेकेऽवसितेऽत्र सीता प्रेष्ठाय नस्तां भजतां दिशेति।
रामस्य वाण्या मणिमञ्जुमालाव्याजेन दीर्घां करुणां बबन्ध॥२२॥

पदार्थदीपिकोद्बोधिका – राज्याभिषेकानन्तरं सीतारामाभ्यां कृतानुग्रहातिशयं वर्णयति **राज्येति॥** राज्ञो भावो राज्यं तस्मिन्, भावे यक्। राजन्शब्दोऽसमासे भावकर्म-णोरर्थयोर्यकं लभते। राज्येऽभिषेकः अभिषेचनं तस्मिन् अवसिते समाप्ते सति नोऽस्मान् भजतां सेवमानानां मध्ये अतिशयेन प्रियः प्रेष्ठस्तस्मै 'अतिशायने तमबिष्ठना'विति इष्ठन् प्रत्यये, 'प्रियस्थिरे'त्यादिना प्रियशब्दस्य प्रादेशः। तां त्वद्गृहीतां मालां दिश प्रयच्छ।

'दिश अतिसर्जने' लोट्। इति रामस्य वाण्या वाचा। सीता। मणीनां रत्नानां या मञ्जुमाला मनोहरमाला सैव व्याजः छद्म तेन 'व्याजछद्मापदेशयो'रिति वैजयन्ती॥ अत्र हनुमति दीर्घां विच्छेदरहितां करुणां दयां बबन्ध कृतवती। बधिर् बन्धने लिट्। राज्याभिषेकानन्तरं सीता मणिमञ्जुमालां गृहीत्वेमां कस्मा अस्मत्सेवकाय दद्यामिति श्रीरामं पृष्टवती। तदा श्रीरामोऽस्मत्सेवकानां मध्येऽतिशयेन प्रियाय प्रयच्छेत्यभ्यधात्। तदनुज्ञया तां मालां तादृशाय हनुमते ददौ इति भावः। कैतवापन्हुतिः॥ २२॥

मन्दोपकारिणी – राज्येति॥ सीता जानकी। राज्याभिषेके रामस्य राज्ये साम्राज्ये अभिषेके अवसिते समाप्ते सति। हे सीते त्वं नः अस्मान् भजतां मध्ये प्रेष्ठाय अतिशयेन प्रियाय तां मालां दिश प्रयच्छ। दिश अतिसर्जन इत्यतो लोट् परस्मैपदं ''दिश दिशतात् दिशतं दिशते''ति रामस्य वाण्या वाचा। गीर्वाग्वाणी सरस्वतीत्यमरः। मणिमञ्जुमालाव्याजेन मणीनां पद्मरागादिनवरत्नानां मञ्जु मनोज्ञा माला मालिका तस्याः व्याजेन कण्ठे बन्धनमिषेण। मनोज्ञं मञ्जु मञ्जुलमित्यमरः। अत्र अस्मिन् हनुमति दीर्घां अविच्छिन्नां करुणां दयां बबन्ध चकार। बधिर् बन्धन इत्यतो लिट् परस्मैपदं बबन्ध बबन्धतुः बबन्धुः। अत्र सीतया हनुमत्कण्ठे मालाबन्धने कृते सति कविरुत्प्रेक्षते नेदं मालाबन्धनं किन्तु कृपाबन्धनमिति। इन्द्रवज्रावृत्तम्॥ २२॥

हृदोरुसौहार्दभृताऽधिमौलिन्यस्तेन हस्तेन दयार्द्रदृष्ट्या।
सेवाप्रसन्नोऽमृतकल्पवाचा दिदेश देवः सहभोगमस्मै॥ २३॥

पदार्थदीपिकोद्बोधिका – सीतया मणिमञ्जुमालाप्रदानानन्तरं श्रीरामो भाविब्रह्मत्वाख्यं सहभोगं ददावित्याह– **हृदेति**॥ उरु उत्कृष्टं यत्सौहार्दं सुहृदो भावः सौहार्दमुर्वनुग्रहस्तस्य बिभर्तीति भृत् तेन। हृदा मनसा। 'स्वान्तं हृन्मानसं मनः' इत्यमरः। मौलावधि अधिमौलि। 'अव्ययं विभक्ति' इत्यादिना विभक्त्यर्थेऽव्ययीभावः। मस्तक इत्यर्थः। न्यस्तो निक्षिप्तस्तेन हस्तेन। दयया आर्द्रा क्लिन्ना तादृशी या दृष्टिस्तया। दयापूर्णप्रसन्नदृष्ट्येत्यर्थः। अमृतादीषन्यूना अमृतकल्पा 'ईषदसमाप्तौ कल्पप्देश्यदेशीयरौ' इति कल्पप्। सा च सा वाक् च तया। 'हनुमतो न प्रतिकर्तृता स्यात् स्वभावभक्तस्य निरौपधं मे।

मद्भक्तौ ज्ञानपूर्तौ निरवधिकबलप्रोन्नतिस्थैर्यधैर्यस्वाभाव्याधिक्यतेजः सुमतिशमदमेष्वस्य तुल्यो न कश्चित्। शेषो रुद्रः सुपर्णोऽप्युरुगुणसमितौ नो सहस्रांशतुल्याः' इत्यादिगुणकथनरूपामृतसदृशवाचेत्यर्थः। अत्र सर्वत्र 'इत्थंभूतलक्षणे' इति सूत्रेण 'लता प्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दाव'मित्यत्रेव इत्थंभूतलक्षणे तृतीया। तथा चेत्थंभूतलक्षण इति सूत्रे इत्थंभूतलक्षणार्थस्यापि विवक्षितत्वेन वाच्यतावच्छेदकधर्मस्यापि इत्थंभूतलक्षणत्वात्। सौहार्दहृत्त्वेन, अधिमौलिन्यस्तहस्तत्वेन अमृतकल्पवाक्त्वेन च युक्त इत्यर्थः सिद्ध्यति। सेवाप्रसन्नः सीतान्वेषणादिसेवासन्तुष्टः श्रीरामः सह परमात्मरूपैः सार्धं भुज्यतेऽनुभूयते सुखमस्मिन्निति सहभोगस्तं सहभोगाख्यं पारमेष्ठ्यं दिदेश प्रददौ॥ २३॥

मन्दोपकारिणी – हृदेति॥ सेवाप्रसन्नः सेवया शुश्रूषया प्रसन्नः सन्तुष्टः। देवः रामः। अस्मै हनुमते सहभोगं सहभोगनामकं सत्यलोकाधिपत्यं दिदेश ददौ। दिश् अतिसर्जन इत्यतो लिट् परस्मैपदं दिदेश दिदिशतुः दिदिशुः। कथम्भूतो रामः उरुसौहार्दभृता सुहृदो भावः सौहार्दं उरु उत्कृष्टं च तत् सौहार्दं च तत् भृता दधता हृदा मनसा। प्रेमा ना प्रियताहार्दं प्रेम स्नेह इत्यमरः। अधिमौलि मौलौ अधि इत्यधिमौलि अव्ययीभावसमासोऽयं शिरसीत्यर्थः। न्यस्तेन स्थापितेन हस्तेन पाणिना। दयार्द्रदृष्ट्या दयया कृपया आर्द्रा क्लिन्ना युक्तेति यावत् सा च सा दृष्टिश्चक्षुस्तया प्रसन्ननयनेन इत्यर्थः। अमृतकल्पवाचा अमृतस्य सुधायाः कल्पा च सा वाक् च तया हनुमतः ज्ञानभक्त्यादौ कोऽपि समो नास्ति स्वभावभक्त्या मत्सेवाकर्तुः प्रतिकर्तृता च नास्तीत्येवंरूपया अमृतवाचेत्यर्थः। उपलक्षितः। इयं सर्वापि तृतीया इत्थंम्भूतलक्षणे छत्रेण राजानमद्राक्षीदित्यत्र छत्रोपलक्षितं राजानमितिवत् अत्रापि रामः स्नेहपूर्वकहृदाद्युपलक्षितः सन् सहभोगं ददावित्युक्तं भवति॥ २३॥

प्रेष्ठो न रामस्य बभूव तस्मान्न रामराज्येऽसुलभं च किञ्चित्।
तत्पादसेवारतिरेष नैच्छत् तथापि भोगान् ननु सा विरक्तिः॥ २४॥

पदार्थदीपिकोद्बोधिका – श्रीरामराज्ये सकलभोगानां प्राणिमात्रस्यातिसौलभ्येऽपि श्रीरामपादसेवारतत्वादेव हनूमान् भोगान्नैच्छदित्याह— **प्रेष्ठ इति॥** श्रीरामस्य तस्माद्धनूमतोऽन्यपुरुषः प्रेष्ठः अतिशयेन प्रियः न बभूव। किन्तु स एव प्रियतमो बभूवेति भावः।

रामस्य यद्राज्यं तस्मिन् किञ्चिच्च किञ्चिद्वस्तु च सुलभं न भवतीत्यसुलभं दुर्लभमित्यर्थः। 'न सुदुर्भ्यां केवलाभ्यां' इत्युक्ते'र्लभेश्चे'ति नुमभावः न, न भवति। तथाप्यस्य रामाति-प्रियत्वेऽपि श्रीरामराज्ये सर्ववस्तूनां सौलभ्येऽपि तस्य यौ पादौ तयोर्या सेवा तस्यां रतिरासक्तिर्यस्य सः। हेतुगर्भं विशेषणमेतत् तत्पादसेवारतित्वादिति, एष हनूमान् भोगान्नैच्छत्। इषु इच्छायां लङ्। अनेन हनूमतोऽतिविरक्तत्वमुक्तं भवति। तदुपपादयति-नन्विति। सा विहितभोगसौलभ्येऽपि तेषु हेयतामतिः विरक्तिर्ननु विरक्तिर्हि॥ २४॥

मन्दोपकारिणी – प्रेष्ठ इति॥ रामस्य तस्मात् हनुमतः अन्यः पुरुषः प्रेष्ठः अतिशयेन प्रियः न बभूव हनुमानेव रामस्य अतिशयेन प्रियोऽभूदिति भावः। भू सत्तायामित्यतो लिट् परस्मैपदं बभूव बभूवतुः बभूवुः। रामराज्ये रामस्य राज्ये किञ्चित् किमपि वस्तु असुलभं सुलभं न भवतीत्यसुलभं दुर्लभमित्यर्थः नाभूत् किन्तु सर्वं सुलभमेवासीदित्यर्थः। तथापि स्वयं रामप्रियोऽपि सर्ववस्तूनां सौलभ्येऽपि एष हनुमान् भोगान् विषयसुखानि नैच्छत् नापेक्षितवान्। इषु इच्छायामित्यतो लुङ् परस्मैपदं ऐच्छत् ऐच्छतां ऐच्छन्निति। कथम्भूतः एषः तत्पादसेवारतिः तस्य रामस्य पादयोः चरणयोः सेवायां शुश्रूषायां रतिरासक्तिर्यस्य स तथोक्तः हेतुगर्भमेतद्विशेषणं तत्पादसेवासक्तत्वादेव भोगान्नैच्छदिति भावः। अनेन हनुमतोऽतिविरक्तिरुक्ता भवति। तदुपपादयति नन्विति। सा स्वयोग्यभोगसौलभ्येऽपि भोगे हेयतामतिरेव विरक्तिः वैराग्यं ननु हि॥ २४॥

नमो नमो नाथ नमो नमस्ते नमो नमो राम नमो नमस्ते।
पुनः पुनस्ते चरणारविन्दं नमामि नाथेति नमन् स रेमे ॥ २५॥

पदार्थदीपिकोद्बोधिका – हनुमतः तत्पादसेवया रमणप्रकारं दर्शयति **नम इति॥** स हनूमान् हे नाथ ते तुभ्यं नमः। 'नमः स्वस्ती'त्यादिना चतुर्थी नमः नमः नमः। हे राम ते तुभ्यं नमः नमः नमः नमः। पुनरुक्तिर्नमस्कारे तात्पर्यद्योतनार्था। हे नाथ ते तव चरणः अरविन्दमिव तत् पुनः पुनः नमामि, इति नमन् सन् रेमे रमु क्रीडायां लिट्॥ २५॥

मन्दोपकारिणी – नम इति॥ हे नाथ प्रभो। नेता प्रभुः परिवृढोऽधिपः इत्यमरः। ते तुभ्यं नमो नमः। हे राम ते तुभ्यं नमः। हे नाथ ते तव चरणारविन्दं पुनः पुनः नमामि

इति एवं प्रकारेण नमन्। णमु प्रह्वत्वे शब्दे चेति धातोः बहुवारं नमःशब्दान् वदन् सः हनुमान् रेमे चिक्रीडे। रमु क्रीडायामिति धातोर्लिंडात्मनेपदं ''रेमे रेमाते रेमिरे'' इति। भूयिष्ठां ते नम उक्तिं विधेम द्विस्ते नमः त्रिस्ते नमः चतुष्कृत्वो नम इत्यादिश्रुतिं मनसि निधाय नमःशब्दानां बहुवारोक्तिः कृतेति ज्ञातव्यम्। बहुवारोक्त्या नमस्कारस्य भगवत्प्रीतिसाधनत्वम्। उपेन्द्रवज्रावृत्तं लक्षणन्तु प्रथमश्लोक एवोक्तम्॥ २५॥

किं वर्णयामः परमं प्रसादं सीतापतेस्तत्र हरिप्रबर्हे।
मुञ्चन्महीं नित्यनिषेवणार्थं स्वात्मानमेवैष ददौ यदस्मै ॥ २६॥

पदार्थदीपिकोद्बोधिका – श्रीरामेण हनूमति कृतानुग्रहः केनापि वर्णयितुमशक्य इत्याह–**किमिति॥** यत् यस्मात्। एष रामो महीं मुञ्चन् स्वलोकगमनार्थं भुवं मुञ्चन् सन्। नित्यं यन्निषेवणं सेवा तस्मै इति तदर्थम्। हनूमता नित्यमात्मानं दर्शनार्चनादिरूपसेवया सेवयितुमित्यर्थः। अस्मै हनूमते स्वात्मानमेव ददौ। हरिप्रबर्हे वानरश्रेष्ठे 'मुख्यं पुरोगं प्रवरं प्रबर्ह'मिति हलः। तत्र हनूमति सीतापतेः परमं उत्तमं प्रसादमनुग्रहं किं? किमिति वर्णयामः। किमाक्षेपे। एतावानिति वर्णयितुमशक्ता इत्यर्थः। 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' लट्॥ २६॥

मन्दोपकारिणी – किं वर्णयाम इति॥ हरिप्रबर्हे हरीणां वानराणां प्रबर्हे श्रेष्ठे तत्र तस्मिन् हनुमति। सीतापतेः सीतायाः जानक्याः पतेः भर्तुः। परमं उत्तमं प्रसादं प्रसन्नतां प्रसादस्तु प्रसन्नतेत्यमरः। पूर्णानुग्रहमित्यर्थः। किं किमिति वर्णयामः स्तवामः प्रसादोत्कर्षं स्तोतुं वयमसमर्था इत्यर्थः। वर्ण स्तुताविति्यस्मात् लट् परस्मैपदं वर्णयामि वर्णयावः वर्णयामः। कुतः यद्यस्मात् एषः रामः स्वलोकं गन्तुं महीं भूमिम्। क्ष्माऽवनिर्मेदिनी महीत्यमरः। मुञ्चन् त्यजन्। नित्यनिषेवणार्थं नित्यं अनवरतं नित्यानवरताजस्रमित्यमरः निषेवणार्थं नित्यं दर्शनादिरूपां सेवां कर्तुम्। हनुमत्कृतसेवाफलत्वेन अस्मै हनुमते स्वात्मानमेव ददौ दत्तवान्। दद दान इत्यतो लिट् परस्मैपदं ददौ ददतुः ददुः। एकेन रूपेण भूमौ स्थितवानिति भावः। तस्मात्किं वर्णयाम इति सम्बन्धः। इन्द्रवज्रावृत्तम्॥ २६॥

स्वानन्दहेतौ भजतां जनानां मग्नः सदा रामकथासुधायाम् ।
असाविदानीं च निषेवमाणो रामं पतिं किम्पुरुषे किलास्ते॥ २७ ॥

पदार्थदीपिकोद्बोधिका – स चाद्यापि श्रीरामं सेवमानो वर्तत इत्याह **स्वेति** ॥ असौ हनूमान् इदानीं चाद्यापि भजतां सेवमानानां जनानां स्वरूपभूतानन्दः स्वानन्दः स्वरूपानन्दाविर्भावलक्षणमोक्ष इत्यर्थः । तस्य हेतुः कारणं तस्मिन् । 'हेतुर्ना कारणं बीजं' इत्यमरः । रामस्य या कथा सैव सुधा अमृतं तस्यां सदा मग्नः सन् श्रीराम-कथाश्रवणकीर्तनादावत्यासक्तः सन्नित्यर्थः । पतिं स्वामिनं श्रीरामं निषेवमाणः नितरां सेवमानः सन् किंपुरुषे किंपुरुषाख्यखण्डे आस्ते किल वर्तते किल । किलेत्यैतिह्ये ॥ २७ ॥

मन्दोपकारिणी – स्वानन्देति ॥ असौ हनूमान् इदानीं च अधुनापि । एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथेत्यमरः । किंपुरुषे किंपुरुषाख्यखण्डे आस्ते वर्तत इति किल वार्ता अस्ति । वार्तासम्भाव्ययोःकिलेत्यमरः । आस उपवेशन इत्यतो लडात्मनेपदं आस्ते आसाते आसते इति । किं कुर्वन् भजतां श्रवणमननादिसेवां कुर्वाणानां जनानां मुक्तियोग्यचेतनानां स्वानन्दहेतौ स्वः स्वरूपभूतश्चासौ आनन्दः सुखं च स्वानन्दः तस्य हेतौ प्रादुर्भावकारणे । हेतुर्ना कारणं बीजमित्यमरः । रामकथासुधायां रामस्य कथा चरित्रकथनं तदेव सुधाऽमृतं तस्यां सदा मग्नः आसक्तः सन् । पतिं स्वामिनम् । स्वामीत्वीश्वरः पतिरीशितेत्यमरः । श्रीरामं निषेवमाणः नितरां सेवमानः शुश्रूषमाणः सन् ॥ २७ ॥

तस्यैव वायोरवतारमेनं सन्तो द्वितीयं प्रवदन्ति भीमम् ।
स्पृष्टैव यं प्रीतिमताऽनिलेन नरेन्द्रकान्ता सुषुवेऽत्र कुन्ती ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – अथ द्वितीयावतारलीलां वक्तुमारभते- **तस्यैवेत्यादिना** ॥ प्रीतिरस्यास्तीति प्रीतिमान् तेन । पूर्वार्जितसुकृतातिशयवत्यां कुन्त्यामनुग्रहविशेषवतेत्यर्थः । अनिलेन मुख्यप्राणेन स्पृष्टैव केवलं स्पृष्टा सती नरेन्द्रकान्ता पाण्डुभार्या 'कान्ता वधूर्वरा युवतिरिति' हलः । कुन्ती यं पुत्रं सुषुवे प्रसूतवती । षू प्रसवे लिट् । सन्तः बळित्थेत्यादिसूक्ताभिप्रायविदः । तत्र हि 'पृक्षो वपु'रिति पृक्षशब्देन भीम उच्यते ।

'पृतनाक्षयकारित्वात्पृक्षो भीम उदाहृतः' इति वचनात्। एनं भीमं तस्यैव हनूमद्रूपेणावतीर्णस्यैव वायोस्तदपेक्षयेत्यर्थः। द्वयोः पूरणं द्वितीयं 'द्वेस्तीय' इति पूरणार्थे तीयप्रत्ययः। अवतारं प्रादुर्भावं प्रवदन्ति 'वद व्यक्तायां वाचि' लट्। अत्र स्पृष्टैव यं सुषुव इति तात्कालिकोत्पत्तिकथनेन गर्भवासादिनिमित्तकक्लेशाभावो भीमस्य दर्शितः। हनुमदवतारेऽप्येतदुपलक्षणम्। तत्रापि रामायणे वायोः स्पर्शमात्रादञ्जनायामवतारोक्तेः। अत एवोत्तरत्र मध्वावतारे दशमासगर्भाभिवृद्धिनिमित्तमन्यजीवस्याधिष्ठितत्वोक्तिः॥ २८॥

मन्दोपकारिणी – एवं प्रथमावतारहनुमल्लीलावर्णनं कृतम्। अथ द्वितीयावतारभीमसेनलीलां वर्णयन्ति॥ **तस्यैवेत्यादिना॥** सन्तः बळित्थेत्यादि– सूक्ताभिप्रायविदः। सन् सुधीः कोविदो बुधः इत्यमरः। तस्यैव हनुमत्त्वेनावतीर्णस्य वायोरेव द्वितीयं हनुमदपेक्षया द्वितीयं एनं अवतारं भीमं भीमसेननामकं प्रवदन्ति प्रकर्षेण कथयन्ति। वद व्यक्तायां वाचीत्यतो लट् परस्मैपदं वदति वदतः वदन्ति। नरेन्द्रस्य राज्ञः पाण्डुचक्रवर्तिनः कान्ता स्त्री। कामिनी ललना कान्तेति धनञ्जयः। कुन्ती तन्नामिका देवी। प्रीतिमता प्रीतिः हर्षः अस्यास्तीति प्रीतिमान् तेनानिलेन मुख्यवायुना। स्पृष्टैव केवलं स्पर्शमात्रवती न तु तेन क्रीडितेति भावः। एवंभूता सती अत्र भुवि यं सुतं सुषुवे प्रसूतवती एनमिति सम्बन्धः। षूङ् प्राणिगर्भविमोचने इत्यतो लिडात्मनेपदं सुषुवे सुषुवाते सुषुविरे इति॥ २८॥

इन्द्रायुधं हीन्द्रकराभिनुन्नं चिच्छेद पक्षान् क्षितिधारिणां प्राक्।
बिभेद भूभृद्वपुरङ्गसङ्गाच्चित्रं स पन्नो जननीकराग्रात्॥ २९॥

पदार्थदीपिकोद्बोधिका – तस्य बाललीलां वर्णयति—**इन्द्रेति॥** प्राक् पूर्वं कृतयुग इत्यर्थः। इन्द्रस्य यः करस्तेनाभिनुन्नं हि सम्यक् प्रेरितमेव 'हि हेतावववधारण' इत्यमरः। इन्द्रायुधं वज्रं क्षितिं भूमिं धरन्तीति क्षितिधारिणः पर्वतास्तेषां पक्षान् पतत्राणि चिच्छेद 'छिदिर् द्वैधीभावे' लिट्। स भीमः जनन्याः मातुः कुन्त्याः यत्कराग्रं हस्तयोरग्रं तस्मात् पन्नः सन् पतितः सन् पद गताविवत्यस्मात् 'गत्यर्थाकर्मके'ति कर्तरि क्तप्रत्यये 'रदाभ्यां निष्ठातोनः पूर्वस्य च दः' इति नत्वम्। अङ्गसङ्गः शरीरसङ्गस्तस्मात्। भूभृतः शतशृङ्गपर्वतस्य वपुः शरीरं तत् बिभेद 'भिदिर् विदारणे' लिट्। एतच्चित्रं आश्चर्यं हि॥ २९॥

मन्दोपकारिणी – इन्द्रायुधमिति ॥ प्राक् पूर्वम्। इन्द्रायुधं वज्रं इन्द्रकराभिनुन्नं हि इन्द्रस्य करेण हस्तेन अभि सम्यक् नुन्नं हि प्रेरितमेव। हि हेतावववधारणे इत्यमरोक्तेः हिशब्दोऽवधारणे। क्षितिधारिणां क्षितिं भूमिं धरन्तीति क्षितिधारिणः पर्वताः तेषाम्। क्षोणी ज्या काश्यपी क्षितिरित्यमरः। पक्षान् पतत्राणि। गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमित्यमरः। चिच्छेद द्वैधीचकार। छिदिर् द्वैधीकरण इत्यस्माल्लिट् परस्मैपदं चिच्छेद चिच्छिदतुः चिच्छिदुः। स भीमसेनः। शार्दूलभयेन कम्पितादिति शेषः। जननीकराग्रात् जनन्याः मातुः कुन्त्याः। जनयित्री प्रसूर्माता जननीत्यमरः। कराग्रात् प्रान्तात् पन्नः पर्वते पतितः सन्। अङ्गसङ्गात् अङ्गं स्वगात्रं तस्य सङ्गात् सम्बन्धात्। अङ्गं गात्रातिकोपन इति विश्वः। भूभृद्वपुः भुवं भूमिं बिभर्तीति भूभृत् पर्वतः। भूभृद्भूमिधरे नृप इत्यमरः। तस्य शतशृङ्गपर्वतस्य वपुः शरीरं बिभेद विदारितवान्। भिदिर् विदारण इत्यतो लिट् परस्मैपदं बिभेद बिभिदतुः बिभिदुरिति। बुद्धिपूर्वं प्रयत्नेन इन्द्रेण पर्वते क्षिप्तं वज्रं पक्षमात्रं चिछेद। अयं तु भीमः असावधानतया पर्वते पतितः सन् सर्वपर्वतशरीरं बिभेद। तस्मादेतच्चित्रम्। अनेन भीमशरीरस्य वज्रापेक्षया अतिदाढर्च्यमुक्तं भवति ॥ २९ ॥

पुरे कुमारानलसान् विहारान्निरीक्ष्य सर्वानपि मन्दलीलः।
कैशोरलीलां हतसिंहसङ्घां वने प्रवृत्तां स्मरति स्म सूत्कः ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – कौमारलीलां वर्णयति– **पुरेति ॥** स भीमः पुरं हस्तिनापुरं तस्मिन् मन्दा स्वल्पा लीला क्रिया यस्य सः। तथापि। 'मन्दाः सरोगनिर्भाग्य स्वल्पाज्ञापटुसूर्यजाः' इति वैजयन्ती। विहार उत्प्लवनादिरूपक्रीडा तस्मात्। अलसान् श्रमोपेतान् सर्वान् कुमारान् दुर्योधनादीन् निरीक्ष्य । प्राक् कैशोरावस्थायां वने अरण्ये प्रवृत्ताम् हताः सिंहसङ्घाः सिंहसमूहा यस्यां सा तथा तां 'अप्रथमाविभक्त्यर्थेष्वयं समास' इत्युक्तेः सप्तम्यर्थे बहुव्रीहिः। किशोरस्य सम्बन्धिनी कैशोरी सा च सा लीला च तां किशोरावस्थायां सिंहैः सह कृतलीलामित्यर्थः। सु सम्यक् उत्कः उत्कण्ठायुक्तः सन् 'उत्क उत्कण्ठितः प्रोक्तः' इति हलः। स्मरति स्म अस्मरत्। 'लट् स्म' इति भूतार्थे लट्। अल्पबलैरेतैः सह विहाराच्छतशृङ्गपर्वतेऽवस्थानसमये कैशोरावस्थायां सिंहैः सह विहारः समीचीनस्तादृशो विहारः कदा नु भवेदित्यभिलाषवानभूदिति भावः ॥ ३० ॥

मन्दोपकारिणी – पुर इति ॥ सः भीमः। पुरे हस्तिनापुरे मन्दलीलः मन्दं शनैः लीला क्रीडा यस्य स मन्दलीलोऽपि। विहारात् क्रीडायाः अलसान् श्रमवतः सर्वान् कुमारान् राजकुमारान् निरीक्ष्य दृष्ट्वा वने अरण्ये प्रवृत्तां जननकाले स्वकृतामिति यावत्। हतसिंहसङ्घां हत निहतः सिंहानां मृगेन्द्राणां सङ्घः गणः यस्यां सा तथोक्ता। कैशोरलीलां किशोरस्य बालस्येयं कैशोरा सा च सा लीला च ताम्। बालः किशोरोवाम्यश्वेत्यमरः। सूत्कः सु भृशं उत्कः उत्कण्ठायुक्तः। सुः पूजायां भृशार्थे चेति मेदिनी। स्मरति स्म अस्मरत् स्मशब्दयोगेन लटः अतीतार्थकत्वं लट् स्म इति सूत्रात्। स्मरति स्मृ चिन्तायां इत्यतो लट् परस्मैपदं स्मरति स्मरतः स्मरन्ति। कुमारैः सह क्रीडापेक्षया सिंहैः सह क्रीडा समीचीना तादृशी क्रीडा मम कदा नु स्यादित्युत्कण्ठावानभूदिति भावः ॥ ३० ॥

भुक्तं च जीर्णं परिपन्थिदत्तं विषं विषण्णो विषभृद्गणोऽतः।
प्रमाणकोटेः स हि हेलयाऽगान्नेदं जगज्जीवनदेऽत्र चित्रम् ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – अपरञ्चाद्भुतं चरित्रं वर्णयति–**भुक्तञ्चेति ॥** परिपन्थिदत्तं परिपन्थिभिः शत्रुभिः दुर्योधनाभिः दत्तं सूदमुखेन भक्ष्यादिषु निक्षिप्य दापितमित्यर्थः। 'परिपन्थी परोऽसुहृत्' इति हलः। विषं भुक्तञ्च भुक्तमपि जीर्णमभूत्। विहारादिसमये भीमबलं दृष्ट्वा भीतेन दुर्योधनेन येन केनापि प्रकारेण हन्तव्य इति स्वकीयैर्निश्चित्य सूदमुखेन दापितं विषं स्वयं विदित्वा अपि भुक्त्या जीर्णीचकारेति भावः। अतः भीमसकाशात्। विषं बिभ्रतीति विषभृतः सर्पास्तेषां गणः समूहः। विषण्णः हस्ततलेन चूर्णीकृतः। षद्लृ विशरणगत्यवसादनेष्विति धातोः क्तः। विषं जीर्णं दृष्ट्वा पुनश्चायं हन्तव्य इत्यभिप्रायेण दुर्योधनेन स्वसारथिद्वारा शयानस्य भीमस्य सर्वमर्मसु दंशनार्थं मोचितान् दंशनानन्तरमुद्बुद्धः स्वहस्ततलेन सर्पान् सारथिना सह चूर्णयामासेति भावः। स भीमः प्रमाणेन परिमित्या कोटिः कोटियोजनसङ्ख्या यस्य तस्मात् 'प्रमाणं बोधनेयत्तामर्यादाशास्त्रहेतुष्विति' यादवः। कोटियोजनागाधत्वेन प्रमाणकोट्याख्यह्रदादित्यर्थः। हेलया लीलया 'हेला लीला च कथ्यत' इति हलः। अगात् इण् गतौ लुङ् 'इणो गा लुङि' इति गादेशः। हिशब्दः प्रसिद्धौ। अनन्तरञ्चायं हन्तव्य एवेति निद्रितं दृढैः पाशैर्बध्वा प्रमाणकोट्याख्ये गङ्गायां विद्यमाने महाह्रदे दुर्योधनेन स्थापितस्ततो ह्रदात्तान् सर्वान् पाशाञ्छित्वा

लीलया तीरमाजगामेति भावः। इदञ्चास्य चित्रं नेत्याह। नेदमिति। जीवनमुज्जीवनं ददातीति तस्मिन् 'आतोऽनुपसर्गे क' इति कः जगतः जीवनदे अत्र मुख्यप्राणावतारात्मके भीमे चित्रमाश्चर्यं न, न भवति। काव्यलिङ्गम्॥ ३१॥

मन्दोपकारिणी – भुक्तं चेति॥ परिपन्थिदत्तं परिपन्थिभिः शत्रुभिर्दुर्योधनादिभिः। अभिघातिपरारातिप्रत्यर्थिपरिपन्थिन इत्यमरः। दत्तं भृत्यद्वारा दापितं विषं गरलम्। क्ष्वेडस्तु गरलं विषमित्यमरः। विषमिश्रान्नमित्यर्थः। भुक्तं च जानता भीमेन भुक्तमपि जीर्णं उदरे पक्वमभूदिति भावः। अतः एतस्मात् भीमात् विषभृद्गणः विषं बिभ्रतीति विषभृतः सर्पाः तेषां गणः समूहः विषण्णः विषादं प्राप्तः विनष्ट इत्यर्थः। स भीमः प्रमाणकोटेः प्रमाणकोट्याख्यह्रदात् हेलया अवज्ञया तिरस्कारेणेति यावत्। हेला स्त्रियामवज्ञायां इति शब्दार्णवः। अनायासेनेति भावः। अगात् जगाम हि। दुर्योधनादिभिः बध्वा ह्रदे क्षिप्तोऽपि भीमः बन्धनं क्षेपणं च अलक्षीकृत्य तस्मात् ह्रदात् उत्तीर्य बहिरागत इति भावः। इण् गतावित्यतो लुङ् परस्मैपदं अगात् अगातां अगुः। जगज्जीवनदे जगतां सकलजीवानां जीवनं ददातीति जगज्जीवनदः तस्मिन्। अत्र अस्मिन् भीमे इदं पूर्वोक्तमरण-बाधापरिहारपूर्वकं स्वजीवनं चित्रं न। असमर्थे हि इदमाश्चर्यमिति भावः॥ ३१॥

दग्ध्वा पुरं योगबलात्स निर्यन्धर्मानिव स्वान् सहजान्दधानः।
अदारिभावेन जगत्सु पूज्यो योगीव नारायणमाससाद ॥ ३२॥

भावप्रकाशिका – पुरं देहश्च। योगी गूढपुरुषः समाधिविपाकवांश्च। अदारिभावेन अदो राक्षसः तस्यारित्वेन दारो दलनं तद्रहितत्वेन अमृतत्वेन॥ ३२॥

पदार्थदीपिकोद्बोधिका – दुर्योधनकारितलाक्षागृहं दग्ध्वा युधिष्ठिरादीनुदूह्य गच्छन्तं भीमं वर्णयति—**दग्ध्वेति**॥ योग उपायः स एव बलं तस्मात् 'योगः सन्नहनोपायध्यान-सङ्गतियुक्तिषु' इत्यमरः। पुरं लाक्षागृहं तत् दग्ध्वा तस्मात् 'पुरं शरीरे नगरे गृहपाटलिपुत्रयो'रिति हेमचन्द्रः निरेतीति निर्यन् निरूपूर्वादिण् गतावित्यस्मात्कर्तरि 'लटः शतृशानचा'विति शतृप्रत्ययः। बिलद्वारेण निस्तरन्नित्यर्थः। धर्मानिव अदृष्टविशेषानिव स्वान् स्वकीयान् सहजातान् भ्रातॄन् युधिष्ठिरादीन् दधानो वहन्। अरेर्भावोऽरिभावः शत्रुत्वं अत्तीत्यदः 'असाधारण्येन व्यपदेशा भवन्तीति' न्यायादत्रादशब्देन बहुतराहारवत्त्वाद्राक्षसो

विवक्षितः। कृत्तविकृतशब्दोपपदादण् तस्य च पृषोदरादिपाठात् क्रव्यभावः कृत्तविकृत-पक्वमांसभक्षः क्रव्याद उच्यते। आममांसभक्षः क्रव्यादिति काशिका। तदेतत् क्लिष्टत्वा-दुपेक्षितम् अत्ति इत्यदः क्रव्यस्यादः इति शेषषष्ठीसमासेनोपपत्तेः। गङ्गाधर इत्यादौ एवमेव सर्वैरङ्गीकृतत्वात् इदमेव मूलकृत्सम्मतम्। अन्यथा णि आदेति स्यात्। यद्वा नामैकदेशे नामग्रहणमिति न्यायेन वेदव्यास इति वक्तव्ये व्यास इतिवत् क्रव्याद इति वक्तव्येऽद इत्युक्तिः। तथा च अदस्य क्रव्यादस्य राक्षसस्यारिभावः शत्रुत्वं तेन हिडिम्बाख्य-राक्षसहन्तृत्वेनेत्यर्थः। जगत्सु पूज्यो मान्यः स भीमः योग उपायोऽस्यास्तीति योगी स इव उपायविशेषवद्रूढपुरुष इवेत्यर्थः। स यथा कस्यचित्स्वस्वामिविद्विषः पुरं योगबलाद्दग्ध्वा निर्गच्छन् अदारिभावेन दारो विदारणं सोऽस्यास्तीति दारो 'अत इनिठनौ' इति इनिः। तस्य भावोऽदारिभावः विदारितत्वमित्यर्थः। न विद्यतेऽदारिभावो यस्य तेन स्वयं शत्रुभिरविदारितत्वेनेति भावः। जगत्सु पूज्यः सन् स्वस्वामिनं प्राप्नुयात्तद्वदित्यर्थः। नारायणं नारायणात्मकं व्यासं आससाद प्राप ददर्शेति यावत्। षद्लृ धातोर्लिट्। यद्वा योगः समाधिपरिपाकस्तद्वान् योगी स इव, सोऽपि जितपवनत्वात्पुरं शरीरं योगबलात्स्वसमाधि-परिपाकबलाद्दग्ध्वा स्वदेहगतवह्निना भस्मीकृत्य, निर्यन् ब्रह्मनाडीमार्गेण देहादुत्क्रम्य गच्छन् अदारिभावेन शरीरपाटनराहित्येन, पवनाभ्यासं कुर्वतां योगिनां पवनस्य मार्गसञ्चारे सति देहपाटनं भवति तद्रहितत्वेनेत्यर्थः। जगत्सु स्वर्गाद्युत्तमलोकेषु पूज्यः सन् धर्मान् मोक्षे सुखाभिवृद्धिहेतूनदृष्टविशेषान् दधानः अमुञ्चन् नारायणं स्वबिम्बभूतं परमात्मानं प्राप्नुयात् तद्वत्। हिडिम्बं निहत्यावस्थितं भीमं दृष्ट्वा पतित्वेन वरयन्तीं हिडिम्बीं ज्येष्ठस्या-विवाहादनिच्छता भीमेन प्राहयितुमाविर्भूतं व्यासं ददर्शेति भावः। उपमा॥ ३२॥

मन्दोपकारिणी – दग्ध्वेति॥ योगबलात् योगस्य उपायस्य बलात् सामर्थ्यात्। योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वित्यमरः। पुरं लाक्षागृहं दग्ध्वा भस्मीकृत्य निर्यन् बिलात् निर्गच्छन् स्वान् स्वकीयान् सहजान् भ्रातॄन् युधिष्ठिरादीन्। समानोदर्य-सोदर्यसगर्भ्यसहजाः समा इत्यमरः। धर्मानिव पुण्यानिव दधानः स्वस्कन्धे वहन् अदारि-भावेन अत्ति भक्षयति नरानित्यदो राक्षसः हिडिम्बः तस्य अरेर्भावः तेन। जगत्सु पूज्यः जगति मान्यः स भीमः नारायणं हिडिम्बां ग्राहयितुं आविर्भूतं श्रीवेदव्यासं आससाद प्राप्तवान् ददर्शेति भावः। षद्लृ विशरणगत्यवसादवनेष्विति धातोर्लिट् परस्मैपदं ससाद

सेदतुः सेदुः। क इव योगीव योगः उपायोऽस्यास्तीति योगी उपायवान् गूढपुरुष इव यथा स्वामिद्विषः कस्यचित्पुरुषस्य पुरं योगबलात् कस्माच्चिदुपायबलात् दग्ध्वा निर्गच्छन् तस्मात्पुरात् बहिर्गच्छन् सहजान् सह जायन्त इति सहजाः सहोत्पन्नाः तान् धर्मान् अदृष्टविशेषान् दधानः अदारिभावेन दारो दलनं शत्रुकृतबाधः सोऽस्यास्तीति दारी दारी न भवतीति अदारी अदारिणो भावः अदारिभावः तेन शत्रुकृतपराभवरहितत्वेनेति भावः। जगत्सु पूज्यः सन् स्वस्वामिनं प्राप्नुयात् तथेति भावः। पुनः क इव योगीव योगः समाधिपरिपाकः सोऽस्यास्तीति योगी तपस्वीत्यर्थः। तपस्वी संयमी योगीति धनञ्जयः। स इव सोऽपि प्राणायामेन विजितपवनत्वात् पुरं शरीरं योगबलात् योगस्य स्वसमाधि-परिपाकस्य बलात् दग्ध्वा स्वदेहगतवह्निना भस्मीकृत्य निर्यन् ब्रह्मनाडीमार्गेण देहादुत्क्रम्य गच्छन् अदारिभावेन दारो विदारणं शरीरपाटनं तदस्यास्तीति दारी पवनाभ्यासं कुर्वतां योगिनां पवनस्य मार्गसञ्चारे सति देहे शीर्णता भवति तद्रहितत्वेन जगत्सु स्वर्गाद्युत्तमलोकेषु पूज्यः सन् धर्मान् मोक्षसुखाभिवृद्धिहेतून् पुण्यविशेषान् दधानः अमुञ्चन् नारायणं स्वबिम्बभूतपरमात्मानं यथा आप्नुयात्तथेति भावः॥ ३२॥

समर्प्य कृत्यानि कृती कृतानि व्यासाय भूम्ने सुकृतानि तावत्।
करिष्यमाणानि च तस्य पूजां सङ्कल्पयामास स शुद्धबुद्धिः॥ ३३॥

पदार्थदीपिकोद्बोधिका – व्यासं दृष्ट्वा किं चकारेत्यत आह– **समर्प्येति**॥ कृती कुशलः सर्वकार्येषु निपुण इत्यर्थः। शुद्धा सर्वदा भगवत्प्रातिकूल्यरहिता बुद्धिर्यस्य स भीमः सुष्ठु कृतानि सुकृतानि आत्मना भगवत्पूजात्वेन सम्यक्कृतानीत्यर्थः। कर्तुं योग्यानि कृत्यानि 'विभाषाकृवृषो' इत्यर्हार्थे क्यप्। स्वेनावश्यं कर्तव्यानीत्यर्थः। कृतानि कर्माणि 'नपुंसके भावे क्त' इति क्तः। भूम्ने पूर्णाय व्यासाय तावत् साकल्येन, 'यावत्तावच्च साकल्ये' इत्युक्तेः समर्प्य। करिष्यमाणानि च स्वेनोत्तरत्र करिष्यमाणानि बकनिग्रहादीनि च। तस्य श्रीव्यासस्य पूजां सङ्कल्पयामास 'कृपू' सामर्थ्ये लिट्। अवतारमारभ्य हिडिम्बवधान्तानि स्वकृतकर्माणि व्यासाय समर्प्याथ करिष्यमाणानि बकनिग्रहादीनि च भगवत्प्रीत्यर्थक-पूजात्वेन करिष्यामीति सङ्कल्पयामासेति भावः। अत एव कृती शुद्धबुद्धिरिति विशेषणद्वयं हेतुगर्भम्॥ ३३॥

मन्दोपकारिणी – समर्प्येति ।। कृती ज्ञानी। धीमान् सूरिः कृती कृष्टिरित्यमरः। शुद्धबुद्धिः शुद्धा भगवदप्रतिकूला बुद्धिः अन्तःकरणं यस्य स तथा स भीमः। सुकृतानि सु सम्यक् भगवत्पूजात्वेन कृतानि अनुष्ठितानि कृत्यानि, स्वस्य कर्तुं योग्यानि, तावत् सकलानि ''यावत्तावच्च, साकल्य'' इत्यमरः। कृतानि कर्माणि । अत्र कृतशब्दः भाव-निष्ठान्तः। भूम्ने परिपूर्णाय व्यासाय समर्प्य करिष्यमाणानि च कृतानि तस्य वेदव्यासस्य पूजां सेवामिति सङ्कल्पयामास प्रतिज्ञातवान् सङ्कल्पयां अमूप्रत्ययान्तमव्ययम्। अस भुवीत्यतो लिट् परस्मैपदं आस आसतुः आसुः। अवतारप्रभृति हिडिम्बनिग्रहांतानि कर्माणि भगवति समर्प्य अथ अग्रे करिष्यमणानि च बकनिग्रहादीनि कर्माणि भगवत् पूजात्वेन करिष्यामीति सङ्कल्पयामासेति भावः। अत एव शुद्धबुद्धिश्चेति भावः ।। ३३ ।।

विष्णोः पदश्रिद्बकसन्निरासी क्षिप्तान्यपक्षिप्रकरः सुपक्षः।
ससोदरोऽथादित राजहंसः स राजहंसीमिव राजकन्याम् ।। ३४ ।।

भावप्रकाशिका – बकः पक्षिविशेषश्च ।। ३४ ।।

पदार्थदीपिकोद्बोधिका – द्रौपदीस्वयंवरं वर्णयति– **विष्णोरिति ।।** विष्णोः श्रीहरेः। श्रयत इति श्रित्, पदस्य पादस्य श्रित्, कर्मणि षष्ठ्याः समासः। पदमाश्रित इत्यर्थः। बकं बकासुरं सम् सम्यक् निरसितुं शीलमस्यास्तीति बकसन्निरासी, 'सुबुक्तिः प्रादिनिवृत्यर्थे' त्यस्य केवलप्रादिविषयत्वात् अत्र च बकपदसाहित्यात्समित्यस्य महाभाष्याविरुद्ध-त्वात्प्राद्युपपदत्वेऽपि णिनेरुपपत्तिः। प्रसिद्धश्च प्राद्युपपदत्वेऽपि णिनिः। 'स बभूवोप-जीविनाम्' 'अनुयायिवर्गः' 'पतत्यधो धामविसारी'त्यादौ ।। राजहंसोऽपि मारितबका-ख्यपक्षिविशेषः। पक्षः सहाय एषामस्तीति पक्षिणः अन्ये पक्षिणः अन्यपक्षिणः स्वशत्रु-सहायिन इत्यर्थः। तेषां प्रकरः समूहः क्षिप्तः निराकृतः अन्यपक्षिप्रकरो येन तादृशः 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु' इति वैजयन्ती। यद्वा क्षिप्तः निराकृतः स्वसिद्धान्त-विरुद्धान्यसिद्धान्तिनां समूहो येन सः। राजहंसोऽपि निराकृतस्वेतरकाकोलूकादिविह-गसमूहः। शोभनपक्षः श्रीकृष्णाख्यसहायो यस्य सुपक्षः शोभनसिद्धान्त इति वा, राजहंसस्तु शोभनपतत्रः। समानमेकमुदरं येषां ते सोदराः। 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इति सूत्रे समानस्येति योगो विभज्यते। तेन सपक्षः, साधर्म्यं, सजातीयः, इत्यादि सिद्धमिति

वैयाकरणोक्तेः सोदर इत्यत्रापि समानशब्दस्य सादेशः। अथवा सहशब्दः सदृशवचनोऽस्ति 'सदृशः सख्या ससखीति यथा, तेनायमस्वपदविग्रहो बहुव्रीहिः। तथा च सदृशमुदरं येषां ते सोदराः 'वोपसर्जनस्येति' सहस्य सादेशः। सोदरैः सहितः ससोदरः 'तेन सहेति तुल्ययोग' इति समासे पूर्ववत्सादेशः। सभ्रातृक इत्यर्थः। भीमः राजकन्यां द्रुपदकुमारीं 'कुमारी कथिता कन्या' इति हलः। द्रौपदीं राजहंसः राजहंसाख्यपक्षी राजहंसीमिव आदित लेभे। डुदाञ् दाने लुङ्। उपमा॥ ३४॥

मन्दोपकारिणी – विष्णोरिति॥ अथ वेदव्यासदर्शनानन्तरम्। ससोदरः सोदरैर्भ्रातृभिः सहितः ससोदरः स भीमः। राजकन्यां राज्ञः द्रुपदराजस्य कन्यां पुत्रीं आदित आदत्त भार्यात्वेन स्वीकृतवानित्यर्थः। डुदाञ् दान इत्यतो लुङात्मनेपदं आदित आदिषातां आदिषतेति। कथंभूतः भीमः, विष्णोः पदश्रित् विष्णोः श्रीकृष्णस्य पदं पादं श्रित् आश्रितः। पुनः कथंभूतः बकसन्निरासी बकस्य बकनामकस्य राक्षसस्य सन्निरासो हननं अस्यास्तीति बकसन्निरासी। पुनः कीदृशः क्षिप्तान्यपक्षिप्रकरः अन्यः स्वसिद्धान्तविरुद्धः पक्षः सिद्धान्तः एषां अस्तीति अन्यपक्षिणः जरासन्धादयः शत्रवः तेषां प्रकरः पूगः, क्षिप्तः निराकृतः अन्यपक्षिप्रकरो येन स तथोक्तः। पूगो वितानं प्रकर इत्यमरः। सुपक्षः सु शोभनः पक्षः सिद्धान्तो यस्य स तथोक्तः। कः कामिव राजहंसः ''राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता'' इत्यमरोक्तलक्षणः पक्षिविशेषः राजहंसीमिव। कथंभूतः विष्णोः पदश्रित् विष्णोः पदं आकाशं श्रित् आश्रितः। बकसन्निरासी बकस्य तन्नामकपक्षिविशेषस्य सन्निरासो निराकरणं अस्यास्तीति बकसन्निरासी। क्षिप्तान्यपक्षिप्रकरः अन्ये स्वेतरे काकोलूकादयः ते च ते पक्षिणः खगाश्च तेषां प्रकरः समूहः क्षिप्तः अन्यपक्षिप्रकरो येन स तथोक्तः। सुपक्षः सु शोभनौ पक्षौ पत्रे यस्य स तथोक्तः॥ ३४॥

इन्दीवरश्रीजयिसुन्दराभं स्मेराननेन्दुं दयितं मुकुन्दम्।
स्वमातुलेयं कमलायताक्षं समभ्यनन्दत्सुचिराय भीमः ॥ ३५॥

पदार्थदीपिकोद्बोधिका – तत्र च समागतं श्रीकृष्णमानन्दयदित्याह– **इन्दीवरेति॥** इन्दीवरस्य नीलोत्पलस्य श्रीः कान्तिः तां जेतुं शीलमस्यास्तीति इन्दीवरश्रीजयिनी तादृशी सुन्दराभा मनोहरकान्तिर्यस्य तम्। स्मेरं स्मितयुक्तं यदाननं तदेवेन्दुर्यस्य स तथा तम्।

दयितं स्वस्यातिप्रियम्। स्वस्य मातुलो वसुदेवस्तस्यापत्यं पुमान् स्वमातुलेयस्तम्। कमलवदायते विशाले अक्षिणी यस्य तम्। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति षच्। मुकुन्दं श्रीकृष्णं सुचिराय बहुकाले समभ्यनन्दत्। टु नदि समृद्धौ लङ्। द्रौपदीस्वयंवरे समागतं श्रीकृष्णं दृष्ट्वा सन्तुष्टोऽभूत्। यद्वा समभ्यनन्ददित्यन्तर्भूतण्यर्थः। तथा च द्रौपदीस्वयंवरे युद्धार्थमागतस्य राजन्यकूटस्य पराजयकर्मणा भूभारहरणार्थमवतीर्णं श्रीकृष्णं सन्तोषयामासेति भावः॥ ३५॥

मन्दोपकारिणी – इन्दीवरेति॥ इन्दीवरश्रीजयिसुन्दराभं इन्दीवरस्य नीलोत्पलस्य श्रीः कान्तिः इन्दीवरश्रीः इन्दीवरश्रियः जयोऽस्यास्तीति इन्दीवरश्रीजयिनी सुन्दरा मनोहरा च सा आभा कान्तिश्च सुन्दराभा इन्दीवरश्रीजयिनी सुन्दराभा यस्य स तथोक्तस्तं नीलोत्पलापेक्षयातिशयितमनोरमणीयनीलकान्तिमन्तमित्यर्थः। स्मेराननेन्दुं स्मेरं मन्दहासयुक्तं च तत् आननं मुखं च स्मेराननं तत् इन्दुरिव चन्द्र इव यस्य स तथोक्तस्तम्। स्वमातुलेयं मातुलः, मातुर्भ्राता तु मातुल इत्यमरः स्वस्य मातुलः तस्यापत्यं पुमान् स्वमातुलेयः तं स्वमातुलपुत्रमित्यर्थः। कमलायताक्षं कमलवत् कमलपत्रवत् आयते विशाले अक्षिणी यस्य स तथोक्तस्तम्। दयितं प्रियं मुकुन्दं श्रीकृष्णं सुचिराय बहुकालात् द्रौपदीस्वयंवरे दृष्ट्वा समभ्यनन्दत् सन्तुतोष। हस्तिनावतीपुराद्बहिर्निर्गमनानन्तरं बहुकालात् दृष्टं श्रीकृष्णं द्रौपदीस्वयंवरे दृष्ट्वा तुतोषेति भावः। नदि समृद्धावित्यतो लङ् परस्मैपदं अनन्दत् अनन्दतां अनन्दन्॥ ३५॥

महागदं चण्डरणं पृथिव्यां बार्हद्रथं मङ्क्षु निरस्य वीरः।
राजानमत्युज्ज्वलराजसूयं चकार गोविन्दसुरेन्द्रजाभ्याम्॥ ३६॥

भावप्रकाशिका – चण्डरणं चण्डानां रणं च। **बार्हद्रथं** जरासन्धं बृहद्रथसम्बद्धं च॥ ३६॥

पदार्थदीपिकोद्बोधिका – रुद्रादिवरैः सर्वैरजेयस्य जरासन्धादिराजनिकरस्य वधपूर्वकं राजसूययागश्च युधिष्ठिरेण कारित इत्याह– **महागदमिति॥** स भीमः। महती गदा यस्य तम्। पृथिव्यां भूमौ। चण्डः क्रूरो रणो युद्धं यस्य तम्। बृहद्रथस्यापत्यं पुमान् तं

'तस्यापत्यम्' इत्यणि 'तद्धितेष्वचामादेः' इत्यादिवृद्धिः। जरासन्धमित्यर्थः। सुरेन्द्राज्जातः सुरेन्द्रजोऽर्जुनः गोविन्दश्च सुरेन्द्रजश्च ताभ्यां सह मंक्षु सद्यः 'सद्यो द्राङ् मंक्षु च द्रुतम्' इत्यमरः। निरस्य हत्वा। यद्वा महान्तो ये अगाः पर्वता वृक्षा वा 'शैलवृक्षौ नगावगा' वित्यमरः। महागान् द्यति खण्डयतीति महागदः 'दो अवखण्डन' इति धातोः अतिमहा-बलोपेतत्वेन महापर्वतादिविदारकमिति भावः। बृहन्तो रथा यस्मिन्रणे स बृहद्रथः स एव बार्हद्रथस्तं महारथगजादिचतुरङ्गसैन्ययुक्तमिति भावः। चण्डानां क्रूराणां कीचकादिभूपानां रणं युद्धं तं मंक्षु द्राक् निरस्य सकलभूपान् विजित्येति भावः। राजानं धर्मजं अत्युज्ज्वलः शास्त्रोक्ताङ्गसाकल्येनात्यन्तं शोभमानः राजसूयः राजसूयाख्ययागो यस्य तं चकार ॥ ३६ ॥

मन्दोपकारिणी – महागदमिति ॥ वीरः आरब्धान्तगामी भीमः। राजानं युधिष्ठिरं अत्युज्ज्वलराजसूयं अत्युज्ज्वलः अत्यन्तं प्रकाशमानः राजसूयः तन्नामकयज्ञः यस्य स तथोक्तस्तं चकार। किं कृत्वा महागदं महती गदा तन्नामकमायुधं यस्य सः महागदः तम्। पृथिव्यां भूमौ चण्डरणं चण्डस्तीक्ष्णः रणः युद्धं यस्य स तथोक्तः तं बार्हद्रथं बृहद्रथस्य राज्ञः अपत्यं पुमान् बार्हद्रथः तं जरासन्धम्। गोविन्दसुरेन्द्रजाभ्यां सुरेन्द्राज्जातः सुरेन्द्रजः अर्जुनः, गोविन्दः श्रीकृष्णश्च सुरेन्द्रजश्च गोविन्दसुरेन्द्रजौ ताभ्यां ''सहयोगे तृतीया'' ताभ्यां सह गत्वेति भावः। मङ्क्षु शीघ्रम्। शीघ्रं द्राक् मङ्क्षु च द्रुतमित्यमरः। निरस्य हत्वा। किं कृत्वा महागदं महान्तः अदार्याश्च ते अगाः पर्वताः वृक्षाश्च महागाः ''शैलवृक्षौ नगावगावि''त्यमरः तान् द्यति खण्डयतीति महागदः। दो अवखण्डन इति धातोः। महापर्वतविदारणसमर्थमित्यर्थः। बार्हद्रथं बृहन्तः महान्तश्च ते रथाश्च बृहद्रथाः बृहद्रथानां सम्बन्धी बार्हद्रथः तं महारथोपेतमित्यर्थः। एवं चण्डरणं चण्डानां क्रूराणां कीचकादीनां रणं युद्धं निरस्य भीमः कृष्णार्जुनयुक्तः सन् जरासन्धं प्रति गत्वा तं हत्वा च ततो दिग्विजयकाले कीचकादीन् विजित्य धर्मराजेन राजसूयं यागं कारयामासेति भावः ॥ ३६ ॥

दुःशासनेनाकुलितान् प्रियायाः सूक्ष्मानरालानसितांश्च केशान्।
जिघांसया वैरिजनस्य तीक्ष्णः स कृष्णसर्पानिव सञ्चिकाय ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – दुःशासनेनाकृष्टाया द्रौपद्या विकीर्णान् केशान् तद्वध-प्रतिज्ञापूर्वकं बबन्धेत्याह– **दुःशासनेनेति ॥** भीमः दुष्टं यथा भवति तथा शास्तीति दुःशासनः 'शासि युधिधृषिमृषिभ्यो युज्वाच्य' इति कर्तरि युचि 'युवोरनाकौ' इत्यनादेशः। तेन दुःशासनेन दुर्योधनानुजेन आकुलितान् केशेषु गृहीत्वाकर्षणेन विकीर्णान् सूक्ष्मान् अरालान् वक्रान्। 'भुग्नमराळं कुटिलमाकुञ्चितमूर्मिमत्कथितं' इति हलः। असितान् नीलान् प्रियायाः भार्यायाः द्रौपद्याः केशान्। वैरमस्यास्तीति वैरी स चासौ जनश्च तस्य जिघांसया हननेच्छया दुर्योधनादिवधेच्छयेत्यर्थः। तीक्ष्णः क्रूरः कश्चित् गरुडमन्त्रचतुरः कृष्णसर्पानिव सञ्चिकाय एकीचकार बबन्धेत्यर्थः। चिञ् चयने लिट्। यथा केन-चिद्दुःशासनेन सर्पविषये दुष्टं क्रूरं शास्यतेऽनेनेति शासनं मन्त्रौषधादिरूपं यस्य तेन आकुलितान् पञ्जरादिस्थानाद्विद्रावितान् सूक्ष्मत्वादिविशेषणयुक्तान् कृष्णसर्पान् अन्यः कश्चित् गारुडचतुरः वैरिजनस्य जिघांसया स्वकीयपञ्जरादिस्थानेष्वेकीकुर्यात्तद्वदिति भावः। उपमा ॥ ३७ ॥

मन्दोपकारिणी – दुःशासनेनेति ॥ स भीमः दुःशासनेन दुर्योधनानुजेन आकुलितान् विकीर्णान् सूक्ष्मान् मृदून् अरालान् वक्रान् असितान् नीलान् ''कृष्णे नीलासित-श्यामे''त्यमरः। प्रियायाः भार्यायाः द्रौपद्याः केशान् शिरोरुहान्। कचः केशः शिरोरुह इत्यमरः। वैरिजनस्य वैरिणः शत्रुभूतस्य जनस्य दुर्योधनादेः जिघांसया हन्तुमिच्छया पश्चात् हनिष्यामीति बुद्ध्येत्यर्थः। सञ्चिकाय एकीचकार बबन्धेति भावः। सम्पूर्वात् चिञ् चयन इत्यतो लिट् परस्मैपदं चिकाय चिक्यतुः चिक्युरिति। क इव तीक्ष्णः क्रूरः कश्चित् गरुडमन्त्रनिपुणः पुरुषः सूक्ष्मत्वादिविशेषणयुक्तान् दुःशासनेन सर्पविषये दुष्टं क्रूरं शासनं मन्त्रौषधिरूपशिक्षा यस्य स तथोक्तः। तेन अन्येन गरुडमन्त्राभिज्ञेन आकुलितान् पञ्जरादिस्थानात् विद्रावितान् कृष्णसर्पान् वैरिजनस्य जिघांसया यथा स्वकीयपञ्जरादि-स्थानेषु एकीकुर्यात्तद्वदिति भावः। वैरिजिघांसयेत्यनेन यथा कृष्णसर्पाणां वैरिहनने निमित्तत्वं एवं दुःशासनाकृष्टकेशानां वैरिहनने निमित्तत्वमित्युक्तं भवति। ततश्च तदेकीकरणं युक्तमेवेति भावः ॥ ३७ ॥

जाज्वल्यमानस्य वने वनेऽलं दिधक्षतः पार्थिवसार्थमुग्रम्।
सत्वानि पुंसां भयदानि नाशं बृकोदराग्नेर्गुरुतेजसाऽऽपुः ॥ ३८ ॥

भावप्रकाशिका – पार्थिवा राजानो वृक्षाश्च। तेजः पराक्रमश्च ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – वनवासे च भीमेन किर्मीरादयो दुष्टाः निहता इत्याह— **जाज्वल्येति ॥** वने वने प्रतिवनं 'नित्यवीप्सयो'रिति द्विर्भावः। सर्वेषु वनेष्वित्यर्थः। अलं सम्यक्। पुनः पुनर्ज्वलतीति जाज्वल्यमानस्तस्य। उग्रं क्रूरम्। पार्थिवानां राज्ञां सार्थं समूहं 'सार्थनिकुरुम्बकदम्बपूगराशयः' इति हलः। दग्धुमिच्छतीति दिधक्षंस्तस्य दग्धुमिच्छत इत्यर्थः। भविष्यद्भारतयुद्धे दुर्योधनादिपार्थिवदिधक्षया तद्युद्धं प्रतीक्षमाणस्येति भावः। वृकोदर एव भीम एवाग्निस्तस्य उरु उत्कृष्टं यत्तेजः पराक्रमस्तेन 'तेजो बले प्रभावेऽग्नेज्योतिष्यर्चिषि रेतसि' इति यादवः। पुंसां पुरुषाणां भयं ददतीति भयदानि सत्त्वानि प्राणिनः 'सत्त्वोऽस्त्री जन्तुषु क्लीबे व्यवसाये पराक्रमे' इति वैजयन्ती। किर्मीरादयः सिंहव्याघ्रादयश्च नाशं आपुः। 'आप्लृ व्याप्तौ' लिट्। वने वने अलं जाज्वल्यमानस्य उग्रं कण्टकादिना दुरवगाहं पार्थिवसार्थं वृक्षसमूहं दग्धुमिच्छतो दावाग्नेः उरुतेजसा पुंसां भयङ्कराणि सिंहव्याघ्रादीनि यथा नश्येयुस्तद्वदिति श्लेषाभिप्रायः। प्रकृताप्रकृतश्लेषः शब्दशक्तिमूलध्वनिर्वा ॥ ३८ ॥

मन्दोपकारिणी – जाज्वल्यमानस्येति ॥ पुंसां पुरुषाणां भयदानि भयं ददतीति भयदानि भयङ्कराणीत्यर्थः। सत्वानि जन्तवः। सत्वमस्त्री तु जन्तुष्वित्यमरः। किर्मीरादि-राक्षसाः सिंहव्याघ्रादयश्चेत्यर्थः। वृकोदराग्नेः वृकोदरः भीमः अग्निरिव तस्य गुरुतेजसा गुरु महच्च तत्तेजः प्रभावश्च गुरुतेजः महासामर्थ्यमिति यावत् तेन। तेजः प्रभावे दीप्तौ चेत्यमरः। नाशं मरणं आपुः प्रापुः आप्लृ व्याप्तावित्यस्माल्लिट् परस्मैपदं आप आपतुः आपुः इति। कथंभूतस्य वृकोदराग्नेः अरण्यवासकाले वने वने वीप्सायां द्विर्वचनमिदं सर्वस्मिन् अरण्ये इत्यर्थः। जाज्वल्यमानस्य अतिशयेन ज्वलितः प्रकाशमानः जाज्वल्यमानः तस्य, पुनः कथंभूतस्य, उग्रं क्रूरं भूभारभूतमित्यर्थः। पार्थिवसार्थं पार्थिवानां राज्ञाम्। राज्ञि राट् पार्थिवःक्ष्माभृदित्यमरः। सार्थं समूहम्। सार्थो वणिक् समूहे स्यादपि सन्धानमात्रक इति विश्वः। अलं अत्यन्तं निःशेषमिति यावत्। दिधक्षतः दग्धुमिच्छतः भविष्यद्युद्धे दुर्योधनादि-राजहननेच्छया तद्युद्धं प्रतीक्ष्यमाणस्येति भावः। यथा उग्रं कण्टकाद्यात्मकत्वेन स्पृष्टुं अशक्यं पार्थिवसार्थं पृथिव्यां उत्पन्नाः पार्थिवाः वृक्षाः तेषां सार्थं अलं दग्धुमिच्छतः वने वने प्रज्वलतः दावाग्नेः गुरुतेजसा महाज्वालया पुंसां भयङ्कराणि सिंहव्याघ्रसर्पवृश्चि-कादीनि सत्वानि नश्येयुः तद्वदिति श्लेषाभिप्रायः ॥ ३८ ॥

भोगाधिकाभोगवतोऽरुणाक्षानितस्ततः सञ्चलतो धरेन्द्रे।
बहून् द्विजिह्वान्मणिमत्पुरोगानसौ कटून् क्रोधवशाञ्जघान॥ ३९ ॥

भावप्रकाशिका – आभोगः परिपूर्णता। **द्विजिह्वान्** भुजगान् रत्नवत्प्रधानान् कोपाधिकान् द्विजिह्वान् मत्सरिणो मणिमत्प्रभृतीन् क्रोधवशांश्च ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – सौगन्धिकाहरणसमये क्रोधवशाख्यदैत्याश्च निहता इत्याह- **भोगाधिकेति॥** असौ भीमः भोगा अभीष्टविषयभोगास्तैरधिका, आभोगो बलादिपूर्णता एषामस्तीत्याभोगवन्तः भोगाधिकाश्च ते आभोगवन्तश्च तान् 'आभोगो यत्नपूर्णता' इति वैजयन्ती। अरुणानि अक्षीणि येषां तान् स्वभावतः कोपेन वा लोहितलोचनानित्यर्थः। धरेन्द्रे गन्धमादनगिरिवरे इतस्ततः सञ्चलतः सञ्चरतः द्विजिह्वान् मत्सरिणः 'द्विजिह्वो मत्सरी मतः' इति हलः। अनृतवादिन इति वा। कटून् मनोवाक्कर्मभिर्निष्ठुरान् 'रसे कटुः कट्वकार्ये त्रिषु मत्सरतीक्ष्णयोः' इत्यमरः। मणिमन्नामकः असुरः पुरोगः श्रेष्ठो येषां तान् मणिमत्पुरोगान् बहून् क्रोधवशान् क्रोधवशाख्यासुरान् जघान। 'हन हिंसागत्योः'लिट्। असौ दावाग्निरपि बहून् क्रोधाधीनान्। द्वे जिह्वे येषां तान् सर्पान्। भोगैः शरीरैरधिकास्ते च ते आभोगवन्तश्च बलादिना पूर्णाश्च तान् अरुणाक्षान्। धरेन्द्रे कस्मिंश्चित्पर्वते इतस्ततः सञ्चलतः । मणयो येषां सन्तीति मणिमन्तः फणाग्रेषु रत्नवन्तः सर्पविशेषास्ते पुरोगाः प्रधाना येषां तान् कटून् विषदंष्ट्रादिनातिक्रूरान् एवं भूतान् द्विजिह्वान् सर्पान् यथा नाशयेत्तद्वद्भीमोऽसुरान् जघानेति भावः। प्रकृताप्रकृतश्लेषः॥ ३९ ॥

मन्दोपकारिणी – भोगेति॥ असौ भीमः भोगाधिकाभोगवतः भोगाः अपेक्षितविषयजन्यसुखानि तैः अधिकाः अतिशयेन विषयासक्ताः इति भावः। आभोगः परिपूर्णता येषां अस्तीति आभोगवन्तः बलादिपूर्णा इत्यर्थः। आभोगः परिपूर्णतेत्यमरः। भोगाधिकाश्च ते आभोगवन्तश्च भोगाधिकाभोगवन्तः तान् भोगाधिकाभोगवतः। अरुणे रक्ते अक्षिणी येषां ते अरुणाक्षाः तान्। धरेन्द्रे धराः पर्वताः। अहार्यधरपर्वता इत्यमरः। तेषामिन्द्रे श्रेष्ठे गन्धमादनगिरौ। इतस्ततः सर्वत्रेत्यर्थः। सञ्चलतः द्विजिह्वान् द्वे द्विविध-भाषित्वेन द्विविधे जिह्वे रसने येषां ते द्विजिह्वाः मत्सरेण अनृतवादिन इत्यर्थः तान्।

रसज्ञा रसना जिह्वेत्यमरः। कटून् मनोवाक्कर्मभिस्तीक्ष्णान्। कटुः सुगन्धे तीक्ष्णे स्यादिति विश्वः। मणिमत्पुरोगान् मणिमान् तन्नामकदैत्यः पुरोगः अग्रेसरः येषां ते मणिमत्पुरोगाः तान्। पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरस्सरा इत्यमरः। बहून् क्रोधवशान् क्रोधवशाख्यान् असुरान् जघान हतवान्। हन हिंसागत्योरित्यस्माल्लिट् परस्मैपदं जघान जघ्नतुः जघ्नुः। यथा असौ दावाग्निः बहून् क्रोधवशान् क्रोधस्य कोपस्य वशान् अधीनान् क्रोधपरिपूर्णानित्यर्थः। भोगाधिकाभोगवतः भोगैः शरीरैः फणैः वा अधिकान् दीर्घदेहान् बहुफणान्वा। भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः इत्यमरः। आभोगवतः बलादिपूर्णान् अरुणाक्षान् धरेन्द्रे कस्मिंश्चित् गिरिवरे इतस्ततः सञ्चलतः। मणिमत्पुरोगान् मणिरेषामस्तीति मणिमन्तः केचन फणेषु मणिमन्त इत्यर्थः। मणिमन्त एव पुरोगाः प्रधानाः येषां ते तथोक्तास्तान्। कटून् विषदंष्ट्रादिना क्रूरान्। द्विजिह्वान् द्वे जिह्वे रसने येषां ते द्विजिह्वाः सर्पाः तान् लेलिहानो द्विरसन इति सर्पपर्यायामरः नाशयेत् तथा भीमः असुरान् जघानेति भावः॥ ३९॥

अथैष वेषान्तरभस्मलीनः क्रमेण वायुप्रभवः सुतेजाः।
रुद्धाखिलाशं मुखरं प्रचण्डं भस्मीचकाराखिलकीचकौघम्॥ ४०॥

भावप्रकाशिका – वायुप्रभवो भीमः। क्रमेण सुव्यक्ततेजा अग्निः क्रमेण वायुप्रवृद्धः। आशा इच्छाविशेषा दिशश्च। 'स्वनन्ति येऽनिलोद्भूता वेणवस्ते तु कीचकाः' इति च॥ ४०॥

पदार्थदीपिकोद्बोधिका – भीमेनाज्ञातवासे विराटपुर्यां कीचकाश्च निहता इत्याह— **अथेति॥** प्रभवतीति प्रभवः वायोः प्रभवो वायुप्रभवः, वायूत्पन्न इत्यर्थः। यद्वा प्रभवनं प्रभवः वायोः प्रभव उत्पत्तिर्यस्य सः एष भीमः अथ वनवाससमाप्तयनन्तरम्। अन्यो वेषो वेषान्तरं सूदवेषः तदेव भस्म तेन लीनो निगूढः भीम इति केनाप्यविदित इति भावः। क्रमः कीचकेन सह युद्धक्रमस्तेन। सुष्ठु तेजः पराक्रमो यस्य तादृशः सन्। रुद्धाः प्रतिरुद्धा अखिलाशा अखिलजनानां जयाशा येन तं षडुत्तरशतानां कीचकाख्यानां क्षत्रिय-वंशोत्पन्नानां विराटश्यालानां भूपानामतिप्रबलत्वात्तद्विषय जयाशा कस्यापि नाभूदिति भावः। मुखमस्यास्तीति मुखरः 'खमुखकुञ्चेभ्यश्च' इति मत्वर्थे रप्रत्ययः। तं मुखरं अविचारितभाषणमित्यर्थः। प्रचण्डमतिक्रूरं अखिलाः समस्ता ये कीचकाः

कीचकाख्यनृपास्तेषामोघः समूहस्तं भस्मीचकार ददाह। डुकृञ् करणे लिट्। अग्निरपि भस्मलीनः सन् क्रमेण वायुप्रभवः वायुनोद्बोधितः सन् अत एव सुतेजाः रुद्धा अखिलाशाः समस्तदिशो येन तं मुखरं वायुवशात्सशब्दं प्रचण्डं कण्टकात्मकत्वात्क्रूरं अखिलवेणुसमूहं यथा भस्मीकुर्यात्तद्वदिति भावः। प्रकृताप्रकृतश्लेषः॥ ४०॥

मन्दोपकारिणी – अथेति॥ अथ वनवाससमाप्त्यनन्तरं वायुप्रभवः वायोः मुख्य-प्राणात् प्रभवतीति वायुप्रभवः वायुपुत्रः एषः भीमः अज्ञातवासे वेषान्तरभस्मलीनः अन्यो वेषः वेषान्तरं सूदनामकं तदेव भस्म तेन लीनः निगूढः आच्छादित इति यावत्। भीम इति केनाप्यविदित इति भावः। क्रमेण सुतेजाः सु अभिव्यक्तं तेजः प्रभावो यस्य सः सुतेजाः एतादृशः सन् रुद्धाखिलाशं रुद्धाः प्रतिरुद्धाः अखिलानां राज्ञां आशाः विजयाभिलाषाः येन स तथोक्तस्तम्। षडुत्तरशतकीचकानां अतिप्रबलत्वात् तद्विजयाभिलाषः कस्यापि राज्ञो नाभूदिति भावः। मुखरं अविचारितभाषिणं प्रचण्डं अतिक्रूरं अखिलकीचकौघं अखिलाः षडुत्तरशतसङ्ख्याकाश्च ते कीचकाश्च तन्नामकराजानश्च अखिलकीचकाः तेषां ओघं समूहम्। ओघः समूहे निवह इति भास्करः। भस्मीचकार ददाह। यथा अग्निः भस्मनि लीनः सन् क्रमेण वायुप्रभवः वायुना उद्बोधितः अत एव सुतेजाः रुद्धाखिलाशं समन्ततः प्रतिरुद्धाः आक्रान्ताः अखिला आशाः दिशः येन स तथोक्तः तम्। आशा दिगभिलाषयोरिति भास्करः। मुखरं वायुवशात्सशब्दं प्रचण्डं कण्टकमयत्वात् क्रूरतरं अखिलकीचकौघं अखिलाश्च ते कीचकाश्च तेषां ओघं समूहं भस्मीकरोति तद्वदिति भावः। वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः॥ ४०॥

स कृष्णवर्त्मा विजयेन युक्तो मुहुर्महाहेतिधरोऽप्रधृष्यः।
भीष्मद्विजाद्यैरतिभीषणाभं विपक्षकक्षं क्षपयन् विरेजे॥ ४१॥

भावप्रकाशिका – कृष्णेन वर्त्म यस्येति कृष्णवर्त्मा भीमः। विजयो वायुरर्जुनश्च। हेतिरायुधं तेजश्च। भीष्मद्विजाद्यैर्भीषणपक्षिमृगैश्च॥ ४१॥

पदार्थदीपिकोद्बोधिका – भीमकृतं भारतयुद्धं वर्णयति– **स इति॥** कृष्णप्रेरितं वर्त्म मार्गो यस्य स विजयोऽर्जुनस्तेन युक्तः सहितः। धरतीति धरः महती या हेतिरायुधं तस्या

धरः महाहेतिधरः। गङ्गाधरः, भूवरः, इत्यादिवत् कर्मणः शेषत्वविवक्षायां शेषषष्ठ्या समासः। प्रधृष्यः शत्रुभिर्विनाश्यः स न भवतीत्यप्रधृष्यः स भीमः। भीष्मश्च द्विजो ब्राह्मणो द्रोणः स च तावाद्यौ येषां तैः। अतिभीषणा अतिभयङ्करा आभा कान्तिर्यस्य तम्। विपक्षा एव दुर्योधनादिशत्रव एव कक्षो वनं तं 'कक्षो वीरुधि दोर्मूले कच्छे शुष्के वने तृण' इति हेमचन्द्रः। क्षपयन् नाशयन् विरेजे राजृ दीप्तौ लिट्। श्लेषार्थे तु विजयो विशेषजयस्तेन युक्तः महाहेतिधरः महाज्वालाधरः 'हेतिर्ज्वालांशुरायुधं' इति वैजयन्ती। अप्रधृष्यः असह्यः। भीष्मा भयङ्करा ये द्विजाः पक्षिणः त आद्या येषां तैः। अतिभीषणाभं कक्षं वनं क्षपयन् कृष्णः नीलवर्णः वर्त्म स्वगतमार्गो यस्येति कृष्णवर्त्मा वह्निः यथा विरेजे तद्वदिति भावः। श्लेषः॥ ४१॥

मन्दोपकारिणी – स इति॥, कृष्णवर्त्मा कृष्णस्य वसुदेवपुत्रस्य वर्त्म मार्गो यस्य स तथोक्तः कृष्णज्ञापितमार्ग इत्यर्थः। अयनं वर्त्म मार्गाध्वेत्यमरः। विजयेन अर्जुनेन युक्तः महाहेतिधरः महत्यश्च ताः हेतयोऽस्त्राणि च महाहेतयः धरतीति धरः महाहेतीनां धरः महाहेतिधरः। रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतय इत्यमरः। अप्रधृष्यः अपरैः अविनाश्यः स भीमः। भीष्मद्विजाद्यैः भीष्मः गाङ्गेयश्च द्विजाश्च द्रोणाश्वत्थामादयश्च भीष्मद्विजाः त एवाद्याः पूर्वा येषां ते तथोक्ताः तैः राजसमूहैः। अतिभीषणाभं अतिभीषणा अत्यन्तभयङ्करा आभा कान्तिः यस्य स तथोक्तस्तं विपक्षकक्षं विपक्षा दुर्योधनादिद्वेषिण एव कक्षः शुष्कारण्यं विपक्षकक्षस्तम्। द्विड्विपक्षाहितामित्रेत्यमरः। सौरभे च तृणे कक्षः शुष्ककाननवीरुधोरिति विश्वः। मुहुर्भृशं क्षपयन् संहरन् विरेजे। राजृ दीप्तावित्य-स्माल्लिडात्मनेपदं रेजे रेजाते रेजिरे इति। विजयेन विशिष्टजयेन युक्तः। महाहेतिधरः महतीनां अभिवृद्धानां हेतीनां ज्वालानां धरः धारकः। अप्रधृष्यः सोढुमशक्यः कृष्णवर्त्मा अग्निः। बर्हिःशुष्मा कृष्णवर्त्मेति अग्निपर्यायामरः। भीष्मद्विजाद्यैः भीष्मा भयङ्कराश्च ते द्विजाः पक्षिणश्च त एवाद्याः पूर्वाः येषां ते तथोक्ताः व्याघ्रादयः तैः। भीष्मस्तु भीषणे रुद्रे गाङ्गेये च निशाचर इति विश्वः। दन्तविप्राण्डजा द्विजा इत्यमरः। अतिभीषणाभं अतिभयङ्कराकारं विपक्षरूपं कक्षं वनं क्षपयन् यथा विरेजे तथेति भावः॥ ४१॥

तरस्विनः प्रोच्चलितानधीरान्निर्दग्धपक्षानतितीक्ष्णकोपान्।
स धार्तराष्ट्रान् बहुहेतिलीलो विनाश्य विश्वान्परया श्रियाऽभात्॥४२॥

भावप्रकाशिका – धार्तराष्ट्राः शितेतरचरणा नरा हंसाश्च ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – दुर्योधनादीन्निहत्य साम्राज्यश्रिया विरेज इत्याह— **तरस्विन इति ॥** बह्वयो या हेतयः गदाद्यायुधानि ताभिर्लीला यस्य स भीमः। तरः वेगो बलं वा येषामस्तीति तरस्विनः 'तरसी बलरंहसी' इति वैजयन्ती। प्रोच्चलितान् स्वधर्ममार्गादुच्चलितान् । धीरा न भवन्तीत्यधीरास्तान् युद्धे धैर्यरहितानित्यर्थः। निर्दग्धो विनाशितः पक्षः सहायो येषां तान्। अतितीक्ष्णः कोपो येषां तान्। धृतराष्ट्रस्यापत्यानि पुमांसो धार्तराष्ट्रास्तान् दुर्योधनादीन्। विश्वान् सर्वान्। विनाश्य परया उत्तमया श्रिया जयश्रिया राज्यश्रिया च अभात् अशोभत 'भा दीप्तौ' लङ्। श्लेषार्थे तु दावाग्निरपि तरस्विनः प्रोच्चलितान् स्वनीडाच्चलितान् अधीरान् अग्निमत्प्रदेशमतिलंघ्य गन्तुमधीरान् अत एव निर्दग्धपक्षान् निर्दग्धपतत्रान् अतितीक्ष्णकोपान् धार्तराष्ट्रान् लोहितचञ्चूचरणान् पक्षिविशेषान् 'धार्तराष्ट्रास्तु ते चञ्चुरणैर्लोहितैः सिताः' इत्यमरः। तान् विश्वान्। बहुहेतिलीलः बहुज्वालालीलः सन् विनाश्य यथा परया श्रिया कान्त्या शोभते तद्वदित्यभिप्रायः। श्लेषः ॥ ४२ ॥

मन्दोपकारिणी – तरस्विन इति ॥ बहुहेतिलीलः बह्वयश्च ता हेतयश्च आयुधानि बहुहेतयः बहुहेतिभिः लीला क्रीडा यस्य स तथोक्तः। स भीमसेनः तरस्विनः शूरान्। वेगिशूरौ तरस्विनौ इत्यमरः। प्रोच्चलितान् प्रचलितान् स्वधर्ममार्गादपगतान् अधीरान् धैर्यरहितान् निर्दग्धपक्षान् निर्दग्धः निहतः पक्षः सहायभूतो जनो येषां ते निर्दग्धपक्षाः तान्। पक्षः सहायगरुदन्तिकसाध्यमिति रत्नमाला। अतितीक्ष्णकोपान् अत्यन्तं तीक्ष्णः तिग्मः कोपः क्रोधो येषां ते तथोक्तास्तान्। तिग्मं तीक्ष्णं खरं तद्वदित्यमरः। धार्तराष्ट्रान् धृतराष्ट्रस्य अपत्यानि पुमांसो धार्तराष्ट्राः दुर्योधनादयः तान्। विश्वान् सर्वानपि। विश्वमशेषं कृत्स्नमित्यमरः। विनाश्य हत्वा परया उत्तमया। दूरानात्मोत्तमाः पराः इत्यमरः। श्रिया राज्यसम्पत्त्या। सम्पत्तिः श्रीश्च लक्ष्मीश्चेत्यमरः। अभात् अशोभत। भा दीप्तौ इत्यतः लुङ् परस्मैपदं अभात् अभातां अभुः इति। यथा दावाग्निः तरस्विनः वेगिनः प्रोच्चलितान् स्वनीडाधिष्ठानात् चलितान् अधीरान् अग्निमत्प्रदेशं अतिलङ्घ्य गन्तुं धैर्यरहितान् अत एव निर्दग्धपक्षान् निर्दग्धाः पक्षाः पतत्राणि येषां ते निर्दग्धपक्षाः तान्। अतितीक्ष्णकोपान्

धार्तराष्ट्रान् तन्नामकपक्षिविशेषान्। धार्तराष्ट्रा सितेतरैरित्यमरः। विश्वानपि। बहुहेतिलीलः सन् बह्वीभिः हेतिभिः ज्वालाभिः लीला दहनरूपक्रीडा यस्य स तथोक्तः तादृशः सन् परया श्रिया कान्त्या अशोभत तद्वदिति श्लेषाभिप्रायः॥ ४२॥

कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः कृष्णामुखाम्भोरुहहंसराजः।
प्रजासरोजावलिरश्मिराजः ससोदरोऽराजत वीरराजः ॥ ४३॥

पदार्थदीपिकोद्बोधिका – साम्राज्यमधिरूढो भीमः कथमराजत इत्यत आह– **कृष्णेति॥** कृष्णस्यांघ्री पादौ तावेव पङ्के रुहत इति पङ्केरुहे कमले 'हलदन्तादिति' सप्तम्या अलुक्। तयोर्भृङ्गराज इव भ्रमरश्रेष्ठ इव कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः श्रीकृष्णपादपद्मार्चन-स्मरणादौ सदाऽत्यासक्तिमानित्यर्थः। कृष्णाया द्रौपद्या यन्मुखं तदेवाम्भोरुहं पद्मं तस्मिन् हंसराज इव हंसश्रेष्ठ इव कृष्णामुखाम्भोरुहहंसराजः द्रौपद्या लालनपोषणप्रीणनादिना तस्यामभिरत इत्यर्थः। प्रजा एव सरोजानि कमलानि तेषामावलयः पङ्क्तयः तासु रश्मिराजः रश्म्यधीशो रविरिव प्रजासरोजावलिरश्मिराजः। प्रजानां धर्मतः परिपालने-नानुरञ्जक इत्यर्थः। वीराणां राजा वीरराजः 'राजाहः सखिभ्यष्टच्' इति टच्। ससोदरः युधिष्ठिरार्जुनादिभिः सहितः स भीमोऽराजत शुशुभे। राजृ दीप्तौ लङ्। मालोपमा॥ ४३॥

मन्दोपकारिणी – कृष्णेति। कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः कृष्णस्य वसुदेवपुत्रस्य अङ्घ्री चरणौ ते पङ्केरुहे कमले इव। पङ्केरुहं तामरसमित्यमरः। तयोः भृङ्गराजः भृङ्गानां भ्रमराणां राजा श्रेष्ठः। द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालय इत्यमरः। कृष्णामुखाम्भोरुहहंसराजः कृष्णायाः द्रौपद्याः मुखं आननं अम्भोरुहं कमलमिव कृष्णामुखाम्भोरुहं तस्मिन् हंसराज इव हंसपक्षिश्रेष्ठ इव स्थितः। हंसास्तु श्वेतगरुत इति विश्वः। कृष्णा तु द्रौपदी नीलेति विश्वः। प्रजासरोजावलिरश्मिराजः प्रजाः स्वकीयजनाः। प्रजा स्यात्सन्ततौ जन इत्यमरः। ता एव सरोजानि कमलानि तेषां आवलिः पंक्तिः समूह इत्यर्थः। तस्याः रश्मिराजः रश्मिभिः किरणैः राजत इति रश्मिराजः सूर्यस्थानीय इत्यर्थः। किरणप्रग्रहौ रश्मी इत्यमरः।

ससोदरः सोदरैः भ्रातृभिः सह वर्तमानः । वीरराजः वीराणां शूराणां राजा श्रेष्ठः । अराजत शुशुभे । राजृ दीप्तौवित्यतो लङात्मनेपदं अराजत अराजेतां अराजन्त इति । श्रीकृष्णपादे अत्यासक्तः द्रौपदीमुखं प्रेम्णा पश्यमानः स्वजनहर्षकः भीमः भ्रातृभिः सह शोभमानः सन् राज्यं अभुंक्तेति भावः ॥ ४३ ॥

पौत्रे पवित्राह्वयजामिपौत्रे धरां निधायासुरधीषु तापम् ।
कीर्तिं त्रिलोक्यां हृदये मुकुन्दं भेजे पदं स्वं सहजैः स भीमः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – एवं राज्यपरिपालनं कृत्वा भीमः स्वपदं भेज इत्याह— **पौत्र इति ॥** स भीमः पवित्र इत्याह्वयो नाम यस्य तस्य श्रीकृष्णस्य जामिः स्वसा सुभद्रा । 'जामिः स्वसृकुलीनयो' रिति वैजयन्ती । तस्याः पौत्रः पुत्रपुत्रस्तस्मिन् । 'पवित्रोऽनौहरौ पूत' इति वैजयन्ती । पौत्रे स्वपुत्रपुत्रे, अभिमन्युपुत्रे परीक्षितीत्यर्थः । धरां भूमिं निधाय धरापरिपालनार्थं तमभिषिच्येत्यर्थः । असुरधीषु असुराणां मनस्सु तापं ''बत वयमनेनैवं नाशिता'' इति सन्तापं निधाय, त्रिलोक्यां कीर्तिं निधाय, हृदयं मनः मुकुन्दे निधाय, सहजैर्युधिष्ठिरादिभिः सह स्वपदं स्वस्वरूपं स्वलोकं वा भेजे । भज सेवायां लिट् । दीपकम् ॥ ४४ ॥

मन्दोपकारिणी – पौत्रेति ॥ स भीमः । पवित्राह्वयजामिपौत्रे पवित्रः आह्वयः नाम यस्य सः पवित्राह्वयः श्रीकृष्णः तस्य जामिः स्वसा सुभद्रा । जामिः स्वसृकुलस्त्रियो-रित्यमरः । तस्याः पौत्रे पुत्रस्यापत्यं पुमान् पौत्रः अभिमन्युपुत्र इत्यर्थः । पौत्रै स्वस्यापि पौत्रे परिक्षिति । धरां धरणीम् । धरा धरित्री धरणीत्यमरः । निधाय तदधीनां कृत्वा । असुरधीषु असुराणां धीषु अन्तःकरणेषु तापं च, सर्वे असुराः अनेन भीमेनैव नाशिता इति मनसि सन्तापं निधाय, त्रिलोक्यां लोकत्रये कीर्तिं यशः निधाय प्रसार्य, हृदये स्वचित्ते मुकुन्दं नारायणं निधाय स्थापयित्वा ध्यायन् इति भावः । सहजैः 'सहयोगे तृतीया' भ्रातृभिः सह स्वं स्वकीयं पदं स्वर्गादिस्थानं भेजे प्राप । भज सेवायामित्यतो लिडात्मनेपदं भेजे भेजाते भेजिरे इति । पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ॥ ४४ ॥

विष्णोः पदान्तं भजताऽनिलेन घोरप्रघातैरिति नाशितास्ते ।
रसोज्झिताश्चञ्चलवृत्तयोऽलं शोभां न भेजुः सुरवैरिमेघाः ॥ ४५ ॥

भावप्रकाशिका – प्रघातो युद्धं घटनं च। रसो वीर्यमुदकं च ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – अथ श्रीमुख्यप्राणस्य तृतीयावतारकथां सप्रपञ्चं वक्तुमुपोद्घातसङ्गत्या पूर्वं भीमनिहतानां मणिमदादिदैत्यानामवस्थामाह—**विष्णोरिति** ॥ विष्णोः श्रीकृष्णस्य पदस्य अन्तः सन्निधिस्तं भजता सदा तत्र वर्तमानेन अनिलेन भीमरूपेण वायुना। घोरा ये प्रघाताः सङ्ग्रामास्तैः 'प्रघातश्च समाह्वयः जन्यं स्यादभिसम्पातः' इति हलः। इति प्रागुक्तप्रकारेण। नाशिता रसोज्झिता वीर्येण रहिताः 'रसः स्वादे जले वीर्ये' इति हेमचन्द्रः। अत एव अलं सम्यक् चञ्चला वृत्तिर्वर्तनं येषां ते। भीमहताः सुरवैरिणो मेघा इव सुरवैरिमेघाः शोभां कान्तिं न भेजुः। 'भज सेवायां' लिट्। श्लेषार्थे तु–मेघा वायुना घोरप्रघातैः घोरताडनैर्नाशिताः शकलीकृताः रसोज्झिता निर्जला अत एव लघुत्वादलं चञ्चलवृत्तयः सन्तो यथा शोभां न भजेयुस्तद्वत्। उपमा ॥ ४५ ॥

मन्दोपकारिणी – **विष्णोरिति** ॥ विष्णोः श्रीकृष्णस्य पदान्तं पादयोः अन्तं सामीप्यम्। अन्तः पदार्थसामीप्य इति धनञ्जयः। भजता सेवमानेन श्रीकृष्णसन्निधौ विद्यमानेनेत्यर्थः। अनिलेन भीमरूपेण वायुना घोरप्रघातैः घोरैः क्रूरैः भयानकैः। घोरं भीमं भयानकमित्यमरः। प्रघातैः समाघातैः युद्धैरित्यर्थः। अभ्यामर्दसमाघातसङ्ग्रामाभ्यगामाऽहवा इत्यमरः। इति पूर्वोक्तप्रकारेण। इति हेतुप्रकरणप्रकाशादिसमाप्तिष्वित्यमरः। नाशिताः निहताः रसोज्झिताः रसेन वीर्येण उज्झिताः रहिताः। शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस इत्यमरः। अत एव अलं अत्यन्तं चञ्चलवृत्तयः चञ्चला अस्थिरा समाधानरहितेति यावत् वृत्तिः मनोव्यापारः येषां ते तथोक्ताः। ते प्रसिद्धाः सुरवैरिमेघाः सुरेषु देवेषु वैरं द्वेषो येषामस्तीति सुरवैरिणः दैत्या इत्यर्थः। वैरं विरोधो विद्वेष इत्यमरः। अत एव मेघाः शोभां कान्तिं न भेजुः न प्रापुः। भज सेवायामित्यतो लिट् परस्मैपदं बभाज भेजतुः भेजुः। यथा मेघाः आकाशमध्यप्रदेशं प्राप्तेन वायुना घोरताडनैः शिथिलीकृताः रसोज्झिताः जलरहिताः अत एव लघुत्वात् चञ्चलवृत्तयः सन्तः शोभां न भजन्ति तथेति श्लोकाभिप्रायः ॥ ४५ ॥

एतत्प्रतीपं किल कर्तुकामा नष्टौजसः सङ्कटमेवमाप्य।
मुकुन्दवैगुण्यकथां स्वयोग्यां काले कलावाकलयन्त तेऽलम् ॥४६॥

पदार्थदीपिकोद्बोधिका – एवंभूतास्ते किं चक्रुरित्यत आह—**एतदिति** ॥ नष्टमोजः सामर्थ्यं येषां ते मणिमदादिदैत्याः एवं सङ्कटं भीमनिमित्तक्लेशमाप्य एतस्य भीमकृतापराधस्य

प्रतीपं प्रतीकारं स्ववधप्रतीकारमित्यर्थः। कर्तुं काम इच्छा येषां ते तथा सन्तः 'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि' इत्युक्तेस्तुमोऽन्तलोपः। किलेत्यपरमार्थे। वस्तुतोऽपकर्तुमसमर्था इति भावः। कलौ कलियुगाख्ये 'कलहेऽन्त्ययुगे कलि'रिति वैजयन्ती। काले उत्पन्ना इति भावः स्वयोग्यां दैत्ययोग्याम्। विगतो गुणो यस्मात्स विगुणस्तस्य भावो वैगुण्यं मुकुन्दस्य वैगुण्यं निर्गुणत्वं तस्य कथां तत्समर्थन-परवाग्जालमित्यर्थः। कथ वाक्यप्रबन्ध इति धातोः। अलं सम्यक् आकलयन्त चक्रुः 'कल कामधेनु'रिति धातोर्लङ्॥ ४६॥

मन्दोपकारिणी – एतदिति॥ नष्टौजसः नष्टं गतं ओजः सामर्थ्यं येषां ते तथोक्ताः। ते दैत्याः एवं पूर्वोक्तप्रकारेण सङ्कटं सम्बाधं भीमनिमित्तकं क्लेशमित्यर्थः। आप्य अनुभूय एतत्प्रतीपं एतस्य प्रतीपं विरोधं भीमकृतापकारस्य प्रतीकारमिति यावत्। कर्तुकामाः कर्तुं कामो इच्छा येषां ते। किलेत्यपरमार्थे। अपकर्तुं असमर्था इति भावः। कलौ कलियुगाख्ये काले उत्पन्नाः सन्त इति शेषः। स्वयोग्यां स्वेषां योग्यां अर्हां मुकुन्दवैगुण्यकथां मुकुन्दस्य हरेः विगुणस्य भावो वैगुण्यं वैगुण्यस्य कथां हरिनिर्गुणत्वप्रतिपादकवाग्जालमित्यर्थः। कथ वाक्प्रबन्ध इति धातोः। अलं सम्यक् आकलयन्त चक्रुः। कल कामधेनौ इति धातोः लडात्मनेपदं आकलयत आकलयेतां आकलयन्तेति। भीमहता दैत्याः पुनर्भूमावुत्पन्नाः सन्तः भीमप्रतीकारित्वेन हरिनिर्गुणत्व-प्रतिपादकं शास्त्रं चक्रुरिति भावः॥ ४६॥

यो भूरिवैरो मणिमान्मृतः प्राग्वाग्मी बुभूषुः परितोषितेशः।
स संकराख्योंऽघ्रितलेषु जज्ञे स्पृधाऽपरेऽप्यासुरिहासुरेन्द्राः॥ ४७॥

पदार्थदीपिकोद्बोधिका – भीमहतास्ते वैगुण्यकथां कथं चक्रुः कथञ्चासम्भावितार्थ-प्रतिपादने सामर्थ्यञ्च तेषामित्याशङ्कां परिहरन् पुनर्भुवि जाताः सन्तः वरबलात्तां चक्रुरिति भावेन तेषामुत्पत्तिमाह य इति। प्राक् सौगन्धिकवने मृतो भीमेन हतः यो मणिमान्। भूरि वैरं यस्य बहु वैरं यस्य भीम इति शेषः। स्पृधा स्पर्धया। वाचोऽस्य सन्तीति वाग्मी। 'वाचो ग्मिनि'रिति मत्वर्थे ग्मिनिः। चतुरवचन इत्यर्थः। भवितुमिच्छुः बुभूषुः सन् परितोषितस्तपसा सन्तोषित ईशो रुद्रो येन सः तादृशः सन्। इह भुवि। सर्वभेद-निराकरणात्सर्वसाङ्कर्यप्रतिपादनेन संकर इत्याख्या अन्वर्थसञ्ज्ञा यस्य तादृशः सन्

अङ्कितलेषु तदाख्यविप्रेषु जज्ञे उत्पन्नः 'जनी प्रादुर्भावे' लिट्। अपरे मणिमद्व्यतिरिक्ता असुरेन्द्रा अपि इह भुवि आसुः उत्पन्नाः। धातूनामनेकार्थत्वात् 'अस गतिहिंसादानेषु' लिट्। अङ्कितल इत्यस्य कारडि, इत्यपभ्रष्टसञ्ज्ञा। तौळवानां भाषयाऽङ्केः 'कार्' इति, तलस्य 'अडि' इति च प्रसिद्धेः ॥ ४७ ॥

मन्दोपकारिणी – य इति ॥ प्राक् पूर्वजन्मनि सौगन्धिकवने यो मणिमान् तन्नामकदैत्यः मृतः भीमेन हतः स मणिमान्। भीमे भूरिवैरः भूरि बहुलं वैरं द्वेषो यस्य स तथोक्तः तादृशः सन्। वाग्मी वावदूकः 'वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरी'त्यमरः। बुभूषुः भवितुमिच्छुः सन्। परितोषितेशः तपसा परितोषितः प्रसन्नीकृतः ईशः शम्भुः येन स तथोक्तः। 'शम्भुरीशः पशुपतिरि'त्यमरः। तादृशः सन् इह भूमौ सङ्करास्यः सङ्कर इति आख्या नाम यस्य स तथोक्तः सन् अङ्कितलेषु तन्नामकविप्रेषु जज्ञे अभूत् 'जनी प्रादुर्भाव इत्यतो लिडात्मनेपदं जज्ञे जज्ञाते जज्ञिरे'। अपरेऽपि अन्येऽपि असुरेन्द्राः असुरश्रेष्ठा अपि स्पृधा स्पर्धया इह भूमौ आसुः उत्पन्नाः। 'अस भुवीत्यतो लिट् परस्मैपदं आस आसतुः आसुरिति' ॥ ४७ ॥

सान्नाय्यमव्यक्तहृदाखुभुग्वा श्वा वा पुरोडाशमसारकामः।
मणिस्रजं वा प्लवगोऽव्यवस्थो जग्राह वेदादिकमेष पापः ॥ ४८ ॥

भावप्रकाशिका – आखुभुगादिवदव्यक्ताभिप्रायत्वमस्य ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – स च स्वेनात्यन्तमपरिग्राह्यवेदादिकं जग्राहेत्येतत्सदृष्टान्तमाह—**सान्नाय्यमिति ॥** अव्यक्तमप्रकटितं हृत् अभिप्रायो यस्य स तथा आखून् मूषिकान् भुङ्क्त इति आखुभुक् मार्जारः 'ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्' इत्यमरः। सान्नाय्यं वा क्षीराख्यं याज्ञियं हविर्विशेषमिव 'सान्नायं हविरुच्यत' इति हलः। 'वा विकल्पोपमानयोः' इत्यमरः। असारे अपवित्रे पुरीषे काम इच्छा यस्य स श्वा शुनकः। पुरोडाशमिव चरुमिव। न विद्यते व्यवस्था अवस्थितिः यस्य स अतिचञ्चल इत्यर्थः। प्लवगः कपिः मणिस्रजं वा अनर्घ्यरत्नमालामिव पापः एष सङ्करास्यः वेदादिकं जग्राह अध्ययनादिकं चक्रे। अयमत्र दृष्टान्तत्रयाभिप्रायः। सान्नाय्यं पिपासुरपि मार्जारोऽव्यक्तहृदयो निमीलिताक्षः साधुरिव वर्तमानो यथावसरे प्राप्ते तत्पिबेत्, एवं अव्यक्तहृदयो

ब्रह्मणोऽवाच्यत्वान्निर्विषयत्वेन वेदाप्रामाण्यं, ब्रह्मणश्च निर्विशेषत्वादन्ततः शून्यत्वमित्यादि-स्वाभिप्रायानभिव्यञ्जकः। श्वा असारं जुगुप्सितं मलं कामयते तद्वदयमपि जीवब्रह्मैक्यं, ब्रह्मणो निर्गुणत्वं, तस्यैव जीवरूपेण संसारित्वं, जगन्मिथ्यात्वमित्यादिकं सर्वमप्रामाणिकं सर्वप्रमाणविरुद्धञ्च कामयते। प्लवगोऽपि यथा नानारत्नमयीं मालां लब्ध्वापीयं मणिमाला, अत्रत्यमणीनामपीदं तारतम्यं इत्यादिविवेकरहितस्तथाऽयमपि बद्धमुक्तादिव्यवस्थां, जीव-ब्रह्मव्यवस्थां, अज्ञानस्यायमाश्रयो विषयश्चायमित्यादिव्यवस्थां न समर्थयितुं समर्थ इत्यव्यवस्थ इति। उपमा ॥ ४८ ॥

मन्दोपकारिणी – सान्नाय्यमिति ॥ अव्यक्तहृत् अव्यक्तं अप्रकटितं हृत् अभिप्रायो यस्य स तथोक्तः। आखुभुक् मार्जारः 'ओतुर्बिडालो मार्जारो वृषदंशक आखुभुगि'त्यमरः। सान्नाय्यं वा दुग्धदधिविकारं याज्ञियहविर्विशेषमिव। 'वा विकल्पोप-मानयोरि'त्यमरः। असारकामः असारस्य अपवित्रस्य काम इच्छा यस्य स तथोक्तः। श्वा शुनकः। 'शुनको भषकः श्वा स्यादि'त्यमरः। पुरोडाशं वा पिष्टमयं हविर्विशेषमिव अव्यवस्थः व्यवस्था विवेकः तद्रहितः प्लवगः कपिः। 'कपिप्लवङ्गप्लवग' इत्यमरः। मणिस्रजं वा अनर्घ्यमणीनां स्रजं मालामिव। पापः पापमस्यास्तीति पापः 'अर्शादिभ्योऽच्' एष सङ्करास्यः वेदादिकं वेदः श्रुतिः स एव आदिः यस्य तत् शास्त्रमिति भावः। जग्राह स्वीकृतवान् 'ग्रह उपादान इत्यतो लिट् परस्मैपदं जग्राह जगृहतुः जगृहुरिति'। अयमत्र दृष्टान्ताभिप्रायः, सान्नाय्यं पिपासुरपि मार्जारः अव्यक्तहृदयः निमीलिताक्षः साधुरिव वर्तमानः सन् यथा अवसरे प्राप्ते तत्पिबति एवं अयमपि अव्यक्तहृदयः ब्रह्मणः अवाच्यत्वात् निर्विषयत्वेन वेदाप्रामाण्यं ब्रह्मणः निर्विशेषत्वतः शून्यत्वमित्यादि-स्वाभिप्रायानभिव्यञ्जकः। यथा शुनकः असारं जुगुप्सितं कामयते तद्वत् अयमपि प्रमाण-रहितं प्रमाणविरुद्धं जीवब्रह्मैक्यं जगन्मिथ्यात्वमित्यादि कामयते। यथा कपिः नानारत्नमयीं मालां लब्ध्वापि इयं मणिमाला, अस्यां अनर्घ्याणि रत्नानि तारतम्योपेतानि सन्तीत्यादि-विवेकशून्यः तथा सङ्करोऽपि अयं जीवः इदं ब्रह्म अयं बद्धः अयं मुक्तः इति विवेककरणासमर्थः सन् वेदादिकं अधीतवानिति भावः ॥ ४८ ॥

जनो नमेन्नापरथेति मत्वा शठश्चतुर्थाश्रममेष भेजे।
पद्माकरं वा कलुषीचिकीर्षुः सुदुर्दमो दुष्टगजो विशुद्धम् ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – स च यत्याश्रमं जग्राह किमर्थमित्यत आह—**जनेति ॥** शठः गूढद्वेषः वेदादिप्रमाणेषु तत्प्रतिपाद्ये ब्रह्मणि च निगूढद्वेषः एष संकरः अपरथा सन्यासाश्रमापरिग्रहे सति जनो न नमेत् न प्रह्वीभवेत् 'णमु प्रह्वत्वे शब्दे' लिङ्। इति मत्वा न तु विरक्त्येति भावः। सुष्ठु दुर्दमः सर्वथा निग्रहीतुमशक्त इत्यर्थः। दुष्टगजो विशुद्धं पूर्वमकलुषम्। अकलुषं कलुषं कर्तुमिच्छति कलुषीचिकीर्षति कलुषीचिकीर्षतीति कलुषीचिकीर्षुः सन् पद्माकरं वा तटाकमिव 'पद्माकरस्तटाकोऽस्त्री' इत्यमरः। चतुर्णां पूरणश्चतुर्थः। 'तस्य पूरणे डट्' इति डटि 'षट् कतिकतिपयचतुरां थुक्। चतुर्थश्चासावाश्रमश्च तं यत्याश्रममित्यर्थः। भेजे प्राप ॥ ४९ ॥

मन्दोपकारिणी – जन इति ॥ शठः वेदादौ तत्प्रतिपाद्ये ब्रह्मणि च ब्राह्मणेषु च निगूढद्वेषः 'निकृतस्त्वनृजुः शठ'इत्यमरः। एष संकरः चतुर्थाश्रमं ब्रह्मचारिगृहस्थवनस्थयत्याश्रमेषु चतुर्थश्चासावाश्रमश्च चतुर्थाश्रमः यत्याश्रम इत्यर्थः तं भेजे स्वीकृतवान्। कः किमिव। सुदुर्दमः न विद्यते दमः दण्डो निग्रह इति यावत् यस्य स दुर्दमः सुष्ठु दुर्दमः सुदुर्दमः निग्रहं कर्तुमशक्य इत्यर्थः। 'दुःस्यात्कष्टनिषेधयोरिति' विश्वः। 'दमस्तु दमने दण्ड' इति च। दुष्टगजः दुष्टः मत्तश्चासौ गजश्च दुष्टगजः। विशुद्धं पूर्वं निर्मलजलं कलुषं चिकीर्षुः पङ्किलं कर्तुमिच्छुः सन्। पद्माकरं वा तटाकमिव 'पद्माकरस्तटाकोऽस्त्री'त्यमरः। किं कृत्वा अपरथा यत्याश्रमस्वीकाराभावे जनः न नमेत् मयि प्रवणो न भवेदिति मत्वा न तु विरक्त्येति भावः। 'णमु प्रह्वत्वे शब्दे चेत्यतो लिङ् परस्मैपदं नमेत् नमेतां नमेयुः'। यथा गजः निर्मलजलं पद्माकरं प्रविश्य कलुषं कृत्वा स्नानपानायोग्यं करोति एवं अयमपि रागद्वेषवर्जनपूर्वकं स्वायोग्यं यत्याश्रमं वेदादिद्वेषिजनवशीकरणपूर्वकं गृहीत्वा स्वस्य तत्साध्यहरिप्रीत्यादिफलाजनकं चकारेति भावः ॥ ४९ ॥

अवैदिकं माध्यमिकं निरस्तं निरीक्ष्य तत्पक्षसुपक्षपाती।
तमेव पक्षं प्रतिपादुकोऽसौ न्यरूरुपन्मार्गमिहानुरूपम् ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – एवं सन्यासाश्रमं गृहीत्वाऽसन्मतप्रवर्तनं चकारेत्याह इत उत्तरेण ग्रन्थेन। असौ संकरः। वेदसम्बन्धि वैदिकं तन्न भवतीत्यवैदिकं वेदविरुद्धार्थप्रतिपादकमित्यर्थः। माध्यमिकानां सम्बन्धिनं माध्यमिकं बौद्धसम्बन्धिनं पक्षं सिद्धान्तं

निरस्तं वैदिकैर्निराकृतं निरीक्ष्य तत्पक्षे माध्यमिकपक्षे सुपक्षपातः सुतरां वात्सल्य-मस्यास्तीति तादृशः। अत एव तं पक्षमेव बौद्धसिद्धान्तमेव प्रतिपादुकः प्रतिपादनशीलः। 'लषपतपदेति' पदधातोस्ताच्छील्यार्थे उकञ्। संकर इह तत्पक्षसमर्थनविषये अनुरूपं स्वस्य वेदान्तित्वप्रसिद्धिमनुपमृद्यैव बौद्धमतसमर्थनानुगुणं मार्गमुपायभूतग्रन्थमित्यर्थः। न्यरूरुपत् निरूपितवान् चकारेत्यर्थः॥ रूप रूपक्रियायां लुङ्॥ ५०॥

मन्दोपकारिणी – अवैदिकमिति॥ असौ संकरः। माध्यमिकं बौद्धसम्बन्धिनं पक्षं सिद्धान्तम्। अवैदिकं हेतुगर्भविशेषणं एतत्। अवैदिकत्वात् वेदविरुद्धत्वात् वेदप्रामाण्य-वादिभिः निरस्तं परित्यक्तं निरीक्ष्य दृष्ट्वा स्वयं तत्पक्षसुपक्षपाती तेषां बौद्धानां पक्षे सिद्धान्ते सु अत्यन्तं पक्षपातः आग्रहः अस्यास्तीति तत्पक्षसुपक्षपाती सन् अत एव तं पक्षमेव बौद्धसिद्धान्तमेव प्रतिपादुकः प्रतिपादयितुकामः इह तत्पक्षसमर्थनविषये अनुरूपं स्वस्य वेदान्तित्वप्रसिद्धिं अनुपगृह्यैव बौद्धमतसमर्थनानुगुणमार्गं उपायं न्यरूरुपत् चिन्तितवान्। 'रूप रूपक्रियायां इत्यतो लुङ् परस्मैपदं अरूरुपत् अरूरुपतां अरुरुपन्'। उपेन्द्रवज्रावृत्तम्॥ ५०॥

असत्पदेऽसन् सदसद्विविक्तं मायाख्यया संवृतिमभ्यधत्त।
ब्रह्माप्यखण्डं बत शून्यसिद्ध्यै प्रच्छन्नबौद्धोऽयमतः प्रसिद्धः॥५१॥

पदार्थदीपिकोद्बोधिका – एतदेव विशदयति— **असदिति॥** सन् सज्जनो न भवतीत्यसन् दुष्ट इत्यर्थः। असतः पदे स्थाने असदिति वक्तव्ये इति भावः। सच्चासच्च सदसती ताभ्यां विविक्तं विलक्षणं अभ्यधत्त प्रोवाच। डु धाञ् धारणपोषणयोर्लङ्। बौद्धमतानुसारेण विश्वमसदिति वक्तव्ये तथानुक्त्वा सदसद्विलक्षणमित्युवाचेति भावः। शून्यवादिनः शून्याख्यं परतत्त्वम् अखण्डं निर्विशेषमाहुः। अयमपि परतत्त्वं ब्रह्म, शून्यस्य सिध्यै शून्यसाधर्म्येण प्रतिपादितस्य ब्रह्मणः शून्यत्वसिद्धय इत्यर्थः। 'खडि भेद' इति धातोः खण्ड्यते भिद्यते व्यावर्त्यते वस्त्वनेनेति खण्डोऽसाधारणधर्मापरनामा विशेषः। न विद्यते खण्डो विशेषो यस्य तदखण्डं निर्विशेषं निर्धर्मकमिति यावत्। अभ्यधत्त प्रोक्तवान्। बतेत्यव्ययं खेदे। अनन्तगुणमपि ब्रह्मायं निर्गुणम् उक्तवानिति खेदः। 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इत्यमरः। अतः प्रच्छन्नश्चासौ बौद्धश्च वेषान्तरा-पन्नबौद्ध इत्यर्थः। इति प्रसिद्धः सज्जनसभासु ख्यातोऽभवत्॥ ५१॥

मन्दोपकारिणी – चिन्तितोपायमाह **असत्पद इति** ॥ असन् दुष्टः सङ्करः । असत्पदे असतः स्थाने सदसद्विविक्तं सदसद्विलक्षणं अभ्यधत्त उक्तवान् । डु धाञ् धारणपोषणयोरित्यतो लङात्मनेपदं अभ्यधत्त अभ्यदधातां अभ्यदधत इति । बौद्धमतानुसारेण विश्वं असदिति वक्तव्ये तथा अनुक्त्वा विश्वं सदसद्विलक्षणमिति शब्दान्तरेण उवाच इति भावः । शून्यवादिनः विश्वारोपनिमित्तं अज्ञानं संवृतिरिति आहुः । अयं सङ्करस्तु संवृतिं मायाख्यया मायेति नाम्ना अभ्यधत्त व्यवहृतवान् । शून्यवादिनः शून्याख्यं परतत्वं निर्विशेषं निर्गुणमाहुः । अयमपि परतत्वं ब्रह्म अखण्डं निर्विशेषं अभ्यधत्त । किमर्थं शून्यसिद्धयै शून्यसाधर्म्येण ब्रह्मणोऽपि शून्यत्वप्राप्तये । बतेति खेदे अनन्तगुणमपि ब्रह्म अयं सङ्करः निर्गुणं उक्तवान् इति खेदः । 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बते'त्यमरः । अतः स्वस्य प्राप्तबौद्धत्वस्याच्छादितत्वादेव अयं सङ्करः प्रच्छन्नबौद्धः । बौद्धशब्दः भावप्रधानः प्रच्छन्नं गूहितं बौद्धत्वं येन सः प्रच्छन्नबौद्ध इति । मायावादिशून्यवादिनोः सर्वप्रमेये विशेषाभावात् शब्दमात्रेणैव भेदात् नाममात्रे विवादायोगेन बौद्धत्वं तावत्सिद्धं सङ्करस्य तच्छब्दान्तरेण व्यवहारस्य कृतत्वात् न प्रकटितम् । अतः सङ्करः प्रच्छन्नबौद्ध इत्युक्त इति भावः ॥ ५१ ॥

यद्ब्रह्मसूत्रोत्करभास्करं च प्रकाशयन्तं सकलं स्वगोभिः ।
अचूचुरद्वेदसमूहवाहं ततो महातस्करमेनमाहुः ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – परापरसकलतत्त्वप्रकाशकत्वादिना भास्करसदृशानि सूत्राणि यतोऽन्यथापव्याख्यानेनान्यथाज्ञानजनकानि चकार अतो भास्करतस्करसमान इत्यतो महातस्कर इति प्रसिद्धोऽभूदित्याह **यदिति** ॥ अयं संकरः स्वस्य गावो वाचस्ताभिः सकलं जीवेश्वरस्वरूपादिकं प्रकाशयन्तं प्रकटयन्तम् । वहतीति वाहः वेदानां यः समूहस्तस्य वाहस्तम् । विचार्यत्वेन वा स्वोक्तार्थे प्रमाणत्वेन वा सकलवेदान् वहन्तमित्यर्थः । ब्रह्मणो वेदस्य सूत्राणि अनन्तवेदार्थनिर्णायकसूत्राणीत्यर्थः तेषामुत्करः समूहः स एव भास्करस्तञ्च । अचूचुरत् चुचोर 'चुर स्तेये' लुङ् यद्यस्मात् तस्मात् एनं संकरं जना महातस्करमाहुः 'ब्रूञ् व्यक्तायां वाचि' लट् । भास्करोऽपि स्वरश्मिभिः सकलप्रकाशकः, वेदसमूहा वाहा अश्वा यस्य स तथोक्तः । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः । सूर्यरथे निबद्धाश्वानां सकलवेदाभिमानिदेवतात्मकत्वादिति भावः । तथा च भास्करसदृशब्रह्मसूत्रतस्करस्यास्य भास्करतस्करस्येव महातस्करत्वं युक्तमिति भावः । उपमा ॥ ५२ ॥

मन्दोपकारिणी – यदिति ।। यस्मादयं संकरः। ब्रह्मसूत्रोत्करभास्करं ब्रह्मसूत्राणां उत्करः समूहः। 'स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियामित्यमरः'। स एव भास्करः सूर्यः तम्। 'भास्कराहस्करब्रध्न' इत्यमरः। अचूचुरत् अपहृतवान्। 'चुर स्तेय इत्यतो लुङ् परस्मैपदं अचूचुरत् अचूचुरतां अचूचुरन्'। ततः एनं संकरं महातस्करं महांश्चासौ तस्करः चोरश्च तं आहुः वदन्ति। 'ब्रूञ् व्यक्तायां वाचीत्यतो लट्'। कथंभूतं स्वगोभिः स्वेषां सूत्राणां गोभिः वचोभिः सकलं जीवजडेश्वरस्वरूपादिकं प्रकाशयन्तं प्रतिपादयन्तम्। पुनः कथंभूतं वेदसमूहवाहं विषयवाक्यत्वेन वा स्वोक्तार्थप्रमाणत्वेन वा वेदानां समूहं वहन्तं, भास्करोऽपि स्वगोभिः स्वरश्मिभिः 'गौः स्वर्गे च वृषे रश्मावितिविश्वः' सकलपदार्थ-प्रकाशकः वेदसमूहवाहः वेदसमूहाः वेदसमूहाभिमानिनः वाहाः रथहयाः यस्य स तथोक्तः 'वाजिवाहार्वगन्धर्वेत्यमरः'। सकलप्रकाशकभास्करतस्करस्य यथा महातस्करत्वं तथा तत्सदृशब्रह्मसूत्रतस्करस्य संकरस्यापि महातस्करत्वं युक्तमेव। सूत्रचौर्यं नाम स्वेच्छया व्याख्यानकरणमेवेति ज्ञेयम्।। ५२ ।।

स्वसूत्रजातस्य विरुद्धभाषी तद्भाष्यकारोऽहमिति ब्रुवन् यः।
तं तत्क्षणाद्यो न दिधक्षति स्म स व्यासरूपो भगवान् क्षमाब्धिः ।। ५३ ।।

भावप्रकाशिका – 'न दिधक्षति स्म'। 'लट् स्म' इति सूत्रादतीतार्थत्वम्।। ५३ ।।

पदार्थदीपिकोद्बोधिका – एतादृशं संकरं व्यासः कुतो न भस्मीचकारेत्यत आह— **स्वेति ।।** यः संकरः स्वस्य यानि सूत्राणि तेषां जातस्य समूहस्य 'जातं जात्योघजनिषु' इति हेमचन्द्रः। विरुद्धं जगन्मिथ्यात्वादिकं भाषत इति तादृशः। तथाप्यहं तेषां ब्रह्मसूत्राणां यद्भाष्यं तत्करोतीति तथोक्तः। 'कर्मण्यण्' इत्यण्। इति ब्रुवन् वर्तते। तमेतादृशं संकरं यो व्यास इति रूपं स्वरूपं यस्य सः। भगोऽस्यास्तीति भगवान् षड्गुणपूर्णः श्रीव्यासः। स चासौ क्षणश्च तस्मात्। न दिधक्षति स्म न दग्धुमैच्छत्। 'दह भस्मीकरणे' लट्। स व्यासः क्षमाब्धिः क्षमासमुद्रः क्षमाब्धित्वात्स्वयं न भस्मीचकारेति भावः। काव्यलिङ्गम्।। ५३ ।।

मन्दोपकारिणी – स्वेति ।। यः संकरः स्वसूत्रजातस्य स्वकीयसूत्राणां जातस्य समूहस्य वेदव्यासकृतसूत्रस्येत्यर्थः। जातं जात्योघजन्मस्विति विश्वः। विरुद्धभाषी

विरुद्धभाषणशील इत्यर्थः। तथा च अहं तद्भाष्यकारः तेषां सूत्राणां भाष्यकर्ता इति ब्रुवन् वदन् वर्तते। तं एवंविधसंकरं यः व्यासरूपः भगवान् भगः अस्यास्तीति भगवान्। 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणे'ति वचनात्। सम्पूर्णैश्वर्यादिषड्गुणवान् इत्यर्थः। तत्क्षणात् अव्ययमेतत्। तस्मिन्नेव विरुद्धभाषणादिकाले न दिधक्षति स्म दग्धुं नैच्छत्। 'दह भस्मीकरण' इत्यतो लङ् परस्मैपदं दिधक्षति दिधक्षत दिधक्षन्ति। स्म अतीते। सः वेदव्यासः क्षमाब्धिः क्षमया तितिक्षया सहनशक्त्येति यावत्। अब्धिः समुद्रः । क्षमा क्षोभ्या तितिक्षा चेति भास्करः॥ ५३ ॥

निगमसन्मणिदीपगणोऽभवत्तदुरुवाग्गणपङ्कनिगूढभाः।
अविदुषामिति संकरताकरः स किल संकर इत्यभिशुश्रुवे॥ ५४ ॥

भावप्रकाशिका – अविदुषामिति। तस्मादविदुषां नराणाम्॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – तस्य संकर इति शब्दवाच्यत्वे निमित्तमाह— **निगमेति॥** निगमा वेदा एव सन्मणय उत्तमरत्नानि त एव दीपाः प्रदीपाः तेषां गणः समूहः। तस्य संकरस्य उरवः उत्कृष्टा या वाचः व्याख्यानरूपवाचस्तासां गणः समूहः स एव पङ्कः कर्दमस्तेन निगूढा प्रच्छन्ना भाः कान्तिर्यस्य सोऽभवत्। रत्नप्रदीपवत् भगवत्स्वरूपादिकं सम्यक् प्रकाशयन्नपि निगमः संकरकृतापव्याख्यानेन तिरोहितोऽभवदिति भावः। इति तस्मात् 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः। श्रुत्यादेरन्यथा-व्याख्यानादित्यर्थः। विद्वांसो न भवन्तीत्यविद्वांसस्तेषां स्वतो वेदार्थमजानतां नराणा-मित्यर्थः। संकरस्य भावः संकरता तां करोतीति तथोक्तः। संकरताया कर इति वा। सर्वभेदाभावबुद्धिजनक इत्यर्थः। स संकर इत्यभिशुश्रुवे किल विद्वत्सभासु प्रसिद्धोऽभूत्किल। श्रु श्रवणे लिट्। द्रुतविलम्बितवृत्तम्। 'द्रुतविलम्बितमाह नभौ भरौ' इत्युक्तेः। रूपकम्॥ ५४ ॥

मन्दोपकारिणी – **निगमेति॥** निगमसन्मणिदीपगणः – मणय एव दीपाः मणिदीपाः सन्तश्च ते मणिदीपाश्च सन्मणिदीपाः निगमा एव सन्मणिदीपाः तेषां गण इति

विग्रहः। निगमाः वेदा एव सन्मणिदीपाः निर्दोषरत्नमणिदीपाः तेषां गणः समूह इत्यर्थः। तदुरुवाग्गणपङ्कनिगूढभाः – वाचां गणः वाग्गणः उरुश्चासौ वाग्गणश्च उरुवाग्गणः तस्य उरुवाग्गणः तदुरुवाग्गणः स एव पङ्कः तेन निगूढा भाः यस्येति विग्रहः। तस्य संकरस्य उरुः उत्कृष्टः वाचां व्याख्यानरूपवाचां गणः जालं स एव पङ्क कर्दमः 'पङ्कः कर्दम पापयोरित्यमरः' पङ्केन निगूढा तिरोहिता भाः प्रकाशो यस्य सः तथोक्तः। अभवत् रत्नमयदीपवत् भगवत्स्वरूपादिकं सम्यक् प्रकाशयन्नपि वेदः संकरकृतव्याख्यानेन तिरोहितार्थोऽभवदिति भावः। अत्र मणिदीपप्रकाशस्य पङ्केन नाशो यथा न भवति किन्तु तिरोधानमेव तद्वत् वेदप्रकाशस्यापि संकरवाग्जालेन तिरोधानमेव न तु नाश इति सूचयितुं मणिदीप एव दृष्टान्तीकृतः। प्रसिद्धदीपस्य पङ्केन नश्यमानत्वेन तिरोधानायोगादिति ज्ञेयम्। इति अस्माद्धेतोः श्रुत्याद्यन्यथाव्याख्यानात् अविदुषां स्वतो वेदार्थमविजानतां नराणां संकरताकरः संकरतां सांकर्यं सर्ववेदाभासबुद्धिं करोतीति संकरताकरः सः संकर इति नाम्ना अभिशुश्रुवे किल विद्वत्सभासु प्रसिद्धोऽभूत् किल। श्रु श्रवण इत्यतः कर्मणि लिडात्मनेपदं शुश्रुवे शुश्रुवाते शुश्रुविरे। द्रुतविलंबितवृत्तम्। द्रुतविलंबितमाह 'नभौ भरौ'इति तल्लक्षणात्॥ ५४॥

विश्वं मिथ्या विभुरगुणवानात्मनां नास्ति भेदो
दैत्या इत्थं व्यदधत गिरां दिक्षु भूयः प्रसिद्धिम्।
आनन्दाद्यैर्गुरुगुणगणैः पूरितो वासुदेवो
मन्दं मन्दं मनसि च सतां हन्त नूनं तिरोऽभूत्॥५५॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के प्रथमः सर्गः ॥

भावप्रकाशिका – आनन्दाद्यैरित्यादिसर्गान्तश्लोकपदेन आनन्दात्मकोऽयं ग्रन्थः ॥ ५५॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमत्सुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां प्रथमः सर्गः ॥

पदार्थदीपिकोद्बोधिका – वेदादिभ्यः सामान्यतो विष्णुमनन्तगुणं जानतामपि सतां मायिप्रणीतदुर्भाष्यादिरूपवाग्भिः तत्त्वविषये इदं अदो वा इति संशयोऽन्यदेवेति विपरीतज्ञानं वाऽभूदिति भावेनाह–**विश्वमिति**॥ दैत्याः संकरादिनाम्ना भुव्युत्पन्ना मणिमदादयो विश्वं प्रपञ्चो मिथ्या सदसद्विलक्षणम्। अव्ययमेतत्। विभुर्व्याप्तो भगवान् विष्णुः, गुणा अस्य सन्तीति गुणवान् स न भवतीत्यगुणवान् निर्गुण इत्यर्थः। गुणविरुद्धा अगुणा दोषास्तद्वानिति वा। ब्रह्मैव जीवरूपेण सकलदोषभाजनमिति हि मायिमतम्। आत्मनां चेतनानां भेदो नास्ति। इत्थं दिक्षु नानादेशेषु गिरां वाचां भूयो बाहुल्येन प्रसिद्धिं व्यदधत चक्रुः। डु धाञ् धारणपोषणयोर्लुङ्। तथा प्रसिद्ध्या किमभूदित्यत आह आनन्दाद्यैरिति। आनन्द आद्यो येषां तैः। गुरवो महान्तो ये गुणास्तेषां गणाः समूहास्तैः। 'गुरुर्महत्यांगिरसे पित्रादौ धर्मदेशिके' इति हेमचन्द्रः। पूरितः पूर्णो वासुदेवः श्रीहरिः सतां सम्यग् ज्ञानयोग्यानां पुरुषाणां मनसि च तिरोऽभूत् नूनं तिरोहितोऽभूदेव। 'नूनं तर्केऽवधारणे' इत्यमरः। आनन्दतीर्थानामस्मिन्काव्ये प्रतिपाद्यत्वात्सर्गान्तश्लोके आनन्द-पदाङ्कितमिदं काव्यम्। मन्दाक्रान्तावृत्तम्। 'मन्दाक्रान्ता जलधिषडगैर्मौनतौ ताद् गुरु चेत्' इत्युक्तेः॥ ५५॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां प्रथमः सर्गः॥

मन्दोपकारिणी – विश्वं मिथ्येति॥ दैत्याः भुवि जाताः मणिमदादयः दिक्षु नानादेशेषु। विश्वं प्रपञ्चः मिथ्या सदसद्विलक्षणं, विभुः विष्णुः अगुणवान् गुणाः अस्य संतीति गुणवान् न गुणवान् अगुणवान् निर्गुण इति यावत्। आत्मनां जीवानां 'आत्मा यत्ने धृतौ जीवे स्वभावे परमात्मनि' इति भास्करः, भेदो नास्ति इत्थं एवंरूपाणां गिरां वचसां 'गीर्वाग्वाणी सरस्वती'त्यमरः भूयःप्रसिद्धिं भूयसी बहुला च सा प्रसिद्धिश्च तां व्यदधत चक्रुः। डु धाञ् धारणपोषणयोरिति धातोर्लङात्मनेपदं अधत्त अदधातां अदधतेति'। तया प्रसिद्ध्या किमभूत् इत्यपेक्षायामाह आनन्दाद्यैरित्यादि– आनन्दाद्यैः आनन्द एव आद्यो येषां ते आनन्दाद्याः तैः। गुरुगुणगणैः गुरवः महान्तश्च ते गुणाश्च गुरुगुणाः तेषां गणैः समूहैः। गुणानां महत्वं नाम उत्पत्तिनाशादिदोषशून्यत्वम्, पूरितः पूर्णः वासुदेवः श्रीहरिः सतां सम्यक् ज्ञानयोग्यानां जनानां मनसि चेतसि मन्दं मन्दं शनैः

कालक्रमेणेत्यर्थः। तिरोऽभूत् नूनं अदृश्योऽभूदेव। 'नूनं तर्केऽवधारण' इत्यमरः। सामान्यतो विष्णुं अनन्तगुणं जानतामपि सतां मायिप्रणीतदुर्भाष्यादिवाक्प्रकरप्रसिद्धया इदमदो वेति संशयः केषांचित् संकरप्रणीतप्रकार एव सम्यगिति विपरीतज्ञानं अभूत् इति भावः। हन्तेति विषादे। मुक्तियोग्यानां संशयज्ञानादिकं अभूदित्येतत् महादुःखकरमिति विषादः। अनुकम्पा वा। मुक्तियोग्यानां तेषां कथं वा कदा वा तत्त्वज्ञानं स्यादिति ग्रन्थकर्तुः अनुकम्पा। 'हन्त हर्षे विषादे च वाक्यारम्भानुकम्पयोरिति' रत्नमाला। प्रतिसर्गे अन्तिमश्लोकेषु आनन्दपदाङ्कितमिदं काव्यम् मन्दाक्रन्तावृत्तम्। 'मन्दाक्रान्तांबुधिरसनगैः मोभनौ तौ गुरू द्वौ' इति तल्लक्षणात्॥ ५५॥

॥ इति श्रीसुमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां प्रथमः सर्गः ॥

द्वितीयः सर्गः

विज्ञानभानुमति कालबलेन लीने दुर्भाष्यसन्तमससन्ततितो जनेऽन्धे।
मार्गात् सतां स्खलति खिन्नहृदो मुकुन्दं देवाश्चतुर्मुखमुखाः शरणं प्रजग्मुः॥ १ ॥

पदार्थदीपिकोद्बोधिका – अस्मिन्काले सज्जनानुकम्पापरवशा ब्रह्मादिदेवाः तदुद्धारार्थं श्रीहरिं शरणं जग्मुरित्याह **विज्ञानेति**॥ भानवः किरणा अस्य सन्तीति भानुमान् सूर्यः। विज्ञानमेव विशिष्टज्ञानमेव भानुमान् तस्मिन्। 'भानू रश्मौ रवौ दिन' इति हेमचन्द्रः। कालस्य कलिकालस्य बलेन सामर्थ्येन लीने तिरोहिते सति। दुष्टानि च तानि भाष्याणि च संकरादिप्रणीतैकविंशतिभाष्याणि तान्येव सन्तमसानि अन्धकारास्तेषां सन्ततिः समूहस्तस्या इति ततः। अन्धे अज्ञे भगवत्स्वरूपादिकं अविदुषीत्यर्थः। जने तत्त्वज्ञानयोग्ये जने। सतां सज्जनानाम् मार्गादध्वनः। 'मार्गो मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि' इति हेमचन्द्रः। सद्भिराचरिताद्धर्ममार्गादित्यर्थः। स्खलति सति स्खलनं गच्छति सति सन्मार्गे सम्यगवर्तमाने सतीति भावः। खिन्नं खेदयुक्तं हृत् मनो येषां ते तथोक्ताः। चतुर्मुखो मुखं प्रधानं येषां ते देवाः। 'मणिर्मुखं प्रधानं चेत्युत्तमस्य वचो भवेत्' इति वचनात्। मुकुन्दं श्रीहरिं शरणं अरणं प्रजग्मुः। गम्लृ गतौ लिट्। अस्मिन् सर्गे प्रायः वसन्ततिलकावृत्तम्। 'उक्ता वसन्ततिलका तभजा जगौ गः' इत्युक्तेः। रूपकम्॥ १ ॥

मन्दोपकारिणी – विज्ञानेति ॥ विज्ञानभानुमति भानवः किरणाः अस्य सन्तीति भानुमान् सूर्यः। 'भानुः किरणसूर्ययोः' इति विश्वः। विज्ञानं तत्त्वज्ञानं भानुमानिव सूर्य इव विज्ञानभानुमान् तस्मिन्। कालबलेन कालस्य बलेन सामर्थ्येन। लीने सति अन्तर्हिते सति। दुर्भाष्यसन्तमससन्ततितः दुष्टानि दुर्वादिप्रणीतानि ब्रह्मसूत्रोपनिषदादिभाष्याणि सन्तमसानि गाढध्वान्तानीव तेषां सन्ततितः सन्ततेरिति सन्ततितः समूहात्। अन्धे, भगवत्स्वरूपादिकं अविदुषि जने तत्त्वज्ञानयोग्ये जने। मार्गात् संप्रदायरूपमार्गात् स्खलति भ्रंशिते सति सन्मार्गे सम्यगवर्तमाने सति इति भावः। यथा सूर्यास्तसमये सति गाढान्धकारे किमपि वस्तु अपश्यन् यथा कश्चित्पुरुषः गन्तव्यं मार्गं सम्यक् न पश्यति तद्वत् तत्त्वज्ञानयोग्यजने दुर्भाष्येण संशयादिकं प्राप्य वेदादिव्याख्यानादौ सत्संप्रदायं सम्यक् न

पश्यति इति भावः। खिन्नहृदः खिन्नं सत्सु अनुकम्पायुक्तं हृत् मनो येषां ते खिन्नहृदः। 'स्वान्तं हृन्मानसं मनः' इत्यमरः। चतुर्मुखमुखाः चत्वारि मुखानि आननानि यस्य चतुर्मुखः ब्रह्मा स एव मुखं प्रधानं येषां ते चतुर्मुखमुखाः 'मुखं प्रधाने प्रारम्भे' इति विश्वः। देवाः मुकुन्दं श्रीनारायणं, हे स्वामिन्, तत्वज्ञानयोग्यान् जनान् परिपालय इति शरणं प्रजग्मुः प्रापुः। 'गम्लृ गताविवत्यतो लिट् परस्मैपदं जगाम जग्मतुः जग्मुः'। अस्मिन् सर्गे प्रायः वसन्ततिलकावृत्तं ज्ञेयम्। वसन्ततिलकम्। 'तभजाजगौगः' इति तल्लक्षणात्॥ १॥

नाथः कलौ त्रियुगहूतिरनुद्बुभूषुर्ब्रह्माणमप्यनवतारमनादिदिक्षुः।
सर्वज्ञमन्यमनवेक्ष्य सकार्यवीर्यं स्मेराननो भुवनजीवनमाबभाषे॥ २॥

भावप्रकाशिका – कृतादीनि त्रीणि युगानि अवतर्तुमिष्टान्यस्येति त्रियुगः। 'युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यते' इति च॥ २॥

पदार्थदीपिकोद्बोधिका – ब्रह्मादिभिरवतारार्थमर्थितो भगवान् मुख्यप्राणमवतर्तुं सन्दिदेशेति निमित्तकथनपूर्वकमाह **नाथ इति॥** त्रीणि युगान्यवतारार्थत्वेन यस्य स त्रियुगः। 'युगं हस्तचतुष्के स्याद्रथाद्यङ्गे कृतादिक' इति हेमचन्द्रः। स इति हूतिर्नाम यस्य सः 'युगत्रयावतारत्वात्त्रियुगो विष्णुरुच्यते' इति वचनात्। हेतुगर्भं विशेषणमेतत् त्रियुगहूतित्वादिति। कलौ कलियुगे उद्भवितुं अवतर्तुं इच्छुः उद्बुभूषुः। स न भवतीति अनुद्बुभूषुः। 'सनाशंस भिक्ष उः' इत्युप्रत्ययः। अवतर्तुमनिच्छुरित्यर्थः। नाथः स्वामी भगवान्। न विद्यतेऽवतारो यस्य तं भूमौ कदाप्यवताररहितमित्यर्थः। ब्रह्माणं चतुर्मुखं आदेष्टुमाज्ञप्तुमिच्छुः स न भवतीत्यनादिदिक्षुः। भूम्यवतारार्थमादेष्टुमनिच्छन् सन्। कार्यस्य वीर्यं कार्यसाधनसामर्थ्यं तेन सहितं सकार्यवीर्यं सर्वज्ञम् अन्यं विष्णुचतुर्मुखव्यतिरिक्तं अनवेक्ष्यादृष्ट्वा। जीवयतीति जीवनः नन्द्यादित्वाल्युः। भुवनस्य जीवनस्तं मुख्यप्राणम्। स्मेरं मन्दहासशीलं आननं मुखं यस्य तथा सन्। 'स्मिङ् ईषद्धसन' इति धातोर्नमिकम्पि' इत्यादिना ताच्छील्ये रः। आबभाषे आज्ञाप्तवान्। भाष्लृ व्यक्तायां वाचि लिट्। ननु बुद्धावतारस्य कलियुगे जातत्वात्कथं त्रियुगहूतित्वमिति चेत्सत्यम् द्वापरकल्योः सन्धिकालेऽवतीर्णत्वात्तस्य। न चायमपि सन्धिकाल इत्यवतारोपपत्तिरिति वाच्यं, दैत्यविमोहकावतारस्य सन्धिकालेऽवतीर्णत्वेऽपि तत्त्वबोधकावताराभावाभिप्रायेण त्रियुगहूतित्वं भगवत इत्यभिप्रेतत्वेनानवतारे त्रियुगहूतित्वस्य हेतुत्वोपपत्तेरिति॥ २॥

मन्दोपकारिणी – नाथ इति ॥ त्रियुगहूतिः त्रीणि युगानि कृतत्रेताद्वापराख्यानि अवतारार्थं क्लृप्तानि यस्य स त्रियुगः। 'युगं युग्मे कृतादिषु' इत्यमरः। त्रियुग इति हूतिः आख्यानं यस्य स तथोक्तः। 'हूतिराकारणाह्वानं' इत्यमरः। त्रियुगनामेति भावः। युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यत इति वचनात् हेतुगर्भमिदं विशेषणं त्रियुगहूतिरिति हेतोः। कलौ कलियुगे स्वयं अनुद्बुभूषुः उद्भवितुं प्रादुर्भावं कर्तुं अनिच्छन् नाथः प्रभुः श्रीनारायणः। अनवतारं न विद्यते अवतारः भूमौ उत्पत्तिः यस्य स तथोक्तः तम्। ब्रह्माणं चतुर्मुखं अनादिदिक्षुः अवतारार्थं आदेष्टुं आज्ञापयितुं अनिच्छन् सन्। सकार्यवीर्यं कार्ये कार्यसाधनविषये वीर्यं बलं सामर्थ्यं इति यावत् कार्यवीर्यं, कार्यवीर्येण सहितः सकार्यवीर्यः कार्यसाधनसमर्थः तम्। 'वीर्यं बले प्रभावे च' इत्यमरः। सर्वज्ञं सर्वं जानातीति सर्वज्ञः तम्। अन्यं चतुर्मुखातिरिक्तं अनवेक्ष्य अदृष्ट्वा। भुवनजीवनं भुवनानां लोकानां जीवनं प्राणधारणं यस्मात् भवति स भुवनजीवनः मुख्यप्राण इत्यर्थः। 'जगत्प्राणः समीरण' इत्यमरः। तं प्रति आबभाषे अब्रवीत्। 'भाष व्यक्तायां वाचीत्यतो लिडात्मनेपदं आबभाषे आबभाषाते आबभाषिरे'। कथंभूतः स्मेराननः अनुग्रहविशेषात् स्मेरं मन्दहासयुक्तं आननं मुखं यस्य स तथोक्तः सन्॥ २॥

वेदान्तमार्गपरिमार्गणदीनदूना दैवीः प्रजा विशरणाः करुणापदं नः।
आनन्दयेः सुमुख भूषितभूमिभागो रूपान्तरेण मम सद्गुणनिर्णयेन॥३॥

पदार्थदीपिकोद्बोधिका – निरूपणप्रकारमेव दर्शयति **वेदान्तेति ॥** शोभनं मुखं यस्य तत्सम्बुद्धिः। हे सुमुख! वायो त्वं मम, सन्तो निर्दोषा ये गुणास्तेषां निर्णयो यस्मात्तेन। अन्यद्रूपं रूपान्तरं तेन मध्वनाम्ना, भूषितोऽलङ्कृतः भूमिभागो भूप्रदेशो येन सः। वेदान्तानां उपनिषदां मार्गः उपनिषदुपलक्षितसकलवेदार्थनिर्णयात्मकब्रह्मसूत्रादिरूपमार्ग इत्यर्थः। तस्य परिमार्गणं विचारस्तेन दीना रहिता 'दीङ् क्षय' इति धातोः तादृशाश्च ताः अत एव दूना दुःखिताश्च ताः 'धातूनामनेकार्थत्वात्'। दु गताविति्यस्माद्धातोः कर्मणि क्तप्रत्यये 'ल्वादिभ्य' इति निष्ठा तस्य नत्वे दीर्घः। वेदार्थनिर्णायकब्रह्मसूत्रेषु सत्स्वपि तद्व्याख्यान-रूपसद्धाष्याभावेन तैर्वेदार्थविचाराशक्त्या तत्त्वज्ञानाभावाद्दुःखयुक्ता इति भावः। विगतं शरणमस्मद्व्यतिरिक्ताश्रयः रक्षको वा यासां ता विशरणाः। 'शरणं रक्षणे गेहे

वधरक्षकयोरपि' इति हेमचन्द्रः। अत एव नोऽस्माकं करुणापदं कृपाया आस्पदम्। देवस्य क्रीडादिगुणविशिष्टस्य श्रीहरेः सम्बन्धिन्यो दैव्यस्ताः स्वरूपतो हरिभक्तत्वेन मोक्षयोग्या इत्यर्थः। प्रजाः आनन्दयेः सुखय। नदि हर्षे ण्यन्ताल्लिङ्। मध्वाख्यावतारस्य भगवद्गुण-निर्णायकत्वञ्च – 'तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः। निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसाक्रन्त सूरयः। यदीमनु प्रदिवो मध्व आधवे गुहासन्तं मातरिश्वा मथायति' इति श्रुतिसिद्धम्। तदर्थश्च 'योषणः योषित्। आदरात् बहुवचनम्। वृषभस्य समर्थस्यास्य वायोस्तृतीयं रूपमिति शेषः। दोहसे ज्ञानामृतदोहाय। जनयन्त अजनयत्। दशप्रमतिं यतित्वे पूर्णप्रज्ञनामकम्। ईशानासः समर्थाः सूरयो ज्ञानिनः देवमुनिपूर्वकाः बुध्नात् बुध्यतीति बुध्नो ज्ञानी तस्मात्। यदीं यस्मादेव महिषस्य महितषड्गुणस्य विष्णोः रमणीयत्वात् वर्पसः गुणान्। शवसा सुखेन। निः नितरां। आक्रन्त व्यज्ञासिषुः। 'क्रमु पादविक्षेप' इति धातुः। गत्यर्थकाश्च ज्ञानार्थकाः। यदीं य एव प्रदिवः प्रकृष्टक्रीडादिगुणः मध्वः मध्वनामा आनन्दतीर्थ इत्यर्थः। 'मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम्। मध्व आनन्दतीर्थः स्यात्तृतीया मारुती तनु'रिति वचनात्। एवञ्च मध्वनामा आनन्दतीर्थाख्यो मातरिश्वा वायुः गुहासन्तं मायिनां निर्गुणोक्तिभिर्गूहितं सन्तं आधवे आ समन्ताद्भवत्वेऽपि विष्णोर्निरुपचरितस्वामित्वे। निमित्ते चेयं सप्तमी। तत्सिद्ध्यर्थं मथायति मथ्नाति वेदादिकमालोडयति तत्त्वज्ञानामृतसिद्ध्यर्थमिति भावः॥ ३॥

मन्दोपकारिणी – वेदान्तेति॥ हे सुमुख ! शोभनं विकसितं मुखं यस्य स तथोक्तः तस्य सम्बुद्धिः हे सुमुख वायो, त्वं मम सद्गुणनिर्णयेन सन्तः निर्दुष्टाश्च ते गुणाश्च सद्गुणाः तेषां निर्णयो यस्मात् भवति तत् सद्गुणनिर्णयं तेन। रूपान्तरेण अन्यत् रूपं रूपान्तरं तेन मध्वाख्येन अन्येन रूपेण। भूषितभूमिभागः भूषितः अलङ्कृतः भूमेः भागः प्रदेशः भरतखण्डाख्यः येन स तथोक्तः सन् भूमौ अवतारं कृत्वा इति भावः। वेदान्तमार्गपरिमार्गणदीनदूनाः वेदानां अन्तः निर्णयो यस्मात् सः वेदान्तः 'अन्तस्यादन्तिके नाशे स्वरूपैकान्तनिर्णय' इति विश्वः। मार्गः मृग विचारण इति धातोः विचाररूपाः ब्रह्मसूत्रादिग्रन्थाः वेदान्तश्चासौ मार्गश्च वेदान्तनिर्णायकब्रह्ममीमांसाशास्त्रं इत्यर्थः। तस्य परिमार्गणेन विचारेण दीनाः रहिताः वेदान्तमार्गपरिमार्गणदीनाः वेदान्तविचारासमर्था

इत्यर्थः। ताश्च ताः दूनाः तप्ताश्च दुःखिता इति यावत् विचारासमर्थत्वेन तत्त्वज्ञानाभावात् इत्यर्थः 'सन्तापितसन्तप्तौ धूपितधूपायितौ च दूनश्च' इत्यमरः। दैवीः देवतासम्बन्धिनीः प्रजाः मोक्षयोग्यजीवान् आनन्दयेः सुखय। 'नदि समृद्धौ इत्यतो विधिलिङ् परस्मैपदम् आनन्दयेः आनन्दयेतं आनन्दयेत'। कथंभूताः प्रजाः, विशरणाः विगतं शरणं आश्रयः यासां ताः विशरणाः अत एव नः अस्माकं करुणापदं करुणायाः कृपायाः पदं आस्पदं यथा भवति तथेति यावत्॥ ३ ॥

आदेशमौलिमणिमुज्ज्वलवर्णमेनं बद्धाञ्जलिर्मरुदनर्घमधत्त मूर्ध्ना।
हारावलीमिव हृदा विबुधेन्द्रयाच्ञां बिभ्रन्निजाननुजिघृक्षुरवातितीर्षत्॥४॥

भावप्रकाशिका – वर्णोऽक्षरं गुणश्च॥ ४ ॥

पदार्थदीपिकोद्बोधिका – भगवदाज्ञां सबहुमानमङ्गीकृत्य सदनुजिघृक्षयावततर्तुमैच्छ-दित्याह – **आदेशेति॥** मरुत् मुख्यवायुः। उज्ज्वलाः शोभमाना वर्णा अक्षराणि यस्मिन् तम्। न विद्यतेऽर्घो मूल्यं यस्य तम्। अत्युत्तममित्यर्थः। 'मूल्ये पूजाविधावर्घ' इत्यमरः। एनं प्राक् प्रदर्शितरूपम्। आदेश एव भगवदाज्ञैव मौलिमणिः किरीटरत्नं तम्। चूडा किरीटं केशाश्च संहता मौलयस्त्रयः' इत्यमरः। आदेशाख्यकिरीटश्रेष्ठमित्यर्थः। 'मणिर्मुखं प्रधानञ्चे'त्यभिधानात्। बद्धोऽञ्जलिर्येन तथा सन् मूर्ध्ना अधत्त दधार। डु धाञ् धारणपोषणयोर्लङ्। शिरसि बद्धाञ्जलिर्भूत्वा भगवदाज्ञां सबहुमानं तथास्त्वित्यङ्गीचकारेति भावः। यथा कश्चित् स्वस्वामिना ध्रियमाणं रत्नखचितत्वेन शोभनवर्णं अनर्घ्यमुकुटश्रेष्ठं बद्धाञ्जलिः सन् गृह्णीयात्तद्वदिति श्लेषाभिप्रायः। हृदा मनसा विबुधेन्द्रयाच्ञां सुरेन्द्रप्रार्थनां भवता भुव्यवतीर्य सत्स्वनुग्रहः कार्य इत्यादिरूपां हारावलीमिव हाराणां पङ्क्तिमिव बिभ्रत् दधानः। 'नाभ्यस्ताच्छतु'रिति नुमभावः। निजान् स्वभक्तजनान्। 'निजमात्मीयनित्ययोः' इति वैजयन्ती। अनुग्रहीतुमिच्छुः अनुजिघृक्षुः। वायुः अवातितीर्षत् अवततर्तुमैच्छत्। 'तॄ प्लवनतरणयोः सन्नन्ताल्लङ्। उपमा॥ ४ ॥

मन्दोपकारिणी – **आदेशेति॥** मरुत् मुख्यवायुः। उज्ज्वलवर्णं उज्ज्वलानि शोभमानानि वर्णानि अक्षराणि यस्मिन् स तथोक्तः तम्। 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाऽक्षर' इत्यमरः। अनर्घ्यं मौल्यरहितं एनं आदेशमौलिमणिं आदेशो भगवदाज्ञा

स एव मौलिमणिः तं मुकुटश्रेष्ठम् । 'धम्मिल्ले मुकुटे मौलिः' इति भास्करः । बद्धाञ्जलिः बद्धः कृतः अञ्जलिः करसम्पुटं येन स तथोक्तः सन् । 'अञ्जलिस्तु पुमान् हस्तसम्पुटे कुटजेऽपि च' इति विश्वः । मूर्ध्ना शिरसा 'उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । अधत्त दधार । शिरसि हस्ताभ्यां अञ्जलिं बध्वा भगवदाज्ञां तथास्तु इति अङ्गीचकारेति भावः । यथा कश्चित् भृत्यः स्वस्वामिना दीयमानं उज्ज्वलवर्णं प्रकाशमानकान्तिं अनर्घ्यं मौल्यरहितं शिरोरत्नं किरीटं वा बद्धाञ्जलिः सन् स्वीकुर्यात् तद्वदिति श्लेषाभिप्रायः । हृदा मनसा हारावलीमिव हाराणां मुक्तामालानां आवलीमिव समूहमिव । 'हारो मुक्तावली' इत्यमरः । विबुधेन्द्रयाच्ञां विबुधेन्द्राणां देवताश्रेष्ठानां 'त्रिदशा विबुधाः सुराः' इत्यमरः याच्ञां प्रार्थनां भवता भुवि अवतीर्य सत्सु अनुग्रहः कार्य इत्यादिरूपां बिभ्रत् दधानः । निजान् आत्मीयान् । 'निजमात्मीयनित्ययोः' इति विश्वः । जनान् अनुजिघृक्षुः अनुगृहीतुं इच्छन् वायुः अवातितीर्षत् अवततुं ऐच्छत् । 'तॄ प्लवनतरणयोरिति धातोर्लङ् परस्मैपदम् अवातितीर्षत् अवातितीर्षतां अवातितीर्षन्' ॥ ४ ॥

कालः स एव समवर्तत नाम यावच्चिन्ताकुलं विविधसाधुकुलं बभूव ।
वेदान्तसन्ततकृतान्तरसं न विद्मः श्रेयो लभेमहि कथं नु वयं बतेति ॥५॥

पदार्थदीपिकोद्बोधिका – भगवदाज्ञां गृहीत्वावततुंमिच्छन् मुख्यप्राणो रजतपीठाधीश श्रीमदनन्तासनपरमभक्तस्य रजतपीठपुरे पुराणवक्तुः मध्यगेहाख्यस्य विप्रशिखामणेर्भार्यायामवतीर्ण इति वक्तुं तत्रत्यजनानां विशेषाकारेण तत्त्वज्ञानाभावनिमित्तकाकुलीभावमुपोद्घातसङ्गत्या दर्शयति **काल इति** ॥ यावदेव यदैव स सज्जनकृपालुभिर्ब्रह्मरुद्रादिभिः भगवत्प्रार्थनाकालः समवर्तत नाम प्रवृत्तः 'वृतु वर्तने' लङ् तदैव विविधा वर्णाश्रमभेदेन नानाविधा ये साधवः सज्जनास्तेषां कुलं समूहः । वेदानामन्तो निर्णयो यस्मात्तद्वेदान्तं ब्रह्मसूत्रसन्दर्भात्मकं ब्रह्ममीमांसाशास्त्रं तस्य । सम्यक् तनोति वर्तत इति संततः । 'तनु विस्तार' इत्यस्माद्धातोः कर्तरि क्तप्रत्यये 'अनुदात्तोपदेशवनतितनोत्यादिनां' इत्यादिनानुनासिकलोपः । अनादितः सत्सम्प्रदायप्राप्त इत्यर्थः । तादृशो यः कृतान्तरसः सिद्धान्तरहस्यमिति यावत् तम् । 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इत्यमरः । वयं न विद्मः न विजानीमः । 'विद ज्ञाने' लट् । श्रेयो मोक्षलक्षणं पुरुषार्थं कथं नु कथमेव

लभेमहि प्राप्स्यामः। 'डु लभष् प्राप्तौ' लिङ्। बत खेदे। इति चिन्ताकुलं चिन्ता-सम्भ्रान्तं बभूव ॥ ५ ॥

मन्दोपकारिणी – काल इति ॥ यावदेव यदैव स कालः हरिप्रार्थनाकालः समवर्तत प्रवृत्तोऽभूत् नाम प्रसिद्धं एतत्। 'वृतु वर्तन इत्यस्माल्लङात्मनेपदम् अवर्तत अवर्तेतां अवर्तन्त'। तदैव विविधसाधुकुलं विविधानां वर्णाश्रमभेदेन नानाविधानां साधूनां सज्जनानां कुलं समूहः इति। इत्थं चिन्ताकुलं आकुलं उद्वेगयुक्तं बभूव इति। कथं वयं वेदान्त-सन्ततकृतान्तरसं वेदान्तस्य निर्णायकशास्त्रस्य सन्ततं अनादिकालीनसत्संप्रदायप्राप्तं कृतान्तस्य सिद्धान्तस्य रसं सारम्। 'रसः सारो वरः श्रेष्ठ' इत्यभिधानम्। 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इत्यमरः। न विद्म न जानीमः। 'विद ज्ञाने इत्यतो लट् परस्मैपदं वेद्मि विद्वः विद्मः' इति। अतः श्रेयः मुक्तिः, 'मुक्तिः कैवल्यनिर्वाणश्रेयो निःश्रेयसामृतम्' इत्यमरः। कथं नु कथं वा। 'नु पृच्छायां विकल्पे च' इत्यमरः। लभेमहि प्राप्स्याम। बत कष्टम्। 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इत्यमरः। 'डु लभष् प्राप्तावित्यतो लिङात्मनेपदं लभेय लभेवहि लभेमहि' ॥ ५ ॥

तत्प्रीतये रजतपीठपुराधिवासी देवो विवेश पुरुषं शुभसूचनाय।
प्राप्ते महाय महिताय महाजनौघे कोलाहलेन सकुतूहलिनि प्रवृत्ते ॥६॥

भावप्रकाशिका – रजतपीठपुरस्य 'ओडिपु' इत्यपभ्रष्टभाषा। महाय अयनसङ्क्रमणोत्सवाय ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – तदानीं च तच्चिन्तापनोदेन तत्प्रीत्यर्थं तद्ग्रामीणजनानां कुलदेवः श्रीमदनन्तासनो विष्णुरस्मिन् क्षेत्रे सन्मतं प्रवर्तयितुं भाविनं मुख्यप्राणावतारं सूचयितुं कञ्चित् पुरुषमाविष्टवानित्याह **तदिति ॥** रजतस्य पीठं तच्च तत्पुरञ्च रजतपीठाख्यपुरमित्यर्थः। तस्मिन्नधिवासः निवासोऽस्यास्तीति तादृशो देवः अनन्तासनः तेषां चिन्ताकुलजनानां प्रीतिस्तस्यै। तादर्थ्ये चतुर्थी। शुभस्य मुख्यप्राणावतारात्मकस्य सूचनं तस्मै। पुरुषं कञ्चिदप्रौढम्। महिताय सर्वैः पूजिताय बहुमानितायेत्यर्थः। महाय उत्सवाय। 'मह उद्धव उत्सवः' इत्यमरः। कोलाहलेन संभ्रमेण प्राप्ते समागते महति जनौघे

जनसमूहे कुतूहलमस्यास्तीति कुतूहली तेन सहितं सकुतूहलि तस्मिन् रजतपीठपुरे प्रवृत्ते सति वर्तमाने सति। विवेश 'विश प्रवेशने' लिट्। सुकुतूहलिनीति पाठे शोभनकुतूहलवति महाजनौघे इत्यस्य विशेषणम्॥ ६॥

मन्दोपकारिणी – तत्प्रीतय इति॥ रजतपीठपुराधिवासी रजतपीठपुरे तदाख्यग्रामे अधिवासी देवः अनन्तेश्वरः। तत्प्रीतये चिन्ताकुलसज्जनप्रीतये। शुभसूचनाय शुभस्य श्रीमुख्यप्राणावताराख्यशुभस्य सूचनाय ज्ञापनाय। पुरुषं कञ्चित् पुरुषं विवेश प्रविष्टवान्। 'विश प्रवेशने इत्यतो लिट् परस्मैपदम् विवेश विविशतुः विविशुः'। कस्मिन् सति महिताय सर्वपूजिताय महाय उत्सवाय उत्सवदर्शनार्थमित्यर्थः। 'मह उद्धव उत्सवः' इत्यमरः। सुकुतूहलिनि सु अत्यन्तं कुतूहलं कौतुकं अस्यास्तीति सुकुतूहली तस्मिन्। 'कुतुकं च कुतूहलम्' इत्यमरः'। प्राप्ते उत्सवदर्शनार्थं औत्सुक्येन समागते। महाजनौघे महान्तः बहवो जनाः महाजनाः तेषां ओघे समूहे। 'स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः' इत्यमरः। कोलाहलेन कलकलशब्देन। 'कोलाहलः कलकलः' इत्यमरः। प्रवृत्ते सति कोलाहलध्वनिं कुर्वति सतीत्यर्थः॥ ६॥

आविष्टवानकुशलं पुरुषं प्रकृत्या प्रत्याययन्निजजनान् नितरामनृत्यत्।
उत्तुङ्गकेतुशिखरे स कृताङ्गहारो रङ्गान्तरे नट इवाखिलविस्मयात्मा॥ ७॥

पदार्थदीपिकोद्बोधिका – पुरुषं प्रविश्य किं चकारेत्याह **आविष्टवानिति॥** प्रकृत्या स्वभावेन 'प्रकृत्यादिभ्य उपसंख्यानं' इति तृतीया। अकुशलमचतुरं पुरुषं आविष्टवान्। अखिलानां समस्तजनानां विस्मय आश्चर्यं येन तादृश आत्मा स्वरूपं यस्य स देवः। इह रजतपीठपुरे। निजान् स्वकीयान् जनान् स्वभक्तानित्यर्थः। प्रत्याययतीति प्रत्याययन्। स्वसामर्थ्यप्रकटनेन स्ववक्ष्यमाणवचसि विश्वासमुपजनयन् सन्, उत्तुङ्गस्योन्नतस्य केतोर्ध्वजस्य शिखरेऽग्रे नितरामत्यन्तं कृतोऽङ्गहारोऽवयवविक्षेपो येन तथा सन्। 'अङ्गहारोऽङ्गविक्षेप' इति हलः। रङ्गस्य नर्तनस्थानस्यान्तरे मध्ये नट इव नर्तक इव अनृत्यत् नर्तनं चकार। 'नृती गात्रविक्षेपे' लङ्। उपमा॥ ७॥

मन्दोपकारिणी – आविष्टवानिति॥ प्रकृत्या स्वभावेनैव। 'संसिद्धिप्रकृती त्विमे' 'स्वरूपं च स्वभावश्च' इत्यमरः। अकुशलं कुशलः चतुरः न भवतीति अकुशलः तं पुरुषं

आविष्टवान्। सः देवः निजजनान् इह रजतपीठपुरे उत्सवदर्शनार्थं मिलितान् स्वकीयजनान् प्रत्याययन् विश्वासं प्रापयन्। 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः। उत्तुङ्गकेतु-शिखरे उत्तुङ्गस्य उन्नतस्य केतोः ध्वजस्य शिखरे शिरसि ध्वजस्तम्भोपरि। नितरां अत्यन्तं कृताङ्गहारः कृतः अङ्गहारः अङ्गविक्षेपः हस्तपादावयवमिति यावत् येन सः तथोक्तः। 'अङ्गहारोऽङ्गविक्षेप' इत्यमरः। अनृत्यत् ननर्त 'नृती गात्रविक्षेप इत्यतो लङ् परस्मैपदं अनृत्यत् अनृत्यतां अनृत्यन्'। क इव। रङ्गान्तरे रङ्गस्य नर्तनमण्टपस्य अन्तरे मध्ये। 'अन्तरे तु पराधीने भेदे रन्ध्रावकाशयोः' इति विश्वः। नट इव नर्तक इव। अत एव अखिलविस्मयात्मा अखिलानां जनानां विस्मयः आश्चर्यकरः आत्मा स्वभावो यस्य सः तथोक्तः। 'विस्मयोऽद्भुतमाश्चर्यम्' इत्यमरः। 'आत्मा यत्ने धृतौ जीवे स्वभावे परमात्मनि' इति भास्करः॥ ७॥

आभाष्य सोऽत्र जनतां शपथानुविद्धमुच्चैरिदं वचनमुद्धृतदोर्बभाषे।
उत्पत्स्यते जगति विश्वजनीनवृत्तिर्विश्वज्ञ एव भगवानचिरादिहेति॥ ८॥

भावप्रकाशिका – विश्वजनीनम् विश्वजनहितम्। 'आत्मन् विश्वजनभोगोत्तरपदात् ख' इति॥ ८॥

पदार्थदीपिकोद्बोधिका – नर्तनं कुर्वन् किमवददित्यत आह **आभाष्येति**॥ सः पुरुषे आविष्टवान् देवः। अत्र रूप्यपीठपुरे। जनानां समूहो जनता ताम्। 'ग्रामजनबन्धु' इत्यादिना समूहार्थे तल्। आभाष्य श्रूयतामिति सम्बोध्य। उद्धृतौ दोषौ हस्तौ येन स उद्धृतदोः सन्। शपथेन त्रिवारं कथनादिरूपशपथेन अनुविद्धं युक्तं यथा भवति तथा। उच्चैः इह जगति विश्वजनीनवृत्तिः 'तस्मै हित'मित्यनुवर्तमाने 'आत्मन्विश्वजने'त्यादिना तस्मै हितमित्यर्थे खप्रत्यये खस्येनादेशे 'यस्येति चे'त्यकारलोपः। एवं च विश्वः समस्तश्चासौ जनश्च विश्वजनः। तस्मै हिता विश्वजनीना वृत्तिर्वर्तनं यस्य सः। सर्वलोकोपकारकवृत्तिरिति भावः। विश्वज्ञः सर्वज्ञः। भगोऽस्यास्तीति भगवान् षड्गुणैश्वर्यसम्पन्नः एवंभूतः कश्चन अचिरादेवोत्पत्स्यते जनिष्यते। पद निष्पत्तौ लृट्। इतीदं वचनं आबभाषे। भाष्लृ व्यक्तायां वाचि लिट्। अत्र विश्वजनीनवृत्तिरित्यादिविशेषणत्रयेण मुख्यप्राण इति सूच्यते॥ ८॥

मन्दोपकारिणी – आभाष्येति॥ सः पुरुषाविष्टो देवः। अत्र रजतपीठपुरे। मिलितां जनतां जनानां समूहो जनता ताम्। आभाष्य हे जनाः मद्वचनं श्रुणुत इति सम्बोध्य। उद्धृतदोः उद्धृतौ ऊर्ध्वं धृतौ दोषौ भुजौ येन स तथोक्तः सन्। 'भुजबाहू प्रवेष्टोदोः' इत्यमरः। शपथानुविद्धं शपथो नाम मदुक्तस्य अन्यथात्वे अहं हरिगुर्वादिद्रोही स्यां इत्येवं वचनविषयज्ञापनं शपथ इति यावत्। 'शपनं शपथः पुमान्' इत्यमरः। तादृशेन शपथेन सत्यं सत्यं सत्यं इति त्रिवारोक्तिरूपशपथेन अनुविद्धं युक्तं यथा भवति तथा। उच्चैरिदं वक्ष्यमाणं वचनं बभाषे उवाच। 'भाष्लृ व्यक्तायां वाचीत्यतो लिडात्मनेपदम् बभाषे बभाषाते बभाषिरे'। किमिति, इह जगति विश्वजनीनवृत्तिः विश्वजनस्य सर्वजनस्य हिता वृत्तिः प्रवृत्तिः यस्य स विश्वजनीनवृत्तिः सर्वलोकोपकारभूतप्रवृत्तिरिति भावः। विश्वज्ञः सर्वज्ञः। भगवान् षड्गुणैश्वर्यसम्पन्नः कश्चित् अचिरात् एव अविलम्बेनैव उत्पत्स्यते जनिष्यतीति। 'उत्पूर्वक पदगतौ इत्यतो लृडत्मनेपदम् उत्पत्स्यते उत्पत्स्येते उत्पत्स्यन्ते'। अत्र विश्वजनीनवृत्तिः इत्यादिविशेषेणत्रयेण वायुरिति सूच्यते॥ ८॥

सद्द्वीपवारिनिधिसप्तकभूतधात्र्या मध्येऽपि कर्मभुवि भारतनामखण्डे।
काले कलौ सुविमलान्वयलब्धजन्मा सन्मध्यगेहकुलमौलिमणिर्द्विजोऽभूत्॥९॥

पदार्थदीपिकोद्बोधिका – अथेदानीं वायोरवतारादिकं वक्तुं तत्पित्रादिस्वरूपमाह **सद्द्वीपेत्यादिना॥** कलौ कलियुगे काले। वारीणि निधीयन्ते एष्विति वारिनिधयः समुद्राः। द्वीपाश्च ते च, तेषां सप्तकं तेन सहिता या भूतधात्री भूमिस्तस्याः। द्वन्द्वान्ते श्रूयमाणस्य सप्तकपदस्य प्रत्येकं सम्बन्धः। द्वीपसप्तकेन वारिनिधिसप्तकेन च सहितभूमेरित्यर्थः। मध्ये मध्यप्रदेशे जम्बुद्वीप इति यावत्। अपि तत्रापि। कर्मणः भूस्तस्याम्। यत्र कृतानि शुभाशुभकर्माणि स्वर्गादिसाधनानि भवन्ति सा कर्मभूमिरित्युच्यते। भारतमिति नाम यस्य स चासौ खण्डः भुव एकदेशस्तस्मिन्। सुष्ठु विमलः सुविमलः। स चासावन्वयो वंशस्तस्मिन्। लब्धं जन्म उत्पत्तिर्यस्य तादृशः। सत् विहिताचरणेन समीचीनं यन्मध्यगेहाख्यं कुलं तस्मिन्। मौलिमणिरिव शिरोरत्नमिव मध्यगेहाख्यकुलवत्सु द्विजेषु श्रेष्ठ इत्यर्थः। कश्चिद्द्विजोऽभूत्। उपमा॥ ९॥

मन्दोपकारिणी – अथेदानीं मध्वावताराय तत्पित्रादिकमाह॥ **सद्द्वीपेति॥** कलौ काले कलियुगकाले। सद्द्वीपवारिनिधिसप्तकभूतधात्र्याः द्वीपाश्च वारिनिधयः समुद्राश्च

द्वीपवारिनिधयः तेषां सप्तकं तेन सहिता सद्वीपवारिनिधिसप्तका सा च सा भूतधात्री भूमिश्च सद्वीपवारिनिधिसप्तकभूतधात्री तस्याः मध्ये जम्बूद्वीप इति यावत्। 'भूतधात्री रत्नगर्भा' इत्यमरः। अपि तत्रापि जम्बूद्वीपेऽपि कर्मभुवि कर्मभूमौ। यत्र कृतानि शुभाशुभकर्माणि स्वर्गनरकसाधनानि भवन्ति सा कर्मभूमिः इत्युच्यते। तादृशे भारतनामखण्डे भारतेति नाम आख्या यस्य सः भारतनामा स चासौ खण्डश्च भूप्रदेशविशेषश्च भारतनामखण्डः तस्मिन्। सुविमलान्वयलब्धजन्मा सुष्ठु विमलः सुविमलः निर्दुष्टश्चासौ अन्वयः कुलं च। 'कुलान्यभिजनान्वयौ' इत्यमरः। तस्मिन् लब्धं प्राप्तं जन्म जननं येन स तथोक्तः। सन्मध्यगेहकुलमौलिमणिः मध्यगेहाख्यं च तत् कुलं च मध्यगेहकुलं सत् प्रशस्तं च तत् मध्यगेहकुलं च सन्मध्यगेहकुलम्। 'सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः। सन्मध्यगेहकुलस्य मौलिमणिः शिरोरत्नभूतः अत एव मध्यगेह इति प्रसिद्धः कश्चित् द्विजः ब्राह्मणः अभूत्॥ ९॥

वेदाद्रिसद्रजतपीठपुरेश्वराभ्यां ग्रामो विभूषिततरः शिवरूप्यनामा।
हेमाद्रिराजविभुराजदिलावृताभस्तस्याभवद्गुरुगुणः खलु मूलभूमिः॥१०॥

भावप्रकाशिका – शिवरूप्यनामा शिवळ्ळीत्यपभ्रष्टभाषायाम्॥ १०॥

पदार्थदीपिकोद्बोधिका – तस्य जन्मभूमिमाह **वेदेति**॥ वेदाख्योऽद्रिः वेदाद्रिः सन् यो रजतपीठपुरेश्वरः श्रीमदनन्तेश्वरः ताभ्यामतिशयेन विभूषितः अतिशयेनालङ्कृतः। गुरवो गुणा यस्य वेदशास्त्राभिज्ञसज्जनाधिष्ठितत्वादिमहागुणयुक्त इत्यर्थः। 'गुरुर्महत्याङ्गिरस' इति हेमचन्द्रः। शिवरूप्यमिति नाम यस्य शिवबेळ्ळीत्यपभ्रष्टनामेत्यर्थः। अद्रीणां राजा अद्रिराजः हेम्नो हिरण्यस्याद्रिराजः सुवर्णात्मकमेरुपर्वतः। विभुः शिवस्ताभ्यां राजन् शोभमानो य इलावृतः तन्नामकखण्डस्तद्वदाभा कान्तिर्यस्य सः। 'विभुः प्रभौ व्यापके शङ्करे नित्य' इति हेमचन्द्रः। इलावृतखण्डस्य मेरुं परितः स्थितत्वात् शिवस्य च तत्खण्डस्थत्वात्ताभ्यामिलावृतखण्डो यथा शोभते तद्वद्वेदाद्रिरजतपीठपुरेश्वराभ्यां शोभमान इत्यर्थः। तस्य पूर्वोक्तद्विजस्य मूलभूता भूमिर्मूलभूमिर्जन्मभूमिरित्यर्थः। अभूत्। खलु प्रसिद्धौ। उपमा॥ १०॥

मन्दोपकारिणी – वेदेति॥ वेदाद्रिसद्रजतपीठपुरेश्वराभ्यां रजतपीठं च तत् पुरं च रजतपीठपुरं रजतपीठपुरस्य ईश्वरः स्वामी रजतपीठपुरेश्वरः सन् समीचीनश्चासौ

रजतपीठपुरेश्वरश्च सद्रजतपीठपुरेश्वरः। वेदनामकश्चासौ अद्रिः पर्वतश्च वेदाद्रिः। वेदाद्रिश्च सद्रजतपीठपुरेश्वरश्च वेदाद्रिसद्रजतपीठपुरेश्वरौ ताभ्यां विभूषिततरः अत्यन्तं विभूषितः अलंकृतः विभूषिततरः। गुरुगुणः गुरवो बहवः श्रेष्ठाः गुणाः सत्सङ्गत्यादिवासयोग्यधर्माः यस्य सः तथोक्तः। शिवरूप्यनामा शिवरूप्य इति नाम यस्य सः शिवरूप्यनामा ग्रामः संवसथः 'समौ संवसथ ग्राम' इत्यमरः तस्य पूर्वोक्तब्राह्मणस्य मूलभूमिः जन्मभूमिः अभवत्। खलुशब्दः प्रसिद्धवाचकः। कीदृशो ग्रामः, हेमाद्रिराजविभुराजदिलावृताभः हेम सुवर्णरूपश्चासौ अद्रिराजः पर्वतश्रेष्ठश्च हेमाद्रिराजः मेरुपर्वतः। विभुः इलावृतखण्डवासी रुद्रः। हेमाद्रिराजश्च विभुश्च हेमाद्रिराजविभू। ताभ्यां राजतः शोभमानस्य इलावृतखण्डस्य आभेव आभा यस्य सः तथोक्तः। इलावृतो नाम मेर्वधिष्ठितभूविशेषः॥ १०॥

रामाधिवेशितहरिस्वसृमौलिमालाराजद्विमानगिरिशोभितमध्युवास।
क्षेत्रं स पाजकपदं त्रिकुलैककेतुः कं यद्दधाति सततं खलु विश्वपाजात्॥११॥

भावप्रकाशिका – विश्वपाजात् – विश्वपालकादजात् रामान्निमित्तात्। स तत्र परश्वादिना तीर्थं चकारेति॥ ११॥

पदार्थदीपिकोद्बोधिका – एवं तस्य जन्मभूमिमुक्त्वाऽथनिवासस्थानमाह **रामेति**॥ त्रीणि च तानि कुलानि च 'वडिप्पे, पार्पदाने, कबेकोडे' इत्यपभ्रष्टनामानि त्रिकुलानि तेषामेककेतुरिव मुख्यध्वज इव अतिश्रेष्ठ इत्यर्थः। स द्विजः, रामेण श्रीपरशुरामेण अधिवेशिता प्रतिष्ठापिता या हरिस्वसा कृष्णभगिनी दुर्गा सैव मौलिमाला शिरोमाला तया राजन् शोभमानो यो विमानगिरिः विमानाकारो गिरिस्तेन, शोभितं यत् क्षेत्रम्। विश्वं पातीति विश्वपाः स चासावजश्च उत्पत्तिरहितो हरिः तस्मात् सर्वजगद्रक्षकपरशुरामादि-त्यर्थः। कं उदकं सततं सदा दधाति धृ धारणे लट्। पाजकमिति पदं नाम यस्य तत्क्षेत्रमध्युवास वस निवासे लिट्। 'अधिशीङ्स्थासामि'ति कर्मसंज्ञा। परशुरामेण विमानगिरिं परितश्चतुर्दिक्षु परश्वधधनुर्बाणगदाभिः शिलाभुवं विदार्य निर्मिततीर्थवत्त्वात् पाजकाख्यं क्षेत्रं अध्युवासेति भावः॥ ११॥

मन्दोपकारिणी – रामेति॥ त्रिकुलैककेतुः त्रीणि च तानि कुलानि च त्रिकुलानि त्रिकुलानां एकः मुख्यः केतुः ध्वजभूतः स द्विजः। रामाधिवेशितहरिस्वसृमौलिमाला-

राजद्विमानगिरिशोभितं रामः परशुरामः। 'रामः परशुविशेषे स्याज्जामदग्न्ये हलायुधे। राघवे चासितश्वेतमनोज्ञेषु तु वाच्यवत्' इति विश्वः। रामेण अधिवेशिता प्रतिष्ठिता रामाधिवेशिता हरेः श्रीकृष्णस्य स्वसा भगिनी दुर्गादेवी। रामाधिवेशिता च सा हरिस्वसा च रामाधिवेशितहरिस्वसा सैव मौलिमाला शिरोग्रगतमाला तया राजन् शोभमानः राजंश्चासौ विमानगिरिः विमानाख्यपर्वतः तेन शोभितं भूषितम्। पाजकपदं पाजकमिति पदं शब्दः नामेति यावत् यस्य तत्तथोक्तम्। 'पदं शब्दे च वाच्ये च' इति विश्वः। यस्मिन् क्षेत्रे विमानगिरिः शिरस्थानीयपर्वतः तस्मिन् विमानपर्वते परशुरामेण दुर्गाशिरःस्थितपुष्पमालाभूता प्रतिष्ठितास्ति तादृशपाजकनामेत्यर्थः। क्षेत्रं पुण्यस्थानं अध्युवास स्थितवान्। अधिशीङ्स्थासां कर्मेति सूत्रात् सप्तम्यर्थे द्वितीया क्षेत्र इत्यर्थः। 'वस निवासे इत्यतो लिट् परस्मैपदं उवास ऊषतुः ऊषुः'। यत्क्षेत्रं विश्वपाजात् विश्वं समस्तं पातीति विश्वपाः अजः विष्णुः। 'अजा विष्णुहरच्छागा' इत्यमरः। विश्वपाश्चासौ अजश्च विश्वपाजः तस्मात्। सततं सदा कं जलं दधाति खलु धरति खलु। 'डु धाञ् धारणपोषणयोरिति धातोः लट् उभयपदं दधाति धत्तः दधति'। 'सुखशीर्षजलेषु कम्' इति विश्वः। अनेन पाजकमित्यत्र पातीति पः पश्चासौ अजश्च पाजः। पाजात् कं जलं यस्मिन् तत्पाजकम् इति विग्रहः सूचितो भवति। तत्र स्थले भार्गवरामः परशुना भुवं भित्वा तीर्थानि चकार हि। अतः पाजकम् इति सार्थकं नाम॥ ११॥

अर्थं कमप्यनवमं पुरुषार्थहेतुं पुंसां प्रदातुमुचितामुचितस्वरूपाम्।
कन्यां सुवर्णलसितामिव वेदविद्यां जग्राह विप्रवृषभप्रतिपादितां सः॥१२॥

पदार्थदीपिकोद्बोधिका – अर्थमिति॥ सः द्विजः पुरुषार्थानां ज्ञानैश्वर्यादिपुरुषार्थानां हेतुः निमित्तम्। अवमो नीचो न भवतीत्यनवमस्तम् उत्तममिति यावत्। कमप्यर्थं मध्वाख्यं वस्त्वित्यर्थः। सतां सत्पुरुषाणां प्रदातुं प्रसवेन दातुं, उचितां योग्याम्। उचितं स्वरूपं यस्यास्तां कुलवयोरूपशीलैः आत्मन उद्बोढुं उचितामित्यर्थः। सुवर्णेन हेम्ना तन्मयाभरणेनेति यावत्। लसितां शोभिताम्। विप्रेषु वृषभः श्रेष्ठस्तेन 'वृषभः स्यादादिजिने वृषपुङ्गवयोरपि' इत्यभिधानात्। ऋषभ इति पाठे 'ऋत्यक' इति प्रकृतिभावः। प्रतिपादितां दत्तां कन्यां वेदात्मिका विद्या तामिव जग्राह उपयेमे। ग्रह उपादाने लिट्। वेदविद्याऽपि

पुंसां पुरुषार्थहेतुं अनवमं कमप्यर्थं परब्रह्माख्यं वस्तु प्रदातुं प्रतिपाद्य दातुं उचिता, ब्राह्मणेनाध्येतुमुचितस्वरूपा च शोभमानाक्षरलसिता च, विप्रर्षभेण उपाध्यायेन दत्ता च। वेदविद्यामध्यगीष्टानन्तरम् उपयेमे चेति भावः। उपमा ॥ १२ ॥

मन्दोपकारिणी – अर्थमिति ॥ सः द्विजः पुंसां पुरुषाणां पुरुषार्थहेतुं पुरुषैः अर्थ्यः अपेक्षणीयः पुरुषार्थः पुरुषार्थस्य सकलाभीष्टस्य मोक्षादिचतुर्विधपुरुषार्थस्य हेतुं निमित्तम्। अनवमं न अवमः अधमः अनवमः तं उत्तममिति यावत्। कमप्यर्थं मध्वाख्यं वस्तु प्रदातुं प्रसवेन दातुम्। उचितां योग्याम्। उचितस्वरूपां कुलवयोरूपैः आत्मनः उद्वोढुं उचितरूपां सुवर्णलसितां सुवर्णेन हेम्ना तन्मयाभरणेन इति यावत्। लसितां शोभिताम्। विप्रवृषभ-प्रतिपादितां विप्रेषु ब्राह्मणेषु वृषभेण ऋषभेण श्रेष्ठेन इत्यर्थः। 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूल नागाद्याः पुंसि श्रेष्ठार्थगोचराः' इत्यमरः। ब्राह्मणोत्तमेन प्रतिपादितां दत्तां कन्यां कुमारीं जग्राह उपयेमे। 'ग्रह उपादान इत्यतो लिट् परस्मैपदं जग्राह जगृहतुः जगृहुः'। कामिव वेदविद्यामिव। अनवमं सर्वोत्तमं कमप्यर्थं परब्रह्माख्यं वस्तु प्रदातुं प्रतिपादितुं उचितां उचितस्वरूपां ब्राह्मणेन अध्येतुं उचितरूपां सुवर्णलसितां सुवर्णैः शोभमानाक्षरैः लसितां शोभमानां विप्रवृषभप्रतिपादितां विप्रवृषभेण ब्राह्मणोत्तमेन उपाध्यायेन प्रतिपादितां उपदिष्टां वेदविद्यां ब्राह्मणः यथा जग्राह अध्यगीष्ट तथा इति भावः। 'इव यद्वा यथा शब्दाः उपमानार्थवाचकाः' इति विश्वः। वेदाध्ययनानन्तरं उपयेमे इति भावः ॥ १२ ॥

रेमेऽच्छयोपनिषदेव महाविवेको भक्त्येव शुद्धकरणः परमश्रिताऽलम्।
मिथ्याभिमानरहितः परयेव मुक्त्या स्वानन्दसन्ततिकृता स तया द्विजेन्द्रः ॥१३॥

भावप्रकाशिका – अच्छत्वादीनि महाविवेकादीनि विशेषणानि दम्पत्योर्द्रष्टव्यानि। स्वानन्द एव सन्ततिर्मध्वः। 'हनुमान् भीम आनन्दः' इति तद्रूपाणि ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – रेम इति ॥ स द्विजेन्द्रः। तया भार्यया। महान् विवेकः मोक्षादिः नित्यः, स्वर्गादिरनित्य इत्यादिरूपो यस्य तादृशः, कश्चित् अच्छया अपौरुषेयत्वादप्रामाण्यकारणदोषरहितया उपनिषदेव। अयं द्विजश्च महाविवेकः। भार्यापि

रूपचरित्रैरच्छा। शुद्धं करणमन्तःकरणं यस्य तादृशः कश्चित्, परममुत्तमं हरिं विषयतया श्रयत इति परमश्रित् तया भक्त्येव, अयं द्विजः शुद्धान्तःकरणः सा च श्रीहरिमाश्रिता। मिथ्याभूतोऽभिमानोऽस्वकीये क्षेत्रापत्यकलत्रादौ स्वकीयत्वादिरूपः तेन रहितः तत्त्वज्ञानीति यावत् मुक्त इति वा। स्वरूपभूत आनन्दः स्वानन्दः निर्दुःखपरमानन्द इत्यर्थः। तस्य सन्ततिं परम्परां करोतीति तया 'सन्ततिस्तु तनये दुहितर्यपि। परम्पराभवे पङ्क्तौ गोत्रविस्तारयोरपि' इति हेमचन्द्रः। मुक्त्येव। अयं द्विजः मिथ्याभिमानरहितः स्वानन्द-सन्ततिकृत् शोभनानन्दाख्यसन्ततिकृत्। शोभनानन्दाख्या सन्ततिरपत्यं मध्वः तां करोतीति तथोक्ता। मध्वाख्यसन्ततिकृदित्यर्थः। रेमे रमु क्रीडायां लिट्। मालोपमा ॥ १३ ॥

मन्दोपकारिणी – रेम इति ॥ सः द्विजेन्द्रः तया स्वभार्यया रेमे चिक्रीडे। 'रमु क्रीडायामित्यतो लिडात्मनेपदं रेमे रेमाते रेमिरे'। कः महाविवेकः महान् विवेकः सारासारज्ञानं यस्य स तथोक्तः कश्चित् पुरुषः। अच्छया अपौरुषेयत्वेन अप्रामाण्य-कारणदोषशून्यया उपनिषदेव वेदान्तविद्ययेव। अयं द्विजोऽपि महाविवेकः सापि रूपचारित्रैः अच्छा प्रशस्ता। पुनः कः कयेव। शुद्धकरणः शुद्धं रागादिदोषरहितं करणं यस्य स तथोक्तः। पुमान् अलम् अत्यन्तं परमश्रिता परमं सर्वोत्तमं हरिं श्रयतीति परमश्रित् तया परमात्मविषयिण्येत्यर्थः। भक्त्येव। अयं द्विजोऽपि विशुद्धकरणः सापि परमश्रित्। पुनः कयेव। मिथ्याभिमानरहितः मिथ्याभूतः अभिमानः हर्यधीनक्षेत्रकलत्रपुत्रादौ स्वकीयत्वमतिः मिथ्याभिमानः तेन रहितः तत्वज्ञानीति यावत्। स्वानन्दसन्ततिकृता स्वानन्दः स्वरूपभूतनिर्दुःखपरमानन्दः तस्य सन्ततिः विच्छेदाभावः तां करोतीति स्वानन्दसन्ततिकृत् तया। अत एव परया उत्तमया। 'परः स्यादुत्तमाऽनात्मा' इति विश्वः। मुक्त्येव मोक्षेणेव। अयं द्विजेन्द्रोऽपि मिथ्याभिमानरहितः सा च स्वानन्दसन्ततिकृत् सु शोभमानः आनन्दः आनन्दतीर्थाख्या च सा सन्ततिः अपत्यं च स्वानन्दसन्ततिः तां करोतीति स्वानन्दसन्ततिकृत् तया ॥ १३ ॥

तस्य प्रभोश्चरणयोः कुलदेवताया भक्तिं बबन्ध निजधर्मरतः स धीरः।
विज्ञातभारतपुराणमहारहस्यं यं भट्ट इत्यभिवदन्ति जना विनीतम्॥१४॥

पदार्थदीपिकोद्बोधिका – तस्येति ॥ जना महाजनाः। भारतञ्च पुराणानि च तेषां महारहस्यमतिगूढार्थं विज्ञातं सम्यज्ज्ञातं येन तम्। अत एव विनीतं निर्जितेन्द्रियम्। 'विनीतस्तु निवृत्ते निर्जितेन्द्रिय' इति हेमचन्द्रः। यं भट्ट इति अभिवदन्ति व्यवहरन्ति। वद व्यक्तायां वाचि लट्। निजे स्ववर्णाश्रमसंबन्धिनि धर्मे रतः आसक्तः। धीरः स्थिरबुद्धिः स द्विजः कुलदेवतायास्तस्य प्रभोः रजतपीठपुराधिवासिनो भगवतोऽनन्तासनस्य चरणयोः पादयोर्भक्तिं बबन्ध चकार। बधिर् बन्धने लिट्॥ १४ ॥

मन्दोपकारिणी – तस्येति ॥ निजधर्मरतः निजः वर्णाश्रमविहितश्चासौ धर्मः सत्कर्म च निजधर्मः तस्मिन् निरतः आसक्तः। धीरः प्राज्ञः। 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः' इत्यमरः। स्थिरबुद्धिर्वा। सः द्विजः कुलदेवतायाः कुलस्य वंशस्य देवतायाः स्वामिनः प्रभोः परमसमर्थस्य तस्य रजतपीठपुरवासिनः अनन्तेश्वरस्य चरणयोः पादयोः भक्तिं बबन्ध चकार। 'बधिर् बन्धन इत्यतो लिट् परस्मैपदं बबन्ध बबन्धतुः बबन्धुः'। जनाः महाजनाः। विज्ञातभारतपुराणमहारहस्यं भारतं च पुराणानि च भारतपुराणानि। महच्च तत् रहस्यं च महारहस्यम्। भारतपुराणानां महारहस्यम्। विज्ञातं भारतपुराणमहारहस्यं अतिगूढार्थो येन स तथोक्तः तम्। अत एव विनीतं विनयोपेतम्। यं द्विजं भट्ट इति अभिवदन्ति व्यवहरन्ति सः भक्तिं बबन्ध इति अन्वयः। 'वद व्यक्तायां वाचीत्यतो लट् परस्मैपदं वदति वदतः वदन्ति' इति रूपम्॥ १४ ॥

गोविन्दसुन्दरकथासुधया स नॄणामानन्दयन्न किल केवलमिन्द्रियाणि।
किन्तु प्रभो रजतपीठपुरे पदाब्जं श्रीवल्लभस्य भजतामपि दैवतानाम् ॥१५॥

भावप्रकाशिका – रजतपीठपुरस्थस्य नारायणत्वं निश्चीयते। स्वदर्शनोरुव्रतिने निशीथे प्राप्ताय भोगीन्द्रगतो हरिः प्रभुः। स्वं दर्शयित्वा खलु कुञ्जमाधवद्विजाय तद्वत्प्रतिमां व्यधापयत्॥ १५ ॥

पदार्थदीपिकोद्बोधिका – गोविन्देति ॥ स भट्टः गोविन्दस्य श्रीहरेः सुन्दरकथैव सुधा अमृतं तया। केवलं नॄणां मनुष्याणां इन्द्रियाणि श्रोत्रादीनि नानन्दयत् नातोषयत् 'नदि हर्षे' लङ् किन्तु रजतपीठपुरे श्रीमदनन्तासनं परितः क्रोशमानेन रजतात्मकं पीठं

भूम्यन्तर्गतमस्तीति पुराणप्रसिद्धेस्तत्पीठोपरिस्थग्रामो रजतपीठपुरमित्युच्यते। प्रभोः श्रीवल्लभस्य श्रीपतेः पदाब्जं भजतां दैवतानां देवानां 'वृन्दारका दैवतानि' इत्यमरः। इन्द्रियाण्यप्यानन्दयत् किल। लिङ्गाकारस्यापि तस्य श्रीहरित्वन्तु 'स्वदर्शनोरुव्रतिने निशीथे प्राप्ताय भोगीन्द्रगतं हरिः प्रभुः। स्वं दर्शयित्वा खलु कुञ्जमाधवद्विजाय तद्वत्प्रतिमां व्यधापयत्' इति श्लोकसिद्धम्। उपमा॥ १५॥

मन्दोपकारिणी – गोविन्देति॥ सः द्विजः गोविन्दसुन्दरकथासुधया गोविन्दस्य श्रीहरेः सुन्दरकथा श्राव्यकथा गोविन्दसुन्दरकथैव सुधा अमृतं तया गोविन्दसुन्दरकथासुधया। केवलं नृणां मनुष्याणामेव इन्द्रियाणि श्रोत्रादीनि नानन्दयत् नासुखयत् किन्तु रजतपीठपुरे प्रभोः श्रीवल्लभस्य लक्ष्मीपतेः पदाब्जं पादकमलं भजतां सेवमानानां दैवतानाम्। वृन्दारका दैवतानीत्यमरोक्तेः दैवतपदं नपुंसकम्। इन्द्रियाणि आनन्दयत्। 'टु नदि समृद्धौ इत्यतो लङ् परस्मैपदं आनन्दयत् आनन्दयताम् आनन्दयन्' ॥ १५॥

इत्थं हरेर्गुणकथासुधया सुतृप्तो नैर्गुण्यवादिषु जनेष्वपि साग्रहेषु।
तत्त्वे स कालचलधीरतिसंशयालुर्धीमान् धिया श्रवणशोधितया प्रदध्यौ॥१६॥

पदार्थदीपिकोद्बोधिका – इत्थमिति॥ स भट्टः इत्थं हरेर्गुणानां या कथा सैव सुधा तया सुतृप्तः अन्यत्र अलं बुद्धिमान् सन्। निर्गता गुणा यस्मात्तस्य भावो नैर्गुण्यं तद्वक्तुं शीलमेषामस्तीति तेषु जनेषु मायिजनेष्वपि। आग्रहेणाभियोगेन सहिताः साग्रहास्तेषु सत्सु। सगुणत्वप्रमाणान्यनादृत्य निर्गुण एव हरिरित्याग्रहयुक्तेषु सत्स्वित्यर्थः। तत्त्वे परापरतत्त्वविषये। कालात् कालबलात् चला चञ्चला धीर्बुद्धिर्यस्य तादृशः सन् न स्वत इति भावः। तस्मादतिसंशयालुः अत्यन्तसंशयशीलः। माय्युक्तप्रकारेण हरिर्निर्गुणो वा 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इत्यादिप्रमाणानुसारेण सगुणो वेति संशयशीलः सन्नित्यर्थः। धीमान् विवेकी स्वयमेव श्रवणेन भारतादिसच्छास्त्रश्रवणेन शोधितया निर्मलीकृतया धिया बुद्ध्या प्रदध्यौ। किमत्र मयानुष्ठेयमिति चिन्तितवान्। ध्यै चिन्तायां लिट्॥ १६॥

मन्दोपकारिणी – इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण। हरेः श्रीनारायणस्य। गुणकथासुधया गुणानां सर्वोत्तमत्वादिगुणानां कथा कथनमेव सुधा तया सुतृप्तः अन्यत्र अलंबुद्धिं प्राप्तः सन्, नैर्गुण्यवादिषु निर्गुणानां भावः नैर्गुण्यं तत् वदन्तीति नैर्गुण्यवादिनः हरेः निर्गुणत्वभाषणशीला इत्यर्थः। तेषु जनेषु अपि मायिजनेष्वपि। साग्रहेषु सगुणत्वप्रमाणान्यनादृत्य हरिः निर्गुण एव इति आग्रहसहितेषु सत्सु। तत्त्वे परब्रह्म-स्वरूपतत्त्वविषये। कालचलधीः कालेन कालसामर्थ्येनैव न स्वतः चला चञ्चला धीः बुद्धिः अन्तःकरणं यस्य स तथोक्तः। तस्मादेव अतिसंशयालुः हरिरुक्तप्रकारेण निर्गुणः, 'मय्यनन्तगुणऽनन्त' इत्यादिप्रमाणानुसारेण सगुणो वा इति संशयालुः संशयशीलस्सन्। धीमान् विद्वान्। 'धीमान्सुरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः। स्वयं श्रवणशोधितया निर्मलया निशितयेति यावत् धिया अन्तःकरणेन प्रदध्यौ किमत्र मया अनुष्ठेयं इति चिन्तितवान्। 'ध्यै चिन्तायामिति धातोर्लिट् परस्मैपदं दध्यौ दध्यतुः दध्युः' इति ॥ १६ ॥

त्राता य एव नरकात् स हि पुत्रनामा मुख्यावनं न सुलभं पुरुषादपूर्णात्।
तस्मात्समस्तविदपत्यमवद्यहीनं विद्याकराकृति लभेमहि कैरुपायैः ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – त्रातेति ॥ य एव नरकादुर्गतेस्त्राता रक्षकः स हि स एव पुन्नाम्नो नरकात्त्रायत इति पुत्रः। पुत्र इति नाम यस्य सः। 'पुन्नाम्नो नरकात्त्राता पुत्र इत्यभिधीयत' इति वचनात्। अपूर्णात् सार्वज्ञादिगुणैरपूर्णात् पुरुषान्मुख्यावनं सम्यग्रक्षणं सुष्ठु लभ्यत इति सुलभं न भवति। अत्रावनं नाम मोक्षसाधनसम्यज्ज्ञानदानमेव। तच्च अल्पपुरुषान्न सुलभमिति भावः। तस्मादल्पपुरुषान्मुख्यावनस्यासुलभत्वात्। समस्तं वेत्तीति समस्तवित्। अवद्येन अज्ञानविप्रलम्भादिदोषेण रहितमनवद्यं। विद्यानामाकरः समूहः तादृशी आकृतिः स्वरूपं यस्य तादृशम्। 'आकरो निकरे खना'विति वैजयन्ती। विद्यानां आकरभूता उत्पत्तिस्थानभूता आकृतिः स्वरूपं यस्य तदिति वा। अपत्यं पुत्रं 'तनयश्च नन्दन इति प्राज्ञैरपत्यं स्मृतं' इति हलः। कैरुपायैः साधनैः लभेमहि। डु लभष् प्राप्तौ लिङ् ॥ १७ ॥

मन्दोपकारिणी – त्रातेति ॥ य एव अनवक्लृप्तौ एव शब्दः। य एव यः कोऽपि पुरुषः नरकात् दुर्गतेः त्राता रक्षिता सः पुत्रनामा पुत्र इति नाम सञ्ज्ञा यस्य सः पुत्रनामा

हि प्रसिद्धम्। 'पुत् तन्नामकं नरकं तस्मात् पुतः त्रायत इति व्युत्पत्तेः' 'पुन्नाम्नो नरकात्त्राता पुत्र इत्यभिधीयत' इति वचनाच्चेति भावः। मुख्यावनं मुख्यं सम्यक् अवनं ज्ञानदानेन नरकात् रक्षणम्। अपूर्णात् ज्ञानादिगुणैः अपूर्णात् अल्पज्ञानादिमतः पुरुषात्। सुलभं साध्यं न यस्मात् तस्मात् अल्पज्ञात् पुरुषात् मुख्यावनस्य असाध्यत्वात् समस्तवित् समस्तं वेत्तीति समस्तवित् सर्वज्ञम्। अवद्यहीनं अवद्यैः अज्ञानविप्रलम्भादिदोषैः हीनं रहितम्। विद्याकराकृति विद्यानां आकर उत्पत्तिस्थानम्। 'आकरो निवहोत्पत्तिस्थानं' इति विश्वः। विद्याकर आकृतिः स्वरूपं यस्य तत् तथोक्तम्। अपत्यं पुत्रं कैः कीदृशैः उपायैः साधनैः लभेमहि प्राप्नुवाम। 'डु लभष् प्राप्तावित्यतो लिङात्मनेपदं लभेय लभेवहि लभेमहि॥ १७॥

पूर्वेऽपि कर्दमपराशरपाण्डुमुख्या यत्सेवया गुणगणाढ्यमपत्यमापुः।
तं पूर्णसद्गुणतनुं करुणामृताब्धिं नारायणं कुलपतिं शरणं व्रजेम॥१८॥

पदार्थदीपिकोद्बोधिका – पूर्वेऽपीति॥ पूर्वे पुरातनाः कर्दमः कर्दमाख्यः प्रजापतिः, पराशरः पराशराख्यमुनिः, पाण्डुः पाण्डुभूपः, ते मुख्या येषां ते। यस्य श्रीहरेः सेवया परिचर्यया गुणानां गणैः समूहैराढ्यं सम्पन्नम् अपत्यं सुतं कपिलव्यासधर्मजभीमार्जुनादि-पुत्रानित्यर्थः आपुः प्रापुः। पूर्णाः प्रत्येकं परिपूर्णाः सन्तो निर्दोषा ये गुणा आनन्दादयस्त एव तनुः शरीरं यस्य तम्। करुणैव दयैवामृतं तेनाब्धिरिवाब्धिस्तं कुलपतिं अस्मत्कुल-स्वामिनं तं कर्दमादीनां अपत्यप्रदातारं नारायणं शरणं व्रजेम। व्रज गतौ लिङ्॥ उपमा॥ १८॥

मन्दोपकारिणी – पूर्व इति॥ कर्दमपराशरपाण्डुमुख्याः कर्दमः कर्दमनामा प्रजेश्वरः पराशरः तन्नामा मुनिः पाण्डुः पाण्डुचक्रवर्ती कर्दमश्च पराशरश्च पाण्डुश्च कर्दमपराशरपाण्डवः एते मुख्या आदयो येषां ते कर्दमपराशरपाण्डुमुख्याः पूर्वेऽपि पुरातना आर्या अपि यत्सेवया यस्य लक्ष्मीनारायणस्य सेवया शुश्रूषया गुणगणाढ्यं गुणानां ज्ञानानन्दादिगुणानां गणेन समूहेन आढ्यं सम्पन्नम् अपत्यं पुत्रं आपुः प्रापुः 'आप्लृ व्याप्तावित्यतो लिट् परस्मैपदं आप आपतुः आपुः' तं कर्दमादीनां अपत्यप्रदं पूर्णसद्गुणतनुं सन्तश्च ते गुणाश्च सद्गुणाः पूर्णाश्च ते सद्गुणाश्च त एव तनुः देहो यस्य सः तथोक्तः तम्।

'कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। करुणामृताब्धिं करुणैव कृपैव अमृतं सुधा तया अब्धिः समुद्रः तम्। कुलपतिं अस्माकं कुलस्य पतिं स्वामिनं नारायणं शरणं व्रजेम प्राप्नुयाम 'व्रज गताविंत्यतो लिङ् परस्मैपदं व्रजेयं व्रजेव व्रजेम' ॥ १८ ॥

इत्थं विचिन्त्य स विचिन्त्यमनन्यबन्धुः प्रेष्ठप्रदं रजतपीठपुराधिवासम्।
भक्त्या भवाब्धिभयभङ्गदया शुभात्मा भेजे भुजङ्गशयनं द्विषडब्दकालम् ॥१९॥

पदार्थदीपिकोद्बोधिका – इत्थमिति॥ अन्यश्चासौ बन्धुश्च न विद्यतेऽन्यबन्धुर्यस्य सः। शुभः निर्मलः आत्मा मनो यस्य स द्विजः। विचिन्त्य विचार्य। अतिशयेन प्रियं प्रेष्ठं तत् प्रददातीति तम्। यस्य यस्य यद्यत्प्रेष्ठं तस्मै तस्मै तत्तत्प्रदमित्यर्थः। रजतपीठ-पुरमधिवास आवासस्थानं यस्य तम्। भुजङ्गः शेषः शयनं शय्या यस्य तम्। 'पर्यङ्कः शयनं शय्या' इति हलः। भवः संसार एवाब्धिस्तस्माद्यद्भयं तस्य भङ्गो नाशस्तं ददातीति तया भक्त्या। द्वौ च तौ षट् च द्विषट् द्वादश इत्यर्थः। द्विषट् अब्दाः संवत्सरा यस्य स चासौ कालश्च तम्। निर्व्यवधानं द्वादशाब्दकालसमाप्तिपर्यन्तमित्यर्थः। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। भेजे सिषेवे। भज सेवायां लिट्॥ १९ ॥

मन्दोपकारिणी – इत्थमिति॥ अनन्यबन्धुः न विद्यते अन्यः भगवदतिरिक्तः बन्धुः सखा यस्य तथोक्तः। शुभात्मा शुभः निर्मलः आत्मा मनो यस्य स तथोक्तः। सः द्विजः विचिन्त्यं विचारणीयं प्रमेयम् इत्थं पूर्वोक्तप्रकारेण विचिन्त्य विचार्य। प्रेष्ठप्रदं अतिशयप्रियं ददातीति प्रेष्ठप्रदः तं सर्वेषामपि स्वाभीष्टप्रदमिति भावः। रजतपीठपुराधिवासं रजतपीठपुरे अधिवासो आवासो यस्य स तथोक्तः तम्। भुजङ्गशयनं भुजङ्गः शेषदेवः स एव शयनं मञ्चः यस्य स तथोक्तः तम्। 'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः। अनन्तेश्वरम्। भवाब्धिभयभङ्गदया भवः संसारः। 'भवः संसारसम्प्राप्तिश्रेयःसङ्करजन्मसु' इति विश्वः। स एव अब्धिः समुद्रः तस्मात् भयं भवाब्धिभयं तस्य भङ्गं नाशं ददातीति भवाब्धिभयभङ्गदा तया भक्त्या द्विषडब्दकालं द्वौ च ते षट् च द्विषट् ते च ते अब्दाश्च द्विषडब्दाः द्वादशवत्सराः तेषां कालः द्विषडब्दकालः तम्। 'कालाध्वनोरत्यन्तसंयोगे, द्वितीया द्वादशवर्षपर्यन्तमित्यर्थः। 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः' इत्यमरः। भेजे 'भज सेवायामित्यतो लिडात्मनेपदं भेजे भेजाते भेजिरे' ॥ १९ ॥

पत्न्या समं भगवतः स भजन् पदाब्जं भोगान् लघूनपि पुनर्लघयाञ्चकार।
दान्तं स्वयं च हृदयं दमयाञ्चकार स्वच्छं च देहमधिकं विमलीचकार ॥ २० ॥

पदार्थदीपिकोद्बोधिका – पत्न्येति ॥ पत्न्या भार्यया समं साकं भगवतः अनन्तासनस्य पदाब्जं भजन् सन् द्विजेन्द्रः लघून् स्वतोऽल्पानपि भोगान् स्रक्चन्दनादीन् पुनः भगवद्भजनोपक्रमानन्तरं लघयाञ्चकार लघूचकार। लघि भाषायां आमन्ताल्लिट्। स्वयञ्च स्वत एव अप्रयत्नेनेति भावः दान्तं निगृहीतेन्द्रियं वशीकृतचक्षुरादीन्द्रियकमित्यर्थः हृदयं मनः दमयाञ्चकार दान्तमकरोत्। स्वच्छं निर्मलञ्च शौचाचमनप्राणायामादिभिः बाह्याभ्यन्तरशुद्धियुक्तमित्यर्थः देहं अधिकं यथा भवति तथा विमलीचकार। पञ्चगव्यप्राशनादिना पुनर्निर्मलमकरोत् ॥ २० ॥

मन्दोपकारिणी – पत्न्येति ॥ पत्न्या स्वभार्यया समं साकम्। 'साकं सार्धं समं सह' इत्यमरः। भगवतः श्रीनारायणस्य पदाब्जं पदं पाद एव अब्जं कमलं तत् भजन् सेवमानः सः मध्यगेहः लघून् स्वतः अल्पानपि भोगान् आहारादिभोगान् पुनः भगवद्भजनानन्तरं लघयाञ्चकार पूर्वापेक्षया लघून् कृतवान्। स्वयं च स्वत एव अप्रयत्नेनेति भावः। दान्तं विषयेभ्यो निर्गत्य वर्तमानं हृदयं मनः दमयाञ्चकार पूर्वापेक्षया अधिकं विषयेभ्यो निवर्तितवान्। स्वच्छं शौचाचमनप्राणायामादिभिः बाह्यान्तरशुद्धियुक्तं देहं शरीरं अधिकं विमलीचकार पञ्चगव्यप्राशनादिभिः पुनः निर्मलं अकरोत्। लघयां दमयामित्येतत् द्वयं 'आम्' प्रत्ययान्तम्। विमलीत्येतत् 'क्विप्' प्रत्ययान्तम्। डुकृञ् करण इत्यतो लिट् परस्मैपदं चकार चक्रतुः चक्रुः' ॥ २० ॥

तीव्रैः पयोव्रतमुखैर्विविधैर्व्रताग्र्यैर्जायापती गुणगणार्णवपुत्रकामौ।
सम्पूर्णपूरुषमतोषयतां नितान्तं देवेरितावि व पुराऽदितिकश्यपौ तौ॥२१॥

पदार्थदीपिकोद्बोधिका – तीव्रैरिति ॥ गुणानां ज्ञानादिगुणानां गणास्तैरर्णव इवार्णवस्तादृशो यः पुत्रस्तस्मिन् काम इच्छा ययोस्तौ। देवेनान्तर्यामिणा हरिणा ईरितौ प्रेरितौ जायापती भार्याभर्तारौ तीव्रैः दुष्करैः पयोव्रतं मुखं मुख्यं येषां तैः। 'मुखं तु वदने मुख्य' इति वैजयन्ती। क्षीराहारमात्रपुरःसरैरित्यर्थः। विविधानि यानि व्रताग्र्याणि

व्रतश्रेष्ठानि तैः। सम्पूर्णः अनन्तगुणपूर्णो यः पुरुषः श्रीनारायणस्तं नितान्तं अत्यन्तं, पुरा देवेन चतुर्मुखेनेरितौ वामनावतारार्थं तपः कार्यमित्युक्तौ तावदितिकश्यपाविव अतोषयतां तुष तुष्टौ लङ्। 'फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः। अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः' इत्यादिभागवतोक्तप्रकारकपयोव्रतपूर्वकव्रतैरदितिकश्यपौ वामनप्रादुर्भावार्थं यथा श्रीहरिमतोषयतां तद्वच्छ्रीमन्मध्वावतारार्थमिमावपि दम्पती पयोव्रतपूर्वकव्रतैः श्रीमद-नन्तासनमतोषयतामिति भावः॥ २१॥

मन्दोपकारिणी – तीव्रैरिति॥ गुणगणार्णवपुत्रकामौ गुणानां तत्त्वज्ञानादिगुणानां गणेन समूहेन अर्णवः सागरः गुणगणार्णवः गुणगणार्णवश्चासौ पुत्रश्च गुणगणार्णवपुत्रः तं कामयत इच्छत इति गुणगणार्णवपुत्रकामौ। जायापती जाया भार्या च पतिर्भर्ता च जायापती। 'भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी' इत्यमरः। धवः प्रियः पतिर्भर्तेत्यमरः। तीव्रैः दुष्करैः पयोव्रतमुखैः पयसः क्षीरस्य व्रतं क्षीराहाररूपं इत्यर्थः। 'पयः पानीयदुग्धयोरिति विश्वः। पयोव्रतमेव मुखं येषां तानि पयोव्रतमुखानि तैः। विविधैः नानाप्रकारैः व्रताग्र्यैः व्रतश्रेष्ठैः। सम्पूर्णपूरुषं संम्पूर्णः अनन्तगुणपरिपूर्णश्चासौ पूरुषः श्रीमन्नारायणश्च सम्पूर्णपूरुषः `तम्। नितान्तं अतिशयेन अतोषयतां आनन्दयताम्। 'तुष तुष्टौ लङ् परस्मैपदं अतोषयत् अतोषयतां अतोषयन्'। काविव, पुरा पूर्वं वामनावतारकाले देवेरितौ देवेन चतुर्मुखेन ईरितौ तपः कार्यमित्युक्तौ तौ अदितिकश्यपौ इव अदितिः अदितिनाम्नी कश्यपभार्या कश्यपनामा मुनिश्च ताविव एतावपि दम्पती देवेरितौ देवेन अन्तर्यामिणा भगवता ईरितौ प्रेरितौ अतोषयताम्। ब्रह्मप्रेरितौ अदितिकश्यपौ वामनावतारार्थं तपश्चक्रतुः इत्येतत् हरिवंशे स्पष्टम्॥ २१॥

नाथस्य भूरिकरुणासुधयाऽभिषिक्तौ श्रीश्रीधरप्रततिसारशरीरयष्टी।
भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ तौ देहशुद्धिमतिमात्रमथालभेताम्॥२२॥

पदार्थदीपिकोद्बोधिका – नाथस्येति॥ नाथस्य स्वामिनः दम्पतिभ्यां समाराधितस्य हरेः भूरिर्बहुला या करुणा दया सैव सुधा तया अभिषिक्तौ अभिवृष्टौ अत्यन्तं दयाविषयाविति भावः। श्रीश्च श्रीधरश्च तयोः प्रततिर्व्याप्तिः विशेषसन्निधानमित्यर्थः। तया शारे मिश्रे शरीरे यष्टी इव शरीरयष्टी शरीरदण्डौ ययोस्तौ। यद्वा श्रीश्रीधरप्रतत्या शारे

शबले शरीरयष्टी ययोस्ताविति। 'शबले मारुते शार' इति वैजयन्ती। भूरि बहु यद्व्रतं तस्मात्प्रभव उत्पत्तिर्यस्याः सा च सा दिव्या देवतानुग्रहसम्बन्धिनी अलौकिकी वा या सुकान्तिः सा अनयोरस्तीति तादृशौ तौ जायापती, अथ अनन्तरं देहशुद्धिं, अतिमात्रमत्यन्तम् अलभेताम् प्राप्तौ ॥ २२ ॥

मन्दोपकारिणी – नाथस्येति ॥ नाथस्य स्वामिनः स्वसेवितहरेः भूरिकरुणासुधया भूरि बहुला च सा करुणा कृपा च सैव सुधा अमृतं तया अभिषिक्तौ श्रीपति-बहुकृपावर्षणार्द्रीकृतौ इति भावः। श्रीश्रीधरप्रततिसारशरीरयष्टी श्रीः लक्ष्मीः श्रीधरः नारायणश्च श्रीश्रीधरौ श्रीश्रीधरयोः प्रततिः प्रकृष्टव्याप्तिः विशेषसन्निधानमिति यावत् तया सारे श्रेष्ठे शरीरयष्टी शरीरमेव यष्टी दण्डौ ययोः तौ तथोक्तौ। तपः कुर्वतोः दम्पत्योः शरीरे तदा लक्ष्मीनारायणयोः सन्निधानं विशेषतोऽभूत् इति भावः। भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ भूरीणि बहूनि च तानि व्रतानि च भूरिव्रतानि तेभ्यः प्रभवा उत्पन्ना भूरिव्रतप्रभवा दिव्या देवतानुग्रहसम्बन्धिनी च अपूर्वेति यावत्। दिव्या च सा सुकान्तिश्च दिव्यसुकान्तिः भूरिव्रतप्रभवा दिव्यसुकान्तिः एतयोः अस्तीति तथोक्तौ तौ जायापती। अथ अनन्तरं देहशुद्धिं देहस्य शुद्धिं पावित्र्यं अतिमात्रं भृशम्। 'अतिवेलभृशात्यर्थाति-मात्रोद्गाढनिर्भरम्' इत्यमरः। अलभेतां प्राप्नुवन्तौ। 'डु लभष् प्राप्तावित्यतो लङात्मनेपदं अलभत अलभेतां अलभन्त' इति ॥ २२ ॥

कान्तादृतौ समुचितेऽथ बभार गर्भं सा भूसुरेन्द्रदुहिता जगतां सुखाय।
अच्छाम्बरेव रजनी परिपूरिताशा भाविन्यपास्ततमसं विधुमाद्यपक्षात् ॥२३॥

भावप्रकाशिका – 'समुचिते' इति ऋतू रजोदर्शनात् पञ्चमादिः शरदादिश्च। अम्बरं वसनं गगनं च। आद्यस्य विष्णोः पक्षपातात् पूर्वपक्षाच्च ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – कान्तादिति ॥ अथ भगवत्सेवया देहशुद्ध्यनन्तरम् अच्छं निर्मलमम्बरं वस्त्रं यस्याः सा। परिपूरिताः, सत्पुत्रो भविष्यतीति देवतासूचनादिना परिपूर्णा आशाः कामा यस्याः सा। भाविनी भवित्री भूसुरेन्द्रदुहिता द्विजेन्द्रसुता जगतां हिताय शुभाय आद्ये सर्वस्यादिभूते हरौ पक्षः पक्षपातो यस्य तस्मात् श्रीहरिभक्तादिति यावत्।

स्वकान्तात्स्वपतेः समुचिते गर्भाधानयोग्ये ऋतौ ऋतुदर्शनाङ्गस्नानानन्तरमिति भावः। अपास्तं निरस्तं तमोऽज्ञानं यस्य तं गर्भम्। अच्छाम्बरा निर्मलाकाशा परिपूरिताशा चन्द्रिकया सम्पूरितदिक् भाविनी क्रमेण भविष्यन्ती रजनी रात्रिः समुचिते चन्द्रविकासयोग्ये ऋतौ शरद्ऋतौ आद्यपक्षात् शुक्लपक्षात् अपास्ततमसं निरस्तान्धकारं विधुमिव चन्द्रमिव बभार। डुभृञ् भरणे लिट्॥ २३॥

मन्दोपकारिणी – कान्तादिति॥ अथ भगवत्सेवया देहशुद्ध्यनन्तरम्। अच्छाम्बरा अच्छं निर्मलं अम्बरं वस्त्रं यस्याः सा तथोक्ता सा भूसुरेन्द्रदुहिता भूसुरेन्द्रस्य ब्राह्मणश्रेष्ठस्य दुहिता पुत्री आद्यपक्षात् सर्वस्मात् आदिभूतो हरिः पक्षः सखा सहायो यस्य स तथोक्तः हरिभक्त इति यावत्। 'पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः। केशादेः परतो बन्धे बले सखिसहाययोः' इति विश्वः। तस्मात् कान्तात् पत्युः समुचिते गर्भाधानयोग्ये ऋतौ ऋतुकाले रजोदर्शनाङ्गस्नानानन्तरमिति भावः। 'ऋतु स्त्रीपुष्प-कालयोः' इति विश्वः। जगतां सज्जनानां सुखाय सुखप्राप्तये। अपास्ततमसं अपास्तं निरस्तं तमोऽज्ञानं यस्य सः अपास्ततमाः तं गर्भं बभार दधार। 'भृञ् भरणे इत्यस्माल्लिट् परस्मैपदं बभार बभ्रतुः बभ्रुः। कथंभूता परिपूरिताशा परिपूरिता परिपूर्णा आशा अभिलाषो यस्याः सा तथोक्ता। भाविनी क्रमेण भविष्यंती। अच्छाम्बरा अच्छं निर्मलं अम्बरं आकाशं यस्याः सा तथोक्ता। 'अम्बरं व्योम्नि वाससि' इत्यमरः। परिपूरिताशा चन्द्रिकया परिपूरिताः व्यापिताः आशाः दिशः यस्याः सा तथोक्ता। भाविनी क्रमेण भविष्यती। 'आशा दिगभिलाषयोः' इत्यमरः। रजनी रात्रिः। 'विभावरी तमस्विन्यौ रजनी यामिनी तमी' इत्यमरः। समुचिते चन्द्रविकासस्य योग्ये ऋतौ वसन्तादिऋतुकाले आद्यपक्षात् आद्यः मासस्य आदिभूतश्चासौ पक्षः मासार्धश्च आद्यपक्षः शुक्लपक्ष इति भावः। तस्मात् अपास्ततमसं अपास्तं तमः अन्धकारः यस्मात् स तथोक्तः तम्। 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः। विधुं चन्द्रमिव 'विधुर्विष्णौ चन्द्रमसि' इत्यमरः॥ २३॥

तं पूर्वपक्षसितबिम्बमिव प्रवृद्धं यावद्द्विजेन्द्रवनिता सुषुवेऽत्र तावत्।
अंशेन वायुरवतीर्य स रूप्यपीठे विष्णुं प्रणम्य भवनं प्रययौ तदीयम्॥२४॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ द्विजेन्द्रवनिता मध्यगेहभट्टस्य भार्या। पूर्वपक्षे शुक्लपक्षे सितं श्वेतं यद्बिम्बं मण्डलं चन्द्रमण्डलमित्यर्थः। तदिव प्रवृद्धं तं गर्भं यावत् यदा अत्र भूतले सुषुवे प्रसूतवती। षूङ् प्राणिप्रसवे लिट्। तावत्तदा सः भुव्यवताराय भगवदादिष्टो वायुः मुख्यप्राणः अंशेनैकदेशेन अवतीर्य भुवमागत्य रूप्यपीठे रजतपीठे वसन्तमिति शेषः विष्णुं प्रणम्य। तस्य सम्बन्धि तदीयं मध्यगेहभट्टसम्बन्धीत्यर्थः भवनं गृहं प्रययौ ॥ २४ ॥

मन्दोपकारिणी – तमिति ॥ द्विजेन्द्रवनिता द्विजेन्द्रस्य मध्यगेहभट्टस्य वनिता पत्नी। पूर्वपक्षसितबिम्बमिव पूर्वपक्षे शुक्लपक्षे सितः धवलः बिम्बः मण्डलः। 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः। तं चन्द्रमण्डलमिव प्रवृद्धं अभिवृद्धं तं गर्भं यावत् यदा अत्र भूमौ सुषुवे असूत। 'षूङ् प्राणिगर्भविमोचने इति धातोर्लिडात्मनेपदं सुषुवे सुषुवाते सुषुविरे'। तावत् तदा सः भुव्यवताराय भगवदादिष्टवायुः मुख्यप्राणः अंशेन अवतीर्य भूमिमागत्य रूप्यपीठे रजतपीठपुरे वसन्तमिति शेषः विष्णुं अनन्तेश्वरं प्रणम्य नमस्कृत्वा। तदीयं तस्य इदं तदीयं मध्यगेहभट्टसम्बन्धि भवनं गृहम्। 'भवनागारमन्दिरम्' इत्यमरः। प्रययौ जगाम। 'या प्रापणे इत्यस्माल्लिट् परस्मैपदं ययौ ययतुः ययुः' ॥ २४ ॥

सम्पूर्णलक्षणचणं नवराजमानद्वारान्तरं परमसुन्दरमन्दिरं तत्।
राजेव सत्पुरवरं भुवनाधिराजो निष्कासयन् परमसौ भगवान् विवेश ॥२५॥

भावप्रकाशिका – लक्षणचणं लक्षणैः प्रसिद्धम्। 'तेन वित्तश्चञ्चुप् चणपौ' इति। नवशब्द एकोनदशके भद्रे च। परमस्य सुन्दरमन्दिरं परमाणि सुन्दरमन्दिराणि नगरे। परं अन्यं शुत्रुं च ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – सम्पूर्णेति ॥ भुवनानां लोकानां, अधिकश्चासौ राजा चाधिराजोऽधिपतिः 'राजाहः सखिभ्यष्टच्' इति टच्। भुवनाधिराजो भगवान् षड्गुणसम्पन्नः असौ वायुः सम्पूर्णानि यानि लक्षणानि द्वात्रिंशदङ्गसम्पदस्तैः प्रसिद्धं सम्पूर्णलक्षणचणं 'तेन वित्तश्चुञ्चुप् चणपौ' इति सूत्रेण तेन प्रसिद्ध इत्यस्मिन्नर्थे चणप् प्रत्ययः। नव नवसङ्ख्याकानि राजमानानि शोभमानानि द्वारान्तराणि द्वारविशेषा यस्मिन्

तत्। 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि। मध्येऽवकाशतादर्थ्यविशेषविवरेष्वपि' इति वैजयन्ती। परमस्य सर्वोत्तमस्य श्रीहरेः परमं सुन्दरं यन्मन्दिरं तत् तदानीं विप्रपत्न्युदरसम्भूतं सत् निर्दुष्टं यत्पुरवरं शरीरश्रेष्ठम्। 'वर्ष्म पुरं च पिण्डं क्षेत्रं च गात्रं च' इति हलः। परं अन्यं प्रसूतिपर्यन्तं गर्भे स्थितं जीवमित्यर्थः। निष्कासयन् निर्यापयन् सन् परं शत्रुं विजित्य तं नगरान्निष्कासयन्, राजा सम्पूर्णलक्षणचणं सम्पूर्णनगरलक्षणप्रसिद्धं नवानि लेपनधवलीकरणादिना नूतनानि राजमानानि शोभमानानि द्वारान्तराणि द्वारविशेषा यस्मिन् तत्। परमसुन्दराणि अतिसुन्दराणि मन्दिराणि यस्मिन् तादृशं सत्पुरमिव निर्दुष्टनगरमिव विवेश। विश प्रवेशने लिट्। मुख्यवायुः गर्भवासरहितः सन् गर्भवासदुःखं जन्मदुःखञ्चानुभूय कर्मवशात्तावता चरितार्थं जीवं तस्मादेहान्निष्कास्य स्वसङ्कल्पादेव सम्पूर्णलक्षणचणं तं देहं सहसा परमानन्देन राजा नगरमिव विवेशेति भावः॥ २५॥

मन्दोपकारिणी – सम्पूर्णेति॥ भुवनाधिराजः भुवनानां जगतां अधिराजः स्वामी। भगवान् षड्गुणसम्पन्नः असौ वायुः सम्पूर्णलक्षणचणं सम्पूर्णैः द्वात्रिंशद्भिः लक्षणैः उत्तमपुरषलक्षणैः चणं प्रसिद्धं 'तेन वित्तश्चुञ्चुप् चणपौ' इति सूत्रेण तेन प्रसिद्धमित्यर्थे चणप् प्रत्ययः। नवराजमानद्वारान्तरं नवसङ्ख्याकानि राजमानानि शोभमानानि द्वारान्तराणि छिद्रविशेषाः यस्य तत्। परमसुन्दरमन्दिरं परमसुन्दरं अतिरमणीयं मन्दिरं गृहभूतं तत् विप्रपत्न्युदरसम्भूतम् सत् निर्दोषं पुरवरं शरीरश्रेष्ठं विवेश प्रविष्टवान्। 'विश प्रवेशने इति धातोः परस्मैपदं विवेश विविशतुः विविशुः'। पुरमेकादशद्वारमिति शरीरे प्रयोगात् पुरवरं इत्युक्तं तथा एकादशद्वारमिति द्वारशब्दस्य छिद्रे प्रयोगात् द्वारान्तरमित्युक्तम्। किं कुर्वन्, परं अन्यं प्रसूतिपर्यन्तं गर्भस्थितं जीवं निष्कासयन् देहान्निर्यापयन् स्वयं गर्भवासरहितः सन् गर्भवासदुःखं जन्मदुःखं च अनुभूय तावत्पर्यन्तस्थितं जीवं मातुरुदराद्बहिर्निर्गमनसमये तस्मादेहान्निष्कास्य तं देहं सहसा विवेश इति भावः। कमिव, परं शत्रुं 'परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले' इति मेदिनी। विजित्य नगरात् निष्कासयन्। राजा सम्पूर्णलक्षणचणं सम्पूर्णलक्षणैः सम्पूर्णपत्तनलक्षणैः चणं प्रसिद्धम्। नवराजमानद्वारान्तरं नवसंख्याकराजमानद्वारविशेषयुक्तम्। परमसुन्दर-मन्दिरं परमं अत्यन्तं सुन्दराणि मन्दिराणि यस्मिन् तत्तथोक्तम्। सत्पुरवरं इव सत् समीचीनं पुरवरं नगरं यथा प्रविशति तथेत्यर्थः। 'अगारे नगरे पुरम्' इत्यमरः॥ २५॥

सन्तुष्यतां सकलसन्निकरैरसद्भिः खिद्येत वायुरयमाविरभूत् पृथिव्याम् ।
आख्यन्निवीव सुरदुन्दुभिमन्द्रनादः प्राश्रावि कौतुकवशैरिह मानवैश्च ॥२६॥

पदार्थदीपिकोद्बोधिका – सन्तुष्यतामिति ॥ इह भुवि कौतुकवशैः सम्भ्रमपरवशैः मानुषैश्च मनुष्यैरपि सुरदुन्दुभिमन्द्रनादः सुरदुन्दुभीनां गम्भीरध्वनिः । 'मन्द्रो गम्भीर उच्यत' इत्यमरः । यस्मादयं वायुः पृथिव्यामाविरभूत्तस्मात्सकलाः समस्ता ये सन्निकराः सज्जनसमूहास्तैः सन्तुष्यतां सन्तोष्टव्यम् । तुष तुष्टौ कर्मणि लोट् । असद्भिर्दुर्जनैः खिद्येत खेदः प्राप्यताम् । खिद दैन्ये कर्मणि लिङ् इति आख्यन्निव वदन्निव । ख्या प्रकथन इति धातोः शतृ । प्राश्रावि विश्रुतः । श्रु श्रवणे कर्मणि लुङ् । तदवतारसमये समुद्भूतं सुरदुन्दुभिमन्द्रनादं श्रुत्वा सतां सन्तोषोऽभूत् । असतां मनसि खेदोऽभूदिति वस्तुगतिः । तत्र सद्भिः सन्तुष्यतां असद्भिः खिद्येतेत्याख्यातमित्युत्प्रेक्षते ॥ २६ ॥

मन्दोपकारिणी – सन्तुष्यतामिति ॥ इह भुवि मानवैः नरैः । 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः' इत्यमरः । सुरदुन्दुभिमन्द्रनादः सुराणां देवानां दुन्दुभयः भेर्यः । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः । मन्द्रः गम्भीरश्चासौ नादः ध्वनिश्च मन्द्रनादः । 'कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु' इत्यमरः । सुरदुन्दुभीनां मन्द्रनादः सुरदुन्दुभि-मन्द्रनादः । प्राश्रावि अश्रूयत 'श्रु श्रवणे इत्यतः कर्मणि लुङ् आश्रावि आश्राविषातां आश्राविषत' इति रूपम् । कथम्भूतैः मानवैः, कौतुकवशैः कौतुकस्य सन्तोषस्य वशैः अधीनैः । किं कुर्वन्निव आख्यन्निव कथयन्निव, कथं, सकलसन्निकरैः सकलाश्च ते सन्तश्च सकलसन्तस्तेषां निकरैः समूहैः सन्तुष्यतां सन्तोष्टव्यम् । 'तुष तुष्टाविित्यतो भावे लोट् परस्मैपदम्' । असद्भिर्दुर्जनैः खिद्येत खेदः प्राप्यताम् । 'खिद दैन्ये इत्यतो भावे लिङात्मनेपदम्' । सन्तुष्यतां खिद्येतेति प्रथमपुरुषैकवचनमेव न द्विवचनादिर्भावः । तस्यैक-त्वात् । कुतः सन्तोषादिः । यस्मादयं वायुः पृथिव्यां आविरभूत् उत्पन्नः । तस्मात् सन्त सुखिनः सन्तुः असन्तः खिन्नाः सन्तु इति सन्तोऽसन्तः प्रति शासतीवेति प्रतीयमान इति भावः ॥ २६ ॥

नाथं निषेव्य भवनानतिदूरमाप्तः प्राज्ञो महप्रकृतदुन्दभिनादपूर्वात् ।
पुत्रोद्भवश्रवणतो महदाप्य सौख्यं ज्ञानं परोक्षपदमप्यमतेष्टहेतुम् ॥ २७॥

भावप्रकाशिका – विवाहाय गच्छतां केषाञ्चिद् दुन्दुभिनादपूर्वात्। एवमपरश्च तदनन्तरमेव दुन्दुभिनादोऽश्रावीति भावः॥ २७॥

पदार्थदीपिकोद्बोधिका – **नाथमिति॥** नाथं स्वकुलस्वामिनं रजतीठपुराधिवासं श्रीहरिं निषेव्य सेवां कृत्वा। अत्यन्तं दूरमतिदूरं अतिदूरं न भवतीत्यनतिदूरं भवनात् स्वगृहादनतिदूरं समीपं आप्तः प्राप्तः। प्रकर्षेण जानातीति प्रज्ञः। प्रज्ञ एव प्राज्ञः। 'प्रज्ञादिभ्यश्चे'ति स्वार्थे अण्। स द्विजेन्द्रः। महाय उत्सवाय प्रकृत उपक्रान्तः यो दुन्दुभिनादः सः पूर्वो यस्य तस्मात् कैश्चन पुरुषैरुत्सवायोपक्रान्तदुन्दुभिनादश्रवण-पूर्वादित्यर्थः। पुत्रस्योद्भवस्य जन्मनः श्रवणात् महत् सुखमेव सौख्यं आप्य प्राप्य परोक्षः परोक्षार्थः पदं विषयो यस्य तत् ज्ञानं इष्टस्य सुखस्य हेतुं कारणं अमत ज्ञातवान्। मनु अवबोधने लुङ्। स्वेष्टपदार्थस्यापरोक्षज्ञानमेव सुखसाधनमित्ययं नियमो न किंतु तस्य परोक्षज्ञानमपि सुखसाधनं भवत्येव अनुभवसिद्धत्वादिति निश्चितवानिति भावः। तथा चोक्तं भगवत्पादैः 'अपरोक्षं परोक्षं वा ज्ञानमिष्टस्य साधनम्' इति॥ २७॥

मन्दोपकारिणी – **नाथमिति॥** नाथं स्वदैवतं रजतपीठपुराधिवासिनं श्रीहरिम् निषेव्य आराध्य। भवनानतिदूरं भवनस्य गृहस्य अनतिदूरं अतिदूरं न भवतीति अनतिदूरं किञ्चित् समीपं आप्तः गतः प्राज्ञः पण्डितः मध्यगेहः। महप्रकृतदुन्दुभिनादपूर्वात् महे पुत्रजन्मोत्सवसमये प्रकृतः उपक्रान्तः दुन्दुभिनादः दुन्दुभेः भेर्याः नादः ध्वनिरेव पूर्वः पूर्वभावी यस्मात् तत् महप्रकृतदुन्दुभिनादपूर्वं तस्मात्। 'मह उद्भव उत्सवः' इत्यमरः। पुत्रोद्भवश्रवणतः पुत्रस्य सुतस्य उद्भवः उत्पत्तिः तस्य श्रवणं तस्मादिति पुत्रोद्भवश्रवणतः। 'जनिरुत्पत्तिरुद्भवः' इत्यमरः। महत् बहुलं सौख्यं सुखं आप्य अवाप्य। परोक्षपदं परोक्षः अप्रत्यक्षार्थः पदं विषयः यस्य तत् परोक्षपदं तादृशमपि ज्ञानम्। इष्टहेतुं इष्टस्य सुखस्य हेतुं साधनं अमत व्यजानत्। 'मनु अवबोधने इत्यतो लुङात्मनेपदं अमत अमनिष्ट अमनिषतां अमनिषत'। मध्यगेहभट्टः रजतपीठपुरवासिनारायणसेवां कृत्वा आगमनसमये गृहप्राप्तेः पूर्वमेव पुत्रोत्पत्तिकृतभेरीध्वनिं श्रुत्वा पश्चात् स्वस्य पुत्र उत्पन्न इति वार्तां जनमुखात् श्रुत्वा बहुसुखं लब्ध्वा अपरोक्षज्ञानमेव सुखहेतुरिति न नियमः किन्तु परोक्षज्ञानमपि सुखसाधनं भवत्येव अनुभवसिद्धत्वात् इति निश्चितवान् इति भावः। तथोक्तं 'अपरोक्षं परोक्षं वा ज्ञानमिष्टस्य साधनम्' इति॥ २७॥

आविश्य वेश्म निजनन्दनमिन्दुवक्त्रं भूयोऽभिनन्द्य स मुकुन्ददयां प्रवन्द्य।
जातस्य तस्य गुणजातवहस्य जातकर्मादिकर्मनिवहं विदधे सुकर्मा ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – आविश्येति ॥ शोभनानि कर्माणि यस्य स सुकर्मा द्विजो वेश्म गृहं आविश्य। इन्दुवत् वक्त्रं यस्य तं सद्योजातमपीन्दुवदनं निजनन्दनमात्मपुत्रं भूयः अतितरां अभिनन्द्य। मुकुन्ददयां मुकुन्दकृपां प्रवन्द्य नमस्कृत्य स्तुत्वा वा। 'वदि अभिवादनस्तुत्योः'। जातस्योत्पन्नस्य। गुणानां जातस्य समूहस्य वहतीति वहस्तस्य। तस्य स्वनन्दनस्य। जातस्य कर्म जातकर्म तदादि येषां तानि च तानि कर्माणि च तेषां निवहं समूहम्। 'निकरनिकायनिवहविसरव्रजपुञ्जसमूहसञ्चया' इति हलः। विदधे चक्रे। डुधाञ् धारणपोषणयोः लिट्॥ २८ ॥

मन्दोपकारिणी – आविश्येति ॥ सुकर्मा शोभनकर्मा शोभनं कर्म अदृष्टं स्नानादिसत्कर्माणि वा यस्य सः सुकर्मा। सः द्विजः। वेश्म सद्म। 'वेश्म सद्म निकेतनम्' इत्यमरः। आविश्य प्रविश्य। इन्दुवक्त्रं इन्दुवत् चन्द्रवत् वक्त्रं वदनं यस्य सः तथोक्तः तम्। 'वक्त्रास्ये वदनं तुण्डमाननम्' इत्यमरः। निजनन्दनं निज अत्मीयश्चासौ नन्दनश्च निजनन्दनः तम्। 'निजमात्मीयनित्ययोः' इति विश्वः। भूयः भूरि अत्यन्तमिति यावत्। अभिनन्द्य अनुमोद्य। मुकुन्ददयां मुकुन्दस्य अनन्तेश्वरस्य दयां कृपां प्रवन्द्य नमस्कृत्वा स्तुत्वा वा। 'वदि अभिवादनस्तुत्योः' इति धातोः। जातस्य उत्पन्नस्य। गुणजातवहस्य गुणानां जातं ओघः तं वहति बिभर्तीति गुणजातवहः तस्य। 'जातं जात्योघजन्मसु' इति विश्वः। तस्य स्वसुतस्य जातकर्मादिकर्मनिवहं षोडशसंस्कारमध्ये उत्पन्नशिशोः आदौ क्रियमाणस्य संस्कारस्य जातकर्मेति नाम। जातकर्मैव आदिः यस्य सः जातकर्मादिः। कर्मणां निवहः समूहः कर्मनिवहः जातकर्मादिश्चासौ कर्मनिवहश्च जातकर्मादिकर्मनिवहः तम्। 'समूहो निवहव्यूहसन्दोहविसरव्रजा' इत्यमरः। विदधे चकार। डुधाञ् धारणपोषणयोरित्यतः लिडात्मनेपदं दधे दधाते दधिरे' ॥ २८ ॥

ज्ञानार्थमेव यदभूदसुदेव एष यद्वासुदेवपदभक्तिरतः सदाऽसौ।
तद्वासुदेवपदमन्ववदन् सुरेन्द्रास्तातेन यन्निगदितं सुतनामकर्त्रा॥२९॥

भावप्रकाशिका – वा ज्ञानम्। 'वा गतिगन्धनयोः'। 'आतो मनिन् क्वनिब्वनिपश्चे'ति न्यायात्तस्येदमित्यण्। वासुदेवभक्तोऽपि वासुदेवः। आत एव वृद्धित्वात्॥ २९॥

पदार्थदीपिकोद्बोधिका – ज्ञानार्थमिति॥ सुतनाम्नः कर्त्रा पुत्रनामकृतवतेत्यर्थः। तातेन पित्रा उक्तं यद्वासुदेव इति पदं नाम सुरेन्द्रा देवश्रेष्ठा, यत् यस्मात् एष असुदेवः प्राणदेवः श्रीमुख्यवायुः ज्ञानार्थमभूत् तस्मात् वासुदेव इति। अत्र वा इत्येतत्पदं भावे विच् प्रत्ययान्तं सत् ज्ञानवाचकम्। 'वा गतिगन्धनयो'रिति धातोः गत्यर्थकानां च ज्ञानार्थकत्वात्। एवं च वार्थं ज्ञानार्थं जातः असुदेव वासुदेव इति मध्यमपदलोपी समासः। यद्यस्मात् असौ मुख्यप्राणः सदा वासुदेवस्य श्रीकृष्णस्य ये पदे पादौ तयोर्या भक्तिस्तस्यां रत आसक्तस्तस्मात् वासुदेवः। अस्मिंश्च पक्षे वासुदेवशब्दात् 'तस्येद'मित्यर्थेऽण्प्रत्ययः। वासुदेवसम्बन्धित्वात् वासुदेव इत्यर्थः। वासुदेवसम्बन्धित्वं च तद्भक्तत्वमेव। एवमर्थद्वय-परतयान्वर्थकमस्य वासुदेवनामेति भावः। वासुदेवपदमन्ववदन् अस्य पुत्रस्य वासुदेवनाम उक्तरीत्यान्वर्थत्वात्साध्वित्यन्ववदन्निति भावः। तथा चैवमन्वयः यद्यस्मादेष असुदेवः ज्ञानार्थमेवाभूत् यद्यस्मादसौ वासुदेवपदभक्तिरतः तत्तस्मात्सुतनामकर्त्रा तातेन निगदितं यद्वासुदेवपदं तत्सुरेन्द्रा अन्ववदन्निति॥ २९॥

मन्दोपकारिणी – ज्ञानार्थमिति॥ सुतनामकर्त्रा सुतस्य नामकरणाख्यसंस्कारं कर्त्रा कुर्वता। तातेन पित्रा। 'तातस्तु जनकः पिता' इत्यमरः। सुतस्य यत् वासुदेवपदं वासुदेव इति पदं नाम निगदितं उक्तम् तत् वासुदेवपदं सुरेन्द्राः देवश्रेष्ठाः अन्ववदन् अस्य वासुदेव इति नाम सार्थकत्वात् योग्यं इति अङ्गीचक्रुः। सार्थकमेवाह ज्ञानार्थमित्यादि। एषः असुदेवः असूनां प्राणानां इन्द्रियाणां देवः स्तुत्यः। 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः। असुदेवः मुख्यप्राणः ज्ञानार्थमेव यत् यस्मात् कारणात् अभूत् उत्पन्नः तस्मात् अयं वासुदेवनामा। वासुदेव इत्यत्र वा इत्येतत्पदं विच् प्रत्ययान्तं ज्ञानवाचकं 'वा गतिगन्धनयोः इति धातोः वाशब्दस्य गतिवाचित्वात् गत्यर्थधातूनां ज्ञानार्थकत्वात् वार्थं ज्ञानार्थं जातः असुदेवः वासुदेव इति मध्यमपदलोपी समास इति भावः। यत् यस्माच्च असौ वायुः वासुदेवपदभक्तिरतः वासुदेवस्य हरेः पदयोः चरणयोः भक्तौ रतः आसक्तः तस्मादपि

वासुदेवः। अस्मिंस्तु पक्षे वासुदेवशब्दात् तस्येदमित्यस्मिन्नर्थे अण् प्रत्ययः वासुदेवस्य अयं वासुदेव इति व्युत्पत्तिः ज्ञेया। वासुदेवभक्तत्त्वं सम्बन्ध इति ज्ञेयम्॥ २९॥

पातुं पयांसि शिशवे किल गोप्रदोऽस्मै पूर्वालयः स्वसुतसूनुतया प्रजातः।
निर्वाणहेतुमलभिष्ट परात्मविद्यां दानं ध्रुवं फलति पात्रगुणानुकूल्यात्॥ ३०॥

भावप्रकाशिका – पूर्वालयस्य 'मूडिल्लाय' इत्यपभ्रष्टभाषा॥ ३०॥

पदार्थदीपिकोद्बोधिका – पातुमिति॥ पयांसि पातुं अस्मै शिशवे गां धेनुं प्रददातीति गोप्रदः। पूर्व आलयो यस्य सः 'मूडिल्लाय' इत्यपभ्रष्टसंज्ञा। स्वसुतसूनुतया जन्मान्तरे स्वपुत्रस्य सूनुत्वेन प्रजातः सन् श्रीमध्वाचार्यान्निर्वाणहेतुं मोक्षहेतुम्। 'हेतुर्ना करणं बीजं' इत्यमरः। परात्मनः परमात्मनो विद्यां ज्ञानं अलभिष्ट लेभे। एतदुपपन्नमित्याह दानमिति॥ दानं पात्रगुणानुकूल्यात् प्रतिग्रहीतृगुणानुसारात् फलति। फल निष्पत्तौ लट्। ध्रुवं निश्चितं प्रमाणसिद्धमित्यर्थः। गोप्रदानेऽस्य शिशोरुत्तम-पात्रत्वाद्गोप्रदः पूर्वालयः क्षिप्रं स्वसुतसूनुत्वेनेह प्रजातः श्रीमध्वशिष्यो भूत्वा परमात्मतत्वं ज्ञात्वा क्रमेण मुक्तोऽभूदिति भावः। अत्रार्थान्तरन्यासालङ्कारः॥ ३०॥

मन्दोपकारिणी – पातुमिति॥ शिशवे किल अर्भकाय अस्मै वासुदेवाय पयांसि दुग्धानि पातुं पानार्थं गोप्रदः गां धेनुं प्रददातीति गोप्रदः गोदाता। पूर्वालयः पूर्वालयनामकः कश्चन द्विजः। स्वसुतसूनुतया स्वस्य सुतः पुत्रः तस्य सूनुतया पुत्रत्वेन प्रजातः सन् उत्पन्नस्सन् श्रीमध्वाचार्यात् निर्वाणहेतुं निर्वाणस्य मुक्तेः हेतुं कारणम्। 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिश्रेयसामृतम्' इत्यमरः। परात्मविद्यां परात्मनः परमात्मनः विद्यां तत्त्वज्ञानं 'आत्मा यत्ने धृतिर्बुद्धिः स्वभावे परमात्मनि' इत्यमरः। परा उत्तमा मुक्तिसाधनसमर्थेत्यर्थः। परा च सा आत्मविद्या च परात्मविद्या तामिति वा। अलभिष्ट लब्धवान्। 'डु लभष् प्राप्तावित्यतो लुङ् आत्मनेपदं अलभिष्ट अलभिषातां अलभिषत'। अल्पदानेन बहुपुरुषार्थप्राप्तिफलं समर्थयते दानमिति। दानं यत्किञ्चित् वस्तुदानम्। पात्रगुणानुकूल्यात् प्रतिगृहीतुः गुणानुसारात् फलति फलजनकं भवति इत्येवं ध्रुवं निश्चितम्। 'फल निष्पत्तावित्यतो लट् परस्मैपदम्'। अत्र गोदाने शिशोः उत्तमपात्रत्वात्

गोप्रदः पूर्वालयः मृत्वा क्षिप्रं स्वपुत्रपुत्रत्वेन जातस्सन् श्रीमध्वशिष्यो भूत्वा परमात्मतत्त्वं ज्ञात्वा क्रमेण मुक्तोऽभूत् इति भावः ॥ ३० ॥

अत्रस्तमेव सततं परिफुल्लचक्षुः कान्त्या विडम्बितनवेन्दु जगत्यनर्घ्यम् ।
तत्पुत्ररत्नमुपगृह्य कदाचिदाप्तः स्वस्वामिने बुध उपायनमार्पयत्सः ॥ ३१ ॥

भावप्रकाशिका – अत्रस्तम् अभयम् अदुष्टम्। 'मणिदोषस्त्रास' इति च ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – अत्रस्तमिति ॥ बुधो ज्ञानी स द्विजेन्द्रः सततं त्रस्तो न भवतीत्यत्रस्तस्तम् । परिफुल्ले विकसिते चक्षुषी यस्य तत्। कान्त्या प्रतिदिनं वर्धमानया स्वरूपकान्त्या विडम्बितोऽनुकृतः नवेन्दुः शुक्लपक्षोदितचन्द्रो येन तत्। जगति न विद्यते अर्घो मूल्यं यस्य तत् असदृशमिति भावः। एवंभूतं पुत्ररत्नं उपगृह्य आदाय कदाचित् आप्तः रजतपीठवासं स्वनाथं प्राप्तः तस्मै स्वस्वामिने तत् पुत्ररत्नं उपायनं आर्पयत् समर्पयामास। ऋ गतौ लङ्। 'अर्तिह्री' इत्यादिना णिजन्तात् पुगागमः। यथा कश्चित् अत्रस्तं त्रासाख्यमणिदोषरहितं 'मणिदोषे भये त्रास' इति वैजयन्ती। परिफुल्लचक्षुः मलापनयनादिना संस्कारेण परिफुल्लछिद्रं जगति मूल्यरहितं कान्त्या विडम्बितचन्द्रं रत्नं स्वस्वामिने समर्पयेत् तद्वदिति श्लेषाभिप्रायः ॥ ३१ ॥

मन्दोपकारिणी – अत्रस्तमिति ॥ बुधः ज्ञानी सः द्विजः सततं अनारतं अत्रस्तमेव त्रासः भयं 'दरत्रासो भीतिर्भीः साध्वसं भयम्' इत्यमरः तद्रहितमेव। परिफुल्लचक्षुः परिफुल्ले विकसिते चक्षुषी अक्षिणी यस्य तत्। कान्त्या शरीरकान्त्या विडम्बितनवेन्दु नवः नूतनः उद्यन्निति यावत् इन्दुः चन्द्रः नवश्चासौ इन्दुश्च नवेन्दुः। विडम्बितः अनुकृतः नवेन्दुः येन तत् तथोक्तम् उद्यच्चन्द्रसदृशकान्तियुक्तमित्यर्थः। जगति अनर्घ्यं न विद्यते अर्घः मौल्यं यस्य तत् अनर्घ्यं असदृशमिति भावः। एवंभूतं पुत्ररत्नं पुत्र एव रत्नं मणिः तत् उपगृह्य आदाय कदाचित् कस्मिंश्चित् शुभदिने रजतपीठपुरवासिनं स्वस्वामिनं आप्तः प्राप्तस्सन्। स्वस्वामिने स्वस्य आत्मनः स्वामिने नाथाय अनन्तेश्वराय तत् पुत्ररत्नं उपायनं उपहारं अर्पयत् अर्पयामास। ऋ गतिप्रापणयोः इत्यतो लङ् परस्मैपदम्। 'उपायनमुपग्राह्य-मुपहारस्तथोपदा' इत्यमरः। यथा कश्चित् पुरुषः अत्रस्तं त्रासो नाम मणिदोषः। 'त्रासस्तु

मणिदोषः स्यात्' इत्यमरः। तद्रहितं परिफुल्लचक्षुः मलापनयनादिसंस्कारेण व्यक्तप्रकाशम्। अत्र चक्षुःशब्दः प्रकाशवाची। जगति अनर्घ्यं मौल्यरहितं स्वकान्त्या उद्यच्चन्द्रसदृशं रत्नं पद्मरागमणिं स्वामिने उपायनं अर्पयेत् तद्वदिति श्लेषाभिप्रायः॥ ३१॥

नत्वा हरिं रजतपीठपुराधिवासं बालस्य सम्पदमनापदमर्थयित्वा।
साकं सुतेन परिवारजनान्वितोऽसौ प्रायान्निशीथसमये निजमेव धाम॥३२॥

पदार्थदीपिकोद्बोधिका – नत्वेति॥ असौ द्विजेन्द्रः रजतपीठपुरं आलय आवासो यस्य तं, तं पतिं नाथं नत्वा बालस्य स्वशिशोः। न विद्यते आपत् अनिष्टं यस्यास्तां सम्पदं श्रेयः अर्थयित्वा सम्प्रार्थ्य सुतेन साकं परिवारा ये जना शिष्यजनास्तैरन्वितो युक्तः सन् निशीथश्चासौ समयश्च तस्मिन् अर्धरात्रकाल एवेत्यर्थः। निजं स्वकीयं धाम गृहं प्रायात्। या प्रापणे लङ्॥ ३२॥

मन्दोपकारिणी – नत्वेति॥ असौ मध्यगेहः। रजतपीठपुराधिवासं रजतपीठपुरे अधिवासो यस्य सः तथोक्तः तम्। हरिं स्वामिनं अनन्तेश्वरं नत्वा। बालस्य शिशोः अनापदं न विद्यते आपत् विपत् यस्यां सा अनापत् तां आपत्सम्बन्धरहितां इति यावत्। सम्पदं श्रेयः अर्थयित्वा प्रार्थयित्वा। सुतेन बालकेन साकं सह परिवारजनान्वितः परिवाराः परितो विद्यमानाश्च ते जनाश्च परिवारजनाः तैः अन्वितः युक्तः सन्। निशीथसमये निशीथः अर्धरात्रश्चासौ समयः कालश्च निशीथसमयः तस्मिन्। 'अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ' इत्यमरः। 'कालोदिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः' इत्यमरः। अर्धरात्रकाल एवेत्यर्थः। निजमेव स्वकीयमेव धाम गृहम्। 'धाम देहे गृहे रश्मौ' इति विश्वः। प्रायात् जगाम। 'या प्रापण इत्यतो लङ् परस्मैपदं अयात् अयाताम् अयान् अयुः'॥ ३२॥

दोषेयुषां सममनेन वनेऽतिभीमे तत्क्रीडितग्रह इहैकतमं तुतोद।
उद्भान्तरक्तमवलोक्य तमभ्यधायि केनाप्यहो न शिशुतुत्कथमेष इत्थम्॥३३॥

पदार्थदीपिकोद्बोधिका – दोषेति॥ अनेन बालेन समं दोषा रात्रौ 'दोषा' इति रात्रिवाचकमव्ययम्। अतिभीमेऽत्यन्तभयङ्करे वने ईयुषां गच्छतां सतां क्रीडां कर्तुमुपक्रान्तः

क्रीडितः। 'कर्तरि च' इति कर्तरि क्तः। तस्मिन् वने क्रीडितस्तत्क्रीडितः स चासौ ग्रहो भूतविशेषः इह एषां मध्ये एकतमं तुतोद बबाधे। तुद व्यथने लिट्। केनापि केनचित्पुरुषेण उद्वान्तं छर्दितं रक्तं येन तं, तं ग्रहपीडितं पुरुषं अवलोक्य एष ग्रहः कथं केन प्रकारेण तुदति बाधत इति तुत् शिशोस्तुत् शिशुबाधक इत्यर्थः नाभूत् अहो आश्चर्यम्। इत्थं अभ्यधायि प्रोक्तम्। डु धाञ् धारणपोषणयोर्लुङ्॥ ३३॥

मन्दोपकारिणी – दोषेति॥ अनेन बालेन समं साकं दोषा रात्रौ। 'दोषा रात्रिमुखे रात्रौ इति विश्वः। दोषा इत्येतत् रात्रिवाचकमव्ययम्। अतिभीमे अत्यन्त भयङ्करे। 'घोरं भीमं भयानकं' इत्यमरः। वने अरण्ये ईयुषां गच्छतां सतां तत्क्रीडितग्रहः तस्मिन्नेव वने क्रीडितः कर्तरि निष्ठा क्रीडां कुर्वन् ग्रहः कश्चित् पिशाचविशेषः। इह एषां मध्ये एकतमं यंकञ्चन पुरुषं तुतोद बबाधे। 'तुद व्यथने इत्यतो लिट् परस्मैपदं तुतोद तुतुदतुः तुतुदुः'। केनापि तत्र केनचित्पुरुषेण उद्वान्तरक्तं उद्वान्तं मुखात् बहिः निसृतं रक्तं रुधिरं यस्य सः उद्वान्तरक्तः तम्। 'रुधिरेऽसृग्लोहितास्रक्तक्षतजशोणितं' इत्यमरः। तं ग्रहपीडितं पुरुषं अवलोक्य दृष्ट्वा एषः ग्रहः शिशुतुत् शिशुं बालकं तुदति पीडयति इति शिशुतुत् कथं नाभूत् अहो एतदाश्चर्यम् इत्थं एवं अभ्यधायि उक्तम्। 'डु धाञ् धारणपोषणयोरिति धातोर्भावे लुङ् आत्मनेपदं' इदं प्रथमपुरुषैकवचनमेव भावस्यैकत्वात्॥ ३३॥

आविश्य पूरुषमुवाच महाग्रहोऽसौ अस्मद्विहारसमयोपगतान् समस्तान्।
यच्छक्तिगुप्तिरहितानलमस्मि हन्तुं लोकेश्वरः स बत बालतमः किलेति॥३४॥

पदार्थदीपिकोद्बोधिका – आविश्येति॥ असौ महाग्रहः पूरुषमुद्भमद्रक्तं तमेव आविष्य, अस्माकं विहारः क्रीडा तस्याः समये काले उपगतान् अस्मत्समीपमागतान् यस्य श्रीमुख्यवायोः शक्तिः सामर्थ्यं तया गुप्ती रक्षा तया रहितान् समस्तान् हन्तुमलं समर्थोऽस्मि। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः। स लोकेश्वरो वायुः बालतमः किल शिशुतमः किल। बत विस्मये। अहो एनं लोकेशमयं बालतम इत्याहेति विस्मयः इत्युवाच॥ ३४॥

मन्दोपकारिणी – आविश्येति ॥ असौ महाग्रहः महांश्चासौ ग्रहश्च महाग्रहः। पूरुषं उद्भान्तरक्तमेव पुरुषं आविश्य इत्युवाच। कथं अस्मद्विहारसमयोपगतान् अस्माकं विहारस्य क्रीडायाः समये काले उप समीपं गतान् प्राप्तान् समस्तान्। यच्छक्तिगुप्तिरहितान् यस्य मुख्यवायोः शक्त्या सामर्थ्येन गुप्त्या रक्षणेन रहितान् हीनान् 'यस्य शक्तिः यच्छक्त्या गुप्तिः तया रहितान्' इति विग्रहः। युष्मान् हन्तुं संहर्तुं अलं समर्थः अस्मि भवामि। 'अस भुवीत्यतो लट् परस्मैपदं अस्मि स्वः स्मः'। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः। स बालतमः लोकेश्वरः किल लोकानां ईश्वरः नियामको वायुर्हि बत आश्चर्यम् नायं प्राकृतशिशुवत् बालकः किन्तु लोकेश्वरो वायुः। अतः तेन रक्षिता यूयं सर्वे जीविताः। अन्यथा सर्वान् वः हन्तुं अहं समर्थोऽस्मि। अतः तस्य पीडा कथं नाभूत् इति आश्चर्यं न कर्तव्यं इति भावः ॥ ३४ ॥

स्तन्येन बालमनुतोष्य मुहुः स्वधाम्नो माता कदाचन ययौ विरहासहाऽपि।
विश्वस्य विश्वपरिपालकपालनाय कन्यां निजामनुगुणां किल भीरुरेषा ॥३५॥

पदार्थदीपिकोद्बोधिका – स्तन्येनेति ॥ भीरुर्भयशीलैषा माता कदाचन बालं स्तन्येन स्तनक्षीरेण मुहुः अनुतोष्य सन्तोष्य विरहं वियोगं न सहत इति विरहासहापि स्वस्य धाम्नो गृहात् विश्वस्य जगतः परिपालकस्य रक्षकस्य स्वशिशोः परिपालनाय रक्षणाय अनुगुणां वशवर्तिनीं निजां स्वकीयां कन्यां विश्वस्य रक्षणे विश्वासं कृत्वा, अन्यत्र ययौ किल। किल ऐतिह्ये। इयमिमं बालकं रक्षितुं समर्थेति स्वमनसा विश्वासं कृत्वा बालं परिपालयेत्युक्त्वा कार्यविशेषवशात्स्वमन्दिरादन्यत्र जगामेति भावः ॥ ३५ ॥

मन्दोपकारिणी – स्तन्येनेति ॥ भीरुः भयशीला एषा माता। कदाचन कस्मिंश्चिद्दिवसे बालं बालकं स्तन्येन स्तनगतक्षीरेण मुहुः भृशं तृप्तिर्यथा तथेति भावः। 'पौनः पुन्ये भृशार्थे च सद्योऽर्थेऽपि मुहुः पदम्' इत्यमरः। अनुतोष्य सन्तोषयित्वा। विरहासंहापि विरहं वियोगं न सहत इति विरहासहा पुत्रवियोगं सोढुमशक्ता इत्यर्थः। स्वधाम्नः स्वकीयं च तत् धाम मन्दिरं च स्वधाम तस्मात्। अन्यत्र कार्यधीः ययौ किल जगाम हि। किं कृत्वा, विश्वपरिपालकपालनाय विश्वस्य सर्वलोकस्य परिपालकस्य

रक्षकस्य पालनाय संरक्षणार्थं अनुगुणां वशवर्तिनीं निजां स्वकीयां कन्यां पुत्रीं विश्वस्य, हे कन्ये! त्वं बालं परिपालय तुभ्यं अपूर्वदृष्टं वस्तु प्रदास्यामि इति प्रत्याययित्वा निधाय इति भावः। किल इत्यनेन बालस्य विश्वपरिपालकत्वरूपमाहात्म्यं न जानातीति सूच्यते ॥ ३५ ॥

सा बालकं प्ररुदितं परिसान्त्वयन्ती मुग्धाक्षरेण वचसाऽनुनिनाय मुग्धा।
मा तात तात सुमुखेति पुनः प्ररोदीर्माता तनोति रुचितं त्वरितं तवेति ॥३६॥

भावप्रकाशिका – प्ररुदितं प्ररोदनं 'आदिकर्मणि क्तः कर्तरि च' इति ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – सेति ॥ मुग्धा रम्या सा कन्या 'मुग्धो मूढे च रम्ये च' इति हेमचन्द्रः। प्ररुदितं प्रकर्षेण सञ्जातो रोदोऽस्येति तं बालकं परिसान्त्वयन्ती बहुभिरुपायैः सामवचनैश्च रोदं शमयन्ती सती हे तात! तात! जनक! 'तातोऽनुकम्पे पितरि' इति हेमचन्द्रः। सु शोभनं मुखं यस्य तत्सम्बुद्धिः। एवं पुनर्मारोदीः। रुदिर् अश्रुविमोचने लुङ्। माता त्वरितं क्षिप्रं यथा भवति तथा तव रुचितं आकाङ्क्षितं स्तन्यदानं, कदलीफलदानं वा, तनोति करोति इति मुग्धानि मनोहराणि अक्षराणि यस्मिन् तेन वचसा वाक्येन अव्यक्तमधुराक्षरेण वचसेत्यर्थः। अनुनिनाय अनुनिन्ये। नीञ् प्रापणे लिट् ॥ ३६ ॥

मन्दोपकारिणी – सेति ॥ मुग्धा मूढा अधृष्टेति यावत्। सा कन्या प्ररुदितं प्रकर्षेण रोदनं कुर्वन्तं बालकं बालं परिसान्त्वयन्ती बहुभिरुपायैः सामवचनेन रोदनं शमयन्ती। मुग्धाक्षरेण अव्यक्तवर्णेन। 'अक्षरं स्यादापवर्गे परमब्रह्मवर्णयोः' इति विश्वः। वचसा वाक्येन अनुनिनाय यत्किञ्चित् समाधानमकरोत्। 'नी प्रापणे इत्यतो लिट् परस्मैपदं निनाय निन्यतुः निन्युः'। कथम् हे तात ! हे तात ! वत्स, वत्स, हे सुमुख ! माता अम्बा त्वरितं शीघ्रम्। 'जवोऽथ शीघ्रं त्वरितं' इत्यमरः। तव तुभ्यं रुचिरं प्रियं फलादिकं पुनः यथेष्टम्। अव्ययानां अनेकार्थत्वात्। तनोति आनयति। 'तनु विस्तारे इत्यतो लट् परस्मैपदं तनोति तनुतः तन्वन्ति'। इतिशब्दो हेतौ इति एतस्मात् हेतोः। मा प्ररोदीः रोदनं मा कुरु। 'रुदिर् अश्रुविमोचने इत्यस्माल्लुङ् परस्मैपदं प्ररोदीः प्ररोदिष्टं प्ररोदिष्ट'। न

माङ् योगे इत्यडभावः। इतिशब्दः प्रकारार्थकः। इति एवं प्रकारेण वचसेत्यन्वयः 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः ॥ ३६ ॥

रोदे क्रियासमभिहारत एव वृत्ते पोतस्य मातरि चिरादपि नागतायाम्।
जग्राह बालमथ चैक्षत मातृमार्गं साऽपि क्रियासमभिहारत एव बाला ॥३७॥

भावप्रकाशिका – पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – रोद इति॥ पोतस्य बालकस्य रोदे रोदने क्रियासमभिहारत आवृत्ते, पुनः पुनरेवेत्यर्थः वृत्ते प्रवृत्ते सति मातर्यपि जनन्यामपि चिरादीर्घकालात् 'दीर्घकाले चिराच्चिरं' इति वैजयन्ती। न आगता नागता तस्यां नैकधेत्यादिवन्न समासोऽयम् अनागतायां सत्यामित्यर्थः। बाला सा कन्यापि रुदन्तं बालं जग्राह इतस्ततः लोटनं यथा न कुर्यात्तथा गृहीतवती। अथ च तदनन्तरं च मातृमार्गं मातुरागमनमार्गं क्रियासमभिहारत एव पुनःपुनरेव कदा नु आयास्यतीत्यैक्षत। ईक्ष दर्शने लङ् ॥ ३७ ॥

मन्दोपकारिणी – रोद इति॥ पोतस्य शिशोः। 'पोतः पाकोऽर्भको डिम्भः पृथकः शावकः शिशुः' इत्यमरः। रोदे रोदने क्रियासमभिहारत एव पुनःपुनः अतितरां वृत्ते प्रवृत्ते सति। मातर्यपि जनन्यामपि चिरात् बहुकालादपि नागतायाम्। नञ् समासोयं न आगता नागता तस्यां न आगतायां अप्राप्तायां सत्यां बाला सा कन्या इतस्ततो भूमौ लुठन्तं बालं अर्भकं जग्राह हस्ताभ्यां उपादाय कटिस्थले आरोपयामास इत्यर्थः। 'ग्रह उपादाने इत्यस्माद्धातोः लिट् परस्मैपदं जग्राह जगृहतुः जगृहुः'। अथ अनन्तरं मातृमार्गं मातुः आगमनमार्गं क्रियासमभिहारत एव पुनः पुनरेव ऐक्षत प्रतीक्षाञ्चक्रे। ईक्ष दर्शनालोकनयोरित्यतो लङात्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त' इति रूपम्। 'मातरि बहुकालेऽपि अनागतायां सत्यां पुनः अत्यन्तं रुदन्तं बालं हस्ताभ्यां आदाय कटौ आरोप्य स्वयमपि कन्या पुनः पुनः गृहात् बहिः गमनागमनेन मातुर्मार्गं प्रत्यैक्षत' इति भावः। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इत्येतत्सूत्रे क्रियासमभिहारपदस्य पौनःपुन्याद्यर्थत्वेन व्याख्यानात् अत्रापि तथैव व्याख्यानं कृतम् ॥ ३७ ॥

कर्तव्यमौढ्यमभिपद्य निरूप्य सा तं प्राभोजयत् खलु कुलत्थकुलं प्रपक्वम् ।
शीतं पयोऽपि सततं परिपाययन्ती यस्योष्णरोगमतिवेलमशङ्कताम्बा ॥ ३८॥

पदार्थदीपिकोद्बोधिका – कर्तव्येति ॥ सा कन्या कर्तुं योग्यं कर्तव्यं तस्मिन् मौढ्यमज्ञत्वं कर्तव्यकर्मविषये मूढत्वमित्यर्थः। अभिपद्य प्राप्य, तथापि क्रमेण निरूप्य किमत्र कार्यमिति विचार्य पयोऽपि क्षीरमपि सततं शीतं शीतलं परिपाययन्ती अम्बा बालस्य माता यस्य बालस्य अतिवेलमतितरां उष्णरोगं उष्णनिमित्तकरोगं अशङ्कत। शकि शङ्कायां लङ्। तं बालं प्रपक्वं सम्यक् पक्वम् कुलत्थकुलं कुलत्थाख्यधान्यसमूहं प्राभोजयत् भोजयामास। भुज पालनाभ्यवहारयोर्लङ्। खल्विति वाक्यालङ्कारे। 'निषेधवाक्यालङ्कार-जिज्ञासानुनये खलु' इत्यमरः। माता यस्योष्णरोगशङ्क्या क्षीरमपि शीतलं पाययति तस्मै शिशवेऽत्युष्णं कुलत्थं भक्षितुमदादिति भावः ॥ ३८ ॥

मन्दोपकारिणी – कर्तव्येति ॥ सा कन्या। कर्तव्यमौढचं कर्तुं योग्यं कर्तव्यं तस्मिन् विषये मौढचं मूढत्वं अज्ञत्वम् अभिपद्य प्राप्य रुदतः बालकस्य समाधानप्रकारं अज्ञात्वेत्यर्थः। निरूप्य किमत्र कुर्यामिति विचार्य तं बालं प्रपक्वं सम्यक् पक्वं अग्निसम्बन्धेन मृदुभूतं अत्युष्णं कुलत्थकुलं कुलत्थस्य धान्यविशेषस्य कुलं समूहं प्राभोजयत्खलु आस्वादयत् हि। 'भुज परिपालनाभ्यवहारयोरित्यस्माल्लङ् परस्मैपदं' तं बालकं अम्बा जननी। 'अम्बा माताथ बाला स्यात्' इत्यमरः। यस्य बालकस्य अतिवेलं भृशम्। 'अतिवेलभृशात्यर्थे' इत्यमरः। उष्णरोगं उष्णश्चासौ रोगश्च उष्णरोगः तं अशङ्कत शङ्कितवती। 'शकि शङ्कायामित्यस्माल्लङात्मनेपदं' अशङ्कत अशङ्केतां अशङ्कन्त'। अत एव सततं नित्यं पयोऽपि दुग्धमपि शीतं शीतलम्। 'तुषारः शीतलः शीतो हिमः' इत्यमरः। परिपाययन्ती बभूव इति अध्याहारः। माता यस्य शिशोः उष्णरोगः स्यात् इति भयेन क्षीरमपि शीतलमेव परिपाययन्ती तस्मै शिशवे पशुनिमित्तं पाकार्थं अग्न्युपस्थापितं सम्यक् मृदुभूतं अत्युष्णं कुलत्थं भगिनी भक्षितुं अदात् इति भावः ॥ ३८ ॥

नूनं पिपासुरतिरोदिति हन्त बालो धिङ् मां दयाविरहितां परकृत्यसक्ताम् ।
इत्याकुला गृहमुपेत्य तदा प्रसन्नं पूर्णोदरं सुतमवैक्षत विप्रपत्नी ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – नूनमिति ॥ तदा विप्रपत्नी ब्राह्मणभार्या। बालः पिपासुः स्तनक्षीरं पातुमिच्छन् अतिरोदिति अतितरां रोदिति नूनम् हन्त हन्तेत्येतदनुकम्पायां, विषादे वा, दयाविरहितां बालके दयारहितां परं बालपोषणादन्यद्यत्कृत्यं कार्यं तस्मिन् सक्तां आसक्तां मां धिक् इत्याकुला सम्भ्रान्ता सती गृहं सद्म उपेत्य, प्रसन्नं रोदनादिकं परित्यज्य प्रसन्नमुखं पूर्णं कुलत्थधान्यभक्षणेन परिपूर्णमुदरं यस्य तं सुतं अवैक्षत ददर्श। ईक्ष दर्शनाङ्कनयोर्लङ् ॥ ३९ ॥

मन्दोपकारिणी – नूनमिति ॥ तदा तस्मिन्काले विप्रपत्नी विप्रस्य ब्राह्मणस्य पत्नी भार्या। इति इत्थं आकुला सम्भ्रान्ता सती गृहं स्वभवनं उपेत्य प्राप्य प्रसन्नं सन्तुष्टं पूर्णोदरं पूर्णः उदरः जठरः यस्य स तथोक्तः तं सुतं अवैक्षत अपश्यत्। किं इत्याकुला, बालः नूनं निश्चयेन पिपासुः स्तनक्षीरं पातुमिच्छन् अतिरोदिति अतिशयेन रोदनं करोति। दयाविरहितां दयया कृपया विरहितां हीनां परकृत्यसक्तां परेषां जनानां कृत्ये कार्ये प्रयोजने सक्तां रतां मां धिक् जनः धिक्करोतु भर्त्सयतु निन्दयतु 'धिग्भर्सननिन्दयोः' इत्यमरः। इत्येवंप्रकारेण अनुकम्पया आकुला सतीत्यन्वयः। हन्त । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः ॥ ३९ ॥

पृष्ट्वाऽवगम्य सकलं च ततः प्रवृत्तं यूनां च दुःसहमिदं शिशुनोपभुक्तम्।
इत्थं विचिन्त्य तनयां बहु भर्त्सयन्त्या भीतं तयोत कुपितं मनसाऽनुतप्तम् ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – पृष्ट्वेति ॥ ततः स्वमन्दिरगमनानन्तरं पृष्ट्वा, किमित्ययं बालः पूर्णोदरो वर्तते, किं त्वया दत्तमिति विचार्य, तद्वचनात्प्रवृत्तं सकलमवगम्य कुलत्थधान्यभक्षणेनोदरपूर्तिं ज्ञात्वा शिशुनोपभुक्तं भक्षितमिदं यूनाञ्च यौवनवयस्कानामपि दुःसहं सोढुमशक्यं जीर्णीकर्तुमशक्यमित्यर्थः। इत्थं इति विचिन्त्य तनयां स्वपुत्रीं बहु अतितरां भर्त्सयन्त्या तया मात्रा भीतं तनयस्य क्षेमापायभयं प्राप्तम्। कुपितमुत तनयां प्रति कोपश्च कृतः, मनसानुतप्तम् मदुपेक्षया खल्वेवमभूदिति पश्चात्तापश्च कृतः ॥ ४० ॥

मन्दोपकारिणी – पृष्ट्वेति ॥ ततः सन्तुष्टसुतदर्शनानन्तरम्। पृष्ट्वा अयं बालः किमिति पूर्णोदरो वर्तते, किं त्वया दत्त इति कन्यां प्रति प्रश्नं कृत्वा। ततः कन्यावचनात्

प्रवृत्तं जातं सकलं रोदनं कुलित्थकुलेन उदरपूर्तिं च अवगम्य ज्ञात्वा। शिशुना बालकेन उपभुक्तं भक्षितं इदं कुलत्थकुलं यूनां च तरुणानामपि। 'वयस्यस्तरुणो युवा' इत्यमरः। दुःसहं जीर्णं कर्तुं अशक्यं हि। इत्थं विचिन्त्य मनसा आलोच्य। तनयां स्वपुत्रीं बहु अतिशयेन भर्त्सयन्त्या अतिनिष्ठुरवचनं वदन्त्या तया मात्रा भीतं तनयस्य अपायभयं आशङ्कितम्। कुपितं उत तनयां प्रति कोपश्च कृतः। मनसा अन्तःकरणेन। अनुतप्तं मदुपेक्षया हि एवं अभूत् इति पश्चात्तापश्च कृतः॥ ४०॥

आरोग्यशालिनि तदाऽपि पुरेव पुत्रे विस्मेरतामुपजगाम जनन्यमुष्य।
यस्य त्रिलोकजननी जननी विषेऽपि पीते न विस्मयमवाप समस्तशक्तेः॥४१॥

भावप्रकाशिका – विषे पीते। वायुरस्मा उपामन्थत् पिनिष्टि स्म कुनन्नमा। केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह॥ – इति श्रुतिः।

पदार्थदीपिकोद्बोधिका – आरोग्येति॥ पुत्रे तदापि कुलत्थकुले भक्षितेऽपि पुरेव कुलत्थभक्षणात्प्रागिव आरोग्येण शालते शोभत इति तादृशस्तस्मिन् शरीरारोग्यवति सतीत्यर्थः। अमुष्य बालकस्य जननी माता विस्मेरतां विस्मययुक्ततां उपजगाम, अस्य महिमानमविदित्वा विस्मयं जगाम। बालस्य तु नैतच्चित्रमिति भावः। तथा हि त्र्यवयवो लोकस्त्रिलोकस्तस्य जननी माता सती, समस्ता सर्वविषयिणी शक्तिः सामर्थ्यं यस्य तस्य, यस्य मुख्यवायोः जननी माता महालक्ष्मीः। विषे देवासुरैरमृतमथनकालोत्पन्नकालकूटविषे वायुना पीतेऽपि विस्मयमाश्चर्यं 'विस्मयोऽद्भुतमाश्चर्यं' इत्यमरः नावाप न प्राप्तवती। पूर्वं वायुना विषे पीतेऽपि मुख्यवायोः माता श्रीदेवी विस्मयं न अवाप। एवं विषं पीतवतस्तस्य कुलत्थभक्षणेन किमनिष्टं भवेत्? न किमपि। तदविदित्वा मध्यगेहभट्टभार्या विस्मेरतामवापेति भावः। ननु त्रिलोकेत्यत्र न तावद्विशेषणसमासः। 'दिक्संख्ये संज्ञायाम्' इति नियमात् त्रिलोकशब्दस्य सप्तर्ष्यादिशब्दवदसञ्ज्ञात्वात्। नापि समाहारद्विगुः 'द्विगो'रिति ङीप् प्रसङ्गात्। न च पात्रादित्वं कल्प्यं त्रिलोक्या बहिरुल्लसन्तीत्यादि-विरोधात्। न चोत्तरपदसमासः त्रिपदतत्पुरुषस्येह दुर्लभत्वादिति चेन्न, लोकशब्दोऽत्र लोकसमुदायपरः त्र्यवयवो लोकस्त्रिलोकः शाकपार्थिवादित्वादुत्तरपदलोपः। त्रिलोकस्य जननी त्रिलोकजननीत्युपपन्नत्वात्॥ ४१॥

मन्दोपकारिणी – आरोग्येति ॥ पुत्रे तदापि कुलत्थकुलभक्षणानन्तरकालेऽपि। पुरेव कुलत्थकुलभक्षणात्पूर्ववदेव आरोग्यशालिनि आरोग्येण शरीरे उदरशूलादि-विकारानुदयेन शालिनि स्वेच्छया शोभमाने सति। अमुष्य बालस्य जननी माता विस्मरेतां विस्मेरतायाः आश्चर्ययुक्तायाः भावः। विस्मेरतां आश्चर्यं उपजगाम प्राप। 'गम्लृ गताविति्यस्माल्लिट् परस्मैपदं जगाम जग्मतुः जग्मुः' इति। अमुष्य समस्तशक्तेः समस्ता सर्वविषये अप्रतिहता शक्तिः सामर्थ्यं यस्य स तथोक्तः तस्य। यस्य वायोः जननी माता त्रिलोकजननी त्रिलोकस्य माता। 'इन्दिरा लोकमाता मा' इत्यमरः। विषे कालकूटविषे वायुना पीतेऽपि तत्सामर्थ्यं जानन्ती वायुमाता लक्ष्मीः विस्मयं आश्चर्यं न आप। एवं समर्थस्य पीतजीर्णविषस्य तस्य वायुरूपशिशोः कुलत्थभक्षणेन किमनिष्टं स्यादित्येतत् अविदित्वा अस्य माता विप्रपत्नी आश्चर्यं आप इति भावः ॥ ४१ ॥

स्तन्यं मुहुः किल ददौ जननी गृहीत्वा क्षेमाय तं किल दधज्जनको जजाप।
अन्यो जनोऽपि किल लालयति स्म किन्तु सर्वोऽपि तन्मुखसुहासरसायनोत्कः ॥४२॥

भावप्रकाशिका – किल अपरमार्थे ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – स्तन्यमिति ॥ जननी गृहीत्वा मुहुः स्तन्यं स्तनक्षीरम्। 'दुग्धं स्तन्यं पयश्च पीयूष'मिति हलः। ददौ किल। जनकः पिता तं बालं दधत् दधानः सन् क्षेमाय शुभाय 'कुशलं क्षेममस्त्रियाम्' इत्यमरः। जजाप धन्वन्तर्यादिमन्त्रान् शान्तिसूक्तादीनि च जपितवान् किल। जप व्यक्तायां वाचि - लिट्। अन्यः माता-पितृभ्यामन्यो जनोऽपि लालयति स्म अलालयत्किल। स्म अतीते। लल ईप्सायाम् लट्। मात्रादीनां स्तन्यदानादिकं सर्वं मोहेनेति वक्तुं वाक्यत्रयेऽपि किलशब्दः। तर्हि कुत्र तात्पर्यमिति पृच्छति किन्त्विति। उत्तरमाह। सर्वोऽपीत्यादिना। सर्वोऽपि जनस्तस्य बालस्य यन्मुखं तस्मिन् यः सुहासः सुन्दरमन्दस्मितं स एव रसायनममृतं सर्वजनाह्लाद-कत्वात्तस्मिन् उत्कः उत्कण्ठावान् मात्रादिसर्वजनस्तन्मुखसुहासरसायनोत्कत्वादेव स्तनक्षीर-दानादिकं चकारेति भावः ॥ ४२ ॥

मन्दोपकारिणी – स्तन्यमिति ॥ जननी माता तं बालं गृहीत्वा हस्ताभ्यां स्वीकृत्य। मुहुः पुनः पुनः स्तन्यं स्तनभवं क्षीरं ददौ पाययामास किल। 'डु दाञ् दाने

इत्यतो लिट् परस्मैपदम्'। तथा जनकः पिता मध्यगेहः तं बालं दधत् हस्ताभ्यां दधानः सन् क्षेमाय क्षेमार्थं प्राप्तव्यानिष्टपरिहारार्थं जजाप धन्वन्तर्यादिमन्त्रान् शान्तिसूक्तानि च जप्तवान् किल। 'जप व्यक्तायां वाचि मानसे च इत्यतो लिट् परस्मैपदं जजाप जेपतुः जेपुः'। अन्यः मातापितृव्यतिरिक्तः जनोऽपि बन्धुवर्गोऽपि तं बालं लालयति स्म अलालयत्किल। 'लल ईप्सायामित्यतो लट् परस्मैपदं लालयति लालयतः लालयन्ति'। मात्रादीनां स्तन्यदानादिकं सर्वं अपरमार्थं इति वक्तुं वाक्यत्रयेऽपि किलशब्दः। ननु लोके पित्रोः सुते प्रणयः दृष्टचरः प्रेक्षकजनस्य तु कथं प्रणयः सम्भवति इति आक्षिपति किंत्विति। जनचित्तापकर्षणं रमणीयवस्तुस्वभावः इत्याशयेन परिहरति। सर्वोऽपीति। सर्वोऽपि जनः तन्मुखसुहासरसायनोत्कः तस्य बालस्य मुखे वदने सुहासः मनोहरस्मितं सुहास एव रसायनं अमृतं सर्वजनाह्लादकत्वात् तस्मिन् उत्कः उत्कण्ठवान्। मात्रादयः बालस्य मन्दस्मितरसायनौत्सुक्यादेव स्तन्यदानादि चक्रुः इति भावः। रसायनमङ्गेपि जराव्याधिजिदौषधमिति विश्वोक्तेः जराव्याधिजिदौषधमुक्तमेवेति ज्ञेयम्॥ ४२॥

देवादिसद्भिरनुपालितयाऽऽदरेण देव्यात्मनेव विलसत्पदया नितान्तम्।
अव्यक्तया प्रथमतो वदनेऽस्य वाण्या शालीनयेव भुवनार्चितया विजह्रे॥४३॥

भावप्रकाशिका – पदं पादविन्यासो वाक्यावयवश्च। शालीनयेव अधृष्टयेव॥ ४३॥

पदार्थदीपिकोद्बोधिका – देवादीति॥ अस्य बालस्य वदने देवादिसद्भिः, आदरो भक्तिस्तेन, अनुपालितया कदा वा अयं वदिष्यतीति प्रतीक्षितया, विलसन्ति पदानि यस्यास्तया प्रथमत आदौ अव्यक्ततया अत एव शालीनयेव स्वशालां स्वगृहमेव प्रवेष्टुमर्हतीति शालीना, तया अधृष्टतयेव 'प्रगल्भः प्रतिभान्विते। स्यादधृष्टे तु शालीने' इत्यमरः। भुवनार्चितया भुवनमान्यया देव्या वाग्देव्या वाण्या सरस्वत्या आत्मनेव मूर्त्तिमत्त्येव नितान्तं विजह्रे। अस्य वदनरङ्गे वाग्देव्या क्रीडा कृता। हृञ् हरणे लिट्। अयं बालोऽतिमधुरं वक्तुमुपचक्रम इति भावः। श्लेषार्थे तु सरस्वती स्वयं देवादिसद्भिरनुपालिता ब्रह्मसदसि क्रीडार्थं कदाऽऽगमिष्यतीति प्रतीक्षिता सती विलसत्पद-विन्यासा सती प्रथमतोऽव्यक्ता यवनिकाच्छन्ना सती, लज्जयाऽधृष्टा ब्रह्मसदसि तत्पुरतः यथा विहारं कुर्यात्तद्वदिति भावः॥ ४३॥

मन्दोपकारिणी – देवादीति ॥ अस्य बालस्य वदने वक्त्रे देव्या सरस्वत्या वाण्या वाचा नितान्तं अत्यन्तं विजह्रे क्रीडितम्। 'विपूर्वात् ह्रञ् हरण इत्यतो भावे लिडात्मनेपदम्'। अत्र एकवचनमेव। कथंभूतया वाण्या, देवादिसद्भिः देवा एव आदयो येषां ते देवादयः देवादयश्च ते सन्तश्च देवादिसन्तः तैः आदरेण भक्त्या। 'आदरो भजनं भक्तिरित्यभिधानम्। अनुपालितया कदा नु अयं बालः वदिष्यतीति प्रतीक्षितया। पुनः कथंभूतया, विलसत्पदया विलसन्ति शोभमानानि पदानि वर्णात्मकानि यस्याः सा विलसत्पदा तया। पुनः कथंभूतया, प्रथमतः आदौ अव्यक्तया अस्पष्टाक्षरया अत एव शालीनयेव अधृष्टवत्स्थितया। 'स्यादधृष्टे तु शालीनः' इत्यमरः। पुनः कीदृक्-विधया, भुवनार्चितया भुवने जगति अर्चितया मानितया। कयेव आत्मना वागभिमानिन्या देव्या सरस्वत्येव। यथा ब्रह्मपत्नी सरस्वती ब्रह्मसभायां देवादिभिः कदा क्रीडायामागमिष्यतीति प्रतीक्षिता सती विलसत्पदा शोभमानपदन्यासा प्रथमतो अव्यक्ता यवनिकाच्छन्ना लज्जया अधृष्टा सती प्रथमतो ब्रह्मसदसि विहारं कुर्यात् तथा बालस्य वदनरङ्गेऽपि क्रीडां चकार। अयं बालः अव्यक्तमधुरवचनं वक्तुं उपचक्रमे इति भावः। ब्रह्मसदसि सरस्वत्येव तदभिमन्यमानया वाचा वासुदेववदने विहरितं इत्याह। **देवादीति ॥** देवाः ब्रह्मरुद्रादयाः एव आदयो येषां ते तथा ते च ते सन्तश्च तैः। आदरेण भक्त्या। अनुपालितया कदा अस्मासु कटाक्षं करिष्यति कदा वयं वाग्वैखरीसम्पन्नाः भविष्याम इति प्रतीक्षितया। यद्वा ब्रह्मसभागतैः देवादिसद्भिः आदरेण औत्कण्ठ्येन अनुपालितया। यवनिकां अपाकृत्य कदा अत्र आगमिष्यति कदा हितं करिष्यतीति प्रतीक्षितया नितान्तं अत्यन्तं विलसती नूपुरेण विराजमाने पदे यस्याः सा तया। यद्वा यवनिकान्तर्गतत्वा-वस्थायामपि स्फुटं लक्ष्यमाणपदया अत एव शालीनयेव शालां प्रवेष्टुं शीलं अस्याः अस्तीति शालीना यवनिकास्था अत एव अव्यक्तया अनभिव्यक्तया भुवनार्चितया लोकेषु पूजितया वाण्या देव्या सरस्वतीदेव्या आत्मना इव ब्रह्मसदसि मूर्तिमत्या स्वयमिव ॥ ४३ ॥

प्राग्रिङ्खणं स्वयमथ स्थितिमेष चक्रे पश्चाद्गतिं परिचयेन किल क्रमेण।
विश्वस्य चेष्टितमहो यदनुग्रहेण सर्वं तदस्य पवनस्य विडम्बनं हि ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – प्रागिति ।। एषः प्रागादौ रिङ्खणं जानुभ्यां हस्ताभ्यां च गमनं चक्रे। अथ स्वयं स्थितिं मातृहस्तस्तम्भभित्त्याद्यालम्बनं विना स्थितिं चक्रे। पश्चाद्गतिं गमनं क्रमेण परिचयस्तत्तन्मार्गपरिचयस्तेन तत्पूर्वं गमनं चक्रे इति भावः। किलेत्यपरमार्थे। कुत इत्यत आह विश्वस्येति । विश्वस्य जगतः चेष्टितं स्पन्दनादिचेष्टा यदनुग्रहेण वाय्वनुग्रहेण वर्तते। अस्य वायोः तत्सर्वं रिङ्खणादिकं विडम्बनं हि मूढजनानुकरणमेव। अहो आश्चर्यम् ।। ४४ ।।

मन्दोपकारिणी – प्रागिति ।। एषः वासुदेवः प्राक् प्रथमतः रिङ्खणं हस्ताभ्यां जानुभ्यां च गृहान्तः सञ्चारं चक्रे। अथ कतिचिद्दिनेषु स्वयं स्वयमेव मात्रादिहस्तं भित्यादिधारणं विहाय स्थितिं उत्थितिं चक्रे। पश्चात् कतिपयदिनैः क्रमेण क्रमजन्येन परिचयेन अभ्यासेन गतिं सर्वत्र गमनं चक्रे। दिनक्रमेण स्थलविशेषाभ्यासं कृत्वा सर्वत्र गमनं चक्रे इति भावः। किल इति अपरमार्थे। कुतः विश्वस्य सर्वप्राणिसमुदायस्य चेष्टितं चेष्टा यदनुग्रहेण यस्य वायोरनुग्रहेण प्रसादेन भवति अस्य पवनस्य वाय्ववतारस्य शिशोः तत्सर्वं रिङ्खणादिचेष्टितं व्यापारः विडम्बनं हि लौकिकजनानुकरणं हि। अहो आश्चर्यम्। जातमात्रस्यापि स्वयं गमनादिशक्तावपि तत् अप्रकटनेन लोकवत् रिङ्खणादिकरणं आश्चर्यमिति भावः। 'डु कृञ् करणे इत्यस्माल्लिडात्मनेपदं चक्रे चक्राते चक्रिरे' ।। ४४ ।।

पुच्छान्तमच्छमवलम्ब्य कदाचिदेष प्रातर्व्रजाद्व्रजत एव निजर्षभस्य ।
प्रायात् प्रियस्य सहसा स्वजनैरदृष्टो नानावनेषु चरतश्चरतस्तृणानि ।। ४५।।

भावप्रकाशिका – चरतश्चरतः। चर गतिभक्षणयोः ।। ४५ ।।

पदार्थदीपिकोद्बोधिका – पुच्छान्तमिति ।। स्वाः ज्ञातयो ये पित्रादिजनास्तैः 'स्वमज्ञातिधनाख्यायाम्' इत्यसर्वनामता। अदृष्ट एष बालः कदाचित्प्रातः व्रजाद्गोष्ठात्। 'गोष्ठाध्वनिवहा व्रजा' इत्यमरः। व्रजतः गच्छत एव प्रियस्यात्मनः प्रियस्य नानावनानि नानाविधारण्यानि तेषु चरतोऽटतः तृणानि चरतः भक्षयतः। चर गतिभक्षणयोरिति धातुः। निजर्षभस्य स्वकीयानडुहः अच्छं निर्मलं पुच्छान्तं अवलम्ब्य गृहीत्वा सहसा अतर्कितम्। 'अतर्किते तु सहसा' इत्यमरः। प्रायात् वनं ययौ ।। ४५ ।।

मन्दोपकारिणी – पुच्छेति ।। एषः बालः कदाचित् कस्मिंश्चिद्दिने प्रातः सूर्योदयकाले व्रजात् गोष्ठात् 'गोष्ठाध्वनिवहा व्रजाः' इत्यमरः। व्रजतः निर्गच्छतः प्रियस्य प्रीतिविषयस्य निजर्षभस्य निजः स्वकीयश्चासौ ऋषभः वृषभश्च निजर्षभः तस्य। 'ऋषभो वृषभो वृषः' इत्यमरः। अच्छं निर्मलं पुच्छान्तं पुच्छस्य लाङ्गूलस्य। 'पुच्छोऽस्त्री लूमलाङ्गूले इत्यमरः। अन्तं प्रान्तभागं 'अन्तः स्यात्प्रान्तके नाशः' इति विश्वः। अवलम्ब्य गृहीत्वा सहसा अतर्कितम्। 'अतर्किते तु सहसा' इत्यमरः। प्रायात् वनं प्रति ययौ। कथं भूतस्सन्। स्वजनैः स्वकीयपित्रादिभिः अदृष्टः सन्। कथं भूतस्य निजर्षभस्य। नानावनेषु नानाविधेषु वनेषु अरण्येषु चरतः सञ्चरतः। पुनः कीदृशस्य। तृणानि यवसानि। 'यवसं तृणमर्जुनम्' इत्यमरः। चरतः भक्षयतः 'चर गतिभक्षणायोः' इति धातोः ।। ४५ ।।

उत्तुङ्गशृङ्गलसितस्य महिष्ठमूर्तेः पादावृतावनितलस्य सुरन्ध्रकस्य।
आश्रित्य तस्य शुशुभेऽवयवैकदेशं बालो दिवाकर इवोदयपर्वतस्य ।।४६।।

भावप्रकाशिका – शृङ्गम् – विषाणं शिखरं च। पादाश्च प्रत्यन्तपर्वताश्च ।। ४६ ।।

पदार्थदीपिकोद्बोधिका – उत्तुङ्गेति ।। बालः उत्तुङ्गाभ्यामुन्नताभ्यां शृङ्गाभ्यां लसितस्य राजितस्य। महिष्ठा अतिस्थूला मूर्तिः शरीरं यस्य तस्य। 'मूर्तिः काठिन्यदेहयोः' इति वैजयन्ती। पादैश्चरणैः आवृतं यथासम्भवमाच्छादितमवनितलं भूतलं यस्य तस्य। शोभनानि रन्ध्राणि नवद्वाराणि यस्य तस्य अनडुहः अवयवैकदेशं पुच्छरूपं आश्रित्येव शुशुभे रेजे। शुभ दीप्तौ लिट्। उन्नतशिखरविराजितस्य बहुयोजनविस्तीर्णस्य पादैः प्रत्यन्तपर्वतैरावृतभूतलस्य। 'पादाः प्रत्यन्तपर्वताः' इत्यमरः। सुरन्ध्रकस्य शोभनगुहायुक्तस्य उदयपर्वतस्यावयवैकदेशमाश्रित्य बालसूर्यो यथा राजते तद्वत् इत्यभिप्रायः ।। ४६ ।।

मन्दोपकारिणी – उत्तुङ्गेति ।। बालः वासुदेवः उत्तुङ्गशृङ्गलसितस्य उत्तुङ्गे दीर्घे च ते शृङ्गे विषाणे च उत्तुङ्गशृङ्गे उत्तुङ्गशृङ्गाभ्यां लसितस्य विराजितस्य। 'शृङ्गं विषाणमाख्यातम्' इत्यमरः। पादावृतावनितलस्य पादैश्चरणैः आवृतं आक्रमितं अवनितलं भूतलं येन स तथोक्तः। महिष्ठमूर्तेः महिष्ठा अतिशयेन महती स्थूला मूर्तिः शरीरं यस्य

तथोक्तः। 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। तस्य सुरन्ध्रकस्य सु शोभनानि तनुरन्ध्राणि चक्षुरादिनवच्छिद्राणि यस्य सः तथोक्तः तस्य। 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः' इत्यमरः। तस्य वृषभस्य अवयवैकदेशं अवयवस्य शिखरस्य एकदेशं अग्रभागं आश्रित्येव तद्वदिति भावः॥ ४६॥

लीलां करोति नु गृहान्तरगो नु बालः कूपान्तरे नु पतितः प्रकृतिस्वतन्त्रः।
इत्थं विचिन्त्य स मुहुः स्वजनो विमृग्य हन्तानवेक्ष्य तनयं हृदि तापमाप॥४७॥

पदार्थदीपिकोद्बोधिका – लीलामिति॥ स स्वश्चासौ जनश्च स्वजनः पित्रादिः स्वीयजनः। प्रकृत्या स्वभावेन स्वतन्त्रः स्वेच्छाधीनप्रवृत्तिः बालः लीलां करोति नु? क्रीडते वा। 'नु वितर्केऽनुपृच्छायाम्' इत्यमरः। गृहस्यान्तरं मध्यं गच्छतीति तादृशः तथा नु? कूपान्तरं कूपान्ते पतितो नु? पतितो वा, इत्थं मुहुर्विचिन्त्य तनयं पुत्रं विमृग्य अन्विष्य अनवेक्ष्य कूपादिष्वदृष्ट्वा हृदि मनसि तापं खेदमाप। हन्तेत्येतद्विषादे। 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः॥ ४७॥

मन्दोपकारिणी – लीलामिति॥ सः स्वजनः पित्रादिः हृदि मनसि तापं खेदं आप प्राप। 'आप्लृव्याप्तौ इत्यस्माल्लिट् परस्मैपदम्'। किं कृत्वा, प्रकृतिस्वतन्त्रः प्रकृत्या स्वभावेन स्वतन्त्रः स्वेच्छानुसारप्रवृत्तिः 'स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः' इत्यमरः। बालः वासुदेवः लीलां क्रीडां करोति नु ? उपमायां विकल्पे वा करोति वा नु वितर्के। 'नु पृच्छायां विकल्पे च' इत्यमरः। गृहान्तरगो नु गृहस्य मन्दिरस्य अन्तरे मध्ये गच्छति तिष्ठतीति गृहान्तरगो वा। कूपान्तरे कूपस्य उदपानस्य अन्तरे मध्ये। 'पुंस्येवान्धुः प्रहिः कूप उदपानम्' इत्यमरः। पतितो नु ? पतितवान् वा। इत्थं विचिन्त्य विचार्य विमृग्य अन्विष्य तनयं पुत्रं अनवेक्ष्य अदृष्ट्वा। हन्त विषादं प्राप्य। 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः॥ ४७॥

बालस्य बालपरिलम्बनगोचरं तव्यश्चस्यतापि वचनं वनगोचरोक्तम्।
यत्सायमैक्षत जनः शिशुमाव्रजन्तं एकाब्दकं वृषभबालकृतावलम्बम्॥ ४८॥

पदार्थदीपिकोद्बोधिका – बालस्येति॥ जनः पित्रादिजनः सायं सायङ्काले एकोऽब्दो वत्सरो यस्य तम्। वृषभस्य बालेन कृतोऽवलम्ब आश्रयो येन तं आव्रजन्तं शिशुं यद्यस्मात्

ऐक्षत अपश्यत् तस्मात्कारणात् बालस्य शिशोः बालस्य वृषभपुच्छस्य परिलम्बनम् अवलम्बनं गोचरो विषयो यस्य तं वनगोचरोक्तं वनं गोचरो विषयो यस्य तेन उक्तम्। वृषभबालमवलम्ब्य गच्छन् बालः प्रातर्मया दृष्ट इति केनचिद्वनचारिणोक्तमित्यर्थः। वचनमपि व्यश्वस्यत विश्वस्तम्। श्वस प्राणने कर्मणि लङ्। वृषभबालं गृहीत्वा वनात् गृहं प्रत्याव्रजन्तं बालं सायङ्काले दृष्ट्वा पश्चाद्वनगोचरोक्तवचने विश्वासोऽभूदिति भावः॥ ४८॥

मन्दोपकारिणी – बालस्येति॥ बालस्य शिशोः, बालपरिलम्बनगोचरं बालस्य वृषभपुच्छस्य परिलम्बनं हस्तेनाश्रयणं तदेव गोचरः विषयः यस्य वचनस्य तत्। वनगोचरोक्तं गाः वृषभाद्यान् चारयति तृणभक्षणार्थं सञ्चारयतीति गोचरः गोरक्षकः इति यावत्। वने गोचरः तेन उक्तमपि वृषभपुच्छं आश्रित्य वनं गच्छन् शिशुः प्रातःकाले मया दृष्ट इति केनचित् वनगोचरेण गोपालकेन उक्तमपि वचनं तत् तदा व्यश्वस्यत विश्वस्तं पित्रादिजनैः इति शेषः। 'विपूर्वात् श्वस प्राणने इत्यतः कर्मणि लङात्मनेपदं व्यश्वस्यत व्यश्वस्येताम् व्यश्वस्यन्त'। कदा, यत् यदा जनः पित्रादिजनः सायं सायङ्काले वृषभबाल-कृतावलम्बं वृषभस्य बलीवर्दस्य बाले लाङ्गूले कृतः अवलम्बः आश्रयः येन तथोक्तः तं सायङ्काले गोभिः सह आव्रजन्तं वनात् गृहं प्रति आगच्छन्तं एकाब्दकं एकः एकसङ्ख्याकः अब्दो वत्सरो यस्य स तथोक्तः तम्। 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः' इत्यमरः। शिशुं ऐक्षत अपश्यत् तदा इत्यन्वयः। 'ईक्ष दर्शने इत्यतो लङ् आत्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त'॥ ४८॥

चिन्तामणीन्द्रमिव चिन्तितदं दरिद्रो विज्ञानमार्गमिव विष्णुपरं मुमुक्षुः।
नष्टं च नन्दनमिति स्वजनोऽस्य लब्ध्वा नाथस्य तस्य तमनुग्रहमेव मेने ॥४९॥

पदार्थदीपिकोद्बोधिका – चिन्तेति॥ दरिद्रो निर्धनः। चिन्तितं प्रार्थितम् अखिलं ददातीति चिन्तितदः तम्। चिन्तामणिनामको मणीन्द्रो मणिश्रेष्ठस्तम्। चिन्तामणिष्विन्द्रः श्रेष्ठस्तमिवेति वा। मुमुक्षुः संसारान्मोक्षमिच्छुः पुमान्, विष्णुः पर उत्कृष्टः विषयतया यस्मिन् तं विज्ञानमेव विशिष्टतत्त्वज्ञानमेव मार्गस्तमिव, अस्य बालस्य स्वजनः पित्रादिस्वीयजन इत्येवमन्विष्यापि नष्टं अदृष्टम्। 'नश अदर्शन' इति धातोः। न चात्र

नाशोऽविवक्षितः तथात्वे पुनर्लाभायोगात्। चिन्तितदं विष्णुपरं विष्णुनिष्ठं नन्दनं लब्ध्वा तं पुत्रदर्शनाख्यं लाभं तस्य नाथस्य रूप्यपीठवासिनो हरेरनुग्रहमेव मेने। मन ज्ञाने लिट्। पुत्रदर्शनं तस्यानुग्रहं मेन इति भावः॥ ४९॥

मन्दोपकारिणी – चिन्तामणीन्द्रमिति॥ दरिद्रः निर्धनः चिन्तितदं चिन्तितं अपेक्षितपुरुषार्थं ददातीति चिन्तितदः तम्। चिन्तामणीन्द्रमिव चिन्तामणिनामकमणि-श्रेष्ठमिव। मुमुक्षुः संसारात् मुक्तिमिच्छन् पुमान्। विष्णुपरं विष्णुविषयम्। विज्ञानमार्गं विज्ञानं विशिष्टतत्त्वज्ञानं तल्लक्षणं मार्गमिव। अस्य बालस्य स्वजनः स्वकीयजनः पित्रादिः इति पूर्वोक्तप्रकारेण नष्टं अन्वेषणे कृतेऽपि अदृष्टं नश अदर्शने इति धातोः, नन्दनं पुत्रं लब्ध्वा प्राप्य तं पुत्रदर्शनाख्यलाभं तस्य नाथस्य रजतपीठपुरस्वामिनः अनन्तेश्वरस्य अनुग्रहमेव अनुग्रहेणैव जातं मेने। 'मन अवबोधने इत्यतो लिडात्मनेपदं मेने मेनाते मेनिरे'। हतभाग्यानाम् अस्माकं पुनः एतादृशपुत्रदर्शनं तस्यानुग्रहमेव इति मेन इति भावः॥ ४९॥

लीलावसानसमये सहसा कदाचिदार्योऽमुनाऽभ्यवहृतिं प्रति चोद्यमानः।
रोद्धैष नोऽस्ति धनिको वृषविक्रयीति प्रोवाच नन्दनमुखेन्दुमवेक्ष्य मन्दम्॥५०॥

पदार्थदीपिकोद्बोधिका – लीलेति॥ कदाचित् लीलावसानस्य क्रीडावसानस्य समये काले सहसा अतर्कितं आगत्य अमुना बालेन अभ्यवहृतिं प्रति भोजनं प्रति चोद्यमानः प्रेर्यमाण आर्यः सज्जनः पिता। 'आर्यौ सज्जनसंविदा'विति हेमचन्द्रः। नन्दनमुख-मेवेन्दुश्चन्द्रस्तं अवेक्ष्य नः अस्माकं वृषं विक्रीतुं शीलमस्यास्तीति वृषविक्रयी। द्रव्यं पश्चादेहीयुक्ता मूल्यार्थं वृषद इत्यर्थः। एष धनिकः रोद्धा निषेद्धा मह्यमदत्वा न भोक्तव्यमित्युक्त्वा, स्वयञ्चानशनमुपविष्टः सन् भोजनविघ्नकारी अस्ति वर्तते। तस्मात् न अहम् इदानीं भोक्ष्ये। त्वमेव भुंक्ष्व इति मन्दं यथा भवति तथा शनैः इत्यर्थः। प्रोवाच। शनैरित्यनेन लालनमवगम्यते। क्रुद्धश्चेदुच्चैर्ब्रूयादिति॥ ५०॥

मन्दोपकारिणी – लीलेति॥ कदाचित् कस्मिंश्चिद्दिवसे लीलावसानसमये लीलायाः क्रीडायाः अवसानं समाप्तिः तस्य समये काले। सहसा अतर्कितमागत्य अमुना बालकेन

अभ्यवहृतिं प्रति भोजनं उद्दिश्य चोद्यमानः प्रेर्यमाणः हे तात त्वं भोक्तुं आगच्छ इति प्रेर्यमाणः आर्यः पिता मध्यगेहः, नन्दनमुखेन्दुं नन्दनस्य सुतस्य वासुदेवस्य मुखमेव इन्दुः चन्द्रः तं अवेक्ष्य दृष्ट्वा मन्दं शनैः मृदुवचनेनेति यावत्। अनेन पुत्रलालनं अवगम्यते। क्रुद्धश्चेत् उच्चैः ब्रूयात्। प्रोवाच अब्रवीत्। 'वच परिभाषणे इत्यतो लिट् परस्मैपदम्। किमिति? वृषविक्रयी वृषस्य वृषभस्य विक्रयः अस्यास्तीति वृषविक्रयी अस्मभ्यं वृषविक्रीतेत्यर्थः। एषः धनिकः नः रोद्धा वृषमौल्यं निष्कं अदत्वा न भोक्तव्यमित्युक्त्वा स्वयं च भोजनं त्यक्त्वा उपविष्टः। मम भोजनविघ्नकारी अस्ति। तस्मात् न मया इदानीं भोक्तुं शक्यते। त्वं भुंक्ष्व इति। अस भुवीत्यतो लट् परस्मैपदं अस्ति स्तः सन्ति॥ ५०॥

लीलाकरेण स करेण सुकोमलेन बीजान्तराणि किल कानिचिदाशु तस्मै।
स्मित्वाऽर्भकोऽभिमतनिष्कपदे यदाऽदादादत्त तानि धनिको बहुमानपूर्वम्॥५१॥

भावप्रकाशिका – बीजान्तराणि तिन्त्रिणीबीजाख्यानि॥ ५१॥

पदार्थदीपिकोद्बोधिका – लीलेति॥ स अर्भकः लीलानाम् आकर आश्रयस्तेन सुकोमलेन सुकुमारेण करेण हस्तेन आशु अभिमतं धनिकेन भट्टेन च सङ्ख्याविषये सम्प्रतिपन्नं यन्निष्कपदं निष्कस्थानं तस्मिन् कानिचित् बीजान्तराणि बीजविशेषान्। तिन्त्रिणीबीजानीत्यैतिह्यम्। स्मित्वा मन्दस्मितं कृत्वा तस्मै धनिकाय यदाऽदात् तदा धनिकस्तानि बहुमान आदरः पूर्वः पुरस्सरो यथा भवति तथा आदत्त किल जग्राह किल। दाञ् दाने लङ्। किलेत्यैतिह्ये। मम द्रव्यमागतमित्युक्त्वा जगाम च॥ ५१॥

मन्दोपकारिणी – लीलाकरेणेति॥ अर्भकः सः वासुदेवः लीलाकरेण लीलानां क्रीडानां आकरेण खनिभूतेन बालक्रीडाशालिनेत्यर्थः। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। सुकोमलेन अत्यन्तं मृदुना। 'कोमलं मृदुलं मृदु' इत्यमरः। करेण हस्तेन आशु शीघ्रं अभिमतनिष्कपदे अभिमतानां धनिकस्य मध्यगेहभट्टस्य च सङ्ख्याविषये सम्प्रतिपन्नानां निष्काणां दीनाराणां, प्राकृतभाषया वराहशब्दवाच्यानां इत्यर्थः। 'दीनारेऽपि च निष्कोऽस्त्री' इत्यमरः। पदे स्थाने। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः।

निष्कप्रतिनिधित्वेन इत्यर्थः। प्रतिनिधिर्नाम तदभावे तत्कार्यकारि। कानिचित् अप्रसिद्धानि बीजान्तराणि बीजानां फलान्तर्गतानां अन्तराणि विशेषान् तिन्त्रिणीबीजानि इति ऐतिह्यम्। स्मित्वा मन्दं हसित्वा यदा तस्मै धनिकाय वृषभविक्रेत्रे अदात् दत्तवान्। 'डु दाञ् दाने इत्यस्मात् लुङ् परस्मैपदं अदात् अदाताम् अदुः'। तदा धनिकः तानि बीजानि बहुमानपूर्वं बहुमानः आदरः पूर्वः पुरःसरो यस्मिन् स्वीकारकर्मणि तत् बहुमानपूर्वं यथा भवति तथेति क्रियाविशेषणमेतत् आदरेण इत्यर्थः। आदत्त किल स्वीकृतवान् किल।'डु दाञ् दाने लङात्मनेपदं आदत्त आददातां आददत'। किलेति वार्तायां 'वार्तासम्भाव्ययोः किल' इत्यमरः। ततः धनिकः मम निष्कं प्राप्तं इत्युक्त्वा जगाम इति शेषः। किल इत्यनेन धनिकस्य अन्तःकरणनैर्मल्यात् भक्त्या स्वीकारं सूचयति। किल इति ऐतिह्यं वा। 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्यमरः। भेदो विशेषः॥ ५१॥

लब्धं सुतादिति वदन् द्विजपुङ्गवेन कालान्तरे निजधने प्रतिदित्सितेऽपि।
साक्षादमानवनवाकृतितः स लेभे बीजच्छलेन पुरुषार्थमहो विशिष्टम् ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – लब्धमिति॥ द्विजेषु पुङ्गवः श्रेष्ठस्तेन। 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभ कुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यमरः। भट्टेन अन्यः कालः कालान्तरं तस्मिन्। निजमात्मीयं यद्धनं तस्मिन् स्वदत्तवृषभस्य मूल्यभूतधनं इत्यर्थः। प्रतिदातुमिष्टं प्रतिदित्सितं तस्मिन्नपि सुतात् तव पुत्रात् लब्धमिति वदन्। स धनिकः। मानवो मनुष्यो न भवतीत्यमानवो देवः श्रीमुख्यवायुस्तस्य नवा नूतना अवताररूपेत्यर्थः। या आकृतिः स्वरूपं तस्या इति ततः। बीजमिति च्छलं मिषं तेन। 'व्याजश्च्छद्म छलं मिषं' इति हलः। साक्षान्मुख्यतः विशिष्टमुत्तमं पुरुषार्थं मोक्षं लेभे। डु लभष् प्राप्तौ लिट्। अहो आश्चर्यम्। अस्य महिमेति। विशिष्टपुरुषार्थश्च मोक्ष एव। 'मोक्षो हि सर्वपुरुषार्थोत्तमः' इति श्रीविष्णुतत्त्वनिर्णये श्रीमदाचार्याणां वचनम्॥ ५२॥

मन्दोपकारिणी – लब्धमिति॥ द्विजपुङ्गवेन द्विजानां ब्राह्मणानां पुङ्गवेन श्रेष्ठेन मध्यगेहभट्टेन। कालान्तरे अन्यः कालः कालान्तरं तस्मिन्। निजधने निजं च तत् धनं च निजधनं तस्मिन् स्वदत्तवृषभस्य मौल्यभूतद्रव्ये प्रतिदित्सितेऽपि प्रतिदातुं इष्टे सत्यपि सुतात् तव पुत्रात् वृषभमौल्यं लब्धं प्राप्तं इत्येतादृशं वचनं वदन् ब्रुवन् सः धनिकः

साक्षादमानवनवाकृतितः साक्षात् मुख्यः अमानवः अमर्त्यः देवेषु मुख्य इत्यर्थः। 'अमर्त्या अमृतान्धसः' इत्यमरः। मुख्यवायुः तस्य नवाकृतितः नवा नूतना च सा आकृतिश्च नवाकृतिः नूतनाकृतिः तस्याः इति ततः बालरूपावतारात् साक्षात् मुख्यप्राणात् इत्यर्थः। अथवा अमानवानां नव्यः स्तुत्य इति यावत्। 'नवं नव्ये स्तवे विदुः' इति। अमानवः नवः मुख्यवायुः तस्य आकृतितः अवताररूपात् साक्षादेव वासुदेवात् बीजच्छलेन 'छलन्तु खलिते व्याजे' इति विश्वः। विशिष्टं सर्वपुरुषार्थोत्तमं पुरुषार्थं मोक्षं लेभे लब्धवान्। 'डु लभष् प्राप्तवित्यतो लिडात्मनेपदं लेभे लेभाते लेभिरे'। अहो आश्चर्यम्। अस्य शिशोः महिमेति दातव्यनिजधनप्रतिनिधित्वेन येषु केषुचित् बीजेषु बालेन दत्तेषु सत्सु धनिकः बालके बहुभक्तिं कृत्वा तानि गृहीत्वा स्वधनं लब्धं इति सन्तुष्टोऽभूत्। तद्भक्त्या प्रसन्नो वासुदेवः तस्मै मोक्षं दत्तवान् इति भावः ॥ ५२ ॥

वासुदेवमिह वासुदेवतासत्कलामभिननन्द तं जनः।
वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकम् ॥ ५३ ॥

भावप्रकाशिका – वासुदेवं वासुदेवं वा वसुदेवसुतं हरिमिव ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – वासुदेवमिति ॥ जनः सुजन इह भुवि विद्यमानमसूनां प्राणानां देवता देवः श्रीमुख्यप्राणस्तस्याः सती निर्दुष्टा या कला अंशा ताम्। 'चन्द्रांशे कलने कला। महाभूतेष्विन्द्रियेषु ज्ञानावयवयोरपि' इति वैजयन्ती। कलाशब्दो नित्यस्त्रीलिङ्गः। मुख्यवाय्ववतारभूतमित्यर्थः। इति उक्तरीत्या विविधा नानाविधा लीला बालक्रीडा यस्य तम्। वासुदेव इति सन्नामान्वर्थनाम यस्य तम्। 'शेषाद्विभाषे'ति कः। तं अर्भकं बालं वसुदेवस्यापत्यं पुमान् वासुदेवः तं वसुदेवपुत्रमित्यर्थः। वासुदेवं वा श्रीकृष्णनामानं भगवन्तमिव। 'वा विकल्पोपमानयोः' इत्यमरः। अभिननन्द श्रुत्वा दृष्ट्वा च सन्तुतोष। नदि हर्षे लिट्। रथोद्धतावृत्तम्। 'रात्परैर्नरलगै रथोद्धता' इत्युक्तेः ॥ ५३ ॥

मन्दोपकारिणी – वासुदेवमिति ॥ जनः सज्जनः इह भुवि वर्तमानं वासुदेवं असुदेवतासत्कलां असूनां प्राणानां देवता स्वामी तस्य वायोः सत्कलां सती निर्दुष्टा च सा कला अंशश्च वायोः अवतारभूतां इत्यर्थः। इति पूर्वोक्तप्रकारेण विविधलीलां विविधा

बहुविधा लीला क्रीडा यस्य स तथोक्तः तम्। 'क्रीडा लीला च नर्म च' इत्यमरः। वासुदेवसन्नामकं वासुदेव इति निर्दुष्टं नाम आख्या यस्य सः तं अर्भकं बालकम्। अभिनन्द श्रुत्वा दृष्ट्वा सन्तुतोष। 'टु नदि समृद्धौ इत्यतो लिट् परस्मैपदं ननन्द ननन्दतुः ननन्दुः'। कमिव। वासुदेवं वा वसुदेवस्य तन्नामकस्य यादवस्य अपत्यं पुमान् वासुदेवः तं श्रीकृष्णं वा। 'यथा वा विकल्पोपमानयोः' इत्यमरः। वासुदेवता इत्यत्र वा असुदेवता सत्कलामिति पदच्छेदः। वासुदेवं इति पदद्वये एकत्र योगः। अपरत्र रूढिं आश्रित्य विशेषणविशेष्यभावो द्रष्टव्यः। रथोद्धतावृत्तं रात्परैर्नरलगै रथोद्धतेति तल्लक्षणात्॥ ५३॥

इति विहरति मह्यां विष्णुदासेऽपि गूढे समजनि सुजनानां चित्तमानन्दपूर्णम्।
उदयति घनमालालीनभानौ च भानौ ननु जननयनाब्जैर्लभ्यतेऽलं विकासः॥ ५४॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के द्वितीयः सर्गः॥

भावप्रकाशिका – समजनि 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति कर्तरि चिण्॥ ५४॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमत्सुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां द्वितीयः सर्गः॥

पदार्दीपिकोद्बोधिका – **इतीति॥** विष्णुदासे श्रीमुख्यवायौ गूढेऽपि मानुषेष्वव-तीर्णत्वेन तज्ज्ञात्यनुसारित्वेनानाविष्कृतस्वसामर्थ्येऽपि। मह्यां भूमौ इति इत्थं विहरति क्रीडमाने सति सुजनानां सज्जनानां चित्तं मन आनन्दपूर्णं समजनि जातम्। जनी प्रादुर्भावे लुङ्। तथा हि। घनानां मेघानां मालाः पङ्क्तयः तासु लीनाश्छन्ना भानवः किरणा यस्य तस्मिन्। 'भानुः करो मरीचिस्त्रीपुंसयोः' इत्यमरः। भानौ सूर्ये च उदयति सति जनानां यानि नयनानि तानि च अब्जानि च तैः अलं सम्यक् विकास उन्मीलनं लभ्यते ननु। डु लभष् प्राप्तौ लट्॥ ५४॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृत्तौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां द्वितीयः सर्गः॥

मन्दोपकारिणी – इतीति॥ विष्णुदासे विष्णोः श्रीनारायणस्य दासे सेवके वासुदेवनाम्नि बालके गूढेऽपि अप्रकटितस्वसामर्थ्येऽपि मह्यां भूमौ। इति पूर्वोक्तप्रकारेण विहरति सति क्रीडमाने सति सुजनानां सज्जनानां चित्तं हृदयम्। 'चित्तं तु चेतो हृदयम्' इत्यमरः। आनन्दपूर्णं आनन्देन सुखेन पूर्णं समजनि अभूत्। 'जनी प्रादुर्भाव इत्यतः लुङात्मनेपदं अजनि अजनिष्ट अजनिषाताम् अजनिषत' इदमुक्तमित्याहुः। उदयति भानौ सूर्ये घनमालालीनभानौ घनानां मेघानाम्। 'घनो मेघे गुणे मूर्तिः' इत्यमरः। मालायां पङ्क्तौ। 'माला चोन्नतभूभागपङ्क्तौ पुष्पादिमालिका' इति भास्करः। लीनाः आच्छादिताः भानवः किरणाः यस्य स तथोक्तः। 'भानुः किरणसूर्ययोः' इति विश्वः। तादृशेऽपि उदयति सति उदयं प्राप्तौ सति। जननयनाब्जैः जनानां नयनानि नेत्राणि अब्जानि कमलानि च जननयनाब्जानि तैः। अलं सम्यक् विकासः उन्मीलनं लभ्यते ननु प्राप्यते हि। 'डु लभष् प्राप्तवित्यतः कर्मणि लडात्मनेपदं लभ्यते लभ्येते लभ्यन्ते'। मेघपटलाच्छादितेऽपि सूर्ये उदिते सति जननयनानां कमलानां च यथा विकासो भवति तथा अप्रकटितसामर्थ्येऽपि बालके वासुदेवे क्रीडमाने सति सज्जनमनः सन्तुष्टमभूत् इति भावः। मालिनीवृत्तमिदं 'ननमयययुतेऽयं मालिनी भोगिलोकैः' इति तल्लक्षणात्॥ ५४॥

॥ इति श्रीसुमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां द्वितीयः सर्गः॥

तृतीयः सर्गः

अथ कदाचन सुन्दरनन्दनस्मितमुखेन्दुदृशां दयितौ नृणाम्।
महमितो निजबन्धुमुदे मुदा प्रययतुः स्वजनैः सह दम्पती ॥ १ ॥

भावप्रकाशिका – बन्धुगृहस्य नडुवैरीत्यपभ्रष्टभाषा ॥ १ ॥

पदार्थदीपिकोद्बोधिका – कथान्तराणि विशेषाकारेण वक्तुमुपक्रमते – **अथेति ॥** कथान्तरद्योतकोऽथशब्दः। 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इत्यमरः। कदाचन कस्मिंश्चित्काले सुन्दरस्य नन्दनस्य स्मितं मन्दहासोपेतं यन्मुखं तदेवेन्दुरिव तं पश्यन्तीति तथोक्तास्तेषां नृणां दयितौ प्रियौ जाया च पतिश्च दम्पती। 'जायाया दम्भावजम्भावौ वा निपात्यौ' इत्युक्तेर्जायापदस्य दम्भावः। निजानामात्मीयबन्धूनां मुदे सन्तोषाय। स्वजनैः स्वकीयजनैः सह महमुत्सवमुद्दिश्य अतः स्वमन्दिरात् मुदा प्रीत्या प्रययतुः। अस्मिन् सर्गे द्रुतविलम्बितं वृत्तम्। 'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणम् ॥ १ ॥

मन्दोपकारिणी – अथेति ॥ अथ कतिपयवर्षानन्तरं 'मङ्गलानन्तरारम्भप्रश्न-कात्स्न्र्येष्वथो अथ' इत्यमरः। कदाचन कस्मिंश्चित् काले सुन्दरनन्दनस्मितमुखेन्दुदृशां सुन्दरः मनोहरः नन्दनः हर्षकः सुतः 'नन्दनो हर्षकः सुतः' इति विश्वः। सुन्दरश्चासौ नन्दनश्च सुन्दरनन्दनः तस्य स्मितं मन्दहासयुक्तं च तत् मुखं च स्मितमुखं तदेव इन्दुः चन्द्रः तं पश्यन्तीति दृशः तेषां नृणाम् जनानां दयितौ प्रियौ 'दयितं वल्लभं प्रियं' इत्यमरः। सुन्दरं बालकं दृष्ट्वा तदुपरि प्रीत्या तन्मातापितृत्वेन जनानां प्रीतिविषयौ इति भावः। दम्पती जाया च पतिश्च दम्पती 'दम्पती जंपती जायापती भार्यापती च तौ' इत्यमरः। निजबन्धुमुदे निजाः स्वकीयाश्च ते बन्धवः ज्ञातयश्च निजबन्धवः तेषां मुदे प्रीत्यै। स्वजनैः ज्ञातिभिः सह 'सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः' इत्यमरः। महं विवाहाद्युत्सवं 'मह उद्धव उत्सवः' इत्यमरः। उद्दिश्य इतः अस्मात् स्वमन्दिरात्। मुदा हर्षेण 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः। प्रययतुः जग्मतुः 'या प्रापणे इत्यस्माल्लिट् परस्मैपदं ययौ ययतुः ययुः'। सर्गसमाप्तिपर्यन्तं प्रायः द्रुतविलम्बितं वृत्तम्। 'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणात् ॥ १ ॥

स्वजनतापगमागमसङ्गमप्रतिसभाजितपूर्वकसम्भ्रमे ।
अविदुषी जननीति स बालकः शरणतो रणतो निरगान्नृभिः॥ २ ॥

पदार्थदीपिकोद्बोधिका – स्वजनेति ॥ स बालः । नृभिः नरैः । रणतो ध्वनिं कुर्वतः । रण शब्द इति धातुः । शरणतो गृहात् । जनानां समूहो जनता स्वस्यात्मनो जनता स्वबन्धुजनसमूह इत्यर्थः । तस्या अपगम उत्सवमन्दिरान्निर्गमः स च, आगमः प्रवेशः स च, सङ्गमः संमेलनं स च, सभाजितं परस्परसम्भावनं तच्च तानि पूर्वाण्येव पूर्वकाणि यस्य तादृशश्चासौ सम्भ्रमश्च तस्मिन् । जननी विदुषी न भवतीति अविदुषी । मम निर्गमनं न जानातीति मत्वा निरगात् निर्जगाम । इण् गतौ लुङ् ॥ २ ॥

मन्दोपकारिणी – स्वजनेति ॥ सः बालकः वासुदेवः । नृभिः जनैः । रणतः ध्वनिं कुर्वतः सर्वत्र कोलाहलशब्दपूर्णात् इति यावत् । शरणतः गृहात् । 'शरणं गृहरक्षित्रोः' इत्यमरः । निरगात् निर्जगाम 'इण् गतावित्यतो लुङ् परस्मैपदं अगात् अगाताम् अगुः' । किं कृत्वा, स्वजनतापगमागमसङ्गमप्रतिसभाजितपूर्वकसम्भ्रमे जनानां समूहो जनता स्वा च सा जनता च स्वजनता अपगमः उत्सवगृहात् निर्गमः, आगमः उत्सवगृहे प्रवेशः, सङ्गमः एकत्र मेलनं, प्रतिसभाजितं परस्परं सम्भावना, अपगमश्च आगमश्च सङ्गमश्च प्रतिसभाजितं च अपगमागमसङ्गमप्रतिसभाजितानि । स्वजनतायाः अपगमागमसङ्गमप्रतिसभाजितानि पूर्वकाणि पुरःसराणि यस्य स तथोक्तः । स चासौ सम्भ्रमः उत्सवश्च तस्मिन् । जननी मम माता । अविदुषी मम गृहात् बहिर्गमनं अजानती इति ज्ञात्वा ॥ २ ॥

क्व नु यियाससि तात न सांप्रतं स्वजनसन्त्यजनं तव साम्प्रतम् ।
इति विभुः पथिकैरुदितो व्रजन् स्मितमनाकुलमुत्तरमातनोत्॥ ३ ॥

पदार्थदीपिकोद्बोधिका – क्वन्विति ॥ तात! वत्स! क्व नु यियाससि यातुमिच्छसि । साम्प्रतम् इदानीं 'एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः तव स्वजनस्य बन्धुजनस्य सन्त्यजनं त्यागः साम्प्रतं युक्तं न । 'युक्ते द्वे साम्प्रतं स्थान' इत्यमरः । इति पथि भवाः पथिकास्तैः पान्थजनैरित्यर्थः । उदितः व्रजन् गच्छन् । विभुः समर्थः । स बालः आकुलं न भवतीत्यनाकुलं सम्भ्रमरहितमित्यर्थः । स्मितं मन्दहासमुत्तरं पथिकवचनानां

प्रत्युत्तरमातनोत् अकरोत्। तनु करणे लङ्। पथिकवचनं श्रुत्वा मन्दहासं चकारेति भावः ॥ ३ ॥

मन्दोपकारिणी – क्वन्विति ॥ व्रजन् गच्छन्। विभुः समर्थः वासुदेवः। हे तात। वत्स ! क्व नु कुत्र वा 'नु पृच्छायां विकल्पे च' इत्यमरः। यियाससि यातुं इच्छसि 'या प्रापणे' इत्यतो लट् परस्मैपदं यियाससि यियासथः यियासथ'। 'तातोऽनुकम्पे पितरि' इति भास्करोक्तेः। स्वजनं परित्यज्य एकाकिनः एव गच्छतः वासुदेवस्यानुकम्पाविषयत्वात् तातेति प्रयोगः। सांप्रतं इदानीम्। तव स्वजनसन्त्यजनं स्वजनस्य स्वकीयजनस्य सन्त्यजनं परित्यागः स्वजनं विहाय अन्यत्र गमनमिति यावत्। न साम्प्रतं युक्तं न भवति। 'युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः। 'साम्प्रतं स्थाने इति द्वे पदे युक्तं इत्यर्थके' इत्यभिधानार्थः। इति पूर्वोक्तप्रकारेण। पथिकैः मार्गस्थैः 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकः' इत्यमरः। उदितः पृष्टस्सन्। अनाकुलं उद्वेगरहितं स्मितं मन्दहासमेव उत्तरं पथिकवचनानां प्रत्युत्तरं आतनोत् अकरोत्। 'तनु विस्तारे' इत्यतो लङ् परस्मैपदं अतनोत् अतनुतां अतन्वन्'। क्व गच्छसि इति पृष्टः भयं विना हसन् जगामेति भावः ॥ ३ ॥

त्वरितमेत्य स काननदेवतासदनमत्र ननाम रमापतिम्।
अपि ततः प्रगतो लघु नारिकेल्युपपदान्तरसङ्गतं च तम्॥ ४ ॥

भावप्रकाशिका – काननदेवतासदनस्य **'कुडुवूरु'** इत्यपभ्रष्टभाषा। **अन्तरम्** अवटम्। नारिकेल्युपपदान्तरस्य 'ताळेकुडे' इत्यपभ्रष्टभाषा ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – त्वरितमिति ॥ सः त्वरितं शीघ्रं यथा भवति तथा काननेऽधिष्ठिता देवता तस्याः सदनं मन्दिरम्। काननस्य 'कुडुवूरकानन' इत्यपभ्रष्टसज्ञा। आ सम्यग् इत्वा गत्वा एत्य, अत्र काननदेवतासदने रमापतिं तत्र सन्निहितं श्रीहरिं ननाम। ततोऽपि काननदेवतासदनादपि लघु शीघ्रं यथा भवति तथा। 'लघुक्षिप्रमरं द्रुतम्' इत्यमरः। प्रगतो यातः सन् नालिकेर एव नारिकेलि। स उपपदं यस्य तन्नारिकेल्युपपदं च तदन्तरञ्चेति नारिकेल्युपपदान्तरम्। तत्र चोपपदस्य नारिकेलीशब्दस्य संस्कृते नारिकेल-वृक्षवाचिनस्तौळवानां 'ताळे' इत्यपभ्रष्टसञ्ज्ञा। अन्तरशब्दस्य 'अन्तरमवटं छिद्र'मित्यभि धानात्संस्कृते छिद्रवाचिनस्तौळवानां 'कुडे' इति। तथा च नारिकेल्यन्तरशब्दस्य

'ताळेकुडे' इत्यपभ्रष्टभाषायां समुदायार्थः। 'ताळेकुडे' इति शिवळ्ळिग्रामे कस्यचिद्देश-विशेषस्य सञ्ज्ञा तस्मिन् यत्सद्म तस्मिन् गतः सन्निहितस्तं च शिवान्तर्गतं हरिं च ननाम ॥ ४ ॥

मन्दोपकारिणी – त्वरितमिति ॥ सः वासुदेवः त्वरितं शीघ्रम्। काननदेवतासदनं काननं वनं 'गहनं काननं वनं' इत्यमरः। देवतायाः विष्णुदेवतायाः सदनं देवालयं एत्य प्राप्य। अत्र काननदेवतालये रमापतिं रमायाः लक्ष्म्याः पतिं भर्तारं हरिं ननाम नमस्कृतवान्। 'णम प्रह्वत्वे शब्दे चेत्यतो लिट् परस्मैपदं ननाम नेमतुः नेमुः'। ततोऽपि तस्मात् काननदेवालयात् अपि। लघु द्रुतं 'लघुक्षिप्रमरन्द्रुतं' इत्यमरः। प्रगतः प्रयातः सन् नारिकेल्युपपदान्तरसद्मगतं नारिकेलीति उपपदान्तरं संज्ञाविशेषः यस्य तत् नारिकेल्युपपदान्तरं तच्च तत् सद्म देवालयं तत्र गतं विद्यमानं हरिं च ननाम। पूर्वं अरण्यकाननदेवालये विद्यमानं हरिं प्रणम्य ततोऽपि उत्तरत्र गतः सन् नारिकेलदेवालयगतं च हरिं च प्रणनामेति भावः ॥ ४ ॥

नलिननाभनिभालनसंमदागमविकस्वरभास्वरलोचनः।
जनमनोनयनाम्बुजभास्करो रजतपीठपुरं प्रययावसौ ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – नलिनेति ॥ नलिनं नाभौ यस्य तस्य श्रीहरेः। निभालनं दर्शनम्। 'निशामनं निभालनं निध्यानमवलोकनं' इति हलः। तेन सम्मदः सन्तोषः। 'प्रमोदामोदसम्मदा' इत्यमरः। तस्यागमः प्राप्तिः तेन विकस्वरे विकासं प्राप्ते भास्वरलोचने शोभमानलोचने यस्य तादृशः। जनानां मनांसि च नयनानि च जनमनोनयनानि। तानि अम्बुजानीव तेषां भास्कर इव भास्करः। सन्तोषकारी असौ रजतपीठाख्यं पुरं प्रययौ ॥ ५ ॥

मन्दोपकारिणी – नलिनेति ॥ नलिननाभनिभालनसंमदागमविकस्वरभास्वरलोचनः नलिनं पद्मं 'वा पुंसि पद्मं नलिनं' इत्यमरः तत् नाभौ यस्य सः नलिननाभः हरिः। तस्य निभालनं दर्शनं तेन जातः संमदः सन्तोषः। 'प्रमोदामोदसंमदाः' इत्यमरः। तस्य आगमः आगतिः आप्तिरिति यावत् 'आगमस्त्वागतौ शास्त्रे' इत्यभिधानात्। नलिननाभस्य

निभालनं नलिननाभनिभालनं तेन संमदागमः तेन विकस्वरे विकासं प्राप्ते भास्वरे शोभमाने लोचने नयने यस्य स तथोक्तः। हरिदर्शनप्राप्तसुखेन विकसितनेत्रः इति यावत्। जनमनोनयनाम्बुजभास्करः मनांसि च नयनानि च मनोनयनानि तान्येवाम्बुजानि कमलानि जनमनोनयनाम्बुजानि तेषां भास्करः सूर्यसदृशः। तत्र तत्र स्वात्मानं पश्यतां जनानां मनोनयनानां हर्षकारी इत्यर्थः। एतादृशः असौ बालकः रजतपीठपुरं रजतपीठाख्यपुरं प्रययौ प्राप ॥ ५ ॥

सुहयमेधगणातिशयालवो हरिनमस्कृतयः सुकृता इमाः।
इति सुरैरपि भूसुरमण्डलैः समनमत् स सविस्मयमीक्षितः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – सुहयेति ॥ सु सम्यक् कृताः सुकृताः। 'उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः' इत्यष्टाङ्गविशिष्टतया कृता इत्यर्थः। इमा हरेर्नमस्कृतयः हरये कृतनमस्कारा इत्यर्थः। सु शोभना ये हयमेधा अश्वमेधयागास्तेषां गणाः समूहास्तानतिशयितुं शीलमासामस्ती-त्यतिशयालवः। इति अनेनाभिप्रायेण। 'एकोऽपि कृष्णस्य कृतप्रणामो दशाश्वमेधावभृथेन तुल्यः। दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाये'त्युक्तेः। सुरैः देवैः भूसुरमण्डलैः ब्राह्मणसमूहैरपि सविस्मयं विस्मयेन सहितं यथा भवति तथा। ईक्षितो दृष्टः। स समनमत् नमश्चकार ॥ ६ ॥

मन्दोपकारिणी – सुहयेति ॥ सुकृताः सु सम्यक् भक्त्यादिपूर्वकं कृताः अनुष्ठिताः। इमाः हरिनमस्कृतयः हरिविषयकनमस्काराः। सुहयमेधगणातिशयालवः सु साङ्गतया सम्यक् कृताः हयमेधाः अश्वमेधयज्ञाः तेषां गणाः समूहाः तान् अतिशयन्ते अतिक्रमन्तीति अतिशयालवः। साङ्गानुष्ठिताश्वमेधसमूहापेक्षया अतिशयितफलप्रदस्वभावाः इति भावः। इति एवं अनुसन्धानं कुर्वद्भिः सुरैः देवैः भूसुरमण्डलैः अपि भूसुराणां ब्राह्मणानां मण्डलैः समूहैः। 'पूगो वितानं प्रकरो मण्डलं चक्रवालकं' इति। सविस्मयं विस्मयेन आश्चर्येण सहितं यथा भवति तथा ईक्षितः दृष्टः। सः वासुदेवः हरिं समनमत् सम्यक् नमस्कृतवान् ॥ ६ ॥

न हि हरिं सततं न नमत्यसौ न च न पश्यति नापि न वन्दते ।
अपि तथेति विधाय विशेषतः स ननु साधुजनान् समशिक्षयत् ॥ ७॥

पदार्थदीपिकोद्बोधिका – समनमदित्युक्त्या श्रीमदाचार्याणां हरिवन्दनादिकं कादाचित्कमिति न मन्तव्यमित्याशयवानाह — **न हीति ॥** असौ हरिं सततं न नमतीति न हि। किन्तु सर्वदा नमत्येव। हरिं न पश्यतीति च न। दृशिर् प्रेक्षणे लट्। हरिं न वन्दते न स्तुवत इत्यपि न। तथापि सदा हरिवन्दनादिकं कुर्वन्नपि स इति विशेषतो विशेषात् विधाय नमस्कारादिकं कृत्वा साधुजनान्समशिक्षयत् ननु शिक्षितवान् हि। शिक्ष विद्योपादाने लङ् ॥ ७ ॥

मन्दोपकारिणी – न हीति ॥ असौ बालकः हरिं सततं निरन्तरं न नमतीति न किन्तु सर्वदा हरिं नमस्करोत्येव। असौ हरिं सततं न पश्यतीति च न नापरोक्षीकरोतीति च न किन्तु सर्वदा प्रत्यक्षीकरोत्येव। असौ हरि सततं न वन्दते इत्यपि न, न स्तौतीति न किन्तु सर्वदा स्तौति। 'णम् प्रह्वत्वे शब्दे च, दृशिर् प्रेक्षणे इत्यतो लट् परस्मैपदम्'। 'वदि अभिवादनस्तुत्योरित्यतो लट् आत्मनेपदं वन्दते वन्देते वन्दन्ते'। तर्हि पुनः किमर्थं नमस्कारादिकं अकरोदित्याह **अपीति**। तथापि सदा हरिनमस्कारादिकं कुर्वन्नपि सः वासुदेवः इति पूर्वोक्तप्रकारेण विशेषतः सर्वसमक्षं नमनादिकं विधाय कृत्वा साधुजनान् साधून् मुक्तियोग्यान् जनान् समशिक्षयत् ननु शिक्षितवान् हि। 'शिक्ष विद्योपादाने इत्यतो लङ् परस्मैपदं अशिक्षयत् अशिक्षयतां अशिक्षयन्'। स्वयं सर्वदा हरिनमस्कारादिकं कुर्वन्नपि सर्वैः मुक्तियोग्यैर्जनैः हरिनमनादिकं कर्तव्यमिति नमनादेः आवश्यकताज्ञापनाय सर्वसमक्षमं पुनःपुनः नमस्कारादिकं कृतवानिति भावः ॥ ७ ॥

अनवलोक्य सुतं सुतवत्सलो मृगयति स्म महीसुरपुङ्गवः ।
मुहुरपृच्छदमुष्य गतिं नरान् पथि पथि प्रगतोऽनुपदं द्रुतम् ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – अनवलोक्येति ॥ पदं पुत्रपादचिह्नमनुसृत्यानुपदम्। 'पदं स्थाने विभक्त्यन्ते शब्दे वाक्येऽङ्गवस्तुनोः। प्राणे पादे पादचिह्ने व्यवसायापदेशयो'रिति हेमचन्द्रः। द्रुतं प्रगतोऽन्विष्य गतः। अनुपदं निरन्तरं पुत्रनिर्गमनानन्तरमेव प्रगत इति वा।

सुते वत्सलः स्निग्धः पुत्रस्नेहयुक्त इत्यर्थः। महीसुरेषु भूसुरेषु पुङ्गवः श्रेष्ठः। स तु मध्यगेहभट्टः सुतं अनवलोक्य अदृष्ट्वा मृगयति स्म मार्गयामास। मृग अन्वेषणे लट्। अमुष्य गतिं गमनं गच्छतो नरान् प्रति पथि पथि मार्गे मार्गे मुहुरपृच्छत् विचारितवान्। पृच्छ ज्ञीप्सायाम् लङ्। दुह्याच् इति द्विकर्मकोऽयं धातुः ॥ ८ ॥

मन्दोपकारिणी – अनवलोक्येति ॥ सुतवत्सलः सुते पुत्रे वत्सलः स्नेहयुक्तः। 'श्रीमान् स्निग्धस्तु वत्सलः' इत्यमरः। महीसुरपुङ्गवः महीसुराणां ब्राह्मणानां पुङ्गवः श्रेष्ठः। 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः' इत्यमरः। सुतं अनवलोक्य अदृष्ट्वा। मृगयति स्म अन्वेषितवान् 'मृग अन्वेषणे इत्यतो लट् परस्मैपदम्'। स्म अतीते। ततः अनन्तरं अनुपदं सुतस्य पदं भूमौ दृश्यमानपादाकारं अनु अनुसृत्य। द्रुतं शीघ्रं प्रगतः प्रयातः उत्सवमन्दिरात् प्रस्थितः इत्यर्थः। सः ब्राह्मणः पथि पथि मार्गे मार्गे मुहुः पुनः पुनः नरान् जनान् अमुष्य बालकस्य गतिं गमनं अपृच्छत् पृष्टवान्। 'प्रच्छ ज्ञीप्सायामित्यतो लङ् परस्मैपदम्'। दुह्याच् पच् इत्यादिना द्विकर्मकत्वम्। प्रतिमार्गं दृष्टदृष्टजनान् एतन्मार्गे गच्छन् बालकः भवद्भिः न दृष्टः किं इति अपृच्छत् इति भावः ॥ ८ ॥

जनसदागतिसूचितवर्त्मना प्रतिपदं व्रजता परया तृषा।
द्विजमहामधुपेन मनोहरं स्मितमलाभि सुताननवारिजम् ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – जनेति ॥ पदं पदं प्रति प्रतिपदं प्रतिपादप्रक्षेपमित्यर्थः। प्रतिक्षणमिति यावत्। जनोऽभिमुखमाव्रजन् जनः स एव सदागतिः वायुस्तेन सूचितं यद्वर्त्म मार्गस्तेन। 'श्वसनस्पर्शनो वायुर्मातरिश्वा सदागतिः' इत्यमरः। परया तृषा तृष्णया व्रजता पुत्रमन्विष्य गच्छता द्विजमहामधुपेन द्विजरूपमहाभ्रमरेण। मनोहरं स्मितं विकसितं मार्गश्रमाभावादम्लानमिति भावः। ('मनोहरस्मित'मिति वा पाठः) सुताननवारिजं अलाभि प्राप्तम्। कमलपरिमळमादाय व्रजन्तं वायुमभिगच्छता कमलमन्विष्य गच्छता भ्रमरेण विकसितं वारिजमिवेति श्लेषाभिप्रायः ॥ ९ ॥

मन्दोपकारिणी – जनेति ॥ प्रतिपदं प्रतिक्षणम्। जनसदागतिसूचितवर्त्मना जनः मार्गे स्वाभिमुखेन व्रजन् जनः स एव सदागतिः वायुः जनसदागतिः। 'मातरिश्वा सदागतिः'

इत्यमरः। तेन सूचितं ज्ञापितं च तत् वर्त्म मार्गश्च जनसदागतिसूचितवर्त्म तेन। 'अयनं वर्त्म मार्गाध्व पन्थानः' इत्यमरः। अनेन मार्गेण बालको गतः इति प्रतिक्षणं स्वाभिमुखेन आगतजनज्ञापितमार्गेणेति यावत्। परया अतिशयतया। तृषा षकारान्तस्तृट्शब्दोऽयं पिपासया मुखकमलदर्शनमकरन्दपानेच्छयेति यावत्। 'उदन्यातु पिपासा तृट्' इत्यमरः। व्रजता पुत्रं अन्विष्य गच्छता। द्विजमहामधुपेन महान् श्रेष्ठश्चासौ मधुपः भ्रमरश्च महामधुपः। 'मधुलिण्मधुपालिनः' इति भ्रमरपर्यायपदानि। द्विजः एव मध्यगेहः एव महामधुपः तेन मनोहरं स्मितं विकसितं मार्गश्रमाभावात् अम्लानमिति भावः। मनोहरस्मितमिति पाठे मनोहरं च तत् स्मितं चेति समासः। सुताननवारिजं सुतस्य आननमेव मुखमेव वारिजं कमलं अलाभि प्राप्तम्। 'डु लभष् प्राप्तौ इत्यतः कर्मणि लुङ् आत्मनेपदं अलाभि अलाभिषातां अलाभिषत'। यथा कमलपरिमलमादाय आव्रजन्तं वायुं अभिगच्छता कमलपरिमलं अनुभवता तथा च कमलपरिमलं अन्विष्यता भ्रमरेण विकसितं सुन्दरं कमलं लभ्यते तद्वत् पुत्रं दृष्ट्वा आव्रजन्तं जनं अभिमुखेन गच्छता तन्मुखतः पुत्रगतमार्गं श्रुत्वा पुत्रं अन्विष्यता द्विजेन 'अम्लानं पुत्रमुखं दृष्टं' इति भावः॥ ९॥

विरहदूनतयोद्गमनोन्मुखं न्यरुणदश्रु पुरा स ययोर्दृशोः।
अथ तयोः प्रमदोत्थितमप्यदः प्रतिनिरुध्य गिरं गुरुरब्रवीत्॥ १०॥

पदार्थदीपिकोद्बोधिका – विरहेति॥ स गुरुः पिता। 'गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशक' इति हेमचन्द्रः। पुरा सुतान्वेषणकाले विरहेण सुतवियोगेन दूनो दुःखितस्तस्य भावस्तत्ता तया। उद्गमनाय निस्सरणायोन्मुखमुद्युक्तं अश्रु ययोर्दृशोर्न्यरुणत् अमङ्गलशङ्कया निरुद्धवान्। रुधिरावरणे लङ्। अथ पुत्रदर्शनानन्तरं प्रमदेन सन्तोषेणोदितमप्युत्पन्नमपि सुतदर्शनानन्तरं आनन्देनोद्गतमपीत्यर्थः। अदः अश्रु तयोरेव दृष्टयोः प्रतिनिरुध्य अमङ्गलभयान्निरुध्य गिरं वाचमब्रवीत्॥ १०॥

मन्दोपकारिणी – विरेहति॥ सः गुरुः पिता। 'गुरुर्निषेकादिकरे पित्रादौ सुरमन्त्रिणि' इति विश्वः। गिरं वाचं 'गीर्वाग्वाणी सरस्वती' इत्यमरः। अब्रवीत् उवाच 'ब्रूञ् व्यक्तायां वाचि इत्यतो लङ् परस्मैपदं 'अब्रवीत् अब्रूताम् अब्रुवन्'। किं कृत्वा पुरा पूर्वं पुत्रदर्शनाभावकाले विरहदूनतया विरहेण पुत्रवियोगेन दूनः सन्तापितः विरहदूनः

विरहदूनस्य भावो विरहदूनता तया वियोगसन्तप्तत्वेन इत्यर्थः। 'सन्तापितसन्तप्तौ धूपितधूपायितौ दूनश्च' इत्यमरः। उद्गमनोन्मुखं उद्गमनाय बहिर्निर्गमनाय उन्मुखं उद्युक्तं अश्रु नेत्राम्बु ययोः दृशोः चक्षुषोः न्यरुणात् अमङ्गलशङ्कया निरुद्धवान्। 'नि पूर्वक रुधिर् आवरणे इति धातोर्लङ् परस्मैपदं, न्यरुणत् न्यरुन्धाम् न्यरुन्धन्'। अथ पुत्रदर्शनानन्तरं प्रमदोत्थितमपि प्रमदात् पुत्रदर्शनोत्पन्नहर्षात्। 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः। उत्थितं उद्गतमपि। अदः तद्बाष्पं तयोरेव दृशोः प्रतिनिरुद्धय अमङ्गलबुद्धया निरुद्धय। 'दृक् दृष्टी चाश्रुनेत्राम्बु रोदनं चास्रमश्रु च' इत्यमरः॥ १०॥

अयि सुतेदमुदाहर तत्त्वतो ननु समागतवानसि साम्प्रतम्।
स्वजनतारहितस्य तु कोऽत्र ते सहचरोऽर्भक दीर्घतमे पथि॥ ११॥

पदार्थदीपिकोद्बोधिका – अयीति॥ अयीत्यव्ययं प्रश्नेऽनुनये वा वर्तते। 'ऊं प्रश्नेऽनुनये त्वयि' इत्यमरः। अयि सुत हे सुत साम्प्रतम् इदानीं समागतवान् इयद्दूरमागतवानसि ननु। तदस्तु तावत्। अर्भक बालक स्वजनतया स्वजनसमूहेन रहितस्य विरहितस्य ते तव अत्र त्वयेदानीमतीत्यागते दीर्घतमे अतिदूरे पथि मार्गे सहचरः सहायस्तु कः? इदं मया पृष्टं तत्वतो यथार्थतः उदाहर कथय। हृञ् हरणे लोट्॥ ११॥

मन्दोपकारिणी – अयीति॥ अयीति कोमलामन्त्रणे। कोमलामन्त्रणं नाम भर्त्सनादिना विना मृदुवचनेन सम्बोधनम्। अयि सुत साम्प्रतं अधुना समागतवान् इयन्तं दूरं आगतवानसि भवसि ननु। 'अस भुवीत्यतो लट् परस्मैपदं, 'असि स्थः स्थ'। हे अर्भक बालक! स्वजनतारहितस्य स्वकीयया जनतया जनसमूहेन रहितस्य विमुक्तस्य ते तव अत्र इदानीं अतीत्यागते दीर्घतमे अतिशयेन दीर्घः दूरः दीर्घतमः तस्मिन् 'बहुदूरे दीर्घतमे' इति। पथि मार्गे। सह चरति आयातीति सहचरः सहायः कः पुरुषः। इदं मया पृष्टं प्रमेयं तत्वतः यथार्थं उदाहर कथय इति गुरुरब्रवीत् इति पूर्वश्लोकेनान्वयः। 'उत् आङ् पूर्वात् हृञ् (हृ) हरणे इत्यतः लोट् परस्मैपदम्। हर हरतात् हरतम् हरत॥ ११॥

जनकवाचमिमामवधारयन् कलमुदाहरदम्बुरुहेक्षणः।
स्वपदमाव्रजतो व्रजतोऽप्यतो ननु सखा मम काननगो विभुः॥ १२॥

पदार्थदीपिकोद्बोधिका – जनकेति ॥ इमां एवमुक्तां जनकवाचं पितृवाचं अवधारयन् एकाग्रचित्तः सुश्रृण्वन्। अम्बुरुहवत् पद्मवदीक्षणे लोचने यस्य सः। स्वपदं स्वस्थानं प्रति स्वेन प्रथमतो गन्तुं विवक्षितकाननदेवालयमित्यर्थः। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रि-वस्तुषु' इत्यमरः। आव्रजतः उत्सवमन्दिरान्निर्गत्यागच्छतो मम अतः काननालयात् व्रजतोऽपि नालिकेर्यन्तरदेवायतनं गच्छतोऽपि काननं गच्छतीति काननगो विभुः श्रीभगवान् सखा ननु सहायो ननु। कलमव्यक्तमधुरं यथा भवति तथा। 'कलमव्यक्तमधुरं' इत्यमरः। उदाहरत् उवाच ॥ १२ ॥

मन्दोपकारिणी – जनकेति ॥ इमां एवमुक्तां जनकवाचं जनकस्य पितुः वाचं वाक्यम्। 'तातस्तु जनकः पिता' इत्यमरः। अवधारयन् सावधानतया शृण्वन् अम्बुरु-हेक्षणः अम्बुरुहवत् कमलवत् ईक्षणे चक्षुषी यस्य स तथोक्तः। 'ईक्षणं चक्षुरक्षिणी' इत्यमरः। भयाभावेन विकसितनेत्रः इत्यर्थः। वासुदेवः कलं अव्यक्तमधुरं यथा भवति तथा। 'कलमव्यक्तमधुरं' इति विश्वः। उदाहरत् उवाच अस्पष्टाक्षरमधुरवचनमुवाचेत्यर्थः। किमिति हे तात! काननगः कानने काननदेवालये गच्छति तिष्ठतीति काननगः। विभुः हरिः स्वपदं स्वस्य पदं स्थानं काननदेवालयं प्रति इत्यर्थः। आव्रजतः उत्सवमन्दिरात् निर्गत्य आगच्छतः तथा, अतः काननदेवालयात् व्रजतोऽपि नारिकेलदेवालयं प्रति गच्छतोऽपि मम सखा ननु सहायो हि। 'सखा मित्रे सहाये च' इति विश्वः। काननदेवालयस्थो हरिः स्वात्मानं प्रत्यागच्छतः स्वात्मनः सकाशात् अन्यत्र गच्छतोऽपि मम सहायः इति भावः ॥ १२ ॥

तदितरायतनात्तु यदाऽगमं कृतनतिः खलु तत्र हरिः सखा।
अहमिहापि महेन्द्रदिगालयं प्रणतवानुत यावदधीश्वरम् ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – तदिति ॥ अहं तस्मात्काननायतनादितरदन्यत् यदायतनं तस्मात् नालिकेर्यन्तरायतनादिति यावत्। यदागमं रजतपीठपुरं प्रति निरगाम्। गम्लृ गतौ लुङ्। तदानीमारभ्य तत्र नालिकेर्यन्तरालये कृता रतिः क्रीडा येन स हरिः। इहापि रजतपीठेऽपीति यावत् यदा महेन्द्रदिशि आलयो मन्दिरं यस्य तं अधीश्वरमुत स्वामिनं हरिं च प्रणतवान् तावत्कालं सखा खलु। खलु वाक्यालङ्कारे ॥ १३ ॥

मन्दोपकारिणी – तदिति ॥ कृतनतिः कृता नतिः नमस्कारो येन स तथा अहम्। तदितरायनात् तस्मात् काननदेवालयात् इतरात् अन्यस्मात् आयतनात् नारिकेलदेवालयात् यदा अगमं निरगां 'गम्लृ गताविति्यतो लुङ् परस्मैपदं अगमम् अगमाव अगमाम'। तत्कालमारभ्य तत्र नारिकेलदेवालये स्थितः इति शेषः। हरिः सखा सहायः खलु अनुभवसिद्धम्। कियत्कालं, इहापि रजतपीठपुरेऽपि। महेन्द्रदिगालयं महेन्द्रस्य दिशि आलयो यस्य स तथोक्तः 'निकाय्यनिलयालयाः' इत्यमरः। तमपि अधीश्वरं हरिं यावत् यदा प्रणतवान् नमस्कृतवान् उत तावत्कालमित्यर्थः। रजतपीठपुरे देवालयद्वयं वर्तते। पूर्वदिगालयः पश्चिमदिगालयः इति। तत्र नारिकेलदेवालयायतनो हरिः रजतपीठपुरस्थ-पूर्वदिगालयगतहरिनमनपर्यन्तं मम सहायः इति भावः ॥ १३ ॥

अपि ततोऽहमुपेत्य सहामुना भगवतेऽत्र सते प्रणतिं व्यधाम्।
इति निगद्य विभाति शिशुः स्म विस्मितसभाजनचीर्णसभाजनः ॥ १४॥

पदार्थदीपिकोद्बोधिका – अपीति ॥ रजतपीठपुरे अमरालयद्वयं वर्तते। तत्र पूर्वालयस्थः प्रथमतो नम्यः, पश्चिमालयस्थः पश्चान्नम्यः इति सम्प्रदायनियमः। तस्मात्पूर्वालयस्थमादौ नत्वा ततः पश्चिमालयस्थं नन्तुमागच्छतः कः सखेत्यपेक्षायामाह— अपीत्यादिना। सभायां स्थितो जनः सभाजनः। विस्मित एवं चरित्रं दृष्ट्वा विस्मितः यः सभाजनस्तेन चीर्णं कृतं सभाजनं सम्भावनं यस्य स शिशुः। अहं ततो महेन्द्रदिगालयादपि अमुना महेन्द्रदिगालयस्थेन सहोपेत्य अत्र पश्चिमालये सते वर्तमानाय भगवतेऽनन्तासनाय प्रणतिं व्यधाम् कृतवानस्मि इति उक्तप्रकारेण निगद्य विभाति स्म अशोभत। स्म अतीतार्थे ॥ १४ ॥

मन्दोपकारिणी – अपीति ॥ अहं ततोऽपि पूर्वदिग्देवालयादपि। अमुना पूर्वालयस्थेन हरिणा सह उपेत्य आगत्य। अत्र पश्चिमदेवालये सते विद्यमानाय भगवते पूर्णैश्वर्यादिषड्गुणवते। 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरिता' इत्युक्तेः भगोऽस्यास्तीति भगवान् इति विग्रहः। हरये प्रणतिं नमस्कारं व्यधाम् कृतवान्। 'डु धाञ् धारणपोषणयोरित्यतो लुङ् परस्मैपदं अधाम् अधाव अधाम'। इति उक्तप्रकारेण निगद्य उक्त्वा शिशुः बालकः विभाति स्म अशोभत। स्म

अतीते। 'भा दीप्तौ लट् परस्मैपदं भाति भातः भान्ति'। कथंभूतः विस्मित-सभाजनचीर्णसभाजनः सभायां संसदि विद्यमानश्चासौ जनश्च सभाजनः विस्मितः आश्चर्ययुक्तश्चासौ सभाजनश्च विस्मितसभाजनः विस्मितसभाजनेन चीर्णं कृतं सभाजनं आनन्दनं सम्भावनमिति यावत् यस्य स तथोक्तः। 'आनन्दनसभाजने' इत्यमरः। सभास्थजनाः प्रष्टारं पितरं प्रति अस्पष्टाक्षरमधुरवचसा प्रत्युत्तरं दत्तवन्तं बालकं दृष्ट्वा विस्मिताः सन्तः तं सम्भावनेन आनन्दयामासुरिति भावः॥ १४॥

विरहितस्वजनं चरणप्रियं विविधभूतभयङ्करवर्त्मनि।
अयि कृपालय पालय बालकं लघुशुभस्य ममेत्यनमद् द्विजः॥१५॥

पदार्थदीपिकोद्बोधिका – विरहितेति॥ अयीत्यव्ययं प्रार्थने। कृपालय कृपामन्दिर। 'निकायनिलयालयाः' इत्यमरः। श्रीहरे! विरहिताः स्वजना यस्य तमपि। विविधा ये भूताः प्राणिनस्तैर्भयङ्करे वर्त्मनि मार्गे। चरणे सञ्चारे प्रियम्। लघु अल्पं शुभं भाग्यं यस्य तस्य मम बालकं पालय रक्ष। पाल रक्षणे लोट्। इति अभिधाय द्विजो भट्टोऽनमत्। श्रीमदनन्तासनं नमश्चकार॥ १५॥

मन्दोपकारिणी – विरहितेति॥ अयि कृपालय अयीति प्रार्थने। 'प्रार्थने त्वयि' इति। कृपायाः दयायाः आलय आश्रय हरे। विरहितस्वजनं विरहितः परित्यक्तः स्वजनः बन्धुजनः येन स तथोक्तः तं एकाकिनमित्यर्थः। विविधभूतभयङ्करवर्त्मनि विविधानि च तानि भूतानि तैः भयङ्करं च तत् वर्त्म मार्गश्च तस्मिन् विविधभूतभङ्करवर्त्मनि। चरणप्रियं चरणे सञ्चारे प्रियं प्रीतिमन्तं सञ्चरणस्वभावमिति यावत्। लघुशुभस्य लघु स्वल्पं शुभं पुण्यं यस्य स तथोक्तः तस्य मम बालकं पालय रक्ष 'पाल रक्षण इत्यतो लोट् परस्मैपदं पालय पालयतात् पालयतं पालयत'। इति उक्त्वा द्विजः मध्यगेहभट्टः हरिं अनमत् नमस्कृतवान्॥ १५॥

तमुपगृह्य सुतं सुतपोनिधिर्गृहमसौ गृहिणीसहितो ययौ।
उदयतीति हि बालदिवाकरे स्मितमभूत्सुजनाननवारिजम्॥१६॥

पदार्थदीपिकोद्बोधिका – तमिति॥ सु शोभनानि तपांसि तेषां निधिराश्रयः। असौ भट्टः तं सुतमुपगृह्य उपादाय गृहिणीसहितो जायासहितः सन् गृहं ययौ। बाल एव

दिवाकरः तस्मिन्। इति उक्तप्रकारेण। उदयति सति क्रमेणाभिव्यज्यमानसामर्थ्ये सति सुजनानामाननानि मुखान्येव वारिजं स्मितं विकसितं अभूत् हि॥ १६॥

मन्दोपकारिणी – तमिति॥ सुतपोनिधिः शोभनतपसां आश्रयः असौ द्विजः तं सुतं उपगृह्य आदाय। गृहिणीसहितः गृहिण्या भार्यया सहितः युक्तः सन्। 'नारी स्त्री गृहिणी गृहम्' इत्यमरः। गृहं स्वगेहं ययौ प्राप। बालदिवाकरे बाल एव दिवाकरः सूर्यः तस्मिन्। इति पूर्वोक्तप्रकारेण उदयति सति उत् प्रकाशं क्रमेण सामर्थ्याभिव्यक्तिं इति यावत्। अयति प्राप्नुवति सति 'उत्प्रकाशे वियोगे च' इति विश्वः। सुजनाननवारिजं सुजनानां आननमेव वारिजं कमलं स्मितं विकसितं अभूत्। सूर्ये प्रकाशमाने सति कमलं यथा विकासं प्राप्नोति तद्वत् क्रमेण पूर्वोक्तप्रकारेण बालसामर्थ्ये प्रकटिते सति सुजनमुखं प्रसन्नमभूत् इति भावः॥ १६॥

वरविमानगिरावपि चण्डिका शिशुमहो जननी तमलालयत्।
अपरथा परितुष्टमनाः कथं चिरमिहैष वसेद्विसहायकः॥ १७॥

पदार्थदीपिकोद्बोधिका – वरेति॥ पाजकक्षेत्रमध्ये वर्तमाने वरः श्रेष्ठो यो विमानगिरिः विमानाख्यपर्वतस्तस्मिन् वर्तमाना जननी माता दुर्गाया लक्ष्म्यात्मकत्वेन मुख्यप्राणमातृत्वादिति भावः। चण्डिका दुर्गापि तं शिशुमलालयत् अमानयत्। लल ईप्सायाम् लङ्। अपरथा तल्लालनाभावे विगतः सहायो यस्य स विसहायकः सहायरहित इत्यर्थः। एष इह भुवि परितुष्टं सन्तुष्टं मनो यस्य तादृशः सन् कथं चिरं बहुकाले वसेत्। स्वसहायभूतस्य रूप्यपीठपुरवासिनो हरेस्तत्राभावेऽपि स्वमातुर्दुर्गाया लालनातिशयादेव पाजकक्षेत्रे चिरमुवासेति भावः॥ १७॥

मन्दोपकारिणी – वरेति॥ वरविमानगिरौ वरश्चासौ विमानगिरिश्च वरविमानगिरिः तस्मिन्। पाजकक्षेत्रस्थविमाननाम्नि गिरौ पर्वते विद्यमाना जननी माता चण्डिकापि दुर्गापि तं शिशुं अलालयत् अखेलयत्। 'लल विलासे इत्यस्मात् धातोर्लङ् परस्मैपदं अलालयत् अलालयताम् अलालयन्'। अहो इदं सत्यं अव्ययानां अनेकार्थत्वात्। अपरथा तल्लालनाभावे विसहायकः सहायरहितः एषः बालकः इह वनभुवि परितुष्टमनाः

परितुष्टं मनो यस्य स तथोक्तः सन् चिरं बहुकालं कथं वसेत् वासं कुर्यात्। वस निवासे इत्यतो लिङ् परस्मैपदं वसेत् वसेतां वसेयुः'। न केवलं भगवान् रक्षति किन्तु दुर्गापि रक्षति इति भावः॥ १७॥

सकलशब्दमयी च सरस्वती सततमानमति स्वयमेव यम्।
द्विजवरोऽथ कदाचन मातृकाः किल सुतं परिचाययति स्म तम्॥१८॥

पदार्थदीपिकोद्बोधिका – सकलेति॥ 'अथ द्विजवरः सकलाः समस्ता ये शब्दास्तेषामभिमानिनी अखिलशब्दमयी सरस्वती च यं एनं वायुं स्वयमेव सततं सर्वदा आनमति सम्यक् नमति तं सुतं मातृका अक्षराणि 'मातृकाकरणे स्वरे। 'मातृवर्णसमाम्नायोपमातृषु' इति हेमचन्द्रः। कदाचन कस्मिंश्चिन्मुहूर्ते परिचाययति स्म किल ज्ञापयामास किल। चिञ् चयने लट्। किल शब्देनाक्षराभ्यासस्यापरमार्थतामाह। तथा च सरस्वतीनम्यस्यास्य न इदानीं मातृकापरिचयेन भाव्यमिति भावः॥ १८॥

मन्दोपकारिणी – सकलेति॥ अथ अक्षरस्वीकारयोग्यकालप्राप्त्यनन्तरं द्विजवरः ब्राह्मणश्रेष्ठः कदाचन शुभदिवसे तं सुतं बालकं मातृकाः अक्षराणि परिचाययति स्म किल ज्ञापितवान् किल। 'चायृ (चाय्) पूजानिशामनयोरित्यतो लट् परस्मैपदम्'। स्म अतीते। स्वयं धूलिषु अक्षराणि विलिख्य तत्प्रदर्शयित्वा शिशुहस्तेन लेखयित्वा बालकस्य अक्षरजातं सम्पादयामासेति भावः। किल इत्येतत् बालस्य अक्षरज्ञानस्य पूर्वमेव सिद्धत्वात् ज्ञापनस्य वैय्यर्थमाह। तत्कुतः सकलशब्दमयी सकलानां शब्दानां वर्णपदादीनां मयी अभिमानिनी सरस्वती यं वायुं स्वयमेव सततं आनमति सम्यक् नमति। वायुव्यतिरिक्ताः सर्वे विद्याप्राप्त्यर्थे सरस्वतीं प्रणम्य प्रसन्नीकुर्वन्ति सरस्वती स्वतः एव सर्वविद्याभिज्ञं वायुं स्वयमेव प्रणमति। अतः इदानीं मातृकापरिचये न तस्य प्रयोजनमिति भावः॥ १८॥

लिपिकुलं ननु तात गते दिने लिखितमेव पुनर्लिखितं कुतः।
इति निजप्रतिभागुणभावितं हरिपदस्य वचस्तमनन्दयत्॥ १९॥

पदार्थदीपिकोद्बोधिका – लिपिकुलमिति॥ ननु प्रश्ने। तात पितः! गते दिने अतीतदिने पूर्वेद्युरित्यर्थः। लिखितं लिपिकुलं अक्षरजातं पुनरद्यापि कुतः कस्मात्

लिखितम् इति इत्थं निजप्रतिभैव स्वाभाविकप्रज्ञैव गुणस्तेन भावितमुत्पादितं प्रतिभातिशयेनोक्तमिति यावत्। हरेः पदं नाम यस्य तस्य हरिवाचकवासुदेवनामवत इत्यर्थः। स्वपुत्रस्य वचः तं पितरं अनन्दयत् सन्तोषयामास॥ १९॥

मन्दोपकारिणी –लिपीति॥ ननुशब्दः आमन्त्रणे अनुनये वा 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। ननु तात हे पितः! गते अतीते दिने दिवसे लिखितमेव लिपिकुलं लिपीनां अक्षराणां कुलं समूहः पुनः अद्यापि अस्मिन् दिनेऽपि इति यावत् कुतः कस्मात् निमित्तात् लिखितं इति एवंप्रकारकं निजप्रतिभागुणभावितं निजा नित्या स्वाभाविकीति यावत्। 'स्वके नित्ये निजं त्रिषु' इत्यमरः। प्रतिभा ज्ञानं निजा च सा प्रतिभा च निजप्रतिभा तदाख्यश्चासौ गुणश्च निजप्रतिभागुणः तेन भावितं उत्पादितं उक्तम्। हरिपदस्य हरेः विष्णोः पदं नाम यस्य स तथोक्तः तस्य वचः वचनं तं अनन्दयत् सुखयामास। 'नदि समृद्धौ लङ् परस्मैपदम्॥ १९॥

शिशुरसौ प्रतिभाम्बुधिरित्यलं जनमनोवचनग्रहपीडना।
न भवतादिति तं विजनस्थले स्वतनयं समशिक्षयदेषकः॥ २०॥

पदार्थदीपिकोद्बोधिका – शिशुरिति॥ एष एव एषकः। स्वार्थे कप्रत्ययः। स्वतनयं स्वपुत्रम्। विगता जना यस्मिन् तादृशं यत् स्थलं तस्मिन् रहसीत्यर्थः। असौ शिशुः अलं सम्यक् प्रतिभया प्रज्ञया अम्बुधिरिव प्रतिभाम्बुधिः इति। मनांसि च वचनानि च जनानां मनोवचनानि तान्येव ग्रहः पिशाचस्तस्य पीडना। 'बालग्रहो ग्रहणनिर्बन्धनानुग्रहेषु च। रणोद्यमे पूतनादावादित्यादौ विधुन्तुद' इति हेमचन्द्रः। न भवतात् मा भूत् इति मत्वा समशिक्षयत् विद्याभ्यासं कारितवान्। शिक्ष विद्योपादने लङ्। यद्ययं स्वेन पाठितः स्यात्तदास्य पाण्डित्यं दृष्ट्वाऽयं प्रतिभाम्बुधिरिति जना वदेयुः ततश्चास्य किञ्चिदनिष्टं भवेत्तन्माभूदिति बुद्ध्या। तथा यदि प्रकटं पाठयेत्तदाऽस्य बुद्ध्यतिशयं दृष्ट्वा पूर्ववद्वदेयुस्तच्च मा भूदिति रहसि पाठयामासेति भावः॥ २०॥

मन्दोपकारिणी – शिशुरिति॥ एष एव एषकः। स्वार्थे कप्रत्ययः। पिता तं स्वतनयं स्वस्य आत्मनः पुत्रं विजनस्थले विजनं जनरहितं च तत् स्थलं च विजनस्थलं

तस्मिन् एकान्तप्रदेशे। 'विविक्तविजनच्छन्ननिःशलाकास्तथा रहः' इत्यमरः। समशिक्षयत् त्वया प्रौढिमप्रकाशनं न कार्यमिति अबोधयत्। 'शिक्ष विद्योपादाने इत्यतो लङ् परस्मैपदम्'। किं कृत्वा, असौ शिशुः अलं अत्यंतं प्रतिभाम्बुधिः प्रतिभायाः प्रज्ञायाः अम्बुधिः समुद्रः। इति एवं प्रकारेण जनमनोवचनग्रहपीडना मनांसि च वचनानि च मनोवचनानि जनानां मनोवचनानि तान्येव ग्रहः पिशाचविशेषः तेन पीडना पीडा शिशोः न भवतात् न भूयात् इति मत्वा इति शेषः। 'भू सत्तायां इत्यतो लोट् परस्मैपदं भवतु भवतात् भवतां भवन्तु' जनमनोनयनग्रहपीडनेति क्वचित् पाठः। तत्र. नयनग्रहशब्दस्य दृष्टिदोषः इत्यर्थः। बालकोच्छ्रयं असहमानजनानां मनसि वचने वा नयनयोर्वा काचन दोषबुद्धिः दृष्टिदोष भवेत् तेन काचन पीडा स्यात्सा मा भूदित्यभिप्रायेण अशिक्षयदिति भावः॥ २०॥

महवता स्वजनेन समीरितस्वजननीसहितेन कदाचन।
रुचिरवाचनयाऽर्चितवाक्श्रिया प्रतियये प्रभुणा घृतवल्यपि॥ २१॥

भावप्रकाशिका – घृतवल्लीत्यस्य 'नेयंपळ्ळी इत्यपभ्रष्टभाषा'॥ २१॥

पदार्थदीपिकोद्बोधिका – महवतेति॥ कदाचन। मह उत्सवोऽस्यास्तीति महवान् तेन। 'मह उद्भव उत्सवः' इत्यमरः। स्वजनेन स्वबन्धुजनेन समीरिता उत्सवार्थ-मागन्तव्यमिति प्रोक्ता या स्वजननी तया सहितः तेन। रुचिरा मनोहरा या वाचना पुस्तकवाचनं तया। अक्षराणां जवेन सकलपुस्तकवाचनशक्त्येति भावः। अर्चिता सर्वैः सम्भाविता वाक्श्रीः वचनसम्पद्यस्य तेन। प्रभुणा समर्थेन वासुदेवेन घृतवल्यपि 'घृतवल्ली' नामकदेशविशेषोऽपि प्रतियये प्राप्ता। या प्रापणे कर्मणि लिट्। घृतवल्लीत्यस्य 'नेयम्पळ्ळी' इत्यपभ्रष्टसंज्ञा॥ २१॥

मन्दोपकारिणी – महवतेति॥ कदाचन कस्मिंश्चित्काले। प्रभुणा समर्थेन वासुदेवेन घृतवल्यपि घृतवल्लिनामकग्रामविशेषोऽपि प्रतियये प्राप्ता। 'या प्रापणे इत्यतः कर्मणि लिट् आत्मनेपदं यये ययाते ययिरे'। कथम्भूतेन रुचिरवाचनया रुचिरा मनोहरा

'सुन्दरं रुचिरं चारु' इत्यमरः। अक्षरपरिचयवत्त्वेन विविधपुस्तकवाचकत्वशक्तिः रुचिरा च सा वाचना च रुचिरवाचना तया तन्निमित्तेनेति भावः। अर्चितवाक्श्रिया अर्चिता सर्वैः सम्भाविता वाक्श्रीः वचनसम्पत् यस्य स तथोक्तः तेन। अक्षरवाचकशक्तिनिमित्तेन सर्वैः पूजितेन इति भावः। पुनः कथम्भूतेन महवता महोऽस्यास्तीति महवान् उत्सववान् तेन विवाहाद्युत्सवकर्त्रेत्यर्थः। स्वजनेन स्वकीयजनेन समीरितस्वजननीसहितेन समीरिता आहूता च सा स्वजननी च तया सहितेन कदाचित् ग्रामान्तरे स्वमातृबन्धुगृहे विवाहे प्राप्ते तेन स्वमातरि आहूतायां तया सह स्वयं ग्रामान्तरं जगामेति भावः॥ २१॥

परिषदा नितरां परिवारितः शिवपदः किल धौतपटोद्भवः।
इह कथां कथयन् ददृशे ततः पृथुधिया पृथुकाकृतिनाऽमुना॥ २२॥

भावप्रकाशिका – धौतपटस्य 'मडिनाय' इत्यभ्रष्टभाषा।

पदार्थदीपिकोद्बोधिका – परिषदेति॥ इह घृतवल्यां कथां पुराणकथां कथयन् परिषदा सभया। 'सभा स्यात्परिषत्सदः' इति हलः। कथां शृण्वता जनसमूहेनेत्यर्थः। नितरां परिवारितः परिवृतः। शिव इति पदं नाम यस्य सः। धौतपटे धौतपटाख्यकुले उद्भव उत्पत्तिर्यस्य तादृशः अपभ्रष्टसञ्ज्ञायां 'मडिनाय' इति प्रसिद्धकुलोद्भव इत्यर्थः। कश्चिद्द्विजः। पृथुः पूर्णा धीर्ज्ञानं यस्य तेन। पृथुकस्य बालकस्य आकृतिः स्वरूपं यस्य तेन। 'पृथुकः शावकः शिशुः' इत्यमरः। अमुना वासुदेवनाम्ना मारुतिना वायु-पुत्रेण ददृशे दृष्टः॥ २२॥

मन्दोपकारिणी – परिषदेति॥ ततः घृतवल्लिग्रामगमनानन्तरम्। इह घृतवल्याम्। पृथुधिया पृथुः विशाला धीः प्रज्ञा यस्य स तथोक्तः तेन पृथुधिया। पृथुकाकृतिना पृथुकस्य शिशोः आकृतिः आकारो यस्य स तथोक्तः तेन पृथुकाकृतिना। 'पृथुकः शावकः शिशुः' इत्यमरः। अमुना वासुदेवेन कथां पुराणकथां कथयन् शिवपदः शिवः इति पदं नाम यस्य सः शिवपदः कश्चित् विप्रः। ददृशे दृष्टः किल। 'दृशिर् प्रेक्षणे इत्यतः कर्मणि लिट् आत्मनेपदं ददृशे ददृशाते ददृशिरे'। कथंभूतः परिषदा पुराणकथां शृण्वन्त्या सभया जनसमूहेनेति यावत्। 'समज्या परिषद्गोष्ठी सभा समिति संसदः' इत्यमरः। नितरां

अतिशयेन अविरलतया इति यावत्। परिवारितः समन्तात् चक्राकारेणाश्रितः। पुनः कथंभूतः धौतपटोद्भवः धौतपटे तन्नामके कुले उद्भवः उत्पत्तिः यस्य स तथोक्तः। 'जनिरुत्पत्तिरुद्भवः' इत्यमरः॥ २२॥

इदमुवाच विचारविचक्षणः शुचि वचः शनकैः स जनान्तरे।
अपरथा कथितं कथक त्वया ननु मतान्महतामिति सस्मितम् ॥ २३॥

पदार्थदीपिकोद्बोधिका – इदमिति॥ विचारविचक्षणः पदार्थानां पदानां च वाच्यवाचकभावविचारकुशलः। स जनान्तरे जनमध्ये। हे कथक! पौराणिक! त्वया महतां व्यासशुकादीनां मतात् सिद्धान्तात् अपरथा अन्यथा कथितं ननु। शुचि शुद्धं शब्दसौष्ठवोपेतं इतीदं वचो वाक्यं सस्मितं स्मितसहितं यथा भवति तथा शनकैरुवाच॥ २३॥

मन्दोपकारिणी – इदमिति॥ विचारविचक्षणः पदार्थानां पदानां वाच्यवाचकत्वविचारे कुशलः। सः बालकः जनान्तरे जनानां पुराणकथाश्रोतृणां अन्तरे मध्ये सस्मितं मन्दहाससहितं यथा भवति तथा मन्दं हसन्निति भावः। इदं वक्ष्यमाणं शुचिवचः शुचि शुद्धं च तत् वचः वचनं शनकैः मन्दं उवाच अब्रवीत्। 'वच परिभाषणे इत्यतो लिट् परस्मैपदं उवाच ऊचतुः ऊचुः'। इदं किं हे कथक! पुराणवक्त्रा त्वया अत्र किञ्चित् महतां व्यासशुकादीनां मतात् सिद्धान्तात् अपरथा अन्यथा कथितं ननु। त्वदुक्तं महत्सिद्धान्तविरुद्धं' इति एवंप्रकारकं वचः इत्यन्वयः॥ २३॥

अगणयन्न शिवं जनता तदा सवचने वसुदेवसुताह्वये।
मुखरमिच्छति को मृगधूर्तकं प्रकृतहुंकृतसिंहशिशौ सति ॥ २४॥

पदार्थदीपिकोद्बोधिका – अगणयन्निति॥ वसुदेवसुतस्य श्रीकृष्णस्य आह्वयो नाम यस्य तस्मिन् वासुदेवनामक इत्यर्थः। यद्वा वसुदेवसुत इति वासुदेव इत्याह्वयो यस्य तस्मिन् सवचने सति वचनयुक्ते सति एवं वदति सतीति यावत्। जनता जनसमूहः। शिवं शिवनामकं पौराणिकं न अगणयत् न सम्भावयामास। गण सङ्ख्याने लङ्। तथा हि प्रकृतमुपक्रान्तं हुङ्कृतं हुङ्कारो येन तस्मिन् सिंहशिशौ सति मुखरं क्रोशन्तं मृगधूर्तकं सृगालं को विवेकी इच्छति सम्भावयितुमिच्छति। 'गोमायुर्मृगधूर्तकः' इत्यमरः॥ २४॥

मन्दोपकारिणी – अगणयदिति ॥ तदा पुराणकथनकाले। वसुदेवसुताह्वये वसुदेवस्य यादवस्य सुतः श्रीकृष्णः तस्य आह्वयः वासुदेव इत्याख्या यस्य स तथोक्तः तस्मिन् वसुदेवसुताह्वये। 'अथाह्वयः आख्याह्वे अभिधानं च' इत्यमरः। सवचने वचनेन सहिते एवं वदति सतीति यावत्। जनता जनसमूहः शिवं शिवनामकं भट्टं न अगणयत् न लक्षयामास। 'गण सङ्ख्याने इत्यतो लङ् परस्मैपदं अगणयत् अगणयताम् अगणयन्'। तथा हि। प्रकृतहुङ्कृतसिंहशिशौ प्रकृतं उपकृतं हुङ्कृतं हुङ्कारो येन स तथोक्तः सिंहस्य शिशुः प्रकृतहुङ्कृतश्चासौ सिंहशिशुश्च तस्मिन् गम्भीरहुङ्कारं कृतवति सिंहशिशौ विद्यमाने च सति। मुखरं क्रोशन्तं शब्दं कुर्वन्तं इति यावत् मृगधूर्तकं सृगालं कः विवेकीपुरुषः इच्छति सम्भावयितुमिच्छति। न कोऽपीत्यर्थः। 'शिवा भूरिमायगोमायुमृगधूर्तकाः। सृगालवश्चकक्रोष्टुफेरुफेरवजम्बुकाः' इत्यमरः ॥ २४ ॥

अथ कथां कथयेति तदा जने गदितवत्युचितार्थमुदाहरत्।
स समलाल्यत विस्मयिभिर्नरैरपि सुरैर्विजयाङ्कुरपूजकैः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ पक्षान्तरे कथकोदितवाक्यार्थो महतामभिमतो न चेदिति यावत्। तर्हि कथं महतामभिमतार्थः कथं कथय त्वं ब्रूहि। कथ वाक्यप्रबन्धे लोट्। इति जने महाजने गदितवति सति उचितार्थं कथकेनान्यथोक्तस्य वाक्यस्योचितमर्थमुदाहरदुवाच। तदा स वासुदेवः विस्मयिभिर्विस्मयशीलैः नरैः। विजयस्य योऽङ्कुरस्तस्य पूजकैः सुरैरपि समलाल्यत अमान्यत। लल ईप्सायाम् कर्मणि लङ् ॥ २५ ॥

मन्दोपकारिणी – अतेति ॥ पक्षान्तरे अथशब्दः। अथ कथकपक्षो न चेत् तदा तर्हि महत्सिद्धान्ताविरुद्धां कथां त्वं कथय ब्रूहि। कथ वाक्यप्रबन्धे इति धातोः लोट् परस्मैपदं कथय कथयतं कथयत'। जने श्रोतृजने। इति गदितवति सति सः वासुदेवः उचितार्थं कथकोक्तार्थवाक्यस्य उचितं योग्यं महत्संमतमिति यावत्, अर्थं अभिधेयं 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। उदाहरत् अकथयत्। उत्, आङ् पूर्वात् हृञ् हरण इति धातोः लङ् परस्मैपदं उदाहरत् उदाहरतां उदाहरन्'। सः वासुदेवः विस्मयिभिः विस्मयः आश्चर्यं एषां अस्तीति विस्मयिनः तैः आश्चर्यं कुर्वद्भिः नरैः परिषज्जनैः। विजयाङ्कुरपूजकैः विजयस्य उत्कर्षस्य अङ्कुरं आरम्भं पूजयन्तीति

अनुमोदयन्तीति विजयाङ्कुरपूजकाः तैः। सुरैरपि समलाल्यत सत्कृतः 'लल ईप्सायामित्यतः कर्मणि लङ् आत्मनेपदं अलाल्यत अलाल्येतां अलाल्यन्त' ॥ २५ ॥

स जननीसहितो जनकं गृहे प्रगतवांस्तमुदन्तमवेदयत्।
निगद तात शिवः कथकः स किं वितथगीरथवाऽहमितीरयन् ॥ २६ ॥

पदार्थदीपिकायां – स इति ॥ जननीसहितः प्रगतवान् गृहं गतः स बालकः गृहे स्वमन्दिरे वर्तमानं जनकं पितरं प्रति हे तात! पितः! निगद त्वमेव एतद्वद। गद व्यक्तायां वाचि लोट्। कथकः पौराणिकः स शिवः वितथगीः किं? वितथा अयथार्था गीः वाक् यस्य तादृशः किं? अथ न चेत् अहं वा वितथगीः अयथार्थवादी इतीरयन् सन् तं घृतवल्यां प्रवृत्तमुदन्तं वृत्तान्तं अवेदयत् ज्ञापयामास। विद ज्ञाने लङ्॥ २६ ॥

मन्दोपकारिणी – स इति ॥ जननीसहितः जनन्या मात्रा सहितः युक्तः। प्रगतवान् गृहमागतः सः वासुदेवः गृहे स्वमन्दिरे वर्तमानं जनकं पितरं। तं घृतवल्यां प्रवृत्तं उदन्तं वृत्तान्तं 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः। अवेदयत् ज्ञापितवान्। 'विद ज्ञान इत्यतो लङ् परस्मैपदम्'। हे तात! जनक! कथकः पुराणवक्ता शिवः शिवनामा सः द्विजः वितथगीः किं वितथा अनृता 'वितथं त्वनृतं वचः' इत्यमरः गीः वाक् यस्य स तथोक्तः अयथार्थवादी किं ? अथ स न चेत्। अहं वा वितथगीः किं ? त्वं सत्यं निगद ब्रूहि। 'गद व्यक्तायां वाचीत्यतो लोट् परस्मैपदं गद गदतात् गदतं गदत'। इति एवं ईरयन् पृच्छन् अभूत् इति शेषः। घृतवल्लीजातवृत्तान्तं उक्त्वा 'तदुक्तं वा मदुक्तं वा सत्यं' त्वं वद इति पितरं पृष्टवान् इति भावः ॥ २६ ॥

ननु सुतावितथं कथितं त्वयेत्यमुमुदीर्य सविस्मयमस्मरत्।
प्रकृतितः कृतिता खलु मे शिशोर्मदधिनाथदयोदयजेत्यसौ ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – नन्विति ॥ असौ भट्टः हे सुत! त्वया वितथम् अयथार्थं न भवति इति अवितथं सत्यमित्यर्थः। तद्वाक्यस्याभिमतार्थ इति यावत्। कथितं ननु इति अमुं पुत्रमुदीर्य सविस्मयं विस्मयसहितं यथा भवति तथा। मे मम शिशोः प्रकृतितः स्वभावतः कृतिता चतुरता ममाधिनाथः स्वामी रजतपीठवासी श्रीमदनन्तासनस्तस्य

दयायाः उदयोऽभिव्यक्तिः तस्माज्जाता मदधिनाथदयोदयजा इत्यस्मरत्। स्मृ चिन्तायां लङ्॥ २७॥

मन्दोपकारिणी – नन्विति॥ असौ पृष्टः पिता हे सुत! त्वया अवितथं यथार्थं कथितं ननु उक्तं हि। इति इत्थं अमुं सुतं उक्त्वा सविस्मयं विस्मयेन आश्चर्येण सहितं यथा भवति तथा। इति एवं प्रकारेण अस्मरत् अनुसन्दधे। 'स्मृ चिन्तायां लङ् परस्मैपदं अस्मरत् अस्मरताम् अस्मरन्'। कथं, मे मम शिशोः तनयस्य प्रकृतितः स्वभावतः कृतिता कृतिनः भावः कृतिता विद्वत्ता। 'धीमान् सूरिः कृती कृष्टिः' इत्यमरः। मदधिनाथदयोदयजा मम अधिनाथः स्वामी रजतपीठपुरवासी अनन्तेश्वरः तस्य दयायाः कृपायाः उदयात् प्रादुर्भावात् जायत इति मदधिनाथदयोदयजा खलु निश्चयः इत्यस्मरत् इत्यन्वयः। मच्छिशोः अनन्तेश्वरदययैव जातत्वात् पाण्डित्यमपि तद्दययैव जातं कारणान्तरादर्शनात् इति अस्मरत् इति भावः॥ २७॥

कथयतां प्रथमे कथयत्यलं स्वजनके जनसङ्घवृते कथाम्।
सकललोकमनोनयनोत्सवश्चतुरधीः स कदाचिदवाचयत्॥ २८॥

पदार्थदीपिकोद्बोधिका – कथयतामिति॥ कदाचित् कथयतां पौराणिकानां प्रथमे प्रधाने। 'प्रथमः स्यात्प्रधानाद्यो'रिति हेमचन्द्रः। जनानां श्रोतॄणां जनानां सङ्घेन समूहेन वृते परिवृते स्वजनके, कथां पौराणिकभगवत्कथां कथयति सति सकललोकानां सकलजनानां मनांसि च नयनानि च तेषां उत्सव इव उत्सवो हृद्यः। चतुरा निपुणा धीर्यस्य स वासुदेवः अलं सम्यग् अवाचयत् वाचयामास॥ २८॥

मन्दोपकारिणी – कथयतामिति॥ सकललोकमनोनयनोत्सवः सकलाश्च ते लोकाश्च सकललोकाः सकललोकानां मनसां नयनानां च उत्सवः सुखकरः। चतुरधीः चतुरा निपुणा धीः बुद्धिः यस्य स तथोक्तः सः वासुदेवः। कदाचित् कस्मिंश्चिद्दिवसे कथयतां पुराणप्रवक्तॄणां प्रथमे श्रेष्ठे। जनसङ्घवृते जनानां सङ्घेन समूहेन वृते परिवारिते। 'गणौघसङ्घसङ्घातम्' इति हलायुधः। स्वजनके स्वस्य पितरि मध्यगेहे कथां पुराणकथां अलं सम्यक् कथयति सति वर्णयति सति अवाचयत्। पित्रा पुराणश्लोकार्थं

वाचयामास। 'वच परिभाषणे इत्यतो लङ् परस्मैपदं'। पित्रा पुराणकथनसमये कस्मिंश्चित्पदे अव्याख्याते सति पुत्रेण एतत् श्लोकार्थं पुनः कथय इत्युक्ते पिता श्लोकार्थं अक्रथयत् इति भावः॥ २८॥

विविधशाखिपदार्थनिवेदने लिकुचनाम्नि तदाऽनुदितार्थके।
किमिति तात तदर्थमवर्णयन् कथयसीति शनैरयमब्रवीत्॥ २९॥

पदार्थदीपिकोद्बोधिका – विविधेति॥ तदा पुराणकथनावसरे विविधानां शाखिनां वृक्षाणां पदानां वाचकशब्दानां अर्थानां वाच्यार्थानां निवेदने ज्ञापने प्रस्तुते सतीति शेषः। लिकुचनाम्नि लिकुचाख्यपदे अनुदितोऽनुक्तः अर्थो वाच्यार्थो यस्य तस्मिन् सति अयं वाचको बालकः हे तात! तस्य लिकुचपदस्यार्थं अवर्णयन् अकथयन् त्वं किमिति कथयसि कथाः वदसि। कथ वाक्यप्रबन्धे लट्। इति शनैरब्रवीत्। ब्रूञ् व्यक्तायां वाचि लङ्॥ २९॥

मन्दोपकारिणी – विविधेति॥ तदा पुराणश्लोकार्थवाचनावसरे विविधशाखि-पदार्थनिवेदने विविधशाखिनां पदानि वाचकानि नामानि तेषां अर्थस्य अभिधेयस्य निवेदने ज्ञापने 'प्रसक्ते सति' इति शेषः। लिकुचनाम्नि लिकुचाख्यं च तत् नाम पदं च लिकुचनाम तस्मिन् लिकुचनाम्नि पदे। अनुदितार्थके अनुदितः अनुक्तः अर्थः अभिधेयो यस्य तत् तस्मिन् सति। अयं बालकः हे तात! तदर्थं तस्य लिकुचपदस्य अर्थं अभिधेयं अवर्णयन् अकथयन् किमिति कुतो निमित्तात् कथां कथयसीति शनैः अब्रवीत्॥ २९॥

अवदतीति पितर्यपि चोदिते प्रतिबुभुत्सुषु तत्र जनेष्वपि।
अयमुदीर्य तदर्थमवाप्तवान् परिषदो ह्यसमानसुमाननाम्॥ ३०॥

पदार्थदीपिकोद्बोधिका – अवदतीति॥ इति एवं चोदिते लिकुचपदार्थवर्णनाय प्रेरितेऽपि पितरि अवदति सति तदर्थमनुक्तवति तत्र सभायां जनेष्वपि प्रतिबुभुत्सुषु प्रतिबोद्धुमिच्छत्सु सत्सु अयं वासुदेवः तदर्थं लिकुचपदार्थं उदीर्य परिषदः सभायाः असमाना असदृशी या सुमानना पूजा तां अवाप्तवान् हि॥ ३०॥

मन्दोपकारिणी – अवदतीति ॥ इति पूर्वोक्तप्रकारेण चोदितेऽपि लिकुचशब्दार्थ-वर्णनाय प्रेरितेऽपि पितरि अवदति सति ज्ञानाभावेन लिकुचशब्दार्थं अकथयति सति। तत्र सभायां जनेष्वपि श्रोतृजनेष्वपि प्रतिबुभुत्सुषु लिकुचशब्दार्थं प्रतिबोद्धुमिच्छत्सु सत्सु अयं वासुदेवः तदर्थं तस्य लिकुचपदस्यार्थं अभिधेयं उदीर्य उक्त्वा परिषदः सभायाः जनसमूहात् असमानसुमाननां असमाना असदृशा च सा सुमानना शोभनपूजा च असमानसुमानना तां अवाप्तवान् हि ॥ ३० ॥

बहुविधैश्चरितैरिति चारुभिः सकललोककुतूहलकारिणम् ।
द्विजवरेण वयस्युचिते स्थितं तमुपनेतुमनेन दधे मनः ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – बहुविधैरिति ॥ अनेन द्विजवरेण भट्टेन इतीत्थं बह्वयो विधाः प्रकारा येषां तैः। चरितैः चरित्रैः। सकललोकानां सकलजनानां कुतूहलमाश्चर्यं कर्तुं शीलमस्यास्तीति तम्। उचिते वयसि उपनयनयोग्ये वयसि स्थितं , गर्भाष्टमं जन्माष्टमं वा संवत्सरं प्राप्तमिति भावः। तं स्वपुत्रं उपनेतुं उपनीतं कर्तुं मनो दधे धृतम् ॥ ३१ ॥

मन्दोपकारिणी – बहुविधैरिति ॥ द्विजवरेण द्विजेषु वरेण उत्तमेन अनेन मध्यगेहभट्टेन। तं सुतं उपनेतुं उपनयनं कर्तुं मनः अन्तःकरणं दधे। 'डु धाञ् धारणपोषणयोः इत्यतः कर्मणि लिडात्मनेपदं दधे दधाते दधिरे'। सुतस्य उपनयनं कर्तुं मतिं चकारेति भावः। कथंभूतं, इति पूर्वोक्तप्रकारेण बहुविधैः बह्वचः विधाः प्रकाराः एषां तानि बहुविधानि तैः। 'विधाविधौ प्रकारे च' इत्यमरः। चारुभिः मनोहरैः चरितैः व्यापारैः क्रीडाभिरिति यावत्। सकललोककुतूहलकारिणं सकलानां लोकानां जनानां कुतूहलं आश्चर्यं करोतीति सकललोककुतूहलकारी तम्। पुनः कथंभूतं उचिते उपनयनयोग्यपञ्चमाष्टमादिसंवत्सररूपे वयसि बाल्यवयसि 'खगबाल्यादिनोर्वयः इत्यमरः। स्थितं विद्यमानम्। पञ्चमाष्टमाद्यन्यतरसंवत्सरोपेतं इति यावत् ॥ ३१ ॥

समुचितग्रहयोगगुणान्वितं समवधार्य मुहूर्तमदूषणम् ।
प्रणयबन्धुरबान्धववानसौ द्विजकुलाकुलमुत्सवमातनोत् ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – समुचितेति ॥ प्रणयेन स्वकृतस्नेहेन। बन्धुराः आत्मनि स्नेहबन्धयुक्ता यद्वा बन्धुरा रम्या नम्या वा। 'बन्धूरबन्धुरौ रम्ये नम्ये हंसे तु बन्धुर' इति रभसः। ये बान्धवा शरीरसम्बन्धिनस्तेऽस्य सन्तीति तथोक्तः। असौ भट्टः समुचितः उपनयनोचितो यो ग्रहयोग आदित्यादीनां योगः स एव गुणस्तेनान्वितस्तं अष्टमशुद्ध्यादि-गुणयुक्तमित्यर्थः। न विद्यते दूषणमितरदोषो यस्मिन् तं मुहूर्तं समवधार्य निश्चित्य द्विजानां कुलेनाकुलं निबिडं उत्सवं उपनयनोत्सवं आतनोत् चकार। तनु करणे लङ्॥ ३२ ॥

मन्दोपकारिणी – समुचितेति ॥ प्रणयबन्धुरबान्धववान् प्रणयेन स्नेहेन बन्धुराः नम्राः स्ववशाः। 'बन्धुरं सुन्दरे नम्रः' इत्यमरः। बान्धवाः सगोत्राः अस्य सन्तीति प्रणयबन्धुरबान्धववान्। असौ मध्यगेहः समुचितग्रहयोगगुणान्वितं ग्रहाणां बृहस्पत्यादि-नवग्रहाणां योगः सम्मेलनम्। उपनयनस्य सं सम्यक्, उचितः अनुकूलश्चासौ ग्रहयोगश्च समुचितग्रहयोगः समुचितग्रहयोगश्चासौ गुणश्च समुचितग्रहयोगगुणः तेन अन्वितं युक्तम्। अदूषणं न विद्यन्ते दूषणानि उपनयनदोषाः यस्य स तथोक्तः तं मुहूर्तं वृषभादिलग्नं समवधार्य निश्चित्य। द्विजकुलाकुलं द्विजानां विप्राणां कुलेन आकुलं सङ्कीर्णं परिपूर्णमिति यावत्। उत्सवं उपनयनरूपं मङ्गलम्। 'मह उद्धव उत्सवः' इत्यमरः। आतनोत् कृतवान्। 'तनु विस्तार' इत्यतो लङ् परस्मैपदम्॥ ३२ ॥

विविधवेदतया विजिहीर्षवो वदनरङ्गपदेऽस्य चिराय याः।
सुरवरप्रमदा अपि सप्रिया अभिननन्दुरहो वियतो महम् ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – विविधेति ॥ याः सुरवरप्रमदा देवश्रेष्ठस्त्रियः। चिराय अस्य वासुदेवस्य वदनमेव मुखमेव रङ्गपदं नर्तनस्थानं तस्मिन्। 'रङ्गः स्यान्नर्तनस्थानं' इति हलः। विविधानां वेदानां भावस्तया नानावेदात्मकत्वेनेत्यर्थः। विजिहीर्षवः विहर्तुमिच्छवः। प्रियैः स्वभर्तृभिः सहिताः सप्रियास्ता सुरवरप्रमदाः वेदाभिमानिन्यः श्रीः, भारती, वारुणी, पार्वतीप्रभृतयो वेदाङ्गनाः। वियत आकाशात्। 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः। तत्र स्थित्वेति यावत्। महमुत्सवं अभिननन्दुः। अहो आश्चर्यम्। इयन्तं कालमस्यानुपनीतत्वेन वेदोच्चारणायोगादस्य वदनरङ्गे वेदतया विहर्तुमशक्यत्वादुपनयनं

प्रतीक्ष्य स्थिता वेदाभिमानिन्यो देवाङ्गना इदानीमुपनयनोत्सवं ज्ञात्वा आकाशे विमानारूढाः सत्यः तदुत्सवमभिननन्दुरिति भावः ॥ ३३ ॥

मन्दोपकारिणी – विविधेति ॥ याः सुरवरप्रमदाः सुरवराणां देवश्रेष्ठानां प्रमदाः स्त्रियः । 'प्रमदा भामिनी कान्ता 'इत्यमरः । वेदाभिमानिन्यो देवस्त्रियः इति यावत् । चिराय बहुकालं अस्य वासुदेवस्य वदनरङ्गपदे वदनं वक्त्रमेव रङ्गपदं नर्तनस्थानं तस्मिन् । विविधवेदतया विविधाः अनेकप्रकाराश्च ते वेदाः श्रुतयश्च विविधवेदाः । विविधवेदानां भावो विविधवेदता तया विविधवेदस्वरूपेण इत्यर्थः । विजिहीर्षवः विहर्तुं क्रीडितुं इच्छावत्यः अभूवन् । ताः देवाङ्गनाः सप्रियाः प्रियैः स्वस्वभतृभिः सहिताः । 'धवः प्रियः पतिर्भर्ता' इत्यमरः । वियतः आकाशात् महम् उपनयनोत्सवं अभिननन्दुः सन्तुतुषुः । 'टु नदि समृद्धौ लिट् परस्मैपदं ननन्द ननन्दतुः ननन्दुः' । अहो प्रसिद्धम् । अस्य अनुपनीतस्य वदने क्रीडितुं अशक्यत्वात् उपनयनं प्रतीक्षन्त्यो वेदाभिमानिन्यो देवाङ्गनाः तं उत्सवं दृष्ट्वा सन्तुतुषुः इति भावः ॥ ३३ ॥

विहितसाधनसाधितसत्क्रियोज्ज्वलनमुज्ज्वलधीर्ज्वलयन्नयम् ।
उपनिनाय सुतं समलङ्कृतं कुशलिनं कुशलीकृतशीर्षकम् ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – विहितेति ॥ विहितानि उपनयनकर्मणि वेदविहितानि यानि साधनानि उपकरणानि तैः साधिता प्रवृत्ता सत्क्रिया सत्कर्म येन स । ज्वलनमग्निं उज्वलयन् स्वयं आहुतिक्रियां कुर्वन् । उज्वला निर्मला धीश्चित्तं यस्य सोऽयं भट्टः । सुकुमारकं कोमलरूपं, समलंकृतमिति पाठे सम्यगलंकृतमित्यर्थः । कुशलं क्षेममस्यास्तीति तं रोगादिरहितमित्यर्थः । अकुशलं कुशलं सम्पद्यमानं कृतं कुशलीकृतं क्षुरकर्मणा भद्रीकृतं शीर्षकं मस्तकं यस्य तं सुतं उपनिनाय उपनीतमकरोत् ॥ ३४ ॥

मन्दोपकारिणी – विहितेति ॥ विहितसाधनसाधितसत्क्रियः विहितानि उपनयन-कर्माणि निर्दिष्टानि च तानि साधनानि च तैः साधिता निष्पन्ना सती निर्दुष्टा अङ्गलोपरहिता क्रिया कर्म यस्य सः विहितसाधनसाधितसत्क्रियः । ज्वलनं अग्निं 'ज्वलनो हव्यवाहनः' इत्यमरः । ज्वलयन् स्वयं जुह्वन् । उज्ज्वलधीः उज्ज्वला निर्मला धीः ज्ञानं

यस्य स तथोक्तः। अयं मध्यगेहः कुशलिनं कुशलं क्षेमं पुण्यं वा अस्यास्तीति कुशली तं स्वस्थं पुण्यवन्तं वा। 'पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु' इत्यमरः। कुशलीकृत-शीर्षकं कुशलीकृतं मुण्डितं शीर्षकं शिरः यस्य स तथोक्तः तम्। 'उत्तमाङ्गं शिरः शीर्षं' इत्यमरः। समलङ्कृतं अभ्यङ्गहरिद्राकुङ्कुमादिना कुण्डलाङ्गुलीयकङ्कणकांच्यादिना च भूषितं सुतं उपनिनाय उपनीतमकरोत्। 'नी प्रापणे इत्यतो लिट् परस्मैपदम्॥ ३४॥

परिचराग्निगुरू चरितव्रतः सुचरणः पठ साधु सदागमान्।
इति गुरोस्त्रिजगद्गुरुशिक्षणे स्फुटमहासि सुरैः कृतसाक्षिभिः॥ ३५॥

भावप्रकाशिका – आदित्यचन्द्रादयो धर्मसाक्षिणः॥ ३५॥

पदार्थदीपिकोद्बोधिका – परिचरेति॥ सु शोभनं चरणमाचारो यस्य सः तथा सन् अग्निश्च गुरुश्च तौ परिचर शुश्रूषस्व। चरितं चीर्णं व्रतं ब्रह्मचर्यव्रतं येन तादृशः सन् सदागमान् निर्दोषागमान् वेदादीन् इत्यर्थः। साधु सम्यग् यथा भवति तथा पठ। पठ पठने लोट्। गुरोः पितुः। त्रीणि च तानि जगन्ति च तेषां गुरोर्वाय्ववतारत्वेनाचार्यभूतस्वपुत्रस्य शिक्षणे शिक्षायां कृते सति, कृते सर्वैः क्रियमाणकर्मणि। नपुंसके भावे क्त इति क्तः। साक्षिणः साक्षिभूतास्तैः सुरैः। 'आदित्यचन्द्रावनलानिलौ च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्' इति प्रमितकर्मसाक्षिभिः सुरैरित्यर्थः। स्फुटं सम्यग् अहासि हासः कृतः। हसे हसने कर्मणि लुङ्॥ ३५॥

मन्दोपकारिणी – परिचरेति॥ हे बालक त्वं, सुचरणः शोभनं चरण आचारो यस्य सः सुचरणः सदाचारः सन्। अग्निगुरू अग्निश्च गुरुश्च तौ परिचर शुश्रूषस्व। 'परिपूर्वात् चर गतिभक्षणयोः इति धातोः लोट् परस्मैपदं 'चर चरतं चरत'। सायंप्रातरग्निकार्यं कुरु गुर्वधीनश्च त्वं भव इति भावः। चरितव्रतः चरितं अनुष्ठितं व्रतं ब्रह्मचर्यादिनियमः येन स तथोक्तः सन्। साधु सम्यक् अध्ययननियमपूर्वकं यथा भवति तथा। सदागमान् सन्तः निर्दोषाश्च ते आगमाः वेदादिशास्त्राणि च सदागमाः तान्। 'आगमस्त्वागतौ शास्त्रे' इत्यभिधानम्। पठ अधीष्व 'पठ व्यक्तायां वाचि इत्यतो लोट् परस्मैपदम्'। इति एवं प्रकारेण गुरोः पितुः कर्तरि षष्ठी। त्रिजगद्गुरुशिक्षणे त्रीणि च तानि जगन्ति च त्रिजगतां गुरुः शिक्षकः त्रिजगद्गुरुः वायुनन्दनः तस्य शिक्षणे शिक्षायां कृते

सति। कृतसाक्षिभिः कृतं भावे निष्ठा। कृते सर्वैः क्रियमाणे कर्मणि साक्षिभिः साक्षिभूतैः सुरैः मनुष्यकर्तृककर्माणि पश्यद्भिः देवैः इत्यर्थः। स्फुटं सम्यक् अहासि अपहसितम्। 'हस हसने इत्यतो भावे लुङात्मनेपदम्'। सर्वशिक्षकवायुपुत्रवासुदेवस्य पित्रा शिक्षणे कृते सति मनुष्यैः क्रियमाणकर्मसाक्षिणो देवाः जगद्गुरुः क स्वेन तस्य शिक्षाकरणं क इति अपहासं चक्रुः इति भावः। कर्मसाक्षिणो देवास्तु 'आदित्यचन्द्रावनिलोऽनलश्चद्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्' इति ॥ ३५ ॥

जितकुमारगुणं सुकुमारकं निजकुमारमवेक्ष्य निरन्तरम्।
समुचिताचरणे चतुरं स्वतः क्षितिसुरो मुदमायत शिक्षयन्॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – जितेति॥ जिताः कुमारगुणा स्कन्दगुणा ब्रह्मचर्यादयो येन तं सुकुमारकं सुकोमलं निजकुमारं आत्मबालम्। 'कुमारः स्याद्वुहे बाल' इति वैजयन्ती। शिक्षयन् शौचाचमनसन्ध्यावन्दनादिकर्मसु शिक्षयन्। क्षितिसुरो भूसुरः स्वतः शिक्षामनपेक्ष्य निरन्तरं सर्वदा समुचिताचरणे स्ववर्णाश्रमोचिताचारे चतुरं कुशलं अवेक्ष्य मुदं सन्तोषं आयत अगमत्। अय गतौ लङ्॥ ३६ ॥

मन्दोपकारिणी – जितेति॥ जितकुमारगुणं जितः तिरस्कृतः कुमारस्य स्कन्दस्य गुणः ब्रह्मचर्यं येन स तथोक्तः तम्। 'कुमारः क्रौञ्चदारणः' इत्यमरः। सुकुमारकं कोमलम्। निजकुमारं निजः आत्मीयः कुमारः नन्दनश्च। 'निज आत्मीयनित्ययोः' इति विश्वः। शिक्षयन् शौचाचारसन्ध्यावन्दनादिकर्मसु नियोजयन्। क्षितिसुरः भूसुरः मध्यगेहः स्वतः अन्यशिक्षां अनवेक्ष्यैव निरन्तरं प्रतिदिनं समुचिताचरणे समुचितस्य वर्णाश्रमयोग्यस्य कर्मणः आचरणे अनुष्ठानविषये चतुरं दक्षं अवेक्ष्य दृष्ट्वा मुदं सन्तोषं आयत अगमत्। 'अय पय गतौ इत्यतो लङात्मनेपदं आयत आयेतां आयन्त'॥ ३६ ॥

सपटखण्डमकिञ्चनवत् क्वचित् स्वविभवानुचितं चरणादिकम्।
भुवनभर्तुरहो स्वनिगूहनं सुरसभासु कुतूहलमातनोत्॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – सपटखण्डमिति॥ क्वचित्काले अकिञ्चनवत् दरिद्रवत् पटखण्डेन पटैकदेशेन सहितं यथा भवति तथा सपटखण्डम्। स्वस्य विभवाः सम्पदस्तेषां

अनुचितं अयोग्यम् । चरणं सञ्चार आदिर्यस्य तत् । मूलरूपेण स्वलोके सर्वाधीश्वरत्वे-नावास्थितस्यापीदानीं इतस्ततः कार्यवशात्सञ्चरणादिकमित्यर्थः । भुवनभर्तुः सर्वलोकनाथस्य स्वनिगूहनं स्वस्याच्छादनं स्वविभवादिनिगूहनमित्यर्थः । सुरसभासु कुतूहलं कौतुकमातनोत् । तनु करणे लङ् । अहो आश्चर्यम् ॥ ३७ ॥

मन्दोपकारिणी – सपटेति ॥ अकिञ्चनवत् न विद्यते किञ्चन किमपि द्रव्यं यस्य सः अकिञ्चनः दरिद्रः । स इव । सपटखण्डम् पटस्य वस्त्रस्य खण्डः छिन्नैकदेशः पटखण्डः तेन सहितं यथा भवति तथा । स्वविभवानुचितं स्वस्य स्वकीयस्य विभवस्य सम्पदः अनुचितं अननुसारि । क्वचित् कस्मिंश्चित् प्रदेशे । चरणादिकं एकाकिना इतस्ततः सञ्चरणं आदिः पूर्वो यस्य तत्तथोक्तम् । भुवनभर्तुः भुवनानां सर्वलोकानां भर्ता ईशिता राजेति यावत् भुवनभर्ता 'भर्त्रेन्द्र इन ईशिता' इति धनञ्जयः । तस्य वायोः स्वनिगूहनं स्वरूपाच्छादकं चरणादिकर्मेत्यन्वयः । सुरसभासु सुराणां देवानां सभासु संसत्सु कुतूहलं सन्तोषं आतनोत् अकरोत् । तनु विस्तार इति धातोः लङ् परस्मैपदं 'अतनोत् अतनुतां अतन्वन्' प्रथमपुरुषैकवचनम् । अहो आश्चर्यं इति । स्वल्पदेशराजापि स्वसंपदानुसारेण दिव्यकौशेयोर्णवस्त्रादिभिः स्वात्मानं अलङ्कृत्य बहुपरिवारजनयुतः सन् सर्वत्र सञ्चरति । अयं तु वायुनन्दनः सर्वलोकराजापि स्वराजत्वं आच्छाद्य दरिद्रवत् कुत्सितहस्तत्रयात्मकं पटैकदेशं प्रवाय कस्मिंश्चित् एव भूप्रदेशे एकाकी सन्नेव इतस्ततः सञ्चरति । इदं स्वस्वरूपाच्छादनं आश्चर्यं इत्युक्त्वा देवाः सन्तुतुषुः इति भावः ॥ ३७ ॥

अविरलैर्गरलोष्मभिराकुलीकृतसमस्तजनो विचचार यः ।
क्वचिदमुं निजिघांसुरशान्तिमानुपससर्प स सर्पमयोऽसुरः ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – अविरलैरिति ॥ अशान्तिमान् मन्त्रौषधादिभिः उपशम-नरहितः यः सर्पमयः सर्पस्वरूपोऽसुरः । अविरलैर्निबिडैः गरलानां विषाणां ऊष्मभिर्बाष्पै-राकुलीकृतः भीषितः समस्तजनो येन स लोके विचचार । स सर्पाकारासुर अमुं द्विजसुतं निजिघांसुः हन्तुमिच्छुः सन् । क्वचित् पाजकक्षेत्रप्रदेशे उपससर्प प्राप । सृपॢ्लृगतौ लिट् ॥ ३८ ॥

मन्दोपकारिणी – अविरलैरिति ।। अशान्तिमान् शान्तिः उपशमः अस्यास्तीति शान्तिमान् न शान्तिमान् अशान्तिमान्। मंत्रौषधादिभिरपि अपरिहार्यविषवीर्यवानिति भावः। यः सर्पमयः सर्पात्मकः। 'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा' इत्यभिधानम्। असुरः दैत्यः अविरलैः विरलाः तनवः न भवन्तीति अविरलाः बहवः इति यावत् 'पेलवं विरलं तनु' इत्यमरः तैः अविरलैः। गरलोष्मभिः गरलं विषं 'क्ष्वेडस्तु गरलं विषम्' इत्यमरः तस्य ऊष्मभिः बाष्पैः। 'ग्रीष्मोष्मबाष्पऊष्माणः' इति रत्नमाला। आकुलीकृतसमस्तजनः आकुलीकृतः भीषितः समस्तजनो येन सः तथोक्तः सन्। विचचार लोके सञ्चचार। 'चर गतौ भक्षणे च इति धातोः लिट् परस्मैपदं चचार चेरतुः चेरुः'। सः सर्पाकारो दैत्यः क्वचित् प्रदेशे वर्तमानं अमुं वासुदेवं निजघांसुः हन्तुमिच्छुः सन् उप समीपे 'उपेऽधिके समीपे च' इत्यभिधानम्। ससर्प प्रायात्'। 'सृप्लृ (सृप्) गतौ इत्यतो लिट् परस्मैपदं ससर्प ससृपतुः ससृपुः' ॥ ३८ ॥

त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम्।
प्रभुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः प्रतताम सः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – त्वरितमिति ।। स सर्पमयोऽसुरः त्वरितं शीघ्रं यथा भवति तथा। उद्यतं प्रभुपाददंशनायोन्नमितं विस्तृतमस्तकं विस्तृतफणो यस्य तथा सन् यदा अविक्षतं क्षतरहितमेनं वासुदेवं प्रतिददंश। दशि दंशने लिट्। तदा प्रभोः पदस्य पादस्य अरुणा रक्ता चारुतरा अतिसुन्दरा या अङ्गुली तस्या विहृत्या लीलया पिष्टा चूर्णिता तनुः शरीरं यस्य तथा सन् प्रतताम श्रान्तोऽभूत्। तमु ग्लानौ लिट्॥ ३९ ॥

मन्दोपकारिणी – त्वरितमिति ।। सः सर्पासुरः त्वरितं शीघ्रं उद्यतविस्तृतमस्तकः वासुदेवपाददंशनाय उद्यतः उन्नमितः विस्तृतः प्रसारितः मस्तकः मूर्धा फण इति यावत् यस्य स तथोक्तः सन्। 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः। अविक्षतं विक्षतो न भवतीति अविक्षतः तं क्षतरहितमित्यर्थः। एनं वासुदेवं यदा प्रतिददंश दंशितवान् 'दंश दशने इत्यतो लिट् परस्मैपदं ददंश ददंशतुः ददंशुः'। तदा प्रभुपदारुणचारुतराङ्गुली-विहृतिपिष्टतनुः प्रभोः समर्थस्य वासुदेवस्य पदः पादः तस्य अरुणायाः रक्तायाः 'अव्यक्तरागस्त्वरुणः' इत्यमरः। चारुतरायाः अतिसुन्दरायाः अङ्गुल्याः विहृत्या क्रीडया

पिष्टा चूर्णीकृता तनुः कायो यस्य सः तथोक्तः सन् प्रतताम श्रान्तोऽभूत्। 'तमु (तम्) ग्लानौ' लिट् परस्मैपदं ततताम तेमतुः तेमुः ॥ ३९ ॥

गरुडतुण्डमिव प्रतिपन्नवान् द्विजकुमारपदं स ममार च।
समुचितं चरितं महतामिदं सुमनसो मनसेष्टमपूजयन् ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – गरुडतुण्डमिति ॥ स सर्पः गरुडतुण्डमिव गरुडवदनमिव द्विजकुमारकस्य पदं पादं प्रतिपन्नवान् प्राप्तः सन् ममार च। तदा सुमनसो देवा महतां समुचितं युक्तं इष्टं दुष्टनिग्रहरूपत्वात्सतामभीष्टं इदं चरितं कर्म मनसा अपूजयन् सम्भावयाञ्चक्रुः। पूज पूजायां लङ् ॥ ४० ॥

मन्दोपकारिणी – गरुडेति ॥ द्विजकुमारपदं द्विजस्य मध्यगेहस्य कुमारः सुतः तस्य पदं पादं प्रतिपन्नवान् प्राप्तः सः सर्पासुरः ममार मृतवान्। किं प्राप्त इव गरुडतुण्डमिव गरुडस्य गरुडपक्षिणः तुण्डं वदनमिव 'वक्त्रास्ये वदनं तुण्डं' इत्यमरः। सर्पः गरुडतुण्डं प्राप्य यथा मृतो भवति तथेति भावः। सुमनसः देवाः 'सुपर्वाणस्सुमनसः' इत्यमरः। महतां सतां समुचितं युक्तं इष्टं अभीष्टं दुष्टनिग्रहरूपत्वात्। इदं चरितं सर्पमयदैत्यहननरूपं कर्म। मनसा अपूजयन् सम्भावयाञ्चक्रुः। पूज पूजायामित्यतो लङ् परस्मैपदम् ॥ ४० ॥

गिरिशगुर्वमरेन्द्रमुखैश्च यच्चरणरेणुरधारि सुराधिपैः।
क्षितिसुरांघ्र्यभिवन्दनपूर्वकं स विदधेऽध्ययनं छलमानुषः ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – गिरिशेति ॥ यस्य चरणौ पादौ तयोः रेणुः रजः। 'रेणुर्द्वयोस्त्रियां धूलिः' इत्यमरः। गिरौ कैलासे शेत इति गिरिशः। गिरौ शेतेर्डः इति डः। स च, गुरुर्बृहस्पतिश्च, सुरेन्द्रश्च, ते मुखानि मुख्या येषां तैः सुराधिपैः सुरेश्वरैः अधारि। धृ धारणे लुङ्। स छलमानुषो व्याजेन मानुषः क्षितिसुरस्य भूदेवस्य अंघ्र्योः पादयोरभिवन्दनं नमनं पूर्वकं यथा भवति तथा अध्ययनं वेदाध्ययनं विदधे चक्रे ॥ ४१ ॥

मन्दोपकारिणी – गिरिशेति ॥ यच्चरणरेणुः यस्य वासुदेवस्य चरणरेणुः यस्य चरणयोः अंघ्र्योः [illegible]श्चरणो स्त्रियाम्' इत्यमरः रेणुः धूलिः 'रेणुर्द्वयोस्त्रियां धूलिः'

इत्यमरः। गिरिशगुर्वमरेन्द्रमुखैः गिरिशः रुद्रः, गुरुः बृहस्पतिः, अमरेन्द्रः देवेन्द्रः 'गिरीशो गिरिशो मृडः' इत्यमरः। गिरिशश्च गुरुश्च अमरेन्द्रश्च गिरिशगुर्वमरेन्द्राः त एव मुखानि प्रधानाः एषां ते तथोक्ताः। 'मुखं प्रधाने प्रारम्भे' इति रत्नमाला। सुराधिपैः सुराणां देवानां अधिपैः नाथैः अधारि धृतः। 'धृञ् (धृ) धारणे इत्यतः कर्मणि लुङात्मनेपदं अधारि अधृषाताम् अधृषत'। छलमानुषः छलेन कुमतनिरासव्याजेन मानुषः मनुष्यावतारः 'छलन्तु स्खलितो व्याजः' इति विश्वः सः वाग्वात्मकः वासुदेवः। क्षितिसुराङ्घ्रच-भिवन्दनपूर्वकं क्षितिसुरस्य ब्राह्मणस्य अङ्घ्री चरणौ तयोः अभिवन्दनं नमस्कारः तदेव पूर्वकं पुरस्सरं यथा भवति तथा। अध्ययनं वेदपठनं विदधे चक्रे 'डु धाञ् धारणपोषणयोः लिडात्मनेपदं दधे दधाते दधिरे'। रुद्रादिवन्द्योऽपि वासुदेवः मनुष्यावतारत्वात् लोकशिक्षार्थं उपाध्यायं नत्वा वेदमधीतवान् इति भावः॥ ४१॥

करतले खलु कन्दुकवत् सदा सकलया कलया सह विद्यया।
अरिधरेण समं स्फुरितं गुरोर्मनसि तस्य विडम्बयतो जनान्॥ ४२॥

पदार्थदीपिकोद्बोधिका – करतल इति॥ जनान् अज्ञजनान् विडम्बयतोऽनुकुर्वतो गुरोः सकलजगद्गुरोः तस्य मनसि सकलया समस्तया विद्यया वेदादिरूपया कलया इतरकलाविद्यया च सह करतले हस्ततले कन्दुकवत् अरिधरेण चक्रधरेण सकलविद्या-प्रतिपाद्येन हरिणा समं सह स्फुरितं विलसितं खलु। इतरकलाविद्याभिः सह सकलवेदादिविद्याः। तत्प्रतिपाद्यं भगवन्तं च सदा करतलामलकवज्ज्ञानात्येव। तथापि अज्ञजनव्यामोहनाय अध्ययनं विदध इति भावः॥ ४२॥

मन्दोपकारिणी – करतल इति॥ जनान् प्राकृतजनान्। विडम्बयतः अनुकुर्वतः अज्ञजनवत् अध्ययनादि कुर्वत इति यावत्। गुरोः जगद्गुरोः तस्य वासुदेवस्य मनसि हृदये सकलया समस्तया विद्यया वेदविद्यया कलया इतरकलाविद्यया सह साकं करतले पाणितले कन्दुकवत् वस्त्रात्मकं पिण्डारकं क्रीडासाधनवस्तु कन्दुकशब्देनोच्यते तद्वत्। सदा सर्वस्मिन्नपि काले स्फुरितं खलु प्रतिभातं हि। कथं अरिधरेण अरेः चक्रस्य धरेण धारिणा। 'अरिः पुमान्श्चक्रवाके रिपौ चक्रे तु न द्वयोः' इति हलायुधः। सकलविद्या-प्रतिपाद्यश्रीनारायणेन समं सह 'साकं सार्धं समं सह' इत्यमरः। सकलवेदादिविद्या-प्रतिपाद्यश्रीनारायणं च सदा करतलगतकन्दुकवत् स्वत एव उपाध्यायं विना जानत्येव तथापि अज्ञजनमोहनायैव अध्ययनं विदधे इति भावः॥ ४२॥

अनधिकैरधिकैश्च वयस्यथो बहुभिरध्ययनोपरमान्तरे।
अनिकटे वटुभिः पटुभिर्गुरोः स विजहार सुखी सखिभिः समम् ॥ ४३॥

पदार्थदीपिकोद्बोधिका – अनधिकैरिति॥ अथो सुखमस्यास्तीति सुखी। स अध्ययनस्योपरमस्य समाप्तेरन्तरे मध्ये अध्ययनस्य समाप्तेर्मध्य इत्यर्थः। वयसि अधिका न भवन्तीत्यनधिकास्तैः समानैरित्यर्थः। वयसि न्यूनैश्च, वयसि अधिकैश्च। बहुभिः पटुभिश्चतुरैः सखिभिर्वटुभिर्ब्रह्मचारिभिः समं सह गुरोरुपाध्यायस्य अनिकटे असमीपे दूर इत्यर्थः। विजहार॥ ४३ ॥

मन्दोपकारीणि – अनधिकैरिति॥ अथो वेदाध्ययनकरणकाले सुखी सुखेन वर्धितः सः वासुदेवः अध्ययनोपरमान्तरे अध्ययनस्य उपरमः विरामः परित्यागकालः इति यावत्। तस्य अन्तरे मध्ये। वयसि स्ववत्सरविषये अनधिकैः न अधिकाः अनधिकाः तैः अधिकैश्च वयोविषये स्वस्मात् अधिकवर्षोपेतैश्च बहुभिः बहुसङ्ख्याकैः पटुभिः क्रीडायां दक्षैः वटुभिः ब्रह्मचारिभिः सहाध्ययनं कुर्वद्भिः जनैः समं सह गुरोः उपाध्यायस्य अनिकटे असमीपे दूर इत्यर्थः। 'समीपे निकटासन्नः' इत्यमरः। विजहार क्रीडितवान्। 'विपूर्वकात् हृञ् हरणे इत्यतो लिट् परस्मैपदम्' ॥ ४३ ॥

पदमुदीर्य जवेन यियासितं द्रुतसखेष्वभवत् स पुरःसरः।
अयमयत्नतयेति न विस्मयो ननु मनोजवजित् पवनो ह्यसौ ॥४४॥

पदार्थदीपिकोद्बोधिका – पदमिति॥ सोऽयं जवेन वेगेन यातुमिष्टं यियासितं स्थानमुदीर्य, अवधित्वेन सम्प्रतिपन्नं स्थानं प्रति अभिद्रवणं कृत्वा यः प्रथमतः प्राप्नोति सोऽस्मास्वधिक इत्येवं सङ्केतं कृत्वेति भावः। द्रुता धावन्त ये सखायस्तेषु धावतां सखीनां मध्य इत्यर्थः। द्रु धातोरादिकर्मणि कर्तरि चेति कर्तरि क्तः। न विद्यते यत्नो यस्य तस्य भावस्तत्ता तया। आयासरहिततयेत्यर्थः। पुरः पुरतः सरतीति पुरःसरः। द्रुवञ्यः सखिभ्योऽतिशीघ्रमाद्रुत्य पुरोगन्ताऽभवदिति विस्मयः आश्चर्यं न। कुत इत्यत आह नन्विति। असकौ असौ। 'अव्ययसर्वनाम्नामकच् प्राक् टे'रित्यकच् प्रत्ययः। मनसो जवं वेगं जयतीति स चासौ पवनश्च वायुश्च ननु। मनोजवापेक्षयाप्यतिवेगवत्पवनावतारत्वादस्य नैतच्चित्रमिति भावः॥ ४४ ॥

मन्दोपकारिणी – पदमिति ॥ जवेन वेगेन यियासितं यातुं इष्टं पदं स्थानम्। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। उदीर्य सङ्केतं कृत्वा एकं स्थलं मर्यादीकृत्य तत्स्थलं प्रति युगपदेव अस्मासु वेगेन धावत्सु सत्सु प्रथमतः तत्स्थलं यः प्राप्नोति सः अस्मासु अधिक इति सङ्केतं कृत्वेति भावः। द्रुतसखेषु द्रुताः धावन्तश्च ते सखायश्च द्रुतसखाः 'राजाहः सखिभ्यष्टच्' तेषु द्रुतसखेषु मध्ये द्रुतेति कर्तरि क्तः। सोऽयं वासुदेवः अयत्नतया न विद्यते यत्नः आयासः यस्य सः अयत्नः अयत्नस्य भावः अयत्नता तया अनायासेन इत्यर्थः। पुरस्सरः पुरोगन्ता 'पुरोगाग्रेसरप्रष्ठाग्रतस्सरपुरस्सरा' इत्यमरः। अभवत् इत्येतत् न विस्मयः आश्चर्यं न। हि यस्मात् असौ वासुदेवः मनोजवजित् मनसः जवं जयतीति मनोजवजित्। पवनः वायुः ननु निश्चय इत्यर्थः। 'नभस्वद्वातपवनपवमानप्रभञ्जनाः' इत्यमरः ॥ ४४ ॥

प्लवनतेजसि हन्त न केवलं विजितवान् स तदा सकलान् जनान्।
प्रभुनिदेशकरो हनुमत्तनौ ननु जिगाय स वालिसुतादिकान् ॥४५॥

पदार्थदीपिकोद्बोधिका – प्लवनेति ॥ स प्लवनतेजसि लङ्घनसामर्थ्ये। 'तेजो बले प्रभावे च' इति वैजयन्ती। सकलान् जनान् न केवलं तदा द्विजकुमारत्वेन जितवान्। किन्तु हनुमत्तनौ हनुमच्छरीरे हनुमदवतार इत्यर्थः। प्रभोः श्रीरामस्य निदेश आज्ञा तम्। 'निदेशः शासनं च स' इत्यमरः। करोतीति तादृशः। वालिनः सुतोऽङ्गद आदिर्येषां तान् कपीन्द्रान् समुद्रतरणादौ जिगाय ननु ॥ ४५ ॥

मन्दोपकारिणी – प्लवनेति ॥ सः वासुदेवः प्लवनतेजसि स्थलविशेषे स्थित्वा अवधित्वेन सम्प्रतिपन्नस्थले यल्लङ्घनं तत्प्लवनं तस्मिन् तेजसि सामर्थ्ये तद्विषये इति यावत्। 'तेजः प्रभावे दीप्तौ च' इत्यमरः। सकलान् जनान् सखिजनान् केवलं अत्यन्तं तदा द्विजजन्मनि हन्त हर्षेण सुखेन न विजितवान्। किन्तु हनुमत्तनौ हनुमदवतारे। प्रभुनिदेशकरः प्रभोः नाथस्य श्रीरामचन्द्रस्य निदेशः आज्ञा 'निदेशः शासनं चाज्ञा' इत्यमरः तां करोतीति करः। सः वायुः वालिसुतादिकान् वालिनः सुतः अङ्गदः स एव आदिः येषां ते वालिसुतादयः तान् वालिसुतादिकान्। समुद्रतरणादौ जिगाय ननु पराजितवान् ननु। 'जि जये इत्यस्माल्लिट् परस्मैपदम्। जिगाय जिग्यतुः जिग्युः' ॥ ४५ ॥

जलविहारपराजयिभिः स्पृधा सखिभिरीरितवारिपरिश्रितम्।
वदनमाकुललोचनमादधे स्मितममुष्य हि कञ्चन विभ्रमम्॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – जलविहारेति॥ जलविहारे जलक्रीडायां पराजयः पराभव एषामस्तीति तैः सखिभिः वयस्यैः। स्पृधा स्पर्धया ईरितानि अञ्जलिभिः क्षिप्तानि यानि वारीणि तैः। परिश्रितं परितः श्रितं अत एव आकुले कलुषीकृते लोचने यस्य तत्। स्मितं विकसितं अमुष्य वदनं मुखं कञ्चन यत्किञ्चित् विभ्रमं शोभाविशेषम्। 'विभ्रमः संशये भ्रान्तौ शोभायां चे'ति वैजयन्ती। आदधे दध्रे॥ ४६ ॥

मन्दोपकारिणी – जलेति॥ जलविहारपराजयिभिः जलविहारे जलक्रीडायां पराजयः एषां अस्तीति पराजयिनः तैः जलक्रीडायां पराजितैः इत्यर्थः। सखिभिः वयस्यैः स्पृधा स्पर्धया ईरितवारिपरिश्रितं ईरितैः अञ्जलिभिः प्रक्षिप्तैः वारिभिः परितः समन्तात् श्रितं युक्तं अत एव आकुललोचनं आकुले उद्विग्ने इव स्थिते लोचने नयने यस्य तत्। स्मितं मन्दहासोपेतं अमुष्य वासुदेवस्य वदनं मुखं कञ्चन विभ्रमं शोभाविशेषं आदधे दध्रे। 'विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती॥ ४६ ॥

स शनकैर्बलिनोऽयुगपद्धतान् प्रविहृतेषु सखीन्निरपातयत्।
अशनकैर्युगपत्प्रकृताहवान् सहसितो द्विजसूनुरयत्नवान् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – स इति॥ हसितेन मन्दहासेन सहितः सहसितः। स द्विजसूनुः प्रविहृतेषु प्रविहारेषु। 'नपुंसके भावे क्त' इति क्तः। क्रीडास्वित्यर्थः। युगपत् न भवति इति अयुगपत् पृथगित्यर्थः। गतान् आत्मानं पातयितुं आगतान्। प्रकृतः प्रकर्षेण कृतः आहवः क्रीडायुद्धं यैस्तान्। उपक्रान्तक्रीडान् बलिनः सखीन् शनकैः शनैरेव निरपातयत् पातयामास। अथ युगपदागतान् प्रकृताहवान् सखीन् शनकैर्न भवतीत्य-शनकैराशु यत्नाभावोऽयत्नः सोऽस्यास्तीत्ययत्नवान्। यत्नवान् न भवति इति अयत्नवानिति वा। आयासरहितः सन्नित्यर्थः। निरपातयत्। अत एव सहसित इत्युक्तम्॥ ४७ ॥

मन्दोपकारिणी – स इति॥ द्विजसूनुः द्विजस्य मध्यगेहस्य सूनुः तनयः। 'आत्मजस्तनयः सूनुः इत्यमरः'। सः वासुदेवः। प्रविहृतेषु क्रीडासु क्रीडार्थमिति यावत्

तादर्थ्ये सप्तमीयम्। अयुगपत् युगपत् न भवतीति अयुगपत् पृथक् पृथक् इत्यर्थः। गतान्, प्राप्तान् आत्मानं पातयितुं आयातान्। अशनकैः शीघ्रं युगपत् एकदा प्रकृताहवान् प्रकृतः उपक्रान्तः आरब्धः आहवः क्रीडायुद्धं यैः ते प्रकृताहवाः तान्। 'सङ्ग्रामाभ्यागमाहवाः' इत्यमरः। बलिनः बलं एषां अस्तीति बलिनः बलवन्तः। सखीन् वयस्यान् शनकैः मन्दमेव निरपातयत्। कथंभूतः, अयत्नवान् यत्नः आयासो अस्यास्तीति यत्नवान् स न भवतीति अयत्नवान् श्रमरहितः इत्यर्थः। अत एव सहसितः हसितेन मन्दहासेन सहितः। 'पत्लृ पतन इत्यतः लङ् परस्मैपदम्' ॥ ४७ ॥

ग्रहणनिग्रहणे ग्रहणे दृढे गुरुभरोद्धरणादिविधौ पटौ।
इह विभावुपचारधिया नृणामृतमयं ननु भीम इतीरितम् ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – ग्रहणेति ॥ ग्रहणस्य अन्येन कृतस्वहस्तादिग्रहणस्य निग्रहणे विमोचने। दृढे मोचयितुमशक्ये ग्रहणे स्वकर्तृकान्यहस्तादिग्रहणे च। गुरुर्महान् भरो भारस्तस्य। उद्धरणमुद्धृतिः। तदादिर्यस्य तस्य विधौ व्यापारे पटौ चतुरे। इह विभौ उपचारा च सा धीश्च तया सिंहो देवदत्त इत्युपचारबुद्ध्यापि। अयं भीम इति नृणां ईरितं वचनं ऋतं सत्यं ननु। अयं भावः, आत्मानं कश्चिद्धस्तादौ गृह्णाति चेत् आशु मोचयति, स्वयमन्यहस्तं गृह्णाति चेन्न कश्चिन्मोचयति, अतिगुरुपाषाणादिकमप्ययत्नेनोद्धरति। एवंविधमेनं जनः अयं साक्षाद्भीम इत्युपचारबुद्ध्यापि यदुवाच तत्सत्यमेव वस्तुगत्याऽस्यैव भीमत्वादिति ॥ ४८ ॥

मन्दोपकारिणी – ग्रहणेति ॥ ग्रहणनिग्रहणे ग्रहणस्य अन्येन कृतस्वहस्तादिग्रहणस्य निग्रहणे विमोचनविषये। दृढे मोचयितुमशक्ये ग्रहणे अन्यहस्तग्रहणे च। गुरुभरोद्धरणादिविधौ गुरुर्महान् भरो भारः 'भरोऽतिशयभारयोः' इत्यमरः। तस्य उद्धरणं भूमिस्थितगुरुपदार्थस्य ऊर्ध्वशिरःपर्यन्तं धारणमिति यावत् तदेव आदिः यस्य स तथोक्तः स चासौ विधिश्च व्यापारश्च गुरुभरणोद्धरणादिविधिः तस्मिन्। 'विधिर्विधाने दैवे च' इत्यमरः। पटौ दक्षे इह अस्मिन् विभौ वासुदेवविषये उपचारधिया सिंहो देवदत्त इत्यत्र देवदत्ते सिंहगतक्रौर्यादिगुणवत्तया यं सिंह इति यथा अमुख्यधिया व्यवहारः तया उपचारधियापि अमुख्यबुद्ध्यापि भीमतुल्यकार्यकर्तारं दृष्ट्वा अयं वासुदेवः भीम इति नृणां

जनानां ईरितं उक्तं वचनं ऋतं ननु सत्यमेव हि। 'सत्यं तथ्यमृतं सम्यक्' इत्यमरः। अयं भावः, वासुदेवः यः कश्चित् स्वस्य हस्तादिकं गृह्णाति चेत् आशु मोचयति। स्वयं गृह्णाति चेत् न कश्चिन्मोचयति। गुरुपाषाणादिकं अयत्नेन उद्धरति एवं भीमसदृशकर्माणं दृष्ट्वा जनः सोऽयं साक्षात् भीम इति उपचारबुद्ध्यापि अब्रवीत् तत्सत्यमेव। वस्तुगत्या अस्यैव भीमत्वादिति ॥ ४८ ॥

विहरतीति पठत्यपि न स्फुटं स्वगृहगामिनि चाद्रुतमायति।
परितुतोष न तत्र जगद्गुरौ स किल पूगवनान्वयजो द्विजः ॥ ४९ ॥

भावप्रकाशिका – पूगवनस्य 'तोटन्तिल्लाय' इत्यपभ्रष्टभाषा ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – विहरतीति ॥ इति उक्तप्रकारेण विहरति क्रीडां कुर्वति स्फुटं सम्यग् पठतीति पठन् तस्मिन् पठति न, वदेपाठं सम्यगकुर्वाणेऽपि स्वस्य गृहं स्वगृहं तद्गन्तुं शीलमस्यस्तीति तस्मिन्। भोजनादिकमुद्दिश्य स्वमन्दिरगमनशीलस्येत्यर्थः। द्रुतं न भवतीत्यद्रुतं शनैः ऐतीत्यायन् तस्मिन् आयति आगच्छति। तत्र तस्मिन् जगद्गुरौ वासुदेवाह्वये पूगवनाख्योऽन्वयो वंशस्तस्मिन् जातः। 'तोटन्तिल्लाय' इत्यपभ्रष्टभाषा-प्रसिद्धवंशज इत्यर्थः। स द्विजः उपाध्यायो न परितुतोष किल। किल ऐतिह्ये ॥ ४९ ॥

मन्दोपकारिणी – विहरतीति ॥ पूगवनान्वयजः पूगवनाख्ये अन्वये कुले जायत इति पूगवनान्वयजः। 'कुलान्यभिजनान्वयौ' इत्यमरः। सः द्विजः उपाध्यायः। इति पूर्वोक्तप्रकारेण। विहरति क्रीडमाने स्फुटं सम्यक् न पठति वेदाध्ययनं अकुर्वति भोजनादिकमुद्दिश्य। स्वगृहगामिनि स्वमन्दिरं प्रति गामिनि गमनशीले च। अद्रुतं शनैः आयति आगच्छति। जगद्गुरौ तत्र तस्मिन् वासुदेवे तद्विषय इति यावत्। न परितुतोष सन्तुष्टो नाभूत् किल। 'तुष तुष्टौ इत्यतो लिट् परस्मैपदं तुतोष तुतुषतुः तुतुषुः'। किलशब्दः उपाध्यायस्य अपरितोषः तन्माहात्म्याज्ञानमूलकः इति अर्थं वदति ॥ ४९ ॥

अथ कदाचन सोऽध्ययनान्तरे तमवदत् कुपितोऽन्यमनस्विनम्।
पठसि नो शठ ते सखिभिः समं किमिति नित्यमुदासितधीरिति ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ कदाचन कुपितः क्रुद्धः स द्विजः अध्ययनान्तरेऽध्ययनमध्ये अन्यस्मिन् मनोऽस्यास्तीत्यन्यमनस्वी तम्। अध्ययनादन्यविषयमानसमित्यर्थः। तं वासुदेवं हे शठ व्याजिन्! यद्वा शठ! गुणैः श्लाघ्य! 'शठ श्लाघायामि'ति धातोः। ते सखिभिः समं सह किमिति किमर्थं एवं न पठसि? नित्यं सदा। 'नित्यानवरताजस्रमि'त्यमरः। उदासिता उदासीना धीर्बुद्धिर्यस्य तादृशः। किमिति वर्तसे इति शेषः इत्यवदत् ॥ ५० ॥

मन्दोपकारिणी – अथेति ॥ अथ वासुदेवे वेदपठने उदासीने सति कदाचन कस्मिंश्चित् दिवसे सः उपाध्यायः कुपितः सन्। अध्ययनान्तरे अध्ययनस्य वेदपठनस्य अन्तरे मध्ये वेदपठनकाल इत्यर्थः। अन्यमनस्विनं अन्यस्मिन् विषये मनः अस्यास्तीति अन्यमनस्वी तं अन्यमनस्विनं वासुदेवं इति अवदत्। 'वद व्यक्तायां वाचि इत्यतो लङ् परस्मैपदम्' इति। कथं, हे शठ व्याजयुक्त 'निकृतस्त्वनृजः शठः' इत्यमरः। ते तव सखिभिः वयस्यैः समं सह किमिति किमर्थमेवं नो पठसि नाधीषे। नित्यं प्रतिदिनं उदासितधीः पठनविषये उदासिता उदासीना धीः बुद्धिः यस्य स तथोक्तः किमिति वर्तसे इति शेषः ॥ ५० ॥

गुणनिका चरणादिकगोचरा न मम हृदयितेत्युदितेऽमुना।
वद विशारदवाद यथेप्सितं त्वमुपरीत्यवदद्धरणीसुरः ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – गुणनिकेति ॥ चरणः पाद आदिर्यस्य स चरणादिकः। स गोचरो विषयो यस्या सा, पादार्धचर्चादिविषयेत्यर्थः। गुणनिका गुणनं पुनःपुनरुच्चारणमिति यावत्। मम हृदयिता हृदः मनसो दयिता प्रिया, न भवति इति वचसि अमुना वासुदेवेनोदिते सति स धरणीसुरः ब्राह्मणो विशारदो विद्वान् तद्वद्वदतीति विशारदवादस्तत्सम्बुद्धिः। 'विशारदो विचक्षणश्च मेधावी'ति हलः। त्वं उपरि इदानीं पठ्यमानाद्वर्गादुपरि ईप्सितं अनतिक्रम्य यथोप्सितं यथेष्टं वद ब्रूहि इत्यवदत्। पादादिगुणनं तव प्रियं न चेदित उपरि वर्गश संहितां, पदं, क्रमं वा अन्यद्वा यथेप्सितं वदेत्युपाध्यायोऽवददिति भावः ॥ ५१ ॥

मन्दोपकारिणी – गुणनिकेति ॥ हे उपाध्याय। चरणादिकगोचरा चरणः पादः ऋचश्चतुर्थांश इति यावत् स एव आदिः यस्य अर्धर्चादिरूपस्य वेदवाक्यस्य सः चरणादिकः स एव गोचरः विषयो यस्याः सा तथोक्ता। गुणनिका गुणनं पुनः पुनरुच्चारणमिति यावत्। मम हृदयिता हृदः हृदयस्य दयिता प्रिया। न भवति इति एवं अमुना वासुदेवेन उदिते सति। धरणीसुरः भूसुरः उपाध्यायः इत्यवदत्। कथं विशारदवाद प्रज्ञावानिव वादो यस्य सः विशारदवादः तस्य संबुद्धिः हे विशारदवाद। त्वं उपरि इदानीं पठ्यमानात् वर्गात् उपरि विद्यमानं वर्गं यथेप्सितं स्वेच्छानुसारेण वद पठ। इति पादार्धर्चादिरूपेण वेदगुणनं तव प्रियं न चेत् तर्हि अतिप्रज्ञावान् त्वं पठ्यमानवर्गात् उपरितनवर्गस्थसंहितां पदं क्रमं वा स्वेच्छानुसारेण वद इत्युपाध्यायोऽवददिति भावः। 'वद धातोर्लोट् परस्मैपदं वद वदतात् वदतं वदत' ॥ ५१ ॥

सकललक्षणशिक्षणमूलभूः श्रुतिसमामननं स्खलनोज्झितम्।
न खलु केवलमस्य गुरोर्व्यधात् सुमनसामपि तत्र कुतूहलम् ॥५२॥

पदार्थदीपिकोद्बोधिका – सकलेति ॥ सकलानि यानि लक्षणानि वेदोच्चारण-लक्षणानि तेषां यच्छिक्षणं तस्य मूलभूता भूमिः उत्पत्तिकारणस्थानभूतं स्खलनोज्झितं स्खलनरहितं अस्य वासुदेवस्य श्रुतीनां समामननं वर्गश उच्चारणं केवलं गुरोरुपाध्यायस्य कुतूहलं कुतुकं न व्यधात् न चकार। किन्नाम तत्र तस्मिन् समाजे सुमनसामपि देवानामपि कुतूहलं व्यधाच्चकार ॥ ५२ ॥

मन्दोपकारिणी – सकलेति ॥ सकललक्षणशिक्षणमूलभूः सकलानि च तानि लक्षणानि वेदोच्चारणलक्षणानि च सकललक्षणानि तेषां शिक्षणस्य ज्ञानस्य मूलभूः उपत्तिस्थानभूतं वेदोच्चारणे यानि लक्षणानि तानि सर्वाणि एतद्वेदोच्चारणेनैव शिक्षितानि इति भावः। स्खलनोज्झितं स्खलनेन स्वरवर्णादिव्यत्यासेन उज्झितं रहितम्। अस्य वासुदेवस्य श्रुतिसमामननं श्रुतेः वेदस्य समामननं सम्यक् वर्गशः आमननं उच्चारणम्। 'श्रुति स्त्री वेद आम्नायः' इत्यमरः। न केवलं गुरोः उपाध्यायस्य, किन्तु सुमनसां देवानामपि तत्र वासुदेवे कुतूहलं व्यधात् खलु। 'डु धाञ् धारण पोषणयोः इत्यतो लुङ् परस्मैपदम्। अधात् अधाताम् अधुः' ॥ ५२ ॥

प्रियवयस्यशिरोगुरुवेदनामशमयत् सहजामपि दुःसहाम् ।
स विपिने विजने मुखवायुना श्रवणगोचरितेन कदाचन ॥ ५३ ॥

भावप्रकाशिका – प्रियवयस्यः उपाध्यायपुत्रः। तस्यानन्तातीतानि जन्मानि प्रकाशितवान् श्रीमध्वः ॥ ५३ ॥

पदार्थदीपिकोद्बोधिका – प्रियेति ॥ स वासुदेवः कदाचन विगता जना यस्मिन् तस्मिन् । विपिने अरण्ये प्रियवयस्येन सह वर्तमानः सन्निति शेषः। सोढुमशक्यां दुःसहाम्। सह जाता सहजा तामपि जन्मप्रभृतिवर्तमानामपीत्यर्थः। तदानीमाविर्भूतां प्रियवयस्यस्य प्रियसखस्य शिरसो गुर्वीं महतीं वेदनाम्। श्रवणे श्रोत्ररन्ध्रे गोचरितेन विषयीकृतेन विहितेनेति यावत्। मुखवायुना स्ववदनपवनेन अशमयत् शान्तामकरोत्। शम उपशमे लङ्। वयस्यो गुरुपुत्र इति प्रथा ॥ ५३ ॥

मन्दोपकारिणी – प्रियेति ॥ सः वासुदेवः कदाचन विजने जनरहिते एकान्ते विपिने वने। 'अटव्यरण्यं विपिनं' इत्यमरः। प्रियवयस्येन सह वर्तमानस्सन्निति शेषः। दुःसहां सोढुमशक्यां सहजामपि जन्मारभ्य अनुवर्तमानामपि तदानीं आविर्भूतां प्रियवयस्यशिरोगुरुवेदानां, प्रियः स्वस्य प्रीतिविषयश्चासौ वयस्यः समानवयस्यश्च प्रियवयस्यः तस्य शिरसि विद्यमानां गुर्वीं महतीं बहुलामिति यावत्। वेदनां शूलां 'स्निग्धो वयस्यः सवया' इत्यमरः। श्रवणगोचरितेन श्रवणे श्रोत्ररन्ध्रे गोचरितेन विहितेन। 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः। मुखवायुना मुखस्य वायुना फूत्काररूपवायुना अशमयत् नाशयामास। 'शम उपशम इत्यतो लङ् परस्मेपदम्'। वयस्यो गुरुपुत्र इति प्रवादः ॥ ५३ ॥

अधिगतोपनिषच्च सकृच्छ्रुता प्रकटभागवतीति न विस्मयः ।
अधिगता ननु जात्वपि न श्रुताः प्रतिभया श्रुतयः शतशोऽमुना ॥ ५४॥

भावप्रकाशिका – प्रकटभागवती श्रीमन्नारायणोपनिषत् ॥ ५४ ॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमत्सुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां तृतीयः सर्गः ॥

पदार्थदीपिकोद्बोधिका – अधिगतेति ॥ अमुना वासुदेवेन सकृत् एकदा श्रुता भगवतः सम्बन्धिनी भागवती प्रकटं स्पष्टं यथा भवति तथा भागवती प्रकटभागवती प्रकटं भगवत्स्वरूपप्रतिपादिकेति भावः। उपनिषच्च श्रीमन्महैतरेयोपनिषदपि अधिगता ज्ञातेति विस्मयो न। उपाध्यायेन मूलादारभ्यापरिसमाप्तेः सकृन्निगदितोपनिषदनेन ज्ञातेत्याश्चर्यं न भवतीति भावः। कुत इत्यत आह **अधिगतेति**। जात्वपि कदाचिदपि श्रुता न भवन्तीति नश्रुताः। शतानीति शतशः शतसङ्ख्याका इत्यर्थः। श्रुतयो वेदाः। प्रतिभया स्वरूपप्रज्ञया अधिगता ननु ज्ञाता हि। अश्रुतप्रतिबोद्धुरस्य न श्रुताधिगमो विस्मय इति भावः ॥ ५४ ॥

मन्दोपकारिणी – अधिगतेति ॥ अमुना वासुदेवेन। सकृत् एकवारं 'सकृत् सहैकवारे च' इत्यमरः। श्रुता उपाध्यायमुखात् श्रुता। प्रकटभागवती प्रकटं स्फुटं भगवतः इयं भागवती भगवत्स्वरूपप्रतिपादिकेति भावः। इयं श्रीमन्नारायणोपनिषदिति भावप्रकाशिकायां नारायणपण्डिताचार्यैः व्याख्यातम्। उपनिषच्च श्रीमदैतरेयोपनिषदपि। अधिगता प्राप्ता इति न विस्मयः आश्चर्यं न। उपाध्यायेन मूलादारभ्य परिसमाप्तिपर्यन्तं एकवारं निगदिता उपनिषत् अनेन प्राप्ता इति आश्चर्यं न भवतीति भावः। कुतः जात्वपि कदाचिदपि। न श्रुताः अश्रुताः। शतशः बह्व्यः श्रुतयः वेदाः अमुना प्रतिभया स्वरूपप्रज्ञया अधिगताः ननु प्राप्ता हि। अश्रुतप्रतिबोद्धुः अस्य न श्रुताधिगमो विस्मयः इति भावः ॥ ५४ ॥

साक्षादथोपनिषदो विभुरैतरेय्याः पाठच्छलेन विजनेऽर्थरसान् ब्रुवाणः।
अध्यापकाय वितताऽर विमोक्षबीजं गोविन्दभक्तिमुचितां गुरुदक्षिणां सः ॥५५॥

पदार्थदीपिकोद्बोधिका – साक्षादिति ॥ अथ स विभुः विगता जना यस्मात्तस्मिन् एकान्तप्रदेश इत्यर्थः। इतराया इतरादेव्या अपत्यं पुमानैतरेयो महिदासाभिधो हरिः, तेन दृष्टा ऐतरेयी तस्या उपनिषदः। पाठच्छलेन पाठव्याजेन अध्यापकाय। साक्षात् स्पष्टम्। 'साक्षात्प्रत्यक्षतुल्ययोः' इत्यमरः। अर्थरसान् अर्थश्रेष्ठान्। 'रसः सारो वरश्चेति शब्दा एकार्थवाचका' इत्युक्तेः। ब्रुवाणः सन् उचितामुपाध्यायस्य योग्यां विमोक्षबीजं मोक्षकारणम्। 'हेतुर्ना कारणं बीजं' इत्यमरः। गोविन्दभक्तिं गुरुदक्षिणां उपाध्यायदक्षिणां

वितताऱ ददौ। श्रीमन्महैतरेयोपनिषदर्थकथनेन तस्य योग्यतानुसारेण श्रीविष्णु-भक्तिम् उपाध्यायस्य उत्पादितवान्। स एव तस्य गुरुदक्षिणेवाभूदिति भावः। वसन्ततिलकावृत्तम् ॥ ५५ ॥

मन्दोपकारिणी – साक्षादिति ॥ अथ ऐतरेयोपनिषत्पठनकाले। सः विभुः समर्थः। विजने रहसि। 'विविक्तविजनच्छन्ननिःशलाकास्तथा रहः' इत्यमरः। ऐतरेय्याः इतरायाः इतरानामिकायाः कस्याश्चित्स्त्रियः अपत्यं पुमान् ऐतरेयः महिदासाभिधः। ऐतरेयेण दृष्टा ऐतरेयी तस्याः उपनिषदः। पाठच्छलेन उपाध्यायात् पाठस्य अध्ययनस्य छलेन व्याजेन अध्यापकाय उपाध्यायाय। 'उपाध्यायोऽध्यापकः' इत्यमरः। साक्षात् प्रत्यक्षं स्पष्टमिति यावत्। 'साक्षात्प्रत्यक्षतुल्ययोः' इत्यमरः। अर्थरसान् सिद्धान्त-तरहस्यान् इति यावत्। ब्रुवाणः कथयन्। 'रसस्सारो वरः श्रेष्ठः' इत्यभिधानम्। उचितां उपाध्यायस्य योग्याम्। विमोक्षबीजं विमोक्षस्य मुक्तेः बीजं कारणम्। 'हेतुर्ना कारणं बीजं' इत्यमरः। गोविन्दभक्तिं गोविन्दे वेदप्रतिपाद्ये विष्णौ भक्तिं महात्म्य-ज्ञानपूर्वकदृढस्नेहम्। गुरुदक्षिणां विततार ददौ। 'विपूर्वकात् तॄ प्लवनतरणयोः इति धातोः लिट् परस्मैपदं विततार वितेरतुः वितेरुः'। श्रीमन्महैतरेयोपनिषदर्थकथनेन तस्य योग्यतानु-सारेण विष्णौ भक्तिं उपाध्यायस्य उत्पादयामास। सा एव तस्य गुरुदक्षिणा अभूत् इति भावः। 'वसन्ततिलकावृत्तं ज्ञेयम् । उक्तम् वसन्ततिलकं तभजाजगौगः' इति तल्लक्षणात् ॥ ५५ ॥

अयि स्वामिन् दुष्टान् दमय दमय व्यक्तमचिराद्
गुणान् गूढान् विष्णोः कथय कथय स्वान् प्रमदयन्।
तदाऽऽनन्दं तन्वन्निति सुमनसां सोऽनुसरता-
मनुज्ञामादत्त त्रिभुवनगुरुर्ब्राह्मणगुरोः ॥ ५६ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के तृतीयः सर्गः ॥

पदार्थदीपिकोद्बोधिका – अयीति ॥ अयीत्यव्ययं प्रार्थनावाचकम् । स्वामिन्! नाथ! दुष्टान् दुर्जनान् दमय दमय निराकुरु निराकुरु। दमु दान्तौ लोट्। हे स्वामिन्! स्वान् स्वकीयान् सज्जनान् प्रमदयन् सन्तोषयन् सन् गूढान् विष्णोर्निर्गुणत्ववादिभिर्निगूहितान् विष्णोर्गुणान्। अचिरात् शीघ्रं, व्यक्तं स्पष्टं यथा भवति तथा। कथय कथय। अत्र सर्वत्र द्विर्वचनमादरद्योतकम्। इति इत्थं अनुसरतां अनुवृत्तिं कुर्वतां सुमनसां देवानां आनन्दं तन्वन् स, त्रीणि भुवनानि समाहृतानि त्रिभुवनम्। तस्य गुरुः श्रीवासुदेवः ब्राह्मणगुरोरुपाध्यायात् अनुज्ञां आदत्त स्वीकृतवान्। शिखरिणीवृत्तम्। 'रसैः रुद्रैःच्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात्॥ ५६ ॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां तृतीयः सर्गः ॥

मन्दोपकारिणी – अयीति ॥ तदा गुरुकुलवाससमाप्तिसमये। अयि स्वामिन्! नाथ! त्वं दुष्टान् दुर्जनान् दमय दमय निराकुरु निराकुरु। स्वान् स्वकीयान् प्रमदयन् सन्तोषयन्। गूढान् नैर्गुण्यवादिभिः निगूहितान् आच्छादितान् विष्णोः गुणान् अचिरात् शीघ्रं व्यक्तं स्पष्टं कथय कथय वर्णय वर्णय अयि इत्यव्यम्। कोमलामन्त्रणेन प्रार्थनावाचकम् । दमयेत्यादिद्विर्वचनमादरद्योतकम्। 'दमु उपशम इत्यतो लोट् परस्मैपदं दमय दमयतं दमयत'। 'कथय कथयतं कथयत'। इति एवं अनुसरतां प्रार्थनां कुर्वतां सुमनसां देवानां आनन्दं सुखं तन्वन् कुर्वन्। त्रिभुवनगुरुः त्रयाणां भुवनानां समाहारः त्रिभुवनं त्रिभुवनस्य गुरुः सः वासुदेवः ब्राह्मणगुरोः ब्राह्मणश्चासौ गुरुश्च ब्राह्मणगुरुः ब्राह्मणानां गुरुर्वा तस्मात् उपाध्यायात् इत्यर्थः। अनुज्ञां स्वाभिप्रेतकार्यं कर्तुमिति शेषः। आदत्त स्वीकृतवान्। 'आङ्पूर्वक डु दाञ् दान इत्यतो लङात्मनेपदम्। आदत्त आददातां आददत'। गुरुकुलवाससमाप्तिसमये देवाः वासुदेवसमीपं आगत्य हे स्वामिन्! लोकानुकरणेन अलं, शीघ्रं अवतारप्रयोजनं कुरु इति प्रार्थितवन्तः। ततः सः गुर्वाज्ञां गृहीत्वा स्वगृहं प्रति ययौ इति भावः। शिखरिणीवृत्तम्। 'रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति तल्लक्षणात्॥ ५६ ॥

॥ इति श्रीसुमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां तृतीयः सर्गः ॥

चतुर्थः सर्गः

अथैष सल्लोकदयासुधार्द्रया सदागमस्तेन निरासकामया।
रमावरावासभुवा विशारदो विशालयाऽचिन्तयदात्मनो धिया॥१॥

पदार्थदीपिकोद्बोधिका – अथेति॥ अथ गुरुकुलवासानन्तरं विशारदो विचक्षणः एष वासुदेवनामा। सन्तश्च ते लोकाश्च सल्लोकाः सज्जनाः। 'लोकस्तु भुवने जने' इत्यमरः तेषु या दया सैव सुधा तया आर्द्रया क्लिन्नया अकठिनयेति भावः। सन्तश्च ते आगमाश्च सदागमा वेदाद्याः तेषां स्तेनः तस्करः सङ्करस्तस्य निरासे निरसने काम इच्छा यस्याः तया। रमाया वरस्य भर्तुः श्रीहरेः आवासस्य निवासस्य भूः स्थानं तथा। 'भूः पृथिव्यां स्थानमात्र' इति विश्वः। विशालया आत्मनो धिया बुद्ध्या अचिन्तयत् विचारयामास। चिति स्मृत्यां लङ्। अस्मिन् सर्गे प्रायः वंशस्थवृत्तम्। 'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणात्॥ १॥

मन्दोपकारिणी – अथेति॥ अथ गुरुकुलवाससमाप्त्यनन्तरम्। विशारदः विदग्धः एषः वासुदेवः। सल्लोकदयासुधार्द्रया सन्तश्च ते लोकाः जनाश्च सल्लोकाः सल्लोकेषु दया सल्लोकदया। सैव सुधा अमृतं सल्लोकदयासुधया आर्द्रया क्लिन्नया। सदागमस्तेन-निरासकामया सन्तः निर्दोषाश्च ते आगमाः वेदादिशास्त्राणि च तेषां स्तेनः तस्करः। 'चौरैकागारिकस्तेनदस्युतस्करमोषकाः' इत्यमरः। तस्य निरासे कामः इच्छा यस्याः सा तथोक्ता तया। रमावरावासभुवा रमायाः लक्ष्म्याः वरः उत्तमः हरिः तस्य आवासस्य निवासस्य भूः स्थानं तया। श्रीहरिः सर्वदा तद्धृदये तिष्ठतीति भावः। एवंभूतया विशालया महत्या 'विशालं पृथुलं महत्' इत्यमरः। बह्वर्थविषयकारिण्या इति यावत्। आत्मनः स्वस्य धिया अन्तःकरणेन अचिन्तयत् विचारं कृतवान्। 'चिति स्मृत्यां इत्यतो लङ् परस्मैपदं अचिन्तयत् अचिन्तयतां अचिन्तयन्'। सर्गसमाप्तिपर्यन्तं प्रायः वंशस्थविलं वृत्तम्। वदन्ति वंशस्थविलं जतौ जराविति तल्लक्षणात्॥ १॥

अनन्यसङ्गाद्गुणसङ्गिता हरेर्जनस्य मानं तु विशिष्टचेष्टितम्।
असङ्गमस्मात्प्रकटीकरोम्यहं निजं भजन् पारमहंस्यमाश्रमम्॥ २॥

पदार्थदीपिकोद्बोधिका – विचारप्रकारमेव विवृणोति— **अनन्येति॥** अन्येषां भगवदितरवस्तूनां सङ्गः संसर्गः अन्यसङ्गः। स न भवति इति अनन्यसङ्गः तस्मात् भगवदितरवैषयिकवस्तुषु आसक्तिराहित्यादित्यर्थः। हरेर्गुणानां सङ्गोऽस्यास्तीति गुणसङ्गी। तस्य भावस्तत्ता श्रीहरिगुणश्रवणमननादिषु आदरवत्वमित्यर्थः। घटत इति शेषः। जनस्य विशिष्टचेष्टितं तु विशिष्टानामुत्तमानामाचरणमेव मानं प्रमाणम्। विशिष्टाचरणमेव प्रमाणीकृत्येतरजनाः प्रवर्तन्त इति भावः। 'यद्यदाचरति श्रेष्ठ' इति वचनात्। अस्मात् कारणात् विशिष्टाचरणस्य प्रमाणत्वादिति यावत्। अहं, परमहंसानां सम्बन्धी पारमहंस्यस्तं आश्रमं यत्याश्रममित्यर्थः। 'आश्रमोऽस्त्री मुनिस्थाने ब्रह्मचर्यादिके मठे' इति वैजयन्ती। भजन् सन् निजं मम स्वभावभूतम्। न विद्यते सङ्गो यस्य सोऽसङ्गस्तम्। भावप्रधानो निर्देशः। असङ्गत्वमिति यावत्। सङ्गाभावोऽसङ्गस्तमिति वा। प्रकटीकरोमि सर्वेषां प्रदर्शयामि॥ २॥

मन्दोपकारिणी – विचारप्रकारमेव आह - **अनन्येति॥** यस्मात्कारणात् अनन्यसङ्गात् अन्यस्मिन् भगवदितरविषये सङ्गः आसक्तिः अन्यसङ्गः विषयभोगः इति यावत्। अन्यसङ्गस्य अभावः अनन्यसङ्गः विषयासक्त्यभावः इत्यर्थः। तस्मात् हरेः श्रीनारायणस्य गुणसङ्गिता गुणेषु जगत्कर्तृत्वादिषु सङ्गिता आसक्तिः घटत इति शेषः। विषयवैराग्ये सत्येव हरिमहिमाश्रवणमननादौ आदरो युज्यते नान्यथेति भावः। जनस्य विशिष्टचेष्टितं तु, विशिष्टानां उत्तमानां चेष्टितं तु कर्मानुष्ठानमेव। 'तु स्याद्भेदेऽवधारणे' इत्यमरः। मानं प्रमाणं भवतीति शेषः। सर्वे जनाः शिष्टाचारमेव प्रमाणीकृत्य कर्मानुष्ठाने प्रवर्तन्ते इति भावः। 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इत्युक्तेः। अस्मात् शिष्टाचारस्य प्रमाणत्वात् अहं पारमहंस्यं परमहंसानां यतीनां संबन्धी पारमहंस्यः तं आश्रमं भजन् स्वीकुर्वन् सन्। निजं मम स्वभावभूतं असङ्गं विषयासक्त्यभावं प्रकटीकरोमि सर्वेषां जनानां प्रदर्शयामि। प्रकटीति च्विप्रत्ययान्तमव्ययम्। विषयासक्त्यभावे सत्येव हरिमाहात्म्य-श्रवणादौ आसक्तिर्घटते न अन्यथा। मम तु विषयासक्त्यभावः स्वभाव एव। किन्तु शिष्टाचारमेव प्रमाणीकृत्य सत्कर्मानुष्ठाने प्रवर्तमानानां जनानां विषयवैराग्यं प्रदर्शयितुं यत्याश्रमं स्वीकरिष्य इति भावः॥ २॥

मम प्रभोर्नापरथा हि शोभते द्विषत्सु विष्णुं यददण्डधारणम् ।
हरिस्वसा नन्वचिरादसद्भिदे भवेदतो नास्मि च दण्डधारकः॥ ३ ॥

पदार्थदीपिकोद्बोधिका – ममेति॥ विष्णुं द्विषत्सु मायिप्रभृतिषु वादिषु यत् दण्डस्य, नैर्गुण्यवादित्वेन हरिद्वेषिणां मायिप्रभृतीनां, जिह्वोच्छेदादिलक्षणशिक्षायाः, धारणं दण्डधारणं तस्याभावोऽदण्डधारणम्। 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे दम' इति वैजयन्ती। तत् प्रभोः भगवद्वेषिषु दण्डधारणसमर्थस्य मम अपरथा यत्याश्रमस्वीकारं विना न शोभते। शुभ दीप्तौ लट्। तर्हि क्रियतां दण्डधारणं, किमिति पारमहंस्यमाश्रीयत इत्यत आह—हरिस्वसेति। हरिस्वसा श्रीकृष्णभगिनी दुर्गा। असद्भिदे असतां निरासाय अचिराच्छीघ्रं भवेत् अवतारं कुर्यात्। अतस्तया दुर्गया असद्दण्डस्य करिष्यमाणत्वात् अहं च दण्डधारको नास्मि। अयं भावः, श्रीहरिद्वेषिणां देहादिदण्डनं कार्यमेव समर्थेन। तदप्यचिरात् दुर्गया करिष्यते तस्मादस्मिन्नवसरे नाहं करोमि। तस्माद्दण्डधारणायोग्यं यत्याश्रममेव स्वीकरोमीति॥ ३ ॥

मन्दोपकारिणी – यत्याश्रमस्वीकारे निमित्तान्तरमाह - **ममेति॥** अपरथा यत्याश्रमस्वीकाराभावे। प्रभोः भगवद्वेषिशिक्षणे समर्थस्य मम विष्णुं द्विषत्सु मायावादिप्रभृतिषु यत् अदण्डधारणं दण्डस्य जिह्वाच्छेदादिरूपशिक्षणस्य। 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे वने' इति वैजयन्ती। अधारणं अकरणं न शोभते हि न युज्यते हि। तर्हि क्रियतां द्वेषिणां शिक्षणं इत्यत आह- हरिस्वसेति। यत् यस्मात् कारणात्। 'यत्तद्यतस्ततो हेतौ' इत्यमरः। हरिस्वसा हरेः श्रीकृष्णस्य स्वसा भगिनी दुर्गा असद्भिदे असतां विष्णुद्वेषिणां भिदे निरासाय अचिरात् शीघ्रं भवेन्ननु अवतरिष्यति ननु। अतः विष्णुद्वेषिदण्डस्य दुर्गया करिष्यमाणत्वात् अहं च अहमपि दण्डधारकः दण्डस्य कर्ता नास्मि न भवामि। अयं भावः। श्रीहरिद्वेषिणां देहादिदण्डनं कार्यमेव। तदपि शीघ्रमेव दुर्गया करिष्यते। तथा करिष्यमाणं शिक्षणं मया इदानीं न कार्यमेव। समर्थेन दण्डधारणयोग्याश्रमस्थितेन मया शिक्षां अकृत्वा च न स्थातव्यं प्रत्यवायप्राप्तेः। अतः दण्डधारणायोग्यं प्रत्यवायानापादकं यत्याश्रमं स्वीकरिष्य इति अचिन्तयदिति पूर्वेणान्वयः॥ ३ ॥

विचिन्तयन्नित्थमनन्तचिन्तकः समस्तसन्यासनिबद्धनिश्चयः ।
असावनुज्ञार्थमथानमद्धरिं समस्तसंव्यापिनमात्मदायगम् ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – विचिन्तयन्निति ॥ अनन्तचिन्तकः भगवतश्चिन्तानिरतः असौ। इत्थं विचिन्तयन् सन्। अथ समस्तस्य गृहक्षेत्रादेः सन्यासे परित्यागे निबद्धो निरूढो निश्चयो यस्य तादृशः सन्। अनुज्ञार्थं गन्तुमनुज्ञां स्वीकर्तुं, समस्तं जगत्, संव्याप्तुं सम्यग् व्याप्तुं शीलमस्यास्तीति तम्। आत्मनः स्वस्य दायः गृहक्षेत्रादिस्तं गच्छतीति तादृशस्तं हरिं अनमत् ॥ ४ ॥

मन्दोपकारिणी – विचिन्तयन्निति ॥ अनन्तचिन्तकः अनन्तस्य भगवतः हरेः चिन्तकः सदा ध्यानकर्ता। असौ वासुदेवः इत्थं पूर्वोक्तप्रकारेण विचिन्तयन् विचारयन्। अथ अनन्तरं समस्तसन्यासनिबद्धनिश्चयः समस्तस्य गृहक्षेत्रादेः संन्यासे परित्यागे निबद्धः निरूढः दृढ इति यावत् निश्चयः निर्णयः यस्य स तथोक्तः सन्। अनुज्ञार्थं हरेरनुज्ञां स्वीकर्तुं समस्तसंव्यापिनं समस्ते सर्वस्मिन् जगति संव्यापिनं सम्यक् व्याप्तुं शीलं अस्यास्तीति संव्यापी तम्। आत्मदायगं आत्मनः स्वस्य दाये क्षेत्रादौ गच्छति विद्यत इति आत्मदायगः तं हरिं अनमत् नमस्कृतवान्। 'णमु प्रह्वत्वे शब्दे चेत्यतो लङ् परस्मैपदं अनमत् अनमतां अनमन्' इति ॥ ४ ॥

निजे जने किं नमसीति पृच्छति ब्रुवन् स्ववस्तुप्रणतिं व्यधामिति ।
गुरोः किलान्वेषणवान् जगद्गुरुस्तदा जगामाखिललोकशिक्षकः॥५॥

भावप्रकाशिका – स्ववस्तु स्वस्वामिनं नित्याप्रतिहतं ब्रह्म ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – निजेति ॥ तदा नमस्कारकाले निजे स्वकीये पित्रादौ जने किं किमर्थं नमसि नमस्कारं करोषीति पृच्छति सति। तं जनं प्रतीति शेषः। स्वस्य वस्तु स्ववस्तु स्वस्वामिभूतं विष्ण्वाख्यं वस्तु इत्यर्थः। तस्मै प्रणतिं नमस्कारं व्यधां अकरवम् इति ब्रुवन् वदन्। स्वभावतस्तत्तद्वस्त्वन्तर्गतभगवन्नमस्कारं कृत्वापि अमुख्यया वृत्या वस्तुशब्देन धनक्षेत्रादि इतरपदार्थस्यापि वाच्यत्वात्तत्प्रणतिं व्यधामिति पृच्छतामुत्तरं दत्वेत्यर्थः। जगद्गुरुः सकलजगतां गुरुरपि अखिललोकानां समस्तजनानां शिक्षकः। स

गुरोरन्वेषणवान् विचारवान् सन् जगाम किल। किलेत्यपरमार्थे। भगवदितरस्य सर्वस्याप्ययं गुरुस्तस्मादस्य गुर्वन्वेषणं लोकविडम्बनार्थमिति सूचयति किलशब्देन। अयं भावः। अज्ञस्य हि गुर्वपेक्षा न चायमज्ञस्तथापि ज्ञानिनां देवानां मानुषादिजन्मसु स्वज्ञानादिगुणानप्रकाश्य अज्ञवच्छ्रवणादिकं कर्तव्यमिति लोकशिक्षणार्थमेव गुर्वन्वेषणार्थं जगामेति। तच्चोक्तं 'धर्मो हि सर्वविदुषामपि दैवतानां प्राप्ते नरेषु जनने नरवत्प्रवृत्तिः। ज्ञानादिगूहनमुताध्ययनादिरत्र' इति ॥ ५ ॥

मन्दोपकारिणी – निजेति ॥ तदा गृहादिषु नमस्कारकाले। निजे स्वकीये जने पित्रादिजने, हे वासुदेव! 'किं किमुद्दिश्य नमसि नमस्करोषि' इति एवं पृच्छति सति तं निजजनं प्रति स्ववस्तुप्रणतिं स्वेषु स्वकीयेषु वस्तुषु पदार्थेषु प्रणतिं नमस्कारं व्यधाम् कृतवान्। 'डु धाञ् धारणपोषणयोः लुङ् परस्मैपदं व्यधां व्यधाव व्यधाम'। इति एवं ब्रुवन् प्रत्युत्तरं वदन्। अत्र स्ववस्तुशब्देन मुख्यतः स्वस्वामिभूतं मुख्यं वस्तु परब्रह्मैव अभिप्रेतम्। तस्मै प्रणतिं व्यधामिति अभिप्रायं प्रकटयन् अमुख्यया वृत्या वस्तुशब्देन धनक्षेत्रादिपदार्थस्यापि वाच्यत्वात् तत्प्रणतिं व्यधामिति ब्रुवन्निव पृच्छतां प्रत्युत्तरं दत्वा। जगद्गुरुः स्वयं जगतां सकलजनानां गुरुरपि गुरोः अन्वेषणवान् अन्वेषणं मार्गणं अस्यास्तीति अन्वेषणवान् यत्याश्रमं गृहीतुं गुरुं विचारयन् इति यावत्। जगाम किल गतवान् हि। 'गम्लृ गतावित्यस्मात् लिट् परस्मैपदं जगाम जग्मतुः जग्मुः'। वायुर्हि भगवदितरस्य सर्वस्यापि गुरुः। अतः एतस्य गुरुविचारणं लोकानुकरणार्थमेवेति सूचयति। किलशब्देन लोकविडम्बनस्य प्रयोजनमाह। अखिललोकशिक्षक इति। अखिललोकानां देवादीनां शिक्षकः अनुशासक इति। अयं भावः। अज्ञस्य गुर्वपेक्षा। न चायं अज्ञः। तथापि ज्ञानिनां देवादीनां मनुष्यादिजन्मसु सुखज्ञानादिगुणानप्रकाश्य अज्ञानिवत् गुरुमुखात् श्रवणादिकं कर्तव्यमिति लोकशिक्षार्थमेव गुरुं अन्वेषणं कर्तुं जगाम इति। तच्चोक्तं 'धर्मो हि सर्वविदुषामपि दैवतानां प्राप्ते नरेषु जनने नरवत्प्रवृत्तिः। ज्ञानादिगूहनमुताध्ययनादिरत्र' इति ॥ ५ ॥

यतिर्यतात्मा भुवि कश्चनाभवद्विभूषणो भूरिविरक्तिभूषणः।
न नाममात्राच्छुचिमर्थतोऽपि यं जनोऽच्युतप्रेक्षमुदाहरत्स्फुटम् ॥६॥

भावप्रकाशिका – अच्युतप्रेक्षः प्रेक्षा प्रज्ञा प्रतिभेति ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – यतिरिति ॥ जनः शुचिं वाङ्मनःकायैः शुद्धं यं यतिं, केवलं नाम नाममात्रं तस्मात्। डित्थादिवन्नाममात्रेणेत्यर्थः। अच्युतप्रेक्षं अच्युतप्रेक्षनामानं न उदाहरत् न प्रोक्तवान् किन्तु स्फुटं सम्यग् अर्थतोऽपि, अच्युतस्य प्रेक्षा ज्ञानं यस्य सोऽच्युतप्रेक्ष इति व्युत्पत्या भगवज्ज्ञानवत्वलक्षणशब्दप्रवृत्तिनिमित्तादपीत्यर्थः। 'प्रेक्षोपलब्धिश्चित्संविदि'त्यमरः। अच्युतप्रेक्षमुदाहरत्। तादृशो यतिर्यतो नियत आत्मा मनो यस्य तादृशः। विगतानि भूषणानि आभरणानि यस्य तादृशः। भूरिर्बह्वी या विरक्तिः सैव भूषणमलङ्कारो यस्य तादृशः। यत्याश्रमभूषणभूतविषयविरक्तिमानित्यर्थः। कश्चन यतिस्तस्मिन्कालेऽभवत् ॥ ६ ॥

मन्दोपकारिणी – यतिरिति ॥ तस्मिन् काले भुवि भूमौ यतात्मा यतः निगृहीतः आत्मा मनो येन सः यतात्मा। 'अत्मा देहो मनो ब्रह्म' इति विश्वः। विभूषणः विगतं कुण्डलादिविभूषणं यस्मात् स विभूषणः। भूरिविरक्तिभूषणः भूरिः भूयसी विरक्तिः वैराग्यं भूषणं यत्याश्रमयोग्यालङ्कारः यस्य स तथोक्तः। एवंभूतः कश्चन यतिः सन्यासी अभवत्। जनः शुचिं मनोवाक्कायकर्मभिः शुद्धम्। शुचिः शुद्धेऽनुपहते' इति विश्वः। यं यतिं नाममात्रात् नामैव नाममात्रं तस्मात् शब्दत एव इति भावः। 'अल्पे च परिमाणे स्यान्मात्रं कात्स्न्र्येऽवधारणे' इत्यमरः। अच्युतप्रेक्षं नोदाहरत् किन्तु स्फुटं सम्यक् अर्थतोऽपि अच्युतप्रेक्षशब्दार्थवत्तयापि अच्युतप्रेक्षनामानं उदाहरत् अन्ववदत्। अच्युतप्रेक्ष इति डित्थादिशब्दवत् सङ्केतिकं नाम तस्य न भवति किन्तु अच्युतस्य हरेः प्रेक्षा ज्ञानं यस्य स अच्युतप्रेक्ष इति सार्थकं नाम तस्य यतेरिति भावः। 'प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः' इत्यमरः। अनेन शुद्धत्वं मनोनिग्रहः वैराग्यं भगवज्ज्ञानं इत्येते सन्यासिनो विहितगुणाः। अस्मिन् अच्युतप्रेक्षे सन्तीति तस्य सन्यासं दातुं अधिकारोऽस्तीत्युक्तं भवति ॥ ६ ॥

पुरैष कृष्णाकरसिद्धशुद्धिमद्धरान्नभुक्त्या किल पाण्डवालये।
विशोधितात्मा मधुकृत्प्रवृत्तिमांश्चचार कांश्चित् परिवत्सरान् मुदा ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – पुरेति ॥ एषोऽच्युतप्रेक्षः पुरा पूर्वजन्मनि यतिः सन् मधु करोतीति मधुकृत् तस्य प्रवृत्तिः। ततस्ततो गत्वा पुष्परसादानलक्षणव्यापारः, सा अस्यास्तीति तादृशः। मधुकरवत् तत्र तत्र भिक्षाटनलक्षणमाधूकरव्रतनियतः सन्नित्यर्थः। कृष्णाया द्रौपद्याः करेण सिद्धं निष्पन्नं अत एव शुद्धिमत् वरान्नं उत्तमान्नं तस्य भुक्त्या भोजनेन विशोधितो निर्मलीकृत आत्मा मनो यस्य तादृशः सन्। 'अन्नमशितं त्रेधा विधीयत' इति श्रुतेः उपभुक्तस्यान्नस्यान्तःकरणपरिणामहेतुत्वादिति भावः। पाण्डवानामालयो मन्दिरं यस्मिन् तस्मिन् पाण्डवानां हस्तिनापुरादिदेश इत्यर्थः। पाण्डवानामालय इति वा योजना। कांश्चित्परिवत्सरान् संवत्सरान् मुदा प्रीत्या चचार सञ्चचार। किलेति ऐतिह्ये ॥ ७ ॥

मन्दोपकारिणी – पुरेति ॥ एषः अच्युतप्रेक्षनामा यतिः। पुरा पूर्वजन्मनि यतिः सन्। मधुकृत्प्रवृत्तिमान् मधुकृत् मधुकरः भ्रमरः तस्य प्रवृत्तिरिव प्रवृत्तिः अस्यास्तीति मधुकृत्प्रवृत्तिमान्। भ्रमरो यथा तत्र तत्र अनेकपुष्परसपानेन वर्तते तथा अयमपि गृहे गृहे स्वयोग्यानेकभिक्षान्नं अश्नन् वर्तमान इति भावः। 'मधुव्रतो मधुकरो मधुलिण्मधुपालिनः' इत्यमरः। तादृशः सन्। कृष्णाकरसिद्धशुद्धिमद्धरान्नभुक्त्या कृष्णायाः द्रौपद्याः करः हस्तः तेन सिद्धं निष्पन्नं कृतपाकमिति यावत्। शुद्धिः पावित्र्यं अस्यास्तीति शुद्धिमत्। द्रौपदीकरकृतत्वादेव पवित्रमित्यर्थः। अत एव वरं उत्तमं अन्नं भिक्षया लब्धं ओदनं तस्य भुक्त्या भोजनेन। कृष्णायाः करः कृष्णाकरः। कृष्णाकरेण सिद्धं कृष्णाकरसिद्धम्। वरं च तत् अन्नं च वरान्नम्। शुद्धिमच्च तत् वरान्नं च शुद्धिमद्धरान्नम्। कृष्णाकरसिद्धं च तत् शुद्धिमद्धरान्नं च तस्य भुक्तिः तया कृष्णाकरसिद्धशुद्धिमद्धरान्नभुक्त्या। विशोधितात्मा विशोधितः पवित्रीकृतः आत्मा देहो मनश्च यस्य स तथोक्तः। पाण्डवालये पाण्डवानां आलयः गृहं यस्मिन्देशे स पाण्डवालयः तस्मिन् हस्तिनावतीपुरादौ पाण्डवदेशे। कांश्चित् परिवत्सरान् संवत्सरान् मुदा सन्तोषेण चचार । किल इत्यनेन एवं एतत् प्रसिद्धं अस्तीति सूचयति। पूर्वजन्मनि यतिरेषः भिक्षाचरणनियमवान् सन् द्रौपदीदत्त-भिक्षान्नभोजनेन निर्मलीकृतदेहान्तःकरणः सन् कतिपयवर्षेषु मुदा पाण्डवदेशे सञ्चारं कुर्वन् अभूदिति भावः ॥ ७ ॥

अभूत्कुशास्त्राभ्यसनं न पातकं क्रमागताद्विप्रतिसारतो यतेः ।
यथा कुशस्त्राध्यसनं मुरद्विषः पदाम्बुजे व्याधवरस्य गर्हितम् ॥ ८॥

भावप्रकाशिका – विप्रतिसारः पश्चात्तापः ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – अभूदिति ॥ यतेः अच्युतप्रेक्षस्य क्रमेणागतात् क्रमप्राप्तात् श्रीमध्वशास्त्रश्रवणानन्तरमुत्पन्नादित्यर्थः । विप्रतिसारादिति विप्रतिसारतः पश्चात्तापादित्यर्थः । 'पश्चात्तापोऽनुतापस्याद्विप्रतीसार इत्यपि' इत्यमरः । कुशास्त्रस्य कुत्सितमायिशास्त्रस्य अभ्यसनं श्रवणादिरूपाभ्यासः पातकं अधःपातकारणं नाभूत् । पश्चात्तापात्पातकिनामपि पापनिवृत्तिसंभवादिति भावः । तत्र दृष्टान्तमाह– यथेति । मुरद्विषः श्रीकृष्णस्य पदाम्बुजे व्याधवरस्य जराव्याधनाम्नो व्याधश्रेष्ठस्य । कुत्सितं च तत् शस्त्राध्यसनं च कुशस्त्राध्यसनं यथा तद्वत् । श्रीकृष्णस्य स्वलोकारोहणकाले जराव्याधेन भ्रान्त्या कृतं बाणेन श्रीकृष्णपादतले ताडनं, तस्य 'अयं श्रीकृष्ण' इति ज्ञानानन्तरं पश्चात्तापेन नरकसाधनं न जातम् । तद्वन्मायिशास्त्रादिकुशास्त्रश्रवणमप्यस्य पश्चात्तापान्नरकप्राप्तिसाधनं नाभूदिति भावः ॥ ८ ॥

मन्दोपकारिणी – अभूदिति ॥ यतेः अच्युतप्रेक्षस्य क्रमागतात् क्रमेण आगतात् प्राप्तात् विप्रतिसारतः पश्चात्तापात् 'पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि' इत्यमरः । कुशास्त्राभ्यसनं कुत्सितं च तत् शास्त्रं च कुशास्त्रं मायिशास्त्रम् । 'पापकुत्सेषदर्थे कु धिङ् निर्भर्त्सननिन्दयोः' इत्यमरः । तस्याभ्यसनं श्रवणमननादिरूपाभ्यासः असकृदावर्तनम् पातकं अधःपातकारणं नाभूत् मायिप्रणीतकुत्सितशास्त्रश्रवणादिकं नित्यनिरयपातकारणमपि अस्य पातकारणं नाभूत् । कुतः । श्रीमध्वशास्त्रश्रवणानन्तरं उत्पन्नपश्चात्तापेन पातकनिवृत्तिसंभवादिति भावः । अत्र दृष्टान्तमाह—यथेति । मुरद्विषः मुरनामकासुरस्य द्विट् द्वेषी तस्य श्रीयादवकृष्णस्य पदाम्बुजे पदं पादः अम्बुजं कमलमिव तस्मिन् । व्याधवरस्य जरानाम्नो व्याधश्रेष्ठस्य कुशस्त्राध्यसनं कुशस्त्रस्य बाणस्य अध्यसनं क्षेपणं कुशस्त्राध्यसनं तस्य व्याधस्या पश्चात्तापात् यथा गर्हितं पातककारणं नाभूत्, तथेति पूर्वेणान्वयः । अयं अत्र कथासङ्ग्रहः । सर्वयादवानां स्वर्गगमनकाले अश्वत्थमूले उपविष्टस्य श्रीकृष्णस्य अतिरक्ते पादतले पक्षीति भ्रान्त्या जरानामको व्याधः शरं चिक्षेप । अनन्तरं तत्समीपं

आगत्य श्रीकृष्णं दृष्ट्वा पश्चात्तापं कृतवान्। तेन कुत्सितं शरक्षेपणकर्म पापकारणं नाभूदिति ॥ ८ ॥

विनीतमाम्नायशिरोविशारदं सदैव तत्त्वं प्रबुभुत्सुमादरात्।
गुरुर्विदित्वोपगतां निजां मृतिं कदाचिदूचे तमुपह्वरे गिरम् ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – विनीतमिति ॥ गुरुः अच्युतप्रेक्षस्य गुरुः कदाचित् निजां मृतिं मरणं उपगतां समीपगतां विदित्वा। विनीतं विनयोपेतम्। आम्नायानां वेदानां शिरांसीव आम्नायशिरांसि उपनिषदः तेषु विशारदं विचारविचक्षणं सदा तत्त्वं भगवत्तत्त्वमेव। आदर आसक्तिस्तस्मात् प्रकर्षेण याथार्थ्येन बोद्धुमिच्छुं प्रबुभुत्सुं तं शिष्यं उपह्वरे एकान्ते। 'रहः प्रच्छन्नमेकान्तनिःशब्दकमुपह्वरम्' इति हलः। गिरं वाचमूचे उवाच ॥ ९ ॥

मन्दोपकारिणी – विनीतमिति ॥ गुरुः अच्युतप्रेक्षस्य गुरुः। कदाचित् कस्मिंश्चित् दिवसे। निजां स्वकीयां मृतिं मरणं उपगतां समीपे आगतां विदित्वा ज्ञात्वा समीपवर्तिनं मरणकालं ज्ञात्वा इत्यर्थः। विनीतं वश्यं 'वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः' इत्यमरः। विनयोपेतमिति यावत्। आम्नायशिरोविशारदं आम्नायाः वेदाः 'श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः' इत्यमरः। तेषां शिरांसि शीर्षस्थानीयाः उपनिषदः इत्यर्थः। तासु तदर्थविचारे विशारदं विचक्षणम्। सदा तत्त्वमेव भगवत्स्वरूपमेव प्रबुभुत्सुं प्रकर्षेण सामर्थ्येन बोद्धुमिच्छन्तं तं स्वशिष्यं अच्युतप्रेक्षं उपह्वरे एकान्ते। 'उपह्वरे समीपे स्यादेकान्ते च रथे पुमान्' इति विश्वः। आदरात् स्नेहात् गिरं वाचं ऊचे अब्रवीत्। 'वच परिभाषण इत्यतो लिडात्मनेपदं ऊचे ऊचाते ऊचिरे' ॥ ९ ॥

अहं स्वयं ब्रह्म न किञ्चिदस्ति मत्परं विजृम्भेत यदा स्फुटं चितिः।
इतीह मायासमयोपपादितं निरन्वयं सुव्रत मा स्म विश्वसीः॥१०॥

पदार्थदीपिकोद्बोधिका – वचनप्रकारमेव दर्शयति— **अहमिति ॥** सु शोभनं व्रतं यस्य तत्सम्बुद्धिः। हे सुव्रत! अहं स्वयं साक्षात् ब्रह्म परब्रह्म इति चितिः ज्ञानं यदा स्फुटं सम्यग् विजृम्भेत परिपक्वं भवेत्। 'जृभि गात्रविनामे'। तदा मत् मत्तः परं व्यतिरिक्तं किञ्चिद्वस्तु नास्ति, इति इह तत्त्वविषये माया कल्पितं ब्रह्मव्यतिरिक्तमिति समयः

सिद्धान्तः मायासमयः मायावादिशास्त्रमित्यर्थः। तस्मिन् 'समयस्तु क्रियाकारे सङ्केते चरिते सताम्। सिद्धान्ते शपथे काल' इति वैजयन्ती। उपपादितं समर्थितं प्रमेयमिति शेषः। यतः निर्गता अन्वया उपपत्त्यादिलिङ्गानि यस्मात्तं निरन्वयं युक्तिशून्यमित्यर्थः। तस्मात् इह अस्मिन् प्रमेये मा स्म विश्वसीः विश्वासं मा कार्षीः। श्वस प्राणने लुङ्। न माङ्योगे इत्यडभावः। अत्र विश्वासकरणे हेतुत्वेन निरन्वयमिति हेतुगर्भं विशेषणं प्रयुक्तम्। तथा च युक्तिशून्यत्वाद्विश्वासो न कार्य इति भावः॥ १०॥

मन्दोपकारिणी – किमुवाच इत्यत आह **अहमित्यादिना॥** सुव्रत! शोभनानि व्रतानि विष्णुपञ्चकादीनि यस्य सः सुव्रतः तस्य संबुद्धिः हे सुव्रत! स्वयं साक्षात् ब्रह्म इति चितिः ज्ञानम्। चिती संज्ञान इति धातोः। यदा स्फुटं सम्यक् विजृम्भेत परिपक्वं भवेत् तदा मत्परं मत् मत्तः परं व्यतिरिक्तं किञ्चित् नास्ति। इति एवं, इह तत्त्वविषये मायासमयोपपादितं मायायाः अज्ञानस्य समयः सिद्धान्तः। समयाः शपथाचारकाल-सिद्धान्तसंविदः' इत्यमरः। तस्मिन् उपपादितं समर्थितं प्रमेयमिति शेषः। मा विश्वसीः अत्र प्रमेये विश्वासं मा कार्षीः। 'विपूर्वकात् श्वस प्राणन इति धातोर्लुङ् परस्मैपदं अविश्वसीः अविश्वसिष्टं अविश्वसिष्ट'। कथंभूतं प्रमेयम्, निरन्वयं निर्गतः अन्वयः उपपत्यादिलिङ्गं यस्मात् तं निरन्वयम्। हेतुगर्भमिदं विशेषणम्। उपपत्यादयस्तु 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये' इत्यत्रोक्ताः ज्ञेयाः॥ १०॥

यदेतदात्मैक्यमुपास्तिचोदितं न मे गुरोरप्यपरोक्षतां गतम्।
पुरातनानामपि सौम्य कुत्रचित् ततो मुकुन्दं भज संविदे मुदा॥ ११॥

पदार्थदीपिकोद्बोधिका – यदिति॥ उपास्तये उपासनाय चोदितं मायिना प्रोक्तं यदात्मैक्यं चेतनानामैक्यं सर्वेषां चेतनानां ब्रह्मैक्यमिति भावः। एतत् मे गुरोरप्यपरोक्षतां प्रत्यक्षतां न गतम् न प्राप्तम्। न केवलं मे गुरोरेव, किन्तु पुरातनानामपि मद्गुर्वपेक्षया पूर्वजानामपि कुत्रचित् अपरोक्षतां न गतम्। हे सौम्य! शोभन! ततः आत्मैक्यस्य प्रत्यक्षागोचरत्वाद्युक्त्यादिरहितत्वाच्च मुकुन्दं मोक्षप्रदं श्रीहरिं मुदा प्रसन्नबुद्ध्या संविदे तत्वज्ञानाय भज। तत्वज्ञानाय प्रार्थयन् सन् भजेति भावः॥ ११॥

मन्दोपकारिणी – यदिति ॥ हे सौम्य ! शान्तरूप ! उपास्तिचोदितं उपास्तये उपासनाय चोदितं मायावादिनोक्तं यत् आत्मैक्यं आत्मनां जीवानां ऐक्यं ब्रह्मणा अभेदः। 'आत्मा यत्ने धृतौ जीवे' इति भास्करः। तत् जीवब्रह्मैक्यं मे मम गुरोरपि अपरोक्षतां प्रत्यक्षविषयतां न गतं न प्राप्तं न केवलं मम गुरोरेव किन्तु पुरातनानामपि मम गुरोः सकाशात् पूर्वेषामपि ज्ञानिनां कुत्रचित् कस्मिंश्चित् जीवे जीवब्रह्मैक्यं अपरोक्षतां न गतम्। ततश्च आत्मैक्यस्य साक्षात्कारागोचरत्वात् युक्त्यादिरहितत्वाच्च। मुकुन्दं सर्वेषां जीवानां मोक्षप्रदं अत्यन्तभिन्नमिति यावत्। हरिं मुदा सन्तोषेण प्रसन्नबुद्धिस्सन् इति भावः। संविदे तत्त्वज्ञानाय भज उपास्व। 'भज सेवायां इत्यतो लोट् परस्मैपदं भज भजतं भजत' इति ॥ ११ ॥

इतीदमादिश्य वचो वचस्विनि स्वके गुरौ लोकमथान्यमीयुषि ।
असेवतालोच्य मुहुर्गुरोर्गिरं स रूप्यपीठालयमिन्दिरावरम् ॥ १२ ॥

भावप्रकाशिकां – वचस्विनि । 'अस्मायामेधास्रजो विनिः' (५.२.१२१) इति विनिः ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ वचांसि अस्य सन्तीति वचस्वी तस्मिन् चतुरवचसीत्यर्थः। स्वके स्वसम्बन्धिनि गुरौ, इति इदं वचः आदिश्योक्त्वा अन्यं परं लोकं ईयुषि सति गते सति अथ स अच्युतप्रेक्षः गुरोः स्वगुरोर्गिरं 'अहं स्वयं ब्रह्मेत्यारभ्य मुकुन्दं भज संविदे मुदा' इत्यन्तां वाचम् मुहुः पुनः पुनः आलोच्य गुरूक्तप्रकारेण कुर्यां न वेति विचार्य अन्ततः करोमीत्येव निश्चित्य रूप्यपीठमालयो यस्य तं इन्दिरावरं रमापतिं श्रीमदनन्तासनं असेवत। षेवृ सेवने लङ् ॥ १२ ॥

मन्दोपकारिणी – इतीति ॥ वचस्विनि चतुरवचने। स्व एव स्वकः स्वार्थे कः तस्मिन्। 'आत्मीये स्वोऽस्त्रियां धने' इति विश्वः। गुरौ इति इत्थं इदं पूर्वोक्तं वचः वचनं 'भाषितं वचनं वचः' इत्यमरः। आदिश्य उपदिश्य अन्यं लोकं परलोकं ईयुषि सति गते सति मृते सतीति यावत्। अथ अनन्तरं सः अच्युतप्रेक्षः गुरोः गिरं मुकुन्दं भज इत्युक्तां वाचं मुहुः पुनः पुनः आलोच्य विचार्य अन्ततः करोम्येवेति निश्चित्य रूप्यपीठालयं

रूप्यपीठं रजतपीठपुरं आलयो यस्य स तथोक्तः तं इन्दिरावरं इन्दिराया लक्ष्म्याः वरं पतिं अनन्तेश्वरम्। इन्दिरापतिं इति क्वचित् पाठः। असेवत अभजत्। 'सेव् सेवने इत्यस्माल्लङात्मनेपदं असेवत असेवेतां असेवन्त' इति ॥ १२ ॥

सुभक्तिना तेन स भक्तवत्सलो निषेवितस्तत्र परं बुभुत्सुना।
भविष्यतः शिष्यवराद्धि विद्धि मामिति प्रविष्टः पुरुषं तमभ्यधात् ॥ १३॥

पदार्थदीपिकोद्बोधिका – सुभक्तिनेति ॥ परं सर्वोत्तमं हरिं बोद्धुमिच्छुना बुभुत्सुना शोभना भक्तिर्यस्य तेन सुभक्तिना अच्युतप्रेक्षेण। तत्र रजतपीठपुरे निषेवितो नितरां सेवितः भक्तेषु वत्सलः स्निग्धः भक्तप्रिय इत्यर्थः। स हरिः कालान्तरे पुरुषं कञ्चन पुरुषं प्रविष्टः सन् तं अच्युतप्रेक्षं प्रति भविष्यतः शिष्यवराच्छिष्यश्रेष्ठात् मां विद्धि जानीहि इति अभ्यधात् अब्रवीत्। तत्त्वजिज्ञासुना त्वया सेवितोऽहं परितुष्टोऽस्मि। तस्मान्मत्प्रसादादेव तव शिष्यवरो भविष्यति। तदुक्तप्रकारेण मां जानीहीत्यभ्यधादिति भावः ॥ १३ ॥

मन्दोपकारिणी – सुभक्तिनेति ॥ परं सर्वोत्तमम्। 'दूरानात्मोत्तमाः पराः' इत्यमरः। हरिं बुभुत्सुना ज्ञातुं इच्छता सुभक्तिना सु अतिशयिता भक्तिः यस्य सः सुभक्तिः तेन सुभक्तिना। तेन अच्युतप्रेक्षेण तत्र रजतपीठपुरे निषेवितः नितरां सेवितः भक्तवत्सलः भक्तेषु स्निग्धः 'स्निग्धस्तु वत्सलः' इत्यमरः सः अनन्तेश्वरः पुरुषं कञ्चन पुरुषं प्रविष्टः सन् हे अच्युतप्रेक्ष! त्वं भविष्यतः कालान्तरे आगमिष्यतः शिष्यवराद्धि शिष्येषु उत्तमादेव हि। 'हि हेतावववधारणे' इत्यमरः। मां विद्धि जानीहि इति अभ्यधात् अब्रवीत्। 'विद ज्ञान इत्यतो लोट् परस्मैपदं विद्धि वित्तात्, वित्तं वित्त'। अभिपूर्वकात् डु धाञ् धातोः लुङ् परस्मैपदं अधात् अधातां अधुः'। अयं भावः। 'हे अच्युतप्रेक्ष! मद्विषयतत्त्वज्ञानार्थं त्वया सेवितोऽहं परितुष्टोऽस्मि। मत्प्रसादादेव उत्तमः शिष्यो भविता। तदुक्तप्रकारेणैव मां जानीहि' इति अब्रवीत् इति ॥ १३ ॥

प्रतीक्षमाणं तमनुग्रहं मुदा निषेवमाणं पुनरम्बुजेक्षणम्।
सतां गुरुः कारणमानुषाकृतिर्यतिं प्रशान्तं तमुपाससाद सः ॥ १४॥

पदार्थदीपिकोद्बोधिका – प्रतीक्षमाणमिति ।। सतां गुरुः कारणेन मत्तत्त्वज्ञान-प्रवर्तनलक्षणनिमित्तेन मानुषाकृतिः मनुष्यस्वरूपं यस्य तादृशः। 'आकृतिस्तु जातौ रूपे वपुष्यपि' इति हेमचन्द्रः। स वासुदेवनामा, तं हरिकृतमनुग्रहं प्रतीक्षमाणं पुनः मुदा अम्बुरुहवत् ईक्षणं दृष्टिर्यस्य तं हरिं निषेवमाणं नितरां सेवन्तं प्रशान्तं तं यतिं अच्युतप्रेक्षं उपाससाद शिष्यभावमाप्तुमुपजगाम ।। १४ ।।

मन्दोपकारिणी – प्रतीक्षमाणमिति ।। सतां सज्जनानां गुरुः ज्ञानोपदेष्टा कारणमानुषाकृतिः कारणेन निमित्तेन मानुषस्य आकृतिः देहो यस्य स तथोक्तः। सः वासुदेवः तं हरिकृतं अनुग्रहं शिष्यप्राप्तिरूपं प्रसादं प्रतीक्षमाणं कदा वा आगमिष्यति शिष्यः इति ध्यायन्तं पुनः भूयोऽपि अम्बुजेक्षणं अम्बुजवत् कमलवत् ईक्षणे चक्षुषी यस्य स तथोक्तः तं हरिं मुदा निषेवमाणं भजन्तं प्रशान्तं हरौ प्रकर्षेण निष्ठावन्तं यतिं सन्यासिनं तं अच्युतप्रेक्षं उपाससाद उपसत्तिमकरोत्। शिष्यत्वं आप्तुं शुश्रूषितवानिति भावः। 'उप आङ् पूर्वात् षद्लृ विशरणगत्यवसादनेषु इति धातोर्लिट् परस्मैपदं ससाद सेदतुः सेदुः' इति ।। १४ ।।

सुतं यतीन्द्रानुचरं विरागिणं निशम्य संन्यासनिबद्धमानसम्।
सुवत्सलौ रूप्यतलालयस्थितं वियोगतान्तौ पितरौ समीयतुः ।। १५ ।।

पदार्थदीपिकोद्बोधिका – सुतमिति ।। सुवत्सलौ सु सम्यक् वत्सलौ स्नेहयुक्तौ वियोगतान्तौ वियोगक्लिन्नौ तौ, माता च पिता च पितरौ। 'पिता मात्रा' इत्येकशेषः। सुतं यतीन्द्रानुचरं अच्युतप्रेक्षशिष्यभूतं विरागोऽस्यास्तीति विरागी तम्। संन्यासे निबद्धं निषण्णं मानसं मनो यस्य तम्। 'स्वान्तं हृन्मानसं मनः' इत्यमरः। रूप्यतले रूप्यपीठे य आलयो मन्दिरं तस्मिन् स्थितं निशम्य समीयतुः। सुतं द्रष्टुं संन्यासान्निवारयितु-मप्यागतौ ।। १५ ।।

मन्दोपकारिणी – सुतमिति ।। सुवत्सलौ सुष्ठु पुत्रस्नेहवन्तौ। वियोगतान्तौ वियोगेन पुत्रविरहेण तान्तौ ग्लानिं प्राप्तवन्तौ। तमु ग्लानाविति धातोः। पुत्रविरहं असहमानौ इति

भावः। पितरौ वासुदेवस्य जननीजनकौ सुतं यतीन्द्रानुचरं यतीन्द्रस्य सन्यासिश्रेष्ठस्य अच्युतप्रेक्षस्य अनुचरं सेवकं विरागिणं रागः विषयेषु आसक्तिः अस्यास्तीति रागी स न भवतीति विरागी तं विरागिणं विरक्तमित्यर्थः। 'रागोऽनुरागो मात्सर्ये' इति रत्नमाला। सन्यासनिबद्धमानसं सन्यासे सन्यासाश्रमस्वीकारविषये निबद्धं कृतनिश्चयं मानसं अन्तः-करणं यस्य स तथोक्तस्तम्। रूप्यतलालयस्थितं रूप्यं रजतं तलं स्वरूपं यस्य सः रूप्यतलः। 'तलं स्वरूपाधारयोः' इति विश्वः। रूप्यतलः रूप्यात्मकश्चासौ आलयश्च रूप्यतलालयः रजतपीठपुरमित्यर्थः। तस्मिन् वर्तमानं निशम्य श्रुत्वा समीयतुः द्रष्टुं सन्यासाश्रमं निवारयितुमपि जग्मतुः। पाजकक्षेत्रादिति शेषः। 'इण् गताविति लिट् परस्मैपदं इयाय ईयतुः ईयुः' ॥ १५ ॥

वराश्रमस्ते जरतोरनाथयोर्न जीवतोः स्यादयि नन्दनावयोः।
सयाचनं वाक्यमुदीर्य ताविदं परीत्य पुत्राय नतिं वितेनतुः॥ १६ ॥

पदार्थदीपिकोद्बोधिका – वरेति॥ तौ पितरौ अयि नन्दन! अयीत्यव्ययं प्रार्थने वर्तते। अयि सुत! जरतोः स्थविरयोः। न विद्यते नाथः रक्षको ययोस्तयोः अन्ते वयसि त्वां विना पालकरहितयोरित्यर्थः। आवयोर्जीवतोर्जीवनवतोस्सतोः, ते तव वराश्रमः उत्तमाश्रमः संन्यासाश्रम इत्यर्थः न स्यात् न भवेत्, इति सयाचनं प्रार्थनया सहितमिदं वाक्यमुदीर्य परीत्य प्रदक्षिणीकृत्य पुत्राय नतिं नमस्कारं वितेनतुः प्रचक्रतुः॥ १६ ॥

मन्दोपकारिणी – वरेति॥ तौ पितरौ। अयि नन्दन सुत! जरतोः वृद्धयोः। 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि' इत्यमरः। अनाथयोः अन्ते वयसि त्वां विना पालकरहितयोः जीवतोः जीवमानयोः सतोः, ते तव वराश्रमः वरः उत्तमः आश्रमः यत्याश्रमः न स्यात् न भवेत्। इति एवं प्रकारेण सयाचनं याचना प्रार्थना तया सहितं इदं वाक्यं उदीर्य उक्त्वा परीत्य प्रदक्षिणीकृत्य पुत्राय वासुदेवाय नतिं नमस्कारम्। 'नतिः स्त्रियां नमस्कारः प्रणामश्च नमस्क्रिया' इत्यमरः। वितेनतुः चक्रतुः। 'तनु विस्तार इत्यतो लिट् परस्मैपदं ततान तेनतुः तेनुः' ॥ १६ ॥

नतिर्न शुश्रूषुजनाय शस्यते नतं भवद्भ्यां स्फुटमत्र साम्प्रतम्।
अहो विधात्रा स्वयमेव दापिता तदभ्यनुज्ञेति जगाद स प्रभुः ॥ १७ ॥

पदार्थदीपिकोद्बोधिका – नतिरिति ॥ शुश्रूषुजनाय सेवकजनाय नतिर्नमस्कारः न शस्यते न प्रशस्यते। शसु इच्छायाम्। तथापि अत्र सेवके मयि साम्प्रतं इदानीं स्फुटं सर्वजनसमक्षं भवद्भ्यां नतं नमनं कृतम्। तत एव विधात्रा सर्वप्रेरणादिकर्त्रा श्रीहरिणा स्वयमेव मत्प्रार्थनं विनैव तस्य यत्याश्रमस्य अभ्यनुज्ञा अनुज्ञा दापिता प्रदापिता। अहो आश्चर्यम्! प्रभुः स, इति जगाद ऊचे। अयं भावः। उत्तमो नम्यो, हीनो न इति विधिविहितनियमः। तथा च भवद्भ्यां नत्वा मम प्रकृतयत्याश्रमनिर्बन्धनादुत्तमत्वं भविष्यतीति विधिना सूचितम्। तस्माद्विधिना एवाभ्यनुज्ञातत्वात् मम यत्याश्रमोऽपरिहार्य इति ॥ १७ ॥

मन्दोपकारिणी – नतिरिति ॥ शुश्रूषुजनाय शुश्रूषुः सेवकश्चासौ जनश्च शुश्रूषुजनः तस्मै। नतिः नमस्कारः न शस्यते न प्रशस्यते न विहिता इति भावः। तथापि अत्र सेवके मयि सांप्रतं अधुना। 'एतर्हि संप्रतीदानीमधुना सांप्रतं तथा' इत्यमरः। स्फुटं सर्वजनसमक्षं भवद्भ्यां युवाभ्यां नतं नमस्कृतं तत एव विधात्रा अदृष्टप्रेरकेण हरिणा स्वयमेव मत्प्रार्थनां विनैव तदभ्यनुज्ञा तस्मिन् यत्याश्रमस्वीकारविषये अभ्यनुज्ञा अनुमतिः दापिता प्रदापिता। अहो एतदाश्चर्यम्! अयं भावः, उत्तमो नम्यः, कनिष्ठश्च नमस्कर्ता इति विहितो नियमः। तथा च भवद्भ्यां उत्तमाभ्यां नतत्वात् मम प्रकृतयत्याश्रमनिमित्तं उत्तमत्वं भविष्यतीति विधिना सूचितम्। तस्मात् विधिना भवद्भ्यां अनुज्ञायाः दापितत्वात् मम वराश्रमोऽपरिहार्य एव इति भावः। इति इत्थं स प्रभुः वासुदेवः पितरौ प्रति जगाद अब्रवीत्। 'गद व्यक्तायां वाचीत्यतो लिट् परस्मैपदं जगाद जगदतुः जगदुः' ॥ १७ ॥

अनुत्तरज्ञः स तमर्थयन् पुनर्यतीन्द्रमानम्य गतः प्रियायुतः।
गृहे वसन् कल्पसमान् क्षणान्नयन् सुताननेन्दोरनिशं ततोऽस्मरत् ॥१८॥

भावप्रकाशिका – सुताननेन्दोरस्मरत् 'अधीगर्थदयेशां कर्मणि' (२.३.५२) इति कर्मणि षष्ठी ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – अनुत्तरेति ॥ ततः स मध्यगेहभट्टः। उत्तरं प्रत्युत्तरं न जानातीत्यनुत्तरज्ञः। पुत्रोक्तवाक्यस्य प्रत्युत्तरं दातुमजानन्नित्यर्थः। प्रियायुतः भार्यायुतः सन् पुनस्तं पुत्रमर्थयन्। अयि नन्दन! त्वया यत्याश्रमो न स्वीकर्तव्य इति प्रार्थयन् सन्, तं यतीन्द्रं यतिश्रेष्ठमच्युतप्रेक्षं आनम्य नत्वा, अस्मै यत्याश्रमो न देय इति प्रार्थयन्निति वा योजना। गतः स्वमन्दिरं गतः। ततः स्वगृहप्राप्त्यनन्तरं गृहे मन्दिरे वसन् क्षणान् एकैकक्षणमपि कल्पेन कल्पाख्यकालेन समान् सदृशान् नयन् गमयन् सन् अनिशं निरन्तरं सुताननेन्दोः सुतमुखचन्द्रस्य अस्मरत्। अत्र 'अधीगर्थदयेशां कर्मणि' इति षष्ठी। इगर्थः स्मरणार्थः, इक् स्मरण इति धातोः। दुःखिनां क्षणोऽपि कल्पायते , सुखिनां कल्पोऽपि क्षणायत इति प्रसिद्धेः कल्पसमानित्युक्तम् ॥ १८ ॥

मन्दोपकारिणी – अनुत्तरज्ञ इति ॥ सः मध्यगेहः अनुत्तरज्ञः उत्तरं प्रत्युत्तरं न जानातीति अनुत्तरज्ञः सुतवचनस्य प्रत्युत्तरमजानन् सन्। प्रियायुतः प्रियया भार्यया युतः युक्तस्सन्। पुनः भूयोऽपि तं पुत्रं अर्थयन् अयि नन्दन! यत्याश्रमो न स्वीकर्तव्य इति प्रार्थयन्। यतीन्द्रं यतिश्रेष्ठं अच्युतप्रेक्षम् आनम्य नत्वा अर्थयन् अस्मै मत्पुत्राय यत्याश्रमो न दातव्य इति प्रार्थयन्निति वा योजना। गतः स्वमन्दिरं गतः प्राप्तस्सन् ततः स्वमन्दिरप्राप्त्यनन्तरं गृहे वसन् वासं कुर्वन् क्षणान् एकैकक्षणान् तन्नामककालविशेषान्। 'कालविशेषोत्सवयोः क्षणः' इत्यमरः। कल्पसमान् कल्पेन बहुवत्सरात्मकेन कालविशेषेण समान् तुल्यान् नयन् क्षपयन्। अनिशं निरन्तरं सुताननेन्दोः सुतस्य आननं मुखं इन्दुरिव चन्द्र इव तस्य सुताननेन्दोः इति। 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी। सुताननेन्दुं इत्यर्थः। अस्मरत् स्मृतवान् 'स्मृ चिन्तायामित्यतो लङ् परस्मैपदं अस्मरत् अस्मरतां अस्मरन्'। दुःखिनां क्षणोऽपि कल्पायते सुखिनां कल्पोऽपि क्षणायत इति 'त्रुटियुगायते त्वामपश्यताम्' इत्यादौ प्रसिद्धम्। अतः कल्पसमानित्युक्तम् ॥ १८ ॥

स चिन्तयन् पुत्रमनोरथं शुचा पुनश्च तीर्त्वोपगतो महानदीम्।
यतीश्वरानुव्रतमात्मनन्दनं तमैक्षत ग्रामवरे मठान्तरे ॥ १९ ॥

भावप्रकाशिका – महानदी 'नेत्रावती'। **ग्रामवरस्य** 'कार्यूरु' इत्यपभ्रष्टभाषा। **मठान्तरस्य** 'कुत्याडी' त्यपभ्रष्टभाषा ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ शुचा दुःखेन पुत्रस्य मनोरथः संन्यासग्रहणेच्छा तम्। 'वाञ्छा लिप्सा मनोरथः' इत्यमरः। चिन्तयन् स भट्टः पुनश्च महानदीं नेत्रावतीं तीर्त्वोपगतः स्वगृहात्पुत्रदर्शनार्थमागतः। ग्रामवरे ग्रामश्रेष्ठे 'कारेवूरु' इत्यपभ्रष्टनामकग्राम इत्यर्थः। अन्यो मठो मठान्तरं तस्मिन् 'कुत्याडि' इत्यपभ्रष्टनामकमठविशेष इत्यर्थः। व्रतीश्वरस्य अच्युतप्रेक्षस्य अनुव्रतं अनुकूलव्रतं यस्य तम्। 'पाराशरी व्रती भिक्षुः' इति हलः। आत्मनन्दनं ऐक्षत ॥ १९ ॥

मन्दोपकारिणी – स इति ॥ शुचा शोकेन दुःखेनेत्यर्थः। 'वैरं विरोधो विद्वेषो मन्युशोकौ. तु शुक् स्त्रियाम्' इत्यमरः। पुत्रमनोरथं पुत्रस्य वासुदेवस्य मनोरथं सन्यासविषयवाञ्छाम्। 'इच्छा काङ्क्षा स्पृहेहातृड्वाञ्छा लिप्सा मनोरथः' इत्यमरः। चिन्तयन् सः भट्टः पुनश्च महानदीं महती च सा नदी च महानदी तां नेत्रावतीं नाम नदीं तीर्त्वा उत्तीर्य गतः प्राप्तस्सन्। ग्रामवरे कस्मिंश्चित् ग्रामश्रेष्ठे मठान्तरे मठमध्ये यतीश्वरानुव्रतं यतीश्वरस्य अच्युतप्रेक्षस्य अनु अनुकूलं व्रतं चित्तं यस्य सः यतीश्वरानुव्रतः तं आत्मनन्दनं सुतं ऐक्षत ददर्श। 'ईक्ष दर्शन् इति धातोर्लङात्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त' ॥ १९ ॥

स जातकोपाकुलितो धरासुरो महात्मनां लङ्घनभीरुरप्यलम्।
सुतस्य कौपीनधृतौ हि साहसप्रतिश्रवो मे दृढ इत्यभाषत ॥ २० ॥

पदार्थदीपिकोद्बोधिका – सञ्जातेति ॥ धरासुरो ब्राह्मणः अलं अतितरां महानात्मा परमात्मा येषां तेषां श्रीहरिभक्तानां लङ्घनभीरुरपि लङ्घनादतिक्रमात् भीरुर्भयशीलोऽपि सञ्जातः पुत्रः स्ववाक्यं न शृणोतीति सञ्जातः यः कोपः क्रोधः तेनाकुलितः क्षुब्धस्सन् सुतस्य मम पुत्रस्य कौपीनधृतिः कौपीनधारणं तस्यां सत्यां, संन्यासं गृहीत्वा कौपीनदण्डादिके धृते सतीत्यर्थः। मे मम। साहसप्रतिश्रवोऽनशनादिरूपं किञ्चित्साहसं कर्म कुर्यामिति साहसस्य प्रतिश्रवः प्रतिज्ञा, दृढः केनाप्यनिवर्त्य इत्यभाषत अब्रवीत् ॥ २० ॥

मन्दोपकारिणी – स इति ॥ सः धरासुरः ब्राह्मणः। अलं अत्यन्तं महात्मनां आर्याणां लङ्घनभीरुरपि लङ्घनात् अतिक्रमात् भीरुः भयशीलोऽपि जातकोपाकुलितः स्ववाक्यं न करोतीति मत्वा जातेन कोपेन क्रोधेन आकुलितः वशीकृतः सन् इत्यभाषत

अब्रवीत्। किमिति ? सुतस्य पुत्रस्य कौपीनधृतौ गुह्यमात्राच्छादनरूपं वितस्त्यायतं द्विहस्तदीर्घच्छिन्नपटैकदेशात्मकं वस्त्रं कौपीनमित्युच्यते। उपलक्षणमेतत्। कौपीनस्य कौपीनदण्डादेर्धृतौ सत्यां धारणे सति मे मम साहसप्रतिश्रवः साहसे आत्महत्यादिरूप-किञ्चित्साहसकरणे प्रतिश्रवः अङ्गीकारः प्रतिज्ञेति यावत् दृढः केनाप्यपरिहार्य इति अभाषत इति अन्वयः। 'मे सुतः यत्याश्रमं गृहीतवांश्चेत् अहं स्वप्राणत्यागादिकं यत्किंचित्साहसं करिष्यामि' इति प्रतिज्ञां चकार इति भावः। 'भाष व्यक्तायां वाचीत्यतो लडात्मनेपदं अभाषत अभाषेतां अभाषन्त' ॥ २० ॥

क्षणेन कौपीनधरो निजं पटं विदार्य हे तात कुरुष्व साहसम्।
इतीममुक्त्वा प्रभुरब्रवीत् पुनः शुभान्तरायं न भवांश्चरेदिति ॥२१॥

पदार्थदीपिकोद्बोधिका – क्षणेनेति ॥ प्रभुः समर्थः क्षणेन क्षणकालेन निजं पटं स्वकीयं पटं विदार्य कौपीनधरः सन्, हे तात! चिकीर्षितं साहसं कुरुष्वेति इमं तातं उक्त्वा, हे तात! भवान् विज्ञातभारतादिशास्त्रसारोऽपि शुभान्तरायं शुभस्यान्तरायं विघ्नं न करोतु इति पुनरब्रवीत् ॥ २१ ॥

मन्दोपकारिणी – क्षणेनेति ॥ विभुः वासुदेवः। सुतस्य कौपीनधारणे सति साहसं करिष्यामीति पितुः प्रतिज्ञावाक्यं श्रुत्वा क्षणेन सद्यः तत्क्षण एव इत्यर्थः। निजं स्वकीयं पटं प्रावरणवस्त्रं विदार्य एकदेशं छित्वा कौपीनधरः धरतीति धरः कौपीनस्य धरः धारकः सन्। हे तात ! पितः। 'तातस्तु जनकः पिता' इत्यमरः। चिकीर्षितं कर्तुमिष्टं साहसं कुरुष्व इति एवं प्रकारेण पितरं प्रति उक्त्वा पुनः अब्रवीत्। किमिति। हे तात भवान् विज्ञातशास्त्रसारः शुभान्तरायं शुभस्य विष्णुप्रीत्यर्थकत्वेन मङ्गलरूपस्य यत्याश्रमस्य तत्स्वीकारस्येति भावः। अन्तरायं विघ्नम्। 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। न चरेत् न करोतु इति अब्रवीत् इति अन्वयः। 'चर गतौ भक्षणे इति धातोः लिङ् परस्मैपदं चरेत् चरेतां चरेयुः' ॥ २१ ॥

न पुत्र पित्रोरवनं विना शुभं वदन्ति सन्तो ननु तौ सुतौ मृतौ।
निवर्तमाने न हि पालकोऽस्ति नौ त्वयीति वक्तारममुं सुतोऽब्रवीत् ॥२२॥

भावप्रकाशिका – वदन्ति सन्तः 'वृद्धौ च मातापितरौ सती भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – भट्टः पुत्रवचनं श्रुत्वा संन्यासस्य शुभत्वाभिप्रायेण भवान् शुभान्तरायं न चरेदिति यदुक्तं त्वया तदसत्। पुत्रस्य पितृशुश्रूषातिरिक्तस्य शुभस्याभावादित्याह— न पुत्रेत्यादिना ॥ हे पुत्र! सन्तः धर्मशास्त्रप्रवर्तका मन्वादयः सुतस्य पित्रोः मातापित्रोः अवनं शुश्रूषणादिरूपं रक्षणं विनाऽन्यच्छुभं न वदन्ति। 'वृद्धौ च मातापितरौ सती भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा वोढव्या मनुरब्रवीत्' इति वचनात्। तस्मात्तव यत्याश्रमादपि स्थविरयोरावयोरवनमेव शुभम्। न तत्रान्तरायः क्रियते। तस्मात्किमुच्यते त्वया शुभान्तरायं न चरेदिति, इति पितुरभिप्रायः। युवयोः पालकान्तराभावे मया सर्वथा भवच्छुश्रूषणमेव कार्यम्। सति चान्यस्मिन् पालके कथं युवयोरनाथत्वं? कथं च भवत्पालनमेव शुभम्? इति चेत् न इत्याह–नन्विति। तौ तव भ्रातरौ मम सुतौ मृतौ ननु, त्वमपि जानासि हि इत्यभिप्रायः। तस्मात्त्वयि निवर्तमाने सति निवृत्तिमार्गं यत्याश्रममङ्गीकुर्वति सति नौ आवयोः पालको रक्षको नास्ति हि। इति वक्तारममुं पितरं प्रति इदं वक्ष्यमाणं वचः सुतोऽब्रवीत् ॥ २२ ॥

मन्दोपकारिणी – सुतस्य सन्यासस्वीकरणं शुभं न भवति किन्तु पितृशुश्रूषैव इत्याह मध्यगेहः **न पुत्रेत्यादिना** ॥ हे पुत्र! सन्तः ज्ञानिनः। 'विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः' इत्यमरः। धर्मशास्त्रप्रवक्तारः मन्वादय इति भावः। सुतस्य, पित्रोः मातापित्रोः अवनं शुश्रूषादिरूपरक्षणं विना त्यक्त्वा शुभं न वदन्ति, किन्तु पितृपालनमेव शुभं वदन्ति, तथा हि 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इति। तस्मात् तव यत्याश्रमादपि स्थविरयोः आवयोः अवनमेव शुभम्। न तत्र मया अन्तरायः क्रियते। तस्मात्त्वया किमुच्यते 'शुभान्तरायं न चरेत्' इति इति पितुरभिप्रायः। पुत्रान्तरेण भवत्पालनं भविष्यतीत्यत आह। नन्विति। तौ तव भ्रातरौ सुतौ मम पुत्रौ मृतौ ननु त्वमपि जानासि इत्यभिप्रायः। तस्मात् त्वयि निवर्तमाने सति निवृत्तिं निवृत्तिमार्गं अङ्गीकुर्वति सति निवृत्तिमार्गो नाम सन्यास एव। नौ आवयोः पालको नास्ति हि। इति एवं प्रकारं वक्तारं वदन्तं अमुं पितरं प्रति सुतः अब्रवीत्। ब्रूञ् व्यक्तायां वाचीत्यतो लङ् परस्मैपदं अब्रवीत् अब्रूतां अब्रुवन्' ॥ २२ ॥

यदा विरक्तः पुरुषः प्रजायते तदैव संन्यासविधिः श्रुतौ श्रुतः।
न सङ्गहीनोऽपि परिव्रजामि वामहं तु शुश्रूषुमकल्पयन्निति॥ २३ ॥

भावप्रकाशिका – 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतौ श्रुतः ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – यदुक्तं वृद्धौ च मातापितरावित्यादि, न तत्सर्वाधिकारिकं किन्त्वविरक्तपुरुषविषयमेव न विरक्तपुरुषविषयकं, तथात्वे श्रुतिविरोधादित्याह - **यदेति ॥** पुरुषो यदा यस्मिन्काले विरक्तो विषयासक्तिरहितः प्रजायते तदैव तस्मिन्नेव काले सन्यासविधिः सन्यासविधानम्। 'विधिर्ब्रह्मविधानयो'रिति हेमचन्द्रः। श्रुतौ 'यदहरेव विरजेत् तदहरेव प्रव्रजेदि'त्यस्यां श्रुतौ श्रुतः प्रसिद्धः। तर्हि त्वयि निवर्तमाने सत्यावयोः पालको नास्तीत्यस्योत्तरमाह न सङ्गहीनोऽपीति। अहं सङ्गहीनोऽपि विषयसङ्गरहितोऽपि वां युवयोः शुश्रूषुं सेवकमकल्पयन् सन् न परिव्रजामि न संन्यासं गृह्णामि. इत्यब्रवीदिति पूर्वेणान्वयः ॥ २३ ॥

मन्दोपकारिणी – वैराग्यरहितस्यैव पितृपालनं शुभमिति ज्ञानिनामभिप्रायः। विरक्तस्य सन्यासस्वीकरणमेव शुभम्। अन्यथा श्रुतिविरोध इत्याह। **यदेति ॥** पुरुषः यदा यस्मिन् काले विरक्तः वैराग्यवान् प्रजायते भवति तदैव तस्मिन्नेव काले सन्यासविधिः सन्यासस्य विधिः स्वीकारः श्रुतौ श्रुतः प्रसिद्धः। सा च श्रुतिः 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति प्रसिद्धा। अहं तु सङ्गहीनोऽपि सङ्गेन विषयासक्त्या हीनोऽपि रहितोऽपि विरक्तोऽपीति यावत्। वां युवयोः शुश्रूषुं सेवकं कञ्चन पुरुषं अकल्पयन् असम्पादयन् न परिव्रजामि सन्यासं न गृह्णामीति अब्रवीत् इति पूर्वेण अन्वयः। 'परिपूर्वात् व्रज गताविति धातोर्लट् परस्मैपदं व्रजामि व्रजावः व्रजामः'। 'पितृशुश्रूषणं च धर्मः सन्यासग्रहणं च धर्मः। इदमुभयं एकस्य न संभवति। अतः विरक्तस्य सन्यासः तद्रहितस्य पितृशुश्रूषणं धर्मः। मम तु विरक्तेः जातत्वात् सन्यास एव धर्मः। तथापि अहं निस्सङ्गोऽपि युवयोः रक्षकं सम्पादयित्वा सन्यासं स्वीकरिष्य' इति भावः ॥ २३ ॥

बहुश्रुतत्वाद्यदि तत्सहे बलान्न सा सवित्री विरहं सहेत ते।
इति द्विजेनाभिहितेऽनमत्स तं भवाननुज्ञां प्रददात्विति ब्रुवन् ॥ २४॥

पदार्थदीपिकोद्बोधिका – बहुश्रुतत्त्वादिति ॥ यदि यद्यपि बहूनां बहुशास्त्राणां श्रुतं श्रवणं यस्य तस्य भावस्तत्वं तस्मात् बहुशास्त्रश्रवणबलेन विवेकित्वादित्यर्थः। बलात् धैर्यबलात् तत् तव परिव्रजनं सहे सोढुं समर्थः। षह मर्षणे। तथापि ते तव सा सवित्री सा माता ते विरहं वियोगं न सहेत। इति वचसि द्विजेन विप्रेण स्वपित्राऽभिहिते सति सः, भवान् अनुज्ञां सन्यासाश्रमानुज्ञां प्रददातु प्रतिदिशतु इति ब्रुवन् सन् तं पितरं अनमत् ॥ २४ ॥

मन्दोपकारिणी – बहुश्रुतत्त्वादिति ॥ यदि यद्यपि अहं बहुश्रुतत्वात् बहु बहुलं श्रुतं श्रवणं यस्य सः बहुश्रुतः तस्य भावः बहुश्रुतत्वं तस्मात् बहुकथाश्रवणबलेन विवेकित्वात् इति यावत्। बलात् धैर्यात् तत् परिव्रजनं सहे सोढुं समर्थः। 'षह मर्षण इत्यतो लट् आत्मनेपदं सहे सहावहे सहामहे'। तथापि ते तव सा सवित्री जननी ते विरहं न सहेत सोढुं शक्या न भवेत्। 'सह धातोर्लिङात्मनेपदं सहेत सहेयाताम् सहेरन्'। इति द्विजेन पित्रा अभिहिते उक्ते सति सः वासुदेवः हे तात! भवान् मम अनुज्ञां प्रददातु मम यत्याश्रमस्वीकरणविषये अङ्गीकारं करोतु। इति ब्रुवन् तं पितरं अनमत् नमस्कृतवान् ॥ २४ ॥

विचिन्त्य विद्वान् स निरुत्तरीकृतस्तथाऽस्तु माताऽनुवदेद्यदीति तम्।
उदीर्य कृच्छ्रादुपगम्य मन्दिरं प्रियासकाशे तमुदन्तमब्रवीत् ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – विचिन्त्येति ॥ एवं न विद्यते उत्तरं यस्य स निरुत्तरः। अनिरुत्तरो निरुत्तरः कृतः निरुत्तरीकृतः प्रत्युत्तररहितत्वेन कृतः स विद्वान् विचिन्त्य, अथ किमत्र वक्ष्यामीति विचार्य, 'यदि माता तव जननी अनुवदेत् संवादं कुर्यात्, तर्हि तथा त्वदुक्तप्रकारेण अस्तु भवतु' इति तं सुतमुदीर्य। कृच्छ्रात् सुतवियोगासहनरूपक्लेशात् मन्दिरं गृहं उपगम्य प्रियासकाशे भार्यासकाशे तं सुतस्यात्मनश्च विवादरूपमुदन्तं वृत्तान्तमब्रवीत् ॥ २५ ॥

मन्दोपकारिणी – विचिन्त्येति ॥ एवं निरुत्तरीकृतं निर्गतं उत्तरं यस्मात् स निरुत्तरः निरुत्तरवत् संपद्यमानः निरुत्तरीकृतः अप्रतिभातप्रत्युत्तर इत्यर्थः। विद्वान् विपश्चित्

स भट्टः विचिन्त्य किमत्र वदामीति विचार्य यदि माता तव जननी त्वदुक्तं इति शेषः। अनुवदेत् संवादं कुर्यात् अङ्गीकुर्यादिति यावत्। तर्हि तथास्तु त्वदुक्तमेव भवतु इति इत्थम् तं सुतं उदीर्य कृच्छ्रात् क्लेशात् सुतविरहासहिष्णुत्वादिति भावः। मन्दिरं स्वभवनं उपगम्य प्राप्य प्रियासकाशे प्रियायाः भार्यायाः सकाशे समीपे सुतस्य आत्मनश्च विवादरूपं उदन्तं वृत्तान्तम्। 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः' इत्यमरः। अब्रवीत्॥ २५॥

निशाचरारेरिव लक्ष्मणः पुरा वृकोदरस्येव सुरेन्द्रनन्दनः।
गदोऽथ शौरेरिव कर्मकृत् प्रियः सुभक्तिमान् विश्वविदोऽनुजोऽभवत्॥२६॥

पदार्थदीपिकोद्बोधिका – निशाचरारेरिति॥ अथ पुरा निशाचराणां रात्रिचराणां रावणादीनां अरेः शत्रोः श्रीरामस्य लक्ष्मण इव, वृकः वृकाख्याग्निरुदरे यस्य तस्य भीमस्य सुरेन्द्रनन्दन इव अर्जुन इव, शूरस्य गोत्रापत्यं पुमाञ्छौरिः श्रीकृष्णस्तस्य गद इव गदनामकानुज इव। 'गदः कृष्णानुजे रोगे गदाप्रहरणान्तर' इति हेमचन्द्रः। सुभक्तिमान् शोभनभक्तिमान् प्रियः कर्मकृत् सेवकः। भक्तिमत्वप्रियत्वसेवकत्वरूपगुणैर्लक्ष्मणार्जुनगदैः समो विश्वविदः सर्वज्ञस्य वासुदेवस्यानुजोऽभवत्॥ २६॥

मन्दोपकारिणी – निशाचरारेरिति॥ अथ किञ्चित्कालानन्तरं पुरा पूर्वं निशाचरारेः निशि रात्रौ चरस्य राक्षसस्य रावणस्य अरिः रामचन्द्रः तस्य। 'रिपौ वैरि सपत्नारिः' इत्यमरः। लक्ष्मण इव कर्मकृत् कर्म सेवां करोतीति कर्मकृत् वृकोदरस्य भीमसेनस्य सुरेन्द्रनन्दन इव सुराणां इन्द्रः सुरेन्द्रः सुरेन्द्रस्य देवेन्द्रस्य नन्दनः तनयः अर्जुनः इव प्रियः प्रीतिविषयः। शौरेः शूरस्य गोत्रापत्यं पुमान् शौरिः तस्य श्रीकृष्णस्य गद इव गदनामानुज इव सुभक्तिमान् एवं त्रिभिः गुणैः समः। विश्वविदः विश्वं अशेषं वेत्तीति विश्ववित् तस्य विश्वविदः सर्वज्ञस्य वासुदेवस्य अनुजः अवरजः। 'यवीयोऽवरजानुजाः' इत्यमरः। अभवत् उत्पन्नः॥ २६॥

कदाचिदाप्यालयबुद्धिरालयं निवेदयन् पालकमेनमेतयोः।
दृढस्वसंन्यासनिषेधनिश्चयां धवानुमत्येदमुवाच मातरम्॥ २७॥

पदार्थदीपिकोद्बोधिका – कदाचिदिति॥ न विद्यते लयः प्रलयेऽपि नाशो यस्यास्तादृशी बुद्धिर्वृत्तिज्ञानपरम्परा यस्य स वासुदेवाह्वयः। कदाचिदालयं मन्दिरम्।

'निकाय्यनिलयालयाः' इत्यमरः। आप्यैतं स्वानुजमेतयोः पित्रोः पालकं रक्षकं निवेदयन्नयं वां पालक इति वदन् सन् धवानुमत्या भर्तुरनुमतेन स्वस्य संन्यासः स्वसंन्यासस्तस्य निषेधः। दृढं यथा भवति तथा स्वसंन्यासनिषेधस्तस्मिन् निश्चयो यस्यास्तां मातरमिदं वच उवाच ॥ २७ ॥

मन्दोपकारिणी – कदाचिदिति ॥ अलयबुद्धिः न विद्यते लयः नाशो यस्याः सा अलया बुद्धिः ज्ञानं यस्य सः अलयबुद्धिः प्रलयेऽपि अविलुप्तज्ञानः। वासुदेवः कदाचित् कस्मिंश्चित् काले आलयं स्वगृहं। 'गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः' इत्यमरः। आप्य गत्वा एनं उत्पन्नं सुतं एतयोः पित्रोः पालकं निवेदयन् अयं वां पालक इति ज्ञापयन् सन्। धवानुमत्या धवस्य भर्तुः। 'धवः प्रियः पतिर्भर्ता' इत्यमरः। अनुमत्या संमतेन दृढस्वसन्यासनिषेधनिश्चयां दृढः अतिनिर्बन्धेन स्वस्य सन्यासः तस्य निषेधे निवारणे कृतः निश्चयः यया तां मातरं प्रति इदं वक्ष्यमाणं वचनमुवाच। 'वच परिभाषण इत्यतो लिट् परस्मैपदं उवाच ऊचतुः ऊचुः' ॥ २७ ॥

वराश्रमाप्तिं मम संवदस्व मां कदाचिदप्यम्ब यदीच्छसीक्षितुम्।
यदन्यथा देशमिमं परित्यजन्न जातु दृष्टेर्विषयो भवामि वः ॥२८॥

पदार्थदीपिकोद्बोधिका – वराश्रमेति ॥ अम्ब! मातः! 'अम्बार्थनद्योरि'ति ह्रस्वः। यदि कदाचिदपि मां ईक्षितुं द्रष्टुमिच्छसि, तर्हि मम वराश्रमाप्तिं सन्यासाश्रमस्वीकारं संवदस्वानुजानीहि। यदन्यथा संवादं न करोषि चेत् इमं देशं परित्यजन्नहं जातु कदापि वो युष्माकं दृष्टेर्विषयो गोचरो न भवामि। अतः संवदस्वेति भावः ॥ २८ ॥

मन्दोपकारिणी – वराश्रमेति ॥ हे अम्ब ! मातः ! यदि कदाचिदपि यस्मिन् कस्मिंश्चित् काले वा मां ईक्षितुं द्रष्टुं इच्छसि तर्हि मम वराश्रमाप्तिं वरः उत्तमश्चासौ आश्रमः यत्याश्रमः तस्य आप्तिं स्वीकरणं संवदस्व अनुजानीहि। अन्यथा संवादं न करोषि चेत् अहं इमं देशं परित्यजन् सन् जात्वपि कदापि। 'कदाचिज्जातु सार्धं तु' इत्यमरः। वां युष्माकं दृष्टेः चक्षुषः विषयः गोचरः न भवामि यत् यस्मात् तस्मात् संवदस्वेति भावः। 'सं पूर्वात् वद व्यक्तायां वाचीत्यतो लोट् आत्मनेपदं संवदस्व संवदेथां संवदध्वम्' ॥ २८ ॥

इति ब्रुवाणे तनये कदाचिदप्यदर्शनं तस्य मृतेर्निदर्शनम् ।
विचिन्त्य पर्याकुलिता चिकीर्षितं सुतस्य कृच्छ्रान्न्यरुणन्न सा शुभा ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ तनये पुत्रे, इति पूर्वोक्तप्रकारेण ब्रुवाणे सति वदति सति पर्याकुलिता किमत्र कुर्यामिति संभ्रान्ता शुभा स्वभावतः शुभानुकूला सा कदाचिदपि दर्शनाभावोऽदर्शनं मृतेः मरणस्य निदर्शनं समानमिति यावत् । इति विचिन्त्य विचार्य तस्य सुतस्य कर्तुमिष्टं चिकीर्षितं संन्यासस्वीकरणं कृछ्रात् क्लेशात् न न्यरुणत् न निरुद्धवती । रुधिरावरणे लङ् ॥ २९ ॥

मन्दोपकारिणी – इतीति ॥ तनये सुते, इति पूर्वोक्तप्रकारेण ब्रुवाणे वदति सति पर्याकुलिता किमत्र कुर्यामिति सम्भ्रान्ता सती तस्य जीवतः सुतस्य कदाचिदपि अदर्शनं मृतेः मरणस्य निदर्शनं दृष्टान्तः इति विचिन्त्य विचार्य सुतस्य चिकीर्षितं कतुमिष्टं कृच्छ्रात् दुःखात् न्यरुणत् न, न निरोधितवती । कुतः । शुभा स्वभावतः सत्कर्मानुकूला सा माता पूर्वोक्तं पुत्रवाक्यं श्रुत्वा भीता सती जीवतः पुत्रस्य अदर्शनं मरणतुल्यमेवेति मत्वा दुःखात् सुताभीष्टस्य निषेधं न चकारेति भावः । 'नि पूर्वक रुधिर् आवरण इति धातोर्लङ् परस्मैपदं न्यरुणत् न्यरुन्धाम् न्यरुन्धन्' ॥ २९ ॥

अथोपगम्यैष गुरुं जगद्गुरुः प्रसाद्य तं देववरप्रसादितः ।
सदा समस्ताश्रमभाक् सुरेश्वरो विशेषतः खल्वभजद्वराश्रमम् ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ पित्रोरनुज्ञास्वीकारानन्तरं देववरैः प्रसादितः प्रसादायाभिमुखीकृतः दुर्मतनिराकरणपूर्वकं सन्मतप्रवर्तनलक्षणदेवताकार्यसाधनोन्मुख इत्यर्थः । जगद्गुरुः सुरेश्वर एषः, गुरुमच्युतप्रेक्षमुपगम्य, तं प्रसाद्य स्वगुणैः सन्तोषयित्वा सदा समस्ताश्रमान् ब्रह्मचर्यादीन् भजतीति तादृशोऽपि, स्वस्य वायुदेवावतारत्वेन सदा सर्वाश्रमवानपीत्यर्थः । वराश्रमं सन्यासाश्रमं अभजत्खलु । देवानां युगपत्समस्ताश्रमभाक्त्वञ्च 'कृत्स्ना एव गृहिणः कृत्स्ना एते यतय एतेषां न पुत्रा दायमुपयन्ति न वैते गृहान् विसृजन्ति', 'देवा एव ब्रह्मचारिणो, देवा एव गृहस्थाः, देवा एव वनस्था' इत्यादिश्रुतिसिद्धम् ॥ ३० ॥

मन्दोपकारिणी – अथेति ॥ अथ मातुः सकाशात् अनुज्ञास्वीकारानन्तरम्। देववरप्रसादितः देववरैः देवश्रेष्ठैः प्रसादितः प्रसादाभिमुखीकृतः। जगद्गुरुः जगतां उपदेशकः। सुरेश्वरः सुराणां देवानां नियामकः। एषः वासुदेवः। गुरुं अच्युतप्रेक्षं उपगम्य उपसत्तिं कृत्वा तं गुरुं प्रसाद्य स्वगुणैः सन्तोषयित्वा सदा समस्ताश्रमभाक् सदा सर्वदा युगपत् समस्ताः चत्वारश्च ते आश्रमाश्च समस्ताश्रमाः तान् भजतीति सदासमस्ताश्रमभाक् सन्नपि इदानीं विशेषतः मनुष्यदृष्टिविषयत्वेन वराश्रमं यत्याश्रमं अभजन् स्वीकृतवान् खलु। वासुदेवस्य युगपत् समस्ताश्रमत्वं च ज्ञापयितुमेव सुरेश्वरः इत्यादिविशेषणम्। देवानां युगपत् समस्ताश्रमभाक्त्वं च 'कृत्स्नादेव गृहिणो देवाः कृत्स्नात् हेतोः यतयः अत एषां न पुत्रा दायं उपयन्ति। न च एते गृहान् विसृजन्ति अरागाः अद्वेषाः अलोभाः सर्वज्ञाः सर्वकर्तारः' इति श्रुतौ 'देवा एव ब्रह्मचारिणः। देवा एव गृहस्थाः। देवा एव वनस्थाः' इति श्रुतौ च प्रसिद्धम् ॥ ३० ॥

क्रियाकलापं सकलं स कालविद्विधानमार्गेण विधाय केवलम्।
सदा प्रसन्नस्य हरेः प्रसत्तये मुहुः समस्तन्यसनं समभ्यधात् ॥ ३१ ॥

भावप्रकाशिका – भक्षणादिसमस्तकर्म कृत्वा 'भूः सन्यस्ता मया' इत्यादि समस्तन्यसनाभिधानम् ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – क्रियेति ॥ कालं कालविशेषं वेत्तीति कालवित्। स वासुदेवः सकलं क्रियाकलापं क्रियासमूहम्। 'कलापो भूषणे काञ्च्यां सङ्घाते भूषबर्हयो'रिति वैजयन्ती। यत्याश्रमस्वीकारसमये कर्तव्यं तद्विधानोक्तं जीवच्छ्राद्धादिसमस्त-क्रियाजातमित्यर्थः। विधानमार्गेण, केवलं सम्यग्विधाय । सदा प्रसन्नस्य हरेः प्रसत्तये प्रसादाय मुहुः समस्तन्यसनं 'भूः सन्यस्ता मये'त्यादिना देहेन्द्रियात्मादीनां समस्तानां सन्यसनं भगवति समर्पणं समभ्यधाच्चक्रे। प्रैषोच्चारणमकरोदिति भावः ॥ ३१ ॥

मन्दोपकारिणी – क्रियेति ॥ कालवित् कालं तत्कालकर्मविशेषं वेत्तीति कालवित् सः वासुदेवः सकलं समस्तं क्रियाकलापं क्रियाणां यत्याश्रमोक्तकर्तव्यानां जीवच्छ्राद्धादि-कर्मणां कलापं समूहं विधानमार्गेण सन्यासविधायकशास्त्रोक्तप्रकारेण केवलं सम्यक् विधाय

कृत्वा सदा प्रसन्नस्य हरेः प्रसत्तये विशेषतः प्रसादाय मुहुः समस्तन्यसनं समस्तानां देहेन्द्रियात्मनां न्यसनं भगवति समर्पणं 'तदभिधायकं मया सर्वं सन्यस्तं' इति एवंरूपं वचनं समभ्यधात् अब्रवीत्। प्रणवोच्चारणं अकरोदिति भावः। 'समभिपूर्वात् डु धाञ् धारणपोषणयोरिति धातोर्लुङ् परस्मैपदं अधात् अधाताम् अधुः' ॥ ३१ ॥

अनन्तमात्रान्तमुदाहरन्ति यं त्रिमात्रपूर्वं प्रणवोच्चयं बुधाः।
तदाऽभवद्भाविचतुर्मुखाकृतिर्जपाधिकारी यतिरस्य सूचितः॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – अनन्तेति॥ बुधा ज्ञानिनस्तिस्रो मात्रा अकरो-कारमकाराख्या वर्णा पूर्वा आद्या यस्य स त्रिमात्रपूर्वस्तं, प्रणवात्मक उच्चयो वर्णसमुदायस्तं, अनन्ता मात्रा वर्णा यस्य सोऽनन्तमात्रो वेदस्तेन अन्तोऽर्थनिर्णयो यस्य सोऽनन्तमात्रान्तस्तं उदाहरन्ति। अकारादिवर्णत्रयपूर्वकमष्टाक्षरात्मकं प्रणवसमुदायं अनन्ताक्षरेण प्रणवव्याख्यानरूपेण समस्तवेदेन निर्णीयमानं प्रवदन्ति ज्ञानिन इति भावः। अस्यैवंविधस्य प्रणवस्य तदा तस्मिन् काले चतुर्मुखस्याकृतिः स्वरूपं यस्य स भविष्यच्चतुर्मुख इत्यर्थः। अत एव सूचितः सुष्ठूचितः। चतुर्मुखस्यैव प्रणवजपे मुख्याधिकारित्वादिति भावः। जपाधिकारोऽस्यास्तीति जपाधिकारी यतिरभवत्। यतिमात्रस्यास्ति जपाधिकारः, भाविचतुर्मुखात्मको यतिरूपस्त्वयं प्रणवस्य मुख्याधिकारी तदाऽभवदिति भावः॥ ३२ ॥

मन्दोपकारिणी – अनन्तेति॥ बुधाः ज्ञानिनः यं प्रणवोच्चयं प्रणवानां उच्चयं समुदायं त्रिमात्रपूर्वं तिस्रो मात्राः यस्मिन् सः त्रिमात्रः प्रणवः। त्रिमात्र एव पूर्वः आदिः यस्य सः विमात्रपूर्वः तं त्रिमात्रपूर्वम्। अनन्तमात्रान्तं अनन्ताः असङ्ख्याः मात्राः यस्मिन् सः अनन्तमात्रः प्रणवः अनन्तमात्र एव अन्तः अन्तिमः यस्य सः अनन्तमात्रान्तः तम्। उदाहरन्ति यं ओंकारं ज्ञानिनः त्रिमात्रप्रणवाद्यनन्तमात्रप्रणवावसानकप्रणवसमुदायरूपं वदन्तीत्यर्थः। अस्य एवंविधस्य प्रणवोच्चयरूपस्य ओंकारस्य अयं वासुदेवः तदा तस्मिन् काले सूचितः सु सम्यक् उचितः योग्यः जपाधिकारी जपे प्रणवमन्त्रावृत्तिकरणे अधिकारी अधिकारवान् यतिः अभवत्। कथंभूतः भाविचतुर्मुखाकृतिः भाविनः उत्तरब्रह्मकल्पे

भविष्यतः चतुर्मुखस्य ब्रह्मणः आकृतिः स्वरूपभूतः। अयं भावः, त्रिमात्रप्रणवं आरभ्य एकैकमात्राधिक्यक्रमेण चतुर्मात्रापञ्चमात्ररूपेण अनन्तमात्रात्मकत्वेन भिन्नाः प्रणवाः अनन्ताः। उक्तं चैतदेकादशस्कन्धतात्पर्ये एकविंशाध्याये 'त्रिमात्रमादितः कृत्वा यावच्चानन्तमात्रकाः । प्रणवास्ते विभेदेन ह्यनन्ताः परिकीर्तिताः। एकमात्रोत्तराः सर्वे वासुदेवाभिधायकाः। तेषां व्याख्यानरूपा हि सर्वे वेदाः प्रकीर्तिताः। ओंकारव्यञ्जितास्तस्मात्सदोच्चार्या हरेः प्रियैः' इति । अत्र मात्रशब्देन एकदेशभूता अकारादयो वर्णाः उच्यन्ते। 'पादाः मात्राः आकारोकारमकार इति माण्डूकोपनिषदुक्तेः, 'पादाः अंशाः उदाहृता' इति तद्भाष्याच्च। ततश्च यतिमात्रस्य प्रणवजपाधिकारे सत्यपि चतुर्मुखस्यैव त्रिमात्रपूर्वानन्तमात्रावसानकानन्तप्रणवसमुदायोंकारमन्त्रजपे मुख्याधिकारित्वात्। अस्य वासुदेवस्य भविष्यच्चतुर्मुखत्वात् एतादृशप्रणवजपेऽयमेव मुख्याधिकारी न अन्य इति। यद्वा बुधाः त्रिमात्रपूर्वं तिस्रो मात्राः अकारोकारमकाराः पूर्वा यस्य सः त्रिमात्रपूर्वः तं यं प्रणवोच्चयं प्रणवसमुदायं अनन्तमात्रान्तं अनन्ताः मात्राः वर्णा यस्मिन् सः अनन्तमात्रः वेदः तेन अन्तः निर्णयः यस्य सः अनन्तमात्रान्तः तं एवंभूतं उदाहरन्ति। अकारादिवर्णत्रयपूर्वकं अष्टाक्षरात्मकं प्रणवसमुदायं अनन्तमात्रेण व्याख्यानरूपेण वेदेन निर्णीयमानं प्रवदन्ति ज्ञानिन इति भावः। अस्य प्रणवस्य तदा सूचितः सम्यक् उचितः जपाधिकारी यतिः अभवत्। यतिमात्रस्य अस्ति प्रणवजपाधिकारः। अयं तु प्रणवजपे मुख्याधिकारी तदा अभवदिति। कुतः भाविचतुर्मुखाकृतिः भविष्यच्चतुर्मुखस्वरूपः चतुर्मुखस्येव सर्ववेदोक्तानुष्ठाने मुख्याधिकारित्वादस्य च भविष्यच्चतुर्मुखस्वरूपत्वात् प्रणवानुष्ठाने चायमेव मुख्याधिकारी इत्युक्तो भवति॥ ३२ ॥

गुणानुरूपोन्नति पूर्णबोध इत्यमुष्य नाम द्विजवृन्दवन्दितः।
उदाहरद् भूरियशा हि केवलं न मन्त्रवर्णः स च मन्त्रवर्णकः॥३३॥

भावप्रकाशिका –'दशप्रमतिं जनयन्त' (ऋ.११.१४१.२) इति मन्त्रवर्णः॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – गुणेति॥ गुणानुरूपोन्नतिरर्थोन्नतिर्यस्य तद्गुणानुरूपोन्नति। अन्वर्थकमिति यावत्। पूर्णबोध इति पूर्णप्रज्ञ इत्यमुष्य यतेः नाम। केवलं मन्त्रवर्णः 'तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः' इति वेद एव नोदाहरत्

न प्रोक्तवान् किन्तु द्विजानां वृन्दानि समूहाः तैः वन्दितः। भूरि बहुलं यशो यस्य तादृशः। इदं विशेषणद्वयं मन्त्रवर्णस्यापि साधरणम्। स, मन्त्रवर्णकश्च प्रणवोपदेष्टाच्युतप्रेक्षश्चोदाहरत्। पूर्णबोधतीर्थ इति नाम प्रोक्तवान्। अयं भावः न केवलं पूर्वोक्तश्रुतिः किन्तु मन्त्रोपदेष्टा गुरुरपि यदृच्छया पूर्णबोध इति नामोदाहरदिति भावः। श्रुत्यर्थस्तु— अस्य वृषभस्य समर्थस्य वायोस्तृतीयं रूपं योषणो योषित्, आदराद्बहुवचनम् दोहसे ज्ञानदोहाय जनयन्ताजनयत्। दशप्रमतिं पूर्णप्रज्ञनामकमित्यर्थः। 'दशेति सर्वमुद्दिष्टं पूर्णं सर्वमिहोच्यते। प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः' इति स्मृतेश्च ॥ ३३ ॥

मन्दोपकारिणि – गुणेति ॥ गुणानुरूपोन्नति गुणानां अनुरूपा अनुकूला उन्नतिः अर्थोत्कर्षः यस्य तदन्वर्थकमिति यावत्। पूर्णबोध इति पूर्णप्रज्ञ इति अमुष्य यतेः नाम केवलं मन्त्रवर्णः वेद एव न उदाहरत् किन्तु मन्त्रवर्णकः मन्त्रस्य वर्णकः वक्ता उपदेष्टा गुरुः इति यावत्। स च उदाहरत्। अयं भावः तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषण इति मन्त्रवर्णः। वेद एव केवलमस्य अन्वर्थकं नाम उदाहरदिति न, किन्तु नामकर्ता गुरुरपि यदृच्छया अस्य पूर्णप्रज्ञस्य तन्नाम अकरोदिति भावः। द्विजवृन्दवन्दितः, भूरियशा इति विशेषणद्वयं मन्त्रवर्णस्य मन्त्रवर्णकस्य च साधारणम्। तृतीयमस्य इत्यस्य अयमर्थः। अस्य वृषभस्य समर्थस्य वायोः तृतीयं रूपं योषणः योषित्। आदरात् बहुवचनम्। दोहसे ज्ञानदोहाय जनयन्त अजनयत्। दशप्रमतिं पूर्णप्रज्ञनामकम्। दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते। प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृत इति स्मृतेश्चेति ॥ ३३ ॥

निरङ्गरागं मुखरागवर्जितं विभूषणं विष्टपभूषणायितम्।
अमुं धृताषाढमवेक्ष्य मेनिरे स्वभावशोभाऽनुपमेति जन्तवः॥ ३४॥

पदार्थदीपिकोद्बोधिका – निरङ्गरागमिति ॥ जन्तवः निर्गतोऽङ्गरागश्चन्दनाद्यनुलेपो यस्मात् तम्। 'अङ्गरागोऽङ्गलेपः स्यादि'ति हलः। मुखरागेण ताम्बूलाञ्जनादिमुखालङ्कारेण वर्जितं रहितम्। विगतानि भूषणानि काञ्चीकटककेयूराङ्गुलीयादिभूषणानि यस्मात् तम्। अमुं पूर्णप्रज्ञाचार्यम्। धृत आषाढो दण्डो येन तम्। 'आषाढो व्रतिनां दण्ड' इति हलः। विष्टपानां त्रिलोकानां भूषणवदाचरतीति विष्टपभूषणायितः तं त्रिलोकालङ्कारभूतमित्यर्थः।

अवेक्ष्य स्वभावा अकृत्रिमा सा च सा शोभा च । न विद्यते उपमा सादृश्यं यस्याः सा अनुपमाऽसदृशेति मेनिरे। मनु अवबोधने लिट्॥ ३४॥

मन्दोपकारिणी – निरङ्गरागमिति॥ जन्तवः निरङ्गरागं चन्दनादिरहितं मुखरागवर्जितं ताम्बूलादिवर्जितं विभूषणं कुण्डलाद्यलङ्कारशून्यं एवंभूतम्। अमुं पूर्णप्रज्ञं धृताषाढं धृतदण्डं विष्टपभूषणायितं त्रैलोक्यालङ्कारभूतमवेक्ष्य। स्वभावशोभा अकृत्रिमशोभा अनुपमा असदृशा इति मेनिरे। 'मनु अवबोधन इत्यतो लिडात्मनेपदं मेने मेनाते मेनिरे'॥ ३४॥

भुजङ्गभूतेशविहङ्गपादिकैः प्रवन्दितः सावसरप्रतीक्षणैः।
ननाम सोऽयं गुरुपूर्वकान् यतीनहो महीयो महतां विडम्बनम् ॥ ३५॥

पदार्थदीपिकोद्बोधिका – भुजङ्गेति॥ योऽवसरस्य समयस्य प्रतीक्षणं दर्शनं तेन सहितैः वर्णितुं कदाऽवसरो भविष्यतीत्यवसरप्रतीक्षणसहितैरित्यर्थः। भुजङ्गश्च भूतानि च तेषामीशौ शेषरुद्रौ, विहङ्गान् पक्षिणः पातीति विहङ्गपो गरुडः। तौ च स च, त आदयो येषां तैः भुजङ्गभूतेशविहङ्गपादिकैः। स्वार्थे कः। प्रवन्दितः सोऽयं पूर्णप्रज्ञाचार्यो गुरुरच्युतप्रेक्षः पूर्वो येषाम् तान् यतीन् ननाम। तथा हि महतां महापुरुषाणां विद्यमानं विडम्बनं प्राकृतजनानुकरणं महीयोऽतिमहत्। अहो आश्चर्यम्॥ ३५॥

मन्दोपकारिणी – भुजङ्गेति॥ सावसरप्रतीक्षणैः वन्दितुं कदा अस्माकं अवसरः अवकाशः भविष्यतीति अवसरस्य प्रतीक्षणं प्रतीक्षा तेन सहितैः। भुजङ्गभूतेशविहङ्गपादिकैः भुजङ्गः शेषः भूतेशः रुद्रः। 'भूतेशः खण्डपरशुः' इत्यमरः। विहङ्गपः विहङ्गान् पक्षिणः पातीति विहङ्गपः गरुडः। भुजङ्गभूतेशौ च विहङ्गपश्च भुजङ्गभूतेशविहङ्गपाः। एते आदयो येषां ते तथोक्तास्तैः शेषादिदेवैः यः प्रवन्दितः नमस्कृतः सः शेषादिवन्दितः अयं पूर्णप्रज्ञाचार्यः, गुरुपूर्वकान् गुरुः अच्युतप्रेक्षनामा स्वगुरुः स एव पूर्वकः आद्यो येषां ते गुरुपूर्वकास्तान् यतीन् सन्यासिनः ननाम नमस्कृतवान्। 'णमु प्रह्वत्वे शब्दे चेत्यतो लिट् परस्मैपदं ननाम नेमतुः नेमुः'। तथा हि महतां श्रेष्ठानां विडम्बनं प्राकृतजनानुकरणं महीयः अतिमहत्। अहो आश्चर्यम्॥ ३५॥

वराश्रमाचारविशेषशिक्षणं विधित्सुरस्याचरितं निशामयन् ।
विशेषशिक्षां स्वयमाप्य धीरधीर्यतीश्वरो विस्मयमायतान्तरम् ॥३६॥

पदार्थदीपिकोद्बोधिका – वरेति ॥ धीरा धीर्यस्य सोऽचञ्चलचित्त इत्यर्थः । यतीश्वरोऽच्युतप्रेक्षः । अस्य पूर्णप्रज्ञाचार्यस्य वराश्रमस्य संन्यासाश्रमस्य आचारविशेषस्य शिक्षणं शिक्षां विधित्सुर्विधातुमिच्छुः सन्, आचरितमाचारं निशामयन् पश्यन् सन् स्वयं विशेषशिक्षां विशेषशिक्षणमाप्याऽन्तरं मानसं विस्मयमायत प्रपेदे। अय पयगतौ लङ् ॥ ३६ ॥

मन्दोपकारिणी – वरेति ॥ धीरधीः धीरा स्थिरा धीः अन्तःकरणं यस्य स तथोक्तः उत्तमशिष्यप्राप्त्या स्वस्थान्तःकरण इति भावः। यतीश्वरः यतीनां सन्यासिनां ईश्वरः श्रेष्ठः अच्युतप्रेक्षः। अस्य श्रीपूर्णप्रज्ञाचार्यस्य वराश्रमाचारविशेषशिक्षणं वराश्रमस्य यत्याश्रमस्य आचारविशेषः तदाश्रमे विहितशौचाचमनस्नानाद्यनुष्ठानविशेष इत्यर्थः। आचारविशेषस्य शिक्षणं उपदेशं विधित्सुः विधातुमिच्छन् सन्। अस्य पूर्णप्रज्ञस्य आचरितं आचारं निशामयन् पश्यन् सन्। स्वयं तस्मात् पूर्णप्रज्ञात् विशेषशिक्षां विशेषतः स्वापेक्षया आधिक्येन शिक्षां अनुष्ठानप्रकारं आप्य ज्ञात्वा आन्तरं अन्तरे मनसि भवं आन्तरं विस्मयं आश्चर्यं आयत प्रपेदे। 'अय गतावित्यस्माद्धातोः लङात्मनेपदं आयत आयेतां आयन्त'। अच्युतप्रेक्षः पूर्णप्रज्ञस्य नूतनयतित्वेन यत्याश्रमकर्तव्यानुष्ठानविशेषानभिज्ञत्वं मत्वा स्वयं तस्य अनुष्ठानविशेषप्रकारं उपदेष्टुकामः सन् स्वयमेव स्वेनापि अज्ञातपूर्णप्रज्ञानुष्ठीयमानाचारविशेषं ज्ञात्वा स्वमनसि आश्चर्यं प्राप इति भावः ॥ ३६ ॥

स रौप्यपीठालयवासिने यदा ननाम नाथाय महामतिर्मुदा ।
तदाऽमुनाऽग्राहि नरप्रवेशिना भुजे भुजेनाशु भुजङ्गशायिना ॥३७॥

पदार्थदीपिकोद्बोधिका – स इति ॥ महती मतिर्यस्य सः पूर्णप्रज्ञो रूप्यपीठालये वस्तुं शीलमस्यास्तीति तस्मै नाथाय स्वामिने मुदा प्रीत्या यदा ननाम तदा नरे कस्मिंश्चित्पुरुषे प्रवेष्टुं शीलमस्यास्तीति तेन अमुना। भुजङ्गे शेषे शेतुं शीलमस्यास्तीति तेन। भुजेन हस्तेन भुजे श्रीपूर्णप्रज्ञहस्ते आशु अग्राहि गृहीतः ॥ ३७ ॥

मन्दोपकारिणी – स इति ॥ सः महामतिः महती पूर्णा मतिः प्रज्ञा यस्य स तथोक्तः पूर्णप्रज्ञ इत्यर्थः। यदा यस्मिन् काले रौप्यपीठालयवासिने रौप्यपीठाख्यं च तत् आलयः गृहं च रौप्यपीठालयः रौप्यपीठपुरमिति यावत् तस्मिन् वासः अस्यास्तीति रौप्यपीठालयवासी तस्मै। नाथाय स्वस्वामिनेऽनन्तेश्वराय मुदा सन्तोषेण ननाम नमस्कृतवान् तदा तस्मिन् काले, नरप्रवेशिना नरे कस्मिंश्चित् पुरुषे प्रवेशः अस्यास्तीति नरप्रवेशी तेन पुरुषप्रविष्टेन। भुजङ्गशायिना भुजङ्गे शेषे शेत इति भुजङ्गशायी तेन अनन्तेश्वरेण। भुजेन अनन्तेश्वरहस्तेन भुजे स्वभुजे आशु शीघ्रं अग्राहि गृहीतः। 'ग्रह उपादाने' इत्यस्मात् कर्मणि लुङात्मनेपदं अग्राहि अग्राहिषातां अग्राहिषत ॥ ३७ ॥

चिरात्सुतत्त्वं प्रबुभुत्सुना त्वया निषेवणं मे यदकारि तत्फलम्।
इमं ददामीत्यभिधाय सोऽमुना तदा प्रणीय प्रददेऽच्युतात्मने ॥३८॥

भावप्रकाशिका – अच्युते आत्मा बुद्धिः प्रज्ञा अस्येति अच्युतात्मा अच्युतप्रज्ञः ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – चिरादिति ॥ तदाऽमुना नरप्रवेशिना हरिणा हस्ते गृहीत्वा प्रणीय, अच्युतप्रेक्षसमीपमानीय सुतत्त्वं शोभनतत्त्वं प्रबुभुत्सुना प्रबोद्धुमिच्छुना त्वया चिरात् बहुकालं मे निषेवणं सेवा अकारि कृतं यद्यस्मात्तस्मात्तत्फलं तस्य निषेवणस्य फलमिमं ददामीत्यभिधाय अच्युते आत्मा मनो यस्य तस्मै अच्युतप्रेक्षाय प्रददे दत्तः। मत्प्रसादात्प्राप्तोऽयं तव मत्तत्त्वमुपदेक्ष्यतीत्युक्त्वा प्रददौ इति भावः ॥ ३८ ॥

मन्दोपकारिणी – चिरादिति ॥ अमुना नरप्रविष्टेन हरिणा सः पूर्णप्रज्ञः तदा हस्तंग्रहणसमये हस्ते गृहीत्वा इति भावः। प्रणीय अच्युतप्रेक्षसमीपं आनीय। अच्युतात्मने अच्युते परमात्मनि आत्मा बुद्धिः यस्य सः अच्युतात्मा अच्युतप्रेक्षः तस्मै। 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च' इत्यमरः। प्रददे दत्तः 'प्रपूर्वात् डुदाञ् दान इत्यतः कर्मणि लिट् आत्मनेपदं ददे ददाते ददिरे'। किं कृत्वा। सुतत्वं शोभनं तत्वं प्रबुभुत्सुना प्रबोद्धुं ज्ञातुमिच्छता त्वया चिरात् बहुकालं मे मम, हे अच्युतप्रेक्ष त्वया यत् निषेवणं सेवा अकारि कृतम्। 'डुकृञ् करणे इत्यतः कर्मणि लुङात्मनेपदं अकारि अकारिषातां

अकारिषत'। तत्फलं तस्य मन्निषेवणस्य फलं फलभूतं अमुं पूर्णप्रज्ञं ददामि इति अभिधाय उक्त्वा प्रदद इत्यन्वयः। 'डु दाञ् दाने लट् परस्मैपदं ददामि दद्वः दद्मः'। मत्प्रसादात् प्राप्तोऽयं पूर्णप्रज्ञः तव मत्तत्वं उपदेक्ष्यतीत्युक्त्वा प्रददौ इति भावः। 'प्रपूर्वात् डुदाञ् दाने लिट् आत्मनेपदं प्रददे प्रददाते प्रददिरे'॥ ३८॥

अनुग्रहं तं प्रतिगृह्य सादरं मुदात्मनाप्तां कृतकृत्यतां स्मरन्।
अभूदसंगोऽपि स तत्सुसंगावानसंगभूषा ननु साधुसङ्गिता॥ ३९॥

भावप्रकाशिका – असङ्गभूषा – संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते। सद्भिरेव स कर्तव्यः सन्तः संगस्य भेषजम्॥ इति॥ ३९॥

पदार्थदीपिकोद्बोधिका – अनुग्रहमिति॥ सोऽच्युतप्रेक्षस्तं देवकृतमनुग्रहं आग्रहेण आदरेण सहितं यथा भवति तथा साग्रहं मुदा प्रतिगृह्याङ्गीकृत्य आत्मना स्वेन, कृतं कृत्यं प्रयोजनं येन तस्य भावस्तत्ता तां आप्तां प्राप्तां स्मरन् सन्, न विद्यते सङ्गः प्राकृतपुरुषसङ्गो यस्य तादृशोऽपि, तत्सुसङ्गवान् तस्मिन् पूर्णप्रज्ञे सु सम्यक् यः सङ्गः संसर्गः सोऽस्यास्तीति तादृशोऽभूत्। एतच्च युक्तमित्याह—साध्विति। साधुषु यः सङ्गः सोऽस्यास्तीति साधुसङ्गी तस्य भावस्तत्ता। न विद्यते सङ्गो विषयसंसर्गो येषां तेषां भूषा अलङ्कारो ननु। यद्वा सङ्गाभावोऽसङ्गस्तस्य भूषेति वा। तथा हि 'सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते। सद्भिः सह स कर्तव्यः सन्तः सङ्गस्य भेषजं' इति श्रुतिः। एवञ्चात्यक्तसङ्गानां सत्सङ्गः सङ्गत्यागकारणं, त्यक्तसङ्गानान्तु भूषणमेवेत्युक्तं भवति॥ ३९॥

मन्दोपकारिणी – अनुग्रहमिति॥ सः अच्युतप्रेक्षः तं भगवत्कृतं अनुग्रहं सादरं आदरेण सहितं यथा भवति तथा भक्तिपूर्वकं मुदा सन्तोषेण प्रतिगृह्य अङ्गीकृत्य। आत्मना स्वेन कृतकृत्यतां कृतं पूर्णं कृत्यं मनोरथः यस्य सः कृतकृत्यः तस्य भावः कृतकृत्यता तां आप्तां प्राप्तां स्मरन्। अहं इदानीं पूर्णं मनोरथं प्राप्तवानस्मि इति अनुसन्दधानस्सन्। असङ्गोऽपि प्राकृतजनसङ्गरहितोऽपि तत्सुसङ्गवान् तस्मिन् पूर्णप्रज्ञे सु सम्यक् सङ्गः आसक्तिः अस्यास्तीति तत्सुसङ्गवान् अभूत्। तद्युक्तमेव हि कुतः साधुसङ्गिता साधुषु सङ्गिता सङ्गवत्वं सङ्ग इत्यर्थः। असङ्गभूषा ननु असङ्गानां सङ्गरहितानां

पुरुषाणां भूषा अलङ्कारो हि । असङ्गः सर्वथा विषयत्यागः स च त्यक्तुं न शक्यते । सद्भिः सह सङ्गः कर्तव्यः । 'सन्तः सङ्गस्य भेषजं' इति स्मृतेः । अत्यक्तसङ्गानां सत्सङ्गस्य विषयत्यागहेतुत्वात् त्यक्तसङ्गानामपि सत्सङ्गः भूषणमेवेत्याशयः ॥ ३९ ॥

यियासति स्वस्तटिनीं मुहुर्मुहुर्नमत्यनुज्ञार्थिनि भूरिचेतसि ।
तमस्मरत् स्वामिनमेव दूनधीर्गुरुर्भविष्यद्विरहाग्निशङ्कया ॥ ४० ॥

पदार्थदीपिकोद्बोधिका यियासतीति ॥ स्वस्तटिनीं स्वर्गनदीं स्वर्गङ्गामित्यर्थः । यियासति यातुमिच्छति । भूरि पूर्णं चेतो बुद्धिर्यस्य तस्मिन् पूर्णप्रज्ञाचार्य इत्यर्थः । अनुज्ञामर्थितुं शीलमस्यास्तीति तस्मिन् सति, अत एव मुहुर्मुहुर्नमति सति । भविष्यन् यो विरहो वियोगः स एवाग्निस्तस्य शङ्कया दूना दुःखिता धीर्मनो यस्य स गुरुरच्युतप्रेक्षः तं रजतपीठगतं स्वामिनमेवास्मरत् । स्मृ आध्याने लङ् ॥ ४० ॥

मन्दोपकारिणी – यियासतीति ॥ स्वस्तटिनीं स्वः स्वर्गस्य 'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः' इत्यमरः । तटिनी नदी 'नदी सरित् तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी' इत्यमरः । तां स्वस्तटिनीं गङ्गां यियासति यातुं इच्छति भूरिचेतसि भूरि पूर्णं 'भूरि प्राज्ये सुपूर्णयोः' इति विश्वः । बह्वर्थविषयकमिति यावत्, चेतः हृदयं यस्य सः भूरिचेताः तस्मिन् पूर्णप्रज्ञे । अनुज्ञार्थिनि अनुज्ञां याञ्चां अर्थयते याचयतीति अनुज्ञार्थी तस्मिन् । मुहुर्मुहुः पुनः पुनः नमति सति नमस्कारं कुर्वति सति । भविष्यद्विरहाग्निशङ्कया विरह एव अग्निः विरहाग्निः भविष्यंश्चासौ विरहाग्निश्च भविष्यद्विरहाग्निः तस्य शङ्कया उद्वेगेन दूनधीः दूना सन्तापिता धीर्मनो यस्य स तथोक्तः । 'सन्तापितसन्तप्तौ धूपितधूपायितौ च दूनश्च' इत्यमरः । पूर्णप्रज्ञे गते मम वियोगो भविष्यतीतिति भयेन दुखितान्तःकरण इति भावः । गुरुः अच्युतप्रेक्षः तं रजतपीठपुरगतं स्वामिनमेव अनन्तेश्वरमेव अस्मरत् । स्मृ चिन्तायां इत्यस्मात् लङ् परस्मैपदं अस्मरत् अस्मरतां अस्मरन्' ॥ ४० ॥

इतस्तृतीये दिवसे द्युनिम्नगा त्वदर्थमास्माकतटाकमाव्रजेत् ।
अतो न याया इति तं तदाऽवदत्प्रविश्य कश्चित् करुणाकरो हरिः॥४१॥

पदार्थदीपिकोद्बोधिका – इत इति ॥ तदा करुणाकरो हरिः कश्चित्पुरुषं प्रविश्य दिवो निम्नगा नदी द्युनिम्नगा गङ्गा। तुभ्यंमिति त्वदर्थम्। इत एतद्दिनात् तृतीये दिवसेऽस्माकं सम्बन्धी आस्माकः स चासौ तटाकश्च तमाव्रजेदागमिष्यति। अतोऽत्रैव स्नातुं शक्यत्वात्त्वं न यायाः, गङ्गायां स्नातुं दूरं न गच्छेति तं पूर्णप्रज्ञमवदत् ॥ ४१ ॥

मन्दोपकारिणी – इत इति ॥ तदा स्मरणे कृते सति। करुणाकरः करुणायाः कृपायाः आकरः खनिः हरिः अनन्तेश्वरः कश्चित् पुरुषं प्रविश्य तं पूर्णप्रज्ञं प्रति अवदत्। हे पुर्णप्रज्ञ द्युनिम्नगा द्यौः सुरलोकः 'सुरलोको द्योदिवौ द्वे' इत्यमरः। तस्याः निम्नगा नदी 'स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा' इत्यमरः। द्योर्निम्नगा द्युनिम्नगा स्वर्गनदी गङ्गा त्वदर्थं तव स्नानार्थं इत्यर्थः। इतः अस्मात् इदानीं वर्तमानात् तृतीये दिवसे आस्माकतटाकं अस्माकं अयं आस्माकः आस्माकश्चासौ तटाकः पद्माकरश्च आस्माकतटाकः तम्। 'पद्माकरस्तटाकोऽस्त्री' इत्यमरः। आव्रजेत् आगमिष्यति। 'व्रज गतौ इत्यतो लिङ् परस्मैपदं आव्रजेत् आव्रजेतां आव्रजेयुः'। अतः एतस्मात् कारणात् दूरदेशं प्रति त्वं न यायाः न गच्छेः इत्यवदत् इति सम्बन्धः। 'या प्रापण इत्यस्मात् विधिलिङ् परस्मैपदं यायाः यायातम् यायात ॥ ४१ ॥

तदाज्ञयोपागतजाह्नवीजले जनोऽत्र सस्नौ सह पूर्णबुद्धिना।
ततः परं द्वादशवत्सरान्तरे सदा व्रजेत्सा तदनुग्रहाङ्किनी ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – तदिति ॥ जनस्तस्य हरेरेवाज्ञा तदाज्ञा तया ।अत्र सरस्युपागता सम्प्राप्ता या जाह्नवी तस्या जले पूर्णबुद्धिना पूर्णप्रज्ञेन सह-सस्नौ। ष्णा शौचे लिट्। सा गङ्गा ततःपरं उत्तरत्र, व्यधिका दश द्वादश ते च ते वत्सराश्च तेषामन्तरे मध्ये। द्वादशवत्सरा अन्तरं यस्मिन् काल इति वा। तस्मिन् पूर्णप्रज्ञे कृतोऽनुग्रहस्तदनुग्रहः। तस्मिन्काले भगवता श्रीमध्वाचार्ये कृतानुग्रह इत्यर्थः। तस्याङ्कः चिह्नं ज्ञापकमिति यावत्, सोऽस्यास्तीति तदनुग्रहाङ्किनी सती भगवता श्रीमध्वाचार्ये कृतस्यानुग्रहस्य चिह्नभूतद्वादश-वत्सरान्तरागमनवतीति भावः। सदा नियमेनाव्रजेत् रजतपीठपुरतटाकमागच्छेत् ॥ ४२ ॥

मन्दोपकारिणी – तदेति ॥ जनः तदाज्ञया तस्य हरेः आज्ञया अत्र तटाके उपागतजाह्नवीजले उपागता प्राप्ता च सा जाह्नवी गङ्गा च उपागतजाह्नवी। तस्याः जलं सलिलं तस्मिन् पूर्णबुद्धिना पूर्णप्रज्ञेन सह सस्नौ स्नातवान्। ष्णा शौच इत्यतो लिट् परस्मैपदं सस्नौ सस्नतुः सस्नुः'। सा गङ्गा ततः परं तस्मात् दिवसात् द्वादशवत्सरान्तरे अन्यो वत्सरो वत्सरान्तरं द्वादश च तत् वत्सरान्तरं च द्वादशवत्सरान्तरं तस्मिन् द्वादशवर्षे इत्यर्थः। सदा नियमेन प्रतिद्वादशवत्सरमिति भावः। आव्रजेत् रजतपीठपुरतटाकं आगच्छेत्। 'आङ् पूर्वकात् व्रज गताविति यतो लिङ् परस्मैपदं आव्रजेत् आव्रजेतां आव्रजेयुः'। कथंभूता। तदनुग्रहाङ्किनी तस्य भगवतः अनुग्रहः तदनुग्रहः तस्य अङ्कः अस्यास्तीति तथोक्तेति विग्रहः। मध्वाचार्ये तस्मिन् भगवति कृतस्य अनुग्रहस्य अङ्कः द्वादशवत्सरे आगमनरूपचिह्नमिति यावत् सोऽस्या अस्तीति तदनुग्रहाङ्किनी भागीरथ्याः अत्र द्वादशवत्सरे आगमनं मध्वे भगवत्कृतानुग्रहसूचकमिति भावः ॥ ४२ ॥

गते दिनानां दशके समासके वराश्रमं प्राप्य सपत्रलम्बनम्।
जिगाय जैत्रान् बहुतर्ककर्कशान् स वासुदेवाह्वयपण्डितादिकान् ॥ ४३॥

भावप्रकाशिका – त्रिदिनं य उपन्यासं व्यधाद्विद्वान् निरन्तरम्। वैशेषिकाग्र्यो विजितो वासुदेवाह्वयोऽमुना ॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – गत इति ॥ स पूर्णप्रज्ञाचार्यः स्वयं वराश्रमं यत्याश्रमं प्राप्य समासके मासेन सहिते । दिनानां दिवसानां दशके गते सति । बहुतर्ककर्कशान् बहुभिस्तर्कैरनुमानैः कर्कशान् कठिनान् परनिराकरणनिर्दयानित्यर्थः। अत एव जैत्रान् जयशीलान् । वासुदेवेत्याह्वयो यस्य स चासौ पण्डितो विद्वांश्च स आदिर्येषां तान्, वासुदेवपण्डितेति कश्चिद्वैशेषिकाग्रणीस्तदादिकानित्यर्थः। पत्रलम्बनेन सहितं यथा भवति तथा सपत्रलम्बनम् सनिर्णायकपत्रमित्यर्थः जिगाय। त्रिदिनञ्चोपन्यासं व्यधात् विद्वान्निरन्तरं वैशिषिकाग्र्यो वासुदेवाह्वयोऽमुना विजित इति च ऐतिह्यम्॥ ४३ ॥

मन्दोपकारिणी – गत इति ॥ सः पूर्णप्रज्ञः वराश्रमं यत्याश्रमं प्राप्य समासके माससहिते दिनानां दिवसानां दशके गते अतीते सति । मासानन्तरं दशसु दिवसेषु

चत्वारिंशद्दिनेषु अतिक्रान्तेषु सत्सु इत्यर्थः। बहुतर्ककर्कशान् बहुविधैः तर्कैः कर्कशान् परनिराकरणे निर्दयान्। अत एव जैत्रान् जयशीलान्। वासुदेवाह्वयपण्डितादिकान् वासुदेव इति आह्वयो नाम यस्य सः वासुदेवाह्वयश्चासौ पण्डितः विद्वांश्च वासुदेवाह्वयपण्डितः स एव आदिः येषां ते वासुदेवाह्वयपण्डितादिकाः तान्। सपत्रलम्बनं पत्रस्य जयपत्रस्य लम्बनं स्वीकारः तेन सहितं यथा भवति तथा जिगाय जितवान् पत्रं गृहीतवानिति भावः। 'जि जय इत्यस्माद्धातोः लिट् परस्मैपदं जिगाय जिग्यतुः जिग्युः' ॥ ४३ ॥

गुरोः स्वशिष्यं चतुरं चिकीर्षतः प्रचोदनाच्छ्रोतुमिहोपचक्रमे।
अथेष्टसिद्धिश्छलजातिवारिधिर्निरादरेणापि महात्मनामुना॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – गुरोरिति॥ अथ महात्मनामुना पूर्णप्रज्ञार्येण इह अस्मिन्ग्रन्थे। निर्गत आदरः आसक्तिः यस्मात्तेनापि। छलानि छलोत्तराणि जातयो जात्युत्तराणि ताभिर्वारिधिरिव वारिधिः पूर्णेत्यर्थः। इष्टसिद्धिरिष्टस्याद्वैत्यभीप्सितात्मैक्यस्य सिद्धिर्येन तादृशः। 'इष्टसिद्धि' नामक अद्वैतग्रन्थविशेषः। स्वशिष्यं चतुरं विदग्धम्। चिकीर्षतः कर्तुमिच्छतः गुरोरच्युतप्रेक्षस्य चोदनात् नियोगात् श्रोतुमुपचक्रमे। क्रमु पादविक्षेपे कर्मणि लिट्। उपक्रान्तम्॥ ४४ ॥

मन्दोपकारिणी – गुरोरिति॥ अथ कतिचिद्दिनानन्तरं महात्मना महान् बहुविषयकः आत्मा मनो यस्य स तथोक्तः तेन। अमुना पूर्णप्रज्ञेन इष्टसिद्धिः इष्टसिद्धिनामको ग्रन्थः श्रोतुं तदर्थं श्रोतुं उपचक्रम उपक्रान्तः। 'उपपूर्वात् क्रमु पादविक्षेपे इत्यस्मात् कर्मणि लिडात्मनेपदं उपचक्रमे उपचक्रमाते उपचक्रमिरे'। कथंभूतः इष्टसिद्धिः। छलजातिवारिधिः छलानि छलोत्तराणि जातयः जात्युत्तराणि च छलजातयः छलजातिभिः वारिधिः समुद्रः पूर्ण इति यावत्। अत्यन्तं परस्परं व्याहतयुक्तं इत्यर्थः। कथंभूतेन अमुना। इह अस्मिन् श्रूयमाणग्रन्थे निरादरेणापि आदररहितेनापि। आदराभावे कुतः श्रोतुं उपचक्रम इत्यत आह। स्वेति। स्वशिष्यं पूर्णप्रज्ञं चतुरं विदग्धं चिकीर्षतः कर्तुमिच्छतः गुरोः अच्युतप्रेक्षस्य प्रचोदनात् प्रेरणात् आदराभावेऽपि गुर्वाज्ञायाः अनुल्लङ्घ्यत्वात् दूषणयुतोऽपि ग्रन्थः श्रोतुमारब्ध इति भावः॥ ४४ ॥

तदाद्यपद्यस्थमवद्यमण्डलं यदावदत् षोडशकद्वयात्मकम् ।
उपर्यपास्तं तदिति ब्रुवत्यसौ गुरौ तमूचे प्रणिगद्यतामिति ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – तदिति ॥ असौ श्रोता पूर्णप्रज्ञः । तस्य श्रोतुमुपक्रान्तस्य इष्टसिद्धिनामकग्रन्थस्याद्यं यत्पद्यं श्लोकस्तत्र तिष्ठतीति तादृशं, षोडशकद्वयात्मकं षडधिका दश षोडश षोडशैव षोडशकानि तेषां यद्वयं तदात्मा स्वरूपं यस्य तादृशं द्वात्रिंशत्सङ्ख्याकमित्यर्थः । अवद्यमण्डलं दोषसमूहं यदाऽवदत् उद्भावितवान्, तदा तदवद्यमण्डलमुपर्युपरितनवाक्येष्वपास्तं परिहृतमिति गुरौ ब्रुवति सति तर्हि, तत् मदुद्भावितदूषणपरिहाररूपमुत्तरमिदानीं प्रणिगद्यतामित्यूचे ॥ ४५ ॥

मन्दोपकारिणी – तदिति ॥ असौ श्रोता पूर्णप्रज्ञाचार्यः तदाद्यपद्यस्थं तस्य श्रोतुमुपक्रान्तस्य इष्टिसिद्धिनामकग्रन्थस्य आद्ये प्राथमिके पद्ये श्लोके तिष्ठतीति तदाद्यपद्यस्थः तम् । षोडशकद्वयात्मकं षोडशसङ्ख्यानां द्वयं षोडशकद्वयं तदेव आत्मा स्वरूपं यस्य तत् तथोक्तं द्वात्रिंशत्सङ्ख्याकमित्यर्थः । अवद्यमण्डलं अवद्यानां दूषणानां मण्डलं समूहम् । 'मण्डलं च समूहे स्यात्' इत्यभिधानम् । यदाऽवदत् उद्भावितवान् प्रकटीचकारेति यावत् । तदा तत् अवद्यमण्डलं उपरि उत्तरवाक्ये अपास्तं परिहृतमिति गुरौ अच्युतप्रेक्षे ब्रुवति सति असौ मध्वाचार्यः तत् उत्तरत्र वक्ष्यमाणदूषणपरिहाररूपं उत्तरं इदानीं प्रणिगद्यतां उच्यतां इति एवं अच्युतप्रेक्षं ऊचे 'प्र नि इत्युपसर्गद्वयपूर्वात् गद व्यक्तायां वाचीत्यतः कर्मणि लोट् आत्मनेपदं गद्यतां गद्येतां गद्यन्ताम्' ॥ ४५ ॥

भवत्प्रवक्तृत्वसमर्थता न मे सकोपमित्थं ब्रुवति व्रतीश्वरे ।
अपीह मायासमये पटौ नृणां बभूव तद्दूषणसंशयाङ्कुरः ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – भवदिति ॥ इहास्मिन् मायाकल्पितं ब्रह्मातिरिक्तमिति समयः सिद्धान्तो मायासमयः । तस्मिन् मायिप्रणीतशास्त्र इत्यर्थः । पटौ चतुरेऽपि व्रतीश्वरे यतीश्वरेऽच्युतप्रेक्षे, मे मम भवत्प्रवक्तृत्वे भवतो व्याख्यातृत्वे समर्थता शक्तत्वं न इत्थमेवं सकोपं कोपेन सहितं यथा भवति तथा वदति सति, नृणां गुरुशिष्यविवादं शृण्वतां पुरुषाणां तद्दूषणसंशयाङ्कुरस्तस्येष्टसिद्धिनामकग्रन्थस्य, दूषणस्य श्रीमदाचार्योक्तदोषस्य

संशयस्तस्य सद्वा, असद्वा, इति सन्देहस्याङ्कुर इवाङ्कुरो बभूव। एतावत्कालं निर्दोषत्वेन निश्चितस्य मायिसमयस्येदानीं सदोषत्वशङ्काङ्कुरोऽभूदिति भावः ॥ ४६ ॥

मन्दोपकारिणी – भवदिति ॥ इह मायासमये मायायाः अज्ञानस्य समये सिद्धान्ते पटौ चतुरे व्रतीश्वरे व्रतिनां यतीनां ईश्वरे श्रेष्ठे अच्युतप्रेक्षे। हे पूर्णप्रज्ञ मे मम भवत्प्रवक्तृत्वसमर्थता भवतः तव प्रवक्तुः भावः प्रवक्तृत्वं तस्मिन् भवत्प्रवक्तृत्वे व्याख्याने इति यावत्, समर्थता सामर्थ्यं न त्वां प्रति व्याख्यातुं मम शक्तिः नास्तीति भावः। इत्थं एवं प्रकारेण सकोपं कोपेन सहितं यथा भवति तथा ब्रुवति वदति सति नृणां गुरुशिष्यविवादं शृण्वतां पुरुषाणां तद्दूषणसंशयाङ्कुरः तस्य शास्त्रस्य दूषणे सद्वा असद्वा इति चिकित्सायां संशयस्य अङ्कुरः उत्पत्तिः बभूव। एतावत्कालं निर्दोषत्वेन निश्चितस्य मायिसमयस्य इदानीं सदोषत्वशङ्काङ्कुरोऽभूदिति भावः ॥ ४६ ॥

बुधोऽभिधानं श्रवणं बुधेतरो ध्रुवं विदध्याद्विमुमुक्षुरात्मनः।
यतिर्विशेषादिति लोकचोदनात्प्रवक्ति मायासमयं स्म पूर्णधीः ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – बुध इति ॥ आत्मनः स्वस्य विमुमुक्षुः विमोक्तुमिच्छुः बुधो विद्वान् ध्रुवं निःसंशयं यथा भवति तथा अभिधानं व्याख्यानं विदध्यात् कुर्यात्। बुधेतरः बुधादन्योऽविद्वानित्यर्थः। विमुमुक्षुः सन् श्रवणं गुरुमुखाच्छास्त्रश्रवणं विदध्यात्। तत्रापि यतिर्विशेषाद्बृहस्थादिभ्योऽतिशयात् व्याख्यां श्रवणं वा विदध्यात्। 'उपनिषदमावर्तयेदुपनिषदमावर्तयेदि'ति श्रुतेः। तस्य व्याख्याश्रवणादिरूपशास्त्रप्रवृत्तिमन्तरेण कर्तव्यान्तराभावाद्बृहस्थादिभ्यो विशेष इति भावः। इति लोकचोदनात् लोकानां तत्रत्यजनानां प्रेरणात् पूर्णधीः पूर्णप्रज्ञाचार्यो मायासमयं मायाशास्त्रं प्रवक्ति स्म व्याचख्यौ। स्म अतीते ॥ ४७ ॥

मन्दोपकारिणी – बुध इति ॥ आत्मनः स्वस्य विमुमुक्षुः मोक्षं इच्छन् बुधः विद्वान् ध्रुवं निश्चयं अभिधानं व्याख्यानं विदध्यात् कुर्यात्। बुधेतरः बुधादितरः अन्यः अबुधः अज्ञानी श्रवणं शास्त्रश्रवणं विदध्यात्। एतावत् सर्वाश्रमसाधारणम्। तत्रापि यतिः विशेषात् अतिशयात् व्याख्यानं श्रवणं च कुर्यात्। 'उपनिषदमावर्तयेत्' इत्युक्तेः। यतेः शास्त्रव्याख्यानश्रवणावृत्तिं विना कर्तव्यान्तराभावात् यतिः गृहस्थादिभ्योऽपि अतिशयेन

व्याख्यानं श्रवणं च कुर्यात्। इति इत्थं लोकचोदनात् लोकानां तत्र तदा मिलितानां जनानाम्। 'लोकस्तु भुवने जने' इत्यमरः। चोदनात् प्रेरणात् पूर्णधीः पूर्णप्रज्ञाचार्यः मायासमयं मायिशास्त्रं प्रवक्ति स्म व्याख्यातवान्। अच्युतप्रेक्षेण मम व्याख्यातुं सामर्थ्यं नास्तीत्युक्त्वा व्याख्याने त्यक्तवति सति श्रोतृजनाः सर्वे 'त्वं व्याख्याने समर्थोऽसि। अतः अस्माकं त्वमेव मायिशास्त्रव्याख्यानं ब्रूहि' इति प्रार्थितवन्तः। ततः स्वयं व्याचख्यौ इति भावः। 'प्र पूर्वात् वच परिभाषण इत्यतो लट् परस्मैपदम्'। 'स्म अतीते' ॥ ४७ ॥

अखण्डितोपन्यसनं विसंशयं ससम्प्रदायं प्रवचो दृढोत्तरम्।
समागमञ्छ्रोतुममुष्य साग्रहा जनाः श्रुताढ्याश्चतुरा बुभूषवः॥४८॥

पदार्थदीपिकोद्बोधिका – अखण्डितेति॥ श्रुताढ्याः शास्त्रश्रवणसम्पन्ना जनाः चतुराः युक्तिविशेषज्ञानेन विदग्धा बुभूषवः भवितुमिच्छवः सन्तः अखण्डितं निरन्तरं उपन्यसनमुपन्यासः यस्मिन् तत्। विसंशयं विगतः संशयो यस्मात्तत्। दृढान्युत्तराणि यस्मिन् तत्। इतस्ततश्चोदकानां दूषणरहितोत्तरोपेतमित्यर्थः। ससम्प्रदायं सम्प्रदायेन सहितम्। अमुष्य पूर्णप्रज्ञस्य प्रवचो व्याख्यानं श्रोतुं साग्रहा आग्रहोपेताः सन्तः समागमन्। गमॢ गतौ लुङ्॥ ४८ ॥

मन्दोपकारिणी – अखण्डितेति॥ श्रुताढ्याः श्रुतेन शास्त्रश्रवणेन आढ्याः सम्पन्नाः पूर्वमेव श्रुतशास्त्रा इत्यर्थः। जनाः चतुराः युक्तिविशेषज्ञानेन विदग्धाः बुभूषवः भवितुमिच्छन्तः सन्तः अखण्डितोपन्यसनं अखण्डितं मध्ये मध्ये विच्छेदरहितं उपन्यसनं उपन्यासः यस्य तत् अखण्डितोपन्यसनं धारारूपेण व्याख्येयग्रन्थानुवादोपेतमित्यर्थः। विसंशयं विगताः संशयाः यस्मात् तत् विसंशयं सर्वसंशयपरिहारकं दृढोत्तरं दृढानि चोदकदूषणरहितानि प्रत्युत्तराणि यस्मिन् तत् ससंप्रदायं संप्रदायः व्याख्यातृपरम्परा व्याख्यानप्रकारः तेन सहितं मायिशास्त्राभिज्ञसंमतमिति भावः। अमुष्य पूर्णप्रज्ञाचार्यस्य प्रवचः प्रवचनं मायिशास्त्रस्येति शेषः। श्रोतुं साग्रहाः आग्रहः आसक्तिः तेन सहिताः व्याख्यानश्रवणे रतिमन्त इत्यर्थः। एतादृशाः सन्तः समागमन् आगतवन्तः 'गमॢ गताविति यतो लुङ् परस्मैपदं अगमत् अगमताम् अगमन्' ॥ ४८ ॥

गुरोरुपान्ते श्रवणे रतैर्द्विजैः सपञ्चषैर्भागवते कदाचन ।
बहुप्रकारे लिखिते तु वाचिते प्रकारमेकं प्रभुरभ्यधाद्दृढम् ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – गुरोरिति ॥ कदाचन गुरोरच्युतप्रेक्षस्योपान्ते समीपे श्रवणे भागवतश्रवणे रतैः निरतैः पञ्चषैः पञ्च वा षड्वा पञ्चषास्तैर्द्विजैः बहुप्रकारे बहुश्चासौ प्रकारश्च तस्मिन्, बहुप्रकारेणेत्यर्थः। लिखिते भागवते वाचितेऽपि स प्रभुः पूर्णप्रज्ञाचार्यो दृढं निस्संशयं यथा भवति तथा एकं प्रकारमभ्यधात्। श्रीभागवतव्याख्यानावसरे श्रोतृजनैः स्वस्वपुस्तकेषु पृथक् पृथक् पाठत्वेन लिखिते भागवते वाचितेऽपि स प्रभुरयमेव पाठो व्यासाभिमत इति एकमेव पाठं दृढमभ्यधादिति भावः ॥ ४९ ॥

मन्दोपकारिणी – गुरोरिति ॥ कदाचन कस्मिंश्चित् काले गुरोः अच्युतप्रेक्षस्य उपान्ते समीपे श्रवणे भागवतपुराणव्याख्यानश्रवणे रतैः निरतैः। पञ्चषैः पञ्च वा षड्वा पञ्चषाः तैः द्विजैः शिष्यभूतैः विप्रैः। बहुप्रकारे बहवः प्रकाराः पाठभेदाः यस्मिन् तत्तथोक्तं तस्मिन्। लिखिते भिन्नभिन्नपाठेन लिखितभागवतेऽपि स प्रभुः पूर्णप्रज्ञाचार्यः दृढं निःसंशयं यथा भवति तथा एकं प्रकारं अभ्यधात् उवाच। श्रीभागवतपुराणव्याख्यानकाले श्रोतृजनैः स्वस्वपुस्तकेषु पृथक् पृथक् भिन्नपाठेन लिखितभागवते वाचितेऽपि पूर्णप्रज्ञः बहुपाठेषु मध्ये एकं पाठप्रकारं दृढं अभ्यधात् उक्तवान्। अयमेव पाठो व्यासाभिहित इति अभ्यधात् इति भावः। 'डु धाञ् धारणपोषणयोः लुङ् परस्मैपदं अधात् अधाताम् अधुः' ॥ ४९ ॥

परप्रकारेष्वपि संभवत्सु ते विनिर्णयोऽस्मिन् कथमित्युदीरिते ।
मुकुन्दबोधेन महाहृदब्रवीत्प्रकारमेनं भगवत्कृतं स्फुटम् ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – परेति ॥ परप्रकारेष्वपि परे च ते प्रकाराश्च तेष्वपि पाठान्तरेष्वपीत्यर्थः। सम्भवत्सु सत्सु ते तवास्मिन् भवदुक्तपाठे विनिर्णयोऽयमेव साम्प्रदायिकपाठो नान्य इति निश्चयः कथमिति वचसि, मुकुन्दबोधेन मुकुन्दस्य बोधो ज्ञानं यस्य तेन अच्युतप्रेक्षेणेत्यर्थः उदीरिते सति, महाहृत् महत् हृत् ज्ञानं यस्य तादृशः पूर्णप्रज्ञः एकं प्रकारमात्मनाभिहितं पाठप्रकारं भगवत्कृतं श्रीवेदव्यासकृतं स्फुटं सम्यक् सोपपत्तिकं अब्रवीत् ॥ ५० ॥

मन्दोपकारिणी – परेति ॥ परप्रकारेष्वपि परे अन्ये च ते प्रकाराश्च परप्रकाराः तेषु पाठान्तरेष्वपि संभवत्सु उपपन्नार्थेषु सत्सु ते तव अस्मिन् भवदुक्ते पाठे विनिर्णयः अयमेव व्यासोक्तः पाठः नान्य इति निश्चयः कथमिति मुकुन्दबोधेन मुकुन्दस्य बोधो ज्ञानं यस्य सः मुकुन्दबोधः अच्युतप्रेक्षः तेन उदीरिते उक्ते सति महाहृत् महत् बहुविषयकं हृत् हृदयं यस्य सः महाहृत् पूर्णप्रज्ञः। एनं स्वात्मनोक्तं प्रकारं पाठप्रकारं भगवत्कृतं भगवता व्यासेन कृतं रचितं स्फुटं सम्यक् सोपपत्तिकं अब्रवीत् ॥ ५० ॥

निगद्यतां गद्यमिहैव पञ्चमे जगद्गुरोर्वेत्थ कृतिस्थितिं यदि।
इति ब्रुवाणे यतिसत्तमे स्वयं तदुक्तमार्गेण जगाद भूरिहृत्॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – निगद्यतामिति ॥ यदि जगद्गुरोः श्रीवेदव्यासस्य कृतिस्थितिं निर्माणप्रकारं वेत्थ जानासि। विद ज्ञाने लट्। तर्हि, इहैव भागवत एव पञ्चमे पञ्चमस्कन्धे गद्यं निगद्यतां पाठतोऽर्थतश्च प्रोच्यतामिति यतिसत्तमे यतिश्रेष्ठे। 'अग्रेसरः सत्तम उत्तमश्च' इति हलः। अच्युतप्रेक्षे ब्रुवाणे सति, भूरिहृत् भूरि बहु हृत् ज्ञानं यस्य तादृशः पूर्णप्रज्ञः स्वयं तदुक्तमार्गेण श्रीवेदव्यासोक्तमार्गेण जगाद, पाठतोऽर्थतश्चावदत् ॥ ५१ ॥

मन्दोपकारिणी – निगद्यतामिति ॥ हे पूर्णप्रज्ञ यदि जगद्गुरोः जगतां गुरोः वेदव्यासस्य कृतिस्थितिं कृतेः गन्थनिर्माणस्य स्थितिं प्रकारं वेत्थ जानासि। 'विद ज्ञाने इत्यस्माल्लट् परस्मैपदं वेत्थ विदथुः विद'। तर्हि इहैव भागवत एव पञ्चमे पञ्चमस्कन्धे गद्यं अच्छन्दोबद्धं वाक्यं गद्यमित्युच्यते। अपादः पदसन्तानो गद्यमित्युच्यते बुधैः इति वचनात्। तादृशं गद्यरूपं वाक्यं निगद्यतां पाठतो अर्थतश्च नितरां कथ्यताम्। 'गद व्यक्तायां वाचि' इत्यतः कर्मणि लोडात्मनेपदं गद्यतां गद्येतां गद्यन्ताम्'। इति एवं यतिसत्तमे यतीनां उत्तमे अच्युतप्रेक्षे ब्रुवाणे सति भूरिहृत् भूरि पूर्णं हृत् हृदयं यस्य सः भूरिहृत् पूर्णप्रज्ञः। स्वयं तदुक्तमार्गेण तेन वेदव्यासेन उक्तश्चासौ मार्गः प्रकारश्च तदुक्तमार्गः तेन जगाद पाठतः अर्थतश्च अवदत्। 'गद व्यक्तायां वाचीत्यतः लिट् परस्मैपदं जगाद जगदतुः जगदुः' ॥ ५१ ॥

अशेषशिष्यैश्च तदाज्ञया तदा परीक्षणायैक्षि समस्तपुस्तकम्।
स तत्र हन्तैकतमेक्षितं त्यजन्नतावदध्यायनिकायमभ्यधात्॥ ५२॥

पदार्थदीपिकोद्बोधिका – अशेषेति॥ तदा तस्मिन्काले तदाज्ञया तस्य गुरोराज्ञया, अशेषशिष्यैः परीक्षणाय परीक्षायै, तदुक्तप्रकारेण पाठः पुस्तकेष्वस्ति न वेति परीक्षार्थमित्यर्थः। समस्तपुस्तकं पञ्चमस्कन्धात्मकसमस्तपुस्तकमैक्षि दृष्टम्। स पूर्णप्रज्ञाचार्यः तत्र अशेषपुस्तकमध्ये एकतमेक्षितं शुद्धपाठात्मकैकतमपुस्तके दृष्टं पाठं न त्यजन्, पुस्तकापेक्षां विना पञ्चमे गद्यं वदन्नपि विशुद्धपाठात्मकैकतमपुस्तकगतपाठानुसारेण वदन्नपीति भावः। तावत्तदा शिष्यैः पुस्तकेक्षणसमय इत्यर्थः। अध्यायनिकायं पञ्चमस्कन्धाध्यायानां समूहमभ्यधात् पाठतोऽर्थतश्चावदत्। हन्त आश्चर्यम्॥ ५२॥

मन्दोपकारिणी – अशेषेति॥ तदा गद्यपठनकाले तदाज्ञया तस्य गुरोराज्ञया नियोगेन अशेषशिष्यैः अशेषाश्च ते शिष्याश्च अशेषशिष्याः तैः। परीक्षणाय पूर्णप्रज्ञोक्तपाठः पुस्तकेषु अस्ति न वा इति परीक्षार्थं विश्वासार्थं इत्यर्थः। समस्तपुस्तकं समस्तं च तत् पुस्तकं च समस्तपुस्तकं समुदायैकवचनं पञ्चमस्कन्धात्मकसमस्तपुस्तकसमुदायः ऐक्षि दृष्टम्। 'ईक्ष दर्शन इत्यतः कर्मणि लुङ् आत्मनेपदं ऐक्षि ऐक्षिषातां ऐक्षिषत'। सः पूर्णप्रज्ञाचार्यः तत्र अशेषपुस्तकमध्ये एकतमे शुद्धपाठात्मके एकस्मिन् पुस्तके स्थितं दृष्टं पाठं न त्यजन् अत्यजन्। पुस्तकापेक्षां विना पञ्चमे गद्यं वदन्नपि शुद्धपाठात्मकैकपुस्तकगतपाठानुसारेण वदन्निति भावः। तावत् तदा एकपुस्तकगतपाठानुसारेण पठनकाले अध्यायनिकायं अध्यायानां निकायः समुदायः। 'स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम्' इत्यमरः। तं पञ्चमस्कन्धाध्यायसमूहं अभ्यधात् पाठतोऽर्थतश्च अवदत्। हन्त आश्चर्ये हर्षे वा॥ ५२॥

अत्र जन्मनि न यत्पठितं ते जैत्र भाति कथमित्यमुनोक्ते।
पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच ॥ ५३॥

भावप्रकाशिका – 'वेद पुरा' वेदेत्यस्य लडादेशत्वात् 'पुरि लुङ् चास्मे' इति सूत्रादतीतार्थत्वम्॥ ५३॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमत्सुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां चतुर्थः सर्गः॥

पदार्थदीपिकोद्बोधिका – अत्रेति ॥ जैत्र! जयशील! ते त्वया, अत्र जन्मनि अस्मिन् जन्मनि यद्वेदपुराणादिकं न पठितं तत्कथं भाति प्रतिभाति? इति वचस्यमुना गुरुणोक्ते सति अमितबुद्धिः पूर्णप्रज्ञाचार्यः। इदं सर्वं पूर्वजन्मसु अतीतजन्मसु वेद पुरा व्यज्ञासिषं इत्युवाच। वेदपुरेत्यत्र 'यावत्पुरानिपातयोर्लट्' इति सूत्रेणातीतार्थे लट्। 'विदो लटो वा' इति णलादेशः। रथोद्धतावृत्तम्। 'रान्नराविह रथोद्धता लगौ' इति तल्लक्षणम् ॥ ५३ ॥

मन्दोपकारिणी – अत्रेति ॥ हे जैत्र जयशील। ते त्वया अत्र अस्मिन् जन्मनि यत् वेदपुराणादिकं न पठितं नाधीतं तत् ते कथं भाति प्रतिभाति ? 'भा दीप्तावित्यतो लट् परस्मैपदं भाति भातः भान्ति'। इति एवं अमुना गुरुणा अच्युतप्रेक्षेण उक्ते सति अमितबुद्धिः अमिता पूर्णा बुद्धिः प्रज्ञा यस्य स तथोक्तः पूर्णप्रज्ञाचार्यः। अहं इदं सर्वं पूर्वजन्मसु पूर्वाणि अतीतानि च तानि जन्मानि च पूर्वजन्मानि तेषु पूर्वजन्मसु वेद पुरा ज्ञातवान्। हि प्रसिद्धं इत्युवाच। 'विद ज्ञान इत्यस्मात् लट् परस्मैपदं वेद्मि विद्वः विद्मः पक्षे वेद विद्व विद्म'। 'वेद पुरा' इत्यत्र 'यावत् पुरा निपातयोः लट्' इति सूत्रेण अतीतार्थे लट् प्रत्ययः। तस्य विदो लटोः वा इति णलादेशः। रथोद्धतावृत्तं 'रान्नराविह रतोद्धता लगौ' इति वचनात् ॥ ५३ ॥

इति बहुविधविश्वाश्चर्यचित्तप्रवृत्तेर्जगति विततिमापन्नूतनाप्यस्य कीर्तिः।
क्षपिततततमस्का भास्करीव प्रभालं सुजनकुमुदवृन्दानन्ददा चन्द्रिकेव ॥ ५४ ॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के चतुर्थः सर्गः ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इत्येवं बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः बहुविधा नानाविद्याविषया विश्वाश्चर्या सर्वलोकाश्चर्यभूता चित्तप्रवृत्तिः मनोवृत्तिर्यस्य तस्यास्य श्रीपूर्णप्रज्ञाचार्यस्य क्षपिततततमस्का ततं व्याप्तं सर्वजनहृद्गतमित्यर्थः। यत्तमोऽज्ञानं क्षपितं निरस्तं ततमः यया सा। सुजनकुमुदवृन्दानन्ददा सुजना एव कुमुदानि कुमुदपुष्पाणि तेषां वृन्दस्य समूहस्यानन्दं ददातीति तादृशी कीर्तिः नूतनापि, क्षपिततततमस्का

निरस्तजगद्व्याप्तान्धकारा भास्करी भास्करसम्बन्धिनी प्रभेव, सुजनकुमुदवृन्दानन्ददा सज्जनाख्यकुमुदवृन्दानन्दकारिणी चन्द्रिकेव ज्योत्स्नेवेति दृष्टान्तद्वयम्। जगति विततिं व्याप्तिमलं सम्यगापत् अगमत्। मालिनीवृत्तं 'ननमयययुतेयं मालिनी भोगिलोकै' रिति तल्लक्षणात्॥ ५४॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां चतुर्थः सर्गः॥

मन्दोपकारिणी – इतिति॥ इति पुर्वोक्तप्रकारेण। बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः अनेकप्रकाराणां विश्वेषां सर्वेषां जनानां आश्चर्यभूता चित्तस्य हृदयस्य प्रवृत्तिः प्रकृष्टा अतिशयिता वृत्तिः परिणामज्ञानं इत्यर्थः। चित्तस्य प्रवृत्तिः चित्तप्रवृत्तिः विश्वाश्चर्यभूता च सा चित्तप्रवृत्तिश्च विश्वाश्चर्यचित्तप्रवृत्तिः। बह्व्यः विधाः प्रकाराः यस्याः सा बहुविधा नानाविधविषयिणी इति भावः। 'विधाविधौ च प्रकारे' इत्यमरः। बहुविधा विश्वाश्चर्यचित्तप्रवृत्तिः यस्य सः तथोक्तः तस्य अस्य पूर्णप्रज्ञाचार्यस्य कीर्तिः यशः नूतनापि नवीनापि जगति लोके विततिं व्याप्तिं आयत् ययौ। 'अय पय गतावित्यतो लङ् परस्मैपदं आयत् आयतां आयन्' इति। जातमात्रापि मध्वकीर्तिः सर्वत्र व्याप्तेति भावः। कथंभूता कीर्तिः भास्करी भास्करस्य सूर्यस्य इयं भास्करी सूर्यसंबन्धिनी प्रभेव दीप्तिरिव क्षपिततततमस्का क्षपितं निरस्तं ततं व्याप्तं सर्वजगद्व्रतं इत्यर्थः तमः अज्ञानलक्षणान्धकारो यया सा तथोक्ता। पुनः कथंभूता। चन्द्रिकेव कौमुदीव सुजनकुमुदवृन्दानन्ददा सुजनाः कुमुदानीव इन्दीवराणीव सुजनकुमुदानि। 'सिते कुमुद कैरवे' इत्यमरः। तेषां वृन्दं समूहः तस्य आनन्दं हर्षं ददातीति सुजनकुमुदवृन्दानन्ददा। अनेन सूर्यदृष्टान्तेन अज्ञाननाशकत्वोक्त्या अनिष्टपरिहारकत्वं, चन्द्रदृष्टान्तेन आनन्दप्रदत्वोक्त्या इष्टप्रापकत्वं च उक्तं भवति। तेन च महागुरुत्वं ज्ञापितं भवति पूर्णप्रज्ञाचार्यस्येति ज्ञेयम्। वृत्तं तु मालिनी 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणात्॥ ५४॥

॥ इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां चतुर्थः सर्गः॥ ४॥

पञ्चमः सर्गः

वेदान्तविद्यानिजराज्यपालने सङ्कल्प्यमानो गुरुणा गरीयसि ।
अदभ्रचेता अभिषिच्यते पुरा स वारिभिर्वारिजपूरितैरथ ॥ १ ॥

पदार्थदीपिकोद्बोधिका – वेदान्तेति ॥ अथ पूर्णप्रज्ञाचार्यस्य भागवतव्याख्यानानन्तरं गरीयसि अतिमहति वेदान्तविद्यानिजराज्यपालने वेदानामन्तो निर्णयो यस्मात्तद्वेदान्तं ब्रह्ममीमांसाशास्त्रं तद्रूपा या विद्या वेदान्तविद्या सैव निजराज्यं आत्मीयराज्यं तस्य पालनं व्याख्यानेन शिष्यादिषु सम्प्रदायप्रवर्तनाख्यरक्षणं तस्मिन् सङ्कल्प्यमानो वेदान्तशास्त्र-प्रतिकूलवादिनिराकरणपूर्वकं वेदान्तव्याख्यादिष्वयं समर्थः सन् सम्यक् प्रवर्ततामिति मनसा सङ्कल्प्यमान इत्यर्थः। अदभ्रचेताः दभ्रमल्पं न भवतीति अदभ्रं परिपूर्णं तादृशं चेतो यस्य सोऽदभ्रचेताः पूर्णप्रज्ञाचार्यः। गुरुणाच्युतप्रेक्षाचार्येण वारिजपूरितैः शङ्खपूरितैर्वारिभिर्ज-लैरभिषिच्यते पुरा अभिषिक्तः। षिचृ्लृ आसेचने 'यावत्पुरानिपातयोर्लडि'ति अतीतार्थे कर्मणि लट्। गुरुणा योगराज्येऽभिषिक्तोऽभूदिति भावः। अत्र वृत्तन्तु इन्द्रवंशेति। यथोक्तम् ''स्यादिन्द्रवंशा गदिता ततौ जरौ'' इति ॥ १ ॥

मन्दोपकारिणी – वेदान्तेति ॥ अथ किञ्चित् कालानन्तरं सः अदभ्रचेताः अदभ्रं बहुलम् पूर्णमिति यावत्। 'अदभ्रं बहुलं बहु' इत्यमरः, चेतः मनः यस्य सः अदभ्रचेताः पूर्णप्रज्ञाचार्यः। गुरुणा अच्युतप्रेक्षेण वारिजपूरितैः वारिणि उदके जायत इति वारिजः शङ्खः 'लवणाम्बुजयोरब्जं क्लीबे शङ्खे तु पुंसि च' इति भास्करः, तस्मिन् पूरितैः पूर्णैः वारिभिः जलैः अभिषिच्यते पुरा अभिषिक्तः। ''यावत्पुरानिपातयोर्लट्'' इति अतीतार्थे लट्। कथंभूतः गरीयसि अतिशयेन गुरु महद्गरीयः तस्मिन् गरीयसि अत्युत्तमे वेदान्तविद्यानिजराज्यपालने वेदानां अन्तः निर्णयः यया सा वेदान्ता,सा च सा विद्या च ब्रह्ममीमांसा च वेदान्तविद्या । निजं च तत् राज्यं च निजराज्यं वेदान्तविद्यैव निजराज्यं तस्य पालने व्याख्यानेन शिष्यादिषु सत्संप्रदायप्रवर्तनलक्षणे तत्प्रतिकूलवादिनिराकरणे च। सङ्कल्प्यमानः वेदान्तविद्याव्याख्यानादिषु 'अयं पूर्णप्रज्ञः समर्थः तत्र प्रवर्ततां'इति योजितस्सन् गुरुणा यौवराज्ये अभिषिक्तोऽभूत् इति भावः। इन्द्रवंशावृत्तं 'तच्चेन्द्रवंशा गदिता ततौ जरौ' इति तल्लक्षणात् ॥ १ ॥

आनन्दरूपस्य परस्य पात्रधीरानन्दसन्दायिसुशास्त्रकृत्स यत्।
आनन्दतीर्थेति पदं गुरूदितं बभूव तस्यात्यनुरूपरूपकम् ॥ २ ॥

भावप्रकाशिका – आनन्दाय तीर्थं शास्त्रमस्येत्यानन्दतीर्थः। आनन्देन विष्णुना शुद्ध इति वा ॥ २ ॥

पदार्थदीपिकोद्बोधिका – आनन्देति ॥ यद्यस्मात् स पूर्णप्रज्ञाचार्यः। आनन्दरूपस्य आनन्दः रूपं यस्य तस्य। परस्य सर्वोत्तमस्य हरेः। पात्रधीः पात्रभूता धीर्यस्य सः। तस्मादानन्दाख्यस्य हरेरावासभूतबुद्धित्वादित्यर्थः। यस्माच्च स पूर्णप्रज्ञाचार्यः आनन्दसन्दायिसुशास्त्रकृत् आनन्दं सन्दातुं शीलमस्यास्तीति आनन्दसन्दायि तादृशञ्च तत् सुशास्त्रञ्च तत्करोतीति तथोक्तः। तस्माच्चानन्दतीर्थ इति गुरूदितं गुरुणाभिहितं पदं नाम तस्य श्रीपूर्णप्रज्ञाचार्यस्य अत्यनुरूपरूपकं अत्यनुरूपं अत्यनुकूलं रूपं स्वरूपं यस्य तादृशं बभूव आनन्दरूपस्य हरेः पात्रभूतत्वादानन्दतीर्थ इति आनन्दकरशास्त्रकृत्वाच्च आनन्दतीर्थ इति च व्युत्पत्तिरुक्ता भवति। 'तीर्थं मन्त्राद्युपाध्यायशास्त्रे त्वंभसि पावने। पात्रे चाचार्यतीर्थेषु' इति यादवः। तथा च आनन्दतीर्थ इति गुरुदत्तं नाम अन्वर्थमभूदिति भावः ॥ २ ॥

मन्दोपकारिणी – आनन्देति ॥ गुरूदितं गुरुणा अच्युतप्रेक्षेण उदितं आनन्दतीर्थेति पदं नाम 'पदं शब्दे च वाक्ये च' इति विश्वः तस्य श्रीपूर्णप्रज्ञाचार्यस्य अत्यनुरूपरूपकं अतिशयेन 'प्रकर्षे लङ्घनेऽप्यति' इत्यमरः अनुरूपस्य योग्यस्य अर्थस्य रूपकं निरूपकं प्रतिपादकं बभूव अन्वर्थकमभूदिति भावः। कुतः यत् यस्मात् 'यत्तद्यतस्ततो हेतौ' इत्यमरः सः पूर्णप्रज्ञाचार्यः। आनन्दरूपस्य सुखरूपस्य परस्य परमात्मनः 'परोरिः परमात्मा च' इति भास्करः पात्रधीः पात्रं वासयोग्यं धीः अन्तःकरणं यस्य स तथोक्तः। 'योग्यभाजनयोः पात्रं' इत्यमरः। अनेन अत्र तीर्थशब्देन क्षेत्रमुच्यते 'तीर्थं शास्त्रेऽध्वरे क्षेत्रे' इति धनञ्जयः। क्षेत्रं नाम सिद्धस्थानपुण्यभूमिः। ततश्च आनन्दरूपस्य हरेः तीर्थं निवासयोग्यक्षेत्रभूतं मनः यस्य सः आनन्दतीर्थ इत्यर्थः। आनन्दस्य तीर्थं यस्य सः आनन्दतीर्थ इति विग्रहः उक्तो भवति। यस्माच्च स पूर्णप्रज्ञः आनन्दसन्दायिसुशास्त्रकृत् आनन्दस्य सुखस्य सन्दायि आधिक्येन दातृ सुशास्त्रं शोभनं शास्त्रं हरिसर्वोत्तमत्वप्रतिपादकं करोतीति कृत् कर्ता इत्यर्थः। आनन्दप्रदं तीर्थः शास्त्रं यस्मात् स

आनन्दतीर्थः इति विग्रहः। पूर्णप्रज्ञस्य शङ्खोदकैः अभिषेकानन्तरं आनन्दतीर्थ इति अन्वर्थकं नाम चकार गुरुः इति भावः। अयं श्लोकः 'उपजाति'वृत्तम्॥ २॥

कदाचिदत्रोपययौ यतिः सखा गोविन्दबुद्धेर्बहुशिष्यसंवृतः।
अमुष्य शिष्या अनुमानशिक्षितास्तदाऽजिगीषन् गुरुबुद्धिमुद्धताः॥ ३॥

पदार्थदीपिकोद्बोधिका – कदाचिदिति॥ कदाचित् कस्मिंश्चित्काले। बहुशिष्यसंवृतो बहुभिः शिष्यैर्युक्तः गोविन्दबुद्धेः गोविन्दे बुद्धिर्यस्य तस्याच्युतप्रेक्षस्य सखा यतिः अत्रोपययौ। तदा अनुमानशिक्षिताः अनुमाने तर्कशास्त्रे शिक्षिताश्चतुरा अत एव उद्धता अहङ्कारिणः अमुष्यागतस्य यतेः शिष्याः गुरुबुद्धिं गुरुः पूर्णा बुद्धिर्यस्य तं पूर्णप्रज्ञाचार्यं अजिगीषन् जेतुमैच्छन्। जी जये सन्नन्ताल्लङ्॥ ३॥

मन्दोपकारिणी – कदाचिदिति॥ कदाचित् कस्मिंश्चित् काले बहुशिष्यसंवृतः बहवश्च ते शिष्याश्च तैः संवृतः गोविन्दबुद्धेः गोविन्दे अच्युते बुद्धिः प्रेक्षा यस्य स तथोक्तः तस्य अच्युतप्रेक्षस्य सखा मित्रं यतिः सन्यासी अत्र रजतपीठपुरे उपययौ उप अच्युतप्रेक्षस्य समीपं 'उपोऽधिके समीपे च' इत्यमरः ययौ प्राप। तदा यत्यागमनकाले अमुष्य शिष्याः अमुष्य आगतस्य यतेः शिष्याः, अनुमानशिक्षिताः अनुमानशास्त्रे तर्कशास्त्र इत्यर्थः शिक्षिताः प्रवीणाः 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः' इत्यमरः अत एव उद्धताः अहङ्कारिणः सन्तः। गुरुबुद्धिं गुर्वी महती पूर्णा इति यावत् बुद्धिः प्रज्ञा यस्य स तथोक्तः तं पूर्णप्रज्ञाचार्यं अजिगीषन् जेतुं ऐच्छन्। 'जि जये' इत्यस्मात् धातोर्लङ् परस्मैपदं अजिगीषत् अजिगीषतां अजिगीषन्॥ ३॥

भिदा सुसाध्येत्यनुमानमत्र तैः प्रायुज्यताशु प्रतिपक्षभीषणम्।
अखण्डयद्व्यक्तमखण्डधीरिदं स पक्षदक्षः फणिनं विराडिव ॥ ४॥

भावप्रकाशिका – भिदेति॥ अत्र भिदायां अनुमानम् 'विमतौ भिन्नौ नियम्यनियामकत्वात् राजपुरुषवदि'ति। किमिदं विशेषणं पक्षाद्भिन्नमाहोस्विदभिन्नमुत भिन्नाभिन्नम्। नादिमः। संबन्धापेक्षयाऽनवस्थानात्। न मध्यमः। पक्षमात्रस्य विशेषणमात्रस्य वाऽभिप्रेतत्वप्रसङ्गात्। न चान्तिमः। उभयदोषापातात्। व्यवस्थाया अपरिदृश्यमानत्वादित्यखण्डयत्। इदं च विशेषविनिर्मुक्तानां विशेषणनिग्राहकम्॥ ४॥

पदार्थदीपिकोद्बोधिका – भिदेति ॥ तैः शिष्यैर्भिदा भेदः सुसाध्या सुखेन साधयितुं शक्येत्येवमुक्त्वा, अत्र भेदसाधने प्रतिपक्षभीषणं प्रतिपक्षस्य प्रतिवादिनो भीषणं भयङ्करं अनुमानमाशु प्रायुज्यत प्रयुक्तं, 'विमतौ जीवपरमात्मानौ भिन्नौ नियम्यनियामकत्वात्, राजभृत्यराजवत्, इत्यनुमानमित्यर्थः। पक्षदक्षः पक्षेऽभ्युपगतपक्षसमर्थने दक्षः समर्थः सोऽखण्डधीः पूर्णप्रज्ञाचार्यः। विराट् वीनां पक्षिणां राड्राजा विराट् गरुडः सोऽपि पक्षाभ्यां दक्षः, फणोऽस्यास्तीति फणी तं फणिनमिवाखण्डयत्। ''खडि भेदे'' लङ्। खण्डन-प्रकारश्चेत्थं। किमिदं विशेषणं भिन्नत्वलक्षणं पक्षाभ्यां भिन्नं? अहोस्विदभिन्नं? उत भिन्नाभिन्नं?, न प्रथमः। भिन्नयोर्विशेषणपक्षयोः सम्बद्धयोर्वा विशेषणविशेष्यभावः असम्बद्धयोर्वा। तत्र द्वितीयेऽतिप्रसङ्गात्सम्बद्धयोरेव विशेषणविशेष्यभावो वाच्यः। सम्बन्धश्च भिन्नयोरेव न चाभिन्नयोः। सम्बन्धस्य द्विष्ठत्वात्। तथा च विशेषणस्य भेदस्य विशेष्ययोर्भेदिनोश्च परस्परं सम्बद्धयोरेव विशेषणविशेष्यभावो वक्तव्यः। तत्रापि सम्बन्धान्तरविवक्षायां, तत्रापि भेदापेक्षया भवितव्यम्। एवं भेदपरम्परापेक्षयानवस्था स्यात्। न द्वितीयः। विशेषणमात्रस्य वा विशेष्यमात्रस्य वा अभ्युपगमे उभयाभावप्रसङ्गात्। न तृतीयः। प्राचीनपक्षद्वयोक्तादोषापातात् व्याहतेश्च तस्मात् प्रतिज्ञाया एवासम्भवा-दुक्तानुमानेन भेदसाधनमशक्यमेवेति ॥ ४ ॥

मन्दोपकारिणी – भिदेति ॥ तैः शिष्यैः भिदा भेदः सुसाध्या सुखेन साधयितुं शक्या इति एवमुक्ता। अत्र भेदसाधने। प्रतिपक्षभीषणं प्रतिपक्षस्य प्रतिवादिनः भीषणं भयङ्करं 'दारुणं भीषणं भीष्म' इत्यमरः अनुमानं पञ्चावयवादिवाक्यं आशु शीघ्रं प्रायुज्यत प्रयोजितम्। 'युजिर् योग' इत्यतः कर्मणि लङात्मनेपदं अयुज्यत अयुज्येतां अयुज्यन्त। अनुमानं तु ''विमतौ जीवपरमात्मानौ भिन्नौ नियम्यनियामकत्वात् राजपुरुषवदि''ति। अखण्डधीः अखण्डा पूर्णा धीः प्रज्ञा यस्य स तथोक्तः सः पूर्णप्रज्ञः इदं अनुमानं व्यक्तं सम्यक् अखण्डयत् दूषितवान्। 'खडि भेदन इत्यस्मात् लङ् परस्मैपदम्'। कथंभूतः पक्षदक्षः पक्षे सिद्धान्ते तत्समर्थने तद्दूषणपरिहारे च दक्षः चतुरः। कः कमिव विराट् वीनां पक्षिणां 'विः पक्षि परमात्मनोः' इत्यमरः राट् राजा विराट् गरुडः 'राज्ञिराट् पार्थिवक्ष्माभृत्' इत्यमरः। फणिनमिव सर्पमिव 'कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी'

इत्यमरः। गरुडोऽपि पक्षाभ्यां पत्राभ्यां दक्षः। खण्डनप्रकारस्तु, भिन्नत्वलक्षणं विशेषणं पक्षाद्भिन्नं अभिन्नं वा उत भिन्नाभिन्नम्। न प्रथमः। भेदपरंपरया अनवस्थानात्। न द्वितीयः। विशेषणविशेष्ययोः अन्यतरमात्राविशेषापत्तेः। न तृतीयः। पूर्वोक्तदोषद्वयापातात् व्याहतेश्च। तस्मात्प्रतिज्ञायाः एवासंभवाद्भेदसाधनमशक्यमेव इत्येवंप्रकारेणेति ज्ञेयः ॥४ ॥

अथापि मिथ्या विमतं मतत्वतो विवादनिर्मुक्तवदित्यवादि तैः।
अनेन सत्यं विमतं मतत्वतो यथा घटादीत्यनुमा न्यगद्यत ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथापि प्रागुक्तभेदसाधकानुमानखण्डनानन्तरमपि विमतं सत्यत्वमिथ्यात्वाभ्यां विप्रतिपत्तिविषयभूतं वियदादिकं, मिथ्या अनिर्वचनीयं, मतत्वतः मतस्य दृश्यस्य भावो मतत्वं तस्मात् दृश्यत्वादित्यर्थः। विवादनिर्मुक्तवत्, विवादान्निर्मुक्तं रहितं तद्वद्विप्रतिपत्तिरहितवदित्यर्थः। दृश्यत्वमिथ्यात्वाभ्यां सम्प्रतिपन्नशुक्तिरजतादिवादिति यावत्। इत्यानुमानं तैरवादि प्रोक्तम्। अथानेन पूर्णप्रज्ञाचार्येण, विमतं सत्यं मतत्वतः यथा घटादीत्यनुमा अनुमानं न्यगद्यत निगदिता ॥ ५ ॥

मन्दोपकारिणी – अथेति ॥ अथापि भेदसाधनानुमानखण्डनानन्तरमपि तैः शिष्यैः इत्यवादि गदितम्। कथं। विमतं सत्यत्वमिथ्यात्वाभ्यां विप्रतिपत्तिविषयीभूतं आकाशादिजगत् मिथ्या, मतत्वतः दृश्यत्वात्, विवादिनिर्मुक्तवत् विवादेन विप्रतिपत्तिना निर्मुक्तं रहितं मिथ्यात्वेन संप्रतिपन्नमित्यर्थः। तादृशशुक्तिरजतवत् इत्यवादि इत्यन्वयः। 'वद व्यक्तायां वाची'त्यतो कर्मणि लुङ् आत्मनेपदं 'अवादि अवदिषातां अवदिषत'। तदनन्तरं अनेन पूर्णप्रज्ञाचार्येण इत्येवमनुमा न्यगद्यत निगदिता। 'गद व्यक्तायां वाचि' कर्मणि लङ् आत्मनेपदं 'अगद्यत अगद्येतां अगद्यन्त'। कथं विमतं पूर्वोक्तप्रकारेण विवादविषयीभूतं वियदादिविश्वं सत्यं अबाध्यं मतत्वतः दृश्यत्वात् घटादि घटः कुम्भः आदिः यस्य तत् तथोक्तं वस्तु यथा यथावत् सत्यं तद्वदिति ॥ ५ ॥

हेतोरतिव्याप्तिरवादि तैर्यदा सकौतुकैस्तूर्णमसावविस्मयः।
न शुक्तिरूप्यादि मतं यदन्यथा मतं तदित्यादि वदन् जिगाय तान् ॥६॥

भावप्रकाशिका – घटादिदर्शनमसंप्रतिपन्नमिति चेत् शुक्तिकारजतादि च बाध्यत्वाद-सत्त्वेनानुभूयमानं सदसद्विलक्षणतया न सम्प्रतिपन्नम्। तत्साधयिष्यते चेदिदं प्रत्यक्षेण साधितमित्युत्तरमित्यादिशब्दादभिप्रेतम्॥ ६ ॥

पदार्थदीपिकोद्बोधिका – हेतोरिति॥ सकौतुकैः कौतुकेन सम्भ्रमेण सहितैः। यदा हेतोः दृश्यत्वापरनामकमतत्वहेतोरतिव्याप्तिरनैकान्तिकता अवादि उक्ता। प्रपञ्चसत्यत्वसाधने प्रयुक्तस्य मतत्वहेतोः मिथ्याभूते शुक्तिरजतादौ विपक्षेऽपि वर्तमानत्वादनैकान्तिकत्वान्न तेन प्रपञ्चसत्यत्वसाधनं शक्यमिति तैरुक्तमिति भावः। तदा अविस्मयो न विद्यते विस्मयो यस्यासौ श्रीपूर्णप्रज्ञाचार्यो यद्यस्मात्तत् शुक्तिरूप्यादिकमन्यथा सत्यत्वेनप्रमिताकारा-दन्यथाऽन्येनप्रकारेणासत्यत्वेनेत्यर्थः। मतमनुभवसिद्धम्। तस्माच्छुक्तिरूप्यमादिर्यस्य तच्छुक्तिरूप्यादि शुक्तिरजतनभोनैल्यादिकं, मतं दृश्यं न। विपक्षे शुक्तिरूप्यादौ न दृश्यत्वं वर्तत इति न तस्यानैकान्तिकत्वमित्यर्थः। इति एवमादिर्यस्य वाक्यस्य तत्, इत्यादिवाक्यं 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः वदन् सन् तान् वादिनो जिगाय। अयं भावः। भवेदिदं मतत्वहेतोरनैकान्तिकत्ववर्णनं, यदि शुक्तिकादौ प्रतीतस्य रजतादेः दृश्यत्वं स्यात्। न चैतदस्ति। तथा हि दृश्यत्वं नाम दृग्दृश्ययोः सम्बन्धः। तत्र च शुक्तिकादौ प्रतीतस्य रजतादेः 'असदेव रजतं प्रत्यभादि'त्यादिना बाधोत्तरकाल-मसत्वानुभवादसता च सम्बन्धायोगान्न शुक्तिरूप्यादिना दृग्सम्बन्धः। किन्तु शुक्तिकादि-सन्निकृष्टमेवेन्द्रियं दोषवशादत्यन्तासद्रजताद्याकारेणावगाहत इति शुक्तिकादेरेव दृश्यत्वाभ्यु-पगमान्न मिथ्याभूतरजतादेर्दृश्यत्वमिति नानैकान्तिकता हेतोरिति। ननु सत्यत्वसाधनानुमाने घटादिनिदर्शनमसम्मतं, घटादेरस्माभिर्मिथ्यात्वाभ्युपगमात्। तथा च दृष्टान्तस्साध्यविकल इति चेत्तर्हि मिथ्यात्वसाधनानुमाने शुक्तिरजतादिनिदर्शनमस्माकमसम्प्रतिपन्नम्। मिथ्या-शब्देन न तावदसत्वं विवक्षितं तथात्वे मायिनामपसिद्धान्तप्रसङ्गात्। तस्मान्मिथ्याशब्देन सदसद्विलक्षणत्वमेव विवक्षितम्। एवञ्च सदसद्विलक्षणत्वसाधने शुक्तिरजतादिकं निदर्शनत्वेनोपात्तम्। न च तत्सदसद्विलक्षणत्वमस्माकं सम्प्रतिपन्नम्, असदेव रजतं प्रत्यभादिति बाधोत्तरकालं तस्यासत्वानुभवात्। तथा च शुक्तिरजतादौ सदसद्विलक्षण-त्वाभावान्मिथ्यात्वसाधनानुमानेऽपि निदर्शनं साध्यरहितमिति भावः। ननु शुक्तिरजतादिकं सदसद्विलक्षणमेवावगन्तव्यमित्यत्रार्थापत्तिरस्ति। तथा हि। ''सच्चेन्न बाध्येत, असच्चेन्न

प्रतीयेत'', बाध्यते प्रतीयते चेदं, अतः ख्यातिबाधान्यथानुपपत्या सदसद्विलक्षणमिति चेन्न। ''सत्वेन ख्यातिरसत्वेन बाध'' इति सदसदात्मकत्वेनाऽप्युपपत्तेः। नन्वेतद्विरुद्धमिति चेद्धन्त तर्हि सदसद्विलक्षणत्वमपि कथं न विरुद्धम्। विमतमनिर्वचनीयं बाध्यत्वात् यन्नानिर्वचनीयं न तद्बाध्यं यथात्मेत्यनुमानेनानिर्वचनीयत्वं शुक्तिरजतादेस्साधयाम इति चेत्तर्हि घटादेरपि सत्यत्वं ''सन् घटः, सन् पट'' इत्यादिप्रत्यक्षेण सिद्धमित्युत्तर-मित्याद्यादिशब्देनोक्तम्॥ ६॥

मन्दोपकारिणी – हेतोरिति॥ सकौतुकैः कौतुकेन कुतूहलेन सहितैः। 'कौतूहलं कौतुकं च कुतुकं च कुतूहलं' इत्यमरः। तैः शिष्यैः यदा तूर्णं आशु। 'सत्वरं चपलं तूर्णमविलम्बितमाशु च' इत्यमरः। हेतोः मतत्वहेतोः अतिव्याप्तिः अनैकान्तिकता। अवादि उक्ता। प्रपञ्चसत्यत्वसाधकत्वेन प्रयुक्तस्य दृश्यत्वापरपर्यायस्य मतत्वहेतोः मिथ्याभूते शुक्तिरूप्यादौ विपक्षे वर्तमानत्वेन अनैकान्तिकत्वात्। तेन प्रपञ्चसत्यत्वसाधनं अयुक्तमिति तैः उक्तमिति भावः। तदा अविस्मयः न विद्यते विस्मयः आश्चर्यं यस्य सः तथोक्तः। असौ पूर्णप्रज्ञाचार्यः इत्यादि वदन् तान् यतिशिष्यान् जिगाय जितवान्। 'जि जय इत्यतो लिट् परस्मैपदं जिगाय जिग्यतुः जिग्युः'। कथं यत् यस्मात् शुक्तिरूप्यादि शुक्तिरजतादिकं, अन्यथा सत्वेन प्रतीताकारात् अन्यथा असत्वेन मतं संमतं अनुभव-सिद्धमित्यर्थः तस्मात् तत् शुक्तिरूप्यादि मतं दृश्यं न इत्यादि वदन् इत्यन्वयः। अयं भावः दृश्यत्वं नाम दृग्विषययोः संबन्धः। तत्र शुक्तिकादौ प्रतीतस्य रजतादेः असदेव इदं रजतं प्रत्यभादित्यादिना बाधोत्तरकालं असत्वानुभवात् असता च सम्बन्धायोगात् न शुक्तिरूप्यादिना दृक् संबन्धः किन्तु शुक्तिकादिसन्निकृष्टमेव इन्द्रियं दोषवशात् शुक्तिं अत्यन्तासद्रजतात्मनावगाहत इत्यभ्युपगमात् शुक्तिकायाः एव दृश्यत्वाभ्युपगमात् न मिथ्याभूतरजतादौ विपक्षे दृश्यत्वं इति न अनैकान्त्यं हेतोरिति। ननु घटादौ मिथ्याभूते दृष्टान्ते सत्यत्वाभावात् साध्यविकलो दृष्टान्तः इति चेन्न, सन् घट इत्यादिप्रत्यक्षेण सत्यत्वस्य सिद्धत्वादिति आदिशब्देन ग्राह्यम्॥ ६॥

तत्त्वेऽप्यतत्त्वे विमतेऽनुमां वदंस्तदप्रतिष्ठां प्रतिपादुकः स्वयम्।
विजित्य विश्वान्विदुषः सभास्वसौ जगाम नाम्नाप्यनुमानतीर्थताम्॥७॥

भावप्रकाशिका – तदप्रतिष्ठां प्रतिपादुकः 'लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्' इत्युकञ् प्रत्ययः ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – तत्त्व इति ॥ तस्यानुमानस्याप्रतिष्ठां प्रामाण्यलक्षणप्रतिष्ठाभावं प्रतिपादुकः प्रतिपादनशीलः। 'लषपते'त्यादिना उकञ् प्रत्ययः। अत एव तदप्रतिष्ठामित्यत्र 'न लोके'त्यादिना षष्ठीप्रतिषेधात् न 'कर्तृकर्मणोः कृति' इति षष्ठी। असौ श्रीपूर्णप्रज्ञाचार्यो विदुषां पण्डितानां सभासु तत्र तत्र प्रस्तुततत्तत्प्रमेये विमते विप्रतिपन्ने सति, तत्तत्प्रमेयमेवमनैवमिति च विवादे सतीति यावत्। तत्त्वे तस्य भावस्तत्त्वं तस्मिन्। तस्य प्रमेयस्य तत्स्वरूपमुपपन्नमित्येतस्मिन्नर्थ इत्यर्थः। अतत्त्वे तत्त्वं न भवतीत्यतत्त्वं तस्मिन्। तस्य तत्स्वरूपमनुपपन्नमित्येतस्मिन्नर्थे चानुमामनुमानं यथा शब्दस्यानित्यत्वनित्यत्वविवादे 'शब्दोऽनित्यः कृतकत्वाद्घटवत्' इत्यनित्यत्वेऽनुमानमभिधाय, तत्र प्रतिपक्षतयाक्षिपतो वादिनो विजित्य। अनित्यत्वमेव व्यवस्थाप्य पुनस्तेषामसामर्थ्यप्रकटनाय शब्दः नित्योऽस्पर्शद्रव्यत्वाद्गगनवदित्याद्यनुमानेऽभिहिते, तदप्याक्षिपतः समस्तवादिनो विजित्य, शब्दस्य नित्यत्वमनित्यत्वं वा अनुपपन्नमित्यादिरूपेणानुमां वदन् सन्, विश्वान् समस्तवादिनो विजित्य, नाम्नाऽनुमानतीर्थतां जगाम। अस्यानुमानोपन्यसनचातुरीं दृष्ट्वा न अयमानन्दतीर्थः किन्नाम! अनुमानतीर्थ इति वादिमण्डले प्रसिद्धोऽभूदिति भावः। नन्वेवं परस्परविरुद्धार्थद्वयसाधनेऽप्यनुमानोपन्यासे सत्यनुमानयोः परस्परविरुद्धत्वेनाप्रतिष्ठत्वं स्यादिति चेन्न। तस्येष्टत्वात्। न च प्रमाणत्रित्वाभ्युपगमविरोधः। प्रत्यक्षागमानुसारिण एव तस्य प्रमाण्याभ्युपगमात्। यथोक्तं स्वयमेव 'न चानुमानस्य नियतप्रामाण्यम्'। 'सर्वत्र शक्यते कर्तुमागमं हि विनानुमा। तस्मान्नसा शक्तिमती विनाऽऽगममुदीक्षितुम्''। 'प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम्। याति नैवान्यथा तस्य नियतत्वं क्वचिद्भवेदि'ति। एतदभिप्रायेणैव तदप्रतिष्ठां प्रतिपादुक इत्युक्तम् ॥ ७ ॥

मन्दोपकारिणी – तत्त्व इति ॥ असौ पूर्णप्रज्ञाचार्यः स्वयं विमते विवादविषयीभूते प्रमेये। यत् विप्रतिपन्नं प्रमेयं तत्र सर्वत्रेत्यर्थः। तत्त्वे तस्य वस्तुनः तत्स्वरूपत्वं उपपन्नमित्यस्मिन्नर्थे। अतत्त्वे तत्स्वरूपत्वं अनुपपन्नमित्यस्मिन्नर्थेऽपि अनुमां अनुमानं वदन्

प्रयुञ्जानः विश्वान् सर्वान् विदुषः पण्डितान् सभासु विजित्य पराभवं प्रापयित्वा नाम्ना अनुमानतीर्थतां अनुमानतीर्थशब्दवाच्यतां जगाम प्राप। ''गमॢ गतावित्यस्माल्लिट् परस्मैपदं जगाम जग्मतुः जग्मुः''। कथंभूतः तदप्रतिष्ठां तस्य अनुमानस्य अप्रतिष्ठां अप्रामाण्यं प्रतिपादुकः प्रतिपादनशीलः प्रत्यक्षागमाननुगृहीतस्य अनुमानस्य प्रामाण्याभावं साधयन्नित्यर्थः। यद्यत्प्रमेयं विप्रतिपन्नं तस्य सर्वस्यापि तत्तत्स्वरूपत्वस्योपपत्तौ अनुपपत्तौ च केवलानुमानस्याप्रामाण्यात् प्रत्यक्षादिसहितं अनुमानं प्रयुञ्जन् अनुमानतीर्थ इति नाम्ना प्रसिद्धोऽभूदिति भावः। 'प्रति पूर्वात् पद धातोरुकञि प्रतिपादुक इति रूपं तेन उकञ् प्रत्ययान्तस्य प्रतिपादुक इत्यस्य ''न लोकाव्ययनिष्ठाखलर्थतृनामित्यनेन सूत्रेण षष्ठीप्रतिषेधात् द्वितीयेति ज्ञेयम् ॥ ७ ॥

समस्तवादीन्द्रगजप्रभङ्गदश्चरन्नवन्यां प्रतिपक्षकाङ्क्षया।
वेदद्विषां यः प्रथमः समाययौ सवादिसिंहोऽत्र स बुद्धिसागरः ॥ ८ ॥

भावप्रकाशिका – वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः। महीं विजित्य संप्राप्तो बौद्धाग्र्यं बुद्धिसागरम्॥ खण्डितस्तेन पाण्डित्यात्तत्पक्षापेक्षकोऽभवत्। तौ श्रुत्वा मध्ववैदग्धीं प्राप्तौ तद्गुरुमूचतुः॥ वादिनौ वादकामौ द्वौ भगवंस्त्वामिताविति। बुध्यब्दिबुद्धिमाश्रित्य परो वादी कथां व्यधात्॥ ८॥

पदार्थदीपिकोद्बोधिका – समस्तेति॥ समस्तवादीन्द्रगजप्रभङ्गदः समस्ता ये वादीन्द्रा वादिश्रेष्ठास्त एव गजास्तेषां यः प्रभङ्गः पराजयस्तं ददातीति तादृशः। अवन्यां भुवि प्रतिपक्षकाङ्क्षया प्रति विरुद्धः पक्षः परिग्रहो यस्य सः प्रतिपक्षः प्रतिवादी तस्य काङ्क्षया इच्छया चरन् क्वास्ति प्रतिवादीत्यन्विष्य तत्र तत्र पर्यटन् वेदद्विषां वेदान् द्विषन्तीति तेषां वेदाप्रमाण्यवादिनां बौद्धानामित्यर्थः प्रथमोऽग्रणीः 'प्रथमः स्यात्प्रधानाद्योः' इति हेमचन्द्रः। यो बुद्धिसागरः तन्नामको बौद्धः सोऽत्राच्युतप्रेक्षसमीपं प्रति, सवादिसिंहः स्वेन वादे विजित्य स्वपक्षे निक्षिप्तेन वादिसिंहाख्यद्विजेन सहितः सन् समाययौ। तच्चोक्तं- 'वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः। महीं विजित्य सम्प्राप्तौ बौद्धाग्र्यं बुद्धिसागरम्। खण्डितस्तेन पाण्डित्यात्तत्पक्षापेक्षकोऽभवत्। तौ श्रुत्वा मध्ववैदग्धीं प्राप्तौ तद्गुरुमूचतुः। वादिनौ वादकामौ द्वौ भगवंस्त्वामिताविति। बुद्ध्यब्धिबुद्धिमाश्रित्य परो वादी कथां व्यधात्' इति॥ ८॥

मन्दोपकारिणी – समस्तेति ॥ समस्तवादीन्द्रगजप्रभङ्गदः वादीनां इन्द्राः श्रेष्ठाः वादीन्द्राः समस्ताश्च ते वादीन्द्राश्च त एव गजाः कुञ्जराः तेषां प्रभङ्गं पराजयं ददातीति समस्तवादीन्द्रगजप्रभङ्गदः 'भङ्गः खण्डपराजयः' इति रत्नमाला। अवन्यां मह्यां प्रतिपक्षिकाङ्क्षया प्रतिपक्षिणः प्रतिवादिनः तेषां कांक्षया इच्छया 'इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः' इत्यमरः। क्वास्ति प्रतिवादीति अन्विष्य भूम्यां पर्यटन्, वेदद्विषां वेदं द्विषन्तीति वेदद्विषः बौद्धाः तेषां प्रथमः अग्रणीः यः बुद्धिसागरः बुद्धिसागरनामा बौद्धः अभूत् सोऽत्र अच्युतप्रेक्षसमीपं प्रति सवादिसिंहः वादिसिंहाख्येन पण्डितेन द्विजेन सहितस्सन् समाययौ। सबुद्धिसागरः इत्यत्र बुद्धिसागरेण सहितः सः वादिसिंह इति योजना न संभवति वेदद्विषां प्रथमः इत्त्येतद्विशेषणं वादिसिंहे नोपपद्यते वादिसिहस्य वैशेषिकत्वेन वेदप्रामाण्यवादित्वात् बुद्धिसागरस्य च बौद्धत्वात् तत्र तद्विशेषणं उपपद्यते। अतः पूर्वोक्तैव योजना संभवति। तच्चोक्तं ''वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः। महीं विजित्य सम्प्राप्तो बौद्धाग्रचं बुद्धिसागरम्॥ खण्डितस्तेन पाण्डित्यात्तत्पक्षा-पेक्षकोऽभवत्। श्रुत्वा मध्वस्य वैदग्धीं प्राज्ञो तद्गुरुमूचतुः॥ वादिनौ वादकामौ द्वौ भगवंस्त्वाऽऽगताविति। बुध्यब्धिबुद्धिमाश्रित्य परो वाग्मी कथां व्यधात्॥'' इति॥ ८॥

तस्योरुदुर्गर्ववतो जिगीषया निशातमादत्त मुकुन्दधीर्द्रुतम्।
स्वशिष्यहस्तेन मठान्तरेषुधेः सुपक्षदक्षं सुखतीर्थमार्गणम् ॥ ९॥

पदार्थदीपिकोद्बोधिका – तस्येति ॥ मुकुन्दधीः अच्युतप्रेक्षः। उरुदुर्गर्ववत उरुरुत्कृष्टो यो दुर्गर्वो दुष्टाहङ्कारः सोऽस्यास्तीति तस्य। अहमेव विद्वदग्रणीर्मत्समः कोऽस्तीति दुरहङ्कारवत इत्यर्थः तस्य बुद्धिसागरस्य जिगीषया जेतुमिच्छया निशातं अतितीक्ष्णं सुपक्षदक्षं सुपक्षे शोभनसिद्धान्ते दक्षं चतुरं सुखतीर्थमार्गणं सुखतीर्थ एव आनन्दतीर्थ एव मार्गणो बाणस्तं मठान्तरेषुधेः अन्यो मठो मठान्तरं तदेव इषुधिर्निषङ्ग-स्तस्मात्, स्वशिष्यहस्तेन स्वशिष्य एव हस्तस्तेन, द्रुतं यथा भवति तथादत्त। प्राप्तप्रति-वादिनिराकरणाय आनन्दतीर्थाचार्यं अन्यमठगतं स्वशिष्येणाह्वयामास प्रतिभटनिरासाय निशङ्गाद्बाणमिवेति भावः॥ ९॥

मन्दोपकारिणी – तस्येति ॥ मुकुन्दधीः मुकुन्दस्य धीः प्रेक्षा यस्य स तथोक्तः अच्युतप्रेक्षः। उरुदुर्गर्ववतः उरुः महान् बहुलः दुर्गर्वः अहमेव विद्वदग्रणीः मत्समः कोऽस्ति भुवि इति दुरहङ्कारः अस्यास्तीति उरुदुर्गर्ववान् तस्य बुद्धिसागरस्य जिगीषया जेतुमिच्छया निशातं तेजितं अतितीक्ष्णं 'रुग्णं भुग्नेऽथ निशितक्ष्णुतशातानितेजिते' इत्यमरः। सुपक्षदक्षं शोभनश्चासौ पक्षः स्वसिद्धान्तश्च सुपक्षः सुपक्षे दक्षः चतुरस्तम्। बाणपक्षे सुपक्षैः गुरुद्भिः दक्षं वेगयुतम्। सुखतीर्थमार्गणं सुखतीर्थः आनन्दतीर्थ एव मार्गणः शरः तम्। 'कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः' इत्यमरः। मठान्तरेषुधेः अन्यः मठः मठान्तरं तदेव इषुधिः तूणीरः तस्मात् 'तूणीरनिषङ्गाइषुधिद्वयोः' इत्यमरः। स्वशिष्यहस्तेन स्वस्य आत्मनः शिष्य एव हस्तः करः तेन द्रुतं क्षिप्रं आदत्त गृहीतवान् 'दद दान इत्यतो लङात्मनेपदं आदत्त आददातां आददत'। प्राप्तप्रतिवादिनिराकरणाय आनन्दतीर्थं अन्यमठस्थितं स्वशिष्येण समाह्वयत् प्रतिभटनिरासाय निषङ्गात् बाणं यथा गृह्णति तथेति भावः॥ ९ ॥

जैत्रं प्रजिज्ञासु कुतूहलाकुलं नृणां कुलं प्रत्वरितं निशामयन्।
अवन्दतोपेत्य गुरुं गरिष्ठधीः स रूप्यपीठायतनोत्तमस्थितम् ॥१०॥

पदार्थदीपिकोद्बोधिका – जैत्रमिति ॥ जैत्रं जयशीलं, जये सामर्थ्ययुक्तमिति यावत्। प्रतिज्ञासु प्रज्ञातुमिच्छु। कुतूहलाकुलं कुतूहलेन सम्भ्रमेणाकुलं विवशं, पूर्णमिति वा 'आकुलं भरितं पूर्णं' इति हलः। प्रत्वरितमतिवेगयुक्तं नृणां पुरुषाणां कुलं समूहं निशामयन्, स गरिष्ठधीर्गरिष्ठा श्रेष्ठा धीर्यस्य स पूर्णप्रज्ञाचार्यः। रूप्यपीठायतनोत्तमस्थितं, रूप्यात्मकं यत्पीठं तस्मिन्यदायतनोत्तमं तस्मिन् स्थितं गुरुमुपेत्य अवन्दत॥ १० ॥

मन्दोपकारिणी – जैत्रमिति ॥ गरिष्ठधीः अतिशयेन गुर्वी गरिष्ठा पूर्णा धीः प्रज्ञा यस्य सः गरिष्ठधीः सः पूर्णप्रज्ञाचार्यः। गुरुणा आकारितः सन् मठान्तरादागत्य, रूप्यपीठायतनोत्तमस्थितम् रूप्यपीठे रजतपीठपुरे आयतनोत्तमे मठश्रेष्ठे स्थितं विद्यमानं गुरुं अच्युतप्रेक्षं उपेत्य प्राप्य अवन्दत नमस्कृतवान्। किं कुर्वन् सन् जैत्रं वादे जयशीलं जयसामर्थ्योपेतमिति यावत्। प्रजिज्ञासु ज्ञातुमिच्छत् कुतूहलाकुलं कुतूहलेन सन्तोषेण आकुलं समन्वितम्। प्रत्वरितं अतिवेगयुक्तं नृणां पुरुषाणां कुलं समूहं निशामयन् पश्यन्

सन्, प्राप्तवादिपूर्णप्रज्ञाचार्ययोः मध्ये कः जयवान् भविष्यतीति ज्ञातुं सन्तोषेण तत्र मिलितं जनसमूहं निरीक्षमाण इति भावः ॥ १० ॥

स वादिसिंहस्य गिरं गरीयसीमखण्डयत्पण्डितमण्डलान्तरे ।
तीक्ष्णेन वाक्येन मितेन वेगिना गदां शरेणेव विशारदो मुहुः ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ विशारदः परवादिनिराकरणचतुरः स पूर्णप्रज्ञाचार्यः तीक्ष्णेन प्रतिवादिना सोढुमशक्येन । मितेन शब्दापेक्षयाल्पेन, वेगोऽस्या-स्तीति वेगी तेन वक्तुमुचितं कालमनतिक्रम्योक्तेनेत्यर्थः वाक्येन गरीयसीं युक्तियुक्तत्वेन श्रेष्ठां वादिसिंहस्य गिरं पण्डितमण्डलान्तरे पण्डितसमूहमध्ये, विशारदो युद्धपण्डितभटः तीक्ष्णेन निशितेन मितेन परिमितेन वेगिना वेगवता शरेण, गदामिव मुहुः अखण्डयत् । खडि भेदे लङ् ॥ ११ ॥

मन्दोपकारिणी – स इति ॥ विशारदः निराकरणे चतुरः सः पूर्णप्रज्ञाचार्यः तीक्ष्णेन प्रतिवादिना सोढुमशक्येन, मितेन शब्दापेक्षया स्वल्पेन, वेगिना वाद्युक्त्यनन्तरमेव अविलम्बेनोक्तेन वाक्येन प्रत्युत्तररूपेण गरीयसीं महतीं स्वान्येन परिहतुमशक्यामिति यावत् । वादिसिंहस्य गिरं वचनं पण्डितमण्डलान्तरे पण्डितानां विदुषां मण्डलं समूहः तस्य अन्तरे मध्ये मुहुः भृशं अखण्डयत् निराकरोत् । 'खडि भेदन इत्यस्मात् लङ् परस्मैपदम्' केन कामिव, विशारदः युद्धचतुरः पुरुषः तीष्णेन निशितेन मितेन अणुपरिमाणेन वेगिना वेगवता शरेण इषुणा गदां गदायुधमिव । बुद्धिसागरवादिसिंहयोः मध्ये बुद्धिसागरमतेन प्रथमं कथां कुर्वतः वादिसिंहस्य पक्षमखण्डयदिति भावः ॥ ११ ॥

असावसूयन् द्विनवप्रकारतो व्यचीक्लृपत्कश्चिदथार्थमुच्चकैः ।
जगद्विजेतुश्च जये ससंशयस्तावज्जनोऽजायत पूर्णचेतसः ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – असाविति ॥ अथ श्रीमध्वाचार्येण स्ववाक्यखण्डना-नन्तरमसूयन्नसूयां कुर्वन्नसौ वादिसिंहः कश्चिदर्थं कश्चित्पदार्थमुच्चकैरुच्चैर्ध्वनिना द्विनवप्रकारतः नव च ते प्रकाराश्च, द्वौ च ते नवप्रकाराश्च तैरिति ततः अष्टादशप्रकारैरित्यर्थः

व्यचीक्लृपत् कल्पयामास तावत्तदा जनः तत्र मिलितो जनः जगद्विजेतुर्जगतो विजयशीलस्य पूर्णचेतसः पूर्णं चेतो यस्य तस्य श्रीपूर्णप्रज्ञाचार्यस्य जये जयविषये ससंशयो विजयते न वा इति संशयसहितोऽजायत अभूत्। 'जनि प्रादुर्भावे लङ्' ॥ १२ ॥

मन्दोपकारिणी – असाविति ॥ अथ श्रीमध्वेन स्ववाक्यखण्डनानन्तरमपि असूयन् असूयां कुर्वन् मध्वाधिक्यमसहमान इति भावः। असौ वादिसिंहः कश्चिदर्थं अभिधेयं 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। उच्चैकैः उच्चध्वनिवाक्यैः द्विनवप्रकारतः द्वौ च ते नव च नवसङ्ख्या च द्विनवाः द्विनवाश्च ते प्रकाराः पक्षाश्च द्विनवप्रकाराः अष्टादश-विधा इति यावत्। तेभ्यः द्विनवप्रकारतः पञ्चम्यर्थे तसिः व्यचीक्लृपत् विकल्पयामास। 'क्लृपू सामर्थ्य इत्यतो लुङ् परस्मैपदं अचीक्लृपत् अचीक्लृपतां अचीक्लृपन्'। तावत् तदा असूयया उच्चस्वरेण बहुप्रकारेण विकल्पकाले जनः तत्र मिलितो जनः जगद्विजेतुः जगतः विजेता जयशीलः तस्य पूर्णचेतसः पूर्णं बह्वर्थविषयकं चेतो मनो यस्य तस्य पूर्णचेतसः पूर्णप्रज्ञस्य जये वादिसिंहपराभवविषये ससंशयः वादिसिंहं विजेष्यते न वा इति संशयसहितः अजायत अभूत्। 'जनि प्रादुर्भाव इत्यस्माद्धातोर्लङात्मनेपदं अजायत अजायेतां अजायन्त' ॥ १२ ॥

विकल्पकोटीरथ खण्डयन् द्रुतं रेजेऽधिकं स्मेरमुखो बृहन्मतिः।
तमस्ततीर्वा द्युमणिर्विशुद्धया गवाश्रितो विष्णुपदं सदास्पदम् ॥ १३ ॥

भावप्रकाशिका – सदास्पदम् नक्षत्रास्पदं च ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – विकल्पेति ॥ अथ सदास्पदं सतामाश्रयभूतं विष्णुपदं श्रीहरिचरणं श्रितः आश्रितः। स्मेरमुखः स्मेरं स्मितयुक्तं मुखं यस्य तादृशः। अनेन परनिराकरणे आयासाभावः सूचितः। बृहन्मतिः बृहती बह्वर्थविषयिणी मतिः बुद्धिः यस्य तादृशः श्रीपूर्णप्रज्ञाचार्यः। विकल्पकोटीः वादिसिंहकृतविकल्पपक्षान् द्रुतमविलम्बितं यथा भवति तथा विशुद्धया शब्दार्थदोषशून्यया गवा वाचा, सदास्पदं नक्षत्राश्रयभूतं प्राणिनामाश्रयं वा 'तारा भं रात्रिजं धिष्ण्यं सन्नक्षत्रं' इति वैजयन्ती, विष्णुपदं आकाशं श्रितो द्युमणिः सूर्यो विशुद्धया गवा स्वतेजसा तमस्ततीर्वा, तमसां निकरमिव। 'वा

विकल्पोपमानयोः' इत्यमरः। खण्डयन् सन् अधिकं यथा भवति तथा रेजे अशोभत ॥ १३ ॥

मंदोपकारिणी – विकल्पेति ॥ अथ विकल्पान्तरम्। बृहन्मतिः बृहती पूर्णा मतिः प्रज्ञा यस्य स तथोक्तः पूर्णप्रज्ञः। स्मेरमुखः स्मेरं मन्दहासयुक्तं मुखं वक्त्रं यस्य सः तथोक्तस्सन्, अनेन तन्निराकरणे आयासाभावः सूचितः। विकल्पकोटीः विकल्पानां कोटीः पक्षान् वादिसिंहकृताष्टादशविकल्पप्रकारान् द्रुतं अविलम्बेन विशुद्धया दूषणरहितया निराकर्तुमशक्यया गवा वाचा खण्डयन् निराकुर्वन्, सदास्पदं सतां आस्पदं आश्रयं विष्णुपदं विष्णोः श्रीहरेः पदं चरणं श्रितस्सन् अधिकं अत्यन्तं रेजे शुशुभे। 'राजृ दीप्तावित्यतो लिडात्मनेपदं रेजे रेजाते रेजिरे'। क इव? सदास्पदं सतां प्राणिनां आश्रयं विष्णुपदं आकाशं 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः श्रितः आश्रितः विशुद्धया निर्मलया गवा स्वतेजसा 'गौर्नाकि वृषभे चन्द्रे वाक् भूदिग्धेनुषु स्त्रियाम्। द्वयोऽस्तुरश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु' इति रत्नमाला। तमस्ततीः तमसां अन्धकाराणां ततीः समुदायान् खण्डयन् द्युमणिर्वा सूर्य इव। 'द्युमणिस्तरणिर्मित्रः' इत्यमरः। 'वा विकल्पोपमानयोः' इति च ॥ १३ ॥

अगाधमात्मन्यतिवेलमुद्धतं तिरस्कृताशेषसरस्वतीततिम्।
कामं महामानसकुम्भसम्भवो लघूचकारेत्यपि बुद्धिसागरम् ॥१४॥

भावप्रकाशिका – सरस्वत्यो वाण्यो नद्यश्च ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – अगाधमिति ॥ महामानसकुम्भसम्भवः, महत् मानसं यस्य पूर्णप्रज्ञाचार्यः स एव कुम्भसम्भवोऽगस्त्यः 'अगस्त्यः कुम्भसम्भवः' इत्यमरः अगाधं गम्भीरबुद्धिं आत्मन्यात्मविषये अतिवेलमत्यन्तं यथा भवति तथा 'अतिवेलभृशात्यर्थाति-मात्रोद्गाढनिर्भरम्' इत्यमरः। उद्धतमविनीतं तिरस्कृताशेषसरस्वतीततिं तिरस्कृता निराकृता अशेषसरस्वतीततिः समस्तवादिवाक्सन्ततिर्येन तं 'सरस्वती ह्यापगायां गो वाग्देवतयोरपि' इति हेमचन्द्रः। बुद्धिसागरमपि, न केवलं वादिसिंहमेव वादिसिंहनिराकरणानन्तरं अतिसंरम्भात्प्रत्यवतिष्ठमानं बुद्धिसागरमपि इति वादिसिंहनिराकरणप्रकारेण कामं यथेच्छं

यथा भवति तथाऽनायासेनेति यावत् लघूचकार खण्डिताहङ्कारं चकार। प्रागगस्त्योऽगाधमतलस्पर्शमात्मनि स्वस्मिन्नतिवेलं वेलामतिक्रम्योद्धतं प्रवृद्धं, तिरस्कृता स्वतरङ्गैर्निराकृताशेषसरस्वतीततिरशेषनदीसमूहो येन तं सागरमिवेति श्लेषाभिप्रायः ॥ १४ ॥

मन्दोपकारिणी – अगाधमिति ॥ महामानसकुम्भसम्भवः महत् पूर्णं मानसं मनो यस्य स तथोक्तः पूर्णप्रज्ञः। 'स्वान्तं हृन्मानसं मनः' इत्यमरः। स एव कुम्भसम्भवः अगस्त्यमुनिः 'अगस्त्यः कुम्भसम्भवः' इत्यमरः। अगाधं गम्भीरं आत्मनि स्वविषये अतिवेलं अत्यन्तं 'अतिवेलभृशात्यर्थं' इत्यमरः उद्धतं अविनीतं, 'अविनीतः समुद्धतः' इत्यमरः, मत्समः कोऽपि नास्तीति दृप्तमिति यावत्। तिरस्कृताशेषसरस्वतीततिं अशेषाणां समस्तानां पण्डितानां सरस्वत्यः वाचः 'गीर्वाग्वाणी सरस्वती' इत्यमरः, तासां ततिः समूहः तिरस्कृता निराकृता अशेषसरस्वतीततिः येन स तथोक्तस्तम्। बुद्धिसागरमपि इति वादिसिंहनिराकरणप्रकारेण कामं यथेष्टं अनायासेनेति यावत्। लघूचकार खण्डिताहङ्कारं चकार। जिगाय इति यावत्। प्राक् अगस्त्यर्षिः अगाधं अतलस्पर्शं अतिनिम्नमित्यर्थः। 'अगाधमतलस्पर्शं' इत्यमरः। आत्मनि स्वस्मिन् अतिवेलं अब्धितीरं अतिक्रम्य उद्धतं 'वेलाब्धितीरवृध्योऽस्तु' इति भास्करः। तिरस्कृताशेषसरस्वतीततिं अशेषाश्च ताः सरस्वत्यः नद्यश्च तासां ततिः समूहः अशेषसरस्वतीततिः तिरस्कृता निराकृता अशेषसरस्वतीततिः येन स तथोक्तस्तम्। सागरं यथा पीत्वा लघूचकार तथेति श्लेषाभिप्रायः। 'कूलङ्कषा निर्झरिणी रोधो वक्रा सरस्वती' इत्यमरः ॥.१४ ॥

श्व एव वादोऽस्त्विति वादिनौ खलावद्योत्तरं भाति यदीर्यतामिति।
मध्वे ब्रुवाणेऽमत तौ जितौ जनः स निश्चिकायाथ निशापलायनात् ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – श्व इति ॥ ''वादः श्व एवास्तु'' इति वादिनौ वदन्तौ खलौ दुष्टौ तौ वादिसिंहबुद्धिसागरौ प्रति मध्वे श्रीमध्वाचार्ये, 'यद्युत्तरमस्मद्युक्तिखण्डनोत्तरं भाति प्रतिभाति तर्ह्यद्येदानीमीर्यतामुच्यतां अन्यथा प्रत्युत्तराप्रतिपत्तिरप्रतिभानामनिग्रहस्थानापरपर्यायं पराभवकारणं युवयोः प्राप्तमिति ब्रुवाणे सति जनः तूष्णीं स्थितौ दृष्ट्वा जितौ पराजितौ अमत मेने। स जनः निशापलायनात् रात्रावेव गमनान्निश्चिकायापि तौ निशायामेव पलायितौ श्रुत्वा पराजिताविति निश्चयमकरोच्च ॥ १५ ॥

मन्दोपकारिणी – श्व एवेति ।। वादः कथा श्व एव परेद्युरेवास्तु भवतु इति वादिनौ वदन्तौ खलौ दुर्जनौ वादिसिंहबुद्धिसागरौ प्रति मध्वे पूर्णप्रज्ञाचार्ये यदि उत्तरं अस्मद्युक्तिखण्डने प्रतिवाक्यं 'प्रतिवाक्योत्तरे समे' इत्यमरः भाति प्रतीयेत तर्हि अद्य इदानीं ईर्यतां उच्यतां 'ईर प्रेरण इत्यस्मात् कर्मणि लोडात्मनेपदं ईर्यतां ईर्येतां ईर्यन्ताम्। अन्यथा प्रत्युत्तरापत्तिः अप्रतिभेति अप्रतिभानामकनिग्रहस्थानं युवयोः प्राप्तं, इति एवं ब्रुवाणे सति वदति सति, तूष्णीं स्थितौ दृष्ट्वा जनः जयशीलजिज्ञासया मिलितो जनः जितौ पराजितौ अमत मेने। 'मनु अवबोधन इत्यस्मात् लुङात्मनेपदं अमत अमनिष्ट, अमनिषाताम् अमनिषत'। सः जनः निशापलायनात् निशायां रात्रौ पलायनात् ग्रामं परित्यज्य निर्गमनात् 'निशा निशाथिनी रात्रिः' इत्यमरः। जितौ निश्चिकायापि तौ निशायामेव पलायितौ श्रुत्वा पराजिताविति निश्चयमकरोच्च। 'निस् पूर्वकात् चिञ् चयने इत्यस्माल्लिट् परस्मैपदं चिकाय चिक्यतुः चिक्युः' ।। १५ ।।

बुद्ध्यब्धिना वादिवरेण चार्जितां जयश्रियं भूपरिवर्तिना चिरात्।
अहो मुहूर्तादयमप्रयत्नवानवाप्तवानित्यतिविस्मितं जनैः ।। १६ ।।

पदार्थदीपिकोद्बोधिका – बुद्ध्यब्धिनेति ।। अयं श्रीमध्वाचार्यो भूपरिवर्तिना भुवं परिवर्तितुं प्रतिवाद्यपेक्षया पर्यटनं कर्तुं शीलमस्यास्तीति, तेन बुद्ध्यब्धिना बुद्ध्याऽब्धिरिव, तेन बुद्धिसागरेणेत्यर्थः। वादिवरेण वादिसिंहेन चेत्यर्थः। 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभ-कुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका' इत्युक्तेः सिंहशब्दस्य श्रेष्ठार्थत्वाद्वादि-सिंहेनेति वक्तव्ये वादिवरेणेत्युक्तम्। चिरादार्जितां जयश्रियं मुहूर्तान्मुहूर्तमात्रेण । प्रयत्नवान्न भवतीत्यप्रयत्नवान् सन्,आयासरहितः सन्नित्यर्थः। अवाप्तवान् प्राप अपहृतवानिति भावः। अहो इति जनैः अतिविस्मितम् ।। १६ ।।

मन्दोपकारिणी – बुद्धीति ।। अयं श्रीमध्वाचार्यः। भूपरिवर्तिना भुवं भूमिं परिवर्तिना पर्यटता बुद्धब्धिना बुद्धिसागरेण अब्धिशब्दस्य सागरशब्दपर्यायित्वात् बुद्ध्याब्धिनेत्युक्तम् । वादिवरेण वादिसिंहेन च। 'सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यमरकोशोक्तेः। वरशब्दस्य श्रेष्ठार्थकसिंहशब्देन समानार्थकत्वात् वादिवरेणेत्युक्तम्।

चिरात् बहुकाल आर्जितां संपादितां जयश्रियं जयाख्यसम्पदं मुहूर्तात् घटिकाद्वय-मितकालादेव, अप्रयत्नवान् प्रयत्नो अस्यास्तीति प्रयत्नवान् तादृशो न भवतीति अप्रयत्न-वान् आयासरहितस्सन् अवाप्तवान् अपहृतवानिति भावः। अहो आश्चर्यम्। 'अहोहीति च विस्मये' इत्यमरः। इत्येवंप्रकारेण जनैः ग्रामस्थजनैः अतिविस्मितं आश्चर्यं प्राप्तम्॥ १६॥

व्याख्यन् कदाचिन्मणिमद्विनिर्मितं भाष्यं जनैस्तर्कविशारदैर्वृतः।
उवाच वाचं परिहासहासवान्सम्मोदतीर्थः सुरमोददायिनीम्॥१७॥

पदार्थदीपिकोद्बोधिका – व्याख्यान्निति॥ मणिमद्विनिर्मितं सङ्करनाम्ना भुव्युत्पन्नेन मणिमताख्याविरचितं भाष्यं ब्रह्मसूत्रभाष्यं व्याख्यान् व्याकुर्वन्, तर्कविशरदैस्तर्के तर्कशास्त्रे विशारदैश्चतुरैर्जनैर्वृतः सहितः, संमोदतीर्थः सम्यङ्मोदः सम्मोदः, सम्मोदकरं तीर्थं शास्त्रं यस्मात् स आनन्दतीर्थाचार्यः। परिहासहासवान् परिहासरूपो हासः, परिहासयुक्तो हास इति वा, सोऽस्यास्तीति तादृशस्सन् 'परिहासश्च नर्मणि' इति हलः। सुरमोददायिनीं सुराणां मोदः सन्तोषः, तं दातुं शीलमस्यास्तीति तादृशीं वाचमुवाच॥ १७॥

मन्दोपकारिणी – व्याख्यन्निति॥ कदाचित् कस्मिंश्चित्काले। मणिमद्विनिर्मितं मणिमता सङ्करनाम्ना भुव्युत्पन्नेन मणिमन्नामकदैत्येन विनिर्मितं विरचितं भाष्यं ब्रह्मसूत्रभाष्यं व्याख्यन् व्याख्यानं कुर्वन्, तर्कविशारदैः तर्के तर्कशास्त्रे विशारदैः चतुरैः जनैः वृतः युक्तः सम्मोदतीर्थः श्रीमदानन्दतीर्थाचार्यः। परिहासहासवान् 'हासोहास्यं च बीभत्सं' इत्यमरः, अपहासं कुर्वन् सन् इति यावत्। सुरमोददायिनीं सुराणां मोदं ददातीति सुरमोददायिनी तां वाचं वाक्यं, उवाच अब्रवीत्। 'वच परिभाषण इत्यतो लिट् परस्मैपदं, उवाच ऊचतुः ऊचुः'॥ १७॥

सत्सूत्रभावे प्रविचारिते पृथग्भाष्याभिसन्धौ च विशुद्धबुद्धिभिः।
निगृह्य गूढाग्रहमुग्रमेतयोर्मान्योऽन्वयोऽन्योन्यमहो न दृश्यते॥ १८॥

पदार्थदीपिकोद्बोधिका – सदिति॥ विशुद्धबुद्धिभिः विशुद्धा निर्मला बुद्धिश्चित्तं येषां तैः पुरुषैः। उग्रं नरकाद्यनर्थप्रदम्। गूढाग्रहं गूढो निगूढ आग्रहो विचारमार्गमपहायैव-मेवतत्त्वमित्येवंरूप आग्रहस्तं निगृह्य परित्यज्य, सत्सूत्रभावे सन्ति शोभनानि सूत्राणि

ब्रह्मसूत्राणि तेषां भावोऽभिप्रायस्तस्मिन्। पृथक् भाष्यं विहाय प्रविचारिते सति सम्यग्विचारिते सति, तथा भाष्याभिसन्धौ च भाष्याभिप्राये च प्रविचारिते सति। अनयोः सूत्रसाङ्करभाष्ययोरन्योन्यं मिथो मान्यः परस्पराविरोधेनाङ्गीकर्तुमुचितोऽन्वयो व्याख्यानव्याख्येयरूपः सम्बन्धो न दृश्यते। अहो! एवंविधेऽप्यस्मिन् भाष्ये महाजनस्य कथमादर इति भावः। तथा हि। सूत्रेषु विष्णोरनन्तगुणपूर्णत्वं, निर्दोषत्वं, चेतनाचेतनात्मकसर्वप्रपञ्चविलक्षणत्वं, मुख्यतो वचनवृत्या सर्ववेदप्रतिपाद्यत्वं, मुक्तौ च सर्वजीवनियामकत्वं, प्रपञ्चसत्यत्वमित्यादयोऽर्थाः प्रतिपाद्यन्ते। भाष्ये तु विष्णोर्निर्गुणत्वं, जीवाभेदेन सकलदोषभाजनत्वं, सर्वशब्दावाच्यत्वं, प्रपञ्चस्य मिथ्यात्वं, मुक्तौ जीवब्रह्मैक्यञ्चेत्यादयोऽर्थाः सूत्रविरुद्धाः प्रतिपाद्यन्ते। तस्मात्परस्परविरुद्धयोर्भाष्यसूत्रयोः कथं व्याख्यानव्याख्येयभावलक्षणस्सम्बन्धः, कथञ्च प्रमाणतमसूत्रविरुद्धभाष्ये महाजनानां प्रमाणत्वाभिमान इति भावेन, अहो इत्युक्तमिति भावः॥ १८॥

मन्दोपकारिणी – सदिति॥ विशुद्धबुद्धिभिः विशुद्धा रागादिदोषरहिता बुद्धिः अन्तःकरणं येषां ते विशुद्धबुद्धयः तैः पुरुषैः॥ विशुद्धा च ताः बुद्धयश्च विशुद्धबुद्धयः ताभिः विशुद्धान्तःकरणैरिति वा। उग्रं क्रूरं नरकाद्यनर्थप्रदमित्यर्थः। गूढाग्रहं गूढं निगूढं हृदये आग्रहं विचारमकृत्वा 'एवमेव तत्त्वं' इत्येवंरूपं दुरभिमानं निगृह्य परित्यज्य, सत्सूत्रभावे सन्ति निर्दोषाणि च तानि सूत्राणि ब्रह्मसूत्राणि सत्सूत्राणि सत्सूत्राणां भावे अभिप्राये 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः, पृथक् भाष्यं वर्जयित्वा, 'पृथग्विनान्तरेणर्तेहिरुङ् नाना च वर्जने' इत्यमरः प्रविचारिते सम्यग्विचारिते सति, तथा भाष्याभिसन्धौ च भाष्यस्य अभिप्राये च प्रविचारिते सति, एतयोः अनयोः सूत्रशङ्करभाष्ययोः अन्योन्यं मिथः मान्यः विरोधाभावेन अङ्गीकर्तुमुचितः अन्वयः व्याख्यानव्याख्येयभावः संबन्धः न दृश्यते नावलोक्यते। अहो एवंविधेऽपि भाष्ये महाजनस्य आदरोऽस्तीति आश्चर्यम्। 'दृशिर् प्रेक्षण इत्यतः कर्मणि लट् आत्मनेपदं दृश्यते दृश्येते दृश्यन्ते' सूत्रभाष्ययोः विरोधस्तु, सूत्रेषु विष्णोरनन्तगुणपरिपूर्णत्वं, निर्दोषत्वं, चेतनाचेतनात्मकसर्वप्रपञ्चविलक्षणत्वं, परममुख्यया वृत्त्या सर्ववेदप्रतिपाद्यत्वं, मुक्तौ सर्वजीवनियामकत्वं, प्रपञ्चस्य सत्यत्वमित्यादयोऽर्थाः प्रतिपाद्यन्ते। भाष्ये तु विष्णोर्निर्गुणत्त्वं, जीवाभेदेन सकलदोषभाजनत्वं, सर्वशब्दावाच्यत्वं, प्रपञ्चस्य मिथ्यात्वं

मुक्तौ जीवानां ब्रह्मैक्यञ्च, इत्यादयोऽर्थाः सूत्रविरुद्धाः प्रतिपाद्यन्त इति। तस्मात् परस्परविरुद्धयोः भाष्यसूत्रयोः कथं व्याख्यानव्याख्येयभावः सम्बन्धः। कथं सूत्रविरुद्धं भाष्यं प्रमाणं, कथं चैवंविधे भाष्ये महाजनानां प्रमाणत्वाभिमानः इति भावेन अहो इत्युक्तमिति भावः ॥ १८ ॥

इति ब्रुवाणे प्रतिपादयत्यलं भाष्येऽत्र दोषान्प्रबलान्मुहुर्मुहुः ।
तस्मिंस्तु विस्मेरधियोऽपि यत्नतो न स्थेयसः पर्यहरन्निमानमी ॥ १९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इति ब्रुवाणे वदति तस्मिन् श्रीमध्वाचार्ये अत्र भाष्ये प्रबलान् दुष्परिहरान्दोषान्मुहुर्मुहुरलं सम्यक् प्रतिपादयति सति विस्मेरधियो विस्मेरा विस्मिता धीर्येषां ते। अमी व्याख्यानावसरे पर्यासीनास्तर्कविशारदा जनाः, स्थेयसोऽति-स्थिरानिमान् श्रीमध्वेनोद्भावितान् दोषान् यत्नतोऽपि न पर्यहरन् न परिहृतवन्तः ॥ १९ ॥

मन्दोपकारिणी – इतीति ॥ इति पूर्वोक्तप्रकारेण ब्रुवाणे भाषमाणे तस्मिन् श्रीमध्वाचार्ये। अत्र भाष्ये अस्मिन् शङ्करभाष्ये प्रबलान् दुष्परिहारान् दोषान् मुहुर्मुहुः वारं वारं अलं सम्यक् अनुभवारूढं यथा भवति तथेति यावत् प्रतिपादयति उपपादयति सति, विस्मेरधियः विस्मेराः आश्चर्ययुक्ताः धियः चित्तानि येषां ते विस्मेरधियः मनसा विस्मयं कुर्वन्तः अमी व्याख्यानावसरे परितः आसीनाः तर्कविशारदाः जनाः स्थेयसः अतिशयेन स्थिरान् दृढान् इमान् श्रीमध्वाचार्योद्भावितान् भाष्यदोषान् यत्नतोऽपि प्रयत्नेनापि स्वबुद्ध्यनुसारेण यत्नं कृत्वापि न पर्यहरन् न परिहृतवन्तः। 'परिपूर्वकात् हृञ् हरणे इत्यस्मात् लङ् परस्मैपदं अहरत् अहरतां अहरन्' ॥ १९ ॥

नन्वस्य सूत्रस्य परोऽर्थ उच्यतां यद्भाष्यमात्रं भवता निरस्यते ।
भवादृशैर्यः कविभिर्न दूष्यते कथञ्चनेत्यूचुरिमे वचस्विनः ॥ २० ॥

पदार्थदीपिकोद्बोधिका – नन्विति ॥ नन्विति शङ्कार्थे। यद्यस्मात्कारणाद्भवता केवलं भाष्यं भाष्यमात्रं निरस्यते निराक्रियते। भाष्यमेव बहुधा निरस्यते सूत्रन्तु प्रशस्यत इत्यर्थः। तस्मात्कारणात्, भवन्त इव पश्यन्तीति भवादृशास्तैः कविभिः विद्वद्भिः कथञ्चन केनापि प्रकारेण योऽन्योऽर्थो न दूष्यते स परोऽन्योऽर्थोऽस्य सूत्रस्य ब्रह्मसूत्रस्य भवता उच्यतामिति वचस्विनो वाग्मिन इमे सभास्था वादिन ऊचुः ॥ २० ॥

मन्दोपकारिणी – नन्विति ॥ वचस्विनः वाग्मिनः। इमे जनाः इति एवमूचुः अब्रुवन्। 'वच परिभाषण इत्यतो लिट् परस्मैपदम्'। किमिति, ननु इति आमन्त्रणे। हे मध्वाचार्य! यत् यस्मात् भवता त्वया भाष्यमात्रं केवलं भाष्यं भाष्यमात्रं शङ्करप्रणीत-भाष्यमेव निरस्यते निराक्रियते। 'निः पूर्वात् असु क्षेपण इत्यस्मात् कर्मणि लट् आत्मनेपदं अस्यते अस्येते अस्यन्ते'। तस्मात् अस्य प्रमाणत्वेन अङ्गीकृतस्य सूत्रस्य परः अन्यः अर्थः उच्यतामभिधीयताम्। 'वचेः कर्मणि लोट् आत्मनेपदं उच्यतां उच्येतां उच्यन्ताम्'। योऽर्थो भवादृशैः भवता सदृशाः भवादृशाः तैः कविभिः पण्डितैः 'सङ्ख्यावान्पण्डितः कविः' इत्यमरः। कथञ्चन केनापि प्रकारेण न दूष्यते न निराक्रियते तादृशोऽर्थः उच्यतामिति ऊचुः इति संबन्धः। 'दुष वैकृत्य इत्यतः कर्मणि लट् आत्मनेपदं दूष्यते दूष्येते दूष्यन्ते' ॥ २० ॥

अल्किष्टशब्दान्वयमेष संभवत्सूत्रार्थमुच्चैर्वचनं तदाददे।
मानीकृताम्नाययुतस्मृति क्षणादेष्यत्कथाताण्डवसूत्रधारकम् ॥ २१॥

पदार्थदीपिकोद्बोधिका – अक्लिष्टेति ॥ एष श्रीमध्वाचार्यः तदाऽक्लिष्टशब्दान्वयं, शब्दानां वाचकशब्दानां अन्वयो वाच्यार्थैः सह सम्बन्धः, अक्लिष्टः योगेन रूढ्या वा सुबोध्यः शब्दान्वयो यस्य तत्, योगेन रूढ्या वा तत्तदर्थवाचकत्वशक्तिमच्छब्दैरेव विवक्षितार्थकथनादर्थानां शब्दानाञ्च परस्परं वाच्यवाचकभावलक्षणं सम्बन्धमसूचयदिति भावः। यद्वा शब्दाश्चान्वयाश्च शब्दान्वया अक्लिष्टाश्शब्दान्वया यस्मिन् तत्। सम्भवत्सूत्रार्थं सम्भवन्नुपपाद्यमानः सूत्रार्थो यस्मिन् तत्। मानीकृताम्नाययुतस्मृति आम्नाययुता वेदयुक्ता या स्मृतयः पुराणानि मानीकृता उक्तार्थे प्रमाणत्वेनोदाहृता यस्मिन् तत्। एष्यत्कथाताण्डव-सूत्रधारकम् एष्यन्ती स्वयं करिष्यमाणभाष्यात्मिका या कथा वाक्यप्रबन्धः 'कथ वाक्यप्रबन्धे' इति धातोः तदात्मकस्य ताण्डवस्य नर्तनस्य सूत्रधारकं पूर्वरङ्गभूतं, एवं मया भाष्यं करिष्यत इत्येतदसूचयदिति भावः। वचनमुपन्यासरूपं वाक्यमुच्चैः उन्नतस्वरो यथा भवति तथा क्षणात् क्षणकालात् आददे आदरेण वक्तुमुपचक्रमे ॥ २१ ॥

मन्दोपकारिणी – अक्लिष्टेति ॥ एषः श्रीमध्वाचार्यः। तदा जनोक्तिकाले। उच्चैः उच्चध्वनिना। वचनं उपन्यासरूपवचनम्। क्षणात् सद्यः। आददे वक्तुमुपचक्रमे। 'आङ्

पूर्वात् दद दाने लिडात्मनेपदं आददे आददाते आददिरे' । कथंभूतं वचनं, अक्लिष्टशब्दान्वयं अक्लिष्टः क्लेशरहितः स्पष्टं प्रतीयमानः शब्दानां पदानां अन्वयः योजना यस्मिन् तत्, अक्लिष्टाः शब्दाः अन्वयाश्च यस्मिन्निति वा। शब्दानां अक्लिष्टत्वं नाम स्पष्टार्थत्वं, अन्वयानांतु अव्यवहितत्वं ज्ञेयम्। पुनः कथंभूतं, सम्भवत्सूत्रार्थं सम्भवदुपपद्यमानः सुत्राणां अर्थोऽभिधेयः यस्मिन् तत् सम्भवत्सूत्रार्थम्। पुनः कथंभूतं, मानीकृताम्नाययुतस्मृति आम्नायैः वेदैः युताः आम्नाययुताः 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरः आम्नाययुताश्च ताः स्मृतयश्च आम्नाययुतस्मृतयः मानीकृताः उक्तौ प्रमाणत्वेन उदाहृताः आम्नाययुतस्मृतयः यस्मिन् तत् मानीकृताम्नाययुतस्मृति। पुनः कीदृशं एष्यत्कथाताण्डवसूत्रधारकं एष्यन्ती भविष्यन्ती स्वेन करिष्यमाणा च सा कथा भाष्यात्मकवाक्यप्रबन्धः एष्यत्कथा 'कथ वाक्यप्रबन्धने' इति धातोः एष्यत्कथैव ताण्डवं नाट्यं 'ताण्डवं नटनं नाट्यं' इत्यमरः नाट्यस्य सूत्रधारकं पूर्वरङ्गभूतं उत्तरत्र क्रियमाणनाट्यस्य पूर्वरङ्गं यथा सूचकं तथा मया एवं रूपभाष्यं करिष्यत इत्येवं स्वयं करिष्यमाणभाष्यसूचकं एतदुपन्यासवचनमिति भावः। एवं विधं वचनं आददे इत्यन्वयः ॥ २१ ॥

बुभुत्सया मत्सरवर्जिताञ्जनान्समत्सरान्वा विजिगीषयाऽऽगतान्।
श्रुतप्रवीणानतितार्किकान्मुहुर्भङ्गचाऽनया भङ्गमुपानिनाय सः॥२२॥

पदार्थदीपिकोद्बोधिका – बुभुत्सयेति॥ स श्रीमध्वाचार्यः। श्रुतप्रवीणान् श्रुतेन शास्त्रश्रवणेन प्रवीणान् चतुरबुद्धीन् अत एवातितार्किकान् अत्यन्तं तर्कशास्त्रज्ञान्। मत्सरवर्जितान् मत्सररहितान् अत एव बुभुत्सया बोद्धुमिच्छया परापररूपतत्त्वस्येत्यर्थः। आगतान् जनान्, अथ समत्सरान् मत्सरयुतान् अत एव विजिगीषया विजेतुमिच्छया गतांश्च अनया पूर्वोक्तया भङ्गचा रीत्या मानीकृतश्रुतिस्मृतियुक्तयुक्तिवचोभङ्गचेत्यर्थः। मुहुर्भङ्गं पराभवमुपानिनाय निरुत्तरत्वं प्रापयामास। तत्त्वजिज्ञासयाऽऽगतानां प्रश्नस्योत्तर-दानेन संशयनिरसनद्वारा विजिगीषयाऽऽगतानां प्रश्नस्य निराकरणेन च भङ्गमुपानिनायेति विवेकः ॥ २२ ॥

मन्दोपकारिणी – बुभुत्सयेति॥ सः श्रीमध्वाचार्यः। श्रुतप्रवीणान् श्रुते शास्त्रे 'श्रुतं शास्त्रावधृतयोः' इत्यमरः। प्रवीणान् निपुणान् 'प्रवीणो निपुणोऽभिज्ञः' इत्यमरः। अत

एव अतितार्किकान् अति अत्यन्तं युक्तिशास्त्रचतुरान्। मत्सरवर्जितान् मत्सरेण मात्सर्येण द्वेषेणेति यावत् वर्जितान् रहितान् अत एव बुभुत्सया तत्त्वं बोद्धुमिच्छया आगतान् जनान्। समत्सरान् मात्सर्येण सहितान् अत एव विजिगीषया मध्वं विजेतुमिच्छया आगतान् जनान् वा जनांश्च वाशब्दः समुच्चये। 'वाऽव्यये वा समुच्चये' इत्येकाक्षरमाला। अनया भङ्गचा अनेन पूर्वोक्तोपन्यासरूपेण प्रकारेण मुहुः अत्यन्तं भङ्गं निरुत्तरत्वरूप-पराजयं 'भङ्गः खण्डे पराजये' इति रत्नमाला। उपानिनाय प्रापयामास। 'नी बह्योरित्यादिना द्विकर्मकत्वं' मत्सरं विना तत्त्वजिज्ञासूनां प्रश्नस्योत्तरं दत्वा संशयादिनिरासद्वारा निरुत्तरत्वं, समत्सराणां विजिगीषूणां विजिगीषया प्रयुक्तयुक्तिखण्ड-नद्वारा निरुत्तरत्वं च कृतवानिति विवेको ज्ञेयः॥ २२॥

कदाचिदेनं प्रतिगम्य सौम्यधीः स मध्यगेहार्यवरः प्रसेदिवान्।
हेतोः कुतश्चिद्विमनीकृतोऽप्यहो गुणाब्धिलुब्धः सुजनः प्रसीदति॥ २३॥

पदार्थदीपिकोद्बोधिका – कदाचिदिति॥ सौम्यधीः कोमलचित्तः स मध्यगेहार्यवरः मध्यगेहश्चासौ आर्यवरश्च साधुश्रेष्ठ इत्यर्थः। प्राक् कुतश्चिद्धेतोः कारणाद्विमनीकृतोऽपि, अविमना विमनाः सम्पद्यमानः कृतः विमनीकृतः कलुषीकृतचित्तोऽपि। कदाचिदेनं श्रीमध्वाचार्यं प्रतिगम्य प्राप्य प्रसेदिवान् प्रसन्नचित्तोऽभूत्। अहो!। सुजनो गुणाब्धिलुब्धः गुणा एवाब्धिस्तस्मिंल्लुब्धो लोभयुक्तः सन्। गुणबाहुल्यं दृष्ट्वा तद्धातुमशक्तः सन् इत्यर्थः। प्रसीदति प्रकर्षेण सीदति तत्र सक्तो भवति हि। सुजनः प्रतीयमानमल्पदोषमगणय्य गुणिनि सक्तो भवतीत्यतोऽयमपि सुजनाग्रेसरो गुणाब्धिं श्रीमध्वं दृष्ट्वाऽन्योपाधिकं मनोदोषं विहाय प्रसन्नचित्तोऽभूदिति भावः। अत्रार्थान्तरन्यासालङ्कारः॥ २३॥

मन्दोपकारिणी – कदाचिदिति॥ सौम्यधीः सौम्या निर्मला धीः चित्तं यस्य स तथोक्तः। मध्यगेहार्यवरः मध्यगेहश्चासौ आर्यवरः ज्ञानिश्रेष्ठश्च मध्यगेहार्यवरः मध्वाचार्यपिता कदाचित् कस्मिंश्चित्काले एनं मध्वाचार्यं प्रतिगम्य प्राप्य प्रसेदिवान् प्रसन्नोऽभूत्। प्राक् पूर्वकाले कुतश्चित् कस्माच्चित् हेतोः कारणात् स्वापेक्षिताकरणरूपात् विमनीकृतोऽपि दुर्मना अपि 'दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः' इत्यमरः। कलुषीकृत-चित्तोऽपीत्यर्थः। स्वापेक्षिताकर्तरि मध्वे पूर्वं अनादरवतोऽपि मध्यगेहस्य इदानीं तद्दर्शनेन

मध्वे आदरोऽभूदिति भावः। इदं युक्तमित्याह अहो इति॥ सुजनः सज्जनः। गुणाब्धिलुब्धः गुणाब्धौ गुणानां अब्धौ समुद्रे लुब्धः लोभवान् गुणग्राहक इति यावत्। गुणबाहुल्यं दृष्ट्वा तद्धातुं अशक्त इति भावः। प्रसीदति तत्र गुणराशौ आसक्तो भवति अहो गुणानां महिमा आश्चर्यम्। 'प्र पूर्वात् षद्लृ विशरणगत्यवसादनेषु इति धातोर्लट् परस्मैपदम्॥ २३॥

तेजोऽमृतं नन्दनगात्रपात्रगं नेत्राञ्जलिभ्यामपिबत्सदाव्ययम्।
विद्यासुधां चास्य वचोमहाघटे पूर्णामसौ कर्णपुटेन पण्डितः॥२४॥

पदार्थदीपिकोद्बोधिका – तेज इति॥ पण्डितो विद्वानसौ मध्यगेहार्यो नन्दनगात्र-पात्रगं नन्दनस्य गात्रमेव शरीरमेव पात्रं तद्गच्छतीति तादृशम्। सदाव्ययं न विद्यते व्ययो यस्य तदव्ययम् तेजोमृतं तेज एवामृतं नेत्राञ्जलिभ्यां नेत्रे एवाञ्जली हस्तौ ताभ्यामपिबत्। सादरं सन्ददर्शेति यावत्। अस्य श्रीमध्वाचार्यस्य वचोमहाघटे वचांस्येव व्याख्यानात्मकवाच एव महाघटस्तस्मिन् पूर्णां विद्यासुधाञ्च विद्याख्यामृतञ्च कर्णावेव पुटं तेन अपिबत्। चित्रं तत्प्रवचनं सादरमशृणोदिति भावः॥ २४॥

मन्दोपकारिणी – तेज इति॥ पण्डितः विद्वान्। असौ मध्यगेहः। नन्दनगात्रपात्रगं नन्दनस्य सुतस्य मध्वाचार्यस्य गात्रं शरीरं तदेव पात्रं भाजनं 'पात्रामत्रं च भाजनं' इत्यमरः पात्रे गच्छति तिष्ठतीति पात्रगः तम्। सदा सर्वदा अव्ययं व्ययरहितं कदाचित् ह्रासरहितमित्यर्थः। तेजोऽमृतं तेजोऽभिधं कान्तिलक्षणं अमृतं सुधां 'तेजो धाम महो विभौ' इत्यमरः। नेत्राञ्जलिभ्यां नेत्रे नयने एव अञ्जली किञ्चिदाकुञ्चिताङ्गुलीसहितौ पाणी ताभ्यां अपिबत् पीतवान्। 'पा पान इत्यतो लङ् परस्मैपदम्'। यथा पात्रस्थितं अमृतं पाणिद्वयेन पिबति तद्वत् शरीरकान्तिं नेत्रद्वयेन सादरं ददर्शेति भावः। अस्य श्रीमध्वाचार्यस्य वचोमहाघटे वचः व्याख्यानाख्यवचनं 'भाषितं वचनं वचः' इत्यमरः महांश्चासौ घटः पात्रं च महाघटः वच एव महाघटः तस्मिन् पूर्णां पूरितां विद्यासुधां च विद्यैव ज्ञानमेव सुधां अमृतं कर्णपुटेन कर्णयोः श्रोत्रयोः पुटेन विवरेण तल्लक्षणपात्रेणेति यावत् अपिबत् तत्प्रवचनं सादरमशृणोदिति भावः॥ २४॥

लीलाविवादे गुरुणा जगद्गुरोः प्रसङ्गतस्तत्र च तादृशे सति।
सूत्रार्थविच्चेत्कुरु भाष्यमञ्जसेत्याक्षेपपूर्वं गुरुरभ्यधादिमम्॥ २५॥

भावप्रकाशिका – प्रसङ्गे तादृशे सति दुर्भाष्यदूषणादिरूपे ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – लीलेति ॥ जगद्गुरोः श्रीमध्वाचार्यस्य गुरुणा अच्युतप्रेक्षाचार्येण प्रसङ्गतस्तत्र च गुरुणा सह प्रसङ्गकाले च तादृशे तादृग्विधे। 'सत्सूत्रभावेप्रविचारिते' इत्यादिपूर्वोक्तप्रकारेण साङ्करभाष्यनिराकरणरूप इत्यर्थः। लीलाविवादे लीलया मत्सरराहित्येन विवादे भाष्यं सूत्रसम्मतं भवति न भवतीति विप्रतिपत्तिस्तस्मिन् सति गुरुरच्युतप्रेक्ष इमं श्रीमध्वाचार्यं प्रति 'त्वं सूत्रार्थविच्चेत् सूत्राणां ब्रह्मसूत्राणामर्थं वेत्ति सम्यग् जानातीति तादृशश्चेद्भाष्यमञ्जसा कुरु' इत्याक्षेपपूर्वं आक्षेपः पूर्वो यथा भवति तथाऽभ्यधात् प्रोवाच ॥ २५ ॥

मन्दोपकारिणी – लीलेति। जगद्गुरोः जगतां गुरोः पूर्णप्रज्ञस्य। गुरुणा अच्युतप्रेक्षेण सह प्रसङ्गतः तत्त्वविचारप्रसङ्गात् तत्र च तत्त्वविचारप्रसङ्गकालेऽपि तादृशे सत्सूत्रभावे प्रविचारिते पृथगित्यादिना प्रागुक्तप्रकारेण शाङ्करभाष्यनिराकरणरूपे लीलाविवादे सति लीलया नर्मणा मत्सरराहित्येनेति यावत्। 'क्रीडा लीला च नर्म च' इत्यमरः विवादे भाष्यं सूत्रसङ्गतं न भवतीति विप्रतिपत्तौ सत्यां गुरुः अच्युतप्रेक्षः इमं मध्वाचार्यं प्रति आक्षेपपूर्वं आक्षेपः ध्वनिविकारव्यङ्ग्यः कोपविशेषः स एव पूर्वो यथा भवति तथा आक्षेपपूर्वं आक्षेपगर्भितं यथा भवति तथेति यावत्। इति अभ्यधात् अब्रवीत्। 'डु धाञ् धातोः लुङ् परस्मैपदं अधात् अधातां अधुः'। किमिति, हे पूर्णप्रज्ञ! त्वं चेत् यदि सूत्रार्थवित् सूत्राणां ब्रह्मसूत्राणां अर्थं प्रतिपाद्यं वित् सम्यक् वेत्ता स्याः तर्हि भाष्यं अञ्जसा सम्यक् कुरु इति 'डु कृञ् करण इत्यतो लोट् परस्मैपदं कुरु कुरुतात् कुरुतं कुरुत' ध्वनिविशेषेण उक्तपद्यालम्बितवाक्येन आक्षेपो व्यज्यते ॥ २५ ॥

विधानमात्रं तदुपाददे तदा पयो यथाच्छं परमः स हंसराट्।
तल्लीनमाक्षेपमुपैक्षताफलं वारीव सन्तो हि गुणांशतोषिणः॥ २६ ॥

पदार्थदीपिकोद्बोधिका – विधानेति ॥ परमो हंसराट् परमहंसश्रेष्ठः स मध्वाचार्यः तदा विधानमात्रं केवलं विधानं 'तद्भाष्यमञ्जसा कुरु' इत्येवं रूपं, हंसराट् अच्छं निर्मलं पयः क्षीरं यथा आदद्यादिति शेषः तथाददे अङ्गीचकार। अफलं न विद्यते फलं यस्य

तदफलं निष्फलमित्यर्थः। तल्लीनं तस्मिन् 'सूत्रार्थविच्चेत्कुरुभाष्यमञ्जसे'त्यस्मिन् वाक्ये इत्यर्थः। लीनं गूढमाक्षेपम्। हंसराट् क्षीरलीनं वारीव उपैक्षत उपेक्षितवान्। अयं भावः। एतद्भाष्यं सूत्रसम्मतं नेत्युक्ते, तदसहमानो गुरुराक्षेपपूर्वकं त्वमञ्जसा भाष्यं कुर्वित्यब्रवीत्। तदायं श्रीमध्वः तद्वाक्ये काकुवेद्यामाक्षेपं हित्वा, 'भाष्यमञ्जसा कुरु इति विधानवाक्यमात्रं गुर्वाज्ञारूपत्वेनाददे। यथा हंसः सनीरं क्षीरं पुरोवर्ति दृष्ट्वा नीरमपहाय क्षीरं पिबेत्तद्वदिति। एतदेव सतां युक्तमित्याह सन्तो हीति॥ हि यस्मात्सन्तः सज्जना गुणांशतोषिणो गुणलक्षणोंऽशः गुणांशस्तेन तोषो एषामस्तीति तादृशाः। सतोरपि गुणदोषयोः दोषमनादृत्य गुणलेशं दृष्ट्वा तमेवाद्रियन्त इति भावः। अत्र उपमार्थान्तरन्यासयोः सङ्करः॥ २६॥

मन्दोपकारिणी – विधानेति॥ परमः उत्तमः। हंसराट् हंसानां योगिनां राट् राजा श्रेष्ठ इत्यर्थः, 'हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। नीलाभे नृपतौ योगिमन्त्रभेदे परात्मनि' इति धनञ्जयः। सः मध्वाचार्यः तदा गुरूदितकाले तत् 'भाष्यं कुरु' इत्येवं रूपं विधानमात्रं विधानमेव उपाददे अङ्गीचकार। कथमिव, हंसराट् हंसपक्षी अच्छं निर्मलं पयः क्षीरं आददे तथेति। तल्लीनं तस्मिन् ''सूत्रार्थविच्चेत्कुरु भाष्यं'' इत्यस्मिन् वाक्ये गूहितं आक्षेपं उपैक्षत उदास्त। 'ईक्ष दर्शन इत्यतो लङात्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त'। कथंभूतं अफलं निष्प्रयोजनं किमिव, हंसपक्षी क्षीरे लीनं मिश्रितं वारि जलमिव। अयं भावः। 'एतद्भाष्यं सूत्रासङ्गतं' इत्येतत् असहमानो गुरुः मध्वं आक्षेपगर्भितं 'सूत्रार्थविच्चेत् भाष्यान्तरं कुरु' इत्यब्रवीत्। तदा श्रीमध्वः तद्वचः प्रगूढध्वनिविकारेण व्यज्यमानं आक्षेपं हित्वा, 'भाष्यं कुरु' इत्येवं रूपं विधिवाक्यमेव गुर्वाज्ञारूपत्वेन करिष्य इत्यङ्गीचकार। यथा हंसपक्षी क्षीरं दृष्ट्वा क्षीरे विद्यमानं नीरं परित्यज्य, क्षीरमेव पिबेत् तद्वत् इति। एतदेव युक्तं हि सन्तः सज्जनाः गुणांशतोषिणः गुणानां अंशः एकदेशः तेन तोषिणः सन्तोषवन्तो। सत्यपि दोषे तं अनादृत्य गुणलेशं दृष्ट्वा तमेव आद्रियन्त इति भावः॥ २६॥

वैराग्यवैयात्यसुवाक्त्वपूर्वकैर्युक्तो गुणैः पारमहंस्यभूषणैः।
ज्येष्ठो यतिर्यो लिकुचान्वयोद्भवस्तं भूरिभक्तिः स कदाचिदब्रवीत्॥२७॥

पदार्थदीपिकोद्बोधिका – वैराग्येति ॥ पारमहंस्यभूषणैः परमहंसस्य यतेर्भावः पारमहंस्यं यतित्वं तस्य भूषणैः। वैराग्यवैयात्यसुवाक्त्वपूर्वकैः विगतो रागः ऐहिकामुष्मिक-फलोपभोगापेक्षा यस्य स विरागस्तस्य भावो वैराग्यं, वैयात्यं धाष्टर्यं जिह्वोपस्थजय इत्यर्थः, शोभना वाग्यस्य सुवाक् तस्य भावः सुवाक्त्वं, वाग्मित्वमिति यावत् तानि पूर्वाणि येषां 'शेषाद्विभाषा' इति कः तैर्गुणैर्युक्तः, भूरिभक्तिः भूरिः बह्वी भक्तिर्यस्य स लिकुचा-न्वयोद्भवो लिकुचाख्येऽन्वये वंशे उद्भव उत्पत्तिर्यस्य सः। ज्येष्ठः आश्रमज्येष्ठो यो यतिः स कदाचित् तं श्रीमध्वाचार्यं अब्रवीत् ॥ २७ ॥

मन्दोपकारिणी – वैराग्येति ॥ पारमहंस्यभूषणैः परमहंसानां योगिनां भावः पारमहंस्यं योगित्वं तस्य भूषणैः अलङ्कारभूतैः। वैराग्यवैयात्यसुवाक्त्वपूर्वकैः विगतः रागः यस्मात् सः विरागः विरागस्य भावः वैराग्यं, वियातस्य भावः वैयात्यं शोभना च सा वाक्च सुवाक् तस्य सुवाचः भावः सुवाक्त्वं वैराग्यं च वैयात्यं च सुवाक्त्वं च वैराग्य-वैयात्यसुवाक्त्वानि तानि पूर्वकानि येषां ते तथोक्ताः। वैराग्यं विषयभोगापेक्षाभावः। वैयात्यं धृष्टत्वं 'धृष्टे धृष्णग्वियातश्च' इत्यमरः। सुवाक्त्वं वाग्मित्वम्। एतत्पूर्वकैः गुणैः धर्मैः युक्ताः। वैराग्यादिपूर्वस्वभावादेव भूरिभक्तिः भूरिः भूयसी भक्तिः विष्णुभक्तिः यस्य स तथोक्तः। लिकुचान्वयोद्भवः लिकुचाख्यश्चासौ अन्वयः कुलं च लिकुचान्वयः लिकुचान्वये उद्भवः उत्पत्तिः यस्य स तथोक्तः। यः ज्येष्ठः स्वस्मात् ज्येष्ठः कश्चित् यतिः अभूत्। सः कदाचित् तं श्रीमध्वं प्रति अब्रवीत् ॥ २७ ॥

विरोधि वेदान्तकृतान्तसम्पदां भाष्यादिकं चेदिदमस्तु का क्षतिः।
अस्मभ्यमाचक्ष्व विचक्षणोचितं भावं तु सूत्रोपनिषद्विवक्षितम् ॥२८॥

पदार्थदीपिकोद्बोधिका – विरोधीति। इदं भाष्यादिकं सङ्करप्रणीतभाष्यं आदि यस्य तद्ग्रन्थजातमित्यर्थः। वेदान्तकृतान्तसम्पदां वेदानामन्तो निर्णयो यस्मात्तद्वेदान्तमध्याय-चतुष्टयात्मकब्रह्ममीमांसाशास्त्रं, 'अन्तोस्त्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती। तस्य कृतान्तस्य सिद्धान्तस्य सम्पदां विरोधि चेदस्तु का क्षतिः का हानिः। हे विचक्षण! सूत्रोपनिषदाद्यर्थविचारविचक्षण! श्रीमध्वाचार्य! त्वं अस्मभ्यं सूत्रोपनिषद्विवक्षितं

सूत्राणि चोपनिषदश्च ताभिर्विवक्षितं वक्तुमिष्टं सूत्रोपनिषदामभिप्रेतमिति वा उचितं पूर्वोत्तरविरोधाभावेन प्रमाणान्तरसम्मत्या युक्तियुक्ततयाचाङ्गीकर्तुमुचितं भावमर्थं 'भावो लीला क्रिया चेष्टा भूत्यभिप्रायजन्तुषु। पदार्थमात्रे सत्तायां' इति वैजयन्ती, आचक्ष्व वद ॥ २८ ॥

मन्दोपकारिणी – विरोधीति ॥ हे मध्व! इदं शङ्करप्रणीतं भाष्यादिकं सूत्रभाष्यं आदिः यस्य तत् तथोक्तं ग्रन्थजातम्। वेदान्तकृतान्तसम्पदां वेदानां अन्तो निर्णयो यस्मात् सः वेदान्तः ब्रह्ममीमांसाख्यः ग्रन्थः सूत्रसन्दर्भः तस्य कृतान्तः सिद्धान्तः 'कृतान्तौ यमसिद्धान्तौ' इत्यमरः स एव संपदः संपत्तयः तासाम्। विरोधि प्रतिकूलम् चेत् यदि तर्हि तत् अस्तु तथैव आस्तां अस्माकं का क्षतिः का हानिः। हे विचक्षण धीमन्! 'धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः सूत्रोपनिषदाद्यर्थविचारसमर्थेति यावत्। अस्मभ्यं सूत्रोपनिषद्विवक्षितं सूत्राणि ब्रह्मसूत्राणि उपनिषदश्च सूत्रोपनिषदः सूत्रोपनिषद्भिः विवक्षितं वक्तुं इष्टं उचितं पूर्वोत्तरविरोधाभावेन प्रमाणान्तरसंमत्या युक्तियुक्ततया च अङ्गीकर्तुं योग्यं भावं अभिप्रायं अभिप्रेतार्थमिति यावत्, 'भावोऽभिप्राय आशयः' इत्यमरः। आचक्ष्व ब्रूहि। 'आङ् पूर्वात् चक्षिङ् व्यक्तायां वाचि' इत्यत्मात् लोट् आत्मनेपदं आचक्ष्व आचक्षाथां 'आक्षध्वम्' ॥ २८ ॥

इत्यस्य वाचा शरदेव भासिता यदाऽखिलाशा शुभपूर्णया बभौ।
प्रमोदतीर्थाननचन्द्रचन्द्रिका व्याख्याभिधा विष्णुपदप्रकाशिनी ॥ २९ ॥

भावप्रकाशिका – शुभपूर्णया शुभेन सुकृतादिना पूर्णया । शरदश्च शुभा पूर्णा तिथिः ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ शुभपूर्णया शुभेन परिपूर्णया परममङ्गलयेति यावत्। इति एवमुक्तयास्य लिकुचान्वयसम्भवस्य यतेर्वाचा 'अस्मभ्य'मित्यादिपूर्वोक्तवाचा अखिलाशाः समस्तसज्जनानामभिलाषाः 'कोऽवा स्माकं सूत्रोपनिषदाद्यर्थं सम्यग्वक्ष्यति, कं वा पृच्छामः' इत्यादिरूपाः सतामभिलाषा इत्यर्थः। अखिलाशाः अखिलदिशः। शुभपूर्णया शुभा शोभना पूर्णा पूर्णिमा यस्यास्तया। शरदेव शरदृतुनेव भासिताः प्रकाशिताः।

ब्रह्मसूत्राद्यर्थजिज्ञासाभिलाषः सकलसज्जनानामस्ति तस्मात्त्वं सूत्राद्यर्थं सम्यग्वदेत्यस्य वाचा यदा सर्वेषामभिलाषो व्यञ्जित इति भावः तदा व्याख्याभिधा व्याख्येत्यभिधा नाम यस्याः सा। विष्णुपदप्रकाशिनी पद्यते मुक्तैर्गम्यत इति पदं स्वरूपं विष्णुपदं भगवत्स्वरूपं तत्प्रकाशयतीति तादृशी। प्रमोदतीर्थाननचन्द्रचन्द्रिका प्रमोदतीर्थस्य आनन्दतीर्थाचार्यस्य यदाननं मुखं तदेव चन्द्रस्तस्य चन्द्रिका कौमुदी। बभौ शुशुभे। चन्द्रिका विष्णुपदमाकाशं प्रकाशयन्ती यथा शोभते तद्वत्तदुक्त्यनन्तरं श्रीमध्वाचार्येण स्वमुखतः क्रीडमानं व्याख्यानं श्रीहरिस्वरूपं प्रकाशयत्सत्सतामानन्दकरमभूदिति भावः॥ २९॥

मन्दोपकारिणी – इतीति॥ इति एवमुक्तया शुभपूर्णया शुभेन मङ्गलेन पूर्णया सज्जनाभीष्टरूपया। अस्य ज्येष्ठयतेः वाचा ''अस्मभ्यं आचक्ष्व'' इत्यादिपूर्वोक्तेन वचनेन यदा यस्मिन् काले अखिलाशा अखिलानां सज्जनानां आशा। कोऽनु अस्माकं सूत्रोपनिषदर्थं वक्ष्यति कं नु पृच्छाम इत्यादिरूपा अभिलाषा, भासिता ''ब्रह्मसूत्रार्थ-जिज्ञासारूपा अभिलाषा सकलसज्जनानां अस्ति तस्मात् त्वं सूत्रार्थं सम्यग्वद'' इत्येवंरूपज्येष्ठयतिवचनेन सर्वेषामभिलाषा यदा प्रकाशितेति भावः। कया इव अखिलाशा अखिला च सा आशा दिक्व अखिलाशा जात्येकवचनं 'आशा दिगभिलाषयोः' इत्यमरः। शुभपूर्णया शुभा शुभदा पूर्णा पूर्णिमातिथिः यस्यां सा शुभपूर्णा तया। शरदेव तन्नामकर्तुनैव 'स्याद्दतौ वत्सरे शरत्' इत्यमरः। शरद्दतौ पूर्णिमायां दिशः यथा प्रकाशाः भवन्ति तथेति भावः। शरद्दतुसदृशं ज्येष्ठयतिवचनं पुर्णिमासदृशाः सज्जनाः। दिक्सदृशा अभिलाषा इति ज्ञेयम्। तदा व्याख्याभिधा व्याख्या व्याख्यानं इति अभिधा आख्या यस्याः सा तथोक्ता। विष्णुपदप्रकाशिनी पद्यते मुक्तेः गम्यते इति पदं स्वरूपं 'पद गतौ इति धातोः' विष्णोः श्रीहरेः पदं स्वरूपं प्रकाशयतीति विष्णुपदप्रकाशिनी। प्रमोदतीर्थाननचन्द्रचन्द्रिका प्रमोदतीर्थस्य श्रीमदानन्दतीर्थस्य आननं मुखं तदेव चन्द्रः तस्य चन्द्रिका कौमुदी। बभौ शुशुभे। 'भा दीप्तावित्यस्माल्लिट् परस्मैपदम्'। चन्द्रिका च विष्णुपदप्रकाशिनी विष्णुपदं आकाशं प्रकाशयतीति विष्णुपदप्रकाशिनी। यथा शरद्दतौ पौर्णमास्यां तिथौ सर्वदिक्षु निमीलासु सतीषु चन्द्रचन्द्रिका जनानां सुखदा भवेत् तथा ज्येष्ठयतिवचनेन सकलसज्जनाभिप्राये प्रकटिते सति श्रीमदानन्दतीर्थाचार्यकृतं सूत्रादिव्याख्यानं सतां आनन्दकरं बभूव इति भावः॥ २९॥

जेष्यन्कदाचित्किल कालपालितां दिशं प्रयातोऽच्युतबुद्धिना सह ।
समग्रधीर्मण्डितविष्णुमङ्गलं विष्णुं जगन्मङ्गलमाननाम सः ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – जेष्यन्निति ॥ समग्रधीः समग्रा पूर्णा धीर्यस्य स मध्वाचार्यः । कदाचिज्जेष्यन् दाक्षिणात्यविदुषो जेष्यन्नच्युतबुद्धिना अच्युतप्रेक्षाचार्येण सह कालपालितां यमपालितां 'कालो मृत्युर्यमे चे'ति वैजयन्ती । दिशं रजतपीठापेक्षया दक्षिणां दिशमित्यर्थः । प्रयातः सन् मण्डितविष्णुमङ्गलं मण्डितोऽलङ्कृतो विष्णुमङ्गलाख्यदेशो येन तं जगन्मङ्गलं जगतो मङ्गलं यस्मात् तं, जगति मङ्गलं शोभनमिति वा विष्णुं आननाम सादरं ननाम ॥ ३० ॥

मन्दोपकारिणी – जेष्यन्निति ॥ समग्रधीः समग्रा पूर्णा धीः प्रज्ञा यस्य स तथोक्तः स मध्वाचार्यः । कदाचित् किल कस्मिंश्चित्कालविशेषे । जेष्यन् दाक्षिणात्यपण्डितान् जेतुमिच्छन् सन् अच्युतबुद्धिना अच्युतप्रेक्षेण गुरुणा सह सार्धं कालपालितां कालेन यमेन पालितां रक्षितां 'कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः' इत्यमरः दिशं रजतपीठ-पुरापेक्षया दक्षिणां दिशं प्रयातः गतस्सन् मण्डितविष्णुमङ्गलं मण्डितोऽलङ्कृतः विष्णुमङ्गलः विष्णुमङ्गलदेशः येन स तथोक्तः तं विष्णुमङ्गलनामकदेशविशेषे विद्यमानं इत्यर्थः । जगन्मङ्गलं जगतां मङ्गलं कल्याणं यस्मात् जगति मङ्गलरूपत्वाद्वा मङ्गलानां च मङ्गलमित्युक्तेः । विष्णुं हरिं आननाम भक्त्यतिशयेन अनमत् । 'णमु प्रह्वत्वे शब्दे चेत्यतो लिट् परस्मैपदं ननाम नेमतुः नेमुः' ॥ ३० ॥

भिक्षाप्रदात्राऽत्र परीक्षितुं मुहुर्दत्ते प्रभुक्ते कदलीफलोच्चये ।
अनेन निर्यत्नमवार्यविस्मयस्तमार्यवर्यं विजनेऽवदद् गुरुः ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – भिक्षेति ॥ अत्र विष्णुमङ्गले भिक्षाप्रदात्रा भिक्षाया अन्नस्य 'अन्धः कूरं भक्तं दीदिविरन्नं तथोदनं भिक्षा' इति हलः । प्रदात्रा केनचित् गृहस्थेन परीक्षितुं लोकप्रसिद्धमस्य स्वेच्छाभोक्तृत्वलक्षणमाहात्म्यं वास्तवं न वेति परीक्षणाय भिक्षावसाने मुहुः पुनः पुनः कदलीफलोच्चये कदलीपक्वफलसमूहे दत्तेऽनेन श्रीमध्वाचार्येण निर्यत्नं निर्गतो यत्नः आयासो यथा भवति तथा प्रभुक्ते सति अवार्यविस्मर्योऽवार्योऽत्यर्थो

विस्मयो यस्य स गुरुरच्युतप्रेक्षाचार्य आर्यवर्यं महतामुत्तमं तं श्रीमध्वाचार्यं विजने विगतो जनो यस्मिन्, तस्मिन् प्रदेशे रहसीत्यर्थः। अवदत्॥ ३१॥

मन्दोपकारिणी – भिक्षेति॥ अत्र विष्णुमङ्गले। भिक्षाप्रदात्रा भिक्षां ददता गृहस्थेन परीक्षितुं मध्वाचार्यस्य लोकप्रसिद्धं बहुभोक्तृत्वादिमाहात्म्यं वास्तवं वा न वेति विचारणाय भोजनसमाप्त्यनन्तरं मुहुः पुनः पुनः दत्ते प्रदत्ते कदलीफलोच्चये कदलीफलानां रंभाफलानां उच्चये समूहे अनेन श्रीमध्वाचार्येण निर्यत्नं आयासरहितं यथा भवति तथा प्रभुक्ते अभ्यवहृते सति अवार्यविस्मयः अवार्यः अनिवार्यः विस्मयः आश्चर्यं यस्य स तथोक्तः गुरुः अच्युतप्रेक्षः। आर्याणां ज्ञानिनां वर्यं श्रीमध्वं विजने रहसि 'विविक्तविजन-च्छन्ननिःशलाकास्तथा रहः' इत्यमरः अवदत् उवाच। 'वद व्यक्तायां वाचीत्यतो लङ् परस्मैपदं अवदत् अवदतां अवदन्'॥ ३१॥

भिक्षावसाने द्विशताधिकैः फलैर्व्यूढैः प्रभुक्तैः परिपूरितेऽपि ते।
तनूदरे नास्ति गरिष्ठता कथं सुचित्त सत्यं वदताद्भवानिति॥ ३२॥

पदार्थदीपिकोद्बोधिका – भिक्षेति॥ सुचित्त! सु शोभनं चित्तं यस्य तत्सम्बुद्धिः। श्रीमध्वाचार्य! भिक्षावसाने भोजनावसाने प्रभुक्तैर्व्यूढैर्महद्भिः द्विशताधिकैः द्वे च ते शते च ताभ्यामधिकैः फलैः कदलीपक्वफलैस्ते तव तनूदरे सूक्ष्मोदरे परिपूरितेऽपि गरिष्ठता गुरुता कथं नास्ति? भवान् सत्यं वचो वदतात् वदतु इत्यवदिति पूर्वेणान्वयः॥ ३२॥

मन्दोपकारिणी – भिक्षावसान इति॥ हे सुचित्त ! शोभनं चित्तं यस्य सः सुचित्तः तस्य संबुद्धिः हे सुचित्त ! शुद्धान्तःकरण मध्व ! भिक्षावसाने भिक्षायाः भोजनस्य अवसाने समाप्तौ सत्यां प्रभुक्तैः भक्षितैः द्विशताधिकैः द्वे च ते शते च द्विशते द्विशताभ्यां अधिकैः व्यूढैः स्थूलैः फलैः कदलीफलैः परिपूरितेऽपि अन्नभक्षपायसादिना निरवकाशं पूर्णेऽपि तत एव। तनूदरे तनुः अल्पपरिमाणश्चासौ उदरः जठरश्च तनूदरः तस्मिन् 'तनुः काये कृशे चाल्पे' इति विश्वः। गरिष्ठता अतिशयेन गुरुः गरिष्ठः तस्य भावो गरिष्ठता गुरुत्वं उदरशूलादिहेतुः कथं नास्ति ? 'अस भुवि' इत्यतो लट् परस्मैपदं अस्ति स्तः सन्ति'। भवान् सत्यं वदतात् इत्यन्वयः। आकण्ठं मृष्टान्नेन उदरपूर्तावपि सत्यां बहूनि स्थूलानि

कदलीफलानि भक्षितानि तेन तव कुक्षौ मनःखेदजनकं गुरुत्वं कथं नाभूत्। स्वस्थान्तःकरणोऽसि। अत्र किं निमित्तं तद्वदेत्यब्रवीदिति भावः ॥ ३२ ॥

अङ्गुष्ठमात्रं जठरे प्रतिष्ठितं जाज्वल्यमानं मम जातवेदसम्।
नित्यं हितं विश्वदहं च वित्त तं विश्वेशचेता इति सोऽब्रवीत्तदा ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – अंगुष्ठेति ॥ तदा विश्वेशचेता विश्वेशे जगदीशे हरौ चेतो मनो यस्य सः श्रीमध्वाचार्यः। 'हे गुरवः! यूयं मम जठरे प्रतिष्ठितं स्थितं जातवेदसमग्निमङ्गुष्ठमात्रमङ्गुष्ठपरिमितं जाज्वल्यमानं भृशं ज्वलन्तं वित्त जानीत। गुरुत्वाद्बहुवचनम्। एवमपि मम नित्यं सदा हितं वित्त। एतादृशेनाप्यनेन मम न क्रिञ्चिदनिष्टमस्तीति भावः। तं मम जठरस्थितं जातवेदसं विश्वदहञ्च विश्वं जगद्दहतीति तादृशञ्च वित्त। 'प्रलये जगद्दहनदक्षञ्चेत्यर्थः'। इत्यब्रवीत् ॥ ३३ ॥

मन्दोपकारिणी – अङ्गुष्ठेति ॥ तदा गुरुणा उदिते सति विश्वेशचेताः विश्वस्य समस्तजगतः ईशः स्वामी विष्णुः तस्मिन् चेतः मनः यस्य सः तथोक्तः। एतादृशशक्तिदं श्रीनारायणं ध्यायन्निति भावः। सः श्रीमध्वाचार्यः तं गुरुं इत्यब्रवीत्। कथं, हे गुरवः! यूयं मम जठरे कुक्षौ 'पिचण्डकुक्षी जठरः' इत्यमरः प्रतिष्ठितं विद्यमानं अङ्गुष्ठमात्रं अङ्गुष्ठः हस्तज्येष्ठाङ्गुलिः तस्य मात्रं परिमाणं यस्य सः अङ्गुष्ठमात्रः अङ्गुष्ठपरिमाणः तं 'क्षुद्रं मात्रपरिच्छदे अल्पे च परिमाणे' इत्यमरः जातवेदसं अग्निं 'कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्' इत्यमरः जाज्वल्यमानं भृशं ज्वलितं वित्त जानीध्वम्। गुरुत्वात् बहुवचनम्। 'विद ज्ञान इत्यतो लोट् परस्मैपदं विद्धि वित्तात्, वित्तं वित्त'। नित्यं सर्वदा मम हितं हितकरं वित्त। ज्वलितेनाग्निना मम न किञ्चिदनिष्ठमिति भावः। विश्वदहं च प्रलयकाले विश्वं समस्तं जगत् दहति भस्मीकरोति इति विश्वदहः तं च विश्वदहने समर्थं च वित्त इत्यब्रवीत्। एतादृशसामर्थ्यं हर्यनुग्रहलब्धमिति भावेन विश्वेशचेताः इत्युक्तम् ॥ ३३ ॥

पर्याकुलानेकसरस्वतीततीन् न्यायोपपन्नान् विविधार्थसंयुतान्।
अतीत्य देशान् समयांश्च चारुधीरसौ जगामाभिमतेन वर्त्मना ॥३४॥

भावप्रकाशिका – न्याया युक्तयो धर्मप्रवृत्तयश्च। वर्त्मना मार्गेण सिद्धान्तेन च ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – पर्याकुलेति ॥ चारुधीश्चारुर्मनोहरा धीर्यस्य सोऽसौ मध्वाचार्यः। अभिमतेन महाजनसम्मतेन श्लाघ्येनेति यावत्। वर्त्मना मार्गेण पर्याकुलानेक-सरस्वतीततीन् पर्याकुलाः सम्पूर्णा या अनेकसरस्वत्योऽनेकनद्यस्तासां ततिः समूहो येषु देशेषु तान्। शास्त्रपक्षे परिपूर्णानेकवाचां ततिः समूहो येषु तान् 'सरस्वती वाचि नद्यां स्त्रीरत्ने' इति हेमचन्द्रः। न्यायोपपन्नांस्तत्तज्जनपदधर्मोपेतान्, तत्तच्छास्त्रन्याययुक्तांश्च । विविधार्थसंयुतान् विविधा नानाविधा येऽर्थाः पदार्थास्तैः संयुतान् युक्तान् नानाविध-प्रमेयशेषयुक्तांश्च देशान्, प्राप्तान् देशान् समयांश्च तत्तद्वादिभिः प्रस्तुतशास्त्राणि चातीत्य अतिक्रम्य निराकृत्य च जगाम। विष्णुमङ्गलादपि दक्षिणतो ययौ ॥ ३४ ॥

मन्दोपकारिणी – पर्याकुलेति ॥ असौ चारुधीः चारुः मनोहरा धीः बुद्धिः यस्य सः तथोक्तः श्रीपूर्णप्रज्ञाचार्यः। अभिमतेन सर्वाभिमतेन वर्त्मना मार्गेण 'अयनं वर्त्म मार्गाध्वा' इत्यमरः। जगाम विष्णुमङ्गलदेशादपि दक्षिणां दिशं प्रति ययौ। किं कृत्वा, देशान् प्राप्तान् जनपदान् अतीत्य अतिक्रम्य। कथंभूतान्, पर्याकुलानेकसरस्वतीततीन् पर्याकुलानां परितः सर्वत्र आकुलानां सङ्कुलानां पूर्णानामिति यावत्। अनेकासां बह्वीनां सरस्वतीनां नदीनां ततिः समूहः येषु देशेषु ते पर्याकुलानेकसरस्वतीततयः तान्। पुनः कथंभूतान्, न्यायोपपन्नान् न्यायेन तत्तज्जनपदधर्मेण उपपन्नान् युक्तान्। पुनः कथंभूतान्, विविधार्थसंयुतान् विविधाः नानाविधाश्च ते अर्थाश्च वस्तूनि च विविधार्थाः 'अर्थोऽभिधेयरैवस्तु' इत्यमरः। तैः संयुतान्। पुनः किं कृत्वा, समयांश्च तत्तच्छास्त्रसिद्धान्ताश्च अतीत्य निराकृत्य 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। कथंभूतान् समयान् पर्याकुलानेकसरस्वतीततीन् पर्याकुलानां सर्वत्र मिलितानां अनेकेषां पण्डितानां सरस्वतीनां वाचां 'गीर्वाग्वाणी सरस्वती' इत्यमरः ततिः समूहो येषां ते तथोक्ताः तान्। तत्र तत्र वादप्रसङ्गतः प्राप्तान् इत्यर्थः। पुनः कथंभूतान्, न्यायोपपन्नान् न्यायैः तत्तच्छास्त्रयुक्तिभिः उपपन्नान् विविधार्थ-संयुतान् विविधाश्च ते अर्थाः अभिधेयाश्च प्रमेयविषयाः तैः संयुतान्। तत्तद्देशं गत्वा तत्तद्देशवादिनः पराभूय गतवान् इति भावः ॥ ३४ ॥

स्वहेलया पातितपार्थिवव्रजां धीशुद्धिदां केरलभूषणायिताम् ।
पयस्विनीं प्रेक्ष्य पथि द्विजार्चितां स भाविनीमस्मरदत्र चण्डिकाम् ॥ ३५ ॥

भावप्रकाशिका – अस्मरत् अत्र पयस्विनीतटे ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – स्वहे लयेति ॥ स श्रीमध्वाचार्यः पथि मार्गे स्वहेलया स्वलीलया 'हेलाविलासबिब्बोकलीलाललितविभ्रमाः' इति हलः । स्वप्रवाहलीलयेत्यर्थः । पातितपार्थिवव्रजां पातितः पार्थिवव्रजो वृक्षसमूहो यया ताम् । धीशुद्धिदां धियोऽन्तःकरणस्य शुद्धिं स्नानपानादिना ददातीति ताम् । केरलभूषणायितां भूषणवदाचरतीति भूषणायिता केरलस्य केरलदेशस्य भूषणायिता ताम् । द्विजार्चितां विप्रैः पक्षिभिश्च पूजितां 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । पयस्विनीनामनदीं प्रेक्ष्य, अत्र केरलदेशस्थपयस्विनीतटे भाविनीमवतारं करिष्यन्तीं स्वहेलया स्वगमनलीलया पातितपार्थिवव्रजां पाततुरुष्कादि-दुष्टराजसमूहो यया ताम् । धीशुद्धिदां स्मरणकीर्तनादिना चित्तशुद्धिदां केरलभूषणायितां केरलदेशेऽवतारात्तदलङ्कारभूतां द्विजार्चितां ब्राह्मणपूजितां चण्डिकां दुर्गामस्मरत् ॥ ३५ ॥

मन्दोपकारिणी – स्वहेलयेति ॥ सः मध्वाचार्यः । पथि मार्गे । स्वहेलया स्वस्य हेलया प्रवाहरूपलीलया पातितपार्थिवव्रजां पृथिव्यां जाताः पार्थिवाः वृक्षाः इत्यर्थः तेषां व्रजः समूहः । 'समूहनिवहव्यूहसन्दोहविसरव्रजाः' इत्यमरः पातितः निपातितः पार्थिवव्रजः यया सा तथोक्ता ताम् । प्रवाहवेगेन उभयतीरस्थवृक्षाः पातिताः इति भावः । धीशुद्धिदां धियः अन्तःकरणस्य शुद्धिं स्नानपानादिना पावित्र्यं ददातीति धीशुद्धिदा ताम् । केरलभूषणायितां केरलस्य केरलदेशस्य भूषणायितां भूषणवत् आचरतीति भूषणायिता ताम् । द्विजार्चितां द्विजैः ब्राह्मणैः पक्षिभिश्च अर्चितां पूजिताम् । नद्याः उभयतीरे विप्राः पक्षिणः सन्तीति भावः । 'दन्तविप्राण्डजाद्विजा' इत्यमरः । पयस्विनीं पयस्विनीनामकनदीं प्रेक्ष्य दृष्ट्वा, अत्र पयस्विनीतटे भाविनीं अवतारं करिष्यन्तीं चण्डिकां दुर्गां अस्मरत् स्मृतवान् । कथंभूतां चण्डिकां दुर्गां, पथि मार्गे स्वहेलया स्वस्य हेलया आगमनरूपलीलया पातितपार्थिवव्रजां पार्थिवानां तुरुष्कादिदुष्टराज्ञां व्रजः समूहः पार्थिवव्रजः 'राज्ञि राट् पार्थिवः क्ष्माभृत्' इत्यमरः पातितः नाशितः पार्थिवव्रजः यया सा तथोक्ता तां दुर्गाम् । आगमनसमये मार्गे विद्यमानतुरुष्कादिनृपान् नाशयिष्यतीति भावः । धीशुद्धिदां स्मरण-

कीर्तनादिना चित्तशुद्धिदां केरलभूषणायितां केरलदेशे अवतारात् तद्देशस्य अलङ्कारभूतां द्विजार्चितां ब्राह्मणैः पूजितां सदृशदर्शनात् सदृशान्तरस्मृतिः अभूदिति भावः ॥ ३५ ॥

ततः क्रमेण प्रचलन्नुपेयिवानवन्दतेन्दीवरसुन्दरच्छविम् ।
अम्भोजनाभं स भुजङ्गशायिनं श्रीवल्लभं श्रीमदनन्तसत्पुरे ॥ ३६ ॥

पदार्थदीपिकोद्बोदिका – तत इति ॥ स श्रीमध्वाचार्यस्ततः पयस्विनीतटात् क्रमेण प्रचलन् गच्छन् सन् श्रीमदनन्तसत्पुरे श्रीमत्कान्तिमद्यदनन्तसत्पुरं अनन्तसत्पुराख्यक्षेत्रं तस्मिन्नुपेयिवान् प्राप्तः । इन्दीवरसुन्दरच्छविं इन्दीवरवत् सुन्दरा छविः कान्तिर्यस्य तम् । अम्भोजनाभं अम्भोजं नाभौ यस्य तम् । भुजङ्गशायिनं भुजङ्गे शेषे शेत इति तं श्रीवल्लभं श्रीहरिमवन्दत ॥ ३६ ॥

मन्दोपकारिणी – तत इति ॥ सः मध्वाचार्यः । ततः पयस्विनीतीरात् प्रचलन् निर्गतस्सन् क्रमेण दिनक्रमेण श्रीमदनन्तसत्पुरे श्रीः कान्तिः अस्यास्तीति श्रीमत् श्रीमच्च तत् अनन्ताख्यं च तत् सत् प्रशस्तं च तत् पुरं च श्रीमदनन्तसत्पुरं 'प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः । तस्मिन् अनन्तपुराख्यक्षेत्रे । इन्दीवरसुन्दरच्छविं इन्दीवरवत् नीलोत्पलवत् 'इन्दीवरं च नीलेस्मिन्' इत्यमरः सुन्दरा रुचिरा छविः कान्तिः यस्य सः तथोक्तस्तं 'शोभा कान्तिर्द्युतिश्छविः' इत्यमरः । अम्भोजनाभं अम्भोजं पद्मं नाभौ यस्य सः तथोक्तः तम् । भुजङ्गशायिनं भुजङ्गे शेषे शयनं कृतवन्तम् । श्रीवल्लभं श्रियः लक्ष्म्याः वल्लभं दयितम् । 'दयितं वल्लभं प्रियं' इत्यमरः उपेयिवान् समीपं प्राप्तस्सन् अवन्दत नमस्कारं कृतवान् स्तुतिं च कृतवान् । 'वदि अभिवादनस्तुत्योरिति धार्तोर्लङात्मनेपदं अवन्दत अवन्देतां अवन्दन्त' । मध्वाचार्यः दक्षिणदेशं प्रति गत्वा तत्र तत्र दिग्विजयं कृत्वा अनन्तशयनक्षेत्रं प्राप्य तत्रत्यं अनन्तशयनं ननाम इति भावः ॥ ३६ ॥

वेदान्तसूत्राणि कृतान्तवित्तमो व्याख्यादसौ शिष्यगणाय संसदि ।
विलक्षणं जीवगणाद्गुणार्णवं ब्रह्माच्युताख्यं प्रतिपादयन्मुहुः ॥३७॥

पदार्थदीपिकोद्बोधिका – वेदान्तेति ॥ कृतान्तवित्तमः कृतान्तं ब्रह्मसूत्रसिद्धान्तं 'कृतान्तौ यमसिद्धान्तौ' इत्यमरः अतिशयेन वेत्तीति कृतान्तवित्तमः । असौ

श्रीमध्वाचार्यः। संसदि विद्वत्सभायां शिष्यगणाय शिष्यसमूहाय वेदान्तसूत्राणि, अच्युताख्यं अच्युत इति आख्या यस्य तत् ब्रह्म गुणार्णवं गुणैः अर्णव इव तम्। अत एव जीवगणात् जीवसमूहात् विलक्षणं भिन्नं मुहुः पुनः पुनः प्रतिपादयन् सन् व्याख्यात् व्याचख्यौ। 'ख्या प्रकथने लङ्'। ब्रह्मशब्दस्य जीवादिष्वपि रूढत्वादच्युताख्यं ब्रह्मेत्युक्त्याऽत्र ब्रह्मशब्दो विष्णुवाचीत्युक्तं भवति। तस्य जीवगणाद्विलक्षणत्वे गुणार्णवत्वं हेतुः। जीवस्याल्प-गुणत्वात्। तस्माद्विरुद्धधर्माधिकरणत्वयुक्त्या जीवब्रह्मणोर्भेदं प्रतिपादयन् सन् व्याचख्यावित्यर्थः॥ ३७॥

मन्दोपकारिणी – वेदान्तेति॥ कृतान्तवित्तमः कृतान्तं सिद्धान्तं वेत्तीति कृतान्तवित् अतिशयेन। कृतान्तवित् कृतान्तवित्तमः ब्रह्मसूत्रसिद्धान्तज्ञानिनां उत्तमः इत्यर्थः। संसदि विद्वत्सभायां 'सभासमितिसंसदः' इत्यमरः शिष्यगणाय शिष्याणां श्रोतॄणां गणाय समूहाय वेदान्तसूत्राणि वेदानां अन्तः निर्णयो येभ्यः तानि वेदान्तानि। वेदान्तानि च तानि सूत्राणि च ब्रह्मसूत्राणि व्याख्यात् व्याख्यातवान्। 'वि आङ् पूर्वात् ख्या प्रकथन इति धातोर्लङ् परस्मैपदं आख्यात् आख्यातां आख्युः'। किं कुर्वन् अच्युताख्यं ब्रह्म परब्रह्म गुणार्णवं गुणैः ज्ञानानन्दादिगुणैः अर्णवं सागरं पूर्णमिति यावत्। अत एव जीवगणात् जीवानां चेतनानां गणात् समूहात् विलक्षणं अत्यन्तभिन्नं मुहुः भृशं पौनःपुन्येन वा प्रतिपादयन् विष्णोः अनन्तगुणत्वात् जीवस्य च अल्पगुणत्वात् विरुद्धदर्माधि-करणत्वयुक्त्या जीवपरमात्मनोः भेदं साधयन्नित्यर्थः॥ ३७॥

अप्रांशुनूत्नोपपदाधिवासजः स सङ्करो वैरपरायणः पुनः।
असूययोचेऽत्र महानतिक्रमः सूत्रार्थवादोऽकृतभाष्यकेष्विति॥३८॥

भावप्रकाशिका – अप्रांशुनूत्नोपपदाधिवासजः इत्यस्य 'कुंदुपुस्तूरु' इत्यपभ्रष्ट-भाषा॥ ३८॥

पदार्थदीपिकोद्बोधिका – अप्रांशिति॥ वैरपरायणो वैरे श्रीमुख्यप्राणस्य द्वेषानु-सन्धाने परायणस्तत्परः 'तत्परस्तु परायणः' इति हलः। स पूर्वं कारडिग्रामजातः सङ्करः पुनर्जन्मान्तरेऽप्रांशुनूत्नोपपदाधिवासजः अप्रांशुनूत्नमुपपदं यस्याधिवासशब्दस्य सोऽधिवासः

अधिवासशब्दो वाचकत्वेन यस्य तस्मिन्कुले जातः। अप्रांशुनूत्नोधिवासस्य 'कुदुपुस्तूरु' इत्यपभ्रष्टभाषायां सञ्ज्ञा। तौळवभाषायां अप्रांशोः 'कुद्य' इति नूत्नस्य 'पोसत्त्' इति अधिवासस्य 'ऊरु' इति च प्रसिद्धेः कुदुपुस्तूराख्ये कुले जातः सन्नित्यर्थः। अत्रानन्तपुरे असूयया मत्सरेण अकृतभाष्यकेष्वकृतं भाष्यं यैस्तेषु वर्तमानः सूत्रार्थवादः सूत्रार्थानां वादः कथनं महानतिशयितः अतिक्रमः मर्यादातिक्रम इत्यूचे। अयं भावः। ये भाष्यकृतस्तेषां भाष्यनिरपेक्षं सूत्रार्थकथनं युक्तम्। अकृतभाष्याः पुरुषाः यदि भाष्यनिरपेक्षं सूत्रार्थं वदन्ति तर्हि महान् मर्यादातिक्रम इति॥ ३८॥

मन्दोपकारिणी – अप्रांशुनूत्नोपपदेति॥ वैरपरायणः वैरस्य मुख्यप्राणद्वेषस्य 'वैरं विरोधो विद्वेषः' इत्यमरः, परः मुख्यः अयनः आश्रयः मुख्यप्राणद्वेषानुसम्बन्धवानिति यावत्। सः सङ्करः पुनः जन्मान्तरे अप्रांशुनूत्नोपपदाधिवासजः 'अप्रांशुनूत्नः' इति उपपदं नामान्तरं यस्य सः अप्रांशुनूत्नोपपदः स चासौ अधिवासः तन्नामकवंशश्च तस्मिन् जायते इति अधिवासजः जातः सन्। अत्र मध्वाचार्ये। असूयया ''गुणेष्वपि दोषारोपः असूया'' तया 'अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि' इत्यमरः। इत्येवं ऊचे अब्रवीत्। कथं, अकृतभाष्यकेषु अकृतं भाष्यं यैस्ते अकृतभाष्यकाः तेषु। सूत्रार्थवादः सूत्राणां ब्रह्मसूत्राणां अर्थस्य वादः प्रतिपादनमिति यावत्। महान् भूयान् अतिक्रमः मर्यादोल्लङ्घनं अन्यायः इति यावत्। ये सूत्रभाष्यकर्तारः तेषां भाष्यं विना सूत्रव्याख्यानं युक्तं, ये भाष्यकर्तारो न भवन्ति तेषां भाष्यं विना सूत्रव्याख्यानं अयुक्तं इति ऊचे इति भावः॥ ३८॥

वदोत्तरं भाति यदीह कुर्महे भाष्यं कृतिर्नास्य हि दण्डवारिता।
जगद्गुरूणामिति तां गुरोर्गिरं जनः समस्तोऽभिननन्द सस्मिताम्॥३९॥

पदार्थदीपिकोद्बोधिका – वदेति॥ इह अस्माभिरुक्ते सूत्रार्थे यद्युत्तरमस्मदुक्त-सूत्रार्थनिराकरणसमर्थमुत्तरं भाति प्रतीयते तर्हि त्वं वद ब्रूहि। भाष्यमपेक्षितञ्चेत्कुर्महे करिष्यामः। अस्य भाष्यस्य कृतिर्निर्माणं दण्डवारिता न हि न भवति हि। 'भाष्यकरणेऽयं दण्डो भविष्यति तस्माद्भाष्यं न कर्तव्यमिति केनचिद्राजादिना दण्डेन वारिता न हि इति भावः। जगद्गुरूणां रुद्रादीनां गुरोः श्रीमध्वाचार्यस्य इत्येवमुक्तां सस्मितां तां गिरं समस्तो जनोऽभिननन्द॥ ३९॥

मन्दोपकारिणी – वदेति ॥ हे सङ्कर ! तव यदीह अस्माभिः उक्ते सूत्रार्थे उत्तरं अस्मदुक्तिनिराकरणसमर्थं प्रत्युत्तरं भाति प्रतीयते तर्हि वद ब्रूहि। वयं भाष्यं कुर्महे। भाष्यं अपेक्षितं चेत् तदपि करिष्यामः इत्याशयः। अस्य भाष्यस्य कृतिः निर्माणं दण्डवारिता दण्डेन राजशासनेन 'दण्डोऽस्त्री शासने राज्ञां' इति वैजयन्ती, राजाज्ञयेत्यर्थः। वारिता निवारिता न हि। 'भाष्यकरणे सति अयं दण्डो भविष्यति तस्मात् भाष्यं न कर्तव्यमिति' केनचित् राजादिना दण्डेन वारिता न हीति भावः। जगद्गुरूणां जगतां गुरूणां रुद्रादीनां देवानां गुरोः श्रीमध्वाचार्यस्य इति एवं तां सङ्करं प्रति उक्तां सस्मितां मन्दहासेन सहितां गिरं वाचं समस्तो जनः अभिननन्द साधु साधु इति अन्वमोदत। 'टु नदि समृद्धौ इत्यतो लिट् परस्मैपदं ननन्द ननन्दतुः ननन्दुः' ॥ ३९ ॥

प्राज्ञैर्महापूरुषसर्वलक्षणैः सम्पन्नदेहोऽयमितीरिते प्रभौ ।
परे परस्याप्यतिपीनतादृशः स्फिङ्मात्रसंशंसनमत्र चक्रिरे ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – प्राज्ञैरिति ॥ प्रभौ श्रीमध्वाचार्ये प्राज्ञैः पुरुषलक्षण-शास्त्राभिज्ञैः पुरुषैः अयं महापूरुषसर्वलक्षणैर्महापूरुषाणामत्युत्तमाधिकारिणां यानि सर्वाणि लक्षणानि अङ्गसम्पदस्तैः 'लक्षणं कार्षिके चिह्ने नाम्नि मुद्राङ्गसम्पदोः' इति वैजयन्ती, सम्पन्नः सम्पूर्णो देहो यस्य स इतीरिते सति, परेऽपि सङ्करपक्षीया अप्यतिपीनतादृशः, अतिपीनतां स्फिङ्मात्रस्यातिपुष्टत्वं पश्यन्तीति तादृशाः सन्तः परस्य सङ्करस्य, केवलं स्फिक् स्फिङ्मात्रं तस्य संशंसनं सम्यक् स्तुतिं 'स्त्रियां स्फिचौ कटिप्रोथा'वित्यमरः, तदेव चक्रिरे। सभायामयं महापूरुषसर्वलक्षणपूर्णदेह इति श्रीमध्वाचार्ये प्रशस्यमाने सति तदसहमानाः परे स्वकीयस्य सङ्करस्यातिस्थूलस्फिङ्मात्रप्रशंसनं चक्रुस्तस्मिन् प्रशंसनीय-लक्षणान्तरमपश्यन्त इति भावः ॥ ४० ॥

मन्दोपकारिणी – प्राज्ञैरिति ॥ अत्र सभायां प्राज्ञैः पुरुषलक्षणाभिज्ञैः पुरुषैः अयं श्रीमध्वाचार्यः। महापूरुषसर्वलक्षणैः महान्तः उत्तमाश्च ते पूरुषाश्च महापूरुषाः तेषां सर्वलक्षणानि तैः। सम्पन्नदेहः सम्पन्नः सम्पूर्णः देहः कायः यस्य स तथोक्तः। लक्षणप्रतिपादकशास्त्रे उत्तमपुरुषदेहस्य यानि लक्षणानि उत्तमानि तैः सर्वलक्षणैः युक्तदेहः अयं मध्वाचार्य इति एवं लक्षणदेहवत्त्वेन प्रभौ श्रीमध्वे ईरिते सति श्लाघिते सति, प्राज्ञेषु

मध्वाचार्यदेहं प्रशंसत्सु सत्सु परेऽपि सङ्करपक्षीयाः अपि परस्य सङ्करस्य स्फिङ्मात्रसंशंसनं स्फिङ्मात्रस्य स्फिचोः कटिप्रोथयोरेव 'स्त्रियां स्फिचौ कटिप्रोथौ' इत्यमरः, ऊरूपरितनौ कटिसम्बद्धौ प्रदेशौ कटिशब्देनोच्यते। तयोः मात्रस्य केवलप्रोथभागयोरेव सम्यक् संशंसनं स्तुतिं चक्रिरे कृतवन्तः। कथम्भूताः, अतिपीनतादृशः स्फिचोः अतिपीनतां अतिस्थूलतां पश्यन्तीति अतिपीनतादृशः 'पीन पीब्नीतु स्थूलपीवरे' इत्यमरः। सभायां अयं मध्वाचार्यः उत्तमपुरुषलक्षणयुक्तसंपूर्णदेह इति पुरुषलक्षणाभिज्ञैः श्रीमध्वाचार्ये प्रशंस्यमाने सति तदसहमानाः परेऽपि स्वकीयस्य सङ्करस्य अतिस्थूलस्फिङ्मात्रस्तुतिं चक्रुः। तत्प्रशंसनाय तद्देहे लक्षणान्तरादर्शनादेवेति भावः॥ ४०॥

स्फिग्दूषणानि प्रतिपादयत्यलं सम्पूर्णसङ्ख्येऽस्य तु लक्ष्मशास्त्रतः।
तद्दण्डसङ्खण्डनसंश्रवं व्यधात्तदक्षमोऽसौ प्रकृतिर्हि साऽसताम्॥ ४१॥

पदार्थदीपिकोद्बोधिका – स्फिगिति॥ सम्पूर्णसंख्ये सम्पूर्णा संख्या ज्ञानं यस्य तस्मिन् 'बुद्धिर्मतिश्च मेधा संख्या संवित्तिरुपलब्धि'रिति हलः, श्रीपूर्णप्रज्ञाचार्ये लक्ष्मशास्त्रतो लक्ष्मणः लक्षणस्य शास्त्रं तेन अस्य स्फिग्दूषणान्यलं सम्यक् प्रतिपादयति सति तदक्षमस्तस्मिन् दण्डखण्डने अक्षमोऽसमर्थोऽसौ सङ्करः तद्दण्डसङ्खण्डनसंश्रवं तस्य श्रीमध्वाचार्यस्य दण्डस्य संखण्डने संश्रवं प्रतिज्ञां 'प्रतिश्रवः संश्रवः प्रतिज्ञेति' हलः। व्यधाच्चक्रे। दण्डसंखण्डनाशक्तः किमिति प्रतिज्ञां चकारेत्यत्राह॥ **प्रकृतिरिति॥** सा अशक्यकार्यप्रतिज्ञाऽसतां प्रकृतिर्हि स्वभावो हि। अतश्चकारेति भावः। अत्रार्थान्तरन्यासालङ्कारः॥ ४१॥

मन्दोपकारिणी – स्फिगिति॥ सम्पूर्णसङ्ख्ये संपूर्णा सङ्ख्या ज्ञानं यस्य स तथोक्तः 'चर्चा संख्या विचारणा' इत्यमरः तस्मिन् श्रीमध्वाचार्ये। लक्ष्मशास्त्रतः लक्ष्मणः लक्षणस्य 'चिह्नं लक्ष्म च लक्षणं' इत्यमरः, शास्त्रतः लक्षणशास्त्रानुसारेण इत्यर्थः। अस्य सङ्करस्य स्फिग्दूषणानि स्फिचोः दूषणानि स्फिक्स्थौल्यदोषान् अलं सम्यक् प्रतिपादयति उपपादयति सति, असौ सङ्करः तद्दण्डसङ्खण्डनसंश्रवं तस्य मध्वाचार्यस्य दण्डस्य सङ्खण्डने द्वैधीभावकरणे संश्रवं प्रतिज्ञां व्यधात् अकरोत्। 'नियमाश्रवसंश्रवाः' इत्यमरः। मध्वाचार्ये

लक्षणशास्त्रानुसारेण स्फिक्स्थूलत्वस्य अवलक्षणत्वे समर्थिते सति सङ्करः 'मध्वाचार्यदण्डं खण्डयामीति' प्रतिज्ञां अकरोदिति भावः। कथंभूतः, तदक्षमः तस्मिन् दण्डखण्डने अक्षमः असमर्थः। तर्हि किमर्थं प्रतिज्ञां व्यधात् इत्याह॥ **प्रकृतिरिति॥** सा अशक्यकार्यप्रतिज्ञा असतां प्रकृतिः हि स्वभावो हि 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे' इत्यमरः॥ ४१॥

स्नात्वाऽत्र तीर्थेष्वचिरेण कन्यकातीर्थे सुतीर्थे सुखतीर्थ आप्लुतः।
समुद्रसेतौ च निमज्य विष्णवे श्रीरामनाथाय नमश्चकार सः॥४२॥

भावप्रकाशिका – कन्यातीर्थेऽत्र दुर्गा सन्निहिता सुजलावतारस्थाने॥ ४२॥

पदार्थदीपिकोद्बोधिका – स्नात्वेति॥ स सुखतीर्थ आनन्दतीर्थाचार्योऽत्रानन्तपुरक्षेत्रे तीर्थेषु स्नात्वाऽचिरेणाविलम्बात् सुतीर्थे शोभनतीर्थे कन्यकातीर्थे कन्याकुमार्यास्तीर्थे आप्लुतः स्नातः सन् समुद्रसेतौ च समुद्रस्य सेतौ श्रीरामकृते च 'धनुष्कोटा'विति यावत्। निमज्य स्नात्वा श्रीरामनाथाय श्रीरामश्चासौ नाथश्च तस्मै विष्णवे नमश्चकार नमस्कारं कृतवान्। तस्मिन् सेतौ श्रीरामेण प्रतिष्ठापिते रामनाथाख्यलिङ्गे सन्निहिताय हरये नमस्कृतवानिति भावः॥ ४२॥

मन्दोपकारिणी – स्नात्वेति॥ सः सुखतीर्थः श्रीमदानन्दतीर्थः अत्र अनन्तपुरक्षेत्रे विद्यमानेषु तीर्थेषु ऋषिजुष्टजलाशयेषु 'तीर्थमृषिजुष्टे जले गुरौ' इत्यमरः। स्नात्वा स्नानं कृत्वा, अचिरेण अविलम्बेन कन्यकातीर्थे कन्यातीर्थाख्ये सुतीर्थे आप्लुतः स्नातः सन्, समुद्रसेतौ च श्रीरामचन्द्रकृते समुद्रस्य सेतौ च धनुष्कोटितीर्थे इत्यर्थः निमज्य स्नात्वा, श्रीरामनाथाय श्रीरामश्चासौ नाथः ईश्वरश्च श्रीरामनाथः तस्मै विष्णवे नमश्चकार। अनन्तशयनगततीर्थेषु स्नात्वा ततो निर्गत्य मार्गमध्ये विद्यमानकन्यातीर्थे स्नात्वा ततोऽपि निर्गत्य समुद्रसेतुं प्राप्य तत्र विद्यमानधनुष्कोटितीर्थे स्नातस्सन् श्रीरामचन्द्रेण सेतौ प्रतिष्ठित रामेश्वरनामकलिङ्गसन्निहितरुद्रान्तर्गतश्रीरामनामकं स्वस्वामिनं विष्णुं ननाम इति भावः॥ ४२॥

तमाव्रजन्तं यतिवेषधारिणं (मासुरं) दण्डं प्रकाश्यैष हसन्नभाषत।
खण्डयेत दण्डो यदि चण्ड न त्वया त्वं षण्डकोऽपण्डित वन्ध्यवागिति॥ ४३॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ एष श्रीमध्वाचार्यः। आव्रजन्तं स्वाभिमुख-मागच्छन्तं यतिवेषधारिणं यतेर्यो वेषस्तं धर्तुं शीलमस्यास्तीति तं सङ्करं प्रति दण्डं स्वहस्तगतदण्डं प्रकाश्य तस्मै दर्शयित्वा हसन् सन्, चण्ड! क्रूर! अपण्डित! मूर्ख! त्वया यदि दण्डः मम दण्डो न खण्डयेत। 'खडि भेदे लिङ्' तर्हि वन्ध्यवाक् वन्ध्या व्यर्था वाक् यस्य सोऽनृतवचन इत्यर्थः। त्वं षण्डको नपुंसक इत्यभ्यभाषत। 'भाष व्यक्तायां वाचि लङ्' ॥ ४३ ॥

मन्दोपकारिणी – तमिति ॥ एषः श्रीमध्वाचार्यः आव्रजन्तं समुद्रसेतोः मार्गे अभिमुखेन आयान्तं यतिवेषं यतेः वेषः आकार इव वेषो यस्य स तथोक्तः तं आसुरं असुरस्वरूपं। यतिवेषधारिणं इति क्वचित् पाठः। तत्र यतेः सन्यासिनः वेषं आकारं धरतीति तथा तं सङ्करं प्रति दण्डं स्वहस्ते धृतं दण्डं प्रकाश्य तस्मै दर्शयित्वा। हसन् हासं कुर्वन्, इति अभाषत। किमिति, चण्ड अत्यन्तकोपिष्ठ ! 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः, अपण्डित मूर्ख! हे यते! यदि दण्डः मम दण्डः त्वया न खण्डयेत न भज्येत। 'खडि भेदने इति धातोः कर्मणि लिङात्मनेपदं खण्डयेत खण्डयेयातां खण्डयेरन्'। तर्हि त्वं वन्ध्यवाक् वन्ध्या अनृता वाक् वचनं यस्य स तथोक्तः। षण्डकः नपुंसकः इति अभाषतेति योजना। 'तृतीयाप्रकृतिः शण्डः क्लीबः षण्डो नपुंसकः' इत्यमरः ॥ ४३ ॥

लज्जानतः स्वार्थमथार्थयन्नसन्नुपैक्षतासौ द्विजनायकैस्तदा।
आनन्दयन्तं वदनेन्दुना जगत्तं द्वेष्टि कः प्राज्ञमिहेति वादिभिः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – लज्जेति ॥ अथ लज्जानतो लज्जयाधोऽमुखः स्वार्थं स्वप्रयोजनं, तं प्रति अर्थयन् ब्राह्मणान् प्रार्थयन्, 'भवद्भिरत्र दण्डभङ्गे साहाय्यं कर्तव्य-मिति' प्रार्थयन् असन् दुष्टोऽसौ सङ्करस्तदा, 'वदनेन्दुना वदनमेवेन्दुस्तेन जगदानन्द-यन्तमिह भुवि प्राज्ञं श्रीमध्वाचार्यं को विवेकी द्वेष्टि द्वेषं कुर्यात्'? 'द्विष अप्रीतौ लट्'। इति वादिभिर्वक्तृभिर्द्विजनायकैर्ब्राह्मणश्रेष्ठैरुपैक्षत उपेक्षितोऽभूत्। 'ईक्ष दर्शनाङ्कनयोर्लङ्' ॥ ४४ ॥

मन्दोपकारिणी – लज्जेति ॥ लज्जानतः लज्जया ह्रिया 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा' इत्यमरः, आनतः अधोमुखः स्वार्थं स्वकीयप्रयोजनाय अर्थयन् ब्राह्मणान् 'भवद्भिः मम साहाय्यं कर्तव्यमिति' प्रार्थयन्, असन् दुष्टः असौ सङ्करः तदा प्रार्थनकाले द्विजनायकैः द्विजानां ब्राह्मणानां नायकैः श्रेष्ठैः उपैक्षत उपेक्षितोऽभूत्। 'ईक्ष दर्शनाङ्कनयोरिति धातोः कर्मणि लङात्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त'। कथंभूतैः वदनेन्दुना वदनं मुखमेव इन्दुः तेन जगत् समस्तं जनं आनन्दयन्तं सुखयन्तं इह भूमण्डले प्राज्ञं महापण्डितं तं श्रीमध्वाचार्यं कः को वा विवेकी पुरुषः द्वेष्टि द्विष्यात् इति इत्थं वादिभिः वदद्भिः मध्वेन दण्डं प्रदर्शयित्वा 'यदि त्वया मम दण्डः खण्ड्यते तर्हि त्वं पुमान् अन्यथा त्वं नपुंसकः' इत्युक्तेन सङ्करेण स्वयं असमर्थेन श्रीमध्वाचार्यस्य दण्डखण्डनाद्यनिष्टकरणे सहायत्वेन प्रार्थिताः विप्राः सर्वेषां सुखकरं भूमण्डले असदृशपण्डितं श्रीमध्वाचार्यं कः विवेकी पुरुषः द्विष्यात् इति वदन्तः सन्तः दुष्टं तं अविगणय्य उपेक्षितवन्त इति भावः। 'द्विष अप्रीतौ इत्यतः लट् परस्मैपदं द्वेष्टि द्विष्टः द्विषन्ति' ॥ ४४ ॥

या याः प्रसक्ताः परिषत्सु पूरुषैर्विद्याविदग्धैर्विविधैः समागमे ।
स तासु तासु प्रतिभाति भासुरो विद्यासु विद्याधिपतिर्जिगाय तान् ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – या या इति ॥ परिषत्सु विद्वत्सभासु विविधैर्नानाविद्याविशेषविद्भिर्विदग्धैस्तत्तद्विद्यासु चतुरैः पुरुषैः समागमे सति सङ्गतौ सत्यां या या विद्याः प्रसक्ताः प्रस्तुताः, तासु तासु विद्यासु प्रतिभातिभासुरः प्रतिभया स्वरूपप्रज्ञयाऽतिभासुरोऽत्यन्तं भासुरो विद्याधिपतिः स श्रीमध्वाचार्यस्तान् तत्तद्विद्यावतो विदुषो जिगाय। 'जी जये लिट्' ॥ ४५ ॥

मन्दोपकारिणी – या या इति ॥ परिषत्सु पण्डितसभासु 'समज्या परिषद्गोष्ठी सभासंमितिसंसदः' इत्यमरः, विविधैः बहुविधैः विद्याविदग्धैः तत्तद्विद्याविशेषेषु चतुरैः पूरुषैः वादिभिः समागमे सति, या याः विद्याः तत्तदभ्यस्तविद्याः प्रसक्ताः वादार्थं प्रस्तुताः अभूवन् तासु तासु वीप्सायां द्विवचनं सर्वासु इत्यर्थः। विद्यासु प्रतिभातिभासुरः प्रतिभया स्वाभाविकप्रज्ञया अतिभासुरः अत्यन्तं निपुणतया प्रकाशमानः स्वरूपप्रज्ञयैव ताः सर्वविद्याः

जानन् इति यावत्। विद्याधिपतिः विद्यानां सकलविद्यानां अधिपतिः मुख्येश्वरः सः श्रीमध्वाचार्यः तान् विद्याविदग्धान् जिगाय पराभवं प्रापयामास। 'जि् जय इत्यतो लिट् परस्मैपदं जिगाय जिग्यतुः जिग्युः' ॥ ४५ ॥

अचाल्यमानः सगुरुः स चापलैरसज्जनानामबलीयसामिह।
उवास मासांश्चतुरो महामनाः सिंहो गुहान्तोपगतः शुनामिव ॥ ४६ ॥

भावप्रकाशिका – असज्जनानां चापलैः। 'अप्रांश्चाद्याश्च तत्रोषुश्चातुर्मास्यं ततो विभोः। दीक्षाविघ्नं चिकीर्षन्तस्ताडनं चाभवत् खलु' ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – अचाल्यमान इति ॥ सगुरुः गुरुसहितः। अबलीयसां अतिदुर्बलानामसज्जनानां चापलैः चञ्चलचेष्टाभिः अल्पीयसां क्षोभकारणैर्दुर्वादिचेष्टाभिरित्यर्थः। अचाल्यमानोऽप्रकम्प्यमानः स महामना महन्मनो यस्य स पूर्णप्रज्ञाचार्यः इह समुद्रसेतौ चतुरो मासान् शुनां शुनकानां चापलैरचाल्यमानो गुहाया अन्तं मध्यमुपगतः सम्प्राप्तः सिंह इव उवास। वस निवासे लिट्। चातुर्मास्यमुवासेति भावः ॥ ४६ ॥

मन्दोपकारिणी – अचाल्यमान इति ॥ सगुरुः गुरुणा अच्युतप्रेक्षेण सहितः अबलीयसां दुर्बलानां असज्जनानां समुद्रसेतौ विद्यमानानां दुर्जनानां चापलैः चेष्टाभिः अल्पीयसां जनानां मनः क्षोभकव्यापारैः इत्यर्थः। अचाल्यमानः अप्रकम्पमानः मनोविकाररहित इति यावत्। महामनाः महत् मनो यस्य स तथोक्तः, सः पूर्णप्रज्ञाचार्यः इह समुद्रसेतौ चतुरः चतुःसंख्याकान् मासान् उवास अवसत्। वर्षाकाले प्राप्ते चातुर्मास्यव्रतार्थी रामेश्वरे उवास इति भावः। क इव, शुनां शुनकानां 'शुनको भषकः श्वा स्यात्' इत्यमरः, चापलैः चेष्टाभिः अचाल्यमानः गुहान्तोपगतः गुहायाः गिरिदर्याः अन्तः मध्ये उपगतः प्रविष्टः सिंहः मृगेन्द्र इव। यथा सिंहस्य सारमेयशङ्का नास्ति तथा मध्वस्य दुर्वादिशङ्का नास्तीति भावः ॥ ४६ ॥

शृङ्गारसिन्धुं स भुजङ्गशायिनं श्रीरङ्गवासं कृतमङ्गलं सताम्।
अमन्दधीर्देवमवन्दतागतः कवेरकन्याहिमवायुसेवितम् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – शृङ्गारेति ॥ आगतः सेतौ चातुर्मास्यव्रतं समाप्य तत आगतोऽमन्दधीः अमन्दा पूर्णा धीः यस्य सः श्रीमध्वाचार्यः। शृङ्गारसिन्धुं शृङ्गारेण सिन्धुरिव समुद्र इव तम् । भुजङ्गशायिनं भुजङ्गे शेषे शेतुं शीलमस्यास्तीति तम् । श्रीरङ्गवासं श्रीरङ्गक्षेत्रे वासो यस्य तम्। सतां कृतमङ्गलं कृतं मङ्गलं श्रेयो येन तम्। कवेरकन्याहिमवायुसेवितं कवेरस्य तन्नामकमुनेः कन्या कुमारी 'कावेरी' तस्या यो हिमवायुः शीतलवायुस्तेन सेवितं 'हिमं शीतं तुषारे च चन्दने च हिमे विदुः' इति विश्वः, कावेरीजलसम्पर्कात् शीतलवायुना सेवितमित्यर्थः। देवं क्रीडादिगुणयुक्तं श्रीहरिमवन्दत। वन्दतेर्लङ् ॥ ४७ ॥

मन्दोपकारिणी – शृङ्गारेति ॥ अमन्दधीः मन्दा न भवतीति अमन्दा पूर्णा धीः यस्यासौ अमन्दधीः सः पूर्णप्रज्ञाचार्यः। शृङ्गारसिन्धुं शृङ्गारस्य सौन्दर्यसारस्य सिन्धुं समुद्रम्। भुजङ्गशायिनं भुजङ्गे शेषदेवे शायिनम्। श्रीरङ्गवासं श्रीरङ्गक्षेत्रे वासो यस्य स तथोक्तः। सतां सज्जनानां कृतमङ्गलं कृतं मङ्गलं श्रेयो येन तथोक्तः तम्। कवेरकन्याहिमवायुसेवितं कवेरस्य ऋषेः कन्या पुत्री कावेरी तस्याः उभयपार्श्वयोः प्रवहन्त्याः जलस्पर्शात् हिमः शीतलश्चासौ वायुश्च 'सुषिमः शिशिरो जडः तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः' इत्यमरः तेन सेवितं उभयकावेरीमध्ये शोभमानमिति भावः। देवं क्रीडादिगुणविशिष्टं श्रीरङ्गनाथम्। आगतः प्राप्तस्सन् अवन्दत प्रणम्य स्तुतिं चकार। 'वदि अभिवादनस्तुत्योः इति धातोः लङात्मनेपदं अवन्दत अवन्देतां अवन्दन्त'। चातुर्मास्यव्रतसमाप्त्यनन्तरं श्रीरङ्गं प्राप्तः इति भावः ॥ ४७ ॥

ततो निवृत्तः परमेव पूरुषं प्रणम्य नानायतनेषु सञ्चरन्।
प्रकाशयन् स्वातिशयानमानुषानाशामुदीचीं प्रययावसौ क्रमात् ॥ ४८ ॥

भावप्रकाशिका – स्वातिशयान् त्रिंशद्वाराहमनुवित्कश्चिद्योग्यास विस्मितः। सूचितेष्वेव सर्वेषु मध्वेनाभ्यधिकेष्वपि ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – तत इति ॥ असौ श्रीमध्वाचार्यः ततः श्रीरङ्गक्षेत्रान्निवृत्तः सन् सञ्चरन् नानादेशेषु सञ्चरन् सन्, नानायतनेषु दौर्गशैवस्कान्दादिनानादेवालयेषु परं

सर्वोत्तमं पूरुषमेव पूर्णषड्गुणं श्रीहरिमेव प्रणम्य उदीचीं उत्तरां आशां दिशं, अमानुषान् मानुषेष्वविद्यमानान् स्वातिशयान् स्वमाहात्म्यातिशयान् प्रकाशयन् सन् प्रययौ। 'यातेर्लिट्' ॥ ४८ ॥

मन्दोपकारिणी – तत इति ॥ असौ श्रीमध्वः ततः श्रीरङ्गक्षेत्रात् निवृत्तः निर्गतः सञ्चरन् नानादेशेषु सञ्चारं कुर्वन् नानायतनेषु नानाविधेषु शैवस्कान्दादिषु आयतनेषु देवस्थानेषु परं सर्वोत्तमं पूरुषमेव श्रीहरिमेव प्रणम्य शिवादिदेवालयेषु शिवाद्यन्तर्गतं भगवन्तमेव नत्वेति भावः। क्रमात् दिनक्रमात् देशक्रमाच्च उदीचीं 'उत्तरादिगुदीची स्यात्' इत्यमरः, आशां दिशं 'दिशश्च ककुभः काष्ठा आशाश्च हरितश्चताः' इत्यमरः, प्रययौ। किं कुर्वन् अमानुषान् मनुष्यविलक्षणान् मनुष्येषु अविद्यमानान् इत्यर्थः। स्वातिशयान् स्वस्य आत्मनः अतिशयान् माहात्म्यानि प्रकाशयन् प्रदर्शयन् ॥ ४८ ॥

ततस्ततो विस्मितलोचनैर्नरैर्निरीक्ष्यमाणोऽतिसुलक्षणाकृतिः।
ग्रामोत्तमान् प्राप्य पयस्विनीतटे विवेश देवायतनं स किञ्चन ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – तत इति ॥ विस्मितलोचनैः स्वसौन्दर्यदर्शनेन विस्मितानि लोचनानि येषां तैर्नरैस्ततस्ततो निरीक्षमाणः। अतिसुलक्षणा शोभनलक्षणोपेताऽऽकृतिर्देहो यस्य स श्रीमध्वाचार्यः। ग्रामोत्तमान् ग्रामश्रेष्ठान् प्राप्य पयस्विनीतटे पयस्विन्याख्यनद्यास्तटे किञ्चन देवायतनं देवतामन्दिरं विवेश ॥ ४९ ॥

मन्दोपकारिणी – तत इति ॥ अतिसुलक्षणाकृतिः अत्यन्तं भासमानानि लक्षणानि यस्याः सा अतिसुलक्षणा तादृशी आकृतिः देहः यस्य स तथोक्तः सः श्रीमध्वाचार्यः। अतिसुलक्षणदेहवत्वादेव ततस्ततः सार्वविभक्तिकत्वात्तसेः तत्र तत्रेत्यर्थः। विस्मितलोचनैः विस्मितानि आश्चर्ययुक्तानि लोचनानि नयनानि येषां ते तथोक्ताः तैः नरैः मनुष्यैः निरीक्ष्यमाणः पश्यमानस्सन् अतिसुन्दरत्वात् सर्वदेशीयैः आदरेण निरीक्ष्यमाणः इति भावः। पयस्विनीतटे पयस्विन्याः नद्याः तटे तीरे 'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु' इत्यमरः। ग्रामोत्तमं कञ्चन ग्रामश्रेष्ठं प्राप्य, तत्रापि किञ्चन यत्किञ्चन देवायतनं देवालयं विवेश प्रविष्टवान्। 'विश प्रवेशन इत्यतः लिट् परस्मैपदं विवेश विविशतुः विविशुः' ॥ ४९ ॥

अधीत्य धर्मेण षडङ्गमागमं तदर्थसंवर्णननिर्णयान्विताः ।
प्रापुर्द्विजेन्द्रास्तमपूर्वपूरुषं जिज्ञासवः सुप्रथितं जगत्त्रये ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – अधीत्येति ॥ धर्मेण स्वाध्यायाध्ययनोचितधर्मेण षडङ्गं षट् 'शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा । कल्पश्चेति षडङ्गानि' शिक्षादीन्यङ्गानि यस्य तमागमं वेदमधीत्य । न केवलमध्ययनमात्रेण चरितार्थाः, किन्तु तदर्थसंवर्ण-ननिर्णयान्विताः, तस्यार्थानां संवर्णनं सम्यक्कथनं तस्मिन् यो निर्णयस्तेनान्विताः । व्याकरणनिरुक्त्यादिभिरस्यागमस्यायमर्थ इति वक्तुं समर्था इत्यर्थः । द्विजेन्द्राः पयस्विनीतटवासिनो द्विजप्रवरा जगत्त्रये जगतां त्रये सुप्रथितं सुप्रसिद्धं, अपूर्वपूरुषं अपूर्वः पूर्वमदृष्टः स चासौ पूरुषश्च तं श्रीमध्वाचार्यं जिज्ञासवो महामहिमत्वेन श्रुतोऽयं कीदृश इति ज्ञातुमिच्छवः सन्तः प्रापुः ॥ ५० ॥

मन्दोपकारिणी – अधीत्येति ॥ धर्मेण वेदाध्ययननियमेन षडङ्गं षट् सङ्ख्याकानि अङ्गानि शिक्षादिवेदाङ्गानि यस्य स तथोक्तः तं आगमं वेदं अधीत्य पठित्वा तदर्थसंवर्णन-निर्णयान्विताः तेषां स्वाधीतवेदाङ्गानां अर्थः प्रतिपाद्यः तस्य संवर्णने सम्यक् वर्णने निर्णयेन निश्चयेन अन्विताः युक्ताः व्याकरणनिरुक्तादिभिः अस्य आगमस्य अयमेवार्थः इति निष्कर्षं कर्तुं समर्थाः इति भावः । द्विजेन्द्राः पयस्विनीतीरवासिनो विप्रवराः । जगत्त्रये जगतां भुवनानां त्रये प्रथितं सुप्रसिद्धं 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरः । अपूर्वपूरुषं अपूर्वः पूर्वं अदृष्टश्चासौ पूरुषश्च तं जगत्प्रसिद्धमपि स्वैः प्रागदृष्टं तं मध्वाचार्यं जिज्ञासवः बहुविद्यावत्त्वेन संश्रुतोऽयं कीदृशः इति विद्वत्तादिगुणं ज्ञातुमिच्छन्तस्सन्तः प्रापुः समागमन् । 'आप्लृ व्याप्तावित्यतो लिट् परस्मैपदं आप आपतुः आपुः' ॥ ५० ॥

सुस्मितेन्दुमरविन्दलोचनं स्वर्णवर्णमतिभद्रभाषणम् ।
वीतभूषमपि विश्वभूषणं तं दिदृक्षुरलमापतज्जनः ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – सुस्मितेन्दुमिति ॥ जनः सुस्मितेन्दुं सुस्मितमेवेन्दुर्यस्य तम् । अरविन्दलोचनं अरविन्दमिव लोचनं यस्य तम् । स्वर्णवर्णं स्वर्णवद्वर्णो यस्य तम् । अतिभद्रभाषणं अतिभद्रं भाषणमालापो यस्य तम् । वीतभूषं वीता विगता भूषाऽलङ्कृतिर्यस्य तम् । अपि तथापि विश्वभूषणं विश्वस्य भूषणमिवाचरति भूषणति

भूषणतीति भूषणस्तं, तं श्रीमध्वाचार्यं दिदृक्षुर्द्रष्टुमिच्छुः सन्नलं सम्यगापतत् आजगाम। 'पत्लृ पतने लङ्'। तत्र विद्वज्जनस्तस्य विद्वत्तादिगुणजिज्ञासयाऽगमत्। तदितरो जनस्तत्स्वरूपदिदृक्षयाऽगमदित्यभिप्रायेण 'प्रापुर्द्विजेन्द्रा, तं दिदृक्षुरलमापतज्जनः' इति च पृथगुक्तम्॥ ५१॥

मन्दोपकारिणी – न केवलं तत्र विद्वज्जना एव अगमन् किन्तु इतरेऽपीत्याह। **सुस्मितेन्दुमिति॥** जनः विद्वदन्यो जनोऽपि सुस्मितेन्दुं सु शोभनं स्मितं मन्दहासो यस्य तत् सुस्मितं वदनं तदेव इन्दुः चन्द्रः यस्य स तथोक्तः तम्। अरविन्दलोचनं अरविन्दवत् लोचने नयने यस्य स तथोक्तः तम्। स्वर्णवर्णं स्वर्णवत् सुवर्णवत् 'स्वर्णं सुवर्णं' इत्यमरः, वर्णः कान्तिः यस्य स तथोक्तः तम्। 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे' इत्यमरः। अतिभद्रभाषणं अतिभद्राणि अत्यन्तं मनोहराणि भाषणानि वचनानि यस्य स तथोक्तः तम्। वीतभूषं वीता परित्यक्ता भूषा अलङ्क्रिया येन स तथोक्तः तम्। 'भूषणं स्यादलङ्क्रिया इत्यमरः। तादृशमपि, विश्वभूषणं विश्वस्य समस्तस्य जगतः भूषणं अलङ्कारभूतं तं श्रीपूर्णप्रज्ञाचार्यं अलं सम्यक् दिदृक्षुः तत्सौन्दर्यं द्रष्टुं इच्छन् सन्, आपतत् आगमत्। 'पत पतन इत्यस्माल्लङ् परस्मैपदम्'। रथोद्धतावृत्तं 'रात्परैर्नरलगैरथोद्धता' इत्युक्तेः॥ ५१॥

विद्योरुद्युतिधीरतारकतिरस्कारे पतङ्गायितो
दुर्वादीभकुतर्ककुम्भदलने सिंहप्रबर्हायितः।
लोलालोककलोकदृक्कुमुदिनीसंह्लादनेऽब्जायितः
संसन्मण्डलमण्डनायितवपुः स्वानन्दतीर्थो बभौ॥ ५२॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्य विरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के पञ्चमः सर्गः॥

भावप्रकाशिका – अब्जपतङ्गौ चन्द्रार्कौ॥ ५२॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां पञ्चमः सर्गः॥

पदार्थदीपिकोद्बोधिका – विद्येति ॥ विद्योरुद्युतिरुत्कृष्टकान्तिर्येषां ते च ते धीरा विद्वांसस्त एव तारकाणि तेषां तिरस्कारो निराकरणं तस्मिन् 'धीरो धीमाँल्लब्धवर्णः' इति हलः । पतङ्गवत् सूर्यवत् आचरतीति पतङ्गायितः 'पतङ्गौ पक्षिसूर्यौ च' इत्यमरः। उद्यदादित्यो यथा नक्षत्रप्रभां नाशयेदेवं श्रीमध्वोऽपि विदुषां विद्वत्तां निराकरोतीति भावः। दुर्वादिन एव इभा गजास्तेषां ये कुतर्ककुम्भा भगवतो निराकारत्वनिर्गुणत्वादि-साधककुतर्काख्यकुम्भस्थलानि तेषां दलने विदारणे सिंहेषु प्रबर्हः श्रेष्ठस्तद्वदाचरतीति तादृशः 'मुख्यं पुरोगं प्रवरं प्रबर्हम्' इति हलः। सिंहप्रबर्हो यथेभकुम्भमयत्नं विदारयेदेवमसौ कुतर्कविदारणसमर्थ इति भावः। लोलश्चञ्चलः सम्भ्रान्तो वाऽऽलोको दर्शनं यस्य स एव लोलालोककः। स्वार्थे कः। स चासौ लोको जनस्तस्य दृग्लोचनं सैव कुमुदिन्युत्पलं तस्याः संह्लादनं सन्तोषीकरणं तस्मिन्नब्जवच्चन्द्रवदाचरतीत्यब्जायितः 'अब्जौ शङ्खशशाङ्कौ च' इत्यमरः। संसन्मण्डलस्य सभामण्डलस्य मण्डनवदलङ्कारवदाचरतीति मण्डनायितं वपुर्देहो यस्य सः स्वानन्दतीर्थो बभौ। 'भा दीप्तौ लिट्'। अत्र शार्दूलविक्रीडितवृत्तम् । 'अर्काश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितमि'ति तल्लक्षणात्। अत्र रूपकोपमयोः संसृष्टिः ॥ ५२ ॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृत्तौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां पञ्चमः सर्गः ॥

मन्दोपकारिणी – विद्येति ॥ उर्व्यः बह्व्यश्च ताः द्युतयः दीप्तयश्च उरुद्युतयः विद्या एव उरुद्युतयः येषां ते विद्योरुद्युतयः धीराः पण्डिताः एव 'धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः' इत्यमरः, तारकाः नक्षत्राणि धीरतारकाः 'नक्षत्रमृक्षं भन्तारातारकाप्युडुवास्त्रियाम्' इत्यमरः, विद्योरुद्युतयश्च ते धीरतारकाश्च विद्योरुद्युति-धीरतारकाः धीरतारकाणां तिरस्कारे निरासे पतङ्गायितः पतङ्गवत् सूर्यवत् आचरतीति पतङ्गायित 'पतङ्गौ पक्षिसूर्यौ च' इत्यमरः। उद्यदादित्यो यथा नक्षत्रकान्तिं नाशयति एवं श्रीमध्वोऽपि विदुषां विद्वत्तां निराकरोतीति भावः। दुर्वादीभकुतर्ककुम्भदलने दुर्वादिन एव इभाः कुञ्जराः 'कुञ्जरो वारणः करी इभः स्तम्बेरमः पद्मी' इत्यमरः, तेषां कुतर्का एव भगवतः निराकारत्वनिर्गुणत्वादिसाधकाः कुत्सितयुक्तय एव कुम्भाः गण्डस्थलानि 'कुम्भे घटे हस्तिमूर्ध्नि' इत्यमरः, तेषां दलने दारणे सिंहप्रबर्हायितः सिंहप्रवर्हवत् सिंहश्रेष्ठवत् आचरतीति सिंहप्रबर्हायितः। सिंहो यथा गजकुम्भं विदारयेत् एवं मध्वः दुर्वादिनां

कुतर्कनिरसने समर्थः इति भावः। लोलालोककलोकदृक्कुमुदिनीसंह्लादने लोलः चञ्चलः 'लोलश्चञ्चलतृष्णयोः' इति विश्वः, आलोकः दर्शनं यस्य सः लोलालोकः, 'आलोकौ दर्शनद्योतौ' इत्यमरः, आलोकः एव आलोककः लोलालोककश्चासौ लोकः जनश्च लोलालोककलोकः तस्य दृक् लोचनमेव कुमुदिनी उत्पलं तस्य संह्लादने तोषणे अब्जायितः चन्द्रवत् वर्तमानः 'अब्जो जवातृकः सोमः' इत्यमरः। चन्द्रोदये नीलोत्पलस्य यथा हर्षः तथा मध्वस्य दर्शनेन लोकस्य हर्षः इति भावः। संसन्मण्डलमण्डनायितवपुः संसदां तत्र मिलितजनानां मण्डलस्य समूहस्य मण्डनायितं मण्डनवत् वर्तमानं 'परिष्करो विभूषणं मण्डनं' इत्यमरः वपुः शरीरं यस्य स तथोक्तः तत्र मिलितजनसमूहे अलङ्कारभूत इति भावः। स्वानन्दतीर्थः शोभनश्चासौ आनन्दतीर्थः बभौ शुशुभे। 'भा दीप्तौ इत्यस्माल्लिट् परस्मैपदं बभौ बभतुः बभुः'। शार्दूलविक्रीडितं वृत्तं 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमि'ति तल्लक्षणात्॥ ५२॥

॥ इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां पञ्चमः सर्गः॥ ५॥

षष्ठः सर्गः

ऐतरेयमथ किञ्चन सूक्तं सूचयन् सदसि तत्र गरिष्ठः ।
श्रोतुमिच्छति सभा भगवद्भ्यः सूक्तभावमिति तावदुवाच ॥ १ ॥

पदार्थदीपिकोद्बोधिका – ऐतरेयमिति ॥ अथ श्रीमध्वदर्शनानन्तरं तत्र सदसि तस्यां सभायां गरिष्ठः श्रेष्ठः कश्चिद्विद्वान्। ऐतरेयशाखायां भवमैतरेयं किञ्चन सूक्तं सूचयन् सन्, सभा मिलितेयं सभा भवद्भ्यः सूक्तभावं एतत्सूत्रार्थम्। 'भावो लीला क्रिया चेष्टा भूत्यभिप्रायजन्तुषु। पदार्थमात्रे सत्तायाम्' इति वैजयन्ती। श्रोतुमिच्छति तावत् इत्युवाच। अत्र स्वागतावृत्तम्। स्वागता 'रनभगैर्गुरुणा च' इति तल्लक्षणात् ॥ १ ॥

मन्दोपकारिणी – ऐतरेयमिति ॥ अथ मध्वाचार्यदर्शनानन्तरम्। तत्र तस्मिन्। सदसि सभायां गरिष्ठः श्रेष्ठः कश्चित् विद्वान्। ऐतरेयं ऐतरेयशाखायां विद्यमानं किञ्चन स्वाभिप्रेतं किमपि सूक्तं सूचयन् सन् इति इत्थम् उवाच अब्रवीत्। कथं, अहो मध्वाचार्य ! सभा अत्र मिलितसभ्यजनः। 'सभा संसदि सभ्ये च' इत्यमरः। भगवद्भ्यः भगः माहात्म्यं कीर्तिर्वा एषां अस्तीति भगवन्तः तेभ्यः पूज्येभ्यः इत्यर्थः। 'भगं श्रीकरमाहात्म्य-वीर्ययत्नार्ककीर्तिषु' इत्यमरः। सूक्तभावं सूक्तस्य भावं अभिप्रेतार्थम्। श्रोतुं इच्छति वांछति। 'इष इच्छायां इत्यतो लट् परस्मैपदम्'। तत्र मिलितजनेषु श्रेष्ठः कश्चित् विद्वान् ऋग्वेदगतं एकं सूक्तं प्रस्तुतीकृत्य किञ्चिदुच्चार्य एतत् सूक्तार्थमाहात्म्योपेतं भावं भवन्मुखात् सभाजनः ज्ञातुमिच्छति इति मध्वाचार्यं प्रति अवोचत् इति भावः। अस्मिन् सर्गे प्रायः स्वागतावृत्तं 'स्वागतारनभगैर्गुरुणा च' इति तल्लक्षणात् ॥ १ ॥

वर्णसौष्ठवगरिष्ठमतूर्णं तुल्यमात्रमतिमात्रसुलक्ष्म ।
व्यूढहृज्जलदघोषममुष्योच्चारणं विदधदभ्यधितार्थम् ॥ २ ॥

पदार्थदीपिकोद्बोधिका – वर्णेति ॥ व्यूढं पूर्णं हृत् यस्य स पूर्णप्रज्ञाचार्यः । वर्णानामक्षराणां यत्सौष्ठवं सुष्ठुत्वं तेन स्पष्टतयेति यावत्। गरिष्ठमत्युत्तमं यथा भवति तथा,

तूर्णं त्वरितं न भवति यथा तथा अतूर्णम्। तुल्या मात्रा यथा भवति तथा तुल्यमात्रम्। तुल्यमात्रत्वं नाम, अकारादिवर्णानां ह्रस्वत्वेनोच्चारण एकमात्रत्वं, दीर्घत्वे द्विमात्रत्वं, प्लुतत्वे त्रिमात्रत्वं, व्यञ्जनोच्चारणे त्वर्धमात्रत्वमिति। तदुक्तं 'एकमात्रो भवेत् ह्रस्वः द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनन्त्वर्धमात्रकम्' इति। तथा चैकमात्रत्वेन ह्रस्वोच्चारणं, द्विमात्रस्तु दीर्घोच्चारणमित्यादिरीत्येति भावः। अत एव सु शोभनं लक्ष्म लक्षणं यस्य तत्सुलक्ष्म, अतिमात्रमत्यन्तं सुलक्ष्म शोभनलक्षणयुक्तं यथा भवति तथा। जलदस्य घोष इव घोषो ध्वनिर्यथा भवति तथा जलदघोषम्। उच्चारणं प्रकृतसूक्तोच्चारणं विदधत् कुर्वन् सन्नमुष्य तत्र प्रस्तुतसूक्तस्यार्थमभ्यधित उवाच। धाञो लुङ्॥ २॥

मन्दोपकारिणी – वर्णेति॥ व्यूढहृत् व्यूढं विस्तीर्णं हृत् मनः यस्य स तथोक्तः निर्भय इत्यर्थः। 'व्यूढं विपुलमुद्दिष्टं' इति हलायुधः। श्रीमध्वाचार्यः अमुष्य प्रस्तुतस्य सूक्तस्य अर्थं अभिधेयं अभ्यधित उवाच। 'अभिपूर्वात् डु धाञ् धारणपोषणयोरिति धातोर्लुङ् आत्मनेपदं अधित अधिषाताम् अधिषत'। कथंभूत उच्चारणं, विदधत् पूर्वोक्त-सूक्तस्य उच्चारणं कुर्वन्, कथंभूतं उच्चारणं वर्णसौष्ठवगरिष्ठं वर्णानि अकाराद्यक्षराणि। 'वर्णं तु चाक्षरः' इत्यमरः। तेषां सौष्ठवं सुष्ठुः भावः सौष्ठवं स्पष्टत्वं तेन गरिष्ठं अत्युत्तमम्। अतूर्णं त्वरारहितम्। तुल्यमात्रं तुल्याः समानाः मात्राः एकमात्रादिमात्राः यस्मिन् तत् तुल्यमात्रं एकमात्रत्वेन ह्रस्वोच्चारणं, द्विमात्रत्वेन दीर्घोच्चारणं, त्रिमात्रत्वेन प्लुतवर्णोच्चारणं, अर्धमात्रत्वेन व्यञ्जनोच्चारणम्। 'एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनंत्वर्धमात्रकम्'॥ अकारादिवर्णानां तुल्यमात्रत्वादिति भावः। अतिमात्र-सुलक्ष्म अतिमात्रं भृशम् 'अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्' इत्यमरः। सु शोभनानि लक्ष्माणि लक्षणानि यस्य तत् तथोक्तं 'चिह्नं लक्ष्म च लक्षणं' इत्यमरः। जलदघोषं जलदवत् घोषः ध्वनिः यस्य तत् जलदघोषम्। अयं श्रीमध्वाचार्यः त्वरां विना स्पष्टाक्षर-पूर्वकं वेदोच्चारणलक्षणोपेततया ह्रस्वदीर्घादिवर्णोच्चारणपूर्वकं मेघवत् गम्भीरशब्देन प्रकृतसूक्तं प्रथमतः पठित्वा तत्सूक्तार्थं अवोचत् इति भावः॥ २॥

लक्षणान्विततया वचनेऽस्मिन् देवतागुरुमसावतिशेते ।
मानमित्यपि विधाय धिया ते तत्तु सूक्तमपरार्थमवोचन् ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – लक्षणेति ॥ ते द्विजेन्द्राः । असौ श्रीमध्वाचार्यो लक्षणेन वेदोच्चारणोचितलक्षणेनान्वितो युक्तस्तस्यभावस्तत्ता तया । अस्मिन् वचने सूक्तोच्चारण-तदर्थकथनादिरूपे वचने । विषसप्तमीयम् । देवतागुरुं बृहस्पतिमतिशेतेऽतिक्रामति । शीङ् स्वप्ने लट् । इति धिया मनसा मानं सम्भावनां विधायापि, तत् मध्वोक्तं सूक्तं तु, अपरोऽर्थो यस्य तत् । श्रीमध्वोक्तार्थादन्यार्थमित्यर्थः । अवोचन् । अस्य सूक्तस्य भवदुक्तार्थो न भवतीत्यवोचन्निति भावः ॥ ३ ॥

मन्दोपकारिणी – लक्षणेति ॥ ते द्विजेन्द्राः । तत् मध्वाचार्येण उक्तार्थं सूक्तं अपरार्थं अपरः अन्यः अर्थः यस्य तत् अपरार्थं मध्वोक्तार्थात् अन्यार्थं अवोचन् अवदन् । 'वच परिभाषण इत्यतः लुङ् परस्मैपदं अवोचत् अवोचतां अवोचन्' । अस्य सूक्तस्य भवदुक्तोऽर्थो न भवति किन्तु अस्मदुक्त एवार्थः इति अब्रुवन् इति भावः । किं कृत्वा । असौ मध्वाचार्यः लक्षणान्विततया लक्षणैः वेदोच्चारणोचितलक्षणैः अन्विततया युक्ततया अस्मिन् वचने सूक्तोच्चारणपूर्वकं अर्थकथनविषये । देवतागुरुं देवतानां गुरुं आचार्यं बृहस्पतिम् 'बृहस्पतिस्सुराचार्यः' इत्यमरः अतिशेते अतिक्रामति । 'अतिपूर्वकात् शीङ् स्वप्न इत्यस्मात् लडात्मनेपदं शेते शयाते शेरते' । इति धिया एवंभूतमनसा । मानं बहुमानं विधायापि कृत्वापि अयं लक्षणवत्तया वेदोच्चारणादिविषये बृहस्पतेरपि अधिक इति मनसि सम्भाव्यापि मध्वोक्तस्य अन्यार्थं ऊचुरिति भावः ॥ ३ ॥

स्यात्तथेत्थमपि सम्भवितार्थस्त्र्यर्थतां श्रुतिषु वित्त दशार्थम् ।
भारतं ननु शतार्थमपि स्याद्वैष्णवं पदसहस्रतयं हि ॥ ४ ॥

भावप्रकाशिका – त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते । विष्णोः सहस्रनामापि निरन्तरशतार्थकम् ॥ इति संख्याया अवयवे तयप्' इति सहस्रतयम् ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – स्यादिति ॥ हे विद्वांसः! यूयं श्रुतिषु सर्ववेदेषु त्रयोऽर्था यस्य सः त्र्यर्थः तस्य भावस्तत्ता ताम् । अर्थत्रययुक्ततामित्यर्थः । वित्त जानीत । विदेर्लोट् ।

भारतम् श्रीमहाभारतं दश अर्था यस्य तद्दशार्थं वित्त। विष्णोर्वाचकं वैष्णवं, पदानां नाम्नां सहस्रमेव सहस्रतयं, शतं अर्था यस्य तत् शतार्थमपि स्यात् ननु। हि यस्मादर्थः एतत्सूक्तार्थः तथाऽस्मदुक्तप्रकारेण स्यात् इत्थमपि भवदुक्तप्रकारेणाप्यर्थः सम्भवतीति सम्भविता। तथा च श्रुतीनां त्र्यर्थत्वादर्थद्वयमपि प्रामाणिकमेवेत्यर्थः। तथाचोक्तं- 'त्रयोर्थाः सर्ववेदेषु दशार्थाः सर्वभारते। विष्णोः सहस्रनामापि निरन्तरशतार्थक'मिति ॥ ४ ॥

मन्दोपकारिणी – स्यादिति ॥ अर्थः एतत्सूक्तार्थः तथा अस्मदुक्तप्रकारेण स्यात् भवेत्। 'अस भुवीत्यतो विधिलिङ् परस्मैपदं स्यात् स्याताम् स्युः'। इत्थमपि भवदुक्त-प्रकारेणापि अर्थः सम्भविता भवेत् संपूर्वकात् 'भू सत्तायामित्यतो लुट् परस्मैपदं भविता भवितारौ भवितारः'। तस्मात् अर्थद्वयमपि प्रामाणिकमिति भावः। कथमिति चेत् श्रुतिषु वेदेषु त्र्यर्थतां त्रयश्च ते अर्थाश्च त्र्यर्थाः त्र्यर्थानां भावः त्र्यर्थता ताम्। वित्त जानीथ। 'विद ज्ञान इत्यतो लोट् परस्मैपदं विद्धि वित्तं वित्त'। भारतं महाभारतम्। दशार्थं दशसङ्ख्याकाः अर्थाः यस्मिन् तत् तथोक्तं वित्त। वैष्णवं विष्णोः इदं वैष्णवम्। पदसहस्रतयं पदानां सहस्रतयं सहस्रं विष्णुनामसहस्रमित्यर्थः। शतार्थमपि शतसङ्ख्याकाः अर्थाः यस्मिन् तत्तथोक्तम्। स्यान्ननु भवेदेव। 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। हि प्रसिद्धमेतत्। तदुक्तं 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते। विष्णोः सहस्रनामापि निरन्तरशतार्थकम्'। तस्मात् उभयमपि युक्तमिति भावः ॥ ४ ॥

इत्युदीरयति विस्तृतचित्ते भूसुरा इह जिगीषव एनम्।
ऊचुरर्थशतकं हरिनाम्नां वर्ण्यतामिति सहासमुखास्ते ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ विस्तृतचित्ते विस्तृतं चित्तं यस्य तस्मिन् पूर्णप्रज्ञाचार्ये। इति वेदादेस्त्र्यर्थतादिकमस्तीत्युदीरयति वदति सति, इह वेदादेरर्थत्रयादि-वर्णनविषय एनं श्रीमध्वाचार्यं जिगीषवस्ते भूसुराः। सहासं हासयुक्तं मुखं येषां तादृशा सन्तः। अत्रायं निरुत्तरो भविष्यतीति मत्वा स्मितमुखाः सन्त इत्यर्थः। हरिनाम्नां 'विश्वं विष्णुः' इत्यादिभगवन्नाम्नामर्थानां शतकं शतं वर्ण्यतां उच्यतां इत्यूचुः ॥ ५ ॥

मन्दोपकारिणी – इतीति ॥ विस्तृतचित्ते विस्तृतं पूर्णं चित्तं मनः यस्य स तथोक्तः तस्मिन् पूर्णप्रज्ञाचार्ये। इति 'वेदादिषु अर्थत्रयादिकमस्तीति' एवं प्रकारेण उदीरयति वदति

सति इह वेदादेः अर्थादिविषये। एनं मध्वाचार्यं जिगीषवः जेतुं इच्छवः ते भूसुराः ब्राह्मणाः। सहासमुखाः हासेन मन्दहासेन सहितं मुखं येषां ते तथोक्ताः। अत्र अयं निस्सारो भविष्यतीति स्मेरमुखाः सन्तः हे मध्वाचार्य ! हरिनाम्नां हरेः विष्णोः नाम्नां विश्वं विष्णुर्वषट्कार इत्यादिनाम्नाम् अर्थशतकं अर्थानां शतकं वर्ण्यतां उच्यताम्। 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु इत्यतः कर्मणि लोट् आत्मनेपदं वर्ण्यताम् वर्ण्येताम् वर्ण्यन्ताम्'। एवं ऊचुः अवदन्। 'वचेः लिट्'। विष्णुसहस्रनाम्नां एकैकनाम्नः शतं शतं अर्थाः सन्तीत्युक्ते सति अयं मध्वाचार्यः शतार्थकथने अक्षमस्सन् पराजितो भविष्यतीति मत्वा हसन्तः सन्तः विश्वादिनाम्नां शतं अर्थाः उच्यतामिति ब्राह्मणाः मध्वं ऊचुः इति भावः ॥ ५ ॥

वर्णयामि तदहं सकलं वः सौष्ठवादनुवदन्तु भवन्तः।
तं वदन्तमिति तेऽथ वदन्तो बाढमित्यतिदृढोद्यममापुः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – वर्णयामीति ॥ अहं तत् सकलमर्थशतकं वो युष्मान् प्रति वर्णयामि वदामि। वर्ण वर्णक्रियाविस्तारगुणवचनेषु लट्। भवन्तः सुष्ठु भावः सौष्ठवं तस्मात्। अनुवदन्तु मदुक्तप्रकारेणार्थशतकं सम्यग्भवन्तोऽनुवदन्त्वित्यर्थः। अथ इति वदन्तं श्रीमध्वाचार्यं बाढमिति तथास्त्विति वदन्तस्ते द्विजा, अतिदृढो य उद्यमः प्रयत्नस्तमापुः। तेन वक्ष्यमाणार्थशतानुवादे सावधाना बभूवुरित्यर्थः ॥ ६ ॥

मन्दोपकारिणी – वर्णयामीति ॥ हे ब्राह्मणाः अहं वः युष्माकं तत् अर्थशतकं वर्णयामि कथयामि। भवन्तः सकलं तदर्थशतकं सौष्ठवात् सम्यक् मदुक्तप्रकारेण अनुवदन्तु अनुवादं कुर्वन्तु। 'वदेः लोट् परस्मैपदम्'। इति वदन्तं ब्रुवाणं तं मध्वाचार्यं प्रति बाढमिति वदन्तः तथास्तु इति प्रतिज्ञां कुर्वन्तः 'भृशप्रतिज्ञयोर्बाढं' इत्यमरः। ते द्विजाः अथ प्रतिज्ञानन्तरं अतिदृढोद्यमं अतिदृढश्चासौ उद्यमः उद्योगश्च तं आपुः चक्रुः। 'आप्लृ व्याप्तावित्यतो लिट् परस्मैपदम्'। मध्वाचार्येण वक्ष्यमाणार्थशतकानुवादकरणे सावधान-मनसः बभूवुः इति भावः ॥ ६ ॥

प्रत्ययप्रकृतिसङ्गमभङ्गीं शब्दशास्त्रविहितां प्रतिदर्श्य ।
शुद्धधीः श्रुतिशिरःशतसिद्धानभ्यधात्सपदि विश्वपदार्थान् ॥ ७ ॥

भावप्रकाशिका – 'विश् प्रवेशने' इति धातोर्विष्टं ज्ञानरूपं च विश्वम्। टु ओश्वि गतिवृद्ध्योरिति च विना पक्षिणा श्वयतीति विश्वम्। 'तृतीयोऽतिशये' इति विश्वम्। विशेषेण व्याप्तत्वाच्च, विशेषेण ज्ञानरूपत्वाच्च, विशेषेण नित्यवृद्धत्वाच्च 'विश्वमेव हि सर्वं' 'सर्वं पूर्णमिहोच्यते' इति न्यायेन पूर्णत्वाच्च विश्वम्। एवं 'विश्वो हिरण्यगर्भोऽग्निर्यम' इत्यादेर्विश्वस्य वायोरन्तर्यामित्वाच्च जाग्रत्प्रवर्तकस्य विश्वनामकत्वादित्यादिना रूपेण पञ्चाशदधिकार्थान् अभ्यधात्॥ ७॥

पदार्थदीपिकोद्बोधिका – प्रत्ययेति॥ शुद्धधीः श्रीमध्वाचार्यः सपदि तदानीमेव श्रुतीनां शिरांसीव श्रुतिशिरांस्युपनिषदस्तेषां यानि शतानि तेषु सिद्धान् प्रमितान्, विश्वमिति यत्पदं तस्यार्थान्। 'विश्वं विष्णु'रित्यत्रस्थविश्वशब्दस्यार्थानित्यर्थः। शब्दशास्त्रं व्याकरण-शास्त्रं तस्मिन् विहितां प्रोक्तां प्रत्ययः पश्चाद्विधीयमानः 'क' इत्यादिः प्रकृतिः प्राग्विद्यमान 'विश्' इत्यादिशब्दस्वरूपम् तयोः सङ्गमस्य सम्बन्धस्य भङ्गीं प्रकारं प्रतिदर्श्य दर्शयित्वा अभ्यधात् उवाच। तत्कथमिति चेदुच्यते। 'विश प्रवेशन' इति धातोरौणादिके क्वप्रत्यये कित्वादुपधागुणाभावे च सति विश्वमिति रूपम्। विशतीति विश्वम्। 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेस्सर्वत्र प्रविष्टत्वाद्विश्वमित्यर्थः। सर्वत्र प्रविष्टत्वाज्ज्ञानरूपत्वाद्वा विश्वम्। तत्रायं विभागः। विश धातोः किप्, वा गतिगन्धनयोरित्यस्माड्डुप्रत्ययष्टिलोपश्च। गत्यर्थस्य ज्ञानार्थकत्वात् वं ज्ञानरूपमिति भावः। विट् चासौ वञ्चेति विश्वमिति विग्रहः। विः पक्षी गरुडः, विना श्वयति गच्छतीति विश्वम्। अस्मिन् पक्षे पक्षिवाचकाद्वीत्यतः परतः 'टु ओश्वि गतिवृद्ध्यो'रित्यस्मादच्प्रत्ययः। विशेषेण श्वयति प्राप्नोतीति वा विश्वम्। अस्मिन् पक्षे वीत्युपसर्गः। विशेषेण वर्धत इति वा विश्वम्। परिपूर्ण इति यावत्। विश्वं वायुमन्तर्यामितया वर्तयतीति वा विश्वम्। अत्र च विश्वशब्दो वायुपरः। 'विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा' इति विश्वशब्दस्य वायौ प्रयोगात्। अत्र च विश्वशब्दा-दुत्तरतो वृतु वर्तन इति धातोर्डप्रत्ययष्टिलोपश्च। विश्वं जगद्वर्तयतीति वा विश्वम्। उक्त एव धातुप्रत्ययविभागः। अत्र विश्वशब्दो जगद्वाचकः। इत्यादिरूपेण विश्वशब्दस्य पञ्चाशदधिकानर्थानभ्यधात्॥ ७॥

मन्दोपकारिणी – प्रत्ययेति ॥ शुद्धधीः शुद्धा निःशङ्का धीः यस्य स तथोक्तः श्रीमध्वाचार्यः। सपदि सद्यः। श्रुतिशिरःशतसिद्धान् श्रुतीनां वेदानां शिरांसि शीर्षस्थानीयाः उपनिषदः इत्यर्थः। तेषां शतेषु सिद्धान् प्रमितान् विश्वपदार्थान् विश्वपदस्य अभिधेयान् अभ्यधात् प्रावोचत्। 'डु धाञ् धारणपोषणयोः इत्यतो लुङ् परस्मैपदं अधात् अधातां अधुः'। किं कृत्वा। शब्दशास्त्रविहितां शब्दशास्त्रे व्याकरणे विहितां उदिताम्। प्रत्यय-प्रकृतिसङ्गमभङ्गीं प्रत्ययश्च प्रकृतिश्च तयोः सङ्गमः सम्बन्धः तस्य भङ्गीं प्रकारं प्रतिदर्श्य प्रकाश्य प्राक् विद्यमानं धात्वादिशब्दस्वरूपं प्रकृतिः तत्परः पश्चात् विधीयमानः प्रत्ययः तयोः सम्बन्धप्रकारं व्युत्पाद्य इति भावः ॥ ७ ॥

यावदर्थशतकं न विशङ्कः सन्ततोक्तिकृदपूरयदेषः।
वर्णितावधृतिदुर्बलचित्तास्तावदाकुलहृदो ह्यभवंस्ते ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – यावदिति ॥ विगता शङ्का यथा भवति तथा विशङ्कमतएव सन्ततं निरन्तरं या उक्तिरर्थकथनं तां करोतीति तथोक्तः। एषः श्रीमध्वाचार्यो यावदर्थानां शतकं न पूरयात् अपूरयामास। पृ पालनपूरणयोर्लङ् तावद्वर्णितानां प्रोक्तार्था-नामवधृतावववधारणे दुर्बलं असमर्थं चित्तं येषां ते द्विजा आकुलं सम्भ्रान्तं हृन्मनो येषां तादृशा अभवन् ॥ ८ ॥

मन्दोपकारिणी – यावदिति ॥ – विशङ्कः सभाभयरहितः अत एव सन्ततोक्तिकृत् सन्ततं अविच्छेदेन उक्तिं अर्थकथनं करोतीति सन्ततोक्तिकृत्। एषः मध्वाचार्यः। यावत् यावति काले। अर्थशतकं अर्थानां विश्वपदाभिधेयानां शतकं नापूरयत् न समापयत्। 'पृ पालनपूरणयोः इत्यतो लङ् परस्मैपदं अपूरयत् अपूरयतां अपूरयन्' विश्वपदस्य अर्थशतकं यावत् नावदत् इति भावः तावत् तावन्मध्य एव वर्णितावधृतिदुर्बलचित्ताः वर्णितानां मध्वाचार्येण कथितानां कतिपयानां विश्वपदस्य अर्थानां अवधृतौ ग्रहणविषये दुर्बलं अक्षमं चित्तं अन्तःकरणं येषां ते तथोक्ताः ते द्विजाः आकुलहृदः आकुलं सम्भ्रान्तं हृत् चित्तं येषां ते तथाभूताः अभवन्। मध्वाचार्येण कतिपयार्थेषु कथितेषु सत्सु तावन्मात्रग्रहणेऽपि असमर्थाः ब्राह्मणाः संभ्रान्ताः बभूवुरिति भावः ॥ ८ ॥

साङ्गवेदचतुरा इतिहासे शिक्षिताः सुबहवोऽप्यतिधृष्टाः ।
नैतदीरितमहो जगृहुस्ते विश्वसंक्षयपयोऽन्धुगणा वा ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – साङ्गेति ॥ अङ्गैः शिक्षादिषडङ्गैः सहिताः साङ्गाः ये वेदास्तेषु चतुराः कुशलाः । इतिहासे भारते शिक्षिताः । उपलक्षणमेतत्, सकलविद्याविदग्धा इति भावः । सुबहवो मिलिता अपि, अतिधृष्टा अतिधैर्यवन्तोऽपि द्विजा एतदीरितं एतदुक्तं विश्वशब्दार्थजातमन्धुगणा गर्तसमूहा विश्वस्य संक्षयो यस्मिन् काले स विश्वसंक्षयः प्रलयकालः तस्य पयो वा जलमिव 'वा विकल्पोपमानयोः' इत्यमरः न जगृहुः न धृतवन्तः । अहो ! अत्रोपमालङ्कारः ॥ ९ ॥

मन्दोपकारिणी – साङ्गेति ॥ – साङ्गवेदचतुराः साङ्गैः शिक्षादिषडङ्गैः सहिताः साङ्गाः साङ्गाश्च ते वेदाश्च साङ्गवेदाः तेषु चतुराः निपुणाः । इतिहासेऽपि भारतादावपि शिक्षिताः प्रवीणाः । 'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः' इत्यमरः । उपलक्षणमेतत् सकलविद्याविदग्धाः इति भावः । तादृशा अपि सुबहवोऽपि मिलिता अपि, अतिधृष्टा अपि अति अत्यन्तं धृष्टाः सभाभयरहिता अपि इत्यर्थः । ते द्विजाः । एतदीरितं एतेन मध्वाचार्येण ईरितं कथितं अर्थं न जगृहुः ज्ञातुं नाशक्नुवन् । अहो आश्चर्यं मध्वपाण्डित्यं यतः महापण्डितानामपि अवाङ्मनोगोचरम् । ते किमिव, अन्धुगणाः अन्धूनां कूपानां गणाः समूहाः । 'पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा' इत्यमरः । विश्वसंक्षयपयो वा विश्वस्य जगतः संक्षयः नाशः यस्मिन् सः विश्वसंक्षयः प्रलयकालः तस्मिन् विद्यमानपयो वा उदकमिव । 'वा विकल्पोपमानयोः' इति विश्वः । यथा बहवोऽपि कूपाः अतिगर्तसमूहाः प्रलयजलं गृहीतुं न समर्थाः गर्तानां स्वल्पावकाशत्वात् प्रलयजलानां बहुत्वात् तथा ब्राह्मणानां बहूनामपि अल्पबुद्धित्वात् मध्वाचार्योक्तानां अर्थानां बहुत्वात् ब्राह्मणाः अर्थग्रहणे न शक्ताः बभूवुः । बहूनां अल्पावकाशे स्थित्ययोगादिति भावः । 'ग्रह उपादाने इत्यतो लिट् परस्मैपदं जग्राह जगृहतुः जगृहुः' ॥ ९ ॥

देवतास्वसुलभा प्रतिभा ते मानुषेषु चपलेषु कथा का ।
क्षाम्य सौम्य सकलज्ञ नमस्ते ते ब्रुवन्त इति तं किल नेमुः ॥ १० ॥

पदार्थदीपिकोद्बोधिका – देवतेति ॥ – ते द्विजाः। हे सकलज्ञ! सर्वज्ञ! ते प्रतिभा स्वरूपप्रज्ञा देवतास्वसुलभा दुर्लभा, चपलेषु चञ्चलचित्तेषु मानुषेष्वसुलभेति का कथा ? किं कथ्यते ? हे सौम्य! मनोज्ञ! क्षाम्य, अस्मच्चापलं क्षमस्व। क्षमूष् सहने लोट्। ते नम इति ब्रुवन्तः सन्तः तं श्रीमध्वाचार्यं नेमुः। नमश्चक्रुः किल। अत्र कैमुत्यालङ्कारः ॥ १० ॥

मन्दोपकारिणी – देवतास्विति ॥ ते द्विजाः। इति इत्थम्। ब्रुवन्तः वदन्तः सन्तः। तं मध्वाचार्यम्। नेमुः किल अनमन् हि। ननाम नेमतुः नेमुः। कथं हे सकलज्ञ सकलं जानतीति सकलज्ञः। तस्य संबुद्धिः हे सकलज्ञ ! ते प्रतिभा प्रज्ञा। देवतासु देवेषु। 'वृन्दारका दैवतानि पुंसि वा देवता स्त्रियां' इत्यमरः। असुलभा दुर्लभा। चपलेषु चञ्चलवृत्तिषु मानुषेषु मनुष्येषु असुलभा इति का कथा किं कथनीयं इति भावः। हे सौम्य सुन्दर ! सौम्यं तु सुन्दरे सोमदैवते' इत्यमरः। क्षाम्य ! अस्मच्चापल्यं क्षमस्व सहस्व 'क्षमूष् सहन इत्यतो लोट् परस्मैपदं क्षाम्य क्षाम्यतम् क्षाम्यत'। ते तुभ्यं नमः प्रणामोऽस्तु इति ब्रुवन्तः इत्यन्वयः ॥ १० ॥

वेदशास्त्रचतुरैरिह विद्यावित्तलिप्सुभिरवाप्तमशेषैः।
प्राप केरलसुमण्डलजातैरन्यदायतनमायतचेताः ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – वेदेति ॥ आयतं विस्तृतं चेतो यस्य स पूर्णप्रज्ञाचार्यः। वेदाश्च शास्त्राणि च तेषु चतुरैः विदग्धैः। विद्यया लभ्यं वित्तं विद्यावित्तम्। विद्याधिक्यनुसारेण लभ्यवित्तमित्यर्थः। तल्लब्धुमिच्छुभिर्लिप्सुभिरशेषैः सर्वैः, केरलाख्यं सुमण्डलं प्रशस्तदेशः, तस्मिन् जातैरुत्पन्नैरवाप्तं प्राप्तमिह पयस्विनीतटेऽन्यदायतनं देवास्थानान्तरं प्राप ॥ ११ ॥

मन्दोपकारिणी – वेदशास्त्रेति ॥ – आयतचेताः आयतं विस्तृतं चेतः मनः यस्य स तथोक्तः मध्वाचार्यः। इह पयस्विनीतटे। अन्यत् अपरं आयतनं देवालयं प्राप प्राप्तवान्। 'प्र पूर्वात् आप्लृ व्याप्तावित्यतो लिट् परस्मैपदं आप आपतुः आपुः'। कथंभूतं वेदशास्त्रचतुरैः वेदाश्च शास्त्राणि च वेदशास्त्राणि तेषु चतुरैः निपुणैः अत एव विद्यावित्तलिप्सुभिः विद्याभ्यासानुसारेण लभ्यं वित्तं द्रव्यं 'वित्तं वस्तु वसु द्रव्यं' इति

धनञ्जयः। लिप्सुभिः लब्धुमिच्छद्भिः। केरलसुमण्डलजातैः केरलसुमण्डले केरलाख्य-शोभनदेशे जातैः उत्पन्नैः। 'स्यान्मण्डलं द्वादशराजशाले देशे च बिम्बे च कदम्बके च' इति विश्वः। अशेषैः समस्तैः। अवाप्तं प्राप्तम्। पयस्विनीतीरे एव स्थलान्तरे यस्मिन् देवालये वेदशास्त्राभिज्ञाः केरलदेशस्थाः ब्राह्मणाः विद्यापरीक्षां दत्वा विद्याधिक्यानुसारेण द्रव्यं प्राप्तुं समवेताः बभूवुः तं देवालयं मध्वाचार्यः ययौ इति भावः॥ ११॥

तर्कतन्त्रकुशलानपि पुंसश्चर्करीति बत सोऽयममानान्।
मानमानमयतीह कथं नो नैष मण्डलभुवां समितानाम्॥ १२॥

पदार्थदीपिकोद्बोधिका – तर्केति॥ सोऽयं श्रीमध्वाचार्यः तर्कस्तर्कशास्त्रं, तन्त्रं भाट्टशास्त्रं तयोः कुशलांश्चतुरानपि पुंसः पुरुषान्। न विद्यते मानोऽहङ्कारो येषां तान्। खण्डितपाण्डित्याभिमानानित्यर्थः। चर्करीत्यतिशयेन करोति। कृञो यङ्लुङन्ताल्लट्। बत खेदे। एष श्रीमध्वाचार्य इह समितानां मिलितानां मण्डले केरलदेशे भवन्ति इति मण्डलभुवस्तेषां नोऽस्माकं मानमभिमानं कथं नानमयति? कथं न निराकुर्यात्? इति मन्त्रयन्तस्ते द्विजवर्यास्तं श्रीमध्वाचार्यमुपेत्यापृच्छन्नित्युत्तरश्लोकेनान्वयः॥ १२॥

मन्दोपकारिणी – तर्केति॥ सः जगति प्रसिद्धः अयं मध्वाचार्यः। तर्कतन्त्रकुशलान् तर्कः तर्कशास्त्रं च तन्त्रं ब्रह्ममीमांसाशास्त्रं च तर्कतन्त्रयोः कुशलान् शिक्षितान् वैशेषिकादीन् भाट्टांश्च पुंसः पुरुषान्। अमानान् न विद्यते मानः अहङ्कारः येषां ते अमानाः तानहङ्काररहितान् खण्डिताहङ्कारानिति यावत्। 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः' इत्यमरः। चर्करीति भृशं करोति। बत खेदे विस्मये वा। 'खेदानुकम्पा सन्तोष-विस्मयामन्त्रणे बत' इत्यमरः। 'डु कृञ् करण इत्यतो यङ्लुङंतात् लट् परस्मैपदम्'। एषः मध्वाचार्यः इह अस्मिन् देवालये समितानां मिलितानां मण्डलभुवां मण्डले केरलदेशे भुवां उत्पन्नानाम् नः अस्माकं मानं अभिमानं कथं न आनमयति न खण्डयेत्। 'णमु प्रह्वत्वे शब्दे च इत्यतो लट् परस्मैपदम्'॥ १२॥

मन्त्रयन्त इति ते द्विजवर्या अन्यदेशजमुखास्तमपृच्छन्।
सद्ददददसुशंसननिन्दाकारिसूक्तगतमर्थमुपेत्य॥ १३॥

भावप्रकाशिका – 'न वा उ देवा' इति सूक्तम्। 'दद दान' इति ददो दाता। 'उतापृणन्मर्डितारं न विन्दत' इति अददनिन्दा। अपृणत् अददत् पुमान् पालकं न विन्दते। 'स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' इति दातृप्रशंसनम्। भुंक्त इति भोजः। स एव भोज इह परत्र च यो गृहवे ग्रहणयोग्याय ददाति॥ १३॥

पदार्थदीपिकोद्बोधिका – मन्त्रयन्त इति॥ इति पूर्वोक्तरीत्या मन्त्रयन्तो विचारयन्तस्ते द्विजवर्या। अन्यस्मिन्देशे जातः अन्यदेशजः सो मुखं प्रधानो येषां ते तथोक्ताः सन्तः। अस्माभिरेव प्रश्नादिके कृते सति यद्यस्माकं पराजयः स्यात्तदा केरलमण्डलस्थत्रिषष्टिग्रामजनानामस्मिन् देवस्थाने मिलितत्वात् केरलमण्डलस्यैव पराजयः स्यादिति मत्वा देशान्तरादागतब्राह्मणपुरस्सराः सन्त इति भावः। तं श्रीमध्वाचार्यमुपेत्य। सद्भ्यो ददातीति सद्दः। दद दान इति धातोः। स च, न ददातीत्यददः, स च सद्ददाददौ, सुष्ठु शंसनं स्तुतिः, तच्च निन्दा च सुशंसननिन्दे, सद्ददाददयोः सुशंसननिन्दे सद्ददाददसुशंसननिन्दे, ते करोतीति तादृशं यत्सूक्तं तत्र गतः प्रतिपाद्यः तं अर्थमपृच्छन् विचारितवन्तः। तत्सूक्तञ्च 'न वा उ देवाः क्षुधमिद्धधन्ददुरुताशितमुपगच्छन्ति मृत्यवे' इत्यादिकम्। तत्र 'उतापृणन्मर्डितारं न विन्दते' इत्यदातुर्निन्दनं प्रतिपाद्यते। तथा हि अपृणत् अदाता पुरुषः मर्डितारं पालकं भगवन्तं न विन्दते न लभते, इति। 'स इत् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' इति प्रदातुः प्रशंसनं प्रतिपाद्यते। अस्यार्थः — गृहवे गृहमागताय अन्नकामाय चरते तत्र तत्र पर्यटते, कृशाय दरिद्राय यो ददात्यन्नादिकमिति शेषः। स इत् स एव, भोजः शुभभोक्ता। इहामुत्र चेति शेषः। एतत्सूक्तप्रतिपाद्यमर्थमपृच्छन्निति भावः॥ १३॥

मन्दोपकारिणी – मन्त्रयन्त इति॥ इति पूर्वोक्तप्रकारेण मन्त्रयन्तः ते देवालये समवेताः द्विजवर्याः ब्राह्मणोत्तमाः तं मध्वाचार्यं उपेत्य समीपं प्राप्य अर्थं अपृच्छन् पृष्टवन्तः। 'प्रच्छ ज्ञीप्सायां' इत्यतो लङ् परस्मैपदं 'अपृच्छत् अपृच्छताम् अपृच्छन्'। कथंभूतं अर्थं, सद्ददाददसुशंसननिन्दाकारिसूक्तगतं, ददातीति ददः दाता पुरुषः डु दाञ् दाने इति धातोः न ददातीति अददः अदात् इत्यर्थः। ददश्च अददश्च ददाददौ सज्जनेभ्यः ददाददौ सद्ददाददौ सुशंसनं सम्यक् स्तुतिश्च निन्दा कुत्सा च सुशंसननिन्दे। 'कुत्सा निन्दा

च गर्हणे' इत्यमरः। सद्दाददयोः सुसंशननिन्दे करोतीति सद्दाददसुशंसननिन्दाकारि तच्च तत् सूक्तं च तस्मिन् गतं विद्यमानं सत्पात्रे दातुः स्तुतिः अदातुः निन्दा च एतदर्थप्रतिपादकसूक्तार्थं इत्यर्थः। तच्च सूक्तं 'न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुपगच्छन्ति मृत्यवे' इत्यादि। कथंभूतास्सन्तः अन्यदेशजमुखास्सन्तः अन्यः केरलदेशात् अपरः अन्यश्चासौ देशश्च अन्यदेशः अन्यदेशे जायत इति अन्यदेशजः स एव मुखं प्रधानं येषां ते तथोक्तास्सन्तः। अस्माभिरेव प्रश्नादिके कृते सति यदि अस्माकं मध्ये एकस्य पराजयः स्यात् तर्हि केरलदेशस्थानां सर्वेषामपि पराजयः स्यात्। सर्वेषां तत्र मिलितत्वात् इति मत्वा देशान्तरादागतं कञ्चन पण्डितं पुरस्कृत्य तन्मुखेन अपृच्छन् इति भावः। इति श्लोकद्वयस्य एकान्वयः ॥ १३ ॥

तं स्फुटं प्रकटयन् स पृणीयाच्छब्दमूलमवदत् पृणधातुम्।
तं जिगीषुमथ विप्रमदः प्रीङ्धातुमेष निगदन्तमुवाच ॥ १४ ॥

भावप्रकाशिका – 'पृणीयादिन्नाधमानाये'ति पृणीयाच्छब्दस्य 'पृण दान' इति परिपठितं पृणधातुमवदत्। नाथमानाय याचमानाय। 'प्रीङ् प्रीणन' इति धातुं परोऽवदत् ॥ १४ ॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ तं प्रस्तुतसूक्तार्थं स्फुटं व्यक्तं यथा भवति तथा प्रकथयन् स श्रीमध्वाचार्यः। पृणीयादिति शब्दस्य मूलं प्रकृतिं, पृण इति धातुः पृणधातुस्तं 'पृण दान' इति धातुमित्यर्थः। अवदत् पृणीयादिति शब्दः पृण दान इति धातुमूलक इत्यवददिति भावः। अथ, एवं कथनानन्तरमेव श्रीमध्वाचार्यो जिगीषुमात्मानं जेतुमिच्छन्तं, अदः पृणीयाच्छब्दमूलं प्रीङ्धातुं, 'प्रीङ् प्रीणन' इति धातुं निगदन्तं वदन्तं तं स्वप्रत्यर्थिभूतं विप्रमुवाच ॥ १४ ॥

मन्दोपकारिणी – तमिति ॥ तं प्रस्तुतसूक्तार्थं स्फुटं स्पष्टं प्रकटयन् कथयन् सः मध्वाचार्यः पृणीयाच्छब्दमूलं प्रस्तुतसूक्तगतं 'पृणीयादिन्नाधमानाय' इत्यत्र विद्यमानस्य पृणीयाच्छब्दस्य मूलं प्रकृतिं पूर्वं विद्यमानं शब्दस्वरूपं इत्यर्थः। पृणधातुं पृण दान इति व्याख्यातं पृणनामकधातुं अवदत् ''पृणीयादित्ययं शब्दः पृण दाने इति दानार्थकपृणधातोरुत्पन्नः'' इत्यब्रवीत् इति भावः। अथ एवं कथनानन्तरम्। अदः तत्

पृणीयाच्छब्दमूलं प्रीङ् धातुं प्रीङ् प्रीणन इति धातुं निगदन्तं वदन्तं जिगीषुं आत्मानं जेतुमिच्छन्तं स्वप्रतिपक्षभूतं इत्यर्थः। विप्रं ब्राह्मणं प्रति। एषः मध्वाचार्यः। उवाच ''न वा उ देवा'' इति सूक्तार्थकथनसमये तत्सूक्तगतपृणीयादित्येतत् पृण दाने इत्येतद्दानार्थक-पृणधातोः रूपमित्युक्ते पृणीयादित्येतत् प्रीङ् प्रीणन इति प्रीधातोः रूपं इत्युक्तवन्तं प्रतिवादिनं विप्रं प्रति उवाच मध्वः इति भावः॥ १४॥

प्रादिभेदमविदन् गुणय त्वं मूढ पांसुषु लिखन् लिपिसङ्घम्।
भर्त्सयन्निति जहास सुहासो मत्सराकुलधियो जडयन् सः॥ १५॥

भावप्रकाशिका – जडयन्। 'प्रहसति पश्यति तिर्यक् समधिकरक्तेन लोचनेन रुषा। करकिसलयेन चोरुं प्रहरति च तदा सभा चकम्पे च॥ १५॥

पदार्थदीपिकोद्बोधिका – प्रादीति॥ – प्रादिभेदं प्र आदिर्येषां तेषां भेदं 'प्र, प्रि, प्रु, पृ' इत्यादिवर्णभेदमित्यर्थः अविदन्नजानन्नत एव मूढ! पृणीत्यादित्यत्र प्रीङ् प्रीणन इति धातुरिति वदतस्तवाक्षरगुणभेदज्ञानमपि नास्तीत्यभिप्रायेण मूढेत्युक्तम्। त्वं पांसुषु लिपिसङ्घं लिपिसमूहं लिखन् सन् गुणय इत्येवमुक्त्वा भर्त्सयन् धिक्कुर्वन् शोभनो हासो यस्य सुहासः स श्रीमध्वाचार्यः। मत्सरेणाकुला ग्रस्ता धीर्येषां तान् केरलमण्डलजातान् विदुषो जडयन् जडीकुर्वन् सञ्जहास। अपहासं चक्रे॥ १५॥

मन्दोपकारिणी – प्रादीति॥ हे मूढ अज्ञ! ' अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः। पृणीयादित्यत्र प्रीङ् प्रीणन इति वदन् अत एव प्रादिभेदं पृ इति वर्णः आदिः ययोः पृप्रीवर्णयोः तौ प्रादी पृप्रीवर्णौ इत्यर्थः तयोः पृप्रीवर्णयोः भेदं ''अयं पृ वर्णः अयं प्री वर्णः'' इति वैलक्षण्यं अविदन् अजानन् त्वं पांसुषु धूलिषु 'रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयोरजः' इत्यमरः लिपिसङ्घं लिपीनां अक्षराणां सङ्घं समूहं लिखन् गुणय आवर्तय ''भूम्यां धूलिं प्रसार्य अङ्गुलिना रेखाविशेषौ कृत्वा अयं रेखाविशेषः पृ वर्णः अयं रेखाविशेषः प्री वर्णः इति सङ्केतं कृत्वा पुनः पुनः अभ्यासं कुरु'' इति भावः। इति इत्थं उक्त्वा। भर्त्सयन् धिक्कुर्वन् सन्। सुहासः सु शोभनः हासः मन्दहासः यस्य स तथोक्तः सः मध्वाचार्यः जहास हासं कृतवान्। 'हसे हसन इति धातोर्लिट् परस्मैपदं जहास जहसतुः

जहसुः'। किं कुर्वन् मत्सराकुलधियः मत्सरेण आकुला ग्रस्ता धीः बुद्धिः येषां ते तथोक्ताः तान् केरलदेशजान् विप्रान् जडयन् जडीकुर्वन् प्रत्युत्तरस्फूर्तिरहितान् कुर्वन्निति यावत्॥ १५॥

तत्प्रसङ्गबलतोऽखिलविद्यापाटवं पुथुहृदः प्रतिबुध्य।
आनमन्सबहुमानममी तं यं नमन्ति किल नाकिनिकायाः॥ १६॥

पदार्थदीपिकोद्बोधिका – तदिति॥ अमी द्विजास्तत्प्रसङ्गस्य तत्सूक्तप्रसक्तेर्बलतः सामर्थ्यात् तत्सूक्तार्थकथनप्रसङ्गबलादित्यर्थः। पृथु पूर्णं हृद्यस्य तस्य श्रीपूर्णप्रज्ञस्य अखिलासु विद्यासु पाटवं चातुर्यं प्रतिबुध्य ज्ञात्वा। नाकः स्वर्गो येषामस्तीति नाकिनो देवाः, तेषां निकायाः समूहा यं नमन्ति तं श्रीमध्वाचार्यं बहुमानेनादरेण सहितं यथा भवति तथा सबहुमानमानमन् किल॥ १६॥

मन्दोपकारिणी – तदिति॥ अमी द्विजाः। तत्प्रसङ्गबलतः तस्य सूक्तार्थकथनस्य प्रसङ्गः प्रसक्तिः सैव बलं तस्मात् सूक्तार्थकथनव्याजेनेत्यर्थः। पृथुहृदः पृथु पूर्णं हृत् मनः यस्य स तथोक्तः तस्य श्रीमध्वाचार्यस्य। अखिलविद्यापाटवं अखिलाश्च ताः विद्याश्च अखिलविद्याः तासु पाटवं पटोर्भावः पाटवं दक्षत्वं प्रतिबुद्धय ज्ञात्वा सबहुमानं बहुमानेन आदरेण सहितं यथा भवति तथा आदरेणेति यावत् तं मध्वाचार्यं आनमन् नमश्चक्रुः। इदमाश्चर्यं न भवतीत्याह यमिति। नाकिनिकायाः नाकः स्वर्गः एषां अस्तीति नाकिनः देवाः। 'स्वरव्ययं स्वर्गनाकः' इत्यमरः। तेषां निकायाः राशयः। 'स्यान्निकायः पुञ्जराशौ' इत्यमरः। यं मध्वाचार्यं नमन्ति किल नमस्कुर्वन्ति। किल इति प्रसिद्धौ। सर्वज्ञकल्परुद्रादि-वन्दितस्य मध्वाचार्यस्य पाण्डित्यं अन्यमनुष्यवन्द्यं किं अपूर्वमिति भावः॥ १६॥

कन्यकादतसुरेन्द्रवपुःश्रीदानवाचिवरसूक्तहृदुक्तौ।
कुत्रचित्सदसि तावदपाला कीर्तिताऽतितरुणीत्ययमूचे ॥ १७॥

भावप्रकाशिका – 'कान्या३ वारवायती सोममपि स्रुताविदत्। अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा' (ऋ. ८.९१.१) इत्यादिसूक्तम्। पुरातनी कन्येति कम्पार्थः। सोमं अवारयती जनयन्ती स्रुताऽपि प्राप्ता चालभत। गृहं

प्रत्यावहन्तीत्यब्रवीत् इन्द्रायेत्यादि। असौ 'असौ य एषि वीरको गृहं गृहं विचाकशत् (ऋ.८.९१.२) इत्यादि चादरेण। अपाला 'अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचमि'ति (ऋ.८.९१.७) वपुः श्रीदानम्। स्वपाणिभ्यां त्रिरभिमृज्य संशोध्येति अपाला नवयौवनेति चोचे॥ १७॥

पदार्थदीपिकोद्बोधिका – कन्यकेति॥ – अयं श्रीमध्वाचार्यः कुत्रचित्सदसि कस्याश्चित्सभायां, कन्यकया आदृतः सत्कृतः कन्यकादृतः, स चासौ सुरेन्द्रश्च कन्यकादृत-सुरेन्द्रः। वपुषः कन्यावपुषः, श्रीदानं कान्तिदानं वपुःश्रीदानं, कन्यकादृतसुरेन्द्रेण वपुःश्रीदानं, तद्वक्तीति तादृशं, यद्वरसूक्तमुत्तमसूक्तं तस्य हृदभिप्रायस्तस्योक्तिः कथनं, तस्यां प्रस्तुतायां सत्यां, तत्र सूक्ते, अपालेति कीर्तितोक्ता अपालाशब्दवाच्येत्यर्थः अतितरुणी नवयौवनेत्यूचे। तत्सूक्तश्च 'कन्या ईं वारवायती सोममपि स्रुताविदत्। अस्तम्भरंत्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा' इत्यादिकं, तदर्थश्च पुरातनी कन्येति कम्पार्थः। सोममावरयती जनयन्ती कन्या, स्रुतापि प्राप्तापि सोमलतामाहर्तुं गताविद-दलभत। अस्तं गृहं प्रति भरन्ती वहन्त्यब्रवीत्, अवदत्। हे सोम! त्वमिन्द्राय सुनवै, शक्राय सुनवै, अवहन्यामिति। तात्पर्यद्योतिका द्विरुक्तिः। 'असौ य एषि वीरक' 'अपालामिन्द्र त्रिष्पूत्व्यक्रणोत्सूर्यत्वचं' इत्यादिनाऽदरेण प्रीत इन्द्रस्त्रिवारं पूत्वी पूतां कृत्वा स्वपाणिभ्यां परिमृज्य संशोध्यापालां नवयौवनां सूर्यत्वचं सूर्यवत्प्रकाशमानत्वचमकृणोच्च-कारेति। अत्रापालाशब्देनातितरुणी कथ्यत इत्ययमूच इत्यर्थः॥ १७॥

मन्दोपकारिणी – कन्यकेति॥ अयं श्रीमध्वाचार्यः। कुत्रचित् कस्मिंश्चित् सदसि सभायां कन्यकादृतसुरेन्द्रवपुःश्रीदानवाचिवरसूक्तहृदुक्तौ कन्यकया कयाचित् कन्यकया आदृतः आदरेण प्रीतः कन्यकादृतश्चासौ सुरेन्द्रः देवेन्द्रश्च कन्यकादृतसुरेन्द्रः। वपुषः कन्याशरीरस्य श्रियः कान्तेः दानं श्रीदानं कन्यकादृतसुरेन्द्रेण वपुःश्रीदानं कन्यकादृत-सुरेन्द्रवपुःश्रीदानं तत् वक्तीति श्रीदानावाचि। वरं उत्तमं च तत् सूक्तं च वरसूक्तम्। श्रीदानवाचि तत् च वरसूक्तं च श्रीदानवाचिवरसूक्तं तस्य सूक्तस्य हृदः अभिप्रायस्य उक्तौ कथने प्रस्तुतायां सत्याम्। तावत् तदा तत्र सूक्ते कीर्तिता उदिता अपाला अपालाशब्दवाच्या स्त्री अतितरुणी नूतनयौवना इति यावत् इति एवं ऊचे व्याचख्यौ।

'वच परिभाषण इत्यतो लिट् आत्मनेपदं ऊचे ऊचाते ऊचिरे'। तच्च सूक्तं 'कन्यावारवायतीत्यादि'। अत्र देवेन्द्रः कस्याश्चित् कन्यकायाः प्रीतस्सन् कन्यकाशरीरस्य सूर्यसदृशकान्तिं दत्तवान् इति उच्यते। एतत्सूक्तार्थकथनसमये अस्मिन्नेव सूक्ते 'अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचं' इत्यर्धर्चि विद्यमानापालाशब्दस्य अतितरुणीति अर्थं उक्तवानिति भावः॥ १७॥

श्वित्रिणी भवति तत्पदवाच्येत्याग्रहेण वदतो विदुषोऽत्र।
कश्चिदेष्यति विपश्चिदिहैनं पृच्छतेत्ययमगच्छदथोक्त्वा ॥ १८॥

पदार्थदीपिकोद्बोधिका – श्वित्रिणीति॥ अथायं श्रीमध्वाचार्यः। तच्च तत्पदञ्चापालापदं, तेन वाच्या श्वित्रिणी कुष्ठवती भवतीत्याग्रहेण प्रमाणं विना दुराग्रहेण वदतो ब्रुवाणानविदुषोऽबुधान् प्रति, इह कश्चित् विपश्चित् विद्वानेष्यत्यागमिष्यति। इण् गतौ लृट्। एनं विपश्चितं प्रति अत्रापालापदार्थविषये यूयं पृच्छत। पृच्छ ज्ञीप्सायां लोट्। इत्युक्त्वाऽगच्छत्। ततो ययौ॥ १८॥

मन्दोपकारिणी – श्वित्रिणीति॥ अथ मध्वोक्त्यनन्तरम्। तत्पदवाच्या तच्च तत् पदं च तत्पदं तेन अपालाशब्देन वाच्या स्त्री श्वित्रिणी श्वित्रं कुष्ठं अस्याः अस्तीति श्वित्रिणी कुष्ठवती भवति। 'कोठो मण्डलकं कुष्ठश्वित्रे' इत्यमरः। इति इत्थं आग्रहेण अयमेवार्थ इति हठेन प्रमाणं विनेति यावत् वदतः ब्रुवाणान्। अत्र अपालाशब्दार्थविषये अविदुषः अबुधान् ब्राह्मणान्। इह भवतां समीपे। कश्चित् विपश्चित् विद्वान् पुरुषः 'विद्वान्विपश्चिद्दोषज्ञः' इत्यमरः, एष्यति आगमिष्यति। 'आङ्पूर्वात् इण् गतावित्यस्मात् लृट् परस्मैपदम्'। एनं विपश्चितं यूयं पृच्छत अपालाशब्दार्थविषये प्रश्नं कुरुत इत्यर्थः। 'प्रच्छ ज्ञीप्सायामित्यतो लोट् परस्मैपदम्'। इत्युक्त्वा इत्याभिधाय। अयं श्रीमध्वाचार्यः देशान्तरं प्रति अगच्छत् अगमत्। 'गम्लृ गताविवत्यतो लङ् परस्मैपदम्'॥ १८॥

देशमेनमचिरादुपयातस्तादृशाकृतिरहो कृतबुद्धिः।
तांस्तथाऽभ्यधित तत्पदभावं सूरिमौलिमणिनाऽत्र यथोचे॥ १९॥

पदार्थदीपिकोद्बोधिका – देशमिति ॥ एनं विद्वद्भिरवस्थितं देशमचिराच्छीघ्रमुपयात आगतः, तादृशा श्रीमध्वोक्तलक्षणाऽऽकृतिराकारो यस्य सः। कृता शिक्षिता बुद्धिर्यस्य स विद्वानित्यर्थः। तान् अपालापदार्थे विप्रतिपन्नान् द्विजान्प्रति तत्पदभावमपालापदार्थं 'भावो लीला क्रिया चेष्टा भूत्यभिप्रायजन्तुषु। पदार्थमात्रे सत्तायां' इति वैजयन्ती। सूरीणां विदुषां मौलिमणिना चूडामणिनाऽत्र यथोचे प्रोक्तं, तथाऽभ्यधित उवाच। अहो! चित्रमेतत्। धात्वो लुङ् ॥ १९ ॥

मन्दोपकारिणी – देशमिति ॥ एनं देशं मध्वाचार्यत्यक्तदेशं प्रति। अचिरात् अल्पकालेनैव उपयातः आगतः। तादृशाकृतिः तादृशा मध्वाचार्योक्तलक्षणयुक्ता आकृतिः देहः यस्य स तथोक्तः। कृतबुद्धिः कृता पर्याप्ता बुद्धिः यस्य स तथोक्तः 'युगपर्याप्तयोः कृतं' इत्यमरः विद्वानिति यावत् ब्राह्मणः। तान् अपालापदार्थे विप्रतिपन्नान् द्विजान् प्रति तत्पदभावं तच्च तत् पदं च तत्पदं तत्पदस्य अपालापदस्य भावं अभिप्रेतार्थम् तथा तद्वत् अभ्यधित अवोचत अहो आश्चर्यम्। कथं, सूरिमौलिमणिना सूरीणां विदुषां 'धीमान् सूरिः कृती कृष्टिः' इत्यमरः मौलिमणिना शिरोरत्नस्थानीयेन पण्डितश्रेष्ठेन मध्वाचार्येण इत्यर्थः अपालाशब्दविषये यथा येन प्रकारेण ऊचे उक्तं तथेत्यर्थः 'वच परिभाषणे इत्यतो भावे लिडात्मनेपदं' अत्र प्रथमपुरुषैकवचनमेव, भावस्य एकत्वादिति ज्ञेयम् ॥ १९ ॥

केवलं न सकलाः श्रुतिविद्या मानपूर्वकसमस्तगिरोऽस्य।
अप्यनागतगतप्रतिपत्तिं श्रद्दधुः पृथुलचेतस एते ॥ २० ॥

पदार्थदीपिकोद्बोधिका – केवलमिति ॥ एते द्विजा मानं प्रमाणं पूर्वं यासां ता मानपूर्वकास्तादृशाः समस्तगिरः समस्तवचांसि यस्य तस्य। अस्य पृथुलं महच्चेतो यस्य तस्य श्रीपूर्णप्रज्ञाचार्यस्येत्यर्थः। केवलं सकलाः श्रुतिविद्या वेदविद्या न श्रद्दधुः। अयं केवलं सकलवेदविद्याचतुर इत्येव न श्रद्दधुः अपि तु, आगतं प्राप्तं न भवतीत्यनागतमेष्यत्, गतमतीतं, तयोः प्रतिपत्तिं ज्ञानमपि श्रद्दधुः विशश्वसुः ॥ २० ॥

मन्दोपकारिणी – केवलमिति ॥ एते द्विजाः। मानपूर्वकसमस्तगिरः मानं प्रमाणं पूर्वकं मूलं यासां ताः मानपूर्वकाः समस्ताः गिरः वाचः यस्य स तथोक्तः तस्य।

प्रमाणोदाहरणपूर्वकं सर्ववक्तुरिति भावः। पृथुलचेतसः पृथुलं विशालं चेतः हृदयं यस्य सः पृथुलचेताः तस्य। 'विशालं पृथुलं महत्' इत्यमरः। अस्य मध्वाचार्यस्य सकलाः कलाभिः विद्याभिः सहिताः श्रुतिविद्याः वेदविद्याः केवलं वेदविद्या एव इत्यर्थः। न श्रद्दधुः न विश्वासं प्रापुः। अयं मध्वः सकलवेदविद्याप्रवीणः इत्येवं न निश्चयं चक्रुः किन्तु अनागतगतप्रतिपत्तिमपि अनागतं भविष्यं गतं अतीतं तयोः प्रतिपत्तिं ज्ञानमपि श्रद्दधुः। न केवलं सर्वविद्याप्रवीणः अपि तु अतीतानागतज्ञानी अपि इति निश्चितवन्त इति भावः 'श्रत् पूर्वकात् डुधाञ् धारणपोषणयोः इत्यतो लिट् परस्मैपदम्' ॥ २० ॥

यद्यदेव सपदि प्रकृतं स्यात् तत्तदेष यदवेदखिलश्च।
सर्वदा सदसि सर्वबुधानां सर्वविद्यतिरिति प्रथितोऽभूत् ॥ २१ ॥

पदार्थदीपिकोद्बोधिका – यदिति ॥ यद्यस्मात्सपदि तत्तत्काले सर्वे ये बुधा ज्ञानिनस्तेषां सदसि सर्वदा यद्यत्प्रकृतं प्रस्तुतं स्यात् यत्र यत्र सदसि यच्छ्रुतिपुराणादिकं प्रस्तुतं भवेत् तत्तदखिलश्चैष श्रीमध्वाचार्योऽवेत् ज्ञातवान्। वा गतिगन्धनयोर्लङ्। तस्मात् सर्वं वेत्तीति सर्ववित्, स चासौ यतिश्च सर्वविद्यतिरिति प्रथितः प्रसिद्धोऽभूत् ॥ २१ ॥

मन्दोपकारिणी – यद्यदिति ॥ सर्वदा सर्वकाले। सदसि सर्वसभायामिति यावत्। सपदि तत्क्षणे 'सद्यः सपदि तत्क्षणः' इत्यमरः। यद्यदेव यद्यत् श्रुतिपुराणादिकं प्रकृतं प्रसक्तं स्यात् तत्तदखिलश्च समस्तमपि एषः मध्वाचार्यः यत् यस्मात् अवेत् ज्ञातवान् 'विद ज्ञान इत्यस्मात् लङ् परस्मैपदं अवेत् अवित्ताम् अविदुः' तस्मात् अयं मध्वः सर्वबुधानां सर्वेषां पण्डितानां सदसि सभायां सर्ववित् सर्वं वेत्तीति सर्ववित् सर्वज्ञः यतिः सन्यासीति प्रथितः प्रख्यातः अभूत् ॥ २१ ॥

अप्रयातमपि देशमशेषं व्यानशे सुजनकैरवबन्धुः।
पूर्णदृक् प्रततया निजकीर्त्या पूर्णचन्द्र इव चन्द्रिकयालम् ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – अप्रयातमिति ॥ सुजना एव कैरवाणि कुमुदानि तेषां बन्धुः। पूर्णा दृक् ज्ञानं यस्य स श्रीमध्वाचार्यः। प्रततया व्याप्तया निजकीर्त्याऽऽत्मीयकीर्त्या, अप्रयातमपि स्वेनाप्रविष्टमप्यशेषं देशं कैरवबन्धुः पूर्णचन्द्रश्चन्द्रिकयेवालं सम्यग्व्यानशे व्याप्नोति स्म ॥ २२ ॥

मन्दोपकारिणी – अप्रयातमिति ॥ सुजनकैरवबन्धुः सुजना एव कैरवाणि कुमुदानि सुजनकैरवाणि 'सिते कुमुदकैरवे' इत्यमरः तेषां बन्धुः हर्षकः। पूर्णदृक् पूर्णा दृक् ज्ञानं यस्य स तथोक्तः श्रीमध्वाचार्यः। 'दृग्ज्ञाने ज्ञातरि' इत्यमरः। प्रततया प्रकर्षेण व्याप्तया निजकीर्त्या निजा च सा कीर्तिश्च निजकीर्तिः तया। अप्रयातमपि स्वेन अगतमपि अशेषं समस्तं देशं अलं अतिशयेन व्यानशे व्याप्तवान्। 'विपूर्वात् अश व्याप्तौ सङ्घाते च इत्यतो लिडात्मनेपदं आनशे आनशाते आनशिरे'। कः कया इव य पूर्णचन्द्रः पूर्णः षोडशकलापरिपूर्णः चन्द्रः चन्द्रिकयेव ज्योत्स्नयेव मध्वाचार्यकीर्तिः सर्वदिक्षु प्रससार इति भावः ॥ २२ ॥

सुन्दरेषु सुरमन्दिरवृन्देष्विन्दिरारमणवन्दनकृत्यम्।
आचरन्न सुचिरात्सुविचारो रौप्यपीठपतिमाप मुकुन्दम् ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – सुन्दरेष्विति ॥ – सुन्दरेषु शोभनेषु सुराणां यानि मन्दिराणि तेषां वृन्देषु समूहेष्विन्दिरारमणस्य श्रीहरेर्यद्वन्दनं तदेव कृत्यं कार्यमाचरन्, शैवादिनानामरालयेष्वपि केवलमिन्दिरापतिवन्दनाख्यं स्वकर्तव्यमाचरन्नित्यर्थः। शोभनो विचारस्तत्त्वविमर्शो यस्य स सुविचारः श्रीमध्वाचार्यः। न सुचिरात् नातिचिरेण। न समासोऽयम्। रूप्यपीठपतिं मुकुन्दमाप ॥ २३ ॥

मन्दोपकारिणी – सुन्दरेष्विति ॥ सुविचारः शोभनविचारः आश्रमोचितसदाचारः यस्य स तथोक्तः श्रीमध्वाचार्यः। सुन्दरेषु मनोहरेषु। सुरमन्दिरवृन्देषु सुराणां मन्दिराणां आलयानां देवालयानां इत्यर्थः वृन्देषु समूहेषु। इन्दिरारमणवन्दनकृत्यं इन्दिरायाः लक्ष्म्याः रमणस्य पत्युः वन्दनाख्यं कृत्यं कर्तव्यं आचरन् कुर्वन् सन् शैवादिनानादेवालयेषु विद्यमानशिवादिप्रतिमासु केवलं अन्तर्यामिश्रीनारायणवन्दनमेव कुर्वन्निति भावः। असुचिरात् अतिशीघ्रं रौप्यपीठपतिं रजतपीठपुरवासिनं मुकुन्दं अनन्तेश्वरं आप प्राप्तवान्। पूर्वोक्तप्रकारेण दक्षिणदिशस्थसर्वतीर्थक्षेत्रयात्रां कृत्वा पुनः रजतपीठपुरं प्राप इति भावः ॥ २३ ॥

भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं रुचिराङ्गीम् ।
सूत्रदीप्तमणिमालिकयाऽलं भूषितां भुवनभूषणभूताम् ॥ २४ ॥

भावप्रकाशिका – भूसुरप्रवराः श्रुतिद्रष्टारो मुनयो याजोपयाजकौ च। अङ्गानि शिक्षादिनि करचरणादिनि च। सूत्राण्येव दीप्तमणयः सूत्रे गुणे दीप्तमणयः ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – भूसुरेति ॥ – करुणयाऽब्धिरिव करुणाब्धिः। पुष्टा पूर्णा बुद्धिर्यस्य स पूर्णप्रज्ञ इत्यर्थः। स स्वयं श्रुतिततिं वेदसमूहम्। वेदेर्जाता वेदिजा द्रौपदी तामिव दृष्ट्वा दुष्टानां मायिप्रभृतिवादिनां पक्षाणां सिद्धान्तानां दमने निराकरणे स्थिरां सन्धां प्रतिज्ञां 'सन्धा सन्धौ प्रतिज्ञायां' इति वैजयन्ती पुरा भरताग्र्य इव भीम इवाकरोत्। यथा भीमः सर्ववेदाभिमानिनीं द्रौपदीं, केशाकर्षणादिना दुःशासनादिभिः क्लिष्टां दृष्ट्वा तद्धधे प्रतिज्ञामकरोत् तथा श्रीमध्वाचार्योऽप्यन्यवादिभिरन्यथाव्याख्यानादिना क्लिष्टां वेदततिं दृष्ट्वा परसिद्धान्तनिराकरणे प्रतिज्ञामकरोदिति भावः। अन्त्यकुलकमेतत्। तल्लक्षणं— 'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्। कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतं' इति कथंभूतां श्रुतिततिमित्यत आह- **भूसुरेति ॥** भूसुरेषु विप्रेषु प्रवराः श्रेष्ठा वसिष्ठवामदेवादि-श्रुतिद्रष्टारो मुनयस्तेषां या बुद्धिसमृद्धिस्तस्यां व्यक्तमभिव्यक्तं युक्तवपुरुचितस्वरूपं यस्यास्ताम्। द्रौपदीपक्षे तु, भूसुरप्रवरौ याजोपयाजाख्यौ द्रुपदपुरोहितौ तयोर्या बुद्धिसमृद्धिः बुद्ध्याधिक्यम्। द्रुपदपत्न्या प्राश्यहविषस्तदनागमननिमित्तेन वह्नौ होमसमये भगवदनु-सन्धानविशेषपूर्वकहोम इति यावत् तया व्यक्तं अभिव्यक्तं युक्तवपुः युक्तस्वरूपं यस्यास्तां, रुचिराणि मनोहरण्यङ्गानि शिक्षाद्यङ्गानि, हस्तपादादीनि च यस्यास्तां, सूत्राण्येव ब्रह्मसूत्राण्येव दीप्तमणयः। अर्थान्तरे, सूत्रेषु तन्तुषु दीप्तमणयः शोभमानमणयस्तेषां मालिकयाऽलं सम्यग्भूषितां, भुवनभूषणभूतां भुवनालङ्कारभूतां श्रुतिततिं वेदिजां दृष्ट्वा भीमसेन इव श्रीमध्वाचार्यो दुष्टपक्षदमनस्थिरसन्धामकरोदित्यन्वयः ॥ २४ ॥

मन्दोपकारिणी – भूसुरेति ॥ अन्त्यक्रियाकुलकमेतत्। एतदादिश्लोकानां वेदिजामित्यनेन श्लोकेन अन्वयः बोद्धव्यः। सोऽन्वयस्तु इत्थं करुणाब्धिः करुणया कारुण्येन अब्धिः समुद्रः। पुष्टबुद्धिः पुष्टा पूर्णा बुद्धिः अन्तःकरणं यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः। दुष्टपक्षदमनस्थिरसन्धां दुष्टानां मायिनां पक्षाः सिद्धान्ताः तेषां दमने

निराकरणे स्थिरा दृढा च सन्धा प्रतिज्ञा च तां अकरोत्। 'सन्धा प्रतिज्ञा मर्यादा' इत्यमरः। किं कृत्वा श्रुतिततिं श्रुतीनां वेदानां ततिं समूहं दृष्ट्वा, क इव, पुरा पूर्वजन्मनि वेदिजां वेद्यां जाता वेदिजा द्रौपदी तां दृष्ट्वा भरताग्र्यः भरतानां भरतकुलोत्पन्नानां राज्ञां अग्र्यः श्रेष्ठः स्वयं स्वस्वरूपः स इव भीमसेन इव। पूर्वं भीमः दुर्योधनादिभिः आकुलीकृतां द्रौपदीं दृष्ट्वा दुष्टपक्षदमनस्थिरसन्धां दुष्टानां दुर्योधनादीनां पक्षाणां सहायभूतानां राज्ञां दमने दहने स्थिरां दृढां सन्धां प्रतिज्ञां 'अहं दुर्योधनादीन् हनिष्ये' इति प्रतिज्ञां यथा चकार तथा अयं मध्वाचार्यः मायिभिः आकुलीकृतां श्रुतिततिं दृष्ट्वा 'मायिसिद्धान्तं निराकरिष्ये' इति दृढप्रतिज्ञां चकार इति भावः। इतः परं भूसुरेत्यादिविशेषणानि उभयत्र योज्यानि। कथंभूतां श्रुतिततिं, भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं भूसुराणां प्रवराः भूसुरप्रवराः तेषां वेदद्रष्टॄणां ऋषीणां बुद्धिसमृद्धौ बुद्धीनां अन्तःकरणानां समृद्धौ आधिक्ये सति पक्वेषु अन्तःकरणेषु इति यावत्। व्यक्तं अभिव्यक्तं युक्तं उचितं वपुः स्वरूपं यस्याः सा तां इत्यर्थः। पुनः कथंभूतां, रुचिराङ्गीं रुचिराणि मनोहराणि श्रुतिव्याख्यानोपयुक्तानीति यावत् अङ्गानि शिक्षाकल्पादिषडङ्गानि यस्याः सा रुचिराङ्गी ताम्। पुनः किंभूतां, सूत्रदीप्तमणिमालिकया अलं भूषितां दीप्ताः प्रकाशमानाश्च ते मणयः रत्नानि च दीप्तमणयः सूत्राण्येव ब्रह्मसूत्राण्येव दीप्तमाणयः तेषां मालिकया मालया समूहेन इत्यर्थः। अलं सम्यक् भूषितां व्याख्यायमानां भुवनभूषणभूतां भुवनानां वेदाधिकारिणां भूषणभूतां भूषणस्थानीयाम्। 'विप्राणां भूषणं विद्या' इत्युक्तेः। द्रोपदीपक्षे तु कथंभूतां वेदिजां भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं भूसुरप्रवरयोः ब्राह्मणश्रेष्ठयोः याजोपयाजनामकयोः बुद्धेः समृद्ध्या आधिक्येन पत्न्या प्राशनयोग्यहविषः अग्नौ होमेनेति भावः। व्यक्तं प्रादुर्भूतं युक्तं मनुष्ययोग्यं वपुः शरीरं यस्याः सा तथोक्ता ताम्। रुचिराङ्गीं रुचिराणि सुन्दराणि अङ्गानि हस्ताद्यवयवानि यस्याः सा तथोक्ता ताम्। 'सुन्दरं रुचिरं' इत्यमरः। 'अङ्गं प्रतीकोऽवयवः' इति च। सूत्रदीप्तमणिमालिकया सूत्रेषु तन्तुषु दीप्तानां प्रकाशमानानां नवरत्नानां मालिकया अलं सम्यक् भूषितां अलङ्कृतां भुवनभूषणभूतां भुवनस्य त्रिभुवनस्य भूषणभूतां अलङ्कारस्थानीयाम् ॥ २४ ॥

पादसुन्दरपदक्रमभावैर्भासितां प्रकटवर्णगुणाढ्याम्।
भारतोत्तमभृतामनुरूपाच्छादनां समधिकस्वरशोभाम् ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – पादेति – ॥ पादाः ऋचाश्चतुर्थांशाः, सुन्दरपदानि शोभनपदानि, क्रमाश्च, भावास्तदभिप्रायास्तैर्भासिताम् । अर्थान्तरे, पादाभ्यां सुन्दरं यथा भवति तथा पदक्रमो गमनं, भावा विलासाः तैर्भासितां शोभिताम् । प्रकटाः प्रसिद्धा ये वर्णगुणाः स्पृष्टतादयस्तैराढ्यां पूर्णाम् । अत्र वर्णगुणाश्च 'स्पृष्टत्वादयः । स्पृष्टत्वमीषस्पृष्टत्वं संवृतत्वं तथैव च विवृतत्वं च । वर्णानामन्तःकारणमुच्यत' इति वचनात् । इतरत्र, प्रकटाः प्रसिद्धाः, वर्णः कृष्णवर्णः गुणाः श्रीहरिभक्त्यादयस्तैराढ्यां, भारतश्च तदुत्तमश्च, उत्तमशास्त्रञ्चेति भारतोत्तमं भारताख्योत्तमशास्त्रमिति यावत्। तेन भृतां बृंहितां वर्णितार्थामिति यावत्। उपलक्षणमेतत् वेदव्याख्यानरूपैर्भारतपुराणैर्महार्थतया व्याख्यातामिति भावः। तदुक्तं– 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति' इति। इतरत्र, भारतोत्तमैर्भारतकुलोत्पन्नश्रेष्ठैः पाण्डवैर्भृतामूढां, अनुरूपमाच्छादनं शूद्रादिषु गूहनं यस्यास्तामनुरूपवसनाश्च । समधिका स्वरशोभा उदात्तादिस्वराणां शोभा, ध्वनिशोभा च यस्यास्तां दृष्ट्वेत्यादिपूर्ववत् ॥ २५ ॥

मन्दोपकारिणी – पादेति ॥ पुनः कथंभूतां श्रुतिततिम्। पादसुन्दरपदक्रमभावैः सुन्दराणि श्राव्याणि च तानि पदानि। पादाश्च सुन्दरपदानि च क्रमाश्च भावाः अभिप्रायाश्च पादसुन्दरपदक्रमभावाः तैः भासितां शोभमानाम् । प्रकटवर्णगुणाढ्यां वर्णानां अक्षराणां गुणाः स्पृष्टत्वादयः प्रकटाः स्पृष्टाश्च ते वर्णगुणाश्च तैः आढ्यां सम्पन्नां 'स्पृष्टत्वमीषस्पृष्टत्वं संवृतत्वं तथैव च। विवृतत्वं च वर्णानामंतःकारणमुच्यते' इति वचनात्। भारतोत्तमभृतां भारतं च उत्तमं सात्विकं पुराणं च ताभ्यां भृतां पोषितां व्याख्यातामिति यावत्। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति' इत्युक्तेः। अनुरूपाच्छादनां अनुरूपं उचितं आच्छादनं वेदानधिकारिशूद्रादिषु गूहनं यस्याः सा तथोक्ता ताम्। समधिकस्वरशोभां समधिका अतिशयेन उत्तमा स्वराणां उदात्तादिस्वराणां शोभा विकासो यस्याः सा तथोक्ता ताम् । द्रौपदीपक्षे तु पादसुन्दरपदक्रमभावैः पदयोः क्रमः न्यासः सुन्दरश्चासौ पदक्रमश्च सुन्दरपदक्रमः पादाभ्यां अङ्घ्रिभ्यां सुन्दरपदक्रमः पादसुन्दरपदक्रमः भावाः मनोहरगमनविलासाः पादसुन्दरपदक्रमाश्च भावाश्च पादसुन्दरपदक्रमभावाः तैः भासितां शोभिताम्। प्रकटवर्णगुणाढ्यां प्रकटेन वर्णेन कृष्णवर्णेन गुणैः विष्णुभक्त्यादिगुणैः आढ्यां संपन्नां 'वर्णो द्विजादौ शुक्लादौ यशोगुणकथासु च। अक्षरे

गणभेदे च स्वर्णं यज्ञे विलेपते' इति विश्वः। भारतोत्तमभृतां भारतानां भरतकुलोत्पन्नानां राज्ञां उत्तमैः श्रेष्ठैः पाण्डवैः धर्मादिभिः भृतां ऊढां पाणिगृहीतीम्। अनुरूपाच्छादनां अनुरूपं योग्यं आच्छादनं वस्त्रं यस्याः सा तथोक्ता ताम्। 'वस्त्रमाच्छादनं वासः' इत्यमरः। समधिकस्वरशोभां समधिकेन अत्युत्तमेन श्राव्येण स्वरेण ध्वनिना शोभा यस्या सा तथोक्ता ताम्॥ २५॥

राजसूयमुखसन्मखवृत्तां वासुदेवगुणनिष्ठितभावाम्।
सर्वधर्मपरिशिक्षणदक्षां वन्दितां जनतया जननीवत् ॥ २६॥

भावप्रकाशिका – राजसूयादिषु वृत्तां मन्त्रत्वेन यज्ञपत्नीत्वेन च॥ २६॥

पदार्थदीपिकोद्बोधिका – राजसूयेति॥ राजसूयस्तदाख्ययज्ञो मुखं प्रधानो येषां तादृशा ये सन्मखाः सद्यज्ञास्तेषु वृत्तां मन्त्रत्वेन प्रवृत्ताम्। वासुदेवस्य ये गुणाश्शुभधर्मास्तेषु निष्ठितः स्थिरो भावोऽभिप्रायो यस्यास्ताम्। 'अथ कस्मादुच्यते ब्रह्मेति 'बृहन्तो ह्यस्मिन् गुणा' इत्यादिना भगवतोऽनन्तगुणप्रतिपादनपरामिति भावः। इतरत्र, वासुदेवगुणेषु निष्ठितभावः स्थिरचित्तं यस्यास्ताम्। सर्वेषां धर्माणां परिशिक्षणे शिक्षायां दक्षां चतुराम्। 'प्रातरुत्थायाथ सन्ध्यामुपासीत नमेदेवाञ्जुहुयादग्निं वेदानावर्तयीत नान्यत्किञ्चिदाचरेन्न भृशं वदेत्' इत्यादिना सर्वधर्मपरिशिक्षणचतुरामित्यर्थः। जनानां समूहो जनता तया। जननी-वन्मातृवद्वन्दितां दृष्ट्वेत्यादि पूर्ववत्॥ २६॥

मन्दोपकारिणी – राजसूयेति। पुनः कीदृशाम्। राजसूयमुखसन्मखवृत्तां राजसूयः राजसूययज्ञः स एव मुखं आदिः येषां ते राजसूयमुखाः। सतां सज्जनानां मखाः यज्ञाः सन्मखाः 'यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः। राजसूयमुखाश्च ते सन्मखाश्च तेषु वृत्तां प्रवृत्तां वेदैः करणैः यज्ञस्य क्रियमाणत्वादिति भावः। वासुदेवगुण-निष्ठितभावां वासुदेवस्य नारायणस्य गुणे सर्वोत्कर्षे निष्ठितः नितरां स्थितः भावः अभिप्रायः यस्याः सा तां विष्णोरुत्कर्षप्रतिपादिकां इति यावत् 'सर्वोत्कर्षे देवदेवस्य विष्णोः महातात्पर्येणैव च अन्यत्र सत्यं अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थः ततोऽतः' इत्यादिश्रुतेः। सर्वधर्मपरिशिक्षणदक्षां सर्वे च ते धर्माश्च सर्वधर्माः सर्वधर्माणां

सन्ध्योपासनादिधर्माणां परिशिक्षणे ज्ञापनविषये दक्षां चतुराम्। 'प्रातरुत्थाय सन्ध्यामुपासीत नमेत् देवान् जुहुयादग्निं वेदानावर्तयेत् नान्यत्किञ्चिदाचरेत् न भृशं वदेत्' इत्यादिना प्रतिपादनादिति भावः। जनतया जनानां समूहः जनता तया जनतया जनसमूहेन जननीवत् वन्दिताम्। अन्यत्र उक्त एव अर्थः॥ २६॥

मौलिसंग्रहविकर्षणदूनां मायिना सदसि दुष्टजनेन।
न्यायमार्गमपहाय महान्तं स्वेश्वरत्वमपि साधयताऽलम्॥ २७॥

भावप्रकाशिका – मौलिसङ्ग्रहणम् उपनिषद्ग्रहणं केशग्रहणं च। मायी मायावादी व्याजी दुःशासनादिश्च। स्वेश्वरत्वं ब्रह्मत्वं साम्राज्यभोक्तृत्वं च॥ २७॥

पदार्थदीपिकोद्बोधिका – मौलीति॥ महान्तं, न्यायानां भगवत एव सर्वेश्वरत्वादिप्रतिपादकब्रह्ममीमांसाशास्त्रसिद्धयुक्तीनां मार्गं पन्थानं अपहाय हित्वा अलं सम्यक् स्वेश्वरत्वं स्वस्य ब्रह्मत्वमपि साधयता। पक्षान्तरे, पाण्डवानामर्धराज्यदानरूपन्यायमार्गमपहाय स्वस्यैव साम्राज्यभोक्तृत्वलक्षणमीश्वरत्वं साधयता दुष्टजनेन दुर्जनेन मायिना मायावादिना सदसि विद्वत्सभायाम्। मौलेः वेदशिरः उपनिषदः सङ्ग्रहेण प्रमाणत्वेन परिग्रहेण यद्विकर्षणं 'एकमेवाद्वितीयमि'त्यादिवाक्यजनितभ्रान्त्याऽशेषोपनिषदां बलादद्वैतपरतया योजनं तेन दूनां दुःखिताम्। अन्यत्र, माया कैतवमस्यास्तीति तेन। 'व्रीह्यादित्वादिनिः'। दुष्टजनेन दुःशासनेन सदसि कुरुसभायां मौलेः केशपाशस्य सङ्ग्रहेण सम्यग्ग्रहणेन विकर्षणेनाकर्षणेन दूनां दुःखितां दृष्ट्वेति पूर्ववत्॥ २७॥

मन्दोपकारिणी – मौलीति॥ – पुनः कथंभूतां, सदसि सभायां दुष्टजनेन दुष्टश्चासौ जनश्च दुष्टजनः तेन दुष्टजनेन मायिना मायावादिना। मौलिसङ्ग्रहविकर्षणदूनां मौलीनां वेदशिरोभूतानां उपनिषदां सङ्ग्रहेण ग्रहणेन विकर्षणं ऐक्यादिपरतया योजनं तेन दूनां सन्तापिताम्। कथंभूतेन मायिना, महान्तं सर्वसंमतं न्यायमार्गं भगवत एव सर्वेश्वरत्वप्रतिपादकब्रह्ममीमांसाशास्त्रसिद्धयुक्तीनां मार्गे विचारम्। 'मृग अन्वेषण इति धातोः'। अपहाय परित्यज्य। अलं स्वेश्वरत्वं स्वस्यैव ईश्वरत्वं ब्रह्मत्वं साधयता प्रतिपादयता।

द्रौपदीपक्षे तु न्यायमार्गं पाण्डवानां अर्धराज्यदानाख्यधर्ममार्गं अपहाय स्वेश्वरत्वं स्वस्यैव ईश्वरत्वं साम्राज्यत्वं साधयता वदता मायिना कपटवता दुष्टजनेन दुःशासनेन सदसि कुरुसभायां मौलिसङ्ग्रहविकर्षणदूनां मौलौ केशपाशे सङ्ग्रहेण आकर्षणेन दूनां दुःखिताम्। 'मौलिः संयतकेशेषु चूडायां मुकुटे द्वयोः' इति नानार्थरत्नमाला ॥ २७ ॥

सज्जनैः कतिपयैरतिदीनैश्चालितैः कलिबलाच्छुभमार्गात्।
अप्युपेक्षितविकर्षणदुःखां सातिशोकमपि कैश्चन दृष्टाम् ॥ २८ ॥

भावप्रकाशिका – सज्जनैः भीष्मादिभिश्च। सातिशोकमपि कैश्चन विदुरेण धर्मसाक्षिभिर्देवैश्च ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – सज्जनैरिति ॥ कलिबलात् कलिसामर्थ्यात् शुभमार्गात् शुद्धमार्गात् चालितैः अत एव अतिदीनैः अतिदुर्बलैः कतिपयैः कैश्चित् सज्जनैरप्युपेक्षितं यद्विकर्षणदुःखं यस्यास्तां सज्जना अपि मायिनमुपेक्षन्ते, न निराकुर्वन्त्यतोऽतिदुःखितामिति भावः। अन्यत्र, कतिपयैः सज्जनैर्भीष्मादिभिरुपेक्षितं विकर्षणदुःखं यस्यास्ताम्। एतच्च 'इत्युक्ता अपि भीष्माद्याः कल्यावेशेन मोहिताः। पृच्छ धर्मजमित्युक्त्वा तूष्णीमेव बभूवुः' इति वचनात्सिद्धम्। कैश्चन सज्जनैः ऋष्यादिभिः विदुरादिभिश्च। अतिशोकेन सहितं यथा भवति तथा सातिशोकं शोकपूर्वकं दृष्टामित्यर्थः। इतरत्र, धर्मसाक्षिभिरादित्यादिभिश्च दृष्टां श्रुतिततिं वेदिजामिव दृष्ट्वेत्यादि पूर्ववत् ॥ २८ ॥

मन्दोपकारिणी – सज्जनैरिति ॥ – पुनः कथंभूतां श्रुतिततिं, कलिबलात् कलिनामकदैत्यस्य बलात् सामर्थ्यात् कल्यावेशादित्यर्थः। शुभमार्गात् चालितैः भ्रंशितैः धर्ममार्गं त्यक्तवद्भिरित्यर्थः। अतिदीनैः अतिदुर्बलैः कतिपयैः कैश्चन सज्जनैरपि भीष्मद्रोणादिभिः। उपेक्षितविकर्षणदुःखां उपेक्षितेन विकर्षणेन दुःखं यस्याः सा तथोक्ता तां कल्यावेशेन केषुचित् सज्जनेषु मायिसिद्धान्तनिराकरणे उदासीनेषु सत्सु सज्जना अपि मायावादिनः उपेक्षन्ते न केऽपि तत्सिद्धान्तं निराकुर्वन्तीति दुःखितामिति भावः। कैश्चन सज्जनैः ऋष्यादिभिः। सातिशोकं अतिशोकेन सहितं यथा भवति तथा दृष्टाम्। अयं मायी श्रुतिसिद्धमपि भगवन्महिमानं अपलापयतीति तेषां शोकः। द्रौपदीपक्षे तु कलिबलात्

शुभमार्गात् चालितैः अतिदीनैः। कतिपयैः सज्जनैः भीष्मद्रोणादिभिः। उपेक्षितविकर्षणदुःखां भीष्माद्या अपि मदाकर्षणकारिणं दुःशासनं उपेक्षन्त इति दुःखितां एतच्च 'इत्युक्ता अपि भीष्माद्याः कल्यावेशेन मोहिताः। पृच्छ धर्मजमित्युक्त्वा तूष्णीमेव बभूवुः' इति सिद्धम्। कैश्चन सज्जनैः विदुरादिभिः विदुराख्यैर्वा कल्यावेशरहितत्वादेव बहुवचनं अथवा विदुरेण। कर्मसाक्षिभिः सूर्यादिभिश्च सातिशोकं दृष्टाम्॥ २८॥

वासुदेव धरणीधर नाथेत्युच्चकैरपि मुहुः प्रवदन्तीम्।
पूर्णषड्गुणमजं गतदोषं बिभ्रतीं हृदि विविक्तमशेषात्॥ २९॥

भावप्रकाशिका – 'वासुदेवो वा इदमग्र आसीत् दाधर्थ पृथिवीमभितो मयूखैः'। 'आत्मेत्येवोपासीत' इत्यादि। 'वासुदेव धरणीधर चक्रपाणे' इत्यादि च। हृदि स्वाभिप्राये मनसि च। 'ततो भूय इव ते तमो य उ विद्यायां रताः'। 'अथ हैनमुपाक्रोशत् सत्यं भिदा सत्यं भिदा सत्यं भिदा। मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः' इत्यादिना॥ २९॥

पदार्थदीपिकोद्बोधिका – वासुदेव इति॥ वासुदेव! धरणीधर! नाथ! इति मुहुः पुनः पुनरुच्चकैरतितरां प्रवदन्तीम्। तथा हि 'वासुदेवो वा इदमग्र आसीदि'त्यत्र वासुदेवेति। 'दाधर्थपृथिवीमभितो मयूखैः' इत्यत्र धरणीधरेति। 'आत्मेत्येवोपासीत' इत्यत्र नाथेति च वदति हि श्रुतिः। पक्षान्तरे, वासुदेवेत्यादिभगवन्नामानि मुहुरुच्चकैरभिदधानाम्। हृदि स्वाभिप्राये, पूर्णाः सद्गुणा यस्य तम्। गता दोषा यस्मात्तम्। अशेषात्समस्तजगतो विविक्तं विलक्षणमजं जन्मादिरहितं भगवन्तं श्रीहरिं बिभ्रतीम्। एवंभूतभगवत्स्वरूपप्रतिपादनपरामिति भावः। इतरत्र, हृदि मनसि पूर्णसद्गुणं गतदोषमशेषाद्विविक्तमजं भगवन्तं बिभ्रतीं ध्यायन्तीं दृष्ट्वेत्यादि पूर्ववत्॥ २९॥

मन्दोपकारिणी – वासुदेवेति॥ वासुदेव धरणीधर नाथ इत्यादिकं नाम। मुहुः भृशम्। उच्चकैः स्पष्टं यथा भवति तथा प्रवदन्तीमपि। सा च श्रुतिः 'वासुदेवो वा इदमग्र आसीत्' इत्यादिका। पूर्णषड्गुणं षट् च ते गुणाः ऐश्वर्यादयश्च पूर्णाः व्याप्ताः षड्गुणाः यस्य स तथोक्तः तम्। गतदोषं गताः उज्झिताः दोषाः यस्मात् स तथोक्तः तम्। अशेषात् चेतनाचेतनात्मकसमस्तजगतः विविक्तं विलक्षणं अत्यन्तभिन्नं अजं उत्पत्तिशून्यं भगवन्तं

हृदि स्वाभिप्राये बिभ्रतीं एवंभूतभगवत्स्वरूपप्रतिपादने तात्पर्यवतीं इति भावः। द्रौपदीपक्षे तु, वासुदेव धरणीधर, नाथ, चक्रपाणे, नरसिंहेत्यादिभगवन्नामानि। मुहुः पुनः पुनः उच्चकैः उच्चध्वनिना प्रवदन्तीं उच्चारयन्तीम्। अशेषात् विविक्तं पूर्णषड्गुणं गतदोषम्। अजं उत्पत्तिशून्यं नारायणम्। हृदि मनसि निधाय। बिभ्रतीं ध्यायन्तीम्॥ २९॥

वार्यतां बुधजनैर्ननु हा हा नैष धर्म इति चाभिदधानाम्।
कृष्णलालिततमामनवद्यामप्यनन्यशरणां शरणोत्काम्॥ ३०॥

भावप्रकाशिका – नैष धर्म इति च। एष ऐक्यवादः सदसि केशापकर्षणादिश्च।

॥ ३०॥

पदार्थदीपिकोद्बोधिका – वार्यतामिति॥ बुधजनैः विद्वज्जनैः वार्यतां वेदादैरैक्यपरतां प्रतिपादयन्मायिमतं निराक्रियतां 'अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः' इत्यत्राविद्यामनिराकृत्य केवलविद्यायामेव निरतानां भूयस्तमः प्राप्त्युक्त्याऽविद्यानिराकरणं कर्तव्यमित्युच्यते, 'अथ हैनमुपाक्रोशत्सत्यं भिदा सत्यं भिदा सत्यं भिदा, मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः' इत्यादिना च भेदो निराक्रियते। अत एष ऐक्यवादो न धर्म इति चाभिदधानां वदन्तीम्। अन्यत्र, बुधजनैर्ज्ञानिजनैर्वार्यतां दुर्योधनाज्ञया दुःशासनेन क्रियमाणं मद्विकर्षणं निवार्यतां एष द्यूतव्यापारो धर्मो न, हा हा कष्टं ननु, इति चाभिदधानाम्। कृष्णेन श्रीवेदव्यासेन अतिलालितां अत्यन्तं मानिताम्। इतरत्र, यादवकृष्णेन च लालिततमाम्। न विद्यतेऽवद्यं दोषो यस्यास्तां अपौरुषेयत्वेनाप्रामाण्यकारणदोषरहितामित्यर्थः अज्ञानादिदोषरहिताश्च। न विद्यतेऽन्यः शरणं रक्षको यस्यास्तां, श्रीमध्वाचार्यमृते पालकरहितामित्यर्थः। पक्षान्तरे, भीमान्यपालकरहिताश्च। अत एव शरणे रक्षणे, उत्कां उत्कण्ठोपेतां शरणं इच्छन्तीश्च। 'शरणं गृहरक्षित्रोः' इत्यमरः। श्रुतिततिं वेदिजामिव दृष्ट्वा दुष्टपक्षदमनस्थिरसन्धां अकरोत्॥ ३०॥

मन्दोपकारिणी – वार्यतामिति॥ पुनः कथंभूतां, बुधजनैः बुधाश्च ते जनाश्च बुधजनाः तैः प्राज्ञजनैः। वार्यतां वेदादेः ऐक्यपरतां प्रतिपादयत् मायिमतं निराक्रियतामिति। अभिदधानां प्रतिपादयन्तीं तथा हि 'अन्धंतमः प्रविशन्ति ये अविद्यामुपासते। ततो भूय

इव ते तमो य उ विद्यायां रताः' इत्यत्र दुर्मतमनिराकृत्य केवलं सन्मते एव रतानां अत्युत्कृष्टतमःप्राप्त्युक्त्या दुर्मतनिराकरणं कार्यमित्युच्यते। एषः ऐक्यवादः धर्मो न ननु नैव। 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। 'वृञ् वरण इत्यस्मात् धातोः कर्मणि लोट् आत्मनेपदम्'। हा हा खेद इति च अभिदधानां ब्रुवन्तीं 'सत्यं भिदा सत्यं भिदा मैवारुवण्यो मैवारुवण्यः' इत्यादिना ऐक्यस्य निराकरणात्। कृष्णपालिततमां कृष्णेन श्रीवेदव्यासेन पालिततमां अतिशयेन आदृताम्। 'व्यासार्जुनाग्निहरिकोकिलकाकशूद्रतामिस्रपक्षकलिनीलगुणेषु कृष्णः' इति भास्करः। अनवद्यां न विद्यन्ते अवद्यानि दोषाः यस्यां सा तथोक्ता तां अपौरुषेयत्वेन पुरुषनिबन्धनाप्रामाण्यकारणदोषरहितामिति यावत्। अनन्यशरणां न विद्यते अन्यः स्वव्यतिरिक्तः शरणं रक्षको यस्याः सा तथोक्ता ताम्। 'शरणं गृहरक्षित्रोः' इत्यमरः। मध्वाचार्यं ऋते पालकरहितां इति भावः। अत एव। शरणोत्कां शरणे रक्षके उत्कां उत्कण्ठावतीं रक्षकमिच्छन्तीं इति भावः। द्रौपदीपक्षे तु बुधजनैः भीष्मादिभिः दुःशासनेन क्रियमाणकर्षणं निवार्यतां इति। एषः दुर्योधनेन क्रियमाणः व्यापारः धर्मः न्यायः न ननु नैव। हा हा कष्टम्। 'धर्माः पुण्ययमन्याया' इत्यमरः। इति च अभिदधानां ब्रुवन्तीम्। कृष्णपालिततमां कृष्णेन आदृताम्। अनवद्यां अज्ञानादिदोषरहिताम्। अनन्यशरणां भीमादन्यपालकरहिताम्। शरणोत्कां आकर्षणसमये रक्षकं वाञ्छन्तीम्॥ ३०॥

वेदिजामिव पुरा भरताग्र्यः स स्वयं श्रुतिततिं खलु दृष्ट्वा।
पुष्टबुद्धिरकरोत् करुणाब्धिर्दुष्टपक्षदमनस्थिरसन्धाम्॥ ३१॥

पदार्थदीपिकोद्बोधिका – अयं पूर्वमेव व्याख्यातः॥ ३१॥

मन्दोपकारिणी – वेदिजामिति॥ प्रागेव व्याख्यातेऽयं श्लोकः॥ ३१॥

अव्ययं सततमप्युपभुक्त्या वित्तमग्र्यमिव दूरयियासुः।
ज्यायसे सगुरवे हरिगीताभाष्यमेष विरचय्य तदाऽदात्॥३२॥

पदार्थदीपिकोद्बोधिका – अव्ययमिति॥ एष श्रीमध्वाचार्यः। सगुरवे गुरुसहिताय ज्यायसे आश्रमज्येष्ठाय लिकुचान्वयोद्भवाय यतये। 'गुरुगीष्पतिपित्राद्योः पौरोहित्यकरे च

ना' इति यादवः। हरिगीताभाष्यं श्रीभगवद्गीताया भाष्यं तदा विरचय्य कृत्वा, दूरं यातुमिच्छुः दूरयियासुः कश्चित्पुरुषः स्वजनाय स्वकीयजनाय सततं सर्वदोपभुक्तत्याप्युपभोगेनापि व्ययेनापीत्यर्थः अव्ययं नाशरहितं अत एव अग्र्यं उत्तमं वित्तमिव अदात्। अत्रोपमालङ्कारः ॥ ३२ ॥

मन्दोपकारिणी – अव्ययमिति ॥ एषः मध्वाचार्यः। दूरयियासुः दूरं दूरदेशं बदरिकाश्रमं प्रति यियासुः यातुमिच्छन् सन्। तदा रजतपीठपुरवासकाले। हरिगीताभाष्यं हरिगीतायाः भगवद्गीतायाः भाष्यं व्याख्यानं विरचय्य निर्माय सगुरवे अच्युतप्रेक्षेण सहिताय ज्यायसे ज्येष्ठयतये अदात् दत्तवान्। 'डु दाञ् दान इत्यतो लुङ् परस्मैपदं अदात् अदाताम् अदुः'। कः किमिव दूरयियासुः दूरदेशं प्रति गन्तुमिच्छन् कश्चित् पुरुषः स्वजनस्य, सततं नित्यं उपभुक्त्यापि भोगेनापि अव्ययं ह्रासरहितं अग्र्यं उत्तमं वित्तं धनमिव 'वित्तं वस्तु वसु द्रव्यं रा द्रविणं धनं' इति धनञ्जयः। कीदृशं गीताभाष्यं उपभुक्त्यापि श्रवणादिना भोगेनापि अव्ययम् ॥ ३२ ॥

हेतुवादिनि विशङ्कटबुद्धौ तीर्थमर्थयति गन्तुमनुज्ञाम्।
तां दिदेश पुरुषोत्तमतीर्थं चिन्तयन् स पुरुषोत्तमरक्षाम् ॥ ३३ ॥

भावप्रकाशिका – 'देहोपसङ्ग्रहस्यास्य यत्फलं देवचोदितम्। तत्सिषाधयिषुर्यामि देवगुह्योपपादितम्।' इति हेतुवादिनि ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – हेत्विति ॥ हेतुं गमनकारणं वक्तुं शीलमस्यास्तीति तस्मिन्। 'देवोपसङ्ग्रहस्यास्य यत्फलं दैवचोदितम्। तत्सिषाधयिषुर्यामि देवगुह्योपपादितं' इति गुह्यं देवकार्यं साधयितुं यामीति देवकार्यसाधनलक्षणगमनकारणवादिनीत्यर्थः। विशङ्कटा विशाला बुद्धिर्यस्य स श्रीपूर्णप्रज्ञाचार्यः। 'विशङ्कटं विशालं स्यादि'ति हलः। तस्मिंस्तीर्थं पुण्यक्षेत्रं प्रतिगन्तुमनुज्ञामर्थयति याचति सति स पुरुषोत्तमस्य भगवतस्तीर्थं शास्त्रं गीताभाष्यादिशास्त्रज्ञानमिति यावत् यस्य स पुरुषोत्तमतीर्थः। 'तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः' इति हेमचन्द्रः। अच्युतप्रेक्ष इत्यर्थः। पुरुषोत्तमरक्षां श्रीमध्वाचार्यस्येति शेषः चिन्तयन् सन् तां अनुज्ञां दिदेश प्रददौ ॥ ३३ ॥

मन्दोपकारिणी – हेत्विति ॥ हेतुवादिनि हेतुं देवकार्यार्थं यामीति गमनकारणं वादिनि ब्रुवति विशङ्कटबुद्धौ विशङ्कटा विशाला बुद्धिः यस्य स तथोक्तः। 'विशङ्कटं पृथु बृहद्विशालं पृथुलं महत्' इत्यमरः। तस्मिन् पूर्णप्रज्ञाचार्ये। तीर्थं भागीरथ्यादितीर्थं प्रतिगन्तुं अनुज्ञां अनुमतिं अर्थयति प्रार्थयति सति पुरुषोत्तमतीर्थं सन्यासिषु पुरुषेषु उत्तमश्चासौ तीर्थः गुरुश्च पुरुषोत्तमतीर्थः। 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः। अथवा पुरुषोत्तमस्य नारायणस्य तत्सन्निधानस्येति यावत् तीर्थः पात्रभूतः तं। पुरुषोत्तमतीर्थः इति पाठे अच्युतप्रेक्षः इत्यर्थः सुगमः। सः अच्युतप्रेक्षः तां अनुज्ञां दिदेश दत्तवान्। 'दिश अतिसर्जने इत्यस्मात् लिट् परस्मैपदम्। मध्वाचार्यस्य तीर्थयात्रागमनं अङ्गीचकारेति भावः कथंभूतः, पुरुषोत्तमरक्षां पुरुषोत्तमस्य पुरुषाभ्यां क्षराक्षराभ्यां उत्तमस्य रक्षां नारायणकर्तृकां रक्षां इत्यर्थः चिन्तयन् मध्वस्येति शेषः। श्रीनारायणः इमं मध्वं मार्गे पालयतु इति नारायणं प्रार्थयन्निति भावः ॥ ३३ ॥

नीरजा मलयमण्डलवृत्त्या श्लाघितो भुवि सदाल्यनुयातः।
साधुपान्थपरितापमपास्यन्नुत्तरां दिशमयान्मरुदंशः ॥ ३४ ॥

भावप्रकाशिका – रजो गुणविशेषो धूलिश्च। मलयमण्डलं मलयसन्निकृष्टविषयो मलयगिरिवलयं च। सतामालिभिरनुयातः सदाऽलिभिश्च ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – नीरजा इति ॥ निर्गतं रजोगुणो यस्मात्स नीरजाः। मलयस्य मलयपर्वतस्य मण्डले प्रदेशे वृत्तिर्वर्तनं तया, मलयसमीपवृत्तिदक्षिणदेशगत अखिलदुर्वादिनिराकरणादिनेति भावः। भुवि श्लाघित आदृतस्सतां सज्जनानामाल्या समूहेनानुयातोऽनुगतः। 'वीथ्यालिरावलिः पङ्क्तिः श्रेणीरेखास्तु राजयः' इत्यमरः। साधवः सज्जना एव पान्थाः पथिकजनास्तेषां परितापं सन्तापमपास्यन्निराकुर्वन्मरुतोंऽशो मरुदंशः श्रीमध्वाचार्यः। उत्तरां दिशमयात् ययौ। यातेर्लङ्। श्लेषार्थस्तु, नीरजाः पांसुरहितो मलयपर्वतवलयवर्तनेन भुवि श्लाघितः, मलयपर्वतगतचन्दनसम्पर्केण सुरभितयाऽदृतः। अत एव सदा सर्वदाऽऽलिभिः भ्रमरैरनुयातः। 'षट्पदभ्रमरालयः' इत्यमरः। साधु सम्यक् यथा भवति तथा पान्थपरितापमपास्यन्मरुदंशो वातैकदेशो यथा कालविशेष उत्तरां दिशं व्रजेत्तद्वत् श्रीमध्वोऽप्युत्तरां दिशं जगामेति भावः ॥ ३४ ॥

मन्दोपकारिणी – नीरजा इति ॥ मरुदंशः मरुतः प्रधानवायोः अंशः अवतारः श्रीमध्वाचार्यः। उत्तरां उदीचीं दिशं प्रति अयात् ययौ। 'या प्रापण इत्यतो लङ् परस्मैपदं अयात् अयाताम् अयुः'। कथंभूतः, नीरजाः नीरजाः निर्गतं रजः रजोगुणः यस्मात् सः नीरजाः 'रजो गुणे च स्त्रीपुष्पे' इत्यमरः शुद्धसत्वस्वभावः इति यावत्। मलयमण्डलवृत्या मलयेषु मलयनामकेषु मण्डलेषु देशेषु 'मण्डलं भूमिभागे स्यात्' इति रत्नमाला, वृत्या परिवर्तनेन सञ्चारेणेति यावत् । तद्देशगताखिलदुर्वादिनिराकरणेनेति भावः। भुवि भूमौ श्लाघितः प्रशंसितः। सदाल्यनुयातः सतां आल्या समूहेन 'वीथ्यालिरावलिः पङ्क्तिः' इत्यमरः, अनुयातः अनुगतः। साधुपान्थपरितापं साधवः सज्जनाश्च ते पान्थाः पथिकाश्च 'पान्थः पथिकः' इत्यमरः, तेषां तत्र मार्गे विद्यमानानां जनानामिति यावत् परितापं संसारतापं अपास्यन् स्वदर्शनादिना निराकुर्वन्। नीरजाः निर्गतानि रजांसि पांसवः यस्मात् स तथोक्तः 'पांशुर्ना न द्वयो रजः' इत्यमरः। मलयमण्डलवृत्या मलयस्य मलयपर्वतस्य मण्डलेषु वृत्या सञ्चारेण भुवि श्लाघितः मलयपर्वतगतचन्दनगतसंपर्केण सुगन्धतया जनैः आदृत इति भावः। सदा सर्वदा। अल्यनुयातः अलिभिः भ्रमरैः अनुयातः। 'षट्पदभ्रमरालयः' इत्यमरः। साधु सम्यक्। पान्थपरितापे मार्गस्थानां सूर्यजनितसन्तापं अपास्यन् सन् यथा मरुदंशः वायुः उत्तरां दिशं गच्छेत् तद्वदिति श्लेषाभिप्रायः ॥ ३४ ॥

बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरण्याम्।
आत्ममज्जनत एव निकामं पर्यशोधयदमन्दमनीषः ॥ ३५ ॥

भावप्रकाशिका – श्रीभागवतादिशास्त्रस्यात्ममज्जनतः परिशोधनं प्रक्षेपोद्धारादिकम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – बुद्धीति ॥ अमन्दा पूर्णा मनीषा बुद्धिर्यस्य स पूर्णप्रज्ञाचार्यः। बुद्धेरन्तःकरणस्य शुद्धिं करोतीति तादृशो यो गोनिकरो वचनसमूहस्तेनाढ्यं सम्पूर्णम्। तीर्थपक्षे तु, बुद्धिशुद्धिकरेण गोनिकरेण जलसमूहेनाढ्यम्। उभयञ्च तीर्थजातं तीर्थसमूहमात्मनः स्वस्य मज्जनत एव अवगाहनत एव निकामं नितरां यथा भवति तथा पर्यशोधयत्। 'शुध शौचे लङ्। अत्र तीर्थशब्देन शास्त्रं नद्यादिकं च उच्यते। शास्त्रे मज्जनं नाम पूर्वोत्तरपरामर्शः, अन्यत्रावगाहनम् ॥ ३५ ॥

मन्दोपकारिणी – बुद्धीति ।। अमन्दमनीषः अमन्दा अनल्पा पूर्णा मनीषा बुद्धिः यस्य स तथोक्तः पूर्णप्रज्ञाचार्यः 'बुद्धिर्मनीषा धिषणा' इत्यमरः। धरण्यां धरायां 'धरा धरित्री धरणी' इत्यमरः। उभयं द्विविधं तीर्थजातं तीर्थानां भारतभागवतादिशास्त्राणां नद्यादिजलानां च 'तीर्थं शास्त्राध्वरोपायक्षेत्रोपाध्यायमन्त्रिषु। अवतारर्षिजुष्टाभ्यः स्त्रीरजस्सु च विश्रुतं' इति विश्वः। जातं समूहं 'जातं जात्योघजन्मसु' इति च। आत्ममज्जनत एव आत्मनः स्वस्य मज्जनतः मज्जनेन अवगाहेन पूर्वोत्तरपरामर्शेन च। निकामं यथेप्सितम्। 'निकामेष्टं यथेप्सितं' इत्यमरः। पर्यशोधयत् सम्यक् शुद्धं चकार। भागवतादिशास्त्रं पूर्वोत्तरपरामर्शं कृत्वा अपव्याख्याननिराकरणपूर्वकं प्रक्षिप्तग्रन्थोद्धारेण वेदव्यासकृतपाठ-स्थापनेन शुद्धीचकार। नद्यादीनां जलं आत्मनः अवगाहनेन तत्र महिमातिशयस्थापनेन पवित्रं चकार इति भावः। 'परिपूर्वकात् शुध शौच इत्यतो लङ् परस्मैपदम्'। कथंभूतं तीर्थजातं, बुद्धिशुद्धिकरगोनिकराढ्यं कुर्वन्तीति कराः शुद्धेः निर्मलत्वस्य कराः शुद्धिकराः बुद्धेः अन्तःकरणस्य शुद्धिकराः ताश्च ताः गावः वाचश्च तासां निकरेण समूहेन आढ्यं युक्तम्। 'स्तोमौघनिकरव्रातः' इत्यमरः। शास्त्रश्रवणादिना अज्ञानादिपरिहारकवचनोपेत-मित्यर्थः। जले तु, बुद्धेः शुद्धिकराः पावित्र्यकराः ताश्च ताः गावश्च जलानि च तासां निकरेण आढ्यं तीर्थजातं स्नानपानादिना चित्तगतरागादिदोषपरिहारकजलोपेतं इत्यर्थः। 'भूवाग्वारिषु गौर्मता' इति विश्वः ।। ३५ ।।

वासुदेवपदसन्ततसङ्गी तेजसाऽप्यलमधःकृतशर्वः ।
अत्यवर्तत नितान्तमथासौ गाङ्गमोघमघनाशनकीर्तिः ।। ३६ ।।

भावप्रकाशिका – नितान्तमतिवर्तनं गत्या गुणैश्च। गाङ्ग ओघः सकृत्सङ्गी शिरसि स्थितिमात्रेणाधःकृतशर्वश्च ।। ३६ ।।

पदार्थदीपिकोद्बोधिका – वासुदेवेति ।। अथ वासुदेवस्य श्रीहरेः पदयोः पादयोर्यः सन्ततसङ्गः सोऽस्यास्तीति तथोक्तः। तेजसाऽपि सामर्थ्येनाप्यलं सम्यगधःकृतोऽधरीकृत-श्शर्वो रुद्रो येन तादृशः। अघानां नाशनं यया सा अघनाशिनी, श्रवणादिना पापनाशनहेतुः कीर्तिर्यस्य सोऽसौ श्रीमध्वाचार्यः। गङ्गायाः सम्बन्धी गाङ्गस्तमोघं प्रवाहं

नितान्तमत्यवर्तत अतीत्यावर्तत। अतिवर्तनं नाम न केवलं तरणमात्रं, किन्तु गुणतोऽप्यतिवर्तनं विवक्षितमिति भावेन वासुदेवेत्यादिहेतुगर्भं विशेषणद्वयम्। गङ्गा तु सकृदेव भगवत्पदसङ्गवती, तेजसा रुद्रादवरा चेत्यतो गङ्गाया अप्युत्तमोऽयं गङ्गां तीर्त्वा जगामेति फलितार्थः ॥ ३६ ॥

मन्दोपकारिणी – वासुदेवेति ॥ अथ उत्तरदेशगमनानन्तरम् । अघनाशनकीर्तिः श्रवणादिना अघानां दुरितानां नाशकारी कीर्तिः माहात्म्यं यस्य स तथोक्तः। 'कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतं' इत्यमरः । असौ मध्वाचार्यः । गाङ्गं गाङ्गायाः अयं गाङ्गः तं भागीरथीसंबन्धिनं इत्यर्थः। 'गङ्गा विष्णुपदी जन्हुतनया सुरनिम्नगा' इत्यमरः । ओघं प्रवाहम्। 'ओघः प्रवाहे निवहे' इति भास्करः। नितान्तं अतिशयेन अत्यवर्तत अत्यक्रामत्। 'अतिपूर्वकात् वृतु वर्तने इति धातोः लङात्मनेपदं अवर्तत अवर्तेताम् अवर्तन्त' । भागीरथ्यतिक्रमणं नाम न केवलं तरणमात्रं किन्तु गुणतोऽपि अतिक्रमणं विविक्षितमिति ज्ञेयम्। तदेवाह वासुदेव इत्यादिना ॥ कथंभूतो मध्वः, वासुदेवपदसन्ततसङ्गी वासुदेवस्य श्रीहरेः पदयोः सन्ततं सङ्गः अस्यास्तीति सङ्गी सर्वदा विष्णुपादस्मरणसङ्गवान्, गङ्गा तु सकृदेव पादसंबन्धवती। पुनः कथंभूतः । तेजसापि स्वसामर्थ्येनापि अलं अत्यन्तं अधःकृतशर्वः अधःकृतः अधरीकृतः शर्वः रुद्रो येन स तथोक्तः रुद्रात् अत्युत्तमः इति भावः। 'ईश्वरः शर्व ईशानः' इत्यमरः। गङ्गा तु तथा न रुद्रः गङ्गां विष्णुपदोत्थेयं इत्यनेनैव आदरेण शिरसा बिभर्ति न तु स्वस्मात् उत्तमा इयं इति भावेना गङ्गायाः रुद्रादतिनीचत्वादिति भावः। इत्याशयेन नितान्तं अत्यवर्तत इत्युक्तम् । गङ्गायाः अत्युत्तमोऽयं मध्वः गङ्गां तीर्त्वा जगाम इति फलितोऽर्थः ॥ ३६ ॥

तत्र तत्र स जगत्त्रयचित्रं कर्म शर्मदमनुस्मृतिमात्रात्।
सञ्चरन् विदधदाप नराणां गोचरं बदरिकाश्रमपार्श्वम् ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – तत्रेति ॥ तत्र तत्र तत्तत्तीर्थक्षेत्रविशेषेषु सञ्चरन्। जगतां त्रयं तस्मिन् चित्रं आश्चर्यं। केवला अनुस्मृतिः स्मरणं अनुस्मृतिमात्रं तस्मात् । शर्म सुखं

ददातीति शर्मदम् । भक्तानां सुखप्रदमित्यर्थः । कर्म विदधत् कुर्वन् श्रीमध्वाचार्यो नराणां गोचरं गन्तुं योग्यं बदरिकाश्रमस्य पार्श्वं निकटमाप ययौ ॥ ३७ ॥

मन्दोपकारिणी – तत्रेति ॥ तत्र तत्र तेषु तेषु तीर्थक्षेत्रविशेषेषु । सञ्चरन् व्रजन् । जगत्त्रयचित्रं जगतां त्रये चित्रं अद्भुतम् । अनुस्मृतिमात्रात् स्मरणादेव । 'मात्रं कात्स्न्र्येऽव-धारणे' इत्यमरः । शर्मदं पुंसां शर्म सुखं ददातीति शर्मदम् । 'शर्मशातसुखानि च' इत्यमरः । कर्म चरितं विदधत् कुर्वन् सः मध्वाचार्यः नराणां मनुष्याणां गोचरं गन्तुं योग्यं बदरिकाश्रमपार्श्वं हिमवत्पर्वतस्य दक्षिणदिशि स्थितस्य बदरिकाख्याश्रमस्य पुण्यक्षेत्रस्य नरनारायणस्थानस्य पार्श्वं समीपं आप प्राप्तवान् ॥ ३७ ॥

मण्डयन् भरतखण्डमखण्डं नादिरायणपदोऽत्र परो यः ।
तं नमन्प्रचुरधीर्हरिगीताभाष्यमार्पयदुपायनमस्मै ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – मण्डयन्निति ॥ अत्र मनुष्यगोचरबदरिकाश्रमे स्थित इति शेषः । अखण्डं समस्तं भरतखण्डं हिमवत्सेतुमध्यगमित्यर्थः । मण्डयन् अलङ्कुर्वन्, नो नकार आदिर्यस्य तन्नादि, रायण इति पदं रायणपदं, नादि रायणपदं यस्य सः । नारायणपदवाच्य इत्यर्थः । यः परः सर्वोत्तमो भगवांस्तं नमन् प्रचुरधीः पूर्णप्रज्ञाचार्योऽस्मै श्रीनारायणाय हरिगीताभाष्यं स्वकृतभगवद्गीताभाष्यमुपायनमार्पयत् उपायनत्वेन समर्पया-मास । ऋ गतौ लङ् ॥ ३८ ॥

मन्दोपकारिणी – मण्डयन्निति ॥ अत्र अस्मिन् मनुष्यगोचरे बदरिकाश्रमे । अखण्डं समस्तम् । भरतखण्डं हिमवत्पर्वतमारभ्य दक्षिणदिक्स्थश्रीरामचन्द्रसेतुपर्यन्तं विद्यमानं नवसहस्रयोजनसंख्याकधनुराकारं भरतनामकखण्डं भूप्रदेशं मण्डयन् अलङ्कुर्वन् । नादिरायणपदः नकारः आदिः यस्य सः नादिश्चासौ रायणः रायणशब्दश्च नादिरायणः नादिरायण इति पदं नाम यस्य सः नादिरायणपदः नारायणनामेति यावत् । यः परः परमात्मा । 'परोऽरिपरमात्मनोः' इति विश्वः आस्ते तं नारायणं नमन् नमस्कुर्वन् प्रचुरधीः प्रचुरा प्रभूता पूर्णा धीः यस्य स तथोक्तः मध्वाचार्यः । 'प्रभूतं प्रचुरं प्राज्यं' इत्यमरः ।

अस्मै श्रीनारायणाय। हरिगीताभाष्यं स्वकृतभगवद्गीताभाष्यं उपायनं उपहारं उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः आर्पयत् समर्पितवान्। 'रिक्तहस्तेन नोपेयाद्राजानं देवतां गुरुं' इति वचनात् स्वकृतभगवद्गीताभाष्यं उपायनत्वेन समर्प्य नमश्चकारेति भावः। 'ऋ गतौ इत्यतो णिजन्तात् लङ् परस्मैपदम्' ॥ ३८ ॥

प्रीतयेऽस्य पुरतो वरभाष्यं वाचयन् स जनतामपसार्य।
वच्मि शक्तित उरुक्रमगीताभाष्यमित्यकथयत्पुरुसंख्यः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – प्रीतय इति ॥ जनानां समूहो जनता तां अपसार्य। अस्य श्रीनारायणस्य प्रीतयेऽस्य पुरतो वरमुत्तमं भाष्यं गीताभाष्यं वाचयन् पुरुः पूर्णा संख्या ज्ञानं यस्य स पूर्णप्रज्ञाचार्यः उरुक्रमगीताभाष्यं भगद्गीताभाष्यं शक्तितः वच्मीत्यकथयत्। अयं भावः। श्रीमध्वाचार्यः 'देवं नारायणं नत्वा सर्वदोषविवर्जितम्। परिपूर्णं गुरूंश्चान्गीतार्थं वक्ष्यामि शक्तितः' इति मङ्गलाचरणश्लोके ग्रन्थारम्भप्रतिज्ञां कुर्वन् श्लोकान्ते 'शक्तित' इति पदं अकथयदिति ॥ ३९ ॥

मन्दोपकारिणी – प्रीतय इति ॥ पुरुसङ्ख्यः पुर्वी भूयिष्ठा 'पुरु भूयिष्ठं' इत्यमरः। बहुलेति यावत् सङ्ख्या शास्त्रविचारणा यस्य स तथोक्तः। 'चर्चा सङ्ख्या विचारणा' इत्यमरः। सः मध्वाचार्यः। जनतां जनानां समूहो जनता तां शिष्यजनसमूहं अपसार्य दूरे यापयित्वा। अस्य श्रीनारायणस्य प्रीतये सन्तोषाय पुरतः नारायणस्य पुरोभागे अभिमुखतः वरभाष्यं वरं च तत् भाष्यं च वरभाष्यं स्वकृतं उत्तमं गीताभाष्यं वाचयन् सन् उरुक्रमगीताभावं उरुः क्रमः यस्य स तथोक्तः तस्य श्रीकृष्णस्य गीतायाः भावं अभिप्रायं 'भावः सत्ता स्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः। शक्तितः शक्त्यानुसारेण वच्मि वक्ष्यामि इति। अकथयत् अवोचत्। 'वच परिभाषण इत्यतो लट् परस्मैपदं वच्मि वच्वः वच्मः'। 'कथ वाक्यप्रबन्ध इत्यतो लङ् परस्मैपदम्'। गीताभाष्यमारभमाणो मध्वाचार्यः 'देवं नारायणं नत्वा सर्वदोषविवर्जितम्। परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि शक्तितः' इति मङ्गलाचरणप्रतिपादकाद्यपद्यान्ते प्रतिज्ञां कुर्वन् शक्तितः इति अवोचत् इति भावः ॥ ३९ ॥

एतदर्थमतिसूक्ष्ममपि त्वं शक्त एव न यदात्थ समस्तम्।
तेन लेशत इतीह पदं स्यादित्यगद्यत जगज्जनकेन ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – एतदिति ॥ त्वं अतिसूक्ष्मं अत्यन्तदुर्विज्ञेयं अपि एतस्या गीताया अर्थं समस्तं सर्वं वक्तुं शक्त एव समर्थ एव सन् यद्यस्मात् न आत्थ नोक्तवानसि तेन कारणेन इह मङ्गलश्लोकान्ते 'लेशतः' इति पदं स्याद्भवत्विति जगज्जनकेन जगत्पित्रा नारायणेन अगद्यत उक्तम्। 'शक्तितः' इति पदस्थाने 'लेशत' इति प्रयुज्यतामित्युक्त-मिति भावः ॥ ४० ॥

मन्दोपकारिणी – एतदिति ॥ हे मध्व ! त्वं अतिसूक्ष्ममपि अत्यन्तं ज्ञातुं अशक्यमपि। एतदर्थं एतस्याः भगवद्गीतायाः अर्थं अभिधेयं समस्तं अशेषमपि वक्तुं वर्णयितुं शक्त एव सन् समर्थ एव सन्। यत् यस्मात् समस्तं न आत्थ नावोचः सर्वमर्थं नोक्तवानसि। 'ब्रूञ् व्यक्तायां वाचीत्यतो लट् परस्मैपदं' 'ब्रुवः पञ्चानामादित आह' इति आहादेशे आत्थेति रूपम्। तेन कारणेन। इह आदिमङ्गलश्लोकान्ते 'लेशतः' इति पदं स्यात् भवेत् इत्येवप्रकारेण जगज्जनकेन जगतः जनकेन उत्पादकेन नारायणेन अगद्यत उक्तम्। गीतायाः दुर्ज्ञेयाशेषार्थकथनसमर्थोऽपि सर्वं अर्थं नोक्तवान् अतः प्रथमश्लोके शक्तिपदं हित्वा 'लेशतः' इति पदं प्रयोजय इति भगवता उदितं इति भावः। गद व्यक्तायां वाचीत्यतः कर्मणि लङात्मनेपदम्' ॥ ४० ॥

तेन तत्प्रवचने विहितेऽलं शुश्रुवुः प्रशायिता अपि शिष्याः।
उच्यतामिति मुहुः सपृथिव्यास्फालनं पदमहो हरिणोक्तम् ॥ ४१ ॥

पदार्थदीपिकोद्बोधिका – तेनेति ॥ तेन श्रीमध्वाचार्येण अलं सम्यक्तस्य गीताभाष्यस्य प्रवचने व्याख्याने विहिते कृते सति प्रशयिताः शयाना शिष्या अपि पृथिव्या आस्फालनेन हस्ततादनेन सहितं यथा भवति तथा। हरिणा मुहुः पुनः पुनरुक्तमुच्यतामिति पदं शुश्रुवुः। अहो आश्चर्यम्। रात्रौ व्याख्यानसमाप्त्यनन्तरं शिष्येषु शयानेषु तत्र प्रतिमागतेन नारायणेन पुनरपि व्याख्या क्रियतामित्यभिहितं शयानैः शिष्यैरपि श्रुतमिति भावः ॥ ४१ ॥

मन्दोपकारिणी – तेनेति ॥ तेन मध्वाचार्येण। अलं सम्यक्। तत्प्रवचने तस्याः गीतायाः प्रवचने व्याख्याने। विहिते कृते सति। व्याख्यानानन्तरं प्रशयिताः शयानाः।

शिष्याः सपृथिव्यास्फालनं पृथिव्याः भूम्याः आस्फालनं आस्फोटनं तेन सहितम्। हरिणा नारायणेन। उक्तं उदितम्। मुहुः पुनरपि। उच्यतामिति पदं शब्दं शुश्रुवुः अशृण्वन्। रात्रौ व्याख्यानसमाप्त्यनन्तरं निद्रितं मध्वाचार्यं स्वकरतलेन पृथिवीताडनेन शब्दं कृत्वा प्रबोधयित्वा नारायणेन उक्तं मुहुः उच्यतामिति शब्दं निद्रिताः शिष्या अपि शुश्रुवुरिति भावः। 'श्रु श्रवण इत्यतो लिट् परस्मैपदं शुश्राव शुश्रुवतुः शुश्रुवुः' ॥ ४१ ॥

शब्दभेदमवधार्य तमर्चासन्निषण्णवपुषः परमस्य।
तस्य भावविददभ्रमनीषः प्रोत्थितः प्रवचनं व्यधितैभ्यः ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – शब्देति॥ अमन्दा मनीषा यस्य स श्रीपूर्णप्रज्ञाचार्योऽर्चायां प्रतिमायां सन्निषण्णं सन्निहितं वपुः स्वरूपं यस्य तस्य। 'अर्चा पूजाप्रतिमयोः' इति वैजयन्ती। परमस्य सर्वोत्तमस्य श्रीहरेः तं शब्दभेदं 'उच्यता'मित्युक्तं शब्दविशेषमवधार्य सावधानं श्रुत्वा तस्योच्यतामिति पदस्य भावविदभिप्रायवेत्ता सन् पुनरपि व्याख्या क्रियतामिति तदभिप्रायं जानन्निति भावः। प्रोत्थितश्शयनादुत्थितः सन्नेभ्यः शिष्येभ्यः प्रवचनं व्याख्यानं व्यधित अकरोत्॥ ४२ ॥

मन्दोपकारिणी – शब्देति॥ अदभ्रमनीषः अदभ्रा बहुला मनीषा बुद्धिः यस्य स तथोक्तः। 'अदभ्रं बहुलं बहु' इत्यमरः। पूर्णप्रज्ञाचार्यः इत्यर्थः। अर्चासन्निषण्णवपुषः अर्चायां सन्निषण्णं सन्निहितं वपुः स्वरूपं यस्य सः अर्चासन्निषण्णवपुः तस्य। परमस्य परमात्मनः सर्वोत्तमस्य नारायणस्य। तं नारायणोक्तं शब्दभेदं 'उच्यतामिति' शब्दविशेषं अवधार्य सावधानं श्रुत्वा। तस्य 'उच्यतामिति' शब्दस्य भाववित् भावं अभिप्रायं वेत्ति जानातीति भाववित्। उच्यतामिति पदेन पुनरपि व्याख्यानं क्रियतामिति मां प्रति हरिणा उच्यते इति तत्पदाभिप्रायं जानन्निति भावः। प्रोत्थितः सन् एभ्यः शिष्येभ्यः प्रवचनं व्याख्यानं व्यधित अकरोत्। 'डु धाञ् धारणपोषणयोः लुङात्मनेपदं अधित अधिषातां अधिषत' ॥ ४२ ॥

मज्जनं व्यधित शीतलगङ्गावारि नित्यमरुणोदयकाले।
यत्स्पृशन्ति न नरा हिमभीता अंश एष पृषतामधिपस्य॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – मज्जनमिति ॥ पृषतां वायूनाम्। 'पृषदश्वः पवमानः प्रभञ्जन' इति हलः, अधिपस्य स्वामिनो मुख्यप्राणस्य अंश एषः श्रीमध्वाचार्यः। नरा बदरिकाश्रमस्थजना हिमभीताः सन्तो यज्जलं न स्पृशन्ति तस्मिन् शीतलं यद्गङ्गाया वाः तस्मिन् मज्जनं स्नानं नित्यं प्रतिदिनमरुणोदयकाले 'चतस्रो घटिकाः प्रातररुणोदय उच्यते' इत्युक्तकाले व्यधित चकार ॥ ४३ ॥

मन्दोपकारिणी – मज्जनमिति ॥ पृषतां वायूनाम्। 'पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः' इत्यमरः, अधिपस्य स्वामिनः मुख्यवायोः इत्यर्थः अंशः एकदेशः अवतारभूतः एषः मध्वाचार्यः नित्यं प्रतिदिनं अरुणोदयकाले अरुणः सूर्यसारथिः तस्य उदयः प्रादुर्भावः यस्मिन् अरुणोदयः, स चासौ कालश्च अरुणोदयकालः तस्मिन् सूर्योदयात्पूर्वं घटिकाचतुष्टयात्मककाल इत्यर्थः। 'चतस्रो घटिकाः प्रातररुणोदय उच्यते' इति वचनात्। शीतलगङ्गावारि गङ्गायाः अलकनन्दाख्यायाः भागीरथ्याः वाः जलं गङ्गावाः। 'आपः स्त्री भूम्निवार्वारि' इत्यमरः। शीतलं शीतं च तत् गङ्गावाश्च शीतल-गङ्गावाः तस्मिन् शीतलगङ्गावारि। 'तुषारः शीतलः शीतः' इत्यमरः। मज्जनं स्नानं व्यधित चकार। नराः तत्र विद्यमानाः मनुष्याः हिमभीताः हिमेन नीहारेण भीताः त्रस्ताः सन्तः। 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इत्यमरः। यत् शीतलं जलं न स्पृशन्ति हिमभयेन तत्रत्याः केऽपि शीतलजलस्पर्शनमपि कदाचिदपि न कुर्वन्ति किमुत स्नानं तादृशेऽपि शीतलजले प्रतिदिनं स्नानं चकारेति भावः। 'स्पृश संस्पर्शे' इत्यतो लट् परस्मैपदम्। अनेन कर्माधिकारी पुरुषः अतिक्लेशमनुभूयापि प्रातःस्नानं चरेत् न तु त्यजेत् इत्युक्तं भवति ॥ ४३ ॥

काष्ठमौनमदधादुपवासं शुद्धमप्यकृत शुद्धहृदिच्छन्।
नित्यतुष्टहरितोषविशेषं चिन्तयन्प्रभुमनन्तमठान्तः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – काष्ठमौनमिति ॥ नित्यं सदा तुष्टः स्वस्य प्रीतस्तादृशो यो हरिः तस्य तोषविशेषं इच्छन्। शुद्धं हृत् ज्ञानं यस्य सः श्रीमध्वाचार्यः। अनन्तमठस्य अन्तर्मध्ये, अन्तरित्यव्ययम्। अनन्तमठ इति मनुष्यगोचरबदरिकाश्रमे नारायणमन्दि-रस्याख्या। तदन्तरित्यर्थः। प्रभुं श्रीनारायणं चिन्तयन् काष्ठमौनं काष्ठमौनव्रतं अदधात् चकार। शुद्धमुपवासं निरशनव्रतमपि चक्रे ॥ ४४ ॥

मन्दोपकारिणी – काष्ठमौनमिति ॥ शुद्धहृत् शुद्धं रागादिरहितं निष्काममिति यावत् हृत् अन्तःकरणं यस्य स तथोक्तः मध्वाचार्यः । नित्यतुष्टहरितोषविशेषं नित्यं सर्वदा तुष्टस्य प्रीतस्य हरेः तोषविशेषं तोषस्य प्रीतेः विशेषं अतिशयं इच्छन् सन् विष्णुप्रीत्यतिशयाय इत्यर्थः । विष्णुप्रीतिकामनायाः अदोषत्वादिति भावः । अनन्तमठान्तः अनन्तमठस्य अनन्तमठाख्यनारायणदेवालयस्य अन्तः मध्ये । 'अन्तर्मध्ये तथा प्रान्ते' इति विश्वः । प्रभुं नारायणं चिन्तयन् ध्यायन् । काष्ठमौनं काष्ठया उत्कर्षेण अतिशयेन । 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः । मौनं अभाषणव्रतं । 'अथ मौनमभाषणम्' इत्यमरः । लोकिकभाषणवर्जनरूपं मौनं अदधात् चकार । 'डु धाञ् धारणपोषणयोः लङ् परस्मैपदं अदधात् अदधाताम् अदधुः' । शुद्धं आचमनोदकं विना जलफलाद्याहाररहितम् उपवासं अनशनव्रतमपि अकृत कृतवान् । 'डु कृञ् करण इत्यतो लुङात्मनेपदं अकृत अकृषातां अकृषत' ॥ ४४ ॥

प्रैरयत्स्वचरणे रतचित्तं मध्वमत्र दिनमण्डलमेनम् ।
स्वाश्रमोपगमनाय मुकुन्दो दीप्तिदृष्टिविदितागतिरन्यैः ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – प्रैरयदिति ॥ अन्यैः श्रीमध्वेतरैर्दीप्तेः प्रकाशविशेषस्य दृष्टिर्दर्शनं तया विदिता ज्ञाताऽऽगतिः प्राप्तिर्यस्य स मुकुन्दः श्रीवेदव्यासः, अत्रानन्तमठे दिनानां मण्डलं 'कालाध्वनो'रिति द्वितीया निरन्तरमष्टचत्वारिंशद्दिनेष्वित्यर्थः । स्वचरणे स्वपादे रतं आसक्तं चित्तं यस्य तमेनं मध्वं स्वाश्रमस्योपगमनाय प्राप्तये प्रैरयत् प्रेरयामास । ईर प्रेरणे लङ् । वेदव्यासः रात्रावागत्य स्वकीयोत्तरबदरिकाश्रममागन्तुं श्रीमध्वं प्रेरयामास यदा तदाऽस्यागमनं शिष्यादिभिः प्रकाशविशेषं दृष्ट्वा ज्ञातमित्यभिप्रायः ॥ ४५ ॥

मन्दोपकारिणी – प्रैरयदिति ॥ मुकुन्दः वेदव्यासः । अत्र अनन्तमठान्तः । दिनमण्डलं दिनानां समूहं कतिचिद्दिवसेषु इत्यर्थः । 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रात् मण्डलमित्यत्र द्वितीया । स्वचरणे स्वस्य आत्मनः चरणे पादे रतचित्तं रतं आसक्तं चित्तं मनः यस्य स तथोक्तः तं एनं मध्वम् । स्वाश्रमोपगमनाय स्वस्य आश्रमः हिमवत्पर्वतोत्तरदिग्भागे विद्यमानः मनुष्यगमनायोग्यः बदरिकाश्रमः तं प्रति उपगमनाय प्राप्तये स्वाश्रमं प्रति आगन्तुं इत्यर्थः । प्रैरयत् प्रेरयामास । 'प्रपूर्वात् ईर प्रेरण इत्यस्माल्लङ् परस्मैपदं प्रैरयत्

प्रैरयतां प्रेरयन्'। कथंभूतः अन्यैः मध्वेतरशिष्यैः दीप्तिदृष्टिविदितागतिः दीप्तेः प्रकाशविशेषस्य दृष्टिः दर्शनं तेन विदिता ज्ञाता अगतिः आगमनं यस्य स तथोक्तः। 'दृष्टिर्ज्ञानेक्ष्णिदर्शने' इत्यमरः। मध्वे कतिचिद्दिनेषु अनन्तमठान्तः वसति सति कदाचित् वेदव्यासः रात्रौ आगत्य एनं मध्वं स्वकीयबदरिकाश्रमं प्रति आगन्तुं प्रेरयामास। तस्य वेदव्यासस्य आगमनं तु शिष्यादिभिः प्रकाशविशेषं दृष्ट्वा ज्ञातमित्यभिप्रायः॥ ४५॥

नक्तमेव भगवत्युपयाते प्रोदिते सति सहस्रमरीचौ।
मौनवानलिखदुत्तमचित्तः शिष्यशिक्षणपरः करुणावान्॥ ४६॥

पदार्थदीपिकोद्बोधिका – नक्तमिति॥ भगवति श्रीवेदव्यासे नक्तमेव रात्रावेव उपयाते स्वाश्रमं प्रति गते सति। सहस्रं मरीचयो यस्य तस्मिन् सूर्ये प्रोदिते सति। मौनमस्यास्तीति मौनवान्। तथापि करुणा दया अस्यास्तीति करुणावान् शिष्येषु कृपावानित्यर्थः। उत्तमं चित्तं यस्य स पूर्णप्रज्ञाचार्यः शिष्याणां शिक्षणं तस्मिन् परं तात्पर्यं यस्य तथा सन्नलिखत् शिष्यशिक्षणार्थं यद्वक्तव्यं तदलिखदिति भावः। लिख अक्षरविन्यासे लङ्॥ ४६॥

मन्दोपकारिणी – नक्तमिति॥ भगवति श्रीवेदव्यासे। नक्तमेव रात्रावेव 'दिवाह्नीत्यथ दोषा च नक्तं च रजनाविति' इत्यमरः। उपयाते गते सति। सहस्रमरीचौ सहस्रसङ्ख्याकाः मरीचयः किरणाः यस्य स तथोक्तः। 'भानुः करो मरीचिः स्त्रीपुंसयो-र्दीधितिः स्त्रियाम्' इत्यमरः। तस्मिन् सूर्ये प्रोदिते सति। सूर्योदयानन्तरमिति भावः। मौनवान् मौनं अस्यास्तीति मौनवान् वाङ्नियमवान्। तथापि करुणावान् करुणा कृपा अस्यास्तीति करुणावान् शिष्येषु दयावान्। उत्तमचित्तः उत्तमे सर्वोत्तमे भगवति चित्तं यस्य सः उत्तमचित्तः मध्वाचार्यः। शिष्यशिक्षणपरः शिष्याणां शिक्षणं हितोपदेशः तस्मिन् परः आसक्तस्सन् अलिखत्। 'लिख अक्षरविन्यास इत्यतो लङ् परस्मैपदम्'। मध्वः बदरिकाश्रमं प्रति जिगमिषुस्सन् मौनित्वात् शिष्येषु दयया हितोपदेशाय वक्तव्यं प्रमेयं पत्रे अलिखत्। पत्रमुखेन स्वाभिप्रायं ज्ञापितवान् इति भावः॥ ४६॥

नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः ।
नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्तिसदृशं हितरूपम् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – नेदृशमिति ॥ अलं सम्यग् शमलं पापं हन्ति नाशयतीति शमलघ्नमीदृशमेतत्क्षेत्रसदृशं स्थलं न अन्यन्न विद्यते । अस्य तीर्थरूपं सलिलं तस्य समं वाः जलमन्यत् न । अस्माकं उक्तिः अस्मदुक्तिस्तया सदृशं समानं हितरूपं वचनञ्च न । विष्णुना सदृशं दैवं क्वापि न विद्यते ननु ॥ ४७ ॥

मन्दोपकारिणी – किं लिलेख इत्यत आह **नेति ॥** अलं अत्यन्तं शमलघ्नं शमलानि पापानि हन्ति नाशयतीति शमलघ्नं अशेषपापक्षयकरम् । 'शमलं शकृदेनसोः' इति विश्वः । ईदृशं एतत्क्षेत्रसदृशं स्थलं अन्यत्क्षेत्रं पुण्यस्थानं न नास्ति । अस्य तीर्थसलिलस्य अत्र विद्यमानभागीरथीतीर्थजलस्य समं सदृशं 'वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्' इत्यमरः वाः सलिलं अन्यत् न नास्ति । विष्णुसदृशं विष्णोः सदृशं समानं दैवं देवता क्वापि नास्ति ननु नास्त्येव । अस्मदुक्तिसदृशं अस्माकं उक्तिः वचनम् । 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः । अस्मद्वचनस्य सदृशं अन्यत् हितरूपं इष्टापादकवचनं च नास्ति ॥ ४७ ॥

याति तावदधुनैव जनोऽयं व्यासरूपमजितं प्रदिदृक्षुः ।
आव्रजेदिह न वा स हि वेद स्वस्ति वोऽस्त्विति ययावथ मध्वः ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – यातीति ॥ अयं जनो 'व्यास इति रूपं यस्य' तमजितं श्रीहरिं प्रद्रष्टुं इच्छुः सन् अधुनैव इदानीमेव याति यावत् यास्यति । यावत्पुरानिपातयोर्लट् । अयं जन इह पुनराव्रजेदागच्छेन्न वा तदहं न वेद । स श्रीवेदव्यासो वेद हि जानाति हि । वो युष्मभ्यं स्वस्ति सुखमस्तु । 'स्वस्त्याशीः क्षेमपुण्यादौ' इत्यमरः । इत्यलिखदिति पूर्वेणान्वयः । अथ लेखनानन्तरं मध्वो ययौ ॥ ४८ ॥

मन्दोपकारिणी – यातीति ॥ अयं जनः मध्वाख्यः । व्यासरूपं वेदव्यासस्वरूपम् । अजितं हरिं प्रदिदृक्षुः द्रष्टुमिच्छन् सन् अधुनैव इदानीमेव । 'एतर्हि संप्रतीदानीमधुना सांप्रतं' इत्यमरः । याति गच्छति । तावत् सः मध्वः इह अस्मिन् अनन्तमठे पुनः आव्रजेत् वा

आगमिष्यति वा न वा नागमिष्यति वा अहं तदागमनं न वेद्मि किंतु स हि स एव व्यास एव वेद जानाति। 'हि हेताववधारणे' इत्यमरः। वः युष्माकं स्वस्ति आशीः सुखमिति यावत् क्षेमो वा, 'स्वस्त्याशीः क्षेमपुण्यादौ' इत्यमरः अस्तु स्यात् इति एतदर्थप्रतिपादकं वचनं अलिखत् इति पूर्वेणान्वयः। अथ एवं लेखनानन्तरं मध्वः ययौ। 'या प्रापण इत्यतो लिट् परस्मैपदं ययौ ययतुः ययुः'। 'व्रज गताविंत्यतो लिङ् परस्मैपदं आव्रजेत् आव्रजेतां आव्रजेयुः' विद ज्ञान इत्यतो लट् परस्मैपदं वेद विदतुः विदुः'। 'अस भुवीत्यतो लोट् परस्मैपदं अस्तु स्तात्, स्तां सन्तु' ॥ ४८ ॥

नाथ नाथ बत नोऽत्र विनाथान् मा त्यजोरुकरुणो भगवंस्त्वम्।
नोदितं स्मृतमपीति हि शिष्यैः स्वामिनोऽभिमतभङ्गभयेन॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – नाथ नाथेति॥ नाथ नाथ! स्वामिन्! तात्पर्येण द्विरुक्तिः सम्भ्रमे वा। भगवन् श्रीमध्व! उर्वी करुणा यस्य स त्वं, विगतो नाथो येषां तान्नोऽस्मानत्र विदेशे मा त्यज। न परित्यज। माशब्दोऽयं न तु माङ्, अतो न लुङ्। बत खेदे। शिष्यैः इति एवं वक्ष्याम इति स्मृतमपि मनसा चिन्तितमपि स्वामिनः गुरोः श्रीमध्वाचार्यस्य, अभिमतस्य अभीप्सितगमनस्य भङ्गाद्भयेन नोदितं नोक्तम्। अस्माभिः एवं विज्ञापिते सत्यसौ कृपालुत्वात् न गमिष्यति, तथा च अभिमतगमनभङ्गः स्यादिति भयेन नोक्तमिति भावः॥ ४९ ॥

मन्दोपकारिणी – नाथेति॥ बत इत्यामन्त्रणे खेदे वा। 'बतामन्त्रणे सन्तोष-खेदानुक्रोशविस्मये' इत्यमरः। हे नाथ ! हे नाथ ! हे स्वामिन् ! आदरात् द्विरुक्तिः संभ्रमे वा। हे भगवन् ! उरुकरुणः उर्वी बहुला करुणा यस्य स तथोक्तः त्वं विनाथान् न विद्यते नाथः प्रभुः येषां ते तथोक्ताः तान्। 'वि निषेधे पृथग्भावे' इति विश्वः। त्वां विना रक्षकरहितान्। नः अस्मान् अत्र विदेशे मा त्यज न विसृजोति 'अमानोनाः प्रतिषेधे' इत्यत्र पठितः माशब्दः न तु माङ्शब्दः। तेन 'त्यज' इति लोट् युज्यते। 'त्यज हानौ इति धातोः लोट् परस्मैपदं त्यज त्यजतम् त्यजत' इति। एवं बत खेदेन शिष्यैः स्मृतमपि एवं वक्ष्याम इति मनसा चिन्तितमपि नोदितं नोक्तं हि। कुतः स्वामिनः गुरोः

अभिमतभङ्गभयेन अभिमतस्य इष्टस्य गमनस्य भङ्गः नाशः तस्य भयेन अस्माभिः एवं विज्ञापिते सति असौ कृपालुत्वात् न गमिष्यति तथा च अभिमतस्य भङ्गः स्यादिति भावेन नोक्तमिति भावः ॥ ४९ ॥

सद्गुरोर्न विरहं सहमानः सत्यतीर्थयतिरन्वगमत्तम् ।
यस्त्रिवारमितरासुतशाखास्वर्थमग्र्यमशृणोत्पुरुसंख्यात् ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – सदिति ॥ यः सत्यतीर्थयतिः इतरादेव्याः सुतो महिदासाभिधो हरिः तेन दृष्टाः शाखा इतरासुतशाखास्तासु प्रतिपाद्यं अग्र्यमर्थं पुरुः पूर्णा संख्या ज्ञानं यस्य तस्मात् श्रीमध्वाचार्यात् त्रिवारं त्रिरावृत्ति अशृणोत्। सत्यतीर्थयतिः सद्गुरोः श्रीमध्वाचार्यस्य विरहं वियोगं न सहमानः सन् सोढुमशक्तः सन् तं श्रीमध्वं अन्वगमत्। अन्वगच्छत्। अत्र इतरासुतशाखास्वर्थं इत्यैकपदत्वेऽर्थस्य सुशब्देनाग्र्यत्वोक्तेः पुनरग्र्यपदवैय्यर्थ्यं स्यात् ॥ ५० ॥

मन्दोपकारिणी – सदिति ॥ सत्यतीर्थयतिः सत्यतीर्थश्चासौ यतिश्च सत्यतीर्थाख्यसन्यासी। सद्गुरोः सतां गुरोः मध्वाचार्यस्य विरहं वियोगं न सहमानः असहमानः सन् तं मध्वाचार्यं अन्वगमत् अनु पश्चात्। 'पश्चात्सादृश्ययोरनु' इत्यमरः, अगमत् पृष्ठतो जगामेति भावः। 'गम्लृ गतौ लुङ् परस्मैपदं अगमत् अगमताम् अगमन्'। यः सत्यतीर्थः, इतरासुतशाखासु इतरायाः इतरानामिकायाः स्त्रियः सुतस्य ऐतरेयस्य हरेः शाखासु प्रतिपाद्यम् अग्र्यं उत्तमं अर्थं त्रिवारं त्रिशः पुरुसंख्यात् पूर्णप्रज्ञाचार्यात् अशृणोत् शुश्राव। 'श्रु श्रवण इत्यस्मात् लङ् परस्मैपदं अशृणोत् अशृणुतां अशृण्वन्'। सः सत्यतीर्थः इति सम्बन्धः ॥ ५० ॥

दुर्गमार्गगतमप्यनुधावन् नाप सोऽयमरुणीभवतीने ।
लीलया सजवमाक्रममाणं व्याश्रयान्तरसुदूरशिलासु ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – दुर्गेति ॥ स सत्यतीर्थः। दुर्गो गन्तुमशक्यो यो मार्गस्तं गतमपि प्राप्तमप्यनुसृत्य धावति इति अनुधावन् अविलम्बेन धावन्नित्यर्थः। इने सूर्ये।

'मार्ताण्डस्तपनो विकर्तन इन' इति हलः। अरुणीभवति सति अस्ताभिमुखे सतीति यावत्। विगत आश्रयो यस्य तद्व्याश्रयमन्तरं मध्यं यासां ताः व्याश्रयान्तराः। सुदूरे स्थिताः शिलाः सुदूरशिलाः व्याश्रयान्तराश्च ताः सुदूरशिलाश्च तासु गिरिमध्ये परिघारूपासु शिलासु लीलयाऽनायासेन जवेन वेगेन सहितं यथा भवति तथा सजवमाक्रममाणं, आप्लुत्याप्लुत्याक्रम्य गच्छन्तमिति भावः। नाप न जगाम। सायङ्कालपर्यन्तमनुधावन्नपि सायङ्काले प्राप्ते सति सजवं गच्छन्तं श्रीमध्वमनुगन्तुमशक्तः स्वयं ततः परं न अनुजगामेति भावः॥ ५१॥

मन्दोपकारिणी – दुर्गेति॥ सोऽयं पूर्वोक्तः सत्यतीर्थः दुर्गमार्गगतमपि दुर्गः अन्यैः गन्तुं अशक्यश्चासौ मार्गश्च दुर्गमार्गः। 'दुः स्यात्कष्टनिषेधयोः' इति विश्वः। तस्मिन् गतमपि प्रयातमपि मध्वाचार्यं अनुधावन् अनुसृत्य धावन् अविलम्बेन गच्छन्नपि। इने सूर्ये। 'इनः सूर्ये नृपे पत्यौ' इति विश्वः। अरुणीभवति न अरुणः अरुणवत्संपद्यमानः अरुणीभवन् तस्मिन् रक्तवर्णे सति अस्ताभिमुखे सतीति यावत् तं मध्वं न आप न प्राप्तवान् कथंभूतं मध्वं व्याश्रयान्तरसुदूरशिलासु न विद्यते आश्रयः विश्रामस्थानं यस्मिन् तत् व्याश्रयं अन्तरं मध्यं यासां ताः व्याश्रयान्तराः सुदूरे बहुदूरे स्थिताश्च ताः शिलाः पाषाणाश्च सुदूरशिलाः व्याश्रयान्तराश्च ताः सुदूरशिलाश्च इति तथोक्ताः तासु विश्रामस्थलरहितासु सुदूरतो विद्यमानासु शिलासु इति भावः। लीलया अनायासेन। सजवं जवेन वेगेन सहितं यथा भवति तथा। 'जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रं' इत्यमरः। वेगेनेति यावत्। आक्रममाणं उत्पतन्तं आप्लुत्याप्लुत्यातिक्रम्य गच्छन्तमिति भावः। सत्यतीर्थः अत्यशक्यमार्गे गच्छन्तमपि मध्वं अनु त्वरया गच्छन् सायङ्काले सति विश्रामस्थलरहितदूरगतशिलासु त्वरया आप्लुत्य गच्छन्तं मध्वं अनुगन्तुं अशक्तस्सन् न प्राप्त इति भावः॥ ५१॥

आनिवृत्तवपुषा गुरुणारात् पाणिना ह्यभिनयेन सुनुन्नः।
त्रस्तधीरतियथौ स मुहूर्तात् तद्दिनोपगतमार्गमशेषम्॥ ५२॥

पदार्थदीपिकोद्बोधिका – आनिवृत्तेति॥ आनिवृत्तं पृष्ठतो द्रष्टुमावृत्तं वपुर्यस्य तेन गुरुणा श्रीमध्वाचार्येण, पाणिना करेणाभिनयेन पश्चाद्गमनसूचकपाणिचलनेन आरात् दूरे।

'आरादूरसमीपयोः' इत्यमरः। सुनुन्नः सम्यक् प्रेरितः स सत्यतीर्थः, त्रस्ता व्याघ्रादिभ्यो भीता धीर्यस्य तथा सन्नपि। तच्च तद्दिनञ्च तस्मिन्नुपगतः प्राप्तः स चासौ मार्गश्च तं मुहूर्तान्मुहूर्तकालात् अतिययौ अत्यगात्॥ ५२॥

मन्दोपकारिणी – आनिवृत्तेति॥ आनिवृत्तवपुषा पृष्ठभागे द्रष्टुं आ ईषत् किञ्चित् इति यावत्, निवृत्तं परावृत्तं वपुः देहः यस्य सः आनिवृत्तवपुः तेन। 'आङीषदर्थेऽभिव्याप्तौ' इत्यमरः। गुरुणा मध्वाचार्येण कर्त्रा। अभिनयेन स्वमनोभिप्रायसूचकेन। आरात् दूरात् पाणिना हस्तेन सुनुन्नः सम्यक् प्रेरितः सः सत्यतीर्थः। त्रस्तधीश्च सन् त्रस्ताः व्याघ्रादिभ्यः भीता धीः बुद्धिः यस्य सः। तद्दिनोपगतमार्गं तच्च तत् दिनं अहश्च तद्दिनं उदयमारभ्य सायङ्कालपर्यन्तमिति यावत्। उपगतं प्रयातं मार्गं अशेषं समस्तमपि मुहूर्तात् घटिकाद्वयरूपात् अतिययौ अति अतीत्य ययौ अगात्॥ ५२॥

आश्रमे निजजनानिह दृष्ट्वा तं प्रसादमहिमानममुष्य।
प्रोच्य तत्प्लवनमप्यतिचित्रं तस्य तैः सह सदास्मरदेषः॥ ५३॥

पदार्थदीपिकोद्बोधिका – आश्रम इति॥ एष सत्यतीर्थः, इह आश्रमे अनन्तमठे निजजनान् दृष्ट्वा तेभ्यस्तं स्वस्मिन् कृतममुष्य श्रीमध्वाचार्यस्य प्रसादमहिमानं अनुग्रहमहिमानं प्रोच्य, अतिचित्रं तत्प्लवनमपि श्रीमध्वाचार्यस्य गमनमपि प्रोच्य तैर्निजैः सह तस्यास्मरत्। तं श्रीमध्वाचार्यं अस्मरत्। अधीगर्थेति कर्मणि षष्ठी॥ ५३॥

मन्दोपकारिणी – आश्रम इति॥ एषः सत्यतीर्थः इह आश्रमे अनन्तमठे निजजनान् निजाश्च ते जनाश्च तान् स्वकीयजनान् दृष्ट्वा तेभ्यः अमुष्य मध्वाचार्यस्य तं प्रसादमहिमानं प्रसादस्य स्वस्मिन् कृतस्य मुहूर्तमात्रेणैव अतिदूरमार्गातिक्रमणरूपस्य अनुग्रहस्य महिमानं माहात्म्यं प्रोच्य अभिधाय अतिचित्रं अत्याश्चर्यं तत्प्लवनमपि तस्य मध्वाचार्यस्य प्लवनमपि आप्लुत्याप्लुत्य गमनमपि प्रोच्य तैः निजैः सह तस्य मध्वाचार्यस्य। 'अधीगर्थदयेशां कर्मणी'ति कर्मणि षष्ठी। तं मध्वाचार्यमित्यर्थः। सदा नित्यं अस्मरत् ध्यातवान्। मध्वाचार्यगमनानन्तरं शिष्याः नित्यं मध्वाचार्यं स्मरन्तः तत्रावसन् इति भावः। 'स्मृ चिन्तायां' इत्यतो लङ् परस्मैपदम्॥ ५३॥

वानरेन्द्र इव वायुजवोऽसौ भीमसेन इव दानवभीमः ।
उल्ललास गिरिपुङ्गवशृङ्गे स व्रजन् वृजिननाशननामा ॥ ५४ ॥

पदार्थदीपिकोद्बोधिका – वानरेन्द्र इति ॥ समुद्रलङ्घने वानरेन्द्र इव हनूमानिव । वायोर्जव इव जवो यस्यासौ सौगन्धिकवनं गच्छन् भीमसेन इव दानवभीमो दैत्यभयङ्करः । वृजिनस्य नाशनं यस्मात् तादृशं नाम यस्य स श्रीमध्वाचार्यो गिरिपुङ्गवस्य गिरिश्रेष्ठस्य हिमवतश्शृङ्गे शिखरे उल्ललास शुशुभे ॥ ५४ ॥

मन्दोपकारिणी – वानरेन्द्र इति ॥ समुद्रलङ्घने वानरेन्द्र इव वानराणां कपीनां इन्द्रः स्वामी हनुमानिव । वायुजवः वायुः वायुवत् जवो वेगो यस्य स तथोक्तः । सौगन्धिकवनं गच्छन् भीमसेन इव दानवभीमः दानवानां असुराणां भीमः भयङ्करः । 'भीमोम्लवेतसे घोरे शंभौ मध्यमपाण्डवे' इति विश्वः । असौ श्रीमध्वाचार्यः गिरिपुङ्गवश्रृङ्गे गिरिषु पर्वतेषु पुङ्गवानां श्रेष्ठानां । 'स्युरुत्तरपदेव्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यमरः । शृङ्गे शिखरे ''कूटोऽस्त्रीशिखरं शृङ्गं' इत्यमरः । व्रजन् गच्छन् । वृजिननाशननामा वृजिनानां अंघानां नाशनं नाशकरं नाम यस्य स तथोक्तः । 'कलुषं वृजिनैनोघं' इत्यमरः । सः मध्वाचार्यः उल्ललास शुशुभे । 'उत्पूर्वात् लस् श्लेषणक्रीडनयोः इत्यतो लिट् परस्मैपदम्' ॥ ५४ ॥

बहुसत्त्वगणं सविकं समहाविषमोक्षमहाहिमवन्तमयम् ।
विषमोक्षमहाहिमवन्तमयन्नगमैक्षत फुल्लदृगस्तभयः ॥ ५५ ॥

भावप्रकाशिका – बहुसत्वगणमवन्तं समहाविषमोक्षमहानागं विषमऋषभतेजाः । अयन् गच्छन् ॥ ५५ ॥

पदार्थदीपिकोद्बोधिका – बह्वति ॥ बहुसत्वगणं, सविकं, समहाविषमोक्षमहाहिं, अवन्तं, अयं, विषमोक्षमहाः, हिमवन्तं, अयन्, नगं, ऐक्षत, फुल्लदृक्, अस्तभयः । अयन्नुतरबदरीं गच्छन् विषमः क्रुद्धो य उक्षा वृषभः । 'उक्षानड्वान्बलीवर्दः' इति हलः । तस्य मह इव तेज इव महः तेजो यस्य सोऽयं श्रीमध्वाचार्याः, विभिः पक्षिभिः सहितं

सविकं, महतो विषस्य मोक्षो मोचनं तेन सहिताः समहाविषमोक्षास्तादृशा महाहयो महासर्पा यस्मिंस्तम्। बहवो ये सत्वाः प्राणिनस्तेषां गणं समूहम्। 'सत्वोऽस्त्री जन्तुषु क्लीबे व्यवसाये पराक्रमे' इति वैजयन्ती। अवन्तं रक्षन्तं हिमवन्तं नगं गिरिम्। ऐक्षत ददर्श। अत्र तोटकवृत्तम्। 'यदि तोटकमम्बुधिसैः कथितम्' इति तल्लक्षणात्॥ ५५॥

मन्दोपकारिणी – बहति॥ बहुसत्वगणं सविकं समहाविषमोक्षमहाहिं अवन्तं अयं विषमोक्षमहाः हिमवन्तं अयन् नगं इति पदच्छेदः। विषमोक्षमहाः न विद्यते समो यस्य असौ विषमः असमः स चासौ उक्षा बलीवर्दश्च विषमोक्षः। 'उक्षा भद्रो बलीवर्दः' इत्यमरः। तद्वत् महः तेजो यस्य सः विषमोक्षमहाः। 'महो भवेदुत्सवतेजसोश्च' इति विश्वः। बलाढ्यवृषभतुल्यः इत्यर्थः। फुल्लदृक् फुल्ले विकसिते दृशौ यस्य स तथोक्तः। 'फुल्लश्चैते विकसिते' इत्यमरः। अस्तभयः अस्तं निरस्तं भयं यस्मात् स तथोक्तः। अयन् गच्छन् अयं श्रीमध्वाचार्यः। हिमवन्तं हिमवन्नामकं नगं शैलं 'शैलवृक्षौ नगावगौ' इत्यमरः। ऐक्षत ददर्श। 'ईक्ष दर्शन इत्यतो लङात्मनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त'। कथंभूतं नगम्, सविकं विभिः पक्षिभिः सहितः सविः सविरेव सविकः तम्। 'शकुन्तः शकुनिर्विश्व-पतङ्गोवीश्वरोऽन्यथेति' विश्वः। समहाविषमोक्षमहाहिं महत् अत्युग्रं च तत् विषं गरलं च महाविषं महाविषस्य मोक्षेण विसर्गेण सहिताः समहाविषमोक्षाः महान्तः स्थूलदेहाश्च ते अहयः भुजङ्गाश्च महाहयः समहाविषमोक्षाः महाहयो यस्मिन् स तथोक्तः तम्। 'भुजङ्गोऽहिर्भुजङ्गमः' इत्यमरः। बहुसत्वगणं बहूनि च तानि सत्वानि जन्तवश्च बहुसत्वानि। 'सत्वमस्त्री तु जन्तुषु' इत्यमरः। बहुसत्वानां सिंहव्याघ्रादीनां प्राणिनां गणं समूहं अवन्तम् रक्षन्तम् वृत्तं तु तोटकम् 'वद। तोटकमम्बुधि सकारयुतम्' इत्युक्तेः॥ ५५॥

सुहसितकमलाकरोपगूढं सुजनसुखार्थमनन्तभोगशय्यम्।
विकसितसुमनोघटागमुच्चं मरकतरत्नमयस्थलाग्र्यशोभम्॥ ५६॥

भावप्रकाशिका – सुफुल्लैः कमलाकरैः सुहसितकमलायाः कराभ्यां च। गन्धर्वादि-सुजनानां सुखाय अपरिमितशय्यासहितं सुजनसुखप्रयोजनं च। विकसितपुष्पसमूहवृक्षं देवसमूहगतं च। मरकतरत्नमयस्थलैरग्र्या शोभा यस्य, स्थलवदग्र्यशोभं च॥ ५६॥

पदार्थदीपिकोद्बोधिका – सुहसितेति ॥ तदा स्वानन्दतीर्थस्तं धरणीधरं पर्वतं दृष्ट्वा मुररिपुं हरिं अस्मरत् इत्यन्त्ययुग्मम्। अत्रोक्तविशेषणानि गिरौ हरौ च यथायोग्यं योजनीयानि। कथंभूतं धरणीधरमित्यत उच्यते सुहसितेत्यादिना। सुहसिता अत्यन्तं विकसिता ये कमलाकराः पद्मिन्यस्तैरुपगूढं परिवृतम्। हरिपक्षे तु, सु शोभनं हसितं मन्दहासो यस्याः सा सुहसिता सा च सा कमला रमा च तस्याः करौ ताभ्यामुपगूढं आश्लिष्टम्। सुजनानां सुकृतिनां सुखायेति सुखार्थं, अनन्ता भोगाः स्रगादयः, ते च शय्याः पर्यङ्कास्ते च भोगशय्याः अनन्ता अपरिमिता अविनाशिनो वा भोगशय्या यस्य तम्। हिमवत्प्रदेशस्य भूस्वर्गत्वादिति भावः। हरौ तु, सुजनसुखार्थमनन्तभोगः शेषशरीरं शय्या यस्य तम्। सज्जनसुखार्थं हि भगवाननन्तभोगशय्यो भवति। तच्चोक्तं 'माधवश्चतुरो मासान् सर्वभूतहिताय वै। स्वापं यास्यति शेषाङ्के लक्ष्म्या सह जगत्पतिः' इति। विकसितानि यानि सुमनांसि पुष्पाणि तेषां घटा समूहः। घट सङ्घात इति धातोः। संसर्गो वा येषां ते विकसितसुमनोघटास्तादृशा अगा वृक्षा यस्मिंस्तम्। 'घटा घटनगोष्ठीभघटनासु प्रयुज्यत' इति विश्वः। हरौ तु, विकसिताः सन्तुष्टा ये सुमनसो देवास्तेषां घटा समूहः। तां गच्छतीत्यन्तर्यामितया विशतीति तम्। यद्वा विकसितसुमनसां सन्तुष्टदेवानां या घटा गोष्ठी तां गच्छतीति तथोक्तस्तम्। उच्चं उन्नतमुत्तमं वा। हरौ तु, उच्चं सर्वोत्तमम्। मरकतरत्नमयानि यानि स्थलानि तैः अग्र्या श्रेष्ठा शोभा कान्तिर्यस्य तम्। हरौ तु, मरकतरत्नमयस्थलवदग्र्या शोभा यस्य तमस्मरदित्यन्वयः। पुष्पिताग्रावृत्तम्। 'अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा' इति लक्षणात्॥ ५६ ॥

मन्दोपकारिणी – सुहसितेति ॥ तदा गमनकाले। स्वानन्दतीर्थः शोभनश्चासौ आनन्दतीर्थश्च स्वानन्दतीर्थः मध्वः तं धरणीधरं भूधरं हिमवत्पर्वतं दृष्ट्वा। मुररिपुं मुरस्य मुरनामकस्य दैत्यस्य रिपुं शत्रुं हरिं अस्मरत् सस्मार इत्यन्तं कुलकम्। अत्र श्लोकयुग्मे प्रोक्तानि विशेषणानि गिरौ हरौ यथायोग्यं योजनीयानि। तथा हि– कथम्भूतं धरणीधरम्। सुहसितकमलाकरोपगूढं सुहसिताः अत्यन्तं विकसिताश्च ते कमलाकराः सरांसि च 'पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः' इत्यमरः। तैः उपगूढं परिवृतम्। सुजनसुखार्थं सुजनानां पुण्यसंपादनवतां सज्जनानां सुखार्थं सुखप्राप्तये। अनन्तभोगशय्यं भोगाः शृङ्गारादयश्च शय्याः तल्पाश्च भोगशय्याः अनन्ताः अपरिमिताः अविनाशिन्यो वा भोगशय्याः यस्मिन् स तथोक्तः तम्। 'अनन्तोऽनवधावपि' इत्यमरः। हिमवत्पर्वतप्रदेशस्य

भूस्वर्गत्वात् पुण्यवतां भोगसाधनोऽयमिति भावः। विकसितसुमनोघटागं विकसिताः सुमनसः पुष्पाणि च विकसितसुमनसः। 'स्त्रियः सुमनसः पुष्पं' इत्यमरः। विकसितसुमनसां घटा समूहः येषु विकसितसुमनोघटाः अगाः वृक्षाः यस्मिन् स तथोक्तः तम्। 'अगः शैले द्रुमे भानौ' इति विश्वः। उच्चं उन्नतम्। 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गः' इत्यमरः। मरकतरत्न-मयस्थलाग्र्यशोभं मरकतानि च तानि रत्नानि च मरकतरत्नानि हरिन्मणिनामकानि रत्नानि इत्यर्थः। 'अश्मगर्भो हरिन्मणिः' इत्यमरः। मरकतरत्नानि मयाः प्रधानाः येषु तानि मरकतरत्नमयानि। 'प्राधान्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा' इत्यभिधानम्। तानि च तानि स्थलानि च मरकतरत्नमयस्थलानि तैः अग्र्या उत्तमा शोभा कान्तिः यस्य सः तथोक्तः तम्। 'शोभाभिख्याकान्तिद्युतिश्छविः' इत्यमरः। इन्द्रनीलमणिमयप्रदेशविशेषैः शोभमानमित्यर्थः। मुरारिपुपक्षे तु, सुहसितकमलाकरोपगूढं शोभमानं हसितं मन्दहासो यस्याः सा सुहसिता च सा कमला लक्ष्मीश्च सुहसितकमला। 'कमला श्रीर्हरिप्रिया' इत्यमरः। कमलायाः कराभ्यां हस्ताभ्यां उपगूढं आश्लिष्टं सुजनसुखार्थं सुजनानां सर्वप्राणिनां सुखार्थं हिताय अनन्तभोगशय्यं अनन्तस्य शेषस्य 'शेषोऽनन्तो वासुकिस्तु' इत्यमरः। भोगः शरीरम्। 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः। स एव शय्या तल्पः यस्य स तथोक्तः तम्। 'माधवश्चतुरो मासान् सर्वभूतहिताय वै। स्वापं यास्यति शेषाङ्के लक्ष्म्या सह जगत्पतिः ॥' इति वचनात् सर्वभूतहिताय शेषशरीरे शयनं प्रसिद्धम्। विकसितसुमनोघटागं विकसिताः हर्षिताश्च ते सुमनसः देवाश्च विकसितसुमनसः। 'मालायां पण्डिते पुष्पे देवे सुमनसोऽभिधा' इति विश्वप्रकाशे। विकसितसुमनसां घटायां समूहे गच्छति तिष्ठतीति विकसितसुमनोघटागं उच्चं सर्वोत्तमम्। मरकतरत्नमयस्थलाग्र्यशोभं मरकतरत्नमयस्थलवत् अग्र्या उत्तमा शोभा यस्य स तथोक्तः तं मरकतमणिश्याममिति यावत्। पुष्पिताग्रावृत्तं 'अयुजि नयुगरेफतो यकारो युजि च न जौ जरगाश्च पुष्पिताग्रे'ति तल्लक्षणात्॥ ५६ ॥

पादोपान्तनमन्महामुनिगणं हेमप्रदीप्ताम्बरं
श्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं हाटकैः।
दृष्ट्वा तं धरणीधरं सुवनमालोल्लासिनं सुन्दरं
स्वानन्दाकृतिमस्मरन्मुररिपुं स्वानन्दतीर्थस्तदा ॥ ५७ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्य विरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के षष्ठः सर्गः ॥

भावप्रकाशिका – स्वशृङ्गहेम्ना प्रदीप्तगगनं हेमवत्प्रदीप्तं वस्त्रं च। कलापः समूहः काञ्ची च कटको नितम्बो वलयं च। धरणीधरं गिरिं नारायणम्॥ ५७॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीसुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां षष्ठः सर्गः॥

पदार्थदीपिकोद्बोधिका – पादोपान्तेति॥ स्वानन्दतीर्थस्तदा, पादाः प्रत्यन्तपर्वतास्तेषामुपान्ते समीपे नमन्तो नमस्कारं कुर्वन्तो ये महामुनिगणा महामुनिसमूहा यस्मिंस्तम्। हरिपक्षे तु, पादोपान्तनमन्तः श्रीहरिचरणसमीपे नमस्कारं कुर्वन्तो महामुनिगणा यस्य तम्। हेम्ना स्वशिखरगतस्वर्णेन प्रदीप्तं प्रदीपितमम्बरमाकाशो येन तम्। हरौ तु, हेमवत् स्वर्णवत् प्रदीप्तमम्बरं यस्य तम्। पीताम्बरधरमित्यर्थः। श्रीमन्ति कान्तिमन्ति यानि रत्नानि तेषां कलापः समूहो यस्मिंस्तम्। 'कलापो बर्हभूषयोः सङ्गतो भूषणे काञ्च्यां' इति हेमचन्द्रः। हरौ तु, श्रीमन्ति रत्नानि येषु ते श्रीमद्रत्नास्तादृशाः कलापा भूषणानि यस्य तम्। हाटकैः सुवर्णैः। 'सुवर्णं हेम हाटकं' इत्यमरः। अग्र्यकटका उन्नतनितम्बास्तैर्विभ्राजितं शोभितम्। हरौ तु, हाटकैः सौवर्णैः अग्र्याणि यानि कटकानि हस्तवलयानि तैर्विभ्राजितम्। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्' इत्यमरः। शोभनानि वनानि सुवनानि तेषां मालाः पङ्क्तयस्ताभिरुल्लसितुं शीलमस्येति तम्। 'माला तु पङ्क्तौ पुष्पादिदामनि' इति हेमचन्द्रः। हरौ तु, सुवनमाला शोभनवनमाला तयोल्लसितुं शीलमस्येति तम्। सुन्दरं रमणीयम्। हरौ तु, सुललितम्। शोभनमानन्दो यस्याः सा स्वानन्दा। स्वानन्दहेतुरित्यर्थः। तादृशी आकृतिस्स्वरूपं यस्य तम्। हरौ तु, स्वानन्दो निर्दोषस्वरूपभूतानन्दः स एवाकृतिर्देहो यस्य तम्। धरणीं धरतीति धरणीधरः तं हिमवन्तं दृष्ट्वा, मुररिपुं श्रीहरिमस्मरत्। स्मृ आध्याने लङ्। अत्र शार्दूलविक्रीडितवृत्तम्॥ ५७॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां षष्ठः सर्गः॥

मन्दोपकारिणी – पादोपान्तेति॥ पुनः कथंभूतं धरणीधरम्। पादोपान्तनमन्महामुनिगणं पादाः प्रत्यन्तपर्वताः तेषां उपान्तेषु समीपेषु नमन्तः नमस्कारं कुर्वन्तः महान्तः श्रेष्ठाश्च ते मुनयः ऋषयश्च महामुनयः पादोपान्तनमन्तश्च ते महामुनयश्च तेषां गणः समूहो यस्मिन् सः तम्। तत्र बहवो मुनयः नमस्कारादिसाधनं कुर्वन्तीति भावः।

हेमप्रदीप्ताम्बरं शिखरगतहेम्ना सुवर्णेन प्रदीप्तं प्रकाशितं अम्बरं आकाशं येन स तथोक्तः तम्। श्रीमद्रत्नकलापं श्रीः एषु अस्तीति श्रीमन्ति कान्तिमन्ति, तानि च तानि रत्नानि च श्रीमद्रत्नानि तेषां कलापः समूहः यस्मिन् स तथोक्तः तम्। मुक्ताप्रवालपद्मरागादि-रत्नसमूहोपेतं इत्यर्थः। हाटकैः सुवर्णमयैः। 'हिरण्यं हेम हाटकं' इत्यमरः। अग्र्यकटकैः अग्र्याः उत्तमाश्च ते कटकाः तैः। विभ्राजितं भासमानम्। सुवनमालोल्लासिनं शोभनानि विकसितानि च तानि वनानि च सुवनानि सुवनानां मालाभिः पङ्क्तिभिः समूहैः इति यावत्। उल्लासी शोभमानः तम्। 'माला चोन्नतभूर्माला पङ्क्तौ पुष्पादिमालिका' इति विश्वः। सुन्दरं रमणीयं स्वानन्दाकृतिं स्वानन्दप्रदा आकृतिः आकारो यस्य स तथोक्तः तम्। मुरारिपुपक्षे तु। पादोपान्तनमन्महामुनिगणं पादयोः चरणयोः उपान्ते समीपे नमन्तः प्रह्वीभूताः महतां मुनीनां देवादीनां ज्ञानिनां गणाः समूहाः यस्य स तथोक्तः। सर्वे जनाः हरिपादसन्निधौ प्रह्वीभूताः तिष्ठन्तीति भावः। हेमप्रदीप्ताम्बरं हेमवत् सुवर्णवत् प्रदीप्तं दीप्यमानं अम्बरं वस्त्रं पीताम्बरं यस्य स तथोक्तः तम्। 'अम्बरं व्योम्नि वाससि' इत्यमरः। श्रीमद्रत्नकलापं श्रीमतां कान्तिमतां रत्नानां कलापो भूषणं यस्य स तथोक्तः तम् । रत्नखचितालङ्कारोपेतं इत्यर्थः। 'कलापो भूषणे बर्हे' इत्यमरः। हाटकैः सुवर्णविकारैः अग्र्यकटकैः उत्तमवलयैः करभूषणैः कङ्कणैः इत्यर्थः। विभ्राजितं शोभमानम्। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्' इत्यमरः। सुवनमालोल्लासिनं शोभमाना च सा वनमाला वैजयन्तीमाला च तया उल्लासिनं शोभमाननम् सुन्दरं शोभमानम्। स्वानन्दाकृतिं सु निर्दोषश्चासौ आनन्दः सुखं च स एव आकृतिः देहो यस्य स तथोक्तः तम्। हरिगिर्योः शब्दतः सादृश्यात् सदृशपर्वतदर्शनेन सदृशनारायणस्मरणमभूत् इति भावः। वृत्तं तु शार्दूलविक्रीडितम्। 'सूर्याश्वैर्यदि मः सजौ सततगौः शार्दूलविक्रीडितं' इति तल्लक्षणात्॥ ५७॥

॥ इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः

अथ हैमवते तटान्तरे बदरीषण्डविशेषमण्डितम् ।
परमाश्रममाश्रयं श्रियः सकलज्ञः स ददर्श विश्रुतम् ॥ १ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ हिमवल्लङ्घनानन्तरम् । स सकलज्ञः सर्वज्ञः श्रीमध्वाचार्यो हिमवतः सम्बन्धि हैमवतं तस्मिन् । अन्यत्तटं तटान्तरं तस्मिन्हिमवत उत्तरपार्श्व इति यावत् । बदरीणां बदरीवृक्षाणां यानि षण्डानि समूहास्तैर्विशेषमण्डितो विशेषेणालङ्कृतस्तम् । 'षण्डं पद्मादिसङ्घाते' इति विश्वः । श्रियो रमायाश्शोभाया वा आश्रयमाधारं विश्रुतं प्रसिद्धं परमाश्रमं उत्तमाश्रमं ददर्श । उत्तरबदरिकाश्रमं ददर्शेति भावः । अस्मिन्सर्गे प्रायः सुन्दरीवृत्तम् । 'अयुजोर्यदि सा लगौ लगौ समयौ स्थौ रलगाश्च सुन्दरी'ति तल्लक्षणम् ॥ १ ॥

मन्दोपकारिणी – अथेति ॥ अथ हिमवत्पर्वतदर्शनानन्तरम् । सकलज्ञः सर्वज्ञः । सः मध्वाचार्यः । हैमवते हिमवत्पर्वतस्य इदं हैमवतं तस्मिन् हिमवत्संबन्धिनि तटान्तरे अन्यत् तटं तटान्तरं तस्मिन् उत्तरपार्श्वे इति यावत् । बदरीषण्डविशेषमण्डितं बदरीणां 'कर्कन्धूर्बदरीकोली' इत्यमरः । षण्डैः समूहैः विशेषेण अतिशयेन मण्डितं अलङ्कृतं 'षण्डः सङ्घात उच्यते' इति विश्वः । श्रियः, रमायाः आश्रयं आवासस्थानं लक्ष्मीसन्निधानोपेतामिति यावत् । विश्रुतं प्रसिद्धम् । 'प्रतीते प्रथितज्ञातवित्तविज्ञातविश्रुताः' इत्यमरः । परं उत्तमम् । 'दूरानात्मोत्तमाः पराः' इत्यमरः । आश्रमं वेदव्यासस्य आवासस्थानभूतं बदरिकाश्रमं इत्यर्थः । परमाश्रमं परमस्य सर्वोत्तमस्य वेदव्यासस्य आश्रमं परमाश्रमं इति एकं वा पदम् । ददर्श दृष्टवान् । 'दृशिर् प्रेक्षण इत्यतो लिट् परस्मैपदं ददर्श ददृशतुः ददृशुः' । सुन्दरीवृत्तं 'विषमे समजागुरुः समे सभरालोऽथ गुरुर्वियोगिनी' इति तल्लक्षणात् एतत् वृत्तस्य नामापि वैतालीयो वा सुन्दरी वा ॥ अस्मिन् सर्गे वेदव्यासस्य वेदव्याससंबद्धाश्रमाणां च सौन्दर्यस्य वर्णनात् प्रायः सुन्दरीवृत्तम् ॥ १ ॥

हिमवर्षरविप्रभासहाः पृथुसत्रप्रथिता द्विजाश्रयाः ।
अपि विष्णुपदस्पृशोऽलसन्नुभये यत्र विचित्रशाखिनः ॥ २ ॥

भावप्रकाशिका – सत्रं वनं यज्ञविशेषश्च। **द्विजाः** पक्षिणो ब्राह्मणाश्च। **शाखिनो** वृक्षा ऐतरेयकौषीतकबाष्कलशाकल्यपैङ्गिकाठकादयश्च ॥ २ ॥

पदार्थदीपिकोद्बोधिका – हिमेति ॥ स श्रीमध्वाचार्यः। हिमञ्च वर्षं वृष्टिस्तच्च रविप्रभा च, ताः सहन्त इति तथोक्ताः। वृक्षास्तु हिमादिनिवारकाभावात्तादृशाः। विप्रास्तु तपसि स्थित्वा धैर्येण तादृशा इति भावः। पृथूनि महान्ति यानि सत्राणि वनानि यज्ञाश्च तेषु प्रथिताः प्रसिद्धाः। 'सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि च' इत्यमरः। द्विजाश्रयाः पक्षिणां ब्राह्मणानां च आश्रयाः। 'दन्तविप्राण्डजा द्विजा' इत्यमरः। विष्णुपदं आकाशं हरिचरणं च स्पृशन्तीति विष्णुपदस्पृशः। 'वियद्विष्णुपदं' इत्यमरः। उभये, उभयविधा विचित्रा याः शाखा वृक्षाङ्गानि वेदविभागाश्च, ता एषां सन्तीति विचित्रशाखिनो नानाविधवृक्षा मुनयश्च। 'शाखा वेदविभागे च पादपाङ्गेऽन्तिकेऽपि च'। यत्र बदरिकाश्रमेऽलसन् अशोभन्त तं ददर्शेति पूर्वेणान्वयः ॥ २ ॥

मन्दोपकारिणी – आश्रममेव वर्णयति हिमेत्यादित्रिभिः श्लोकैः ॥ **हिमेति ॥** यत्र बदरिकाश्रमे। उभये द्विविधाः। विचित्रशाखिनः विचित्राः नानाविधाश्च ते शाखिनश्च विचित्रशाखिनः नानाविधवृक्षाः । ऋगादिनानाशाखावन्तो विप्राश्च उच्यन्ते विचित्र-शाखिपदेन। शाखाः येषां सन्तीति शाखिनः इति विग्रहः। 'वृक्षो महीरुहः शाखी' इत्यमरः। एवं वृक्षाः विप्राश्च। अलसन् अशोभन्त। 'लस विकास इति धातोः लङ् परस्मैपदं अलसत् अलसतां अलसन्'। यत्रेति यच्छब्दस्य तं आश्रमं ददर्श इति पूर्वश्लोकेन अन्वयः। कथंभूताः वृक्षाः विप्राश्च। हिमवर्षरविप्रभासहाः हिमं नीहारः। 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमं' इत्यमरः। वर्षं वृष्टिः। 'वृष्टिर्वर्षं तद्विघाते' इत्यमरः। रवेः सूर्यस्य प्रभा आतपः। हिमं च वर्षं च रविप्रभा च हिमवर्षरविप्रभाः ताः सहन्ते क्षमन्ते ते हिमवर्षरविप्रभासहाः वृक्षास्तु हिमादिनिवारकत्वाभावादेव हिमादिसहाः। विप्रास्तु तपस्वित्वात् धैर्येण तत्सहा इति ज्ञेयम्। पृथुसत्रप्रथिताः पृथूनि महन्ति च तानि सत्राणि वनानि यज्ञाश्च पृथुसत्राणि तेषु प्रथिताः प्रसिद्धाः। 'सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि च' इत्यमरः। वृक्षाः महावने प्रसिद्धाः। ब्राह्मणास्तु महायज्ञे प्रसिद्धाः। द्विजाश्रयाः द्विजानां पक्षिणां विप्राणां च आश्रयाः आधाराः 'दन्तविप्राण्डजा द्विजाः' इत्यमरः। वृक्षाः

पक्षिणामाश्रयाः विप्राः ब्राह्मणाश्रयाः। विष्णुपदस्पृशः विष्णुपदं आकाशं स्पृशन्ति ते विष्णुपदस्पृशः वृक्षाः अत्युच्छ्रिताः इति यावत्। 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः। विप्रास्तु विष्णोः पदं स्पृशन्ति स्मरन्ति इति विष्णुपदस्पृशः। अनेन श्लोकेन आश्रमे नानाविधाः वृक्षाः ऋग्यजुस्सामादिशाखाध्येतारो विप्राश्च सन्तीति उक्तं भवति ॥ २ ॥

श्रवणामृतगीर्गणैर्द्विजैः शुकमुख्यैः शुभपक्षिभिर्युतम्।
कमलेष्टतमस्थिरान्तरैरपि हंसैः परमैरमेचकैः ॥ ३ ॥

भावप्रकाशिका – श्रीशुकाचार्यमुख्यैः समयिभिश्च। कमलेष्टतमः कमलारमणः कमलान्येवेष्टतमानि च। परमहंसैः श्वेतच्छदश्रेष्ठैश्च। अमेचकैः श्वेतैर्निर्मलैश्च ॥ ३ ॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूतमाश्रममित्यत आह **श्रवणेति ॥** स श्रीमध्वाचार्यः। श्रवणानां श्रोत्राणाममृतायमानो यो गिरां वाचां गणः समूहो येषां तैः। मुनिपक्षे तु, श्रवणामृतगिरः, भगवद्गुणप्रतिपादकवचनानि, तासां गणो येषां तैः। शुकस्तन्नामकपक्षिविशेषः, शुकाचार्यश्च। सः मुख्यः प्रधानो येषां तैः। शुभा ये पक्षाः पतत्राणि शुभपक्षः, शुभसिद्धान्तश्च, एषां सन्तीति तादृशैर्द्विजैः, पक्षिभिर्ब्राह्मणैश्च वृतम्। कमलश्च तदिष्टतममतिप्रियश्चेति कमलेष्टतमं तस्मिन् स्थिरमन्तरं मानसं येषां तैः। कमलाया रमाया इष्टतमः प्रियतमः श्रीहरिस्तस्मिन् स्थिरमन्तरं मानसं येषां तैः। मेचकाः श्यामला न भवन्तीत्यमेचकास्तैरतिशुभ्रैरित्यर्थः। निर्मलैश्च, त्रिकरणशुद्धैरिति यावत्। 'कालः श्यामल-मेचका' इत्यमरः। परमैरुत्तमैर्हंसैर्हंसाख्यपक्षिभिः, सन्यासिभिश्च वृतमाश्रमं ददर्शेति पूर्वेणान्वयः ॥ ३ ॥

मन्दोपकारिणी – श्रवणेति ॥ पुनः कथंभूतं आश्रमं श्रवणामृतगीर्गणैः श्रवणयोः कर्णयोः। 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः। अमृतानि अमृततुल्यानि सुखकराणीति यावत्। गिरां ध्वनीनां गणाः समूहाः येषां ते तथोक्ताः तैः। शुकमुख्यैः शुकः शुकाख्यपक्षी मुख्यो येषां ते शुकमुख्याः तैः। शुभपक्षिभिः शोभनाः पक्षाः येषां ते शुभपक्षिणः तैः। 'गरुत्पक्षच्छदाः पत्रं' इत्यमरः। द्विजैः विहङ्गैः युतं युक्तम्। पुनः

कथंभूतम् श्रवणामृतगीर्गणैः श्रवणयोः अमृतायमानानां गिरां शास्त्रवचनानां गणाः येषां ते। शुकमुख्यैः शुकाचार्यः मुख्यः श्रेष्ठः येषां ते शुकमुख्याः तैः। शुभपक्षिभिः शुभः विष्णु-सम्बन्धित्वेन शोभमानः पक्षः सिद्धान्तः येषां अस्तीति शुभपक्षिणः तैः। द्विजैः मुनिभिः युतम्। पुनः कथंभूतम्। कमलेष्टतमस्थिरान्तरैः कमलं च तत् इष्टतमं अतिप्रियं च अतिप्रियकमलमिति यावत् तस्मिन् स्थिरं निश्चलं अन्तरं मनो येषां ते तथोक्ताः तैः कमलगतमकरन्दोत्सुकैः इत्यर्थः। अमेचकैः मेचकाः श्यामलाः न भवन्तीति अमेचकाः। 'कालः श्यामलमेचकाः' इत्यमरः। तैः शुभ्रैः इत्यर्थः। परमैः उत्तमैः। हंसैरपि हंसपक्षि-भिरपि युतम्। 'हंसास्तु श्वेतगरुतः' इत्यमरः। अनेन बदरिकाश्रमे बहवः कमलाकराः सन्तीति ध्वन्यते। पुनः कथंभूतम्। कमलेष्टतमस्थिरान्तरैः कमलायाः लक्ष्म्याः इष्टतमः अतिप्रियो हरिः तस्मिन् स्थिरं निश्चलं अन्तरं मनो येषां ते तथोक्ताः तैः। अमेचकैः निर्मलैः त्रिकरणशुद्धैः इति यावत्। परमैर्हंसैरपि सन्यासिभिश्च परमहंसाख्यैः योगिभिः अपि इत्यर्थः। 'हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। निर्लोभनृपतौ योगिमन्त्रभेदे परात्मनि' इति विश्वः। युतम्। अत्र आश्रमे श्राव्यध्वनिशुकादिपक्षिणः तत्रत्यसरस्सु कमलरसोत्सुक-हंसपक्षिणः सन्ति। तथा वेदशास्त्रप्रवचनश्रवणमननादिव्यापारकारिणः शुकाचार्यादिमुनयः तथा लक्ष्मीपतिं ध्यायन्तः परमहंसाश्च सन्तीति उक्तं भवति॥ ३॥

सुमनोनिकरेण पूरितं स्वमनोऽभीष्टदमल्पदुर्गमम्।
अपरस्परमत्सरप्रजं ननु वैकुण्ठमिवाच्युतालयम्॥ ४॥

पदार्थदीपिकोद्बोधिका – पुनः कथंभूतमित्यत आह—**सुमन इति॥** स श्रीमध्वा-चार्यः। सुमनसां पुष्पाणां निकरः समूहस्तेन पूरितम्। वैकुण्ठोऽप्येवं, शोभनं मनो येषां मुनीनां ते सुमनसस्तेषां निकरस्तेन पूरितमिति वा। वैकुण्ठपक्षे तु, सुमनोनिकरेण देवसमूहेन पूरितम्। स्वमनोऽभीष्टं 'आत्मीयज्ञानिधनवाची स्वशब्दः'। अत्र स्वशब्दे-नात्मीया उच्यन्ते। ते च स्वतन्त्रत्वात्स्वशब्दवाच्यभगवत्सम्बन्धिनः। तथा च स्वेषां स्वतन्त्रभगवत्सम्बन्धिनां सतां यन्मनः तस्य यदभीष्टं भगवद्दर्शनादिलक्षणं तद्ददातीति तथोक्तस्तम्। वैकुण्ठोऽप्येवं स्वमनोभीष्टदम्। अल्पैर्दुर्बलैर्ज्ञानभक्त्यादिबलवर्जितैरित्यर्थः। तैर्दुर्गमो गन्तुमशक्यस्तम्। वैकुण्ठोऽप्येतादृशः। न विद्यते परस्परं मत्सरोऽन्योन्यं मत्सरो

यासां ता अपरस्परमत्सरास्तादृशाः प्रजा जना यस्मिंस्तम्। वैकुण्ठोऽप्यपरस्परमत्सरप्रजः। वैकुण्ठमिव वैकुण्ठलोकवदच्युतालयोऽच्युतावासभूतस्तमाश्रमं ददर्शेति पूर्ववत्॥ ४॥

मन्दोपकारिणी – सुमन इति॥ पुनः कथंभूतम्। सुमनोनिकरेण सुमनसां पुष्पाणां निकरेण स्तोमेन। 'स्तोमौघनिकरव्रातवारसंघातसञ्चयाः' इत्यमरः। पूरितं नानाविधपुष्प-समूहपूर्णम्। स्वमनोभीष्टदं 'स्वातन्त्र्यात् स्व इति प्रोक्त' इत्युक्तेः परः स्वो हरिरित्युक्तेश्च स्वः भगवान् स्वे भगवति मनः येषां ते स्वमनसः। सुमनोभीष्टदं इति पाठे विष्णुरतत्वेन शोभनं मनो येषां ते सुमनसः भगवद्भक्ता इति यावत्। तेषां अभीष्टं वाञ्छितं ददातीति सुमनोभीष्टदः तम्। अल्पदुर्गमं अल्पैः ज्ञानभक्त्यादिबलरहितैः दुर्गमं गन्तुमशक्यम्। अपरस्परमत्सरप्रजं न विद्यते परस्परं अन्योन्यं मत्सरः शुभद्वेषः येषां ते अपरस्परमत्सराः। 'मत्सरो हि शुभद्वेषः' इति विश्वः। अपरस्परमत्सराः प्रजाः जनाः यस्मिन् सः तथोक्तः तम्। 'प्रजा स्यात् सन्ततौ जने' इत्यमरः। अच्युतालयं अच्युतस्य वेदव्यासस्य आलयं मन्दिरम्। पुनः कथंभूतम्। सुमनोनिकरेणपूरितं सुमनसां देवानां 'सुमनः पुष्पमालत्यो-स्त्रिदशे कोविदेऽपि च' इति विश्वः निकरेण पूरितं पूर्णं स्वमनोभीष्टदं अल्पदुर्गमं अपरस्पर-मत्सरप्रजं अच्युतस्य श्रीनारायणस्य आलयं वैकुण्ठलोकमिव स्थितं ननु॥ ४॥

तमिमं प्रविशन्तमाश्रमं द्व्यधिकत्रिंशदुदारलक्षणम्।
गुणसारविदः कुतूहलादवलोक्यर्षय इत्यचिन्तयन्॥ ५॥

पदार्थदीपिकोद्बोधिका – तमिति॥ गुणानां सारो विवेकः तं विदन्ति जानन्तीति तथोक्ताः। गुणानां सारासारविवेकज्ञा इत्यर्थः। ऋषय आश्रमं प्रविशन्तं द्वेऽधिके यस्याः सा द्व्यधिका सा च सा त्रिंशच्च द्व्यधिकत्रिंशदुदारलक्षणान्युत्तमलक्षणानि यस्य तम्। तमिमं श्रीमध्वाचार्यमवलोक्य कुतूहलात् कुतुकादिति वक्ष्यमाणरीत्याऽचिन्तयन्। चिति स्मृत्यां लङ्॥ ५॥

मन्दोपकारिणी – तमिति॥ गुणसारविदः गुणानां शुभधर्माणां सारं विदन्ति जानन्तीति गुणसारविदः गुणविशेषाभिज्ञाः इत्यर्थः। ऋषयः बदरिकाश्रमस्थाः मुनयः। इमं पूर्वोक्तविशेषणविशिष्टं आश्रमं वेदव्यासाश्रमं प्रविशन्तं प्रवेशं कुर्वन्तं द्व्यधिकत्रिंशदुदारलक्षणं

उदाराणां महताम्। 'उदारोदातृमहतोः' इत्यमरः। उत्तमपुरुषाणामिति यावत्। लक्षणानि शरीरलक्षणानि षण्णवत्यङ्गुलादीनि द्वाभ्यां अधिका च सा त्रिंशच्च द्व्यधिकत्रिंशत् द्वात्रिंशत्सङ्ख्याकानीत्यर्थः। तावन्ति उदारलक्षणानि यस्य स तथोक्तः। तं श्रीमध्वाचार्यं अवलोक्य दृष्ट्वा। कुतूहलात् कौतुकात्, इति वक्ष्यमाणप्रकारेण अचिन्तयन् आलोचयामासुः। 'चिति स्मृत्यां लङ् अचिन्तयत् अचिन्तयतां अचिन्तयन्' ॥ ५ ॥

कनकातुलतालसन्निभः कमलाक्षो विमलेन्दुसन्मुखः।
गजराजगतिर्महाभुजः प्रतियान् कोऽयमपूर्वपूरुषः ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – कनकेति ॥ कनकमयो योऽतुलतालोऽसदृशतालवृक्षः तस्य सन्निभः समानः। वृत्तपुष्टस्थूलदेह इति भावः। कमलवदक्षिणी यस्य सः। विगतं मलं कलङ्को यस्मात्सः विमलस्तादृशो य इन्दुस्तद्वत्सन्मुखं यस्य। तथा गजानां राजा गजराजस्तस्य गतिरिव गतिर्यस्य सः। महान्तौ भुजौ बाहू यस्य सः। प्रतियातीति प्रतियान् व्यासं प्रति गच्छन्नित्यर्थः। पूर्वो न भवतीत्यपूर्वः स चासौ पूरुषश्च। इतः पूर्वमस्माभिरदृष्टः पुरुष इत्यर्थः। अयं कः? ॥ ६ ॥

मन्दोपकारिणी – कनकेति ॥ कनकातुलतालसन्निभः अतुलः असदृशश्चासौ तालः तृणराजाख्यवृक्षश्च अतुलतालः। 'तृणराजाह्वयस्तालः' इत्यमरः। कनकः सुवर्णमयश्चासौ अतुलतालश्च कनकातुलतालः तस्य सन्निभः समानः वृत्तपुष्टस्थूलसुवर्णवर्णभुजाद्यवयवोपेतदेह इति भावः। कमलाक्षः कमलवत् अक्षिणी यस्य सः कमलाक्षः। विमलेन्दुसन्मुखः विमलः निष्कलङ्कः षोडशकलापरिपूर्णः स चासौ इन्दुश्चन्द्रमाश्च विमलेन्दुः स इव सत् अभ्यर्हितं दर्शनीयमिति यावत्। मुखं आननं यस्य स तथोक्तः। 'प्रशस्तेभ्यर्हिते च सत्' इत्यमरः। गजराजगतिः गजानां करिणां राजा श्रेष्ठः गजराजः तस्य गतिरिव गतिः गमनं यस्य स तथोक्तः। महाभुजः महान्तौ आजानुदीर्घौ भुजौ बाहू यस्य स तथोक्तः। प्रतियान् व्यासं प्रति गच्छन्। अपूर्वपूरुषः अस्माभिः पूर्वं अदृष्टः अपूर्वः अपूर्वश्चासौ पूरुषश्च अपूर्वपूरुषः। अयं कः को नु ॥ ६ ॥

अतिशान्तवपुर्निशाकरः स्वयमेकान्तखरो दिवाकरः ।
इति नास्य गुणार्णवाकृतेरुपमानं भुवनेषु लभ्यते ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – अतीति ॥ निशाकरोऽतिशान्तं वपुर्यस्य तादृशः । दिवाकरः सूर्य एकान्तेन नियमेन खरः तीक्ष्णः इत्यस्माद्धेतोर्गुणैरर्णव इव गुणार्णवा आकृतिस्स्वरूपं यस्य तस्यास्य पुरुषस्योपमानं निदर्शनं भुवनेषु न लभ्यते ॥ ७ ॥

मन्दोपकारिणी – अतिशान्तेति ॥ निशाकरः चन्द्रः अतिशान्तवपुः अतिशान्तं सौम्यं वपुः स्वरूपं यस्य स तथोक्तः । दिवाकरः सूर्यः । स्वयं एकान्तखरः एकान्तेन नियमेन खरः तीक्ष्णः । सूर्यः कदापि सौम्यरूपो न भवतीत्यर्थः । 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्यमरः । चन्द्रसूर्यादयः एकैकगुणवन्तः । इति अस्मात् हेतोः । 'इति हेतुप्रकरणे' इति विश्वः । गुणार्णवाकृतेः गुणार्णवः गुणसागरः स एवाकृतिः आकारो यस्य स तथोक्तः । तस्य अस्य आगच्छतः पुरुषस्य भुवनेषु उपमानं निदर्शनं न लभ्यते न दृश्यते अस्माभिः इति शेषः । 'डु लभष् प्राप्तावित्यस्मात् कर्मणि लडात्मनेपदम्' ॥ ७ ॥

परमाश्रमिणां गतश्रमो ननु चिह्नानि बिभर्ति धीरधीः ।
अपि मानुषभावविग्रहो विपुलं विस्मयमातनोति नः ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – परमेति ॥ गतः श्रमो यस्य सः श्रमरहित इत्यर्थः । धीरा स्थिरा धीर्यस्य सोऽयम् । परमाश्रम उत्तमाश्रमो यत्याश्रम इति यावत् । स एषामस्तीति तेषां यतीनामित्यर्थः । चिह्नानि बिभर्ति ननु । मानुषस्य भावः स्वभावो यस्य तादृशो विग्रहो देहो यस्य तादृशोऽपि । नो मुनीनामस्माकं विपुलं विस्मयं आश्चर्यं आतनोति वर्धयति ॥ ८ ॥

मन्दोपकारिणी – परमेति ॥ गतश्रमः गतः अपगतः श्रमः मार्गगमनजन्यग्लानिः यस्मात् स तथोक्तः । धीरधीः धीरा निर्भया धीः अन्तःकरणं यस्य स तथोक्तः । विदेशे अहं एकाकी कथं गमिष्ये इति भयरहित इति यावत् । अयं पुरुषः परमाश्रमिणां परमः उत्तमः आश्रमः सन्यासः येषां अस्तीति परमाश्रमिणः तेषां यतीनां चिह्नानि दण्डकमण्डलु-काषायवस्त्रादीनि लक्षणानि । बिभर्ति ननु धत्ते खलु । 'भृञ् भरणे इत्यतो लट् परस्मैपदं

बिभर्ति बिभृतः बिभ्रति' । मानुषभावविग्रहोऽपि मानुषस्य मनुष्यस्य भावः स्वभावः यस्य सः मानुषभावः । 'भावः सत्तास्वभावाभिप्रायः' इत्यमरः । मानुषभावो विग्रहः शरीरं यस्य स तथोक्तः । 'शरीरं वर्ष्म विग्रहः' इत्यमरः । तादृशदेहवानपि । नः मुनीनां अस्माकं विपुलं पृथुलं, 'विशालं पृथुलं महत् बह्वोरुविपुलं' इत्यमरः, विस्मयं आश्चर्यं आतनोति वर्धयति । 'आङ् पूर्वात् तनु विस्तार इत्यतो लट् परस्मैपदं तनोति तनुतः तन्वन्ति' ॥ ८ ॥

चतुरश्चतुराननः स्वयं पवनो वा व्रतिरूप आव्रजन् ।
श्रुतिनाथदिदृक्षयान्यथा न खलु स्यान्निखिलाग्र्यलक्ष्मवान् ॥ ९ ॥

पदार्थदीपिकोद्बोधिका – चतुरेति ॥ श्रुतिनाथस्य श्रीवेदव्यासस्य दिदृक्षा दर्शनेच्छा तया । व्रतिनो यतेः रूपं वेषो यस्य सः, आव्रजन् चतुरः सर्वलक्षणचतुरः चतुराननो ब्रह्मा स्वयं वा । पवनो वा मुख्यवायुर्वा । अन्यथा तयोरन्यतरो न चेन्निखिलानि यान्यग्र्य-लक्ष्माण्युत्तमलक्षणान्यस्य सन्तीति तादृशो न स्यात् खलु ॥ ९ ॥

मन्दोपकारिणी – चतुरेति ॥ अयं पुरुषः । श्रुतिनाथदिदृक्षया श्रुतीनां नाथः वेदव्यासः तस्य दिदृक्षया द्रष्टुमिच्छया । व्रतिरूपः व्रतिनः सन्यासिनः रूपं वेषो यस्य स तथोक्तः सन् । आव्रजन् आगच्छन् । चतुरः सर्वत्र प्रवीणः । चतुराननः चत्वारि आननानि यस्य स तथोक्तः । 'ब्रह्मा स्वयम्भूश्चतुराननः' इत्यमरः । स्वयं वा । पवनो वा मुख्यवायुर्वा भवेत् । 'नभस्वद्वातपवनः' इत्यमरः । वेदव्यासं द्रष्टुं ब्रह्मा वा स्वयं वायुर्वा यतिस्वरूपं धृत्वा आगच्छतीति अस्माकं प्रतिभातीति भावः । अन्यथा ब्रह्मवाय्वोः अन्यतरो न चेत् अयं निखिलाग्र्यलक्ष्मवान् अग्र्याणि उत्तमानि लक्ष्माणि लक्षणानि च । 'चिह्नं लक्ष्म च लक्षणं' इत्यमरः । निखिलानि समस्तानि द्वात्रिंशत्सङ्ख्याकानि इति यावत् । अग्र्यलक्ष्माणि अस्य सन्तीति निखिलाग्र्यलक्ष्म्यवान् । न स्यात् खलु न भवेत् । ब्रह्मवाय्वितरस्य द्वात्रिंशल्लक्षणाभावादिति भावः ॥ ९ ॥

अवलोकितलक्षणः स तैरिति सञ्चिन्त्य कुतूहलाकुलैः ।
अविलम्बगतिर्न्यशामयत्तरुमारात्सुरपादपोत्तमम् ॥ १० ॥

पदार्थदीपिकोद्बोधिका – अवलोकितेति ॥ कुतूहलेनाकुलैः पूर्णैरत्यन्तकुतूहलोपेतैरित्यर्थः। तैर्मुनिभिरित्युक्तप्रकारेण सञ्चिन्त्य विचार्य। अवलोकितानि लक्षणान्यङ्गसम्पदो यस्य सः। विरिञ्चिपवनयोरन्यतरज्ञापकत्वेन ज्ञातलक्षण इत्यर्थः। अविलम्बा भक्त्यतिशयेन क्षिप्रा गतिर्गमनं यस्य स श्रीमध्वाचार्यः। आरात् समीपे, दूरे वा। सुरपादपः कल्पवृक्षस्तद्वदुत्तमं तरुं न्यशामयत् ददर्श। 'शमोऽदर्शन' इति मित्वाभावाद्दीर्घः ॥ १० ॥

मन्दोपकारिणी – अवलोकितेति ॥ कुतूहलाकुलैः कुतूहलेन आश्चर्येण आकुलैः तन्मनस्कैः तैः आश्रमस्थैः मुनिभिः। इति पूर्वोक्तप्रकारेण सञ्चिन्त्य विचार्य। अवलोकितलक्षणः अवलोकितानि विरिञ्चवाय्वन्यतरज्ञापकत्वेन ज्ञातानि लक्षणानि यस्य स तथोक्तः। अविलम्बगतिः अविलम्बेन शीघ्रेण गतिः यस्य स तथोक्तः। भक्त्यतिशयेन शीघ्रं गच्छन् इति भावः। सः मध्वाचार्यः। आरात् दूरे समीपे वा। आराद्दूरसमीपयोः' इत्यमरः। सुरपादपोत्तमं सुराणां देवानां पादपवत् पारिजातवृक्षवत् उत्तमं श्रेष्ठं। तरुं बदरीवृक्षं। 'विटपी पादपस्तरुः' इत्यमरः। न्यशामयत् दृष्टवान् 'निपूर्वकात् शम आलोचने इत्यतो लङ् परस्मैपदम्' ॥ १० ॥

मसृणत्वचमुन्नतं ततं बहुशाखाफणसूनरत्नकम्।
भगवन्तमनन्तमन्तिके स्थितमीशस्य निषेवणाय वा ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – कीदृशं तरुमित्यतस्तद्विशेषणान्याह **मसृणेत्यादि श्लोकत्रयेण ॥** श्रीमध्वाचार्यः, मसृणाऽतिस्निग्धा त्वग्यस्य सः। 'मसृणोऽकठिने स्निग्धे' इति हेमचन्द्रः। शेषोऽपि मृदुलत्वक्। उन्नतमुच्छ्रितमुत्तमञ्च ततं छत्राकारेण व्याप्य स्थितं बहुफणाभोगेन व्याप्य स्थितञ्च। बहवो याः शाखास्ता एव फणास्तेषु सूनानि प्रसूनान्येव रत्नानि यस्मिंस्तम्। अन्यत्र, बहवो याः शाखाः वेदशाखास्तदात्मकत्वात्, विस्तृतत्वाद्वृक्षशाखासदृशा वा, ये फणास्तेषु यानि सूनरत्नान्युच्छूनरत्नानि यस्य तम्। 'सूनं वाच्यवदुच्छूने सूनं प्रसवपुष्पयोः' इति विश्वः ॥ तरुमीशस्य श्रीवेदव्यासस्य निषेवणाय सेवनायान्तिके समीपे स्थितं भगवन्तं पूज्यमनन्तं वा शेषमिव। 'वा विकल्पोपमानयोः' इत्यमरः। न्यशामयदिति पूर्वेणान्वयः ॥ ११ ॥

मन्दोपकारिणी – आदिकुलकमेतत् ॥ **मसृणेति ॥** कथंभूतं तरुम्। ईशस्य वेदव्यासस्य। निषेवणाय सेवां कर्तुम्। अन्तिके वेदव्यासस्य समीपे। 'उपकण्ठान्ति-काभ्यर्णाः' इत्यमरः। भगवन्तं पूज्यम्। अनन्तं वा अत्र वाशब्दः उपमानार्थः शेषमिव। स्थितं विद्यमानम्। 'शेषोऽनन्तो वासुकिः' इत्यमरः। 'वा विकल्पोपमानयोः' इत्यमरः। पुनः कथंभूतम्। मसृणत्वचम् मसृणा ललिता कोमला त्वक् चर्म यस्य सः मसृणत्वक् तम्। 'सुकुमारोऽङ्गविन्यासो मसृणं लालितं स्मृतं' इत्यभिधानम्। उन्नतं उच्चम्। ततं छत्राकारेण व्याप्य स्थितम्। शेषपक्षे इमानि विशेषणानि योज्यानि। तत्र मसृणत्वचं इत्यस्य उक्त एवार्थः। उन्नतं उत्तमम्। ततं बहुफणैः व्याप्य स्थितम्। पुनः कथंभूतं बहुशाखाफण-सूनरत्नकं बह्वचश्च ताः शाखाः स्कन्दाश्च बहुशाखाः बहुशाखा एव फणाः बहुशाखाफणेषु सूनान्येव फलानि रत्नानि यस्य स तथोक्तः। 'सूनं प्रसवपुष्पयोः' इति विश्वः। प्रसवपुष्पयोः फलपुष्पयोः इति अभिधानार्थः। 'स्यादुत्पले फले पुष्पे प्रसवो गर्भमोचने' इत्यमरकोशे प्रसवशब्दस्य फलेऽपि प्रयोगात् प्रसूनं पुष्पफलयोरिति अमरे सूनशब्दपर्या-यप्रसवशब्दस्य फले प्रयोगाच्च शाखानां फलसाम्यं लोहितनीलगौरादिबहुवर्णानां फलानां रत्नसाम्यं ज्ञेयम्। शेषफणाग्रेषु रत्नानि सन्तीति प्रसिद्धमेव। स्फुटायां तु फणाद्वयोरित्य-भिधानात् फणाशब्दः पुल्लिङ्गोऽप्यस्तीति ज्ञेयम् ॥ ११ ॥

अतिचित्रविचित्रपत्रिणं बहुवर्णं हरिगोनिवारकम्।
मुनिनन्दनमिन्दिरापतेरधिकेष्टं पततामिवाधिपम् ॥ १२ ॥

भावप्रकाशिका – पत्रं पलाशं पतत्रं च। **हरिगौः** सूर्यरश्मिरिन्द्रवज्रं च। मुनीनां नन्दनं कश्यपपुत्रं च ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – अतिचित्रेति ॥ अतिचित्राणि अत्याश्चर्याणि यानि विचित्रपत्राणि नानावर्णोपेतपत्राणि तान्यस्य सन्तीति तम्। गरुडोऽपि, अतिचित्रे वेदात्मकत्वेनात्याश्चर्ये ये विचित्रपत्रे नानावर्णपक्षौ तेऽस्य स्त इति तम्। बहवो वर्णा यस्य तम्। गरुडोऽपि बहुवर्णः। 'आजानुतः स्वर्णवर्ण आनाभेर्हारगौरभाः। माणिक्यशोण आकण्ठादाकेशाद्धरितप्रभः। नीलकेशो लसन्माल्यः' इत्युक्तेः पञ्चवर्ण इति भावः। हरेः सूर्यस्य ये गावः किरणास्तेषां निवारकम्। अनल्पछायमिति भावः। गरुडोऽपि हरेरिन्द्रस्य

गौर्वज्रं तस्य निवारकः। 'अर्कमर्कटमण्डूकविष्णुवासववायवः। तुरगः सिंहशीतांशुयमाश्च हरयो दश' इति हलः। 'दृक्दृष्टिदीधितिस्वर्णवज्रवाग्बाणवारिषु। भूमौ पशौ च गोशब्दः' इति च। मुनीन् नन्दयति स्वच्छायादिना सन्तोषयतीति मुनिनन्दनस्तम्। गरुडोऽपि कश्यपमुनेर्नन्दनः। इन्दिरापतेः श्रीवेदव्यासस्याधिकेष्टमत्यन्तप्रियम्। गरुडोऽप्येतादृशः। तरुं, पततां पक्षिणामधिपं स्वामिनं गरुडमिव न्यशामयदिति पूर्वेणान्वयः॥ १२॥

मन्दोपकारिणी – अतीति॥ पुनः कथंभूतम्। पततां पक्षिणाम्। 'पतत्पातक-पक्षिणोः' इति विश्वः। अधिपं अधिपतिं गरुडमिव स्थितम्। अतिचित्रविचित्रपत्रिणं अतिचित्राणि अत्याश्चर्याणि विचित्राणि अणुत्वस्थूलत्वादिनानाविधानि पत्राणि पर्णानि अस्मिन् सन्तीति अतिचित्रविचित्रपत्री तम्। 'पत्रं पलाशं छदनं दलं पर्ण छदः पुमान्' इत्यमरः। बहुवर्णं बहवो नानाविधाः वर्णाः शुक्लादिरूपाणि यस्य स तथोक्तः तम्। 'वर्णो द्विजादौ शुक्लादौ' इत्यमरः। लोहितादिरूपोपेतपत्राढ्यमिति भावः। हरिगोनिवारकं हरेः सूर्यस्य गवां रश्मीनां निवारकं सूर्यकिरणाः तत्र यथा न पतन्ति तथा निबिडच्छायोपेतमिति भावः। मुनिनन्दनं तत्रत्यानां मुनीनां नन्दनं सन्तोषकरम्। इन्दिरापतेः इन्दिरायाः लक्ष्म्याः पत्युः भर्तुः वेदव्यासस्य अधिकेष्टं अधिकं अत्यन्तं इष्टं प्रियम्। गरुडपक्षेऽपि इमानि विशेषणानि योज्यानि। कथंभूतं गरुडं अतिचित्रविचित्रपत्रिणं अतिचित्रे अत्याश्चर्यकरे विचित्रे विविधवर्णे पत्रे पक्षौ अस्य स्त इति अतिचित्रविचित्रपत्री तम्। बहुवर्णं बहवः नानाविधाः वर्णाः शुक्लादयः यस्य सः तथोक्तः तम्। 'आजानोः स्वर्णवर्णाभ आनाभेः हरिगौरभाः। माणिक्यशोण आकण्ठादाकेशात् हरितप्रभः। नीलकेशो लसन्नीलः' इति पञ्चवर्णोपेतत्वं गरुडस्य प्रसिद्धमेव। हरिगोनिवारकं हरेः इन्द्रस्य गोः वज्रस्य निवारकं अमृतार्थे गरुडेन इन्द्रवज्रस्य निरस्तत्वादिति भावः। 'चन्द्रे सूर्ये हये विष्णौ वासवे दर्दुरे यमे। मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः' इति धनञ्जयः। 'गौः स्वर्गे च वृषे रश्मौ वज्रे चन्द्रमसि स्मृतः' इति विश्वः। मुनिनन्दनं मुनेः कश्यपऋषेः नन्दनं तनयम्। इन्दिरापतेः लक्ष्मीपतेः नारायणस्य। अधिकेष्टं इष्टतमम्॥ १२॥

अमृतात्ममहाफलप्रदं दुरवापं हरिभक्तिवर्जितैः।
श्रितसाधुपुराणभारतं निगमं मूर्तमिवोरुशाखिनम्॥ १३॥

भावप्रकाशिका – अमृतं मोक्षश्च। श्रितानि साधुपुराणादिपुस्तकानि यस्मिन्। शाखासु प्रेङ्खेषु च ॥ १३ ॥

पदार्थदीपिकोद्बोधिका – अमृतेति ॥ श्रीमध्वाचार्योऽमृतात्मान्यमृतमयानि यानि महाफलानि तानि प्रददातीति तम्। तत्फलास्वादनस्य जरामरणनाशकत्वात् अमृतात्मेत्युक्तम्। वेदोऽप्यमृतं मोक्ष आत्मा स्वरूपं यस्य तत् अमृतात्म तदेव यन्महाफलं तत्प्रददातीति तादृशः। वेदार्थविचारपूर्वकं भगवत्स्वरूपज्ञानेन मोक्षो भवतीत्यतो ह्येवमुक्तम्। हरिभक्तिवर्जितैः हरिभक्तिरहितैः आप्तुमशक्यो दुरवापः तम्। बदरिकाश्रमस्याप्यवैष्णवाप्राप्यत्वात्तरुरपि तादृश इति भावः। वेदोऽप्यवैष्णवदुरवापः। 'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते' इति वचनात्। श्रितानि शाखास्ववलम्बमानानि साधुपुराणभारतान्युत्तमपुराणभारतपुस्तकानि यस्मिंस्तम्। मुनिभिः श्रीहर्यर्चनादिसमये तच्छाखानिक्षिप्तसच्छास्त्रपुस्तकजातमिति भावः। निगमोऽपि श्रितानि स्वैरुपजीव्यप्रमाणत्वेनाश्रितानि साधुपुराणभारतानि यस्य तादृशः, वेदार्थत्वात्तेषामित्यर्थः। उरवो बहवो याः शाखास्ता अस्य सन्तीति तम्। वेदोऽपि ऐतरेयम् कौषीतकबाष्कलशाकलपैङ्गिकाठकाद्युरुशाखावान्। तरुं मूर्तं मूर्तिमन्तं निगममिव वेदमिव न्यशामयदित्यन्वयः ॥ १३ ॥

मन्दोपकारिणी – अमृतेति ॥ पुनः कथंभूतम्। मूर्तं मूर्तिमन्तम्। निगममिव वेदमिव स्थितम्। कथम् अमृतात्ममहाफलप्रदं महान्ति स्थूलानि च तानि फलानि च महाफलानि। अमृतं पीयूषं आत्मा स्वरूपं येषां तानि अमृतात्मानि च तानि महाफलानि च स्वादुतराणीति यावत्। तत्फलास्वादनस्य जरामरणनिवारकत्वात् अमृतस्वरूपत्वं उक्तमिति भावः। तानि प्रकर्षेण ददातीति अमृतात्ममहाफलप्रदः तम्। हरिभक्तिवर्जितैः अवैष्णवैः दुरवापं प्राप्तुमशक्यम्। बदरिकाश्रमस्य अवैष्णवदुर्गमत्वात् वृक्षस्यापि दुर्गमत्वं इति भावः। श्रितसाधुपुराणभारतं साधूनि सात्विकानि च तानि पुराणानि च साधुपुराणानि। साधुपुराणानि च भारतं च साधुपुराणभारतानि। श्रितानि आश्रितानि साधुपुराणभारतानि यस्मिन् स तथोक्तः तम्। वेदपक्षे तु, अमृतात्ममहाफलप्रदं महत् अत्युत्तमं च तत् फलं च महाफलं अमृतं मोक्षः आत्मा स्वरूपं यस्य तत्। नकारान्तनपुंसकलिङ्गम्। मुक्तिरूपं महाफलं प्रददातीति अमृतात्ममहाफलप्रदः तम्। वेदार्थविचारपूर्वकं हरिस्वरूपज्ञानेन हि मोक्षो भवतीति प्रसिद्धम्। एवं हरिभक्तिवर्जितैः अवैष्णवैः। दुरवापं प्राप्तुमयोग्यम्।

'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते' इति वचनात्। श्रितसाधुपुराणभारतं साधूनि प्रमाणभूतानि पुराणानि भारतं च श्रितानि वेदार्थनिर्णायकत्वेन आश्रितानि साधुपुराण-भारतानि येन स तथोक्तः तम्। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति वचनात्। उरुशाखिनं उरवः बहवः शाखाः ऐतरेयशाकलबाष्कलपैङ्गिकाठकाद्याः अवान्तरभेदाः अस्य सन्तीति उरुशाखी तम्॥ १३॥

अथ तस्य स वेदिकान्तरे सुविशाले विमले मनोहरे।
अवलोकितवाननन्तधीर्दिवि देवानिव तापसोत्तमान्॥ १४॥

पदार्थदीपिकोद्बोधिका – अथेति॥ अथ अनन्ता पूर्णा धीर्यस्य स पूर्णप्रज्ञाचार्यः तस्य वृक्षस्य सुविशालेऽतिविस्तारे विमले मनोहरे वेदिकाया अन्तरे मध्ये तापसोत्तमान् मुनिवरान् दिवि स्वर्गे देवान् इव अवलोकितवान् दृष्टवान्॥ १४॥

मन्दोपकारिणी – अथेति॥ अथ वृक्षदर्शनानन्तरम्। अनन्तधीः अनन्ता अपरिमिता पूर्णा इति यावत्, धीः बुद्धिः यस्य स तथोक्तः। सः मध्वाचार्यः तस्य बदरीवृक्षस्य सुविशाले अतिविस्तृते विमले संमार्जनोपलेपादिना निर्मले अत एव मनोहरे सुन्दरे वेदिकान्तरे वेदिकायाः वितर्दिकायाः। 'स्याद्वितर्दिस्तु वेदिका' इत्यमरः। भूम्यपेक्षया किञ्चित् उच्चं निबद्धा भूमिः वेदिका इत्युच्यते। अन्तरे मध्ये तापसोत्तमान् मुनिश्रेष्ठान्। 'तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः' इत्यमरः। अवलोकितवान् दृष्टवान्। कुत्र कानिव। दिवि स्वर्गे। 'सुरलोको द्योदिवौ द्वे' इत्यमरः। देवानिव॥ १४॥

अपि सप्ततया विराजितान् गतसंख्यान् गुणिनो गुणोज्झितान्।
अपि मन्युमदादिवर्जितान् गतभोगान् पवनाशनान् सदा॥ १५॥

भावप्रकाशिका – सप्ततया जटासहिततया॥ १५॥

पदार्थदीपिकोद्बोधिका – अपीति॥ श्रीमध्वाचार्यः गता संख्या येभ्यस्तान्। बहूनिति यावत्। सप्तया जटया सहिताः सप्तास्तेषां भावस्तया। 'ऋषीणां सप्ता जटा सटा' इति हलः। जटासहितत्वेन विराजिताञ्छोभमानान्। गुणा एषां सन्तीति गुणिनो ज्ञानभक्त्यादिगुणसंयुक्तानित्यर्थः। गुणोज्झितान् सत्वादिगुणरहितान्। अथवा गुणः

सूत्रमेषामस्तीति तान्। ब्रह्मचर्यादिवानप्रस्थान्तानिति यावत्। गुणोज्झितान् सूत्ररहितान् यतीनिति यावत्। गतो भोगः स्रक्चन्दनादिभोगो येभ्यस्तान्। सदा पवनो वायुरशनमन्नं येषां तान् अत एव मन्युः क्रोधः स च मदश्च तावादी येषां तैर्वर्जितान् जितषड्वर्गानित्यर्थः। मुनीनवलोकितवानिति पूर्वेणान्वयः। पवनाशनशब्दस्सर्पवाचकः। 'पन्नगः पवनाशनः' इत्युक्तेः। भोगशब्दः सर्पशरीरवाचकः। 'भोगः सुखेस्व्यदिभृतावहेश्च फणकाययोः' इत्यमरोक्तेतश्च। तथा च पवनाशनानां गतभोगत्वं विरुद्धमित्यतो विरोधालङ्कारः॥ १५॥

मन्दोपकारिणी – अपीति॥ कथंभूतान् तापसोत्तमान्। गतसंख्यान् गता संख्या येभ्यः ते तथोक्ताः तान् बहून् इत्यर्थः। सप्ततया स्राभिः जटाभिः सहिताः सस्राः सस्रानां भावः सप्तता तया जटासहितत्वेनेति यावत्। विराजितान् शोभमानान्। स्राशब्दस्य जटार्थकत्वं 'सस्राः सस्राश्वनुन्नारुणकिरणसमाः पातु बिभ्रत्त्रिनेत्रः' इति प्रयोगात् सिद्धम्। सस्राश्वेन सूर्येण नुन्नस्य प्रेरितस्य अरुणस्य सूर्यसारथेः किरणानां रश्मीनां समाः सदृशाः लोहिता इति यावत्। स्राः जटाः बिभ्रत् सः त्रिनेत्रः पातु इति प्रयोगवाक्यार्थः। गुणिनः गुणाः ज्ञानभक्त्यादिगुणाः येषु सन्तीति तान्। गुणोज्झितान् गुणैः सत्वादिभिः उज्झितान् रहितान्। यद्वा गुणिनः गुणः सूत्रं यज्ञोपवीतमिति यावत्, तत् एषां अस्तीति गुणिनः यज्ञोपवीतधारिणः ब्रह्मचर्यादिवानप्रस्थान्तानिति यावत्। गुणोज्झितान् गुणेन यज्ञोपवीतेन उज्झितान् रहितान् परमहंसानिति यावत्। मन्युमदादिवर्जितान् मन्युः क्रोधः 'मन्युः क्रोधे क्रतौ दैन्ये' इति रत्नमाला। मदो गर्वः। 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इति विश्वः। मन्युश्च मदश्च मन्युमदौ तौ आदी येषां ते तैः मन्युमदादिभिः अरिषड्वर्गैः वर्जितान् रहितान्। गतभोगान् गतः विषयभोगः एभ्यः तान् निराहारानित्यर्थः। सदा पवनाशनान् पवनः वायुः अशनं येषां ते पवनाशनाः तान्। अपिशब्दो विशेषणसमुच्चये। अत्राश्रमे ब्रह्मचारिणः गृहस्थाः वानप्रस्थाः यतयश्चेति चतुराश्रमिणोऽपि सन्ति। ते च बहवः सर्वेऽपि जटाधारिणश्च विष्णुभक्तिज्ञानादिगुणवन्तः केवलसात्विकाः क्रोधादिरहिताः विरक्ताः वाय्वाहाराः इत्युक्तं भवति। अत्र गतसंख्यापदस्य सप्ततया विराजितपदस्य विरोधः सञ्चारहितेषु सप्तत्वस्य विरुद्धत्वात्। गुणवतां गुणरहितत्वस्य विरोधः। पवनाशनाः सर्पाः भोगशब्दः सर्पशरीरफणोभयवाचकः। तथा च सर्पाणां फणारहितत्वं शरीरराहित्यं विरुद्धम्। यद्वा गतभोगशब्देन आहारराहित्यं उच्यते। पवनाशनशब्देन आहारयुक्तत्वं

उच्यते। तथा च आहारवतः आहाररहितत्वं विरुद्धमेव। शब्दत एव विरोधात् अर्थतो विरोधाभावात् विरोधाभासालङ्कारो द्रष्टव्यः। द्वितीयः अपिशब्दः विरोधाभासालङ्कारार्थः। 'आकूतिं रुचये प्रादात् अपि भ्रातृमतीं नृपः' इति चतुर्थस्कान्धभागवतश्लोकव्याख्याने उक्तत्वात्॥ १५॥

मुनिमण्डलमध्यवर्तिनं त्रिजगन्मण्डलमण्डनायितम्।
इह सत्यवतीसुतं हरिं परिपूर्णप्रमतिः समैक्षत॥ १६॥

पदार्थदीपिकोद्बोधिका – मुनीति॥ परिपूर्णा प्रमतिर्यस्य स श्रीमध्वाचार्यः इह वेदिकायां मुनीनां मण्डलस्य समूहस्य मध्ये वर्तितुं शीलमस्येति तं त्रीणि च तानि जगन्ति च तेषां यन्मण्डलं प्रदेशस्तस्य मण्डनवत् अलङ्कारवत् आचरतीति तं सत्यवतीसुतं हरिं श्रीवेदव्यासं समैक्षत ददर्श॥ १६॥

मन्दोपकारिणी – मुनीति॥ परिपूर्णप्रमतिः परिपूर्णा संपूर्णा प्रमतिः यथार्थज्ञानं यस्य स तथोक्तः श्रीपूर्णप्रज्ञाचार्यः। इह वेदिकायां मुनिमण्डलमध्यवर्तिनं मुनीनां मण्डलस्य समूहस्य मध्ये वर्तिनं उपविष्टम्। त्रिजगन्मण्डलमण्डनायितं त्रीणि च तानि जगन्ति च त्रिजगन्ति त्रिजगतां मण्डलस्य मण्डनायितं भूषणायितं सत्यवतीसुतं सत्यवत्याः सुतं नन्दनं हरिं वेदव्यासं समैक्षत दृष्टवान्॥ १६॥

निजहृत्कमलेऽतिनिर्मले सततं साधु निशामयन्नपि।
अवलोक्य पुनः पुनर्नवं तमसौ विस्मित इत्यचिन्तयत्॥ १७॥

पदार्थदीपिकोद्बोधिका – निजेति॥ असौ श्रीमध्वाचार्यः अतिनिर्मले निजहृत्कमले आत्मीयहृत्पद्मे साधु सम्यग् यथा भवति तथा सततं निशामयन्नपि पश्यन्नपि तं श्रीवेदव्यासं पुनः पुनर्दर्शनेन नवं नूतनमवलोक्य विस्मितः सन्, इति वक्ष्यमाणप्रकारेण अचिन्तयत्॥ १७॥

मन्दोपकारिणी – निजेति॥ असौ मध्वाचार्यः। अतिनिर्मले अत्यन्तं रागादि-मलरहिते निजहृत्कमले हृदेव मन एव कमलं निजं च तत् हृत्कमलं च तस्मिन् स्वमनसि

साधु सम्यक् सततं अनारतं तं श्रीवेदव्यासं पुनः वारं वारं निशामयन्नपि प्रेक्षन्नपि। पुनः नवं नूतनं 'नवीनो नूतनो नवः' इत्यमरः। अवलोक्य विस्मितः आश्चर्ययुक्तः सन् इति वक्ष्यमाणप्रकारेण अचिन्तयत् दध्यौ। 'चिति स्मृत्यां लङ् परस्मैपदम्' ॥ १७ ॥

अगणेयगुणार्णवोऽमलः स हि नारायण एष केवलम्।
विधिनाऽनुसृतं पराशरात्सुषुवे सत्यवती किलात्र यम्॥ १८ ॥

पदार्थदीपिकोद्बोधिका – अगणय्येति॥ सत्यवती, विधिना ब्रह्मणा अनुसृतं अवताराय प्रार्थितं यं श्रीवेदव्यासं अत्र भुवि पराशरात् सुषुवे प्रासूत। किलेत्यपरमार्थे। श्रीवेदव्यासस्य वस्तुतो जन्मरहितत्वात्। स एषः सत्यवतीसुतोऽगणय्या अगण्या ये गुणाः तैः अर्णव इवार्णवः। न विद्यते मलं दोषो यस्य सोऽमलः केवलं साक्षान्नारायणः। हि इति प्रसिद्धिद्योतकः॥ १८ ॥

मन्दोपकारिणी – चिन्ताप्रकारमेवाह **अगणेयेत्यादिना॥** सत्यवती वेदव्यासस्य माता। विधिना ब्रह्मणा। 'विधाता विश्वसृड्विधिः' इत्यमरः। अनुसृतं अवताराय प्रार्थितं यं वेदव्यासं पराशरात् अत्र भुवि सुषुवे प्रासूत। 'षूङ् प्राणिगर्भविमोचन इति धातोः लिडात्मनेपदम्'। किल इति अपरमार्थे। वस्तुतो जन्ममरणरहितत्वात् सः हर्यवतारभूतः एषः पुरोवर्ती सत्यवतीसुतः केवलं साक्षात् नारायणः। हि प्रसिद्धम्। कथंभूतः, अगणेयगुणार्णवः गणयितुं शक्याः गणेयाः न गणेयाः अगणेयाः अगणेयाश्च ते गुणाश्च अगणेयगुणाः तैः अर्णवः समुद्रः। 'गणनीये तु गणेयं संख्याते गणितं' इत्यमरः। अमलः निर्दोषः॥ १८ ॥

धवलेऽस्य मनःपयोनिधौ सदनुक्रोशगिरीन्द्रलोलिते।
प्रकटीभवति स्म सुन्दरी दयिता दैत्यरिपोस्त्रयीमयी॥ १९ ॥

पदार्थदीपिकोद्बोधिका – धवल इति॥ धवले निर्मलेऽस्य श्रीव्यासस्य मन एव पयोनिधिः क्षीरसागरः तस्मिन्। सत्सु सज्जनेषु योऽनुक्रोशः कृपा स एव गिरीन्द्रो मन्दरगिरिस्तेन लोलिते मथिते सति। दैत्यरिपोः श्रीवेदव्यासस्य दयिता प्रिया त्रय्येव त्रयीमयी वेदत्रयात्मिका सुन्दरी स्त्री प्रकटीभवति स्म। स्म अतीते। प्रकटीबभूवेत्यर्थः।

पयोनिधौ मन्दरे मथिते सति तस्मात् यथा भगवद्दयिता रमा प्रादुर्बभूव तद्वत्सज्जन-कृपोन्मथितादस्य मनसस्त्रयी प्रादुर्बभूवेति भावः ॥ १९ ॥

मन्दोपकारिणी – धवल इति ॥ धवले निर्मले अस्य वेदव्यासस्य मनःपयोनिधौ मन एव पयोनिधिः क्षीरसमुद्रः तस्मिन्। सदनुक्रोशगिरीन्द्रलोलिते सत्सु सज्जनेषु अनुक्रोशः दया। 'कृपा दयानुकम्पा स्यादनुक्रोशः' इत्यमरः। सदनुक्रोश एव गिरीन्द्रः पर्वतश्रेष्ठः सदनुक्रोशगिरीन्द्रेण लोलिते मथिते सति तस्मात् मनोलक्षणक्षीरसमुद्रात् दैत्यरिपोः दैत्यानां कल्याद्यसुराणां रिपोः वैरिणः वेदव्यासस्य दयिता प्रिया त्रयीमयी वेदात्मिका सुन्दरी रमणी लक्ष्मीः इत्यर्थः। प्रकटीभवति स्म। स्म अतीते। प्रादुरभूत् इत्यर्थः। यथा क्षीरसमुद्रे मन्दरपर्वतेन मथिते सति तस्मात् समुद्रात् भगवद्दयिता रमा प्रादुर्बभूव तद्वत् सज्जनकृपो-न्मथितात् वेदव्यासमनसः वेदविद्या प्रादुर्बभूव। सज्जनेषु दयां कृत्वा वेदव्यासः उत्सन्नान् वेदान् व्यक्तीचकार इति भावः ॥ १९ ॥

इत एव पुराणगौरगौ समहाभारतपारिजातके।
सति जातवति व्यजायत प्रवरं सूत्रगणामृतं स्वयम् ॥ २० ॥

पदार्थदीपिकोद्बोधिका – इत इति ॥ इत एवास्मात् श्रीवेदव्यासादेव महाभारतमेव पारिजातः तेन सहितः समहाभारतपारिजातकः तस्मिन्। गौराः श्वेता गावः किरणा यस्य स गौरगुश्चन्द्रः। पुराणान्येव गौरगुस्तस्मिन्। 'स्त्रियाः पुंवदिति' पुंवद्भावे 'गोस्त्रियो-रुपसर्जनस्ये'ति ह्रस्वः। जातवति सति उत्पन्ने सति प्रवरमुत्तमं स्वयं साक्षात् सूत्राणां ब्रह्मसूत्राणां गणः समूहः स एव अमृतमिव व्यजायत जज्ञे। पारिजातसहिते चन्द्रे जातवति सति पयोनिधेरमृतं यथा जातं एवं पुराणोत्पत्यनन्तरमस्माद्भगवतो ब्रह्मसूत्रमपि जातमिति भावः ॥ २० ॥

मन्दोपकारिणी – इत इति ॥ इत एव अस्मात् श्रीवेदव्यासादेव। समहाभारत-पारिजातके महाभारतमेव पारिजातकः पारिजाताख्यवृक्षः तेन सहिते पुराणगौरगौ गौराः शुभ्राः गावः किरणाः यस्य सः गौरगुः पुराणान्येव गौरगुः चन्द्रः तस्मिन् जातवति सति प्रवरं निर्णायकशास्त्रोत्तमम्। स्वयं सूत्रगणामृतं सूत्राणां गण एव अमृतं सुधा। व्यजायत प्रादुर्बभूव। 'जनी प्रादुर्भावे इत्यतो लङात्मनेपदं अजायत अजायेतां अजायन्त'। यथा

क्षीरनिधेः पारिजातवृक्षचन्द्रोत्पत्यनन्तरं अमृतं जातं एवं भारतपुराणोत्पत्यनन्तरं ब्रह्मसूत्रमपि वेदव्यासात् जातमिति भावः। अशेषपुरुषार्थप्रदत्वेन भारतपारिजातयोः साम्यं पदार्थप्रदर्शकत्वेन पुराणचन्द्रयोः साम्यं जरामरणनाशकत्वेन सूत्रामृतयोः साम्यं द्रष्टव्यम्॥ २०॥

निरवग्रहमुर्वनुग्रहं विदधत्पाण्डुसुतादिसज्जने।
अवनाववनाय संविदां सुचिरायैष चचार चारुगीः॥ २१॥

पदार्थदीपिकोद्बोधिका – निरवग्रहेति॥ चारू मनोहरा गीः वचनं यस्य स एष श्रीवेदव्यासः। पाण्डुसुता आदयो यस्य स चासौ सज्जनश्च तस्मिन्निरवग्रहमकुण्ठितं पूर्णमित्यर्थः। अनुग्रहं विदधत् कुर्वन् सन्, संविदां ज्ञानानां, संविदाश्रयपुरुषाणां संविद्विषयाणाञ्च बहुत्वात्संविदामिति बहुवचनम्। अवनाय रक्षणायावनौ भुवि सुचिराय चचार॥ २१॥

मन्दोपकारिणी – निरवग्रहमिति॥ चारुगीः चार्व्यः मनोहराः गिरः वचनानि यस्य स तथोक्तः हितोपदेशक इति यावत्। एषः श्रीवेदव्यासः। पाण्डुसुतादिसज्जने पाण्डोः पाण्डुचक्रवर्तिनः सुताः धर्मभीमादयः त एव आदयो यस्य सः पाण्डुसुतादिः। संश्चासौ जनश्च सज्जनः पाण्डुसुतादिश्चासौ सज्जनश्च तस्मिन्। निरवग्रहं अनवकुण्ठितं उर्वनुग्रहं महाप्रसादं विदधत् कुर्वन्। संविदां ज्ञानिनां 'प्रेक्षोपलब्धिश्चित्संवित्' इत्यमरः। विषयभेदात् बहुवचनम्। अवनाय संरक्षणाय अवनौ भूम्याम्। 'अवनिर्मेदिनी मही' इत्यमरः। सुचिराय बहुकालम्। 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः। चचार सञ्चारं कृतवान्। 'चर गतिभक्षणयोः इति धातोः लिट् परस्मैपदम्'॥ २१॥

अधुना कलिकालवृत्तये सवितेव क्षणदानुवृत्तये।
जनदृग्विषयत्वमत्यजद्भगवानाश्रममावसन्निमम्॥ २२॥

पदार्थदीपिकोद्बोधिका – अधुनेति॥ अधुना इदानीं आश्रमं आवसन् भगवान् श्रीव्यासः। 'उपान्वध्याङ्वस' इति कर्मसञ्ज्ञा। अस्मिन्नाश्रमे वसन्नित्यर्थः। भगवान्,

कलेः कालस्तस्य वृत्तये प्रवृत्तये । जनानां या दृग्दृष्टिस्तस्या विषयो गोचरस्तस्य भावः तत्त्वम्। क्षणदानुवृत्तये रात्रिप्रवृत्तये सवितेव रविः इव अत्यजत् परित्यक्तवान्। अयं भावः—सुरेषु मुनिषु च भुवि चरत्सु कलियुगधर्मा न प्रवर्तेरन्नित्यधुना व्यासोऽयं जनदृग्विषयत्वं मुक्त्वा तस्मिन्नाश्रमे वसति, रात्रिप्रवर्तनार्थं सूर्योऽस्तं यथा गच्छेत्तद्वदिति ॥ २२ ॥

मन्दोपकारिणी – अधुनेति ॥ अधुना इदानीं। इमं आश्रमं बदरिकाश्रमम्। आवसन्। भगवान् पूर्णैश्वर्यादिषड्गुणवान् वेदव्यासः। कलिकालवृत्तये कलेः कालः तस्य वृत्तये प्रवृत्यर्थं क्षणदानुवृत्तये रात्रिप्रवृत्यर्थं सवितेव सूर्य इव। जनदृग्विषयत्वं जनानां दृष्टिगोचरत्व मत्यजत् त्यक्तवान्। स्वस्मिन् भुवि चरति सति कलियुगधर्माः न प्रवर्तेरन्। अतः कलिधर्मप्रवृत्यर्थं इदानीं वेदव्यासः अदृश्यो भूत्वा अस्मिन् आश्रमे वसति। यथा सूर्यः रात्रिप्रवृत्यर्थं अस्तं गच्छति तथेति भावः। 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः ॥ २२ ॥

तदिदं वपुरस्य दृश्यते दलितेन्दीवरसुन्दरद्युति ।
परमाजिनयोगपीठगं मम चेतोनयनाभिनन्दनम् ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – तदिति ॥ दलितं विकसितं यदिन्दीवरं तद्वत्सुन्दरा द्युतिः कान्तिर्यस्य तत् । परमं उत्तमं यदजिनं कृष्णाजिनं तदात्मकं यद्योगपीठं योगासनं तद्गच्छतीति तादृशम्। मम चेतश्च नयने च तान्यभिनन्दयतीति तादृशमस्य श्रीवेदव्यासस्य तदिदं वपुर्दृश्यते ॥ २३ ॥

मन्दोपकारिणी – तदिति ॥ मया तत् जनादृश्यम्। इदं पुरोवर्ति। अस्य वेदव्यासस्य। वपुः शरीरं दृश्यते मया अपरोक्षीक्रियते। 'दृशिर् प्रेक्षण इत्यतः कर्मणि लट् आत्मनेपदम्'। कथंभूतं वपुः। दलितेन्दीवरसुन्दरद्युति दलितं विकसितं च तत् इन्दीवरं च नीलोत्पलं च इन्दीवरवत् सुन्दरा द्युतिः कान्तिः यस्य तत् दलितेन्दीवरसुन्दरद्युति। परमाजिनयोगपीठगं परमं उत्तमं च तत् अजिनं कृष्णचर्म च। 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः। योगस्य ध्यानस्य 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः पीठं आसनम्। 'विष्टरं पीठमासनं' इत्यमरः। परमाजिनं च तत् योगपीठं च तत् गच्छति तिष्ठति इति योगपीठगं कृष्णाजिने उपविष्टमिति यावत्। मम चेतोनयनाभिनन्दनं चेतः हृदयं नयनं लोचनं च तयोः अभितः सम्यक् नन्दनं सन्तोषकरम् ॥ २३ ॥

अगणेयगुणैः सुपूरितं परिपूर्णागणितात्मसद्गुणैः ।
इदमस्तसमस्तदूषणं सचिदानन्दमयं हि केवलम् ॥ २४ ॥

पदार्थदीपिकोद्बोधिका – अगणय्येति ॥ इदं दृश्यमानं वपुः गणितुमशक्या अगणय्यास्तादृशा गुणा येषां तैः । परिपूर्णाः प्रत्येकं पूर्णाः येऽगणिता असङ्ख्याता आत्मसद्गुणा आत्मनो निर्दुष्टगुणास्तैः सुपूरितम् । अस्तं निरस्तं समस्तदूषणं समस्तदोषा यस्मात्तादृशम् । केवलं साक्षात् चिता ज्ञानेन सहितः सचित्, स चासौ आनन्दश्च तदात्मकं सचिदानन्दमयं दृश्यत इति पूर्वेणान्वयः ॥ २४ ॥

मन्दोपकारिणी – अगणेयगुणैरिति ॥ इदं दृश्यमानं वपुः अगणेयगुणैः अगणेयाः गणयितुमशक्याः गुणाः धर्माः येषां ते अगणेयगुणाः तैः । ज्ञानस्य अतीतत्वादिसर्व-विषयकत्त्वादि , आनन्दस्य दुःखामिश्रितत्वादि , शक्तेः अप्रतिहतत्वादि एवं ज्ञानानन्दद्या-नन्तगुणानामपि अनन्ताः धर्माः सन्तीति बोध्यम् । परिपूर्णागणितात्मसद्गुणैः परिपूर्णाः एकैकशः सर्वत्र सत्याश्च ते अगणिताः अपरिमिताश्च ते आत्मानः स्वरूपभूताश्च ते सन्तः उत्पत्तिनाशादिदोषरहिताश्च ते गुणाः ज्ञानानन्दादिकल्याणधर्माश्च तैः । सुपूरितं अत्यन्त-पूर्णम् । अस्तसमस्तदूषणं अस्तानि अस्पृष्टानि समस्तानि दूषणानि शास्त्रोक्तशरीरदूषणानि यस्य तत् तथोक्तम् । द्वात्रिंशल्लक्षणोपेतत्वादिति भावः । केवलं जडामिश्रम् । सचिदा-नन्दमयं चिता ज्ञानेन सहितः सचित् स चासौ आनन्दश्च सचिदानन्दः मयः स्वरूपं यस्य तत्तथोक्तम् । हि प्रसिद्धम् ॥ २४ ॥

कमलाकमलासनानिलैर्विहगाहीन्द्रशिवेन्द्रपूर्वकैः ।
पदपद्मरजोऽस्य धारितं शिरसा हन्त वहाम्यहं मुहुः ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – कमलेति ॥ कमला श्रीः, कमलासनो ब्रह्मा, अनिलो मुख्यवायुः तैः । विहगेन्द्रो गरुडः, अहीन्द्रः शेषः, शिवश्च, इन्द्रश्च ते पूर्वे येषां तैश्शिरसा धारितं अस्य भगवतः पदे-पद्मे इव तयोः रजश्शिरसा मुहुर्वहामि । 'वर्तमानसामीप्ये वर्तमानवद्वे'ति भविष्यदर्थे लट् । हन्तेति हर्षे । 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भ विषादयो'रित्यमरः ॥ २५ ॥

मन्दोपकारिणी – एवं शरीरं वर्णयित्वा इदानीं पादधूलिमारभ्य जटापर्यन्तं वर्णयति मध्वाचार्यः **कमलेत्यादिभिः** श्लोकैः ॥ अहं अस्य वेदव्यासस्य। पदपद्मरजः पदे चरणे एव पद्मे तयोः रजः रेणुः मुहुः पुनः पुनः शिरसा वहामि धरामि। हन्त हर्षे। 'वह प्रापणे इत्यतो लट् परस्मैपदं वहामि वहावः वहामः'। कथंभूतं रजः कमलाकमलासनानिलैः कमला श्रीः। 'कमला श्रीर्हरिप्रिया' इत्यमरः। कमलासनः विरिञ्चः। 'विरिञ्चः कमलासनः' इत्यमरः। अनिलो मुख्यवायुः। कमला च कमलासनश्च अनिलश्च कमलाकमलासनानिलाः तैः। विहगाहीन्द्रशिवेन्द्रपूर्वकैः विहगाः खगाः। 'खगे विहङ्गविहगविहङ्गमविहायसः' इत्यमरः। अहयः भुजङ्गाः। विहगाश्च अहयश्च विहगाहयः विहगाहीनां इन्द्रौ स्वामिनौ। तत्र विहगेन्द्रो गरुडः अहीन्द्रः शेषः विहगाहीन्द्रौ गरुडशेषौ च शिवः महेश्वरः इन्द्रः देवेन्द्रश्च विहगाहीन्द्रशिवेन्द्राः त एव पूर्वकाः आदयो येषां ते तथोक्ताः तैः। देवैः इति शेषः। शिरसा मूर्ध्ना धारितं धृतम् ॥ २५ ॥

प्रणमामि पदद्वयं विभोर्ध्वजवज्राङ्कुशपद्मचिह्नवत्।
निजमानसरागपीडनादरुणीभूतमिवारुणं स्वयम् ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – प्रणमामीति ॥ ध्वजश्च वज्रश्चाङ्कुशश्च पद्मश्च, तेषां यानि चिह्नानि तान्यस्य सन्तीति तादृशम्। स्वयं स्वत एवारुणं लोहितं लोहिततलमिति यावत्। निजानां स्वभक्तानां यानि मनांसि तेषां सम्बन्धी निजमानसः। स चासौ रागो विषयाकाङ्क्षा तस्य पीडनं मर्दनं तस्मान्निराकरणादिति यावत्। अरुणीभूतमिव लोहितं जातमिव। भगवच्चरणारविन्दं पश्यतां हि मानसो रागो निवर्तते। 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति भगवद्वचनात्। स्वत एवारुणस्य निजमानसरागपीडनादरुणीभूतत्वमुत्प्रेक्ष्यते। लाक्षागैरिकाद्याक्रमणेन पादारुणभावस्य दृष्टत्वात्। विभोः श्रीवेदव्यासस्य पदद्वयं चरणयुग्मं प्रणमामि नमस्कुर्याम् ॥ २६ ॥

मन्दोपकारिणी – प्रणमामीति ॥ अहं विभोः वेदव्यासस्य। पदद्वयं पदयोः द्वयं प्रणमामि नमस्करोमि। कथंभूतम् ध्वजवज्राङ्कुशपद्मचिन्हवत् ध्वजश्च वज्रश्च अङ्कुशश्च पद्मं च ध्वजवज्राङ्कुशपद्मानि एतत् संज्ञिकानि चिह्नानि रेखारूपलक्षणानि अस्मिन् सन्तीति ध्वजवज्राङ्कुशपद्मचिन्हवत्। नायं वतिः किन्तु मतुप्। ध्वजादिरेखोपेतमित्यर्थः। पुनः कथं

भूतम्। स्वयम् स्वत एव अरुणं लोहितम् निजमानसरागपीडनात् निजानां आत्मीयानां भक्तानां मनसि विद्यमानः मानसः स चासौ रागः अनुरागः विषयाकाङ्क्षेति यावत् तेन पीडनात् मर्दनात्। अरुणीभूतमिव भगवच्चरणारविन्दं अपरोक्षीकुर्वतां भक्तानां मनसि रागो वर्तते। 'रसोऽप्यस्य परं दृष्टा निवर्तते' इति वचनात्। रसो राग इति तद्भाष्ये व्याख्यानात्। लोके गैरिकादिलोहितपदार्थस्य पादाभ्यां आक्रम्य मर्दनेन पादतलयोः लोहितत्वं भवति यथा तथा भक्तमानसरागस्य पादाभ्यां मर्दनात् भगवत्पादतलयोरपि रागः प्राप्तः इति मे प्रतर्कः इति मध्वाचार्यः स्वत एव लोहितयोरपि पादयोः नैमित्तिकलौहित्यं उत्प्रेक्षत इति भावः। रागशब्दस्य इत्थं अनुरागलोहितोभयार्थकत्वात् रागाक्रमणेन रागप्राप्तिः इति शब्दसाम्यात् एवं उत्प्रेक्षा॥ २६॥

ननु केवलमेव वैष्णवं श्रितवन्तः पदमात्मरोचिषा।
तमसोऽप्युभयस्य नाशका विजयन्ते नखरा नवं रविम्॥ २७॥

पदार्थदीपिकोद्बोधिका – नन्विति॥ केवलं मुख्यतो विष्णोः पदं विष्णुपदमिति योगसिद्धमिति भावः। वैष्णवं विष्णुसम्बन्धि पदं चरणं श्रितवन्त आश्रिताः। रविस्तु रूढिमात्रेण विष्णुपदाभिहिताकाशमाश्रित इति भावः। आत्मरोचिषा स्वतेजसोभयस्यापि द्विविधस्यापि तमसो नाशकाः अन्धकारस्य अज्ञानस्य च नाशका इति भावः। रविस्तु बाह्यमेव निराकुर्यान्नान्तरमिति भावः। अस्य वेदव्यासस्य नखरा नखा नवमुद्यन्तं रविं विजयन्ते अतिशेरते ननु॥ २७॥

मन्दोपकारिणी – नन्विति॥ नखराः वेदव्यासपादनखाः। 'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियां' इत्यमरः। नवं नूतनं उद्यन्तमिति यावत्। रविं सूर्यं विजयन्ते ननु अतिक्रमन्ति हि। 'विपूर्वात् जि जय इत्यतो लट् आत्मनेपदम्'। कथम्, केवलमेव मुख्यतः एव योगवृत्त्येति यावत्। वैष्णवं विष्णोः वेदव्यासस्य इदं वैष्णवं विष्णुसंबन्धि पदं चरणं श्रितवन्तः रविस्तु रूढिमात्रेण विष्णुपदाभिधं आकाशं आश्रितः। आत्मरोचिषा आत्मनां स्वेषां रोचिषा दीप्त्या। उभयस्य द्विविधस्यापि तमसः अन्धकारस्य अज्ञानस्येति भावः। नाशकाः संहारकाः। रविस्तु बाह्यमेव तमो निराकरोति। अतः सूर्यापेक्षया उत्कर्षस्य सत्वात् विजयन्त इति उपपन्नम्। नवं रविं इत्युक्त्या नखानां अरुणकान्तिमत्वं उक्तं भवति॥ २७॥

सुकुमारतलाङ्गुलीमतोः पदयोरस्य निगूढगुल्फयोः ।
उपमानमहो न दृश्यते कविवर्यैरितरेतरं विना ॥ २८ ॥

पदार्थदीपिकोद्बोधिका – सुकुमारेति ॥ कविवर्यैः कविश्रेष्ठैः । तले पादतलेऽगुल्यस्तलाङ्गुल्यः । सुकुमारा अतिकोमला या तलाङ्गुल्यस्ता अनयोः सन्तीति तयोः । निगूढौ गुल्फौ ग्रन्थी ययोस्तयोः । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । पदयोश्चरणयोः, इतरेतरमन्योन्यं विना उपमानं दृष्टान्तो न लभ्यते । अहो आश्चर्यम् । दक्षिणपादस्य सव्यपादो दृष्टान्तस्तस्य च दक्षिणपाद इति भावः ॥ २८ ॥

मन्दोपकारिणी – सुकुमारेति ॥ सुकुमारतलाङ्गुलीमतोः तले पादाधोभागौ च अङ्गुल्यः पदाङ्गुल्यश्च तलाङ्गुल्यः । सुकुमाराः कोमलाश्च ताः तलाङ्गुल्यश्च अनयोः सन्तीति सुकुमारतलाङ्गुलीमती तयोः । 'सुकुमारन्तु कोमलं मृदुलं मृदु' इत्यमरः । 'तलं स्वरूपाधरयोः' इति विश्वः । निगूढगुल्फयोः निगूढौ संबद्धौ गुल्फौ पादग्रन्थी ययोः ते निगूढगुल्फे तयोः 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । अस्य वेदव्यासस्य । पदयोः चरणयोः । इतरेतरं अन्योन्यं विना दक्षिणपादस्य सव्यपादं विना सव्यपादस्य दक्षिणपादं विना इति भावः । उपमानं दृष्टान्तः । कविवर्यैः कविश्रेष्ठैः । न दृश्यते न लभ्यते । अहो आश्चर्यं असदृशत्वं पादयोः इति भावः । 'दृशिर् प्रेक्षण इत्यतः कर्मणि लट् आत्मनेपदम्' ॥ २८ ॥

उचितां गुरुतां दधत्क्रमाच्छुचि तेजस्वि सुवृत्तमुत्तमम् ।
भजतोऽत्र च भाजयत्यदो विभुजङ्घायुगलं सरूपताम् ॥२९॥

पदार्थदीपिकोद्बोधिका – उचितामिति ॥ क्रमादुचितां गुरुतां दधत् । गुल्फादूर्ध्वं जानुपर्यन्तं क्रमेण यावदुचितं तावत् स्थूलत्वं दधदित्यर्थः । शुचि निर्दोषम् । तेजोऽस्यास्तीति तेजस्वि । सुवृत्तं सम्यग्वर्तुलमुत्तमं अदस्तद्विभोः श्रीव्यासस्य जङ्घयोर्युगलं युग्मं भजतः पुरुषानत्र च मुक्तेः प्रागपि सरूपतां सारूप्यं भाजयति प्रापयति । श्रीव्यासजङ्घायुगलस्य यथा शुचित्वं, क्रमेण गुरुत्वं, सुवृत्तत्वं, तेजस्वित्वमुत्तमत्वञ्च, तद्भदुपासका अपि क्रमेण शुचयो निर्दोषा, गुरवः स्वावराणामुपदेशकर्तारः सुवृत्ताः शोभनाचारास्तेजस्विन उत्तमा ज्ञानभक्त्यादिभिरुत्तमाश्च भवन्तीति भावः । अत्र च सरूपतां भाजयति किमु मुक्ताविति च अर्थः ॥ २९ ॥

मन्दोपकारिणी – उचितामिति ॥ अदः तत् विभुजङ्घायुगलं विभोः वेदव्यासस्य जङ्घे गुल्फादारभ्य उपरितनं जानुमण्डलपर्यन्तं अङ्गं जङ्घा इत्युच्यते। 'जङ्घा तु प्रसृता जानु' इत्यमरः। तयोः युगलं युग्मं भजतः दर्शनस्मरणादिना सेवमानान् पुरुषान् अधिकारिणः। अत्र च सरूपतां सारूप्यं स्वसादृश्यं भाजयति प्रापयति। कथंभूतम् क्रमात् उचितां गुल्फादूर्ध्वं जानुपर्यन्तं च क्रमेण योग्यां गुरुतां स्थूलतां दधत् बिभ्रत् शुचि निर्दोषम्। 'शुचिः शुद्धेऽनुपहते' इति विश्वः। तेजस्वि तेजः अस्यास्तीति तेजस्वि उज्वलम्। सुवृत्तं सम्यक् वर्तुलं उत्तमं श्रेष्ठं श्रीवेदव्यासजङ्घायुगलं यथा शुचि, क्रमेण गुरु, सुवृत्तं च तेजोयुक्तं उत्तमं च, तथा तदुपासकाः पुरुषाः अपि शुचयः निर्दोषाः, क्रमेण स्वावरेषु गुरवः उपदेशकर्तारः। सुवृत्ताः शोभनं वृत्तं आचारः येषां ते सुवृत्ताः। 'वृत्तं पद्ये चरित्रे त्रिषु' इत्यमरः। तेजस्विनः ब्रह्मवर्चस्विनः उत्तमाः ज्ञानभक्त्यादिगुणैः उत्तमाश्च भवन्तीति भावः। अत्रापि सारूप्यं ददाति किं मुक्तानामिति चशब्दार्थः। 'भज सेवायां इत्यतो णिजन्तात् लट् परस्मैपदम्' ॥ २९ ॥

अचलासनयोगपट्टिका वरकक्ष्या सकृदाप्तमिष्टदम्।
परितोऽपि हरिं स्फुरन्त्यहो अनिशं धन्यतमेति मे मतिः ॥ ३० ॥

भावप्रकाशिका – हरिं परितः। 'अभितः परितः समयानिकषाहाप्रतियोगेऽपि' इति कर्मत्वम् ॥ ३० ॥

पदार्थदीपिकोद्बोधिका – अचलेति ॥ वरा उत्तमा च सा कक्ष्या मध्यबन्धनं वरकक्ष्या। 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः। मध्येभबन्धन इत्यस्य मध्यबन्धने, इभबन्धने चेत्यर्थः। तथा च वरकक्ष्या उत्तममध्यबन्धनभूता। न विद्यते चलश्चलनं यस्य तदचलं तादृशं यदासनमवस्थानं तदर्था योगपट्टिका अचलासनयोगपट्टिका। योगपट्टिकया मध्यबन्धने कृते सति स्थिरासनत्वं भवतीति भावः। सकृदेकदाऽऽप्तमपि प्राप्तमपीष्टदमभीष्टप्रदं हरिं श्रीवेदव्यासं परितः। 'अभितः परितः' इत्यादिना द्वितीया। वेदव्यासस्य समन्तादनिशं निरन्तरं स्फुरन्ती सती धन्यतमेति मे मतिः। पुंसां सकृद्भगवत्प्राप्त्या धन्यत्वमभीष्टप्राप्तिश्च भवति। योगपट्टिका त्वनिशमपि परितः स्फुरति अहो आश्चर्यम्। तस्माद्धन्यतमेति भावः ॥ ३० ॥

मन्दोपकारिणी – अचलेति ॥ वरकक्ष्या वरा उत्तमा च सा कक्ष्या मध्यबन्धनभूता च वरकक्ष्या। 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः। यद्यपि कक्ष्याशब्दः गजमध्यबन्धनस्य सञ्ज्ञा। तथापि अत्र मध्यबन्धनमात्रविवक्षया प्रयुक्तः इति ज्ञेयम्। अचलासनयोगपट्टिका अचलासनस्य योगपट्टिका ध्यानकाले अचलं यथा स्यात् तथोपवेशनाय कृतः जानुभ्यां सह मध्यबन्धनभूतः चतुरङ्गुलविस्तीर्णः कश्चन पदार्थः योगपट्टिकेत्युच्यते। योगस्य ध्यानस्य पट्टिकेति तादृश्या योगपट्टिकया मध्यबन्धने कृते स्थिरासनत्वं भवतीति एवं मध्यबन्धनभूतयोगपट्टिका। हरिं वेदव्यासं परितः समन्ततः। हरेः वेदव्यासस्य समन्तादपि इत्यर्थः। अनिशं सततं स्फुरन्ती शोभमाना सती। धन्यतमा पुण्यतमा पुण्यवती। 'सुकृती पुण्यवान् धन्यः' इत्यमरः। इति मे मतिः निश्चयः। कथंभूतं हरिम्। सकृत् एकवारम्। 'सकृत्सहैकवारे' इत्यमरः। आप्तं प्राप्तमपि। इष्टदं अभीष्टप्रदं पुंसां सकृत् भगवत्प्राप्त्या अभीष्टप्राप्तिश्च भवति। योगपट्टिका तु निरन्तरं भगवन्तं प्राप्य स्फुरति अतः धन्यतमेति मे मतिः। अहो एतद्योगपट्टिकायाः भाग्यमिति भावः ॥ ३० ॥

रुचिरेण वरैणचर्मणा रुचिराजद्युतिचारुरोचिषा।
परमोरुनितम्बसङ्गिना परमाश्चर्यतया विराज्यते ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – रुचिरेणेति ॥ परमस्य उत्तमस्य श्रीव्यासस्योरुनितम्ब-स्योत्कृष्टकटिस्थलस्य सङ्गोऽस्यास्तीति तादृशेन। परमस्य ये ऊरुनितम्बास्तेषां सम्बन्धिनेति वा। 'नितम्बः पश्चिमश्रोणिभागेऽद्रिकटके कटा'विति वैजयन्ती। रुचिरेण रमणीयेन। रुचीनां मयूखानां राजा रुचिराजः सूर्यस्तस्य या द्युतिः दीप्तिः तद्वत् चारु मनोहरं रोचिः कान्तिर्यस्य तादृशेन। 'रुचिर्मयूखे शोभायां' इति विश्वः। वरमुत्तमं यत् एणचर्म कृष्णमृगचर्म तेन । परमं यदाश्चर्यं तस्य भावस्तत्ता तया विराज्यते। राजृ दीप्तौ भावे लिट्। श्रीव्यासस्य बहिर्वासोभूतमेणचर्मातितरां विराजत इति भावः ॥ ३१ ॥

मन्दोपकारिणी – रुचिरेणेति ॥ परमोरुनितम्बसङ्गिना ऊरुः सक्थि। 'सक्थि क्लीबे पुमानूरुः इत्यमरः। नितम्बः कटिः ऊरुश्च नितम्बश्च ऊरुनितम्बौ परमस्य वेदव्यासस्य ऊरुनितम्बौ परमोरुनितम्बौ तयोः सङ्गः योगः अस्यास्तीति परमोरुनितम्बसङ्गी तेन। रुचिरेण मनोहरेण । रुचिराजद्युतिचारुरोचिषा रुचीनां प्रभानां राजा रुचिराजः सूर्यः तस्य

द्युतिवत् दीप्तिवत् चारु मनोहरं रोचिः कान्तिः यस्य तत् रुचिराजद्युतिचारुरोचिः तेन। 'स्युः प्रभारुग्रुचिस्त्विड् भा भाश्छविद्युतिदीप्तयः' इत्यमरः। 'सुन्दरं रुचिरं चारु' इति च। वरेण उत्तमेन चर्मणा कृष्णाजिनेन। परमाश्चर्यतया परमं अत्यन्तं आश्चर्यं परमाश्चर्यस्य भावः परमाश्चर्यता तया। विराज्यते दीप्यते। राजृ दीप्तावित्यतो भावे लट् आत्मनेपदम्'। वेदव्यासोपविष्टं कृष्णाजिनं अत्यपूर्वतया शोभत इति भावः॥ ३१॥

तनुनिम्नसुनाभिशोभिते वलिभे वारिजनाभ आदधे।
प्रतनावतिसुन्दरे मृदावुदरेऽस्मिन् जगदण्डमण्डलम्॥ ३२॥

भावप्रकाशिका – 'तुन्दिवलिवटेभः' इति॥ ३२॥

पदार्थदीपिकोद्बोधिका – तन्विति॥ वारिणि जातं वारिजं पद्मं तन्नाभौ यस्य स श्रीव्यासः। तनुः सूक्ष्मो यो निम्नसुनाभिः गम्भीरशोभननाभिः तेन शोभिते। वलिभिस्त्रिरेखाभिर्भातीति वलिभम्। वलयस्त्रिरेखा अस्य सन्तीति वलिभमिति वा। 'तुन्दिवलिवटेर्भ' इति मत्वर्थे भः। तस्मिन् प्रतनावत्यल्पेऽतिसुन्दरे मृदावस्मिन् दृश्यमान उदरे जगदण्डस्य ब्रह्माण्डस्य मण्डलमादधे सम्यग्दधार। मृदुप्रतनूदरे ब्रह्माण्ड-धारणमतिचित्रमिति भावः॥ ३२॥

मन्दोपकारिणी – तन्विति॥ वारिजनाभः वारिजं पद्मं नाभौ यस्य स तथोक्तः वेदव्यासः। तनुनिम्नसुनाभिशोभिते तनुः सूक्ष्मा। 'स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु' इत्यमरः। निम्ना गभीरा। 'निम्नं गभीरं गम्भीरम्' इत्यमरः। तनुश्च सा निम्ना च सा सुनाभिश्च तनुनिम्नसुनाभिः तया शोभिते शोभमाने वलिभे वलिभिः रेखाभिः भा कान्तिः यस्य तत् तस्मिन् वलिभे वलित्रयाङ्किते इति यावत्। प्रतनौ अत्यल्पे अतिसुन्दरे मृदौ कोमले अस्मिन् दृश्यमाने उदरे स्वजठरे अण्डमण्डलं ब्रह्माण्डमण्डलात्मकं जगत् आदधे सम्यक् दधार। कोमले अत्यल्पे उदरे अतिस्थूलब्रह्माण्डधारणं अतिचित्रमिति भावः। 'डु धाञ् धारणपोषणयोः लिट् आत्मनेपदं दधे दधाते दधिरे'॥ ३२॥

हृदये कृतसज्जनोदये सुविशाले मुनिवंशशेखरः।
उभयं वहति त्रयीमयं विमलं ब्रह्मसुसूत्रमुत्तमम्॥ ३३॥

भावप्रकाशिका – हृदयेऽन्तर्बहिश्च । ब्रह्मसूत्रं वेदान्तसूत्रं उपवीतं च ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – हृदय इति ॥ मुनिवंशे वसिष्ठवंशे शेखरः श्रेष्ठः श्रीव्यासः । कृतः सज्जनोदयः सज्जनसम्पत् येन तस्मिन् । सुविशाले विमले मनोहरे हृदये त्रयीमयं त्रिवेदमयमुत्तममुभयं द्विविधं ब्रह्मसुसूत्रं शोभनं ब्रह्मसूत्रं हृदयान्तर्वेदान्तसूत्रं बहिर्यज्ञोपवीतं च वहतीति भावः । उभयस्य त्रयीमयत्वं नाम- वेदान्तसूत्रस्य वेदार्थनिर्णायकत्वमितरस्य वेदाभिमानिभिः अभिमन्यमानत्वं वेदसिद्धत्वं वेति ॥ ३३ ॥

मन्दोपकारिणी – हृदय इति ॥ मुनिवंशशेखरः मुनेः वसिष्ठस्य वंशस्य अन्वयस्य शेखरः शिखाभूतः वेदव्यासः । कृतसज्जनोदये कृतः सज्जनानां उदयः अभ्युदयः सम्पत् येन तत् तथोक्तं तस्मिन् । सुविशाले अतिविस्तृते हृदये त्रयीमयं वेदमयं वेदात्मकं उभयं द्विविधं विमलं स्वच्छं उत्तमं श्रेष्ठं ब्रह्मसुसूत्रं शोभनं ब्रह्मसूत्रं वहति धत्ते । 'वह प्रापण इति धातोः लट् परस्मैपदम्' । बह्वर्थविषयीकारात् हृदयान्तः वेदार्थनिर्णायकब्रह्मसूत्रं वहति । हृदयबहिः विस्तीर्णे वक्षसि वेदाभिमानिदेवाभिमन्यमानयज्ञोपवीतं वहतीति भावः ॥ ३३ ॥

असमेऽनधिके सुसाधिते निजताते रविराशिदीधिति ।
प्रददौ त्रिजगज्जयध्वजं विधिरेतद्गलसङ्गिभूषणम् ॥ ३४ ॥

भावप्रकाशिका– 'नास्ति नारायणसममि'ति पत्रालम्बनश्लोको ब्रह्मसदसि ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – असम इति ॥ विधिर्ब्रह्मा । निजताते स्वपितरि नारायणे । न विद्यते समो यस्य तस्मिन्नसमे समरहित इत्यर्थः । न विद्यतेऽधिको यस्मात्सोऽनधिकस्तस्मिन् । उत्तमरहित इत्यर्थः । सुसाधिते 'नास्ति नारायणसमं न भूतं न भविष्यती'ति श्लोकेन पत्रालम्बनं कृत्वा श्लोकार्थे सम्यग्साधिते सति । अस्मै श्रीव्यासाय । रवीणां सूर्याणां राशेः समूहस्य दीधितय इव दीधितयः किरणा यस्य तादृशम् । त्रिजगतां जयस्य यो ध्वजः स इवाचरतीति त्रिजगज्जयध्वजम् । गलसङ्गः कण्ठसङ्गोऽस्यास्तीति गलसङ्गि भूषणं कण्ठभूषणं प्रददौ । 'सहस्रार्थान् ऋषीनेष यौगपद्येन पृच्छतः । सहस्रोत्तरदानेन युगपत्पर्यतोषयदि'ति वचनात् श्रीव्यासस्य जगज्जयः प्रसिद्धः ॥ ३४ ॥

मन्दोपकारिणी – असम इति ॥ विधिः ब्रह्मा वेदव्यासेनेति शेषः। निजताते स्वकीयजनके। 'तातस्तु जनकः पिता' इत्यमरः श्रीमन्नारायणे । असमे न विद्यते समः सदृशः यस्य स तथोक्तः तस्मिन्। अनधिके न विद्यते अधिकः उत्तमः यस्मात् स तथोक्तः तस्मिन्। सुसाधिते व्यासेन 'नास्ति नारायणसमं न भूतं न भविष्यति' इति श्लोकं पत्रे विलिख्य सर्वान् प्रति सम्यक् साधिते सति नारायणस्य अधिकः समो वा नास्तीति एवं साधिते सतीति यावत्। अस्मै वेदव्यासाय। त्रिजगज्जयध्वजं त्रीणि च तानि जगन्ति च त्रिजगन्ति त्रिजगतां जयः तस्मिन् ध्वजं ध्वजायमानम् । गलसङ्गि गले कण्ठे। 'कण्ठो गलोऽथ ग्रीवायां' इत्यमरः। सङ्गि सङ्गो अस्यास्तीति सङ्गि कण्ठालङ्कारभूतं तादृशं भूषणं कौस्तुभरत्नं प्रददौ। कथंभूतं रविराशिदीधिति रवीनां सूर्याणां राशिः पुञ्जः रविराशेः दीधितयः इव मरीचयः इव दीधितयः यस्य तत्तथोक्तम् । 'सहस्रार्थान् ऋषीनेको यौगपद्येन पृच्छतः। सहस्रोत्तरदानेन युगपत् पर्यतोषयत्' इति वचनात् जगज्जयः प्रसिद्धः। वेदव्यासः गले कौस्तुभमणिं धत्ते । तत्र उत्प्रेक्षते, वेदव्यासेन तत्तद्वादिकृतपूर्वपक्षनिरासपूर्वकं श्रीनारायणस्य सर्वोत्तमत्वं 'नास्ति नारायणेति' श्लोकं पत्रावलंबितं कृत्वा प्रसाध्य सार्वज्ञे संपादिते सति सभापतिस्थानीयो ब्रह्मा सर्वजयज्ञापकं स्वाभिमन्यमानं कौस्तुभमणिं वेदव्यासस्य बहुमानत्वेन बबन्ध इति मे मतिः इति। 'डु दाञ् दान इत्यतो लिट् परस्मैपदं ददौ ददतुः ददुः' ॥ ३४ ॥

अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः ।
पृथुपीवरवृत्तहस्तयोरुपमां नैव लभामहेऽनयोः ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – अरीति ॥ अरिश्चक्रं वारिजः शङ्खस्तयोर्लक्षणे रेखा-रूपचिह्ने। ताभ्यामुल्लसती सुकुमारारुणपाणिपद्मे सुकोमलरक्तपाणिपद्मे ययोस्तयोरनयोः परिदृश्यमानयोः। पृथू स्थूलौ पीवरौ पुष्टौ यौ वृत्तहस्तौ वर्तुलबाहू तयोरुपमां दृष्टान्तं नैव लभामहे ॥ ३५ ॥

मन्दोपकारिणी – अरीति ॥ अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः अरिः चक्रं 'अरिः पुमांश्चक्रवाके रिपौ चक्रे तु न द्वयं' इत्यमरः। वारिजः शङ्खः। 'अब्जौ शङ्ख शशाङ्कौ च' इत्यमरः। अरिश्च वारिजश्च अरिवारिजौ अरिवारिजयोः लक्षणे रेखारूपचिह्ने

ताभ्यां उल्लसती। पाणी करतले एव पद्मे नलिने पाणिपद्मे चक्राकारशङ्खाकाररेखाभ्यां शोभमाने इति यावत्। सुकुमारे कोमले च अरुणे रक्तवर्णे च ते पाणिपद्मे च। अरिवारिजलक्षणोल्लसती सुकुमारारुणपाणिपद्मे ययोः तौ तथोक्तौ तयोः अनयोः। पृथुपीवरवृत्तहस्तयोः पृथू स्थूलौ च तौ पीवरौ पुष्टौ च तौ वृत्तौ वर्तुलौ च तौ हस्तौ तयोः। उपमां दृष्टान्तं न लभामहे न पश्यामः।एतादृशवस्तुनः कुत्रापि अभावादिति भावः। 'डु लभष् प्राप्तौ इत्यतो लट् आत्मनेपदं लभे लभावहे लभामहे' ॥ ३५ ॥

भजतां वरतर्कमुद्रया द्यति हस्ताग्रमबोधमीशितुः।
अधिजानु समर्पितं परं कृतभूयोभयभङ्गमङ्गलम् ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – भजतामिति॥ ईशितुः श्रीव्यासस्य हस्ताग्रं वरा या तर्कमुद्रा ज्ञानमुद्रा तया भजतामबोधमज्ञानं द्यति खण्डयति। दो अवखण्डने लट्। जानुन्यधि अधिजानु। विभक्त्यर्थेऽव्ययीभावः। जानूपरीत्यर्थः। समर्पितं न्यस्तं परं वामहस्ताग्रं भूयो महद्भयं भूयोभयम्। संसारलक्षणं भयमित्यर्थः। तस्य भङ्गो नाशः, कृतः भूयोभयभङ्गो येन तादृशं, तच्च तन्मङ्गलं चेति तादृशम्। दक्षिणवामहस्तौ ज्ञानाभय-मुद्राङ्कितौ इति भावः॥ ३६ ॥

मन्दोपकारिणी – भजतामिति॥ ईशितुः मम स्वामिनः वेदव्यासस्य। हस्ताग्रं हस्तस्य दक्षिणकरस्य अग्रं अङ्गुलिरूपोऽवयवः। वरतर्कमुद्रया तर्कस्य ज्ञानस्य मुद्रा तर्कमुद्रा वरा उत्तमा च सा तर्कमुद्रा च वरतर्कमुद्रा तया। भजतां स्वभक्तानां अबोधं अज्ञानं द्यति खण्डयति। 'दो अवखण्डन इति धातोः लट् परस्मैपदं द्यति द्यतः द्यन्ति'। अधिजानु जानौ अधि अधिजानु। अव्ययीभावसमासोऽयं अव्ययं वा। वामजानुतः उपरि इति यावत्। समर्पितं न्यस्तं परं दक्षिणहस्तात् अन्यं वामहस्ताग्रं कृतभूयोभयभङ्गमङ्गलं भूयः भूरि भयं यस्मिन् तत् भूयोभयं संसारलक्षणं तस्य भङ्गः नाशः भूयोभयभङ्गश्च मङ्गलं शुभं च कृते भूयोभयमङ्गले येन तत् तथोक्तम्। भक्तानां संसारभयं परिहृत्य मुक्तिरूप-शुभप्रदं इत्यर्थः। वेदव्यासस्य दक्षिणवामबाहू ज्ञानाभयमुद्राङ्कितौ इति भावः॥ ३६ ॥

सततं गलता स्वतः श्रुतित्रितयेनैव निकाममङ्कितः।
सुविडम्बितकम्बुरीक्ष्यते वररेखात्रयवान् गुरोर्गलः ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – सततमिति ॥ स्वतः स्वस्मात्सततं गलता निर्गच्छता श्रुतीनां ऋगादिवेदानां त्रितयं तेन । निकामं सम्यगङ्कित इव चिह्नित इव। वरमुत्तमं यद्रेखात्रयं तदस्यास्तीति तादृशः। अत एव सुविडम्बितो मध्ये रेखात्रययुक्तत्वेन सम्यगनुकृतः कम्बुः शङ्खो येन तादृशः । गुरोः श्रीव्यासस्य गलः कण्ठः ईक्ष्यते द्रक्ष्यते ॥ ३७ ॥

मन्दोपकारिणी – सततमिति ॥ स्वतः स्वस्मात् सततं गलता बहिर्निर्गच्छता श्रुतित्रितयेन श्रुतीनां ऋगादिवेदानां त्रितयेन त्रयेण निकामं सम्यक् अङ्कितः इव चिन्हित इव वररेखात्रयवान् वरश्च ताः रेखाश्च वररेखाः वररेखानां त्रयं त्रिकं अस्य अस्तीति वररेखात्रयवान्। अतः एव सुविडम्बितकम्बुः सम्यक् विडम्बितः अनुकृतः कम्बुः शङ्खः येन स तथोक्तः। 'कम्बुर्ना वलये शङ्खे' इत्यमरः। रेखात्रयवत्त्वेन शङ्खसदृश इति यावत्। गुरोः वेदव्यासस्य गलः कण्ठः ईक्ष्यते दृश्यते वेदव्यासकण्ठः शङ्खवत् रेखात्रयोपेतः कण्ठे विद्यमानः तिस्रो रेखाः कण्ठात् निर्गच्छन्तः त्रयः ऋगादिवेदा इव प्रतीयन्ते इति उपमा। वेदत्रयमेव त्रिरेखारूपेण सततं बहिर्गतः इति मे तर्कः इति उत्प्रेक्षा वा इति ज्ञातव्यम् ॥ ३७ ॥

सकलास्तकलङ्ककालिमस्फुरदिन्दुप्रकरोरुविभ्रमम्।
अधरीकुरुते स्वशोभया वदनं देवशिखामणेरिदम् ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – सकलेति ॥ देवशिखामणेः देवश्रेष्ठस्य श्रीव्यासस्य इदं वदनं स्वशोभया स्वकान्त्या। कलाभिः सहिताः सकलाः पूर्णा इत्यर्थः। तादृशा येऽस्तकलङ्ककालिमानोऽस्तो निरस्तः कलङ्ककालिमा शशलाञ्छनकाष्र्ण्यं येषां तादृशाः स्फुरन्तः शोभमाना इन्दवस्तेषां यः प्रकरः समूहस्तस्योरुविभ्रम उरुकान्तिस्तामधरीकुरुते निराकरोति। सम्पूर्णास्तकलङ्कचन्द्रप्रकरकान्तेरपि भगवद्वदनकान्तिरधिकेति भावः ॥ ३८ ॥

मन्दोपकारिणी – सकलेति ॥ देवशिखामणेः देवानां शिखामणेः चूडामणेः देवश्रेष्ठस्येति यावत्। 'शिखा चूडा शिखण्डस्तु' इत्यमरः। वेदव्यासस्य इदं वदनं आननं स्वशोभया स्वकान्त्या सकलास्तकलङ्ककालिमस्फुरदिन्दुप्रकरोरुविभ्रमं स्फुरन्तश्च ते इन्दवश्च

स्फुरदिन्दवः कलाभिः सहिताः सकलाः सकलाश्च ते अस्तकलङ्ककालिमानश्च ते स्फुरदिन्दवश्च सकलास्तकलङ्ककालिमस्फुरदिन्दवः सकलानां षोडशकलासहितानां अस्तः निरस्तः कलङ्कस्य शशरूपलाञ्छनस्य कालिमा श्यामलत्वं येषां ते तथोक्ताः तेषां अस्तकलङ्ककालिमत्वादेव स्फुरतां प्रकाशमानानां इन्दूनां चन्द्राणां प्रकरस्य समूहस्य उरु उत्कृष्टं विभ्रमं कान्तिं अधरीकुरुते अधः कुरुते। डु कृञ् करण इत्यतः लडात्मनेपदम्। 'अधरीति च्विप्रत्ययान्तं अव्ययम् । कुरुते कुर्वाते कुर्वते'। षोडशकलापरिपूर्ण-चन्द्रसमुदायकान्त्यपेक्षया भगवद्वदनकान्तिः अधिका इति भावः। 'कलङ्काङ्कौ लाञ्छनं' इत्यमरः। विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती ॥ ३८ ॥

अरुणाश्मदलान्तरोल्लसन्नवमुक्तावलिमस्य लज्जयेत्।
हसतः सितदन्तसन्ततिः परमश्रीररुणोष्ठरोचिषः ॥ ३९ ॥

पदार्थदीपिकोद्बोधिका – अरुणेति ॥ अरुणोष्ठयो रक्तोष्ठयो रोचिः कान्तिर्यस्य तस्य । हसतो मन्दस्मितं कुर्वतोऽस्य श्रीव्यासस्य परमा उत्तमा श्रीः कान्तिर्यस्याः सा। सितदन्ताश्शुभ्रदन्तास्तेषां सन्ततिः पङ्क्तिः। अरुणाश्मा पद्मरागमणिस्तस्य यद्दलं तस्यान्तरे मध्य उल्लसन्ती या नवमुक्तावलिर्नूतनमौक्तिकमणिपङ्क्तिः तां लज्जयेत्। ओ लस्जी व्रीडायां लिङ्। हसतोऽस्यारुणोष्ठद्वयमध्यगता सितदन्तसन्ततिः पद्मरागदलमध्यगतमुक्तावलिमतिशेत इति भावः ॥ ३९ ॥

मन्दोपकारिणी – अरुणेति ॥ अरुणोष्ठरोचिषः अरुणौ रक्तौ च तौ ओष्ठौ रदनच्छदौ च अरुणोष्ठौ। 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। अरुणोष्ठयोः रोचिः यस्य तस्य । हसतः मन्दस्मितं कुर्वतः । अस्य श्रीवेदव्यासस्य । परमश्रीः परमा उत्तमा श्रीः कान्तिः यस्याः सा तथोक्ता। 'श्रीर्वेषरचना शोभा कांन्तिः' इत्यमरः। सितदन्तसन्ततिः सिताः अवदाताश्च ते दन्ताः रदनाश्च सितदन्ताः। 'अवदातः सितो गौरः' इत्यमरः। सितदन्तानां सन्ततिः पङ्क्तिः। अरुणाश्मदलान्तरोल्लसन्नवमुक्तावलिं अरुणः रक्तश्चासौ अश्मा पाषाणश्च 'पाषाणप्रस्तरग्रावोपलाश्मनः शिलाद्दषत्' इत्यमरः। अरुणाश्मा पद्मरागमणिः तस्य दले शकले। 'शकलच्छदयोर्दलं' इत्यमरः। तयोः अन्तरे मध्ये उल्लसन्ती शोभमाना नवा नूतना मुक्तानां मौक्तिकानां आवलिः पङ्क्तिः तां लज्जयेत् तिरस्कुर्यात्। लोहितपद्मरागमणेः शकलयोः मध्ये धवलमुक्तापङ्क्तिः यथा शोभते तथा हसतः

वेदव्यासस्य रक्तवर्णोष्ठद्वयमध्ये शोभमाना धवलदन्तपङ्क्तिः तदपेक्षया अधिककान्तिमती इति भावः। 'ओ लस्जी व्रीडायां इत्यतो लिङ् परस्मैपदम्' ॥ ३९ ॥

द्विजवृन्दकृतं कुतूहलादनुयोगान्धुसहस्रमुत्तमम्।
इयमेकपदे सरस्वती श्रुतिभर्तुः परिपूरयत्यहो ॥ ४० ॥

भावप्रकाशिका – सहस्रार्थान् ऋषीनेषः यौगपद्येन पृच्छतः। सहस्रोत्तरदानेन युगपत् पर्यतोषयत् ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – द्विजेति ॥ श्रुतीनां भर्ता स्वामी तस्य श्रीव्यासस्य इयं सरस्वती वाणी। महादरात् महाबहुमानाद्विजवृन्दैर्ब्राह्मणसमूहैः कृतमुत्तमं अनुयोगा एव प्रश्ना एवान्धवः कूपास्तेषां सहस्रम्। 'प्रश्नोनुयोगः पृच्छा च। पुंस्येवान्धुः प्रहिः कूपः' इति च अमरः। एकपद एकवाक्ये युगपदेवेत्यर्थः। परिपूरयति परिहरति। अहो आश्चर्यम्। नदीप्रवाहो यथाऽभिवृद्धः संस्तीरगतकूपसहस्रं युगपदेव पूरयति तद्वदियं बहून् प्रश्नान्युगपदेव सहस्रोत्तरदानेन परिहरति। 'सहस्रार्थान् ऋषीनेषः यौगपद्येन पृच्छतः। सहस्रोत्तरदानेन युगपत् पर्यतोषयदि'ति वचनादिति भावः ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – द्विजेति ॥ श्रुतिभर्तुः श्रुतीनां वेदानां भर्तुः स्वामिनः वेदव्यासस्य इयं सरस्वती वाक् कुतूहलात् संभ्रमात् द्विजवृन्दकृतं द्विजानां ऋषीणां वृन्देन समूहेन कृतम्। स्त्रियान्तु संहतिर्वृन्दं' इत्यमरः। उत्तमं अनुयोगान्धुसहस्रं अनुयोगाः प्रश्नाः ते एव अन्धवः कूपाः। 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः। 'पुंस्येवान्धुः प्रहिः कूपः' इत्यमरः। तेषां सहस्रं एकपदे युगपदेव परिपूरयति सहस्रोत्तरदानेन पूर्णं करोति। यथा सरस्वती नदी 'कूलंकषा निर्झरिणी रोधो वक्रा सरस्वती' इत्यमरः। अभिवृद्धा सती द्विजवृन्दः विप्रक्षत्रियवैश्याः तत्कृतगंभीरसहस्रकूपान् युगपदेव पूरयति तथा वेदव्यासोऽपि सहस्रप्रश्नान् युगपदेव सहस्रोत्तरदानेन पूरयति। अहो! युगपदेव सहस्रोत्तरदानेन सहस्रऋषिमनःपूर्तिकरणं आश्चर्यमिति भावः। सहस्रार्थान् ऋषीन् एषः यौगपद्येन पृच्छतः। सहस्रोत्तरदानेन युगपत् पर्यतोषयत् इति प्रमेयसिद्धम् ॥ ४० ॥

जलजायतलोचनस्य मामवलोकोऽयमुपेत्य लालयन् ।
कुरुते परिरभ्य पूरितं भुवनानन्दकरस्मितान्वितः ॥ ४१ ॥

पदार्तदीपिकोद्बोधिका – जलजेति ॥ जलजवत् पद्मवत् आयते विशाले लोचने यस्य तस्य श्रीव्यासस्य । भुवनानन्दं जगदानन्दं करोतीति तादृशं यत्स्मितं तेनान्वितोऽयमवलोको दृष्टिपातः लालयन् सन् मामुपेत्य परिरभ्य पूरितं कृतार्थं कुरुते ॥ ४१ ॥

मन्दोपकारिणी – जलजेति ॥ जलजायतलोचनस्य जलजवत् कमलवत् आयते विस्तीर्णे लोचने नयने यस्य स तथोक्तः तस्य वेदव्यासस्य । भुवनानन्दकरस्मितान्वितः भुवनानां लोकानां आनन्दं सुखं करोतीति भुवनानन्दकरं तच्च तत् स्मितं मन्दहासश्च तेन अन्वितः युक्तः अयं मद्विषयकः अवलोकः अवलोकनं लालयन् आदरं कुर्वन् मामुपेत्य मत्समीपं प्राप्य परिरभ्य आश्लिष्य पूरितं पूर्णमनोरथं कुरुते करोति । वेदव्यासः इदानीं मन्दहासपूर्वकं स्नेहेन प्रहसन् लोचनाभ्यां मां सम्यक् पश्यति । तेन अहं कृतार्थोऽभूवं इति भावः ॥ ५१ ॥

उपकर्णममुष्य भासिता तुलसी मन्त्रयतीव लालिता ।
मम नाथ पदं न मत्सराज्जलजाद्यानि हरेयुरित्यलम् ॥ ४२ ॥

पदार्थदीपिकोद्बोधिका – उपेति ॥ अमुष्य श्रीव्यासस्य कर्णस्य समीप उपकर्णम् । 'अव्ययं विभक्ती'त्यादिना समीपार्थेऽव्ययीभावः । भगवता स्वकर्णारोपणेन भासिताऽलङ्कृता तुलसी लालिता श्रीव्यासेन स्वकर्णारोपणेनैवादृता सती । हे नाथ! स्वामिन्! जलजं पद्ममाद्यं येषां तानि पुष्पाणि मत्सरात् मात्सर्यात् मम पदं स्थानं कर्णप्रदेशं न हरेयुः इत्यलं सम्यङ्मन्त्रयतीव उपकर्णमेवं गुप्तभाषणं करोतीव वर्तते । मत्रि गुप्तभाषणे । भगवता स्वकर्णे धृता तुलसी मन्त्रयतीव इति उत्प्रेक्षा ॥ ४२ ॥

मन्दोपकारिणी – उपकर्णमिति ॥ अमुष्य श्रीवेदव्यासस्य उपकर्णं कर्णयोः समीपं उपकर्णं श्रोत्रयोरिति यावत् । भासिता भगवता स्वकर्णयोः आरोपणेन अलङ्कृता । तुलस्याः भगवत्कर्णयोः स्थितिरेव अलङ्कारः इति भावः । लालिता स्वकर्णारोपणेन आदृता सती

तुलसी इति मन्त्रयतीव गुप्तभाषणं करोतीव। 'मन्त्र गुप्तभाषण इति धातोः'। कथं हे नाथ! मम स्वामिन्। जलजाद्यानि जलजं कमलमेव आद्यं पूर्वं येषां तानि पुष्पाणि। मत्सरात् मात्सर्यात् मम पदं स्थानं कर्णप्रदेशम्। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। न हरेयुः न अपहरेयुः। इति मन्त्रयतीव तुलस्येषा सर्वैः कर्णमूले ध्रियते न यत्किञ्चिदपि पुष्पं अतः भगवतापि स्वकर्णमूलयोः तुलस्येव लोकशिक्षणार्थं धृताऽस्तीति वस्तुस्थितिः। तत्रोत्प्रेक्षा इयं तुलसी कर्णसमीपं गत्वा हे स्वामिन् मम स्थानं कर्णमूलं कस्मैचिदपि पुष्पाय न दिश ममैवास्तु इति स्वाभिप्रेतं गोप्यं विज्ञापयति॥ ४२॥

विभवाभिभवोद्भवादिकं भुवनानां भुवनप्रभोर्भ्रुवोः।
अनयोरपि दभ्रविभ्रमात्सभवाम्भोजभवात्मनां भवेत्॥ ४३॥

पदार्थदीपिकोद्बोधिका – विभवेति॥ भुवनप्रभोः जगत्प्रभोः श्रीव्यासस्यानयोर्भ्रुवोः दभ्रविभ्रमात्स्वल्पविलासादपि भवो रुद्रः, अम्भोजभवः चतुर्मुखः, तावात्मानौ स्वामिनौ, ताभ्यां सहितानि सभवाम्भोजभवात्मानि तेषाम्। भुवनानां जगताम्। विभव ऐश्वर्यं, अभिभवः संहारः, उद्भव उत्पत्तिः, त आदयो यस्य नियमनादेस्तादृशम्। 'बहुव्रीहौ कः। भवेत्॥ ४३॥

मन्दोपकारिणी – विभवेति॥ भुवनप्रभोः भुवनानां जगतां प्रभोः नाथस्य अनयोः भ्रुवोः लोचनोर्ध्वभागे ललाटसमीपे विद्यमानयोः अवयवयोः। 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियां' इत्यमरः। दभ्रविभ्रमादपि दभ्रः अल्पश्चासौ विभ्रमः चलनं च। 'भ्रमु चलन इति धातुः'। तस्मादपि सभवाम्भोजभवात्मनां भवः शङ्करः। 'भवः संसारसंप्राप्तिश्रेयःशङ्करजन्मसु' इति विश्वः। अम्भोजात् कमलात् भवः उत्पत्तिः यस्य स तथोक्तः चतुर्मुखः। भवश्च अम्भोजभवश्च भवाम्भोजभवौ तौ आत्मानौ स्वामिनौ च भवाम्भोजभवात्मानौ ताभ्यां सहितानि सभवाम्भोजभवात्मानि तेषां ब्रह्मरुद्राख्यस्वामिसहितानां भुवनानां जगताम्। विभवाभिभवोद्भवादिकं विभवं ऐश्वर्यं अभिभवः संहारः उद्भवः उत्पत्तिः, विभवश्च अभिभवश्च उद्भवश्च विभवाभिभवोद्भवाः एत एव आदयो यस्य नियमनादेः तत् विभवाभिभवोद्भवादिकं भवेत् भवति। भ्रूचलनेनैव सर्वसृष्ट्यादिकं भवतीत्युक्त्या सृष्ट्यादौ आयासो नास्तीति उक्तं भवति॥ ४३॥

त्रिजगत्तिलकालिकान्तरे तिलकोऽयं परभागमाप्तवान्।
हरिनीलगिरीन्द्रमस्तकस्फुटशोणोपलपंक्तिसन्निभः ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – त्रिजगदिति ॥ त्रिजगतां तिलक इव त्रिजगत्तिलकः श्रीव्यासः तस्य अलिकान्तरे ललाटमध्ये। 'ललाटमलिकं गोधिः' इत्यमरः। परभागो वर्णान्तरसंयोगेन लभ्य उत्कर्षस्तम्। 'परभागो गुणोत्कर्ष' इति हलः। आप्तवान् नीलभगवल्ललाटे रक्तद्रव्येण कृत इत्यर्थः। अयं तिलकः हरिनील इन्द्रनीलो यो गिरीन्द्रो गिरिश्रेष्ठस्तस्य मस्तके शिखरे स्फुटाश्शोभमाना ये शोणोपलाः पद्मरागमणयस्तेषां पङ्क्तेस्सन्निभः सदृशः। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इत्यमरः। तथा विराजत इति भावः। अत्रोपमालङ्कारः ॥ ४४ ॥

मन्दोपकारिणी – त्रिजगदिति ॥ त्रिजगत्तिलकालिकान्तरे त्रीणि च तानि जगन्ति च त्रिजगन्ति त्रिजगतां तिलकः तिलकसदृशः अलङ्कारभूत इति यावत् तस्य वेदव्यासस्य अलिकं ललाटम्। 'ललाटमलिकं गोधिः' इत्यमरः। तस्य अन्तरे मध्ये। परभागं कर्णान्तरसंयोगजन्यगुणोत्कर्षम्। 'परभागो गुणोत्कर्षः' इत्यभिधानम्। आप्तवान् प्राप्तः अयं तिलकः लोहितद्रव्यविशेषेण कृतः तिलकः। 'तमालपत्रतिलकचित्रकाणि विशेषकम् द्वितीयं च तुरीयं च न स्त्रियां' इत्यमरकोशे द्वितीयतुरीयत्वेन उक्तयोः तिलकविशेषकशब्दयोः न स्त्रियां इत्यनेन पुंनपुंसकत्वोक्तेः तिलक इति पुल्लिङ्गप्रयोगस्साधुः। हरिनीलगिरीन्द्रमस्तकस्फुटशोणोपलपङ्क्तिसन्निभः। हरिशब्दस्य इन्द्रवाचकत्वात् इन्द्रनील इत्यर्थः। हरिनीलश्चासौ गिरीन्द्रः पर्वतश्रेष्ठश्च हरिनीलगिरीन्द्रः तस्य मस्तके मूर्ध्नि स्फुटाः शोभमानाः शोणाः रक्तवर्णाश्च ते उपलाः पाषाणाश्च शोणोपलाः पद्मरागमणयः। 'रोहितो लोहितो रक्तः शोणः कोकनदच्छविः' इत्यमरः। पाषाणप्रस्तरग्रावोपलाश्मानः' इति च। तेषां पङ्क्तिः आवलिः। 'वीथ्यालिरावलिः पङ्क्तिः' इत्यमरः। तस्य सन्निभः सदृशः सन् विराजते। यथा इन्द्रनीलपर्वतः ऊर्ध्वभागे लोहितपद्मरागमणिपङ्क्तिवर्णान्तरसंयोगेन उत्कर्षं आप्नुयात् तद्वत् इन्द्रनीलसदृशवेदव्यासललाटे लोहितश्रीगन्धादिद्रव्येण कृतः ऊर्ध्वपुण्ड्रः नीलकान्तिसंयोगेन उत्कृष्टशोभां प्राप इति भावः। तेन वेदव्याससम्बन्धेनैव तिलकस्य अलङ्करणं न तिलकसम्बन्धेन वेदव्यासस्य। तस्यैव स्वरससुन्दरत्वेन अलङ्कारापेक्षाभावात् इति उक्तं भवति ॥ ४४ ॥

नवमम्बुधरं विडम्बयद्वरविद्युद्वलयं जगद्गुरोः ।
अवलोक्य कृतार्थतामगां सजटामण्डलमण्डनं वपुः ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – नवमिति ॥ वरा उत्तमा या विद्युत्तस्या वलयो मण्डलं यस्य तं नवं नूतनं नीलमिति भावः । अम्बुधरं मेघं विडम्बयदनुकुर्वज्जटानां यन्मण्डलं तदेव मण्डनं अलङ्कारः तेन सहितं, गुरोः श्रीव्यासस्य वपुः देहमवलोक्य कृतार्थतां कृतकृत्यतां अगाम् । इण् गतौ लुङ् ॥ ४५ ॥

मन्दोपकारिणी – नवमिति ॥ वरविद्युद्वलयं विद्युतां तडिताम् । 'तटित्सौदामिनी विद्युत्' इत्यमरः । वलयः मण्डलं विद्युद्वलयः वरः उत्तमः स्फुरद्विद्युद्वलयः यस्मिन् स तथोक्तः तं विद्युन्मण्डलोपेतं इत्यर्थः । नवं नूतनं नीलवर्णमिति भावः । अम्बुधरं मेघं 'तटित्वान्वारिदोऽम्बुभृत्' इत्यमरः । विडम्बयत् अनुकुर्वत् । जगद्गुरोः जगतां गुरोः वेदव्यासस्य वपुः देहं अवलोक्य दृष्ट्वा कृतार्थतां कृतः अर्थः प्रयोजनं येन स कृतार्थः तस्य भावः कृतार्थता कृतकृत्यतां अहं अगां प्राप्तवान् । कथंभूतं वपुः । सजटामण्डलमण्डनं जटानां सटानाम् । 'शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा' इत्यमरः । मण्डलं वलयः जटामण्डलं जटामण्डलमेव मण्डनं भूषणं जटामण्डलमण्डनं तेन सहितं सजटामण्डल-मण्डनं 'तदिदं वपुरस्य दृश्यते' इत्यनेन शरीरस्य वर्णितत्वात् अत्र जटासाहित्येन वर्णनात् जटावर्णन एव तात्पर्यं ज्ञेयम् । कथं नीलकान्तिमेघमण्डले लोहितविद्युन्मण्डलं यथा विराजते तथा नीलमेघश्यामले वेदव्यासशरीरे अरुणविद्युन्मण्डलसदृशं अरुणजटामण्डलं शोभत इति । अत्र एतादृशशरीरदर्शनेन यत्प्रयोजनमुद्दिश्य अहं अत्र अगां तन्मया लब्धं तच्च वेदव्यासदर्शनं इत्युक्तं भवति । 'इण् गतौ इति धातोः लुङ् परस्मैपदं अगां अगाव अगाम' ॥ ४५ ॥

न रमाऽपि पदाङ्गुलीलसन्नखधूराजदनन्तसद्गुणान् ।
गणयेद्गणयन्त्यनारतं परमान् कोऽस्य परो गुणान् वदेत् ॥ ४६ ॥

भावप्रकाशिका – नखधूराजदिति । अत्रोपसृष्टमिति च । स्मृतमिन्दिराया इति च ॥ ४६ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ रमा, अस्य श्रीव्यासस्य पदस्य या अङ्गुली कनिष्ठाङ्गुली तस्यां लसञ्छोभमानो यो नखस्तस्य धूर्व्यापारस्तस्यां राजन्तः शोभमाना येऽनन्तसद्गुणास्तानानारतं निरन्तरं गणयन्त्यपि न गणयेत् साकल्येन गणयितुं असमर्था। गण सङ्ख्यान इति धातुः। भगवद्गुणानां भगवदभिन्नत्वात् भगवन्नखव्यापारस्यापि अगणितानन्तगुणत्वं युक्तम्। तस्मात् परोयो मतिमान्विवेकी पुमान् अस्य गुणान् को वदेत्? साकल्येन ब्रूयात्?। न कोऽपि इति भावः ॥ ४६ ॥

मन्दोपकारिणी – न रमापी ॥ ब्रह्मादिदेवोत्तमा लक्ष्मीरपि अस्य वेदव्यासस्य पदाङ्गुलीलसन्नखधूराजदनन्तसद्गुणान् पदस्य चरणस्य अङ्गुली तस्यां लसंश्चासौ नखश्च पदाङ्गुलीलसन्नखः तस्य धूः व्यापारः धुरा राजन्तः स्फुरन्तश्च ते अनन्ताश्च ते सन्तश्च ते गुणाश्च तान्। अनारतं निरन्तरं गणयन्त्यपि सङ्ख्यानं कुर्वन्त्यपि न गणयेत् साकल्येन गणयितुं न समर्था स्यात्। 'गण सङ्ख्यान इति धातोः विधिलिङ् परस्मैपदम्'। भगवद्गुणक्रियादीनां भगवता अत्यन्ताभिन्नत्वात् भगवन्नखक्रियायाः अपि अनन्तगुणत्वं ज्ञेयम्। परः लक्ष्म्यतिरिक्तः को वा पुरुषः अस्य परमान् अत्युत्कृष्टान् गुणान् वदेत् साकल्येन वर्णयेत् न कोऽपि इति भावः। 'वद व्यक्तायां वाचि' इति धातोः विधिलिङ् परस्मैपदम्'। सर्वोच्चा रमादेव्यपि साकल्येन एकावयवगुणवर्णनविषये समर्था न भवति। तदन्यः साकल्येन सर्वावयवगुणवर्णनविषये न समर्थ इति किमु वाच्यमिति भावः ॥ ४६ ॥

न कुतूहलिता कुतूहलं तनुमेनामवलोक्य सद्गुरोः।
सनवावरणाण्डदर्शिनो गृहबुद्ध्या मम निष्कुतूहलम् ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – नेति ॥ यस्मादेवं रमाप्यस्यागणितानन्तगुणत्वं दृष्ट्वा कुतूहलिनी तस्मात् सद्गुरोः श्रीव्यासस्य एनां तनुमवलोक्य निर्गतं कुतूहलमाश्चर्यं यथा भवति तथा निष्कुतूहलं, गृहमितिबुद्धिः गृहबुद्धिः तया, नव च तानि आवरणानि च, अबग्नीरनभोऽहंकृन्महत्तत्त्वगुणत्रयाख्यानि नवावरणानि तैः सहितं तादृशं यदण्डं ब्रह्माण्डं तद्द्रष्टुं शीलमस्येति सनवावरणाण्डदर्शी तस्य मम। कुतूहलमस्यास्तीति कुतूहली तस्य भावः तत्ता। कुतूहलयुक्ततेत्यर्थः। कुतूहलमाश्चर्यं न। अथवा निष्कुतूहलं गृहबुद्ध्या सनवावरणाण्डदर्शिनो मम सद्गुरोः सतां गुरोः व्यासस्य एनां तनुमवलोक्य, कुतूहलित्वाभावो

न कुतूहलिता। नैकधेत्यादिवन्न समासत्वादेकं पदम्। सैव कुतूहलमिति वा योजना। तथा च भगवत्तनोः सर्वेषां मनोनयनवाचां कुतूहलविषयत्वात् तां दृष्ट्वा कुतूहलिताभाव एव कुतूहलम्। मम त्वेनां तनुं दृष्ट्वा कुतूहलं जायत इत्येतन्न कुतूहलमिति भावः ॥ ४७ ॥

मन्दोपकारिणी – न कुतूहलितेति ॥ निष्कुतूहलं न विद्यते कुतूहलं आश्चर्यं यस्मिन् दर्शने तत् निष्कुतूहलं आश्चर्यरहितं यथा भवति तथा। गृहबुद्ध्या इदं गृहमिति बुध्या। सनवावरणाण्डदर्शिनः नव नवसङ्ख्याकानि च तानि आवरणानि च नवावरणानि जलाग्निवाय्वाकाशाहङ्कारमहत्तत्त्वसत्वरजस्तमोरूपाणि ब्रह्माण्डावरणानि नवसङ्ख्याकनि सन्ति नवावरणैः सहितं सनवावरणं तच्च तत् अण्डं ब्रह्माण्डं च तत्पश्यतीति सनवावरणाण्डदर्शी तस्य मम सद्गुरोः सतां गुरोः वेदव्यासस्य एनां पुरोवर्तिनीं तनुं मूर्तिं 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। अवलोक्य दृष्ट्वा कुतूहलिता कुतूहलं अस्यास्तीति कुतूहली कुतूहलिनो भावः कुतूहलिता कुतूहलवत्वं आश्चर्यवत्वं भवति इत्येतत् न कुतूहलं आश्चर्यं न भवति किन्तु न कुतूहलिता आश्चर्यबुध्यभावः कुतूहलं इति न कुतूहलितेत्यत्र नसमासं अङ्गीकृत्य व्याख्येयम्। अतिस्थूलब्रह्माण्डदर्शने आश्चर्यबुध्यभाववतोऽपि। मम भगवद्वपुषः दर्शने आश्चर्यबुद्धिः जायते इत्येतत् आश्चर्यं न भवति भगवद्देहस्य प्रतिक्षणं अभिनवत्वेन सर्वेषामपि जनानां मनोनयनवाचां आश्चर्यविषयत्वात् प्रत्युत तादृशशरीरे आश्चर्यबुध्यभाव एव आश्चर्यमिति भावः ॥ ४७ ॥

इति चिन्तयता महाधिया पदवीं बाह्यगतामतीयुषा।
समनोनयनैः पुरागतस्तत आपे वपुषाऽपि वेदराट् ॥ ४८ ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इति पूर्वोक्तप्रकारेण चिन्तयता बाह्यगतां आश्रमबाह्यप्रदेशगतां पदवीं मार्गं अतीयुषा अतीत्य गच्छता महती धीर्यस्य तेन श्रीमध्वाचार्येण मनश्च नयने च तैः पुरा आश्रमप्रवेशात्पूर्वमेव गतः प्राप्तः स वेदराट् श्रीवेदव्यासः ततः प्रवेशानन्तरं वपुषा देहेनापि आपे प्राप्तः। वपुषोऽप्यतिसामीप्यमभूदिति भावः ॥ ४८ ॥

मन्दोपकारिणी – इतीति ॥ 'अगणेयगुणार्णवोऽमलः स हि नारायण एष केवलं' इत्यारभ्य एतत् श्लोकपर्यन्तं उक्तेन प्रकारेण चिन्तयता वेदव्यासं ध्यायता बाह्यगतां बाह्ये आश्रमाद्बहिः प्रदेशे गतां विद्यमानां पदवीं मार्गम्। 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी

सृतिः' इत्यमरः। अतीयुषा अतीत्य ईयुषा गच्छता महाधिया महती पूर्णा धीः प्रज्ञा यस्य स तथोक्तः तेन मध्वेन। मनोनयनैः मनश्च नयने च मनोनयनानि तैः पुरा आश्रमप्रवेशात् पूर्वमेव। गतः प्राप्तः। वेदराट् वेदानां राट् राजा स वेदव्यासः। ततः अनन्तरं वपुषा देहेनापि आपे प्राप्तः आश्रमात् बहिः आगच्छन् नयनाभ्यां वेदव्यासं पश्यन् मनसा ध्यायन् मध्वाचार्यः देहेनापि समीपं प्राप्त इति भावः। 'आप्लृ व्याप्तावित्यतः कर्मणि लिट् आत्मनेपदं आपे आपाते आपिरे' ॥ ४८ ॥

गुरुभक्तिभरानताकृतिर्विरचय्याञ्जलिबन्धमञ्जसा।
क्षणमामुकुलीकृतेक्षणः स गुरुं केवलमभ्यवन्दत ॥ ४९ ॥

पदार्थदीपिकोद्बोधिका – गुर्विति॥ गुरुः महान्यो भक्तिभरो भक्त्यतिशयः तेन आनता प्रवणाऽऽकृतिर्यस्य तादृशः। अत एव क्षणं क्षणकालं आमुकुलीकृते, आनन्दाश्रुणा ईषन्मुकुलीकृते ईक्षणे लोचने यस्य तादृशः स श्रीमध्वाचार्योऽञ्जलिबन्धं करपुटबन्धं अञ्जसा विरचय्य कृत्वा केवलं गुरुमात्मनो मुख्यगुरुमभ्यवन्दत अस्तौत्। 'वदि अभिवादन-स्तुत्योः'। प्रणामस्तु वक्ष्यते॥ ४९ ॥

मन्दोपकारिणी – गुर्विति॥ गुरुभक्तिभरानताकृतिः भक्तिरेव भरः भारः भक्तिभरः। 'भरोऽतिशयभारयोः' इत्यमरः। गुरुः महांश्चासौ भक्तिभरश्च गुरुभक्तिभरः तेन आनता प्रह्वीभूता आकृतिः देहः यस्य स तथोक्तः। क्षणं क्षणसंज्ञकं कालविशेषम्। 'कालविशेषोत्सवयोः क्षणः' इत्यमरः। आमुकुलीकृतेक्षणः आ ईषत्। 'आङीषदर्थेऽभिव्याप्तौ' इत्यमरः। मुकुलीकृते मीलिते ईक्षणे चक्षुषी यस्य स तथोक्तः। आनन्दबाष्परुद्धनयनः इति भावः। सः मध्वाचार्यः। अञ्जसा तत्त्वतः। 'तत्त्वे बाढोंऽजसा द्वयं' इत्यमरः। भक्तिपूर्वकमिति यावत्। अञ्जलिबन्धं अञ्जलेः करसम्पुटस्य। 'अञ्जलिस्तु पुमान् हस्तसंपुटे कृरुबेपि च' इति विश्वः। बन्धः कदलीमुकुलवत् मुकुलीकरणं तम्। विरचय्य कृत्वा। केवलं मुख्यतः गुरुं वेदव्यासं अभ्यवन्दत अस्तौत्। 'वदि अभिवादन-स्तुत्योः इत्यस्मात् लङ् आत्मनेपदम्'। प्रणामस्य उत्तरश्लोके वक्ष्यमाणत्वात्॥ ४९ ॥

विनयाभरणेन भूषितः स्फुटमष्टाङ्गविशिष्टचेष्टितः।
भगवत्तमपादपङ्कजे भगवान् स प्रणनाम भाग्यवान्॥ ५० ॥

भावप्रकाशिका – 'उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः॥ इति च॥ ५०॥

पदार्थदीपिकोद्बोधिका – विनयेति॥ विनय एव आभरणं अलङ्कारः तेन भूषितोऽलङ्कृतः। स्फुटं सम्यगष्टौ यान्यङ्गान्यवयवास्तैर्विशिष्टं युक्तं चेष्टितं व्यापारो यस्य तादृशः। उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्ग ईरितः' इत्युक्ताष्टाङ्गचेष्टायुक्त इत्यर्थः। भाग्यवान् भगवान् स श्रीमध्वाचार्योऽतिशयेन भगवान् भगवत्तमः तस्य। षड्गुणवतामुत्तमस्येत्यर्थः। पादपङ्कजे पादपद्मे प्रणनाम॥ ५०॥

मन्दोपकारिणी – विनयेति॥ विनयाभरणेन विनय एव आभरणं भूषणं तेन भूषितः अलङ्कृतः भाग्यवान् भाग्यं दैवं पुण्यं अदृष्टमिति यावत् अस्यास्तीति भाग्यवान्। 'दैवं दिष्टं भागधेयं भाग्यं' इत्यमरः। भगवान् ऐश्वर्यादिषड्गुणवान् स मध्वाचार्यः अष्टाङ्गविशिष्टचेष्टितः अष्ट च तानि अङ्गानि च अष्टाङ्गानि। 'उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः'। इत्युक्तेः प्रणामस्य अष्टाङ्गत्वं सिद्धम्। अष्टाङ्गानां विशिष्टानि उत्तमानि चेष्टितानि कर्माणि यस्य स तथोक्तः। तत्तदङ्गव्यापारं कुर्वन् सन् भगवत्तमपादपङ्कजे अतिशयेन भगवान् भगवत्तमः ऐश्वर्यादिगुणवतां उत्तमः इति यावत्। तस्य वेदव्यासस्य पादपङ्कजे पादं चरणमेव पङ्कजं कमलं तस्मिन् स्फुटं सर्वेषां मुनीनां पश्यतां प्रणनाम नमस्कृतवान्। 'णम प्रह्वत्वे शब्दे च इत्यस्मात् लिट् परस्मैपदं ननाम नेमतुः नेमुः'॥ ५०॥

स निरीक्ष्य पराशरात्मजः प्रणतं प्रेष्ठमशेषसद्गुणैः।
करयोर्युगलेन वल्गुना तमुदस्थापयदाशुपातिना ॥ ५१॥

पदार्थदीपिकोद्बोधिका – स इति॥ पराशरात्मजः श्रीव्यासः अशेषसद्गुणैः प्रेष्ठं अतिप्रियं तं श्रीमध्वाचार्यं प्रणतं नमस्कुर्वन्तं निरीक्ष्य वल्गुना कोमलेन आशु पतितुं शीलमस्यास्तीति तेन शीघ्रं प्रसार्यमाणेनेत्यर्थः। करयोर्युगलेन उदस्थापयत् उत्थापयामास॥ ५१॥

मन्दोपकारिणी – स इति ॥ पराशरात्मजः पराशरस्य ऋषेः। 'आत्मजः तनयः सूनुः' इत्यमरः। स वेदव्यासः अशेषसद्गुणैः अशेषाः समस्ताः सन्तः निर्दोषाः गुणाः ज्ञानभक्तिवैराग्यादयः अशेषाश्च ते सन्तश्च ते गुणाश्च इति विग्रहः। तैः निमित्तैः। प्रेष्ठं अतिशयेन प्रियं तं मध्वाचार्यं प्रणतं नमस्कारं कुर्वन्तं निरीक्ष्य दृष्ट्वा वल्गुना मृदुना सुन्दरेण वा आशु त्वरया पातिना प्रसार्यमाणेन करयोः युगलेन युग्मेन कराभ्यामित्यर्थः। उदस्थापयत् उत्थापयामास। 'उत् पूर्वकात् ष्ठा गतिनिवृत्ताविस्मात् णिजन्तात् लङ् परस्मैपदम्' ॥ ५१ ॥

अमितप्रमतिं श्रुतीश्वरः परिरेभे परिगृह्य तं द्रुतम्।
प्रणयामृतपूर्णमानसः स्मितवक्त्रः परिफुल्ललोचनः ॥ ५२ ॥

पदार्थदीपिकोद्बोधिका – अमितेति ॥ प्रणयः स्नेह एव अमृतं तेन पूर्णं मानसं मनो यस्य सः। अत एव स्मितं मन्दहासोपेतं वक्त्रं यस्य सः। परिफुल्ले लोचने चक्षुषी यस्य स श्रुतीश्वरः श्रीवेदव्यासः तं अमितप्रमतिं द्रुतं यथा भवति तथा परिगृह्य परिरेभे आलिलिङ्गे। रेभृ शब्दे लिट्॥ ५२ ॥

मन्दोपकारिणी – अमितेति ॥ प्रणयामृतपूर्णमानसः प्रणयः प्रेम स एव अमृतं तेन पूर्णं मानसं मनो यस्य स तथोक्तः अत एव स्मितवक्त्रः स्मितं मन्दहासोपेतं वक्त्रं वदनं यस्य स तथोक्तः। परिफुल्ललोचनः परिफुल्ले विकसिते लोचने नयने यस्य स तथोक्तः। श्रुतीश्वरः श्रुतीनां वेदानां ईश्वरः स्वामी वेदव्यासः अमितप्रमतिं अमिता पूर्णा प्रमतिः प्रज्ञा यस्य स तथोक्तः तम् मध्वाचार्यं द्रुतं शीघ्रं परिगृह्य हस्ताभ्यां स्वीकृत्य परिरेभे आलिलिङ्गे। 'परिपूर्वात् रभ राभस्य इति धातोः लिट् आत्मनेपदं रेभे रेभाते रेभिरे' ॥ ५२ ॥

यमजाम्युदवाह ऊर्जितो यदि जाम्बूनदवारि संव्रजेत्।
कनकद्युतिमध्वसङ्गवानुपमीयेत स तेन नीलभाः ॥ ५३ ॥

भावप्रकाशिका – उदवाहः 'पेषंवासवाहनाधिषु च' इति ककारलोपः ॥ ५३ ॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीसुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां सप्तमः सर्गः ॥

पदार्थदीपिकोद्बोधिका – यमजेति ॥ यद्यूर्जितः प्रभूतः । यमस्य जामिः स्वसा यमुना तस्या उदकस्य वाहः उदवाहः प्रवाहः । 'जामिः स्वसृकुलस्त्रियोः' इत्यमरः । जम्बूनद्याः सम्बन्धि जाम्बूनदं तच्च तद्वारि च संव्रजेत् प्राप्नुयात् । तर्हि नीला भाः कान्तिर्यस्य स श्रीव्यासः । कनकवद्द्युतिर्यस्य स चासौ मध्वश्च तस्य सङ्गोऽस्यास्तीति तादृशः स व्यासः । तेन यमुनाजलसङ्गतजाम्बूनदवारिणोपमीयेत । अभूतोपमेयम् ॥ ५३ ॥

मन्दोपकारिणी – यमेति ॥ ऊर्जितः उत्कृष्टः यमजाम्युदवाहः यमस्य यमराजस्य 'शमनो यमराड्यमः' इत्यमरः । जामिः स्वसा । 'जामिः स्वसृकुलस्त्रियः' इत्यमरः । तस्याः यमुनायाः उदस्य उदकस्य वाहः प्रवाहः । यदि जाम्बूनदवारि जाम्बूनदस्य कनकनद्याः संबन्धि जाम्बूनदं तच्च तत् वारि जलं च संव्रजेत् सङ्गच्छेत् । 'व्रज गतवित्यतो लिङ् परस्मैपदम्' । तर्हि कनकद्युतिमध्वसङ्गवान् कनकवत् सुवर्णवत् । 'सुवर्णं कनकं' इत्यमरः । द्युतिः कान्तिः यस्य सः कनकद्युतिः स चासौ मध्वश्च तस्य सङ्गः सम्बन्धः अस्यास्तीति तथोक्तः । नीलभाः नीला श्यामा भाः कान्तिः यस्य सः नीलभाः स वेदव्यासः । 'भाश्छविद्युतिदीप्तयः' इत्यमरः । तेन यमुनाजलेन सङ्गतजाम्बूनदवारिणा उपमीयेत । 'माङ् माने शब्दे च इत्यतो लिङ् आत्मनेपदं मीयेत मीयेयाताम् मीयेरन्' । यदि नीलसुवर्णकान्त्योः यमुनाजाम्बूनदजलयोः सङ्गमः स्यात् तर्हि स सङ्गः नीलकनककान्त्योः परिष्वक्तयोः वेदव्यासमध्वयोः सङ्गमस्य दृष्टान्तो भवेत् । न च यमुनाजाम्बूनदनद्योः सम्बन्धः कदापि भविता । अतः अभूतोपमेयं मध्वव्यासयोः सङ्गमः निरुपमः इति भावः ॥ ५३ ॥

यदि राजविभूषणैर्युतौ द्विजवर्यान्वयजाविमौ हरी ।
नृपगोत्रभुवोः पुराऽऽत्मनोः स्फुटतुल्यावुपगूढयोर्मिथः ॥५४॥

पदार्थदीपिकोद्बोधिका – यदीति ॥ द्विजवर्यौ वसिष्ठमध्यगेहाख्यद्विजश्रेष्ठौ तयोरन्वयौ वंशौ तयोर्जातौ द्विजवर्यान्वयजाविमौ हरी विष्णुवायू यदि राजविभूषणैः

कटकमुकुटादिभिर्युतौ युक्तौ। स्यातामिति शेषः। तर्हि पुरा नृपयोः यदुकुर्वोः गोत्रे वंशौ, तयोर्भवत इति नृपगोत्रभुवौ तयोः कृष्णभीमाभिधयोर्मिथः परस्परमुपगूढयोः आलिङ्गितयोः आत्मनोः स्वरूपयोः स्फुटं सम्यक् तुल्यौ सदृशौ स्यातामिति सम्बन्धः॥ ५४॥

मन्दोपकारिणी – यदीति॥ द्विजवर्यान्वयजौ द्विजानां वर्यौ श्रेष्ठौ वसिष्ठमध्यगेहाख्यौ तयोः अन्वये कुले जायते इति अन्वयजौ। 'कुलान्यभिजनान्वयौ' इत्यमरः। इमौ हरी विष्णुवायू। 'चन्द्रे सूर्ये यमे विष्णौ वासवे ददुरे हये। मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः' इति धनञ्जयः। तत्र वसिष्ठान्वयजः वेदव्यासः मध्यगेहान्वयजः मध्वः। यदि राजविभूषणैः किरीटकुण्डलादिभिः युतौ विभूषितौ स्यातां तर्हि पुरा पूर्वजन्मनि नृपगोत्रभुवोः नृपौ यदुकुरुसञ्ज्ञौ तयोः गोत्रे सन्ततौ। 'सन्ततिर्गोत्रजननं' इत्यमरः। भुवौ उत्पन्नौ यदुवंशभवः कृष्णः कुरुकुलजो भीम इति ज्ञेयम्। तयोः नृपगोत्रभुवोः कृष्णभीमयोः। मिथः परस्परं उपगूढयोः आश्लिष्टयोः आत्मनोः स्वात्मनोः। स्फुटतुल्यौ स्फुटं सम्यक् तुल्यौ सदृशौ स्यातामिति शेषः॥ ५४॥

इदमाप शुकोऽपि लालनं न समग्रं जगतां पितुः पितुः।
अलभिष्ट यदेष धन्य इत्यतिकौतूहलमापि तापसैः॥ ५५॥

पदार्थदीपिकोद्बोधिका – इदमिति॥ धन्यः कृतार्थ एषः। यत् लालनं सम्भावनामलभिष्ट लेभे। समग्रं सम्पूर्णमिदं लालनं शुकोऽपि जगतां पितुर्जनकात् पितुः स्वपितुः व्यासान्नाप न प्राप्तवानिति तापसैर्मुनिभिरतिकौतूहलमत्याश्चर्यमापि प्राप्तम्॥ ५५॥

मन्दोपकारिणी – इदमिति॥ धन्यः कृतार्थः एषः पुरुषः यत् लालनं आदरणं अलभिष्ट लब्धवान्। 'डु लभष् प्राप्तवित्यतो लुङ् आत्मनेपदं अलभिष्ट अलभिषातां अलभिषत'। इदं समग्रं पूर्णलालनं शुकोऽपि शुकाचार्योऽपि जगतां पितुः जनकात् पितुः स्वतातात् वेदव्यासात् सकाशात् नाप न प्राप्तवान् इति तापसैः मुनिभिः अतिकौतूहलं अत्याश्चर्यं आपि प्राप्तम् 'आप्लृ व्याप्तावित्यतः कर्मणिः लुङ् आपि आप्स्यातां आप्स्यत'॥ ५५॥

अमुष्य शिष्या विनयेन तस्मै गुरोरभिप्रायविदो विदग्धाः ।
तदाऽनुरूपं ददुरासनं ते चतुर्मुखायेव मुकुन्ददासाः ॥ ५६ ॥

पदार्थदीपिकोद्बोधिका – अमुष्येति ॥ तदा गुरोः श्रीव्यासस्याभिप्रायविदो विदग्धाश्चतुरास्ते, आश्चर्यं प्राप्ता अमुष्य श्रीव्यासस्य शिष्याः। विनयेन प्रश्रयेण तस्मै श्रीमध्वाचार्याय अनुरूपं श्रीव्याससम्भावनानुरूपमासनं पीठं मुकुन्ददासा भगवत्पार्षदाश्चतुर्मुखायेव ददुः। अत्रोपेन्द्रवज्रावृत्तम्। 'उपेन्द्रवज्रा जतजागगौ चे'त्युक्तेः ॥ ५६ ॥

मन्दोपकारिणी – अमुष्येति ॥ तदा गुरोः वेदव्यासस्य अभिप्रायविदः एतस्मै आसनं दातव्यं इत्याशयं विदन्तीति अभिप्रायविदः। 'आभिप्रायच्छन्द आशयः' इत्यमरः। विदग्धाः चतुराः ते अमुष्य वेदव्यासस्य शिष्याः विनयेन तस्मै श्रीमध्वाचार्याय अनुरूपं स्वामिसंभावनारूपं आसनं ददुः। कस्मै के इव। मुकुन्ददासाः मुकुन्दस्य श्रीनारायणस्य दासाः पार्षदाः। चतुर्मुखाय इव विरिञ्चाय इव। उपेन्द्रवज्रावृत्तम्। 'उपेन्द्रवज्रा जतजास्ततो गौ' इत्युक्तेः ॥ ५६ ॥

आस्यतामित्युदीर्योपविष्टे सत्यवत्याः सुते सत्यवाचि ।
मानयन्मन्दहासावलोकैस्तान्मुनीन्द्रानिहोपाविशत्सः ॥५७॥

पदार्थदीपिकोद्बोधिका – आस्यतामिति ॥ सत्या वाक् यस्य तस्मिन् । सत्यवत्याः सुते, आस्यतामित्युदीर्योपविष्टे सति। मन्दहासयुक्ताश्च तेऽवलोकाश्च दर्शनानि तैस्तान् मुनीन्द्रान्नन्दयन् स श्रीमध्वाचार्य इहोपाविशत् ॥ ५७ ॥

मन्दोपकारिणी – आस्यतामिति ॥ सत्यवाचि सत्या समीचीना वाक् कुशलप्रश्नरूपं वचनं यस्य स तथोक्तः तस्मिन्। 'सत्यं तथ्यं ऋतं सम्यक्' इत्यमरः। सत्यवत्याः 'सत्यवतीदेव्याः सुते पुत्रे वेदव्यासे। हे मध्व ! त्वया आस्यतां आसने उपविश्यताम्। आस उपवेशन इत्यतो भावे लोट् आत्मनेपदं'। इति मध्वाचार्यं प्रति उदीर्य उक्त्वा उपविष्टे सति स्वासने निषण्णे सति सः मध्वाचार्यः मन्दहासावलोकैः मन्दहासः हसनं येषु ते मन्दहासाः मन्दहासाश्च ते अवलोकाश्च दर्शनानि तथोक्ताः तैः तान् शिष्यभूतान् मुनीन्द्रान्

ऋषिश्रेष्ठान् मानयन् बहुमानं कुर्वन् इह आसने उपाविशत् न्यषीदत्। 'उप आङ् पूर्वकात् विश प्रवेशन इति धातोः लङ् परस्मैपदम्'। कुशलं पृष्ट्वा उपविश इत्युक्तो मध्वः मन्दं हसन् ऋषीन् पश्यन् उपविवेश इति भावः॥ ५७॥

अवगम्य तं मुनिगणा वरिष्ठतो विधिवद्व्यधुर्विधिविदोऽस्य माननाम्।
अपि सङ्कथाः श्रुतिसुखाः कवीन्द्रयोरनयोर्निशम्य परमां मुदं ययुः॥ ५८॥

पदार्थदीपिकोद्बोधिका – अवेति॥ मुनिगणा वरिष्ठतः श्रेष्ठतः श्रीवेदव्यासात् तं अवगम्य श्रीमुख्यप्राणावतारं ज्ञात्वा। विधिविदः सन्तोऽस्य विधिवत्सम्यङ्माननां व्यधुः चक्रुः। कवीन्द्रयोरनयोः श्रुतीनां श्रोत्राणां सुखं याभ्यस्ताः सत्कथा अपि निशम्य परमां मुदं ययुः॥ ५८॥

मन्दोपकारिणी – अवगम्येति॥ मुनिगणाः मुनीनां ऋषीणां गणाः समुदायाः। वरिष्ठतः अतिशयेन वरः वरिष्ठः अत्युत्तमः तस्मात् सर्वोत्तमात् वेदव्यासात् तद्वचनादिति यावत्। तं मध्वं अवगम्य मुख्यवायोरवतारं ज्ञात्वा विधिविदः विधिं विधानं पूजानुष्ठानप्रकारं 'विधिर्विधाने दैवेऽपि' इत्यमरः विदः जानन्तः अस्य मध्वाचार्यस्य, विधिवत् विधिविहितं यथा भवति तथेति यावत्। माननां अर्घ्यपाद्यादिपूजां व्यधुः चक्रुः। 'विपूर्वात् धा धातोः लुङ् परस्मैपदं अधात् अधाताम् अधुः'। कवीन्द्रयोः पण्डितश्रेष्ठयोः। 'सङ्ख्यावान् पण्डितः कविः' इत्यमरः। अनयोः मध्ववेदव्यासयोः। श्रुतिसुखाः श्रुतीनां श्रोत्राणां सुखानि याभ्यः ताः तथोक्ताः स्वकर्णसुखदाः। 'वेदे श्रवति च श्रुतिः' इत्यमरः। संकथाः इष्टसंभाषणान्यपि निशम्य श्रुत्वा परमां अत्युत्तमां मुदं प्रीतिं ययुः प्रापुः। 'या प्रापण इत्यस्मात् लिट् परस्मैपदम्'। मञ्जुभाषिणीवृत्तं 'सजसा जगौ भवति मञ्जुभाषिणी' इति तल्लक्षणात्॥ ५८॥

सज्ज्ञानायानन्दविज्ञानमूर्ती प्राप्तौ पृथ्वीमाश्रमे तत्र तावत्।
जाज्वल्येते विष्णुवायू स्म देवौ वेदव्यासानन्दतीर्थाभिधानौ॥ ५९॥

॥ इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्य विरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के सप्तमः सर्गः॥

पदार्थदीपिकोद्बोधिका – सदिति ॥ सतां सज्जनानां सम्यग्ज्ञानाय। सतां ज्ञानोपदेशार्थमित्यर्थः। पृथ्वीं प्राप्तौ वेदव्यासानन्दतीर्थावित्यभिधाने नामनी ययोस्तौ। आनन्दश्च विज्ञानश्च ते मूर्तिश्शरीरं ययोस्तौ विष्णुवायू देवौ, तत्राश्रमे तावत्साकल्येन जाज्वल्येते स्म अतितरामशोभेताम्। शालिनीवृत्तम्। तल्लक्षणं तु 'मस्तौ गौ चेच्छालिनी वेदलोकै'रिति ॥ ५९ ॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचित श्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां सप्तमः सर्गः ॥

मन्दोपकारिणी – सदिति ॥ सज्ज्ञानाय सतां सज्जनानां ज्ञानाय तत्त्वज्ञानं दातुं पृथ्वीं पृथिवीं 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः प्राप्तौ भूमौ अवतीर्णौ वेदव्यासानन्दतीर्थाभिधानौ वेदव्यासश्च आनन्दतीर्थश्च वेदव्यासानन्दतीर्थौ इत्यभिधानं आख्या ययोस्तौ। 'आख्याह्वे अभिधानं च' इत्यमरः। कथंभूतौ, आनन्दविज्ञानमूर्ती आनन्दश्च विज्ञानं च आनन्दविज्ञाने ते मूर्ती तनू ययोस्तौ तथोक्तौ। 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। विष्णुवायू विष्णुश्च वायुश्च विष्णुवायू तन्नामानौ देवौ। तत्र आश्रमे बदरिकाश्रमे। तावत् तस्मिन् काले जाज्वल्येते स्म अतिशयेन अशोभेताम्। स्म अतीते। 'ज्वलधातोर्यङंतात् लडात्मनेपदं जाज्वल्यते जाज्वल्येते जाज्वल्यन्ते'। शालिनी वृत्तमेतत् 'मस्तौ गौ चेच्छालिनी वेदलोकैः' इति तल्लक्षणात्॥ ५९ ॥

॥ इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः

प्रतिभाप्रभाप्रमुखसद्गुणैर्निजैरतिविस्मयं नियमिनां मनो नयन्।
पुरुधीः कदाचिदथ वेदनायकं विजने शनैरुपससाद तं वने ॥ १ ॥

पदार्थदीपिकोद्बोधिका – प्रतिभेति ॥ अथ श्रीवेदव्यासदर्शनानन्तरं प्रतिभा ज्ञानं प्रभा तेजः, ते प्रमुखे मुख्यौ येषां, ते च ते सद्गुणाश्च तैर्नियमिनां मुनीनां मनोऽतिविस्मयमत्याश्चर्यं नयन् प्रापयन् पुरुधीः पूर्णप्रज्ञः। कदाचित् तं वेदनायकं वने तत्रापि विगता जना यस्मात्स विजन एकान्तप्रदेशः तस्मिन् शनैः उपससाद उपसत्तिमकरोत्। श्रोतव्यं श्रोतुं रहसि गुरूपसत्तिमकरोदिति भावः। अस्मिन्सर्गे मञ्जुभाषिणीवृत्तम्। 'सजसा जगौ च यदि मञ्जुभाषिणी'ति लक्षणात्॥ १ ॥

मन्दोपकारिणी – श्रीगुरुभ्यो नमः॥ प्रतिभेति ॥ अथ बदरिकाश्रमवासानन्तरं निजैः स्वाभाविकैः 'स्वके नित्ये निजं त्रिषु' इत्यमरः। प्रतिभाप्रभाप्रमुखसद्गुणैः प्रतिभा ज्ञानं प्रभा तेजः ब्रह्मवर्च इति यावत् ते प्रमुखे आदी येषां ते तथोक्ताः, ते च ते सन्तः उत्तमाश्च ते गुणाश्च 'सच्छब्द उत्तमं ब्रूयात्' इत्युक्तेः तैः। नियमिनां मुनीनां मनः अतिविस्मयं अत्यन्ताश्चर्यं नयन् प्रापयन् पुरुधीः पूर्णप्रज्ञः 'पुरुभूः पुरु भूयिष्ठं' इत्यमरः, कदाचित् कस्मिंश्चित्काले वेदनायकं वेदानां नेतारं 'अधिभूर्नायको नेता' इत्यमरः, वेदव्यासं वने कानने विजने रहसि 'विविक्तविजनच्छन्ननिश्शलाकास्तथा रहः' इत्यमरः, शनैः मन्दं उपससाद उपसत्तिं अकरोत्। श्रोतव्यप्रमेयांशं श्रोतुं एकान्ते गुरुसमीपं प्राप इति भावः। 'षदॢ विशरणगत्यवसादनेषु लिट् ससाद सेदतुः सेदुः'। सर्गपर्यन्तं प्रायः मञ्जुभाषिणीवृत्तम्। 'सजसा जगौ च यदि मञ्जुभाषिणी' इति लक्षणात्॥ १ ॥

सुविशेषशेषवदशेषवर्णितप्रतिबोद्धुरस्य ननु शिष्यतोचिता।
गुरुमानसस्य गुरुताऽपि सत्पतेरिति सोपसत्तिरमरैरमान्यत ॥ २ ॥

पदार्थदीपिकोद्बोधिका – सुविशेष इति ॥ शोभना ये विशेषा गोप्यतत्त्वविशेषास्तेषां शेषः, सोऽस्यास्तीति सुविशेषशेषवत्तादृशं यदशेषवर्णितं साकल्येन वर्णितप्रमेयं तस्य

प्रतिबोद्धुः, गुरु मानसं यस्य तस्य श्रीपूर्णपज्ञस्य, सत्पतेः श्रीव्यासस्य शिष्यता, उचिता ननु। अस्य श्रीव्यासस्य गुरुतापि श्रीमध्वगुरुताप्युचिता इति सा उपसत्तिः शिष्यभावेन गुरुनिकटप्राप्तिः अमरैरमान्यत अपूज्यत। अयं भावः। यद्यपि ब्रह्मादीनां सर्वेषामपि भगवानेव परतत्त्वं वर्णयति तथापि ब्रह्मवाय्वोर्यथा वर्णयनि न तथा रुद्रादीनां किन्तु कांश्चन रहस्यविशेषानवशेषयित्वैव वर्णयति। तेषां योग्यतायास्तथात्वात्। तस्माद्रुद्रादीनां तत्त्वकथनावसरे भगवता ये शोभनतत्त्वविशेषा अवशेषिताः, तानेव ब्रह्मवाय्वोर्वर्णयतीति स्थितिः। ततश्चायं मध्वोऽपि वायुत्वाच्छोभनविशेषयुक्तस्याशेषवर्णितस्य प्रतिबोद्धा। तस्मादेवंभूतस्यास्य व्यासशिष्यता, व्यासस्यैतदगुरुता चोचितेति सा गुरूपसत्तिरमरैरमान्यत। 'मान पूजायां कर्मणि लङ्' ॥ २ ॥

मन्दोपकारिणी – सुविशेषेति ॥ सुविशेषशेषवदशेषवर्णितप्रतिबोद्धुः शोभनाश्च ते विशेषाः रहस्यविशेषाश्च तेषां शेषाः अवशेषा अस्य सन्तीति सुविशेषशेषवत् । अशेषं निःशेषं च तद्वर्णितं उपदिष्टं च सुविशेषशेषवच्च तदशेषवर्णितं च तस्य प्रतिबोद्धा सम्यक् ज्ञाता तस्य। गुरुमानसस्य गुरु महत् बहुविषयकारि मानसं चेतो यस्य, गुरु पूर्णं मानसं मनोजन्यं ज्ञानं यस्येति वा, अस्य पूर्णप्रज्ञस्य, शिष्यता वेदव्यासस्य शिष्यता उचिता ननु योग्या एव 'नन्वनुज्ञेतिहापृच्छानुनयेष्ववधारणे' इति रत्नमाला। सत्पतेः सतां सज्ज्ञानानां पतिः व्यासः तस्य गुरुतापि मध्वगुरुतापि उचितैव इत्येवं सा उपसत्तिः गुर्वनुवृत्तिः अमरैः देवैः अमान्यत अपूज्यत मानिता। 'मनु अवबोधने कर्मणि लङ् आत्मनेपदं अमान्यत अमान्येतां अमान्यन्त'। अयं भावः। यद्यपि ब्रह्मादीनां सर्वेषामपि भगवान् अशेषं तत्त्वं वर्णयति तथापि रुद्रादीनां ब्रह्मवायुवत् न वर्णयति किन्तु कांश्चन विशेषरहस्यान् अवशेषेयित्वैव । तेषां योग्यतायास्तथात्वात्। तथा च रुद्रादीनां तत्त्वोपदेशकाले भगवता ये रुद्राद्ययोग्याः तत्त्वविशेषाः अवर्णयित्वैव अवशेषिताः तैः रुद्राद्युपदिष्टावशेषतदयोग्यतत्त्वविशेषैः सहैव अशेषं वर्णयति ब्रह्मवाय्वोरिति स्थितिः। तथा च वाय्वंशो मध्वोऽपि भगवदवतारव्यासेन वर्णितस्य रुद्राद्ययोग्यस्य अशेषतत्त्वविशेषस्य ग्रहणधारणयोस्समर्थः इति हेतोः मध्वस्य व्यासशिष्यता उचितैव। व्यासस्यापि मध्वगुरुता योग्यैवेति इत्थं सा गुरुप्राप्तिः देवैः आदृता इति ॥ २ ॥

पुर एव पूरितमपूरयत् पुनर्ननु कृष्ण एष परमार्थसङ्चयया।
भगवन्मनः पुरमिवायतं पुरा निजधाम तां च जगृहे तदद्भुतम्॥ ३॥

भावप्रकाशिका – कृष्णो देवकीपुत्रश्च। परमार्थसङ्चयया परमार्थज्ञानेन भार-कोट्यादिरूपया च॥ ३॥

पदार्थदीपिकोद्बोधिका – पुर इति॥ एष कृष्णः श्रीवेदव्यासः। निजमात्मीयश्च तद्धाम च। स्वावासस्थानभूतमित्यर्थः। आयतं विस्तीर्णं भगवन्मनः श्रीमध्वमनः पुरः पूर्वमेव 'स्यात्पुरः पुरतोऽग्रतः' इत्यमरः। परमार्था यथार्था सङ्चया ज्ञानं तया पूरितं पूर्णमपि। पुरा कृष्णो वसुदेवसुतः सन्निजधाम स्वमन्दिरं द्वारकापुरमित्यर्थः। परमार्थ-सङ्चयेव, मागधभौमादीन् विजित्यापहृतयोत्तमधनस्य कोट्यादिसङ्चयेव पुनरपूरयत्। पूर्वमेव सम्पूर्णज्ञानस्यापि पुनरपि ज्ञानमुपदिदेशेति भावः। तत्, भगवन्मनो द्वारकापुरश्च परमार्थसङ्चयां जगृह इति यत्, तदद्भुतम्। परिपूर्णमपि पुनरानीय निहितं जगृहे स्वान्तर्गतं चक्र इत्येतदाश्चर्यमिति भावः॥ ३॥

मन्दोपकारिणी – पुर इति॥ एषः कृष्णः व्यासः 'व्यासार्जुनाग्निहरिकोकिल काकशूद्रतामिस्रपक्षकलिनीलगुणेषु कृष्णः' इति भास्करः। निजधाम निजं आत्मीयं च तत् धाम स्थानभूतं च 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः। स्ववासस्थान-मित्यर्थः। आयतं विस्तीर्णं बहुविषयकं इत्यर्थः। भगवन्मनः भगवतः मध्वस्य मनः अन्तःकरणं पुर एव उपदेशात्पूर्वमेव परमार्थसङ्चयया परमार्था यथार्था च सा सङ्चया ज्ञानं च परमार्थसङ्चया तया पूरितं पूर्णं निपुणः 'संख्यावान् पण्डितः कविः' इत्यमरः। पूरितमपि पुनः अपूरयत् पूरितवान्। 'पूरी आप्यायने लङ् परस्मैपदम्'। पूर्वमेव संपूर्णज्ञानस्य पुनरपि ज्ञेयविशेषं उपदिदेश इति भावः। कथमिव, एषः वेदव्यासः पुरा पूर्वजन्मनि कृष्णः वसुदेवसुतस्सन् निजधाम स्वकीयमन्दिरभूतं पुरं द्वारावती-पुरं परमार्थसंख्यया परमाः अतिशयिताः बहवः अर्थाः धनानि च तेषां संख्ययेव भारकोट्यादिरूपया संख्ययेव यादवकृष्णः कालयवनजरासन्धनरकादीन् विजित्य अपहृत्य आनीतया धनसंख्यया द्वारकां यथा अपूरयत् तद्वदिति भावः। तत् भगवन्मनः तद्वारकापुरं च। तां परमार्थसङ्चयां यथार्थज्ञानं बहुधनं च जगृहे स्वीचक्रे। तत् स्वीकरणं अद्भुतं

अहो। पूर्वं पूर्णमपि पुनरानीतं स्वान्तर्गतं चक्र इत्येतत् आश्चर्यमिति भावः। 'ग्रह उपादाने लिट् आत्मनेपदम्' ॥ ३ ॥

इतिहाससुन्दरपुराणसूत्रसत्प्रियपञ्चरात्रनिजभावसंयुतम्।
अशृणोदनन्तहृदनन्ततोऽचिरात्परमार्थमप्यगणितागमावलेः ॥ ४ ॥

पदार्थदीपिकोद्बोधिका – इतिहासेति ॥ अनन्तं हृद्यस्य स पूर्णप्रज्ञः। अनन्ततः श्रीव्यासादगणिता ये आगमा वेदास्तेषामावलेः समूहस्य। इतिहासो महाभारतं, सुन्दर-पुराणानि शोभनपुराणानि, सूत्रं ब्रह्मसूत्रं, सत्प्रियं यत्पञ्चरात्रं, तेषां निजभावेन स्वाभाविकाभिप्रायेण संयुतं परमार्थमप्युत्तमार्थमप्यचिरात् शीघ्रमशृणोत् ॥ ४ ॥

मन्दोपकारिणी – इतिहासेति ॥ अनन्तहृत् अपरिमितज्ञानः मध्वः। अनन्ततः वेदव्यासात्। अगणितागमावलेः असङ्ख्यवेदानां आवलेः समूहस्य परमार्थमपि परमः उत्तमश्चासौ अर्थः प्रतिपाद्यः तं च अचिरात् स्वल्पकालेनैव अशृणोत् श्रुतवान्। 'श्रु श्रवणे लङ् परस्मैपदं अशृणोत् अशृणताम् अशृण्वन्'। किंभूतं, इतिहाससुन्दरपुराणसूत्रसत्प्रि-यपञ्चरात्रनिजभावसंयुतं इतिहासौ भारतमूलरामायणे, सुन्दराणि सात्विकानि च तानि पुराणानि च, सूत्राणि ब्रह्मसूत्राणि च, सतां विष्णुभक्तानां प्रियं च तत् पञ्चरात्रं पञ्चरात्रा-गमश्च तेषां निजः स्वकीयः मुख्यः भावः अभिप्रायः तेन संयुतं समन्वितम् ॥ ४ ॥

ऋजुपुङ्गवस्य परिजानतः स्वयं सकलं तदप्यलमनन्तजन्मसु।
स्वकृतोर्वनुग्रहबलादमुष्य तां विशिशेष शेषशयनः पुनर्धियम् ॥ ५ ॥

पदार्थदीपिकोद्बोधिका – ऋज्विति ॥ शेषः शयनं पर्यङ्को यस्य स श्रीव्यासः। अनन्तजन्मसु अतीतानन्तजन्मसु स्वकृतो य उर्वनुग्रहो महानुग्रहः स एव बलं तस्मात्। तदपि उपदिष्टं सकलमपि श्रूयमाणं सर्वमपि स्वयमात्मना परिजानतः स्वप्रतिभाबलेन सम्यग्जानतः सतोऽमुष्य ऋजुपुङ्गवस्य ऋजुश्चासौ पुङ्गवो रुद्रादिभ्यः श्रेष्ठश्च तस्य श्रीमध्वस्य तां धियं पुनरलं सम्यग्विशिशेष विशेषयामास। 'शिषू अतिशये लिट्'। ऋजुपुङ्गवस्येत्यत्र, ऋजूनां पुङ्गव इति न षष्ठीतत्पुरुषः ऋजूनां सर्वेषामपि समत्वेन एकस्मादेकस्योत्तम-

त्वाभावात्। किन्तूक्तरीत्या कर्मधारय एव। अथवा ऋजुशब्दस्य सज्जनवाचित्वमभ्युपेत्य तत्पुरुषो वा। वायुर्हि सर्वाधिकार्युत्तमः ॥ ५ ॥

मन्दोपकारिणी – ऋज्विति ॥ शेषशयनः शेषः शयनं मञ्चो यस्य सः 'शयनं मञ्चपर्यङ्कपल्यङ्काः' इत्यमरः, व्यासः, ऋजुपुङ्गवस्य ऋजूनां मनोवाक्कायकर्मभिः हरौ प्रतीपरहितानां सज्जनानां पुङ्गवस्य उत्तमस्य ऋजुगणस्थानां सर्वेषामपि साम्येन तदुत्तमत्वायोगात् एवं व्याख्यातम्। यद्वा स्वरूपोत्तमत्वाभावेऽपि अप्राप्तवायुपदानां मध्ये पुङ्गवस्य प्राप्तवायुपदत्वेन श्रेष्ठस्येति पदापेक्षया श्रैष्ठ्याङ्गीकारे न दोष इति भाति। अथवा ऋजुश्चासौ पुङ्गवश्च तस्येति व्याख्येयम्। अमुष्य मध्वस्य तां पूर्वं विद्यमानां धियं मतिं पुनः विशिशेष विशेषयुक्तां अकरोत्। 'शिष्लृ विशेषणे लिट् परस्मैपदं शिशेष शिशिषतुः शिशिषुः'। किंभूतस्य सतः अनन्तजन्मसु सर्वकालेष्विति भावः। स्वकृतोर्वनुग्रहबलात् स्वेन आत्मना कृतश्चासौ उरु उत्कृष्टश्चासौ अनुग्रहः स्नेहविशेषश्च तस्य बलात् सामर्थ्यात्। तत् इदानीं श्रूयमाणं सकलमपि रहस्यं स्वयं स्वप्रतिभाबलेनैव अलं परिजानतः सम्यक् ज्ञातवतः सतः ॥ ५ ॥

अथ बादरायणसहायसम्पदा प्रययौ प्रणन्तुममितान्तरो युतः।
अपि नादिरायणपदोदितं हरेर्वपुरन्तरं लसितमाश्रमान्तरे ॥ ६ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ बादरायणस्य सहाय एव सम्पत्तया युतो युक्तः। अमितं पूर्णमान्तरं यस्य स श्रीपूर्णप्रज्ञः। आश्रमान्तरेऽन्याश्रमे लसितं विराजितं नो नकार आदिर्यस्य तन्नादि तादृशं यद्रायणपदं तेनोदितमभिहितम्। नारायणाभिहितमिति यावत्। अन्यद्वपुर्वपुरन्तरं भगवद्रूपान्तरमपीत्यर्थः। प्रणन्तुं नमस्कर्तुं प्रययौ। आश्रमान्तरस्थं नारायणाख्यं भगवद्रूपं प्रणन्तुं श्रीवेदव्यासेन सह प्रययाविति भावः ॥ ६ ॥

मन्दोपकारिणी – अथेति ॥ अथ सर्वशास्त्रश्रवणानन्तरं बादरायणसहायसम्पदा सहाय एव संपत् बादरायणश्चासौ सहायसम्पत् च तया युतः संयुक्तः। अमितान्तरः पूर्णमनाः मध्वः। आश्रमान्तरे बदरिकाश्रम एव वेदव्यासस्थलात् अन्यस्मिन् स्थले लसितं विराजितं नादिरायणपदोदितमपि नकारः आदिः पूर्वभावी यस्य तत् नादि, रायण इति पदं

शब्दः 'पदं शब्दे च वाक्ये च' इति विश्वः, नादि च तत् रायणपदं च तेन उदितं अभिहितं नारायणाख्यमिति यावत्। तदपि हरेः वपुरन्तरं अन्यद्वपुः भगवद्रूपान्तरं प्रणन्तुं नमस्कर्तुं प्रययौ जगाम। 'या प्रापणे लिट्'। बदरिकाश्रम एव स्थलान्तरे विद्यमानं नारायणाख्यं विष्णववतारं नमस्कर्तुं श्रीवेदव्यासेन सह प्रययौ इति भावः ॥ ६ ॥

तमपश्यदाश्रमवरे प्रभूतधीर्ज्वलनं ज्वलन्तमिव धूमवर्जितम्।
वरवल्कलाकलितमौञ्जिमेखलं विलसज्जटावलयमादिपूरुषम् ॥ ७ ॥

पदार्थदीपिकोद्बोधिका – तमिति ॥ प्रभूता धीर्यस्य स पूर्णप्रज्ञः। आश्रमवरे आश्रमोत्तमे। वरमुत्तमं यद्वल्कलं तेनाकलिता सम्बद्धा मौञ्जिमेखला मौञ्जीमयी रशना यस्य तं 'वल्कं वल्कलमस्त्रियामि'त्यमरः। विलसन्विराजमानो जटावलयो जटामण्डलं यस्य तमादिपूरुषं तं नारायणं, धूमवर्जितं धूमरहितं ज्वलन्तं ज्वलनमिवाग्निमिवापश्यत् ॥ ७ ॥

मन्दोपकारिणी – तमिति ॥ प्रभूतधीः पूर्णबोधः। आश्रमवरे तं नारायणं अपश्यत् दृष्टवान्। 'दृशिर् प्रेक्षणे लङ् परस्मैपदम्'। कीदृशं, धूमवर्जितं धूमरहितं ज्वलनं अग्निमिव 'कृपीठयोनिर्ज्वलनः' इत्यमरः। ज्वलन्तं प्रकाशमानं, पुनः वरवल्कलाकलितमौञ्जिमेखलं वरं च तत् वल्कलं वृक्षत्वक्च 'वल्कं वल्कलमस्त्रियां' इत्यमरः, तेन कौपीनरूपवल्कलेन आकलिता सम्बद्धा मौञ्जिरेव मेखला काञ्ची यस्य सः तम्। तृणविशेषनिर्मितरज्जुः मौञ्जिः सा च नारायणकटौ बद्धास्ति तत्र हि हस्तदीर्घवितस्तिविस्तारं वृक्षत्वगात्मकं कौपीनमग्रतः पृष्ठतश्च सम्बद्धमस्तीति भावः। एतेन मौञ्जीधारणेन नारायणस्य ब्रह्मचारित्वं अवगम्यते। विलसज्जटावलयं विराजमानजटायाः सटायाः वलयं मण्डलं यस्य सः तं 'व्रतिनस्तु सटाजटा' इत्यमरः। आदिपूरुषं आदिश्चासौ पूरुषश्च तं 'पूरुषा नरः' इत्यमरः, पुराणपुरुषं इत्यर्थः ॥ ७ ॥

अतिदुर्जयेन्द्रियजयादिरूपिणा तपसा वसन्तमिव सन्ततं वने।
निजरूपभूतनिरपेक्षनिर्मलप्रचुरात्मसौख्यरतमप्यनारतम् ॥ ८ ॥

पदार्थदीपिकोद्बोधिका – पुनरपि कथंभूतमित्यपेक्षायामाह **अतीत्यादिना ॥** सन्ततं निरन्तरं जेतुमशक्यानि दुर्जयानि अत्यन्तं दुर्जयान्यतिदुर्जयानि यानीन्द्रियाणि तेषां यो

जयः स आदिर्यस्य तादृशं रूपमस्यास्तीति तेन। इन्द्रियजयाद्यात्मकेनेत्यर्थः। तपसा वने वसन्तमिव ब्रह्मचर्यादितपक्लेशमनुभवतीत्यज्ञप्रतीतिरेवेति वसन्तमिवेत्युक्तम्। तर्हि वस्तुतः कथंभूतोऽयमित्यपेक्षयामाह॥ **निजरूपेत्यादिना।** अनारतं निरन्तरं निजं नित्यं 'निजमात्मीयनित्ययो'रिति वैजयन्ती। तादृशं यद्रूपभूतं स्वरूपभूतं, तथा निर्गताऽपेक्षा विषयापेक्षा यस्मात्तन्निरपेक्षं, तादृशं यन्निर्गतं मलं परिमितत्त्वादिदोषो यस्मात्तन्निर्मलं, तादृशञ्च यत्प्रचुरं परिपूर्णमात्मसौख्यं स्वरूपभूतसुखं, तस्मिन् रतमपि तं श्रीनारायणं अपश्यदिति सम्बन्धः॥ ८॥

मन्दोपकारिणी – अतीति॥ पुनः सन्ततं नित्यम्। अतिदुर्जयेन्द्रियजयादिरूपिणा अति अत्यन्तं दुर्जयानि दुर्न विद्यते जयो येषां तानि 'दुः स्यात्कष्टनिषेधयोः' इति विश्वः, निग्रहं कर्तुं अशक्यानि च तानि इन्द्रियाणि मनोजिह्वादीनि च तेषां जयः निग्रहः आदिः यस्य स्थण्डिलशायित्वादेः तत् इन्द्रियजयादि तत् रूपं अस्यास्तीति रूपी 'रूपं स्वभावे सौन्दर्ये' इति विश्वः, तेन तपसा वने अरण्ये वसन्तमिव इन्द्रियनिग्रहाधश्शयनादि-रूपतपोनिमित्तकक्लेशं अनुभवति नारायण इति अज्ञजनं प्रति भ्रान्तिं ज्ञापयतुं इव इत्युक्तम्। वस्तुतः कीदृशः इत्यत आह॥ **निजेति।** अनारतं सततम्। 'सततेऽनारता-श्रान्तम्' इत्यमरः। निजरूपभूतनिरपेक्षनिर्मलप्रचुरात्मसौख्यरतमपि निजरूपे स्वरूपे भूते सर्वदा विद्यमाने निरपेक्षे बौद्धविषयापेक्षारहिते निर्मले दुःखमिश्रत्वादिदोषरहिते प्रचुरे पूर्णे आत्मनः स्वस्य सौख्ये सुखमेव सौख्यं तस्मिन् रतमपि सर्वदा स्वरूपभूतापरिमितानन्दं अनुभवन्तं इत्यर्थः। निजरूपं च तत् भूतं च निरपेक्षं च निर्मलं च तत्प्रचुरं च तत् आत्मसौख्यं च इति तस्मिन् रतः तं इति विग्रहः। एवंभूतं अपश्यत् इति पूर्वश्लोकेनान्वयः॥ ८॥

नयनद्वयेन नलिनप्रभामुषा परिफुल्लताविलसितेन विस्मयात्।
तमवेक्ष्य धर्मजमधर्मदुर्लभं मनसेति भूरितरमानसोऽस्मरत्॥ ९॥

पदार्थदीपिकोद्बोधिका – नयनेति॥ भूरितरं परिपूर्णं मानसं मनो यस्य स श्रीपूर्णप्रज्ञः। परिफुल्लतया विकसिततया विलसितेन शोभमानेन अत एव नलिनस्य पद्मस्य या प्रभा कान्तिः तां मुष्णात्यपहरतीति तेन नयनद्वयेन। अधर्मेण दुर्लभं प्राप्तुमशक्य।

धर्मजं यमसूनुं तं श्रीनारायणमवेक्ष्य मनसा विस्मयादाश्चर्यादिति वक्ष्यमाण-रीत्याऽस्मरत् ॥ ९ ॥

मन्दोपकारिणी – नयनेति ॥ भूरितरमानसः भूरितरं पूर्णं मानसं यस्य सः मध्वः तं नारायणं मनसा हृदा, इति वक्ष्यमाणप्रकारेण अस्मरत् ध्यातवान्। 'स्मृ स्मरणे लङ् परस्मैपदम्'। किं कृत्वा, विस्मयात् आश्चर्यात् परिफुल्लताविलसितेन परिफुल्लयोः भावः परिफुल्लता अत्यन्तविकासः तया विलसितेन शोभमानेन 'फुल्लश्चैते विकसिते' इत्यमरः। दर्शनजन्यहर्षेण विशालेन इत्यर्थः। नलिनप्रभामुषा नलिनयोः पद्मयोः शोभां मुष्णाति तिरस्करोतीति मुट् तेन कमलदलापेक्षया अतिसुन्दरेण इत्यर्थः। नयनद्वयेन नेत्रयुगलेन । धर्मजं धर्मात् जायते इति तं यमसूनुं 'धर्माः पुण्ययमन्यायाः' इत्यमरः तं नारायणं अवेक्ष्य दृष्ट्वा, किंभूतं नारायणं, अधर्मदुर्लभं न विद्यते धर्मः पुण्यं यस्य सः तेन पुण्यरहितेन पुरुषेण दुर्लभं प्राप्तुं अशक्यम् । अधर्मेण पापेन इति वा ॥ ९ ॥

जगतां चतुर्दशतयं चतुर्मुखप्रमुखैर्युतं प्रलयमानिनाय यः ।
सममुल्लसन् कमलयैव केवलं परमः स एष हि पुराणपूरुषः॥ १० ॥

पदार्थदीपिकोद्बोधिका – जगतामिति ॥ केवलं कमलयैव श्रियैव समं सः उल्लसत् यः श्रीनारायणः, चतुर्मुखः प्रमुखः प्रधानो येषां तैर्युतं युक्तं, जगतां लोकानां, चतुर्दशावयवा यस्य तच्चतुर्दशतयं चतुर्दशभुवनाश्रयजगत्, द्विसप्तकमित्यर्थः। 'सङ्ख्याया अवयवे तयप्' इति तयप्। प्रलयं विनाशमानिनाय प्रापयामास। परम उत्तमः पुराण-पूरुषोऽनादिपूरुषः स सर्वसंहारकर्ता एष हि पुरोवर्ती यमसूनुतयावतीर्णो हि ॥ १० ॥

मन्दोपकारिणी – ध्यानप्रकारमेवाह। **जगतामिति ॥** कमलयैव श्रियैव समं सह 'साकं सत्रा समं सह' इत्यमरः। केवलं अतिशयेन उल्लसन् रममाणः परमः सर्वोत्तमः पुराणपुरुषः अनादिपूरुषः यः हरिः चतुर्मुखप्रमुखैः विरिञ्चप्रधानैः देवैः 'क्लीबे प्रधानं प्रमुखः' इत्यमरः, युतं सहितं जगतां भवनानां चतुर्दशतयं चतुर्दश 'सङ्ख्यायाः अवयवे तयप्' इति तयप् प्रत्ययः। चतुर्दशभुवनानीति यावत्। प्रलयं संहारं आनिनाय प्रापयामास। 'आङ् पूर्वकात् नीञ् प्रापणे द्विकर्मकधातोः लिट्'। सः सर्वसंहारकर्ता एषः पुरोवर्ती यमसूनुतया अवतीर्णो हि ॥ १० ॥

त्रिगुणाकृतिप्रकृतितो गुरुं ततस्त्रिविधामहङ्कृतिममर्त्यखान्यतः ।
अपि भूतपञ्चकमितोऽण्डमण्डलं भगवानसाविह जगन्ति चासृजत् ॥ ११ ॥

पदार्थदीपिकोद्बोधिका – न केवलं संहर्ता किन्तु स्रष्टापीत्याह। **त्रिगुणेति ॥** भगवान् षड्गुणसम्पन्नोऽसौ पुराणपूरुषः। त्रयो ये गुणाः सत्वादयस्त आकृतयो रूपाणि यस्यास्तादृशी या प्रकृतिः प्रधानं तस्या इति ततः। महत् महत्तत्वाभिमानिनं ब्रह्माणं, ततस्त्रिविधां वैकारिकतैजसतामसभेदेन त्रिविधामहङ्कृतिमहङ्कारतत्त्वाभिमानिनं रुद्रञ्च, अतस्त्रिविधाहङ्कारादमर्त्या देवास्ते च खानीन्द्रियाणि च भूतानां पृथिव्यादीनां पञ्चकमप्यसृजत्। तत्रायं विभागः। वैकारिकादहङ्काराद्दशेन्द्रियाभिमानिदेवान्, तैजसाहङ्काराद्दशेन्द्रियाणि, तामसाहङ्काराच्छब्दादितत्तद्गुणैः सहाकाशादिपञ्चभूतान्यसृजदिति। इतो मिलितेभ्यस्तत्त्वेभ्योऽण्डमण्डलं ब्रह्माण्डं, इहास्मिन्ब्रह्माण्डे जगन्ति च द्विसप्तकलोकाँल्लोकिनश्चासृजत् ॥ ११ ॥

मन्दोपकारिणी – न केवलं अयं संहारकर्ता किन्तु स्रष्टापीत्याह। **त्रिगुणेत्यादिना ॥** भगवान् पूर्णैश्वर्यवान् असौ नारायणः त्रिगुणाकृतिप्रकृतितः त्रयश्च ते गुणाश्च सत्वादयः त एव आकृतिः स्वरूपं यस्याः, सा च सा प्रकृतिः जडप्रकृतिश्च तस्याः इति त्रिगुणाकृतिप्रकृतितः। गुरुं महत्तत्वाभिमानिनं ब्रह्माणं असृजत् उत्पादितवान्। 'प्रज्ञाज्ञानं महागुरुः' इत्युक्तेः गुरुर्विरिञ्च इति प्रसिद्धमेव। ततः तस्मात् महत्तत्वाभिमानिविरिञ्चात् । त्रिविधां त्रिस्रो विधाः प्रकाराः यस्याः सा त्रिविधा तां वैकारिकतैजसतामसभेदेन त्रिविधां 'विधाविधौ प्रकारे च' इत्यमरः, अहङ्कृतिं अहङ्कारतत्त्वाभिमानिनं रुद्रं च असृजत्। अतः अस्मात् अहङ्कारत्रयात् अमर्त्यखानि अमर्त्याः देवाश्च खानि इन्द्रियाणि च 'इन्द्रियेऽपि खं' इत्यमरः। भूतपञ्चकमपि भूतानां आकाशवाय्वग्निजलमृत्संज्ञानां पञ्चकमपि असृजत्। तत्र अयं विभागः, वैकारिकाहङ्कारात् दशेन्द्रियाभिमानिदेवान्, तैजसाहङ्कारात् घ्राणादिवागादिदशेन्द्रियाणि, तामसाहङ्कारात् शब्दादितत्तद्गुणैः सह आकाशादिपञ्चभूतानि असृजत् इति। इतः उत्पादितेभ्यः मिलितेभ्यः तत्त्वेभ्यः अण्डमण्डलं ब्रह्माण्डमण्डलं असृजत्। इह अस्मिन् ब्रह्माण्डे जगन्ति चतुर्दशलोकान् असृजत्। 'सृज विसर्गे लङ् परस्मैपदम्' ॥ ११ ॥

विधिवायुवीन्द्रशिवकौशिकेशकानमरामरानुगनरासुरादिकान्।
सृजति प्रपालयति हन्ति सन्ततं स्वगतिं प्रयापयति चैष लीलया ॥ १२ ॥

पदार्थदीपिकोद्बोधिका – विधीति ॥ एष भगवान्। विधिवायुवीन्द्रशिवकौशिकाः, ब्रह्म वायु गरुड रुद्र पुरन्दरा ईशकाः स्वामिनो येषाममरादीनां ते तथोक्तास्तान्। 'स्वार्थे कः'। भगवत एव सर्वस्वामित्वादीषत्स्वामिन इत्यर्थे वा। अमरा देवा अमरानुगा देवभृत्या गन्धर्वा, नरा मनुष्या, असुराश्चादयो येषां तान्। सततं प्रवाहरूपेणाखण्डितं यथा भवति तथा लीलया सृजति, प्रपालयति, हन्ति च। तत्रोत्तमजीवान् स्वगतिं मोक्षं प्रयापयति प्रापयति। चशब्दादसुरान् तमश्च प्रापयति। नित्यसंसारिणश्चात्रैव वर्तयति। एतत्सर्वञ्च लीलयैव न तु क्लेशेनेति भावेन लीलयेत्युक्तम्॥ १२ ॥

मन्दोपकारिणी – विधीति ॥ एषः भगवान्। विधिवायुवीन्द्रशिवकौशिकेशकान् विधिः ब्रह्मा वायुः मुख्यप्राणः वीन्द्रो गरुडः 'विष्पक्षिपरमात्मनोः' इति विश्वः, शिवः रुद्रः कौशिकः इन्द्रः 'महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः' इत्यमरः। एते ईशाः स्वामिनः येषां तान् स्वार्थे कप्रत्ययः। अमरामरानुगनरासुरादिकान् अमराश्च अमरानुगाः गन्धर्वाश्च नराश्च असुराः दैत्याश्च एते आदिकाः पूर्वे येषां तान्। सन्ततं अखण्डितं लीलया सृजति उत्पादयति, प्रपालयति रक्षति, हन्ति संहरति। स्वगतिं स्वीयां तत्तद्योग्यां गतिं स्थानं प्रयापयति प्रापयति। 'स्वोज्ञातावात्मनि स्वं त्रिष्वात्मीयेसोऽस्त्रियां धने' इत्यमरः। क्रमेण सृष्टिस्थितिसंहारकालेषु भगवता क्रियमाणानां उत्पत्तिपालननाशादीनां प्रवाहस्य कदापि विच्छेदो नास्तीति भावः। 'सृज विसर्गे' इत्यतः लट् परस्मैपदम्। 'प्रपूर्वकात् पाल रक्षण इत्यस्मात् लट् परस्मैपदम्'। 'हन हिंसागत्योः इति धातोः लट् हन्ति हतः घ्नन्ति। 'प्रपूर्वकात् या प्रापण इति धातोः णिजन्तात् लट्'॥ १२ ॥

अगणेयसद्गुणगणो विदूषणः स्ववशाखिलोऽप्यनुपचारतः स्वयम्।
स्मृतिकीर्तनप्रणतिभिर्विमुक्तये स्वजनस्य यात्ययमनेकरूपताम्॥ १३ ॥

पदार्थदीपिकोद्बोधिका – अगणय्येति ॥ अगणय्या गणयितुमशक्या ये सद्गुणा उत्तमगुणास्तेषां गणः समूहो यस्य तादृशः। विगतं दूषणं दोषो यस्मात्तादृशः निर्दोष

इत्यर्थः। अनुपचारतो मुख्यतः स्वयमात्मना स्वसामर्थ्येनैवेत्यर्थः, स्ववशः स्वाधीनोऽखिलः समस्तलोको यस्य तादृशोऽपि। स्मृतिः स्मरणं कीर्तनं भगवन्नामकीर्तनं प्रणतिर्नमस्कारस्ताभिः स्वावताररूपगुणस्मरणादिभिरित्यर्थः। स्वजनस्य भक्तजनस्य विमुक्तये मोक्षार्थमनेकानि बहूनि रूपाणि वासुदेवादिरूपाणि यस्य तस्य भावस्तत्ता तां याति। न त्वेकेनैव रूपेण सर्वकार्याणां कर्तुमक्षमत्वादित्यर्थः॥ १३॥

मन्दोपकारिणी – अगणयेति॥ अगणेयसद्गुणगणः गणयितुं अशक्याः अगणेयाः 'गणनीये तु गणेयं सङ्ख्यातं गणितम्' इत्यमरः, ते च ते सन्तः निर्दोषाश्च ते गुणाः ज्ञानानन्दादयः तेषां गणः यस्य सः। विदूषणः विगतानि दूषणानि दोषाः यस्मात् विदूषणः। अयं पुरोवर्ती नारायणः अनुपचारतः मुख्यतः स्वयं स्वसामर्थ्येनैव। स्ववशाखिलोऽपि स्वस्य वशः अधीनः अखिलः समस्तलोकः यस्य स तथोक्तः तादृशोऽपि अनेकरूपतां अनेकानि रूपाणि अवताराः यस्य तस्य भावः अनेकरूपता तां बहुरूपत्वं याति प्राप्नोति। कस्मै प्रयोजनाय, स्मृतिकीर्तनप्रणतिभिः स्मृतिश्च कीर्तनं च प्रणतिश्च ताभिः स्वावताररूपाणां गुणानां कर्मणां च स्मृतिः मनसा ध्यानं कीर्तनं वाचा उच्चारणं प्रणतिः प्रणामः एभिः साधनैः स्वजनस्य भक्तजनस्य विमुक्तये मोक्षाय। यद्यपि एकेनैव रूपेण सर्वकार्यकरणे समर्थः तथापि स्वभक्तानां तत्तद्योग्यतानुसारेण अवताररूपाणां अवतारकृतचरित्रादीनां ध्यानादिसाधनैः मुक्तिर्भवेत् इत्याशयेनैव अनन्तरूपवान् भवति न तु एकेन रूपेण कार्यकरणे असमर्थत्वात् इति भावः॥ १३॥

चतुराननाय चतुरः पुराऽऽगमान् प्रददावसावनिमिषेश्वरः प्रभुः।
विनिहत्य हि श्रुतिमुषं पुरातनं वपुषोद्धतं हयमुखेन सद्रिपुम्॥ १४॥

भावप्रकाशिका – अनिमिषेश्वरो मत्स्येश्वरः। हयमुखेन वपुषा उद्धतमसुरं निहत्य। सुरेश्वरो हयग्रीवेण वपुषा मधुम्॥ १४॥

पदार्थदीपिकोद्बोधिका – चतुराननायेति॥ असौ प्रभुः श्रीनारायणः। पुरा अनिमिषेश्वरो मत्स्येश्वरः सन्हयस्य मुखमिव मुखं यस्य तेन वपुषोद्धतं प्रवृद्धं श्रुतिमुषं श्रुतीनामपहर्तारं, चतुर्मुखाद्वेदाञ्चोरयित्वा हृतवन्तमित्यर्थः पुरातनं सद्रिपुं सतां रिपुं

हयग्रीवासुरं विनिहत्य, चत्वार्याननानि यस्य तस्मै ब्रह्मणे चतुरश्चतुःसङ्ख्याकानागमान्वेदान् प्रददौ हि। इतःपरं 'परमात्मने' इत्येतच्छ्लोकपर्यन्तं श्लोकानामर्थद्वयं योजनीयम्। प्रभुरसौ अनिमिषेश्वरो देवानामीश्वरो नारायणः 'सुरमत्स्यावनिमिषौ' इत्यमरः, हयमुखेन वपुषा हयग्रीवरूपेणावतीर्णः सन् श्रुतिमुषमुद्धतं पुरातनं सद्रिपुं निहत्य चतुराननाय चतुरो वेदान् ददौ ॥ १४ ॥

मन्दोपकारिणी – एवं सामान्यतः मध्वाचार्यैः स्मृतं हरिं तच्चरितं च अनूद्य इदानीं विशेषतः ध्यातानां अवताराणां तत्कृतचरित्राणां अनन्तत्त्वेऽपि मध्वाचार्यस्मृतेषु कांश्चित् अवतारान् तत्कृतचरित्राणि च अनुवदति **चतुराननाये**त्याद्युदपादीत्यन्तैः सप्तविंशतिश्लोकैः। तथा हि प्रभुः समर्थः असौ नारायणः पुरा प्रथमं अनिमिषेश्वरः अनिमिषाणां मत्स्यानां ईश्वरः मत्स्यावतारस्सन् इति भावः। 'सुरमत्स्यावनिमिषौ' इति विश्वः। हयमुखेन हयस्य अश्वस्य मुखमिव तेन वपुषा शरीरेण उद्धतं प्रवृद्धं श्रुतिमुषं श्रुतीः वेदान् मुष्णाति चोरयतीति तं वेदान् अपहृतवन्तं पुरातनं आदिदैत्यं सद्रिपुं सतां रिपुं शत्रुं हयग्रीवासुरं विनिहत्य संहृत्य, चतुराननाय चत्वारि आननानि मुखानि यस्य सः तस्मै ब्रह्मणे 'स्वयम्भूश्चतुराननः' इत्यमरः, चतुरः चतुःसङ्ख्याकान् आगमान् वेदान् आदाय आनीय प्रददौ। अनेन मस्यावतारे ब्रह्मणः सकाशात् वेदानपहृतवन्तं हयग्रीवासुरं निहत्य पुनः चतुर्मुखाय वेददानरूपं अवतारप्रयोजनं च उक्तं भवति। द्वितीययोजना तु, अनिमिषेश्वरः देवेशः प्रभुः असौ हरिः हयमुखेन वपुषा हयग्रीवरूपेण अवतीर्णस्सन् श्रुतिमुषं वेदान् अपहृतवन्तं उद्धतं दृप्तं पुरातनं सद्रिपुं मधुनामकदैत्यं विनिहत्य चतुराननाय चतुरो वेदान् प्रददौ इति। अनेन हयग्रीवावतारः तत्कृतं पूर्ववदेव मधुनामकं दैत्यं हत्वा ब्रह्मणे वेददानरूपं अवतारकृत्यं च उक्तं भवति ॥ १४ ॥

अमरेन्द्रवैरिभुजदण्डमण्डलप्रतिकर्षपुष्करपतद्धरोद्धृतिः।
विदधे वराहवपुषाऽमुनोर्मिमत्सृतिसिन्धुकच्छपतयाऽऽप्तरक्षिणा ॥ १५ ॥

भावप्रकाशिका – अमराणामिन्द्रवैरिणां च अमरेन्द्रवैरिणो हिरण्याक्षस्य च। धरस्य गिरेर्धराया भुवश्च। वराहवान् पुष्णातीति स्वभावकथनम्। वराहो वपुश्चास्य।

वीचिमद्व्याप्तिके समुद्रे कूर्मतया गर्भीभावजननवृद्धिपरिणामापक्षयविनाशाख्योर्मिमत्संसृति-समुद्रस्य कच्छं मोक्षं च पाति ॥ १५ ॥

पदार्थदीपिकोद्बोधिका – अमरेति ॥ वरश्चासावाहवश्चेति वराहव उत्तमयुद्धः तं पुष्णातीति तेन। स्वरूपकथनमेतत्। अर्थान्तरघटनार्थं च। आप्ताञ्छरणागतान् रक्षितुं शीलमस्येति तेनामुना नारायणेन। ऊर्मयस्तरङ्गा अस्याः सन्तीत्यूर्मिमती तादृशी सृतिर्व्याप्तिर्यस्य स चासौ सिन्धुश्च तस्मिन् क्षीरसागरे। कच्छपः कूर्मस्तस्य भावस्तया 'कूर्मे कमठकच्छपौ' इत्यमरः। अमरा देवाः, इन्द्रवैरिणोऽसुराः, तेषां ये भुजास्त एव दण्डास्तेषां मण्डलानि समूहास्तैः। प्रतिकर्ष आकर्षणं, तेन पुष्करे जले पतन्यो धरो मन्दरपर्वतस्त-स्योद्धृतिरुद्धरणं 'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले। व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोरि'त्यमरः। विदधे अकारि। अर्थान्तरं तु ऊर्मयो गर्भीभावजन्म- वृद्धि परिणामक्षयविनाशाख्यषड्ूर्मयोऽस्यां सन्तीत्यूर्मिमती तादृशी या सृतिः संसारः स एव सिन्धुः समुद्रस्तस्य कच्छस्तीरं तस्य मोक्षस्येति यावत्, पातीति पः पालकस्तस्य भावस्तया 'तीरं कुलं तटं कच्छ' इति हलः। आप्तरक्षिणा शरणागतानां मोक्षदानेन रक्षिणाऽमुना श्रीनारायणेन वराहस्य वपुः स्वरूपं यस्य तेन सता, अमरेन्द्राणां देवश्रेष्ठानां वैरी हिरण्याक्षस्तस्य यानि भुजदण्डमण्डलानि दोर्दण्डसमूहास्तैः प्रतिकर्षेण विकर्षणेन पुष्करे पतन्ती जले पतन्ती या धरा भूमिस्तस्या उद्धृतिरुद्धारः 'धरः कूर्माधिपे गिरौ धराभूमि-जरायुषि' इति च हेमचन्द्रः, विदधे। हिरण्याक्षस्य सहस्रबाहुत्वं भारते प्रसिद्धम् ॥ १५ ॥

मन्दोपकारिणी – अमरेन्द्रेति ॥ वराहवपुषा वरः उत्तमश्चासौ आहवः सङ्ग्रामश्च वराहवः 'सङ्ग्रामाभ्यागमाहवाः' इत्यमरः तं पुष्णाति पोषयतीति वराहवपुट् सम्यक् युद्धकोविदः इत्यर्थः, तेन वराहवपुषा। स्वरूपकथनार्थं एतत्। यद्वा -वराणां उत्तमानां देवानां आहवं प्रार्थनारूपं आह्वानं पुष्णाति अङ्गीकरोतीति वराहवपुट् तेन समुद्रमथनकाले मन्दरपर्वते जले मग्ने सति देवैः प्रार्थनया आहूतेन इत्यर्थः। आप्तरक्षिणा आप्तानां शरणं प्राप्तानां रक्षिणा पालकेन अमुना नारायणेन। ऊर्मिमत्सृतिसिन्धुकच्छपतया ऊर्मयः तरङ्गाः अस्याः सन्तीति ऊर्मिमती 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः सृतिर्व्याप्तिः यस्य स ऊर्मिमत्सृतिः ऊर्मिमत्सृतिश्चासौ सिन्धुः समुद्रश्च ऊर्मिमत्सृतिसिन्धुः तरङ्गयुक्तविस्तृतसमुद्रः इत्यर्थः, तस्मिन् कच्छपतया कच्छपस्य भावः कच्छपता तया कूर्मत्वेन 'कूर्मे कमठकच्छपौ'

इत्यमरः। अमरेन्द्रवैरिभुजदण्डमण्डलप्रतिकर्षपुष्करपतद्धरोद्धृतिः अमराः देवाः इन्द्रस्य वैरिणः असुराः 'दनुजेन्द्रारिदानवाः' इत्यमरः, तेषां भुजाः बाहव एव दण्डाः तेषां मण्डलानि समूहाः तैः प्रतिकर्षेण मथनेन पुष्करे उदके 'कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्' इत्यमरः । पततः मग्नस्य धरस्य मन्दरपर्वतस्य 'अहार्यधरपर्वताः' इत्यमरः उद्धृतिः उद्धरणम् अमराश्च इन्द्रवैरिणश्च अमरेन्द्रवैरिणः तेषां भुजदण्डः तेषां मण्डलानि तैः प्रतिकर्षः तेन पुष्करे पतंश्चासौ धरश्च तस्य उद्धृतिरिति विग्रहः । विदधे अकारि। 'वि पूर्वकात् डु धाञ् धातोः कर्मणि लिट् आत्मनेपदं 'दधे दधाते दधिरे'। अमृतार्थं देवासुरैः मथनकाले मन्दरपर्वते जले मग्ने सति तदा देवैः प्रार्थनयाऽहूतो भगवान् गम्भीरे समुद्रे कूर्मरूपो भूत्वा मन्दरपर्वतं उद्दधार इति भावः। कूर्मावतारः मन्दरोद्धरणं अवतारप्रयोजनं च उक्तं भवति। द्वितीययोजना तु ऊर्मिमत्सृतिसिन्धुकच्छपतया ऊर्मयः भावजन्मवृद्धि-परिणामक्षयविनाशाख्यषड्ऊर्मयः अस्याः सन्तीति ऊर्मिमती सा च सा सृतिः संसारश्च सैव सिन्धुः तस्य कच्छं पारः मोक्ष इति यावत् तस्य पातीति पः पालकः कच्छपः तस्य भावः कच्छपता तया संसारसिन्धुपारभूतमोक्षरक्षकतया इत्यर्थः। मुक्तिदानेन इति यावत्। आप्तरक्षिणा शरणागतपालकेन स्मरणादिना भक्तानां संसारमोचकेन इति भावः। अमुना श्रीनारायणेन वराहवपुषा वराहस्य सूकरस्य वपुरिव वपुः यस्य सः वराहवपुः तेन वराहरूपेण सता 'वराहः सूकरो घृष्टिः' इत्यमरः। अमरेन्द्राणां देवश्रेष्ठानां वैरिणः हिरण्याक्षस्य भुजदण्डयोः मण्डलेन प्रतिकर्षेण आकर्षणेन पुष्करे जले पतती मज्जती धरा धरित्री च 'धरा धरित्री धरणी' इत्यमरः तस्याः उद्धृतिः जलोपरिस्थापनं विदधे अकारि। अमरेन्द्राणां वैरी अमरेन्द्रवैरिणः भुजदण्डयोः मण्डलं तेन प्रतिकर्षः तेन पुष्करे पतन्ती च सा धरा च तस्याः उद्धृतिः इति विग्रहः। भगवान् वराहावतारं कृत्वा हिरण्याक्षनामकदैत्येन जले निमज्जितभूमेः जलात् बहिः उद्धरणं कृतवान् इति भावः। अनेन वराहावतारः भूम्युद्धरणं अवतारप्रयोजनं च उक्तं भवति॥ १५॥

नरसिंह एष विददार दारुणं प्रतिघोदये नखरचक्रतेजसा।
स्वरिपुं क्षणेन सरसः स्फुरत्तनुं पृथुसत्वमिष्टजनभीतिभञ्जनः॥१६॥

भावप्रकाशिका – नरसिंहः पुरुषोत्तमश्च। कोपोदये सति नखरमण्डलपराक्रमेण। कोपोदयेन खरचक्रतेजसा च। सरसः सवीर्यः कासाराच्च। पृथु स्थैर्ये स्वस्य रिपुं दैत्यं च। पृथुभूतं सत्वं स्वकीयस्य रिपुं नक्रं च॥ १६॥

पदार्थदीपिकोद्बोधिका – नरसिंह इति॥ एष श्रीनारायणः। नरश्चासौ सिंहश्च नृसिंहरूपःसन्निष्टजनानां भक्तजनानां भीतेर्भञ्जनो नाशकः सन् सरसः सवीर्यः सन् 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस' इत्यमरः। प्रतिघोदये कोपोदये सति 'रोषः प्रतिघ उच्यते' इति हलः। नखरचक्रस्य नखरसमूहस्य तेजसा सामर्थ्येन 'पटलं पेटलं चक्रं' इति हलः। स्फुरन्ती तनुर्यस्य तं शोभमानदेहम्। पृथु महत्सत्वं बलं यस्य तं, दारुणं क्रूरं, स्वरिपुं हिरण्यकशिपुं क्षणेन विददार। अर्थान्तरं तु नरेषु सिंहः श्रेष्ठः पुरुषोत्तमः। इष्टजनभीतिभञ्जनः श्रीनारायणो दारुणं क्रूरं स्वरिपुं स्वः स्वकीयो गजेन्द्रस्तस्य रिपुं, स्फुरत्तनुं, पृथुर्महान्यः सत्वः प्राणिविशेषस्तं नक्रमित्यर्थः। 'द्रव्यासु व्यवसायेषु सत्वमस्त्री तु जन्तुषु' इत्यमरः। प्रतिघोदयेन स्वरिपुरयमिति कोपोदयेन निमित्तेन सरसो हृदादाकृष्येति यावत्। खरं क्रूरं यच्चक्रं सुदर्शनं तस्य तेजसा विददार॥ १६॥

मन्दोपकारिणी – नरसिंह इति॥ एषः नारायणः। सरसः रसेन वीर्येण सहितः सरसः 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः। नरसिंहः सिंहमुखपुरुषदेहस्सन् प्रतिघोदये प्रतिघस्य कोपस्य उदये उद्भवे सति 'कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौ स्त्रियां' इत्यमरः। नखरचक्रतेजसा नखराणां नखानां 'नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः। चक्रस्य समूहस्य 'चक्रो गणे चक्रवाके' इति विश्वः, तेजसा सामर्थ्येन स्फुरत्तनुं स्फुरन्ती लसन्ती तनुः कायो यस्य स तथोक्तः तम्। पृथुसत्वं पृथु बहु सत्वं बलं यस्य स तथोक्तः तम्। दारुणं क्रूररूपं स्वरिपुं स्वस्य स्वकीयस्य 'आत्मीये स्वोऽस्त्रियां धने' इत्यमरः प्रह्लादस्य रिपुं वैरिणं हिरण्यकशिपुनामकं दैत्यं क्षणेन स्वल्पकालेनैव शीघ्रमिति यावत्। विददार विपाटितवान्। 'दृ विदारण इत्यस्मात् लिट् परस्मैपदं ददार ददरतुः ददुः'। कथंभूतः, इष्टजनभीतिभञ्जनः इष्टाः भक्ताश्च ते जनाश्च इष्टजनाः तेषां भीतिः 'भयं भीतिर्भीः साध्वसं भयम्' इत्यमरः, तस्याः भञ्जनः परिहारकः। अनेन नरसिंहावतारस्य हिरण्यक-शिपुहननं प्रयोजनं उक्तं भवति। द्वितीययोजना तु इष्टजनभीतिभञ्जनः पूर्व एवार्थः।

नरसिंहः नराणां पुरुषाणां सिंहः श्रेष्ठः। 'सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः' इत्यमरः। एषः नारायणः दारुणं क्रूरं स्वरिपुं स्वस्य स्वकीयस्य गजेन्द्रस्य रिपुं शत्रुं पृथुसत्वं पृथुः अतिस्थूलदेहश्चासौ सत्वः जन्तुश्च पृथुसत्वः तं जलजन्तुविशेषं नक्राख्यग्रहं इत्यर्थः। 'सत्वमस्त्री तु जन्तुषु' इत्यमरः। अत्र प्रतिघोदयेन इति तृतीयान्तपदच्छेदः। प्रतिघोदयेन कोपोद्भवेन कोपात् इत्यर्थः। सरसः कासारात् ह्रदादिति यावत्। 'कासारः सरसी सरः' इत्यमरः। बहिराकृष्येति शेषः। खरनक्रतेजसा खरं तीक्ष्णाग्रं 'खरः स्यात् गर्दभे देवताले तीक्ष्णाग्रकेऽपि च' इति विश्वः, तच्च तत् चक्रं सुदर्शनायुधञ्च खरचक्रं 'चक्रं सैन्यरथाङ्गयोः' इति विश्वः, तस्य तेजसा सामर्थ्येन अनायासेनेति भावः। विददार अदीदलत्। अनेन हरिः तापसनामा भूत्वा नक्रं हत्वा गजेन्द्रं मोचयामास इति भावः। अनेन तापसनामावतारस्य गजेन्द्रमोचनं प्रयोजनं उक्तं भवति॥ १६॥

अपि वामनो ललितबाल्यवानयं प्रतिभाबलेन कृतदैत्यकौतुकः।
उपधेरधः कृतबलीन्द्रशात्रवः स्वजनाय केवलमदात्परं पदम् ॥१७॥

भावप्रकाशिका – वामनरूपकोऽपि अधःकृतबलिनामकासुरः स्वजनाय इन्द्राय पदमदात्। बुद्धरूपो वामनोऽल्पशरीरो भूत्वा जिनस्य पुत्रतां प्रकाश्याधःकृतबलवदसुरः स्वजनायैव मोक्षमदात्॥ १७॥

पदार्थदीपिकोद्बोधिका – अपीति॥ अयं श्रीनारायणो ललितं मनोहरं यद्बाल्यं तदस्यास्तीति तादृशो वामनोऽपि सन् वामनाख्यावतारोऽपि सन् प्रतिभाबलेन बुद्धिबलेन कृतमुत्पादितं दैत्यकौतुकं दैत्यानां विस्मयो येन तादृशः। उपधेस्त्रिपदच्छलादधःकृत-स्त्रैलोक्याधिपत्याद्विमोच्य पाताले स्थापितो बलीन्द्रशात्रवो बल्याख्येन्द्रशत्रुर्येन तथा सन् 'द्वेष्टा वैरी च शात्रवः' इति हलः, स्वजनाय स्वभक्तजनायेन्द्राय केवलं मुख्यं परमुत्तमं पदं त्रैलोक्याधिपत्याख्यमिन्द्रपदमदात्। अर्थान्तरं तु अयं श्रीनारायणः वामनो बालरूपः सन् जिनस्य पुत्रमुत्पन्नं दूरे निक्षिप्य स्वयं तदाकारस्वरूपग्रहणेन तत्पुत्रभावं प्रदर्श्येति भावः। ललितं श्लाघ्यं यद्बाल्यं तदस्यास्तीति तादृशः सन्प्रतिभाबलेन बुद्धिबलेन कृतं दैत्यकौतुकं जिनादिदैत्यविस्मयो येन तादृशः सन् उपधेर्व्याजात् 'विश्वमसत्, क्षणिकं, विज्ञानं, शून्यं अभावं' इत्याद्युक्त्या तान्मोहयित्वेति भावः। अधःकृता निरये निपातिता बलीन्द्रशात्रवाः,

बलमेषामस्तीति बलिनस्तादृशा इन्द्रशात्रवो जिनादयो येन तथा सन् स्वजनाय स्वभक्तजनाय केवलं परं पदमदात्। विश्वमसत्क्षणिकमज्ञानमित्यादिशब्दानां स्वाभिमतार्थ-मुक्त्वा सर्वस्य स्वाधीनत्वबुद्धिं, स्वस्य सर्वस्मादुत्तमत्वबुद्धिञ्चोत्पाद्य देवानां मोक्ष-मदादिति भावः ॥ १७ ॥

मन्दोपकारिणी – अपीति ॥ अयं श्रीनारायण एव ललितबाल्यवान् ललितं ईप्सितं सुन्दरमिति यावत्, 'ललितं हारभेदे स्यादीप्सिते लगुडेऽपि च' इति विश्वः, बाल्यं शिशुत्वं अस्यास्तीति ललितबाल्यवान् 'शिशुत्वं शैशवं बाल्यं' इत्यमरः वामनोऽपि वामनावतारोऽपि सन् प्रतिभाबलेन प्रतिभायाः बुद्धेः बलेन सामर्थ्येन कृतदैत्यकौतुकः कृतं उत्पादितं दैत्यानां बलिचक्रवर्तिभृत्यानां कौतुकं आश्चर्यं येन स तथा । अतिह्रस्वाकारं वामनं दृष्ट्वा सर्वे दैत्याः आश्चर्ययुक्ताः बभूवुः इति भावः। तादृशस्सन् उपधेः त्रिपादव्याजात् 'कपटोऽस्त्रीव्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः। अधःकृतबलीन्द्रशात्रवः अधः भूमेः अधःस्थितरसातले कृतः स्थापितः बलिः बलिनामकः इन्द्रशात्रवः इन्द्रस्य देवेन्द्रस्य शात्रवः शत्रुः येन स तथोक्तः। 'दस्युशात्रव शत्रवः' इत्यमरः। तादृशस्सन् स्वजनाय केवलं स्वकीयश्चासौ जनश्च स्वजनः तस्मै इन्द्रायैव परं उत्तमं 'परः स्यादुत्तमानात्मे' इत्यमरः, मुख्यमिति यावत्। साङ्कल्पिकस्वर्गव्यावृत्यर्थं इदं पदं स्वर्गाख्यस्थानं तदाधिपत्यमिति यावत्। 'पदं व्याजाङ्कितचिन्हस्थानत्राणांशलक्ष्मसु' इति भास्करः। अदात् दत्तवान्। वामनरूपस्सन् बलिचक्रवर्तिनं भूमेः अधः कृत्वा इन्द्राय त्रैलोक्याधिपत्यं दत्तवान् इति भावः। अनेन वामनावतारस्य इन्द्राय बलिचक्रवर्त्यपहृतस्वर्गलोकाधिपत्यदानं प्रयोजनं उक्तं भवति। द्वितीययोजना तु अयं नारायणः वामनः ह्रस्वाकारः बालरूपः सन्निति यावत्। खर्वो ह्रस्वश्च वामनः' इत्यभिधानम्। जिननामकपुत्रत्वं स्वस्य प्रदर्श्य ललितबाल्यवान् तैः जिनादिभिः आदृतबाल्यवान् सन् प्रतिभाबलेन बुद्धिसामर्थ्येन कृतदैत्यकौतुकः उत्पादितजिनादिदैत्यविस्मयः सन् उपधेः कपटात् 'विश्वं असत् क्षणिकं विज्ञानं शून्यं अभावनं' इत्यादिवचनेन तान् जिनादीन् मोहयित्वा इति भावः। अधःकृतबलीन्द्रशात्रवः अधः अन्धे तमसि कृताः पातिताः बलिनः बलवन्तः इन्द्रशात्रवः जिनादिदैत्याः येन स तथोक्तः सन्। स्वजनाय केवलं देवादिस्वभक्तजनायैव परं पदं अत्युत्तमं स्थानं वैकुण्ठमपि अदात्। विश्वं असत् क्षणिकं इत्यादिशब्दानां स्वाभिप्रेतार्थं उक्त्वा सर्वस्य स्वाधीनत्वबुद्धिं

च उत्पादयित्वा देवानां मोक्षमदात् इति भावः। अनेन बुद्धावतारस्य जिनादिमोहनं अवतारप्रयोजनं उक्तं भवति। 'डुदाञ् दाने इत्यतः लुङ् परस्मैपदं अदात् अदातां अदुः' ॥ १७ ॥

कथयन्त्यमुं परशुभासमानगोहतमर्त्यदेवतमसं मुहुर्मुहुः।
जगतां हितं हरिमिवापरं हरिं गुरुशक्तितापसवरान्वयोद्भवम् ॥ १८ ॥

भावप्रकाशिका – अमुं महाशक्तेस्तापसवरस्य भृगोरन्वयोद्भवं श्रीरामं कथयन्ति। त्रिलोकगुरोः शक्तितापसवरस्य च श्रीवेदव्यासं हरिमिवार्कमिव। परशुरेव भासमानरश्मिरस्य मर्त्यदेवा राजान एव तमः। पराः शुभाश्चासमानाश्च गावो वाचः। मर्त्यानां देवानां तमस्त्वज्ञानम् ॥ १८ ॥

पदार्थदीपिकोद्बोधिका – कथयन्तीति ॥ ज्ञानिनोऽमुं श्रीनारायणं मुहुर्मुहुस्त्रिः सप्तकृत्व इति यावत्। परशौ कुठारे भासमाना या गावस्तेजांसि ताभिर्हतानि संहृतानि मर्त्यदेवतमांसि क्षत्रियाख्यान्धकारा येन तादृशं जगतां हितम्। गुरुर्महती शक्तिर्यस्य तादृशो यस्तापसवरो मुनिवरो भृगुस्तस्यान्वयो वंशस्तस्मिन्नुद्भवोऽवतारो यस्य तं श्रीपरशुरामम्। कथमिव, मुहुर्मुहुः परा उत्तमा शुभाः शोभना असमाना असदृशा गावो वाचश्च, ताभिर्हतं निहतं मर्त्यदेवतमः मर्त्याश्च देवाश्च तेषां तमोऽज्ञानं येन तम्। अत एव जगतां हितम्। गुरुः महर्षीणां गुरुः, स चासौ शक्तिः शक्तिनामा च असौ तापसवरो मुनिवरश्च, तस्यान्वये वंशे उद्भवोऽवतारो यस्य तं अपरमन्यं हरिमिव वेदव्यासमिव। पुनः कथमिव, पर, शुभ, असमान, गोभिस्तेजोभिर्हतं मर्त्यदेवतमः मर्त्यदेवान्धकारो येन तम्। अत एवान्धकारनिरसनाज्जगतां हितम्। गुरुर्महती शक्तिर्यस्य तादृशो यस्तापसवरः काश्यपस्तस्यान्वय उद्भवो यस्य तमपरं हरिमिव सूर्यमिव कथयन्ति ॥ १८ ॥

मन्दोपकारिणी – कथयन्तीति ॥ सन्तः हरिं अमुं श्रीनारायणम्। गुरुशक्तितापसवरान्वयोद्भवं गुर्वी महती शक्तिः शापानुग्रहसामर्थ्यं यस्य सः गुरुशक्तिः गुरुशक्तिश्चासौ तापसवरः मुनिश्रेष्ठश्च 'तपस्वी तापसः पारिकांक्षी वाचंयमो मुनिः' इत्यमरः, जमदग्निनामकऋषिः इत्यर्थः तस्यान्वये वंशे उद्भवः प्रादुर्भावः यस्य स तथा तं परशुरामं कथयन्ति वदन्ति।

कथंभूतं, मुहुर्मुहुः त्रिःसप्तकृत्व इति यावत्। परशुभासमानगोहतमर्त्यदेवतमसं परशौ कुठारे 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इत्यमरः, भासमानाश्च ता गावो रश्मयश्च परशुभासमानगावः मर्त्यदेवा एव क्षत्रिया एव तमांसि अन्धकाराः परशुभासमानगोभिः हतानि संहृतानि मर्त्यदेवतमांसि येन स तथोक्तः तम्। पुनः कथंभूतं, जगतां स्वभक्तजनानां हितं सुखकरं कमिव, गुरुशक्तितापसवरान्वयोद्भवं गुरुः महर्षीणां गुरुः शक्तिनामकः गुरुश्चासौ शक्तिश्चासौ तापसवरश्च तस्य अन्वये अवतीर्णं अपरं हरिमिव वेदव्यासमिव। कथंभूतं वेदव्यासं, परशुभासमानगोभिर्हतमर्त्यदेवतमसं पराः उत्तमाः शुभाः शोभनाः असमानाः असदृशाः गावः स्ववाचः हतं नाशितं मर्त्या मनुष्याः देवाश्च तेषां तम अज्ञानं परशुभासमानगोभिर्हतं मर्त्यदेवतमः येन स तथोक्तः तम्। अत एव जगतां हितम्। पुनः कमिव, गुरुशक्तितापसवरान्वयोद्भवं गुर्वी महती शक्तिः सामर्थ्यं यस्य सः स चासौ तापसवरः कश्यपमुनिः इत्यर्थः तस्य अन्वये उद्भवं अपरं अन्यं हरिं सूर्यमिव 'चन्द्रे सूर्ये यमे विष्णौ वासवे दर्दुरे हये। मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः' इति धनञ्जयः। कथंभूतं सूर्यं, परशुभासमानगोहतमर्त्यदेवतमसं पराभिः उत्कृष्टाभिः शुभाभिः प्रकाशमानाभिः असमानाभिः गोभिः किरणैः हतं मर्त्यानां देवानां तमः अन्धकारो येन स तथोक्तः तम्। अत एव जगतां हितम्। 'गौर्नाके वृषभे रश्मौ वाग्भूदिग्धेनुषु स्त्रियां' इति रत्नमाला। अत्र पूर्वयोजनयां परशुरामावतारः एकविंशतिवारं क्षत्रियसंहारश्च अवतारप्रयोजनं उक्तं भवति। द्वितीययोजनायां तु वेदव्यासावतारः देवादिसज्जनानां अज्ञाननाशनेन ज्ञानदानं च अवतारप्रयोजनं उक्तं भवति। दृष्टान्तत्त्वेन सूर्यपरतया तृतीययोजना इति ज्ञेयम्॥ १८॥

करुणाकरः स वसुदेवमोददो भगवान् पुरा हिमकरान्वयेऽभवत्।
जितवान् दिशो दशरथोऽग्र्यसम्पदो जनको बभूव भुवि यस्य वैरिहा॥ १९॥

भावप्रकाशिका – सवसूनां देवानां मोददः पूर्वमहिमकरान्वयेऽभवत् श्रीरामः। यस्य जनको दशरथः। स हिमकरान्वयेऽभवच्छ्रीकृष्णः। यस्य रथो दश दिशो जितवान् अग्र्याणां सम्पदां जनको बभूव॥ १९॥

पदार्थदीपिकोद्बोधिका – करुणेति॥ वसुभिः सहिताः सवसवस्तादृशा ये देवास्तेषां मोदं सन्तोषं ददातीति तादृशः। करुणाकरो भगवान् श्रीनारायणः, पुरा भुवि, हिमाः

शीता न भवतीत्यहिमा उष्णाः कराः किरणा यस्य सूर्यस्यान्वये वंशे 'हिमं तुषारे शीते चे'ति हेमचन्द्रः, अभवत्। यस्य सूर्यवंशावतीर्णस्य हरेः, अग्र्याः सम्पदो यासु ता दिशो जितवान्वैरिणो हन्तीति वैरिहा दशरथो जनकः पिता बभूव। अर्थान्तरं तु करुणाकरः स भगवान्नारायणो वसुदेवस्य मोदं सन्तोषं ददातीति तादृशः। पुरा भुवि हिमकरान्वये चन्द्रवंशेऽभवत्। यस्य श्रीकृष्णस्य दश दिशो जितवान्वैरिहा शत्रुहा रथः, अग्र्यसम्पदः श्रेष्ठैश्वर्यस्य जनक उत्पादको बभूव। एतच्च 'न केशवरथे कश्चित् स्थितो याति पराभवं' इति वचनात् सिद्धम्॥ १९॥

मन्दोपकारिणी – इतः परं महिदासेत्यतः प्राक्तनेषु षोडशश्लोकेषु रामकृष्णयोः अवतारं तच्चरितानि च मध्वाचार्यध्यातानि सहैव वर्णयति॥ **करुणाकर** इत्यादिना॥ करुणाकरः करुणायाः आकरः उत्पत्तिस्थानं कृपासमूहात्मको वा भगवान् नारायणः पुरा पूर्वं त्रेतायुगे अहिमकरान्वये हिमाः शीतलाः न भवन्तीति अहिमाः उष्णाः इत्यर्थः अहिमाः कराः मरीचयो यस्य सः अहिमकरः सूर्यः तस्य अन्वये कुले अभवत् प्रादुरभूत्। कथंभूतः, सवसुदेवमोददः वसुभिः सहिताः सवसवः सवसवश्च ते देवाश्च तेषां मोदं सन्तोषं ददातीति सवसुदेवमोददः। यद्वा वसवः मयूखाः तैः सहितः सवसुः स चासौ देवः सूर्यश्च तस्य मोददः। तद्वंशे अवतीर्णत्वात्। 'वसुर्मयूखाग्निधन्नधिकेषु' इति विश्वः। अथवा वसुभिः रत्नैः धनैर्वा सहिता सवसुः वसुन्धरा तस्याः देवाः सवसुदेवाः भूदेवाः विश्वामित्रादयः तेषां मोददः। यस्य सूर्यवंशोद्भवस्य हरेः दशरथस्य दशरथनामा राजा जनकः पिता बभूव। कथंभूतः, भुवि धरायां अग्र्यसम्पदः अग्र्या उत्तमा सम्पत् लक्ष्मीः यासु ताः दिशः जितवान्। पुनः किंभूतः, वैरिहा शत्रून् हन्तीति वैरिहा। इयं रामपक्षे योजना। कृष्णपक्षे तु स वसुदेवमोदद इत्यत्र स इति भिन्नपदम्। दशरथ इत्यत्र दशेति रथेति पदद्वयम्। पुराऽहिमकरेत्यत्र अकारप्रश्लेषं विहाय हिमकरेति च पदम्। करुणाकरः सः भगवान् नारायणः पुरा द्वापरान्ते हिमकरान्वये हिमकरस्य चन्द्रस्य अन्वये वंशे अभवत्। किंभूतः, वसुदेवमोददः वसुदेवस्य मोदप्रदः। चन्द्रवंशे उत्पन्नस्य यादवविशेषस्य वसुदेवस्य पुत्रोऽभवदिति भावः। सवसुदेव इत्येकपदत्वे सवसोः भूमेः देवानां च मोदत इति ज्ञेयम्। अवतारात् पूर्वं गौः भूत्वा अश्रुमुखी खिन्ना इत्युक्तेः अवतारेण भूभारहरणात् भूमेः सुखदत्वं ज्ञेयम्। यस्य वसुदेवसुतस्य अग्र्यसम्पदः। अत्र षष्ठ्यन्तं इदं पदम्। अग्र्या उत्कृष्टा च सा सम्पदैश्वर्यं च तस्याः जनकः उत्पादकः

ऐश्वर्यहेतुः रथः, स्यन्दनः बभूव। किंभूतो रथः, दश दिशो जितवान् दिग्विजयी वैरिहा च, यस्मिन् रथे स्थितः सर्वान् नृपान् पराजयति वैरिणश्च हन्ति तादृश इति भावः। तच्च 'न केशवरथे कश्चित्स्थितो याति पराभवं' इति वचनात् सिद्धम्॥ १९॥

भुजगेश्वरोऽपि भुवनेश्वरप्रियः समजन्यथारिदरजन्मभुव्यभूत्।
तममुष्य कान्तिविजितेन्दुमग्रजं रमणीयमाहुरिह रामनामकम्॥ २०॥

भावप्रकाशिका – अथ शंखचक्रजन्मभरतशत्रुघ्नत्वेन अरीणां भयजन्म च। तममुष्य लक्ष्मणस्याग्रजं श्रीराममाहुः। अमुष्य कृष्णस्य च॥ २०॥

पदार्थदीपिकोद्बोधिका – भुजगेति॥ भुवनेश्वरप्रियः श्रीनारायणप्रियो भुजगेश्वरोऽपि शेषोऽपि भुवि समजनि लक्ष्मणनाम्ना जज्ञे। अथ तदनन्तरमरिश्चक्रं, दरः शङ्खः, तयोर्जन्मोत्पत्तिः, चक्रशङ्खाभिमानिनोः कामतत्पुत्रयोर्भरतशत्रुघ्नत्वेन जन्माभूत्। इहैतेषां मध्येऽमुष्य लक्ष्मणस्याग्रजं ज्येष्ठम्। कान्त्या मुखकान्त्या विजित इन्दुर्येन तं अत एव रमणीयं तं भगवन्तं दाशरथिं राम इति नाम यस्य तं रामनामकमाहुः। अर्थान्तरन्तु भुवनेश्वरप्रियो भुजगेश्वरोऽपि भुवि बलभद्रत्वेन समजनि। अथ हरिशेषयोरवतारानन्तरमरीणां शत्रूणां दरस्य भयस्य जन्मोत्पत्तिः 'दरः स्याद्भयशङ्खयोः' इति हेमचन्द्रः, अभूत्। कान्तिविजितेन्दुं कान्त्या शरीरकान्त्या विजित इन्दुर्येन स तथा तं, शुभ्राङ्गमिति यावत्। रमणीयं दर्शनीयममुष्य श्रीकृष्णस्याग्रजं तं बलभद्रमिह रामनामकं बलरामनामकमाहुः॥ २०॥

मन्दोपकारिणी – भुजगेति॥ भुवनेश्वरप्रियः लोकानां ईश्वरः स्वामी तस्य हरेः प्रियः प्रीतिविषयः भुजगेश्वरोऽपि भुजगानां सर्पाणां 'सर्पःपृदाकुर्भुजगः' इत्यमरः, ईश्वरः ईशिता शेषोऽपि समजनि लक्ष्मणनाम्ना जज्ञे। 'जनि प्रादुर्भावे लुङ् आत्मनेपदम्'। अथ लक्ष्मणोत्पत्त्यनन्तरं भुवि भूमौ अरिदरजन्माभूत् अरिः सुदर्शनं चक्रं तदभिमानी कामः इत्यर्थः। दरः पाञ्चजन्यः शङ्खः तदभिमानी कामपुत्रोऽनिरुद्धः इत्यर्थः, अरिश्च अरिदरौ तयोः कामानिरुद्धयोः जन्मोत्पत्तिः अभूत्। कामः भरतः अनिरुद्धः शत्रुघ्नः अभवत् इति भावः। इह चतुर्षु मध्ये अमुष्य लक्ष्मणस्य अग्रजं पूर्वजं तं भगवन्तं रामनामकं राम इति

नाम आख्या यस्य स तथोक्तं आहुः वदन्ति। कथंभूतं, कान्तिविजितेन्दुं कान्त्या मुखकान्त्या विजितः पराभूतः इन्दुः चन्द्रः येन स तथोक्तः तम्। अत एव रमणीयं सुन्दरम्। कृष्णपक्षे तु भुवनेश्वरप्रियः भुजगेश्वरः शेषोऽपि समजनि बलभद्रत्वेन जज्ञे। अथ हरिशेषयोरवतारानन्तरं भुवि अरिदरजन्म अरीणां भगवद्वेषिणां दरस्य भयस्य 'दरः साध्वसगर्तयोः' इति विश्वः, जन्मोत्पत्तिः अभूत्। भुवि कृष्णावतारे सति असुराणां मनसि भयमुत्पन्नमिति भावः। अमुष्य कृष्णस्य अग्रजं प्रथममुत्पन्नं शेषावतारं रामनामकं आहुः। किंभूतं कान्तिविजितेन्दुं कान्त्या शरीरकान्त्या विजितेन्दुं रमणीयं दर्शनीयं इति योजना॥ २०॥

जनकेन सोऽथ विरहासहिष्णुना मुहुरीक्षितो वनमनीयत प्रभुः।
चकितेन दुष्टजनतस्तपस्विना तत आसुरीं निशिचरीं जघान सः ॥२१॥

भावप्रकाशिका – तपस्विना विश्वामित्रेण वनमनीयत। जनकेन मुहुराद्दतः। जनकेनानीयत। दुष्टजनो मारीचादिः कंसश्च। निशाचरीं ताटकां पूतनां च॥ २१॥

पदार्थदीपिकोद्बोधिका – जनकेनेति॥ अथ विरहं पुत्रवियोगं सोढुं शीलमस्यास्तीति सहिष्णुः स न भवतीत्यसहिष्णुः तेन जनकेन पित्रा दशरथेन मुहुरीक्षितो दृष्टः प्रभुः स रामः दुष्टजनतो राक्षसजनाच्चकितेन भीतेन, तप अस्यास्तीति तपस्वी तेन विश्वामित्रेण वनमनीयत नीतः। ततः श्रीरामः, आसुरीमसुरवंशजां निशि चरतीति तां राक्षसीं ताटकां जघान। अर्थान्तरे तु विरहासहिष्णुना जनकेन पित्रा वसुदेवेन मुहुरीक्षितः प्रभुः श्रीकृष्णः दुष्टजनतो दुर्जनात्कंसाच्चकितेन भीतेन तपस्विना भगवद्ध्यानवता वसुदेवेन वनं नन्दगोपावासभूतं बृहद्वनं प्रति अनीयत। ततः स श्रीकृष्णः आसुरीमसुरस्वभावां निशिचरीं पूतनां जघान॥ २१॥

मन्दोपकारिणी – जनकेनेति॥ अथ कतिचिद्दिनानन्तरं प्रभुः दुष्टशिक्षणसमर्थः रामचन्द्रः दुष्टजनतः दुष्टश्चासौ जनः सुबाहुमारीचादिदुष्टजनः इत्यर्थः, तस्मात् इति ततः चकितेन भीतेन तपस्विना विश्वामित्रमुनिना वनं अरण्यं अनीयत नीतः। 'णीञ् प्रापण इत्यतः कर्मणि लङ् आत्मनेपदं अनीयत अनीयेतां अनीयन्त'। किंभूतः

विरहासहिष्णुना विरहं पुत्रवियोगं असहिष्णुना सोढुं अशक्तेन जनकेन पित्रा दशरथेन 'जनकः पिता' इत्यमरः, मुहुः असकृत् 'मुहुः पुनः पुनः शश्वद्वभीक्ष्णमसकृत्समाः' इत्यमरः। ईक्षितः दृष्टः। ततः वनं प्रति गमनानन्तरं स रामः आसुरीं सुरविरुद्धां निशिचरीं ताटकां नाम राक्षसीं जघान। कृष्णपक्षे तु अयं प्रभुः स कृष्णः। दुष्टजनतः दुष्टजनात् कंसात् चकितेन तपस्विना तपोवता जनकेन पित्रा वसुदेवेन वनं नन्दगोपस्थानं बृहद्वनं अनीयत। किंभूतः, विरहासहिष्णुना जनकेन मुहुः ईक्षितः नतः सः कृष्णः निशिचरीं रात्रौ सञ्चारिणीं आसुरीं असुरस्वभावां पूतनां कंसस्य उपमातरं जघान हतवान्। 'हन हिंसागत्योः लिट् परस्मैपदं जघान जघ्नतुः जघ्नुः' ॥ २१ ॥

मुनिसप्ततन्तुकृतवैरबन्धनं कटुकेश्यरिष्टपदमुख्यदुर्जनम्।
क्षपयन्तमुद्यतसुबाहुमाहवे तमथाभ्यनन्ददमरादिसद्गणः ॥ २२ ॥

भावप्रकाशिका – मुनीनां सप्ततन्तुर्यागः सजटासन्ततिश्च। क्रूरकेशवन्तमशुभस्थानं मुख्यं दुर्जनम्। उद्यतं सुबाह्वाख्यं राक्षसम्। केश्यरिष्टनामादिदुर्जनं क्षपयन्तम्। उद्यतसुन्दरहस्तम् ॥ २२ ॥

पदार्थदीपिकोद्बोधिका – मुनीति ॥ अथ अमरादिसद्गणो देवादिसज्जनसमूहः। मुनेर्विश्वामित्रस्य सप्ततंतौ यज्ञे कृतं वैरबन्धनं वैरानुसन्धानं येन तं 'सप्ततन्तुर्मखोऽध्वर' इति हलः, मुनियज्ञविरोधिनमिति यावत्। कटवः क्रूरा ये केशास्तेऽस्य सन्तीति तादृशं, यदरिष्टपदमरिष्टास्पदीभूतं मुख्यदुर्जनमतिदुर्जनमित्यर्थः। उद्यतो योद्धुं सन्नद्धो यः सुबाहुस्तं राक्षसमाहवे युद्धे क्षपयन्तं नाशयन्तं श्रीराममभ्यनन्दत्। अर्थान्तरे तु अथामरादिसद्गणः प्तया जटया सहितः सप्तः स चासौ तन्तुः सन्ततिश्च सप्ततन्तुः मुनीनां यस्सप्ततन्तुस्तस्मिन् कृतं वैरबन्धनं येन तं 'चेरुश्च ते बालवधे सदोद्यता' इत्याद्युक्तरीत्या बालघातिनमित्यर्थः। केशी च अरिष्टश्च केश्यारिष्टौ केश्यरिष्टविति पदे नामनी ययोस्तौ मुख्यौ यस्य कंसपरिवारभूतदुर्जनस्य स तादृशः स चासौ दुर्जनश्च, कटुः क्रूरो यः केश्यरिष्टपद-मुख्यदुर्जनस्तं क्षपयन्तं नाशयन्तम्। आहवे युद्धे उद्यतौ सुबाहू शोभनहस्तौ यस्य तं श्रीकृष्णमभ्यनन्दत् ॥ २२ ॥

मन्दोपकारिणी – मुनीति ॥ अथ ताटकासंहारानन्तरं अमरादिसङ्गणः अमराः देवाः आदयो येषां ते मुन्यादयः तेषां सङ्गणः सत्समूहः तं श्रीरामचन्द्रं अभि उद्दिश्य अनन्दत् रामं दृष्ट्वा सन्तुतोष। 'टु नदि समृद्धौ लङ् परस्मैपदम्'। किम्भूतं, आहवे युद्धे उद्यतसुबाहुं उद्यतः आत्मना सह योद्धुं उद्युक्तः सुबाहुः सुबाहुनामकराक्षसः उद्यतश्चासौ सुबाहुश्च इति विग्रहः तम्। क्षपयन्तं नाशयन्तम्। कथंभूतं सुबाहुं, मुनिसप्ततन्तुकृतवैरबन्धनं मुनेः विश्वामित्रस्य सप्ततन्तुः यज्ञः 'सप्ततन्तुर्मखः क्रतुः' इत्यमरः, तस्मिन् कृतं वैरस्य बन्धनं येन स तथोक्तः तम्। 'वैरं विरोधो विद्वेषः' इत्यमरः मुनियज्ञविरोधिमित्यर्थः। पुनः किंभूतं सुबाहुं, कटुकेश्यरिष्टपदमुख्यदुर्जनं कटवः क्रूराः 'कटुः सुगन्धे तीक्ष्णे स्यात्' इति विश्वः, केशाः शिरोरुहाः अस्य सन्तीति कटुकेशि 'कचः केशः शिरोरुहः' इत्यमरः अरिष्टानां अशुभानां पदं आश्रयः 'रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाशुभे' इत्यमरः मुख्यदुर्जनः राक्षसश्रेष्ठः कटुकेशी चासौ मुख्यदुर्जनश्च इति विग्रहः तम्। कृष्णपक्षे तु अथ पूतनासंहारनन्तरं अमरादिसङ्गणः तं कृष्णं अभ्यनन्दत्। किंभूतं कृष्णं, मुनिसप्ततन्तु-कृतवैरबन्धनं प्साभिः जटाभिः सहिताः सप्साः ते च ते मुनयश्च मुनिसप्साः परनिपातोऽयं तेषां तन्तुः सन्ततिः 'तन्तुनक्रे तथोर्णायां सूत्रसङ्घे च सन्ततौ' इत्यभिधानं, मुनीनां प्रजा इत्यर्थः तस्मिन्। कृतवैरिबन्धनं उपलक्षणमेतत्। बालमात्रहनने उद्युक्तं इत्यर्थः। 'चेरुश्च ते बालवधे सदोद्यता' इति वचनात्। प्साशब्दस्य जटार्थत्वं तु सप्तमसर्गे 'अपि सप्ततया विराजितान्' इत्यस्मिन् श्लोके उक्तम्। कटुकेश्यरिष्टपदमुख्यदुर्जनं केश्यरिष्टौ इति पदे नामनी ययोः तौ केशिनामकारिष्टनामकदैत्यौ मुख्यौ श्रेष्ठौ यस्य स तथोक्तः 'मुख्यवर्य-वरेण्याश्च' इत्यमरः, स चासौ दुर्जनश्च कटुः क्रूरः निर्दयश्चासौ केश्यरिष्टपदमुख्यदुर्जनश्च तम्। बालवधाय ऋष्याश्रमादिस्थानेषु सञ्चरन्तं अरिष्टकेशिप्रमुखकंसपरिवारजनं इति यावत्। क्षपयन्तं नाशयन्तम् पुनः किंभूतं कृष्णं, आहवे युद्धे उद्यतसुबाहुं उद्यतौ उन्नमितौ सु शोभनौ बाहू भुजौ यस्य स तथोक्तः तम्। युद्धे कुशलमित्यर्थः ॥ २२ ॥

सवने विकस्वरगुणस्वरद्विजे स्फुरिते चरन् सकलगोकुलप्रियः।
इतकामतापसरसार्द्रधीगिरः प्रतिलालयन्नरमतैष सुन्दरीः ॥ २३ ॥

भावप्रकाशिका – सवने यज्ञे स कृष्णो वने। गावो नयनानि च। प्राप्त-कामानां तापसानां स्नेहार्द्रधीगिरो रमणीर्भद्राः। प्राप्तकामतापाः सरसा आर्द्रधीगिरो गोपिकाश्च ॥ २३ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ सकलं समस्तं यद्गोकुलं वेदसमूहस्तत्प्रियं यस्य। यद्वा सकलं गोकुलं वेदसमूहो येषां विश्वामित्रादिमुनीनां ते सकलगोकुलास्तेषां प्रियः एष श्रीरामः। गुणा भक्त्यादिगुणाः ते च स्वरा उदात्तादिस्वराश्च गुणस्वराः विकस्वरा-श्शोभमाना गुणस्वरा येषां, तादृशा द्विजा ब्राह्मणा यस्मिन् तस्मिन् स्फुरिते विराजमाने सवने विश्वामित्रयज्ञे चरन् विघ्नविघाताय तत्र तत्र सञ्चरन् सुन्दरीः रमणीयाः श्रोत्रप्रिया इति यावत्। इतः यज्ञनिष्पत्या प्राप्तः, कामोऽभीष्टो यस्य तादृशो यस्तापसो विश्वामित्रस्तस्य सार्द्रा स्नेहार्द्रा या धीस्तया कृता गिरो वचनानि। 'त्वत्प्रसादादस्मद्यज्ञनिष्पत्तिरभूत्, विदेहेषु च जानकीस्वयंवरो घोष्यते तत्र याम' इत्यादि विश्वामित्रवचनानीत्यर्थः। प्रतिलाल-यन्मानयन् सन्नरमत रेमे। अर्थान्तरे तु सकलगोकुलप्रियः समस्तगोसमूहप्रियः। अथवा गोकुलं नन्दादिगोपावासस्थानं तस्य प्रियः। इतः प्राप्तः कामतापः स्मरनिमित्तसन्तापो याभिस्तादृशा याः, सरसार्द्रधीगिरः, रसेनार्द्रा रसार्द्राः धियश्च गिरश्च धीगिरः। रसार्द्रा धीगिरो बुद्धिवचनानि, ताभिः सहिताः सरसार्द्रधीगिरः। इतकामतापाश्चताः सरसार्द्रधीगिरश्च तास्सुन्दरीः मनोहरा गोपाङ्गना लालयन्मानयन् रमयन्निति भावः। स एष श्रीकृष्णो विकस्वरश्शोभमानो गुणो माधुर्याख्यगुणो यस्य सतथोक्तः स्वरः कूजितं येषां तादृशा द्विजाः पक्षिणो यस्मिन् तस्मिन् स्फुरिते चन्द्रिकया विराजमाने वने वृन्दावने चरन्नरमत ॥ २३ ॥

मन्दोपकारिणी – स इति। सकलगोकुलप्रियः सकलाश्च ताः गावः वेदादिरूपवाचः तासां कुलस्य समूहस्य प्रियः प्रीतिविषयः मुख्यप्रतिपाद्य इति यावत्। एषः रामः। विकस्वरगुणस्वरद्विजे विकस्वराः शोभनाः गुणाः भक्त्यादयः स्वराः वेदोच्चारणाङ्गभूताः उदात्तादिस्वराः । गुणाश्च स्वराश्च, विकस्वराः गुणस्वराः येषां ते द्विजाः यस्मिन् तत् तस्मिन्। स्फुरिते विराजमाने सवने विश्वामित्रयज्ञे चरन् आसक्तः विघ्ननिरासाय तत्र तत्र सञ्चरन् सन् सुन्दरीः रमणीयाः श्रोत्रप्रियाः इतकामतापसरसार्द्रधीगिरः इतः प्राप्तः कामः निर्विघ्नेन यज्ञनिष्पत्तिरूपो मनोरथो येन स इतकामः इतकामश्चासौ तापसः विश्वामित्रः

तस्य रसेन रागेण अनुरागेण स्नेहेनेति यावत्। 'गुणे रागे द्रवे रसः' इत्यमरः। 'रागोऽनुरागे मात्सर्ये' इति रत्नमाला च। आर्द्रा क्लिन्ना च सा धीश्च तथोक्ताः गिरः वचनानि त्वत्प्रसादात् अस्मत् यज्ञनिष्पत्तिः अभूत् इत्यादिस्नेहपूर्वकवचनानि प्रतिलालयन् आदरं कुर्वन् अरमत। 'रमु क्रीडायां लङ् आत्मनेपदं अरमत अरमेतां अरमन्त'। कृष्णपक्षे तु सवने इत्यत्र भिन्नं पदम्। सः कृष्णः विकस्वरगुणस्वरद्विजे विकस्वरः शोभमानः गुणः माधुर्याख्यः यस्य सः विकस्वरगुणः स्वरः ध्वनिर्येषां ते विकस्वरगुणस्वराः द्विजाः पक्षिणः यस्मिन् तस्मिन् 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । स्फुरिते चन्द्रचन्द्रिकया विराजिते वने वृन्दावने चरन् अरमत कथंभूतः, सकलगोकुलप्रियः सकलानां गवां धेनूनां कुलस्य प्रियः। यद्वा गोकुलशब्देन नन्दगोपावासस्थानं उच्यते तेन च तद्गतजन्तवः अभिप्रेताः ततश्च गोकुलानां प्रियः इत्यर्थः। पुनः किंभूतः, इतकामतापसरसार्द्रधीगिरः इतः प्राप्तः कामतापः याभिः ताः । रसेन स्नेहेन आर्द्रा क्लिन्ना च सा धीश्च तया स्नेहबुद्ध्या गीर्भिः नर्मवचनैश्च सहिताः सरसार्द्रधीगिरः । इतकामतापाश्च ताः सरसार्द्रधीगिरश्च इति ताः। एवंभूताः सुन्दरीः गोपाङ्गनाः 'सुन्दरी रमणी रामा' इत्यमरः, प्रतिलालयन् सुखयन् अरमत इति योजना॥ २३ ॥

सहजान्वितः सकलमित्रसंयुतो मधुरां पुरीं जनकवल्लभां गतः।
प्रविशन्निमां स जगदेकसुन्दरो नरनार्युदारनयनोत्सवोऽभवत् ॥२४॥

भावप्रकाशिका – सकलमित्रसंयुतो विश्वामित्रयुतो गोपयुतश्च। भद्रां जनकराजवल्लभां मधुरां पितृप्रियाम्॥ २४ ॥

पदार्थदीपिकोद्बोधिका – सहजेति॥ सह, एकोदरे जातः सहजो लक्ष्मणः तेनान्वितो युक्तः। सकलमित्रेण विश्वामित्रेण संयुतः। मधुरां रम्यां जनकवल्लभां विदेहराजप्रियां पुरीं मिथिलां गतः। इमां पुरीं प्रविशन् जगदेकसुन्दरः स रामो नरनारीणां, तत्पुरगतानामुदारनयनानामुत्कृष्टनयनानामुत्सव इव उत्सवो हर्षजनकोऽभवत्। अर्थान्तरं तु सहजान्वितो बलभद्रसंयुतः सकलमित्रैर्गोपैः संयुतो जनकस्य पितुर्वसुदेवस्य वल्लभां प्रियां मथुरां पुरीं गतः। इमां पुरीं प्रविशन् जगदेकसुन्दरः श्रीकृष्णो नरनार्युदारनयनोत्सवोऽभवत्॥ २४ ॥

मन्दोपकारिणी – सहजेति ॥ सहजान्वितः लक्ष्मणेन युक्तः सकलमित्रसंयुतः सकलं विश्वं मित्रं सुहृत् यस्य स विश्वामित्रमुनिः तेन संयुतः सहितः मधुरां मनोहरां जनकवल्लभां विदेहराजस्य प्रियां पुरीं मिथिलानगरीं 'पूःस्त्रीपुरीनगर्यौ वा पत्तनं' इत्यमरः, गतः प्राप्तः। इमां पुरीं प्रविशन् पुरमध्ये गच्छन् जगदेकसुन्दरः जगत्सु लोकेषु एकः मुख्यः सुन्दरः मनोहरः सः रामचन्द्रः नरनार्युदारनयनोत्सवः नराः नार्यश्च तासां मिथिलापुरगतानां जनानां उदाराणां उत्कृष्टानां नयनानां नेत्राणां उत्सवः हर्षजनकः अभवत्। कृष्णपक्षे तु सहजेन बलरामेण अन्वितः सकलैः मित्रैः नन्दगोपादिभिः संयुतः जनकवल्लभां जनकस्य वसुदेवस्य प्रियां मधुरां तत्संज्ञां पुरीं 'गोदा गोदावरी नद्यां मधुरा मथुरा पुरी' इति विश्वः, गतः प्राप्तः। इमां प्रविशन् मधुरापुर्यां अन्तर्गच्छन् जगदेकसुन्दरः सः श्रीकृष्णः नरनार्युदार-नयनोत्सवः मधुरागतनरनारीणां उदारनयनोत्सवः अभवत् ॥ २४ ॥

अथ खण्डितेश्वरधनुः स लीलया क्षपितोग्रसेननृपपुत्रपौरुषः।
समुपास्य विप्रगुरुमब्जभूगुरुः स्वजनानमोदयदमेयतेजसा ॥ २५ ॥

भावप्रकाशिका – ईश्वरधनुः स्वयंवरानीतं कंसेन पूज्यमानं क्षपितमुग्रसेनानां नृपपुत्राणां पौरुषमनेन धनुर्भंगेन। क्षपितः उग्रसेननृपपुत्रोऽपि येन तत्पौरुषमस्य कृष्णस्य। विप्रगुरुर्विश्वामित्रः सान्दीपनिश्च। अमेयेन च रूपतेजसा जरासन्धविजयादिना पराक्रमेण च ॥ २५ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ अथ पुरप्रवेशानन्तरं लीलया खण्डितं भग्नं ईश्वरधनुः, विदेहेन स्वयंवरार्थमानीतं शिवधनुर्येन तादृशः। अत एव उग्रा क्रूरा सेना येषां तादृशा ये नृपपुत्रास्तेषां पौरुषं पराक्रमः क्षपितं धनुर्भङ्गेन निरस्तमुग्रसेननृपपुत्रपौरुषं येन तादृशः। अब्जभूगुरुर्ब्रह्मगुरुः स श्रीरामो विप्रगुरुं विश्वामित्रं समुपास्य समीपे स्थित्वा, अमेयतेजसा अपरिमितसामर्थ्येन स्वजनान् लक्ष्मणादीनमोदयत् अतोषयत्। अर्थान्तरं तु अथ मधुराप्रवेशानन्तरं लीलया खण्डितमीश्वरधनुश्शिवेन कंसाय दत्तं धनुर्येन तादृशः। क्षपितमुग्रसेननृपपुत्रस्य पौरुषं येन तादृशः। निहतकंस इति यावत्। अब्जभूगुरुः श्रीकृष्णो विप्रगुरुं सान्दीपनिं समुपास्य, अमेयतेजसा जरासन्धादिजयरूपेणापरिमितसामर्थ्येन 'तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु' इत्यमरः, स्वजनान् वसुदेवादीन् अमोदयत् ॥ २५ ॥

मन्दोपकारिणी – अथेति ॥ अथ पुरप्रवेशानन्तरं लीलया अलक्षीकृत्य इति यावत्। अनायासेनेति वा। खण्डितेश्वरधनुः खण्डितं द्वेधाकृतं ईश्वरधनुः ईश्वरस्य रुद्रस्य 'ईश्वरः शर्व ईशानः' इत्यमरः धनुः चापः येन स तथोक्तः। विदेहराजेन राज्ञां बलपरीक्षार्थं स्वयंवराय अनीतं रुद्रधनुः रामेण भग्नं इत्यर्थः। अत एव हेतोः क्षपितोग्रसेननृपपुत्रपौरुषः उग्रा क्रूरा सेना चमूः येषां ते उग्रसेनाः। नृपाणां राज्ञां पुत्राः कुमाराः नृपपुत्राः। उग्रसेनाश्च नृपपुत्राश्च तेषां पौरुषं पुंस्त्वं 'पुंभावे तत्क्रियायां च पौरुषं' इत्यमरः, अहंकार इति यावत्, क्षपितं खण्डितं उग्रसेननृपपुत्रपौरुषं येन स तथोक्तः। नृपपुत्रासाध्यधनुर्भङ्गकरणेन नृपपुत्राणां अहङ्कारो रामेण खण्डित इति भावः। अब्जभूगुरुः अब्जात् कमलात् भवति उत्पद्यते अब्जभूः विरिञ्चः तस्य गुरुः पिता 'गुर्गीष्पति पित्राद्यौ' इत्यमरः, सः रामः विप्रगुरुं विप्राणां ब्राह्मणानां गुरुं उपदेशकर्तारं विश्वामित्रं समुपास्य संयोज्य विश्वामित्राज्ञां अङ्गीकृत्य, धनुर्भङ्गस्य कृतत्त्वेन विश्वामित्रसेवाकृता इति भावः। अमेयतेजसा अमेयं अपरिमितं च तत् तेजः प्रभावश्च बलं वा अमेयतेजः तेन। 'तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि' इत्यमरः। अपरिमितेन शरीरबलेन इत्यर्थः। स्वजनान् स्वकीयजनान् लक्ष्मणादीन् अमोदयत् सन्तोषयामास। कृष्णपक्षे तु अथ मधुरप्रवेशानन्तरं लीलया अनायासेन खण्डितेश्वरधनुः कंसाय दत्तं रुद्रधनुः कृष्णेन भग्नमिति प्रसिद्धमेवेति भावः। क्षपितोग्रसेननृपपुत्रपौरुषः उग्रसेननामकश्चासौ नृपश्च उग्रसेननृपः तस्य पुत्रः आत्मजः कंसः तस्य पौरुषं पराक्रमः क्षपितं नाशितं उग्रसेननृपपुत्रपौरुषं येन स तथोक्तः। निहतकंस इति यावत्। सः श्रीकृष्णः अब्जभूगुरुः सन्नपि विप्रगुरुं सान्दीपं उपाध्यायं समुपास्य संसेव्य वेदादिकं अधीत्य इति यावत्। अमेयतेजसा जरासन्धविजयादिरूपेण सामर्थ्येन। स्वजनान् वसुदेवादीन्। अमोदयत्। 'मुद हर्षे इत्यतो ण्यन्तात् लङ् परस्मैपदम्' ॥ २५ ॥

कमलामयं कमलपत्रलोचनां भुवमागतां नृपसुतां गृहीतवान्।
निजलीलया विजितराजशात्रवो मुदमापदाप्य पुरमब्धिदुर्गमम् ॥ २६ ॥

भावप्रकाशिका – नृपसुतां सीतां रुक्मिणीं च। राजशात्रवः परशुरामो राजान एव शात्रवाश्च। अब्धिवद्दुर्गममब्धिना दुर्गं च ॥ २६ ॥

पदार्थदीपिकोद्बोधिका – कमलामिति ॥ अयं श्रीरामः कमलपत्रवल्लोचने यस्याः तां नृपसुतां विदेहराजसुतां भुवमागतां भुव्यवतीर्णां कमलां रमारूपां सीतां गृहीतवान् विवाह-विधिनाऽङ्गीकृतवान्। ततः निजपुरं गच्छन्मार्गे निजलीलया आत्मलीलया विजितोऽज्ञ-दृष्टचपेक्षया पराजितो राज्ञां शात्रवः परशुरामो येन सः 'द्वेष्टा वैरी च शात्रवः' इति हलः। अब्धिवदुर्गमं गन्तुमशक्यं पुरं अयोध्यापुरं आप्य मुदमापत् प्राप। अर्थान्तरन्तु अयं श्रीकृष्णोऽपि कमलपत्रलोचनां नृपसुतां भीष्मकसुतां भुवमागतां कमलां रमारूपां रुक्मिणीं गृहीतवान् बलादपहृत्य स्वीकृतवान्। ततः स्वपुरं गच्छन्मार्गे निजलीलया विजिता राजाख्या रुग्मिजरासन्धादयश्शात्रवा येन तादृशस्सन् अब्धिदुर्गम् अब्धिना दुर्गमं पुरं द्वारकापुरं आप्य मुदमापत्॥ २६ ॥

मन्दोपकारिणी – कमलामिति ॥ अयं रामः। कमलपत्रलोचनां कमलस्य पद्मस्य पत्रमिव लोचने यस्याः सा तथोक्ता तां नृपसुतां नृपस्य जनकस्य सुतां दुहितरं भुवं आगतां प्राप्तां भूमौ अवतीर्णां इति यावत्। कमलां श्रियं 'कमला श्रीः हरिप्रिया', इत्यमरः, गृहीतवान् उद्वाहितवान् सन् ततः स्वपुरं आगच्छन् मार्गे निजलीलया स्वाभाविकक्रीडया विजितराजशात्रवः राज्ञां क्षत्रियाणां शात्रवः शत्रुः राजशात्रवः परशुरामः 'दस्युशात्रवशत्रवः' इत्यमरः, विजितः अज्ञदृष्ट्या पराभूतो राजशात्रवो येन स तथा सन् अब्धिदुर्गमं अब्धिवत् समुद्रवत् दुर्गमं शत्रुभिः प्राप्तुं अशक्यं पुरं अयोध्यानगरं 'अगारे नगरे पुरम्' इत्यमरः, आप्य प्राप्य मुदं सन्तोषं आपत् आप। 'आप्लृ व्याप्तवित्यतो लुङ् परस्मैपदं आपत् अपतां आपन्'। कृष्णपक्षे तु, अयं कृष्णः कमलपत्रलोचनां नृपसुतां भीष्मकराजसुतां भुवमागतां कमलां गृहीतवान् बलात्कारेण अपहृतवान्. सन् निजलीलया विजितराजशात्रवः विजिताः राजानः जरासन्धादिराजाख्याः शात्रवाः येन स तथोक्तस्सन् अब्धिदुर्गमं अब्धिना दुर्गमं पुरं द्वारकापुरं आपत् इति योजना॥ २६ ॥

स जगाम मातृजनतुष्टये किल त्वरितो(ऽ)वनं विदधदीप्सितं सताम्।
सह भार्ययाऽपि शुभया महाजयध्वजलक्ष्मणाग्र्यसुहृदा विना(ऽ)मुदा॥ २७ ॥

भावप्रकाशिका – स जगाम वनं स कृष्णः सतामवनं विदधत्। मातृजनः कैकेयी अदितिश्च। महाजयध्वजेन लक्ष्मणाख्येन अग्र्यसुहृदा। अमुदा विना। महाविजयेन ध्वजचिह्नेन विना गरुडेन च ॥ २७ ॥

पदार्थदीपिकोद्बोधिका – स इति ॥ सतां ऋष्यादीनामीप्सितं वाञ्छितं रावणनिग्रहादिकं विदधत्कुर्वन् स रामः मातृजनस्य तुष्टये सन्तोषाय कैकयीसन्तोषायेत्यर्थः। किलेत्यपरमार्थे। त्वरितो वेगवान् सन् शुभया भार्यया सीतया सह। महतो जयस्य ध्वज इव ध्वजः स चासौ लक्ष्मणश्च स चासौ अग्र्यसुहृत् उत्तमसुहृत्तेनापि सह अत्रामुदेति पदच्छेदः। मुदो विरुद्धा अमुत्तया दुःखेनेत्यर्थः विना, राज्याभिषेकं विहाय वनं गच्छतोऽप्यस्य न दुःखमिति भावः। वनं जगाम। अर्थान्तरन्तु ईप्सितमात्मनोऽभीष्टं, सतामृष्यादीनामवनं रक्षणं विदधत्कुर्वन् स श्रीकृष्णः मातृजनतुष्टये नरकासुरहृतकुण्डलाया अदित्यास्तुष्टये शुभया शोभनया भार्यया सत्यभामयापि अग्र्यसुहृदा उत्तमसुहृदा महाजयार्थो ध्वजो महाध्वजस्तस्य लक्ष्मचिह्नभूतस्तेन 'चिह्नं लक्ष्म च लक्ष्मणं' इत्यमरः, विना पक्षिणा गरुडेन 'विः पक्षिपरमात्मनोः' इत्यमरः मुदा सन्तोषेण जगाम किल। नरकासुरेणोपद्रुतानां बदरिकाश्रमनिवासिनां मुनीनां रक्षां कर्तुमदितितुष्टये नरकवधार्थश्च जगामेति भावः ॥ २७ ॥

मन्दोपकारिणी – स इति ॥ सः रामः। मातृजनतृष्टये किल माता सापत्नजननी कैकेयी सैव जनः मातृजनः तस्य तुष्टये प्रीत्यर्थं किल। त्वरितः वेगवान् सन् वनं अरण्यं प्रति जगाम। किल इत्यनेन कैकयीप्रीतिः वनं प्रति गमने मुख्यं प्रयोजनं न भवतीति सूच्यते। तर्हि मुख्यं प्रयोजनं किमित्यत आह ॥ **विदधदिति ॥** सतां ऋष्यादीनां ईप्सितं अपेक्षितं रावणादिराक्षससंहारं विदधत् कुर्वन् चिकीर्षुस्सन् इति यावत्। अनेन राक्षसनिग्रह एव मुख्यं प्रयोजनं वनप्रवेशे इत्युक्तं भवति। कथं जगाम, शुभया पतिव्रतया भार्यया पत्न्या सीतया सह। तथा महाजयध्वजलक्ष्मणाग्र्यसुहृदापि महाजयः शत्रुविजयः यस्मात् स महाजयः तादृशः ध्वजः केतनं यस्य सः महाजयध्वजः 'केतनं ध्वजमस्त्रियां' इत्यमरः। जयसंपादकध्वजस्तंभवान् इति यावत्। पादयोः महाजयप्रदध्वजरेखावानिति वा। महाजयध्वजश्चासौ लक्ष्मणश्च महाजयध्वजलक्ष्मणः। अग्र्यः उत्तमश्चासौ सुहृत् सखा च

अग्र्यसुहृत्। महाजयध्वजलक्ष्मणाख्यश्चासौ अग्र्यसुहृच्च इति तथोक्तः। तेन सह सार्धं अत्र अमुदेति पदच्छेदः। अमुदा दुःखेन विना, राज्याभिषेकविषयकदुःखं विहाय सीतालक्ष्मणाभ्यां सह वनं जगाम इति भावः। कृष्णपक्षे तु त्वरितो वनमित्यत्र अवनं इति पदच्छेदः। विना मुदेत्यत्र मुदेत्येव पदम्। इप्सितं स्वाभीष्टं सतां ऋष्यादीनां अवनं रक्षणं विदधत् कुर्वन् सः कृष्णः मातृजनतुष्टये माता देवमाता अदितिः सैव जनः मातृजनः तस्य तुष्टये प्रीतये मुदा सन्तोषेण जगाम किल प्रतस्थे खलु। बदरिकाश्रमवासिनां मुनीनां नरकासुरेण उपद्रुतानां रक्षां कर्तुं नरकासुरेण अपहृतकुण्डलायाः अदित्याः प्रीतये च नरकवधार्थं जगाम इति भावः। कथं शुभया साध्व्या भार्यया सत्यभामयापि सह अग्र्यसुहृदा उत्तममित्रेण महाजयध्वजलक्ष्मणा महाजयस्य महाजयवतः ध्वजस्य रथमध्यस्तंभस्य लक्ष्म चिह्नं तेन श्रीकृष्णस्य रथध्वजभूतेन इत्यर्थः। विना पक्षिणा गरुडेन सह सत्यभामया सह गरुडं आरुह्य प्रायादिति भावः॥ २७॥

समतीतपर्वतपुरोगदुर्गमः खरदूषणादिसुजनद्विषो बहून्।
स निहत्य विश्वभयदं सुदुस्सहं नरकं महातम उपानयत्क्रमात्॥ २८॥

भावप्रकाशिका – पर्वतादिदुर्गमस्थानानि गिरिदुर्गादीनि च। खरदूषणादीन् राक्षसान् विनिहत्य महातमो नरकमनयत्। क्रूरदोषानादिदैत्यान् मुरादीन्निहत्य नरकदैत्यं च महातमोऽनयत्॥ २८॥

पदार्थदीपिकोद्बोधिका – समतीतेति॥ स श्रीरामः पर्वताः चित्रकूटादयः पुरोगा मुख्या येषां तादृशा दुर्गमा दुर्गमप्रदेशाः। समतीता अतिक्रान्ताः पर्वतपुरोगदुर्गमा येन तादृशः सन् बहून्, खरश्च दूषणश्च तावादी येषां तादृशा ये सुजनद्विषः सज्जनद्वेषिणस्तान्निहत्य क्रमात् प्रारब्धभोगानन्तरमिति भावः। विश्वस्य समस्तजगतो भयदं श्रवणमात्रेण भयप्रदं सुदुःसहं नित्यं दुःखरूपत्वादतिदुःसहं महातमः तत्सञ्ज्ञकं नरकं नित्यनरकं 'नरकौ दैत्यनिरयावि'ति हेमचन्द्रः, उपानयत् प्रापयामास। अर्थान्तरन्तु–पर्वताः पुरोगा ये दुर्गमाः नरकासुरपुरावरणभूतजलमौरपाशादिभिरावृतत्त्वेन गन्तुमशक्याः समतीताः पर्वतपुरोगदुर्गमा येन स श्रीकृष्णः बहून्, खराणि क्रूराणि दूषणानि दोषा येषां तादृशा य

आदिसुजनाः, आदौ पूर्वं सु जननं येषां तादृशा ये द्विषो देवद्विषो मुरादिदैत्यास्तान्निहत्यं क्रमान्नरकासुरमपि निहत्य विश्वभयदं सुदुःसहं महातमोऽन्धंतमोऽनयत् ॥ २८ ॥

मन्दोपकारिणी – समतीतेति ॥ सः रामः समतीतपर्वतपुरोगदुर्गमः पर्वतः चित्रकूटपर्वतः पुरोगः आदिः यस्य तत् पर्वतपुरोगं तच्च तत् दुर्गमं गन्तुमशक्यं स्थानं च समतीतं सम्यक् अतिक्रान्तं पर्वतपुरोगदुर्गमं येन स तथोक्तः सन्, बहून् खरदूषणादिसुजनद्विषः खरः खरनामकश्च दूषणः दूषणनामकश्च खरदूषणौ तौ आदी पूर्वौ येषां ते खरदूषणादयः सुजनानां ऋष्यादिसज्जनानां द्विषः द्वेषिणः खरदूषणादयश्च ते सुजनद्विषश्च तान् निहत्य क्रमात् प्रारब्धकर्मभोगानन्तरं इति भावः। महातमः महातमनामकं नरकं दुर्गतिं 'स्यान्नारकस्तु नरको निरयो दुर्गतिस्त्रियाम्' इत्यमरः, उपानयत् प्रापयामास। 'उप पूर्वात् णीञ् प्रापण इत्यस्मात् लङ् परस्मैपदं अनयत् अनयतां अनयन्'। कथंभूतं नरकं, विश्वभयदं विश्वेषां सर्वेषां श्रवणमात्रेण भयं ददातीति विश्वभयदः तम्। सुदुस्सहं अतिदुःखरूपत्वात् सर्वथा सोढुमशक्यम्। कृष्णपक्षे तु समतीतपर्वतपुरोगदुर्गमः नरकपुरस्य आवरणानि पर्वतजलपाशात्मकानि दुर्गाणि अतीत्य इत्यर्थः, सः कृष्णः खरदूषणादि-सुजनद्विषः क्रूराणि दूषणानि विष्णुवैष्णवद्वेषादिदोषाः येषां ते आदयः आदिकालीनाश्च ते सुजनद्विषः मुरादिदैत्याश्च तान् नरकमपि क्रमात् निहत्य विश्वभयदं सुदुःसहं महातमः अन्धंतमः उपानयत् अन्धंतमःसाधनविष्णुद्वेषादिदोषत्वादेव नरकादीन् अन्धंतमः प्रापयामास इति भावः ॥ २८ ॥

रुचिराश्रमाजिरचिताग्र्यतेजसा प्रियया प्रियो भुवनमान्यया समम्।
भृशमाकुलीकृतमदप्रमादवत्सुरपारिजातहृदवाप धाम सः ॥ २९ ॥

भावप्रकाशिका – सुन्दराश्रमप्राङ्गणसंबद्धतेजसा सीतया। आश्रमाजौ रचितो-रुपराक्रमया सत्यया च। आकुलीकृतसुरपालकारिसमूहहृत्। सुराणां पारिजातहृत्। धाम तेजो गृहं च ॥ २९ ॥

पदार्थदीपिकोद्बोधिका – रुचिरेति ॥ भृशं अतितरां आकुलीकृतं युद्धे स्वात्मना व्याकुलीकृतम् मदश्च प्रमादो विस्मरणं स च तौ अस्य स्त इति मदप्रमादवत्तादृशं यत्,

सुरान् पातीति सुरपः पुरन्दरस्तस्यारिजातं शत्रुसमूहः आकुलीकृतं मदप्रमादवत्सुरपारिजातं हरतीति तादृशः। प्रियः स्वभक्तप्रियः स श्रीरामः रुचिराश्रमस्य शोभनाश्रमस्य अजिरे प्राङ्गणे चितं सम्बद्धं अग्र्यतेज उत्तमतेजो यस्याः 'अङ्गणं चत्वराजिरे' इत्यमरः, तया भुवनमान्यया प्रियया सीतया समं धाम तेजः 'धामनी गृह तेजसी'त्यमरः अवाप। अर्थान्तरं तु भृशं मद ऐश्वर्यादिमदः, प्रमादः अयं 'श्रीकृष्णोऽस्मत्स्वामी नारायण' इत्येतद्विस्मरणं, तावेषां स्त इति मदप्रमादवन्तः ते च ते सुराश्च । आकुलीकृताः पारिजातोद्धारेणात्मना व्याकुलीकृताः मदप्रमादवत्सुराश्च तेषां पारिजातं हरतीति तादृशः । प्रियः स्वभक्तप्रियः असुराविष्टान् इन्द्रादीन् विबोध्य तेषां प्रियो भूत्वेति भावः। स श्रीकृष्णः रुचिरा शोभमानाऽऽश्रमा श्रमरहिता आजिः युद्धं तस्यां पारिजातापहरणसमये देवैः सह क्रियमाणयुद्धे रचितं प्रकटितं अग्र्यतेज उत्तमसामर्थ्यं यस्यास्तया भुवनमान्यया प्रियया सत्यभामया समं साकं धाम द्वारकाख्यं गृहमवाप ॥ २९ ॥

मन्दोपकारिणी – रुचिरेति ॥ भृशं अत्यर्थं आकुलीकृतमदप्रमादवत्सुरपारिजातहृत् आकुलीकृतं व्याकुलीकृतं मदः ऐश्वर्यादिना जातः गर्वः 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इति विश्वः, प्रमादः अनवधानता कर्तव्यविषये विस्मरणं इति यावत्, 'प्रमादोऽनवधानता' इत्यमरः मदप्रमादौ अस्य स्त इति मदप्रमादवत् तादृशं यत्सुरपारिजातं सुरान् पातीति सुरपः देवेन्द्रः तस्य अरयः शत्रवः 'दनुजेन्द्रारिदानवाः' इत्यमरः खरदूषणादिराक्षसाः तेषां जातं समूहः 'जातं जात्योघजन्मसु' इति विश्वः, आकुलीकृतं च तत् मदप्रमादवत् च तत् सुरपारिजातं च इति तत्तथोक्तं तत् हृत् संहृतवानिति। प्रियः भक्तप्रीतिविषयः श्रीरामः रुचिराश्रमाजिरचिताग्र्यतेजसा रुचिरः चारुश्चासौ आश्रमश्च पञ्चवट्याख्यस्थलमित्यर्थः, तस्य अजिरे अङ्गणे 'अङ्गणञ्चत्वराजिरे' इत्यमरः, चितं सम्बद्धं अग्र्यं बहुलं तेजः कान्तिः यस्याः तया भुवनमान्यया भुवनेषु पूज्यया प्रियया भार्यया सीतया समं साकं धाम शोभां अवाप प्राप्तवान्। 'गृह देह त्विट् प्रभावाः धामानि' इत्यमरः। रामचन्द्रः खरदूषणादिराक्षसान् निहत्य पञ्चवट्याख्याश्रमे विराजमानया सीतया शुशुभे इति भावः। कृष्णपक्षे तु आकुलीकृतमदप्रमादवत्सुरपारिजातहृत् आकुलीकृताश्च ते मदप्रमादवन्तः नारायणविस्मरणरूपप्रमादवन्तश्च ते सुराश्च तेषां पारिजातं वृक्षं हृतवान्

अपहृतवान् इति हृत्। स कृष्णः प्रियः देवानां स्वस्वरूपज्ञापनेन प्रीतिविषयस्सन् रुचिराश्रमाजिरचिताग्र्यतेजसा न विद्यते श्रमः आयासः यस्यां सा आश्रमा सा च सा आजिः युद्धं रुचिरा मनोहरा च सा अश्रमाजिश्च 'समित्याजिसमिद्युधः' इत्यमरः, तस्यां रचितं अग्र्यं अतिशयितं तेजः सामर्थ्यं यया सा तथोक्ता तया। पारिजातहरणसमये देवैः सह अश्रमेणैव युद्धं कृत्वा स्वसामर्थ्यं प्रकटितवत्या इत्यर्थः, भुवनमान्यया प्रियया सत्यभामया समं धाम गृहं द्वारकापुरं अवाप। नरकासुरं हत्वा स्वर्गं गत्वा पारिजातवृक्षहरणसमये स्वस्वरूपाज्ञानेन युद्धं कुर्वाणानां देवानां स्वस्वरूपं ज्ञापयित्वा तेषां प्रीतिविषयस्सन् कृष्णः सत्यभामया सह द्वारवतीं पुरीं प्राप इति भावः॥ २९॥

हरितामधीशनरदेवमण्डलं दशकं विजित्य परभीषणं मुहुः।
स्फुरितामिह प्रियतमां निजश्रियं भगवानुपैक्षत हरन्तमप्रियम्॥ ३०॥

भावप्रकाशिका – निजां श्रियं सीतां हरन्तं दशकं दशाननं हरितामधीशानां नराणां मण्डलं विजित्य परभीषणम् अन्यभयङ्करम्। निजानां पाण्डवानां श्रियं हरन्तं सुयोधनम्। हरितां दशकम्। अधिकेशनरदेवसमूहं विजित्य स्फुरिताम्॥ ३०॥

पदार्थदीपिकोद्बोधिका – हरितामिति॥ भगवान् श्रीरामः इहाश्रमे स्फुरितां विलसितां निजश्रियं स्वकीयश्रीरूपां सीतां हरन्तमप्रियं शत्रुं हरितां दिशां अधीशा ये नराश्च देवाश्च तेषां मण्डलं समूहं मुहुर्विजित्य परेषामन्येषां शत्रूणां वा भीषणं भयङ्करं दश कानि शिरांसि यस्य तं रावणमुपैक्षत न निरुद्धवान्। अर्थान्तरन्तु— भगवान् श्रीकृष्णो हरितां दिशां दशकं दश विजित्य परेषां शत्रूणां भीषणं अधीशा अधिकैश्वर्यवन्तो ये नरदेवा राजानस्तेषां मण्डलं समूहं विजित्य, इह इन्द्रप्रस्थे स्फुरितां प्रियतमां अतिशयेन प्रियां निजश्रियं स्वकीयपाण्डवसम्पदं 'स्वभक्तानामधिकैश्वर्यं हि भगवत्प्रियं, तद्भोगोऽप्यतीव हरितोषणं' इति वचनात्। हरन्तं द्यूतेनापहरन्तं अत एव अप्रियं सुयोधनमुपैक्षत॥ ३०॥

मन्दोपकारिणी – हरितामिति॥ भगवान् रामः इह पञ्चवट्याख्यस्ववासस्थले स्फुरितां विलसितां प्रियतमां अतिशयेन प्रियां प्रीतिविषयां निजश्रियं निजा च सा श्रीः लक्ष्मीरूपा सीता च ताम्। हरन्तं नीतवन्तं अप्रियं अहितं शत्रुं इत्यर्थः, 'द्विड्विपक्षाहि-

तामित्रदस्युशात्रवशत्रवः' इत्यमरः दशकं दशसङ्ख्याकानि शिरांसि यस्य सः तं रावणं 'कं शिरो जलमाख्यातं' इति वररुचिः उपैक्षत न निरोधं कृतवान्। 'उप पूर्वात् ईक्ष दर्शने लङ् आमनेपदं ऐक्षत ऐक्षेतां ऐक्षन्त'। किम्भूतं, हरितां दिशां अधीशनरदेवमण्डलं अधीशाः स्वामिनश्च ते नरदेवाः राजानश्च हरितामधीशाः दिक्पालकाः। नरदेवाः नृपाश्च इति द्वन्दो वा तेषां मण्डलं समूहं 'पूगो वितानं प्रकरो मण्डलं चक्रवालकं' इत्यमरः, मुहुः पुनः विजित्य पराभूय परभीषणं अन्येषां भयङ्करम्। कृष्णपक्षे तु भगवान् श्रीकृष्णः निजश्रियं निजानां आत्मीयानां पाण्डवानां 'निजमात्मीयनित्ययोः' इति विश्वः, श्रियं राज्यसंपत्तिं 'संपत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः, हरन्तं द्यूतव्याजेन अपहरन्तं अप्रियं अप्रीतिविषयं दुर्योधनं उपैक्षत। कथंभूतां श्रियं, हरितां दिशां दशकं दशदिशः इति यावत् विजित्य स्ववशीकृत्य परभीषणं शत्रूणां भीषणं भयङ्करं 'परोरिपरमात्मनोः' इति विश्वः। अधीशनर-देवमण्डलं अधीशाः अधिकैश्वर्ययुक्ताः ते च ते नरदेवाश्च तेषां मण्डलं च विजित्य आनी-ताम्। इह इन्द्रप्रस्थाख्ये पाण्डवानां पुरे स्फुरितां अत्यन्तं विलसितां प्रियतमां आत्मनः प्रियां 'स्वभक्तानां ऐश्वर्यं हि भगवत्प्रियं तद्भोगोऽपि अतीव हरितोषणं' इत्युक्तेः ॥ ३० ॥

अभिवन्दितः पवननन्दनादिभिः स कदाचिदिन्द्रसुतवर्धको गवा।
निजराज्यमात्मदयिताय दत्तवान् हरिसूनवे हतविपक्षमुत्तमम् ॥ ३१ ॥

भावप्रकाशिका – पवननन्दनो हनुमान् भीमश्च। गवा इन्द्रसुतवर्धकः शरेण वालिच्छेदकः। वाचाऽर्जुनाप्ययकश्च। हरिसूनवे सुग्रीवाय युधिष्ठिराय च। दयिताया दयितानां च ॥ ३१ ॥

पदार्थदीपिकोद्बोधिका – अभीति ॥ पवननन्दनादिभिः हनुमदादिवानरैः ऋष्य-मूकेऽभिनन्दितः स श्रीरामः कदाचित् गवा बाणेन 'वज्रवाग्बाणवारिषु भूमौ पशौ च गोशब्दः' इति हलः। इन्द्रसुतवर्धको वालिच्छेदकः सन्नात्मदयिताय स्वप्रियाय हरिसूनवे सूर्यपुत्राय 'अर्कमर्कटमण्डूकविष्णुवासववायवः। तुरङ्गसिंहशीतांशुयमाश्च हरयो दश' इति हलः, सुग्रीवाय। हतो विपक्षः शत्रुर्यस्मिंस्तदुत्तमं निजं सुग्रीवस्य विद्यमानं राज्यं दत्तवान्। अर्थान्तरन्तु — पवननन्दनादिभिः भीमार्जुनादिभिरभिनन्दितः अज्ञातवासमतीत्य उपप्लाव्ये

दृष्ट्वा सन्तोषितः स श्रीकृष्णः कदाचित् गवा गीतावाचा, इन्द्रसुतवर्धकोऽर्जुनस्याप्यायकः सन् पापबुद्ध्या युद्धान्निवृत्तमपि गीतात्मिकया वाचा विबोध्य युद्धोन्मुखं कुर्वन् सन्निति भावः। आत्मदयिताय हरिसूनवे यमपुत्राय युधिष्ठिराय । हता विपक्षा धार्तराष्ट्रादिशत्रवो यस्मिन् तदुत्तमं निजं राज्यं दत्तवान् ॥ ३१ ॥

मन्दोपकारिणी – अभीति ॥ पवननन्दनादिभिः पवनस्य वायोः नन्दनः सुतः हनुमान् आदिः पूर्वो येषां ते तथोक्ताः कपयः तैः हनुमदादिवानरैः अभिवन्दितः ऋष्यमूकपर्वते नमस्कृतः सः रामः कदाचित् कालविशेषे गवा बाणेन। 'अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मता' इति विश्वः। इन्द्रसुतवर्धकः वालिच्छेदकः सन्। 'वर्धनं छेदनेऽथ द्वे' इत्यमरः। आत्मदयिताय स्वस्य दयिताय सख्ये। हरिसूनवे हरेः सूर्यस्य 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः सूनवे सुग्रीवाय। हतविपक्षं हतः विपक्षः शत्रुः वाली यस्मिन् तत्। उत्तमं समृद्धं निजराज्यं निजानां स्वकीयानां कपीनां राज्यं राजत्वं दत्तवान्। सीताहरणानन्तरं रामः ऋष्यमूकपर्वते हनुमदादीन् दृष्ट्वा सुग्रीवसख्यं संपाद्य सुग्रीवशत्रुं वालिनं हत्वा सुग्रीवाय कपिराज्यं प्रददौ इति भावः। कृष्णपक्षे तु पवननन्दनादिभिः भीमसेन एव आदिः येषां धर्मादीनां ते तथोक्ताः तैः पाण्डवैः अभिवन्दितः सः कृष्णः कदाचित् युद्धकाले गवा भगवद्गीतारूपया वाचा। इन्द्रसुतवर्धकः अर्जुनस्य वर्धकः प्रबोधं कुर्वन् सन्। 'वर्ध छेदनपूरणयोः' इति धातोः। आत्मदयिताय आत्मनः प्रियाय। हरिसूनवे यमपुत्राय युधिष्ठिराय। हतविपक्षं हतः दुर्योधनादिः विपक्षः यस्मिन् तत्। निजराज्यं दत्तवान् दुर्योधनेन पाण्डवराज्यापहरणानन्तरं उपप्लाव्यनगरं प्राप्तैः पाण्डवैः स्वयं तत्र गत्वा वन्दितः सन् पापबुद्ध्या युद्धात् निवर्तितं अर्जुनं गीतारूपवाचा प्रबोध्य युद्धोन्मुखं कृत्वा तद्धस्तेन दुर्योधनादीन् निहत्य धर्मराजाय राज्यं ददौ इति भावः ॥ ३१ ॥

मुदमाप्य तत्र दयितोरुवार्तया मधुहा मरुत्सुतमुखप्रवृत्तया ।
हरितिग्मचक्रलसितोऽब्धिमध्यगं प्रययौ स पुण्यजनसेवितं पुरम् ॥ ३२ ॥

भावप्रकाशिका – उरुवार्तया मरुत्सुतमुखेन प्रवृत्तया मरुत्सुतादिप्रवृत्तया च। हरितिग्मचक्रं वानरतीक्ष्णसैन्यं रविवत्तीक्ष्णचक्रं सुदर्शनं च। राक्षसाः पुण्यजनाश्च ॥ ३२ ॥

पदार्थदीपिकोद्बोधिका – मुदमिति ॥ तत्र, ऋष्यमूकपर्वते स्थित एव मधुहा स श्रीरामः। मरुत्सुतस्य हनुमतो मुखेन प्रवृत्तया उक्तयेत्यर्थः। दयितायाः सीताया उरुवार्तया मुदमाप्य हरीणां कपीनां तिग्मचक्रेण तीक्ष्णसैन्येन लसितः शोभितस्सन्। 'चक्रं सैन्ये जलावर्ते रथाङ्गे चयराष्ट्रयोः। संसारे मण्डले वृत्ते छद्मवेदास्त्रभेदयोरि'ति यादवः। अब्धिमध्यं समुद्रमध्यं गच्छतीति तादृशं पुण्यजनसेवितं राक्षससेवितं 'रक्षःसन्तौ पुण्यजनावि'त्युक्तेः पुरं लङ्कां प्रययौ। अर्थान्तरं तु मधुहा श्रीकृष्णः तत्र उपप्लाव्ये मरुत्सुतमुखप्रवृत्तया भीममुखप्रोक्तया युधिष्ठिरभीमार्जुनादिभिः अज्ञातवासे प्रवृत्तयेति भावः। दयितोरुवार्तया प्रियपाण्डवानां कीचकनिग्रहाद्युदन्तेन 'वार्ताप्रवृत्तिवृत्तान्त उदन्तः स्यादथाह्वयः' इत्यमरः मुदं सन्तोषं प्राप्य हरितिग्मचक्रलसितः, सूर्यवत्तीक्ष्णसुदर्शनेन लसितोऽब्धिमध्यगं पुण्यजनसेवितं पवित्रजनसेवितं पुरं द्वारकं प्रययौ। पार्थान् उपप्लाव्ये संस्थाप्य स्वयं द्वारकां प्रययौ इति भावः ॥ ३२ ॥

मन्दोपकारिणी – मुदमिति ॥ मधुहा तन्नामकदैत्यं हन्तीति। 'चैत्रवसन्त-मधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः' इति रत्नमाला। सः रामः तत्र ऋष्यमूकपर्वते स्थित एव। मरुत्सुतमुखप्रवृत्तया मरुतः वायोः सुतस्य हनुमतः मुखेन वदनेन प्रवृत्तया उक्तया। दयितोरुवार्तया दयितायाः प्रियायाः सीतायाः उरुवार्तया उर्वी च सा वार्ता वृत्तान्तश्च तया। मुदं सन्तोषं आप्य लब्ध्वा। हरितिग्मचक्रलसितः हरीणां वानराणां तिग्मं तीक्ष्णं चक्रं सैन्यं तेन लसितः शोभमानः परिवृतः इति यावत्। 'चक्रं सैन्यरथाङ्गयोः' इति विश्वः। अब्धिमध्यगं अब्धेः समुद्रस्य मध्ये गच्छतीति अब्धिमध्यगं पुण्यजनसेवितं पुण्यजनैः राक्षसैः सेवितं आश्रितं 'यातुधानः पुण्यजनो नैरुतो यातुरक्षसी' इत्यमरः पुरं लङ्कानामकं नगरं प्रययौ। सुग्रीवराज्यदानानन्तरं सीतान्वेषणं कृत्वा आगतहनुमदुक्तं सीतायाः लङ्कापुरिस्थि-तस्वरूपवृत्तान्तं श्रुत्वा कपिसैन्ययुतः रामः लङ्कां जगाम इति भावः। कृष्णपक्षे तु, तत्र उपप्लाव्यनगरे स्थितः। मरुत्सुतमुखप्रवृत्तया मरुत्सुतः भीमसेनः स एव मुखं आदिः येषां ते मरुत्सुतमुखाः अर्जुनादयः तैः प्रवृत्तया अज्ञातवासे कृतया। दयितोरुवार्तया दयितानां स्वप्रियाणां पाण्डवानां उर्व्या अद्भुतया वार्तया कीचकनिग्रहादिरूपवृत्तान्तेन। 'वार्ताप्रवृत्तिर्वृत्तान्तः' इत्यमरः मुदं सन्तोषं आप्य। मधुहा सः कृष्णः। हरितिग्मचक्रलसितः

हरिवत् सूर्यवत् तिग्मेन तीक्ष्णेन चक्रेण सुदर्शनायुधेन लसितः विराजमानः सन्। अब्धिमध्यगं समुद्रमध्यस्थितं पुण्यजनसेवितं पुण्याः पवित्राश्च ते जनाश्च ऋष्यादयः तैः सेवितं पुरं द्वारावतीपत्तनं प्रययौ ॥ ३२ ॥

पृथुकुम्भकर्णगजराजमुद्धतं ससहोदरं सविबुधेन्द्रशात्रवम्।
धरणीभरं पृथुलचक्रमक्षिणोन्निशितेषुचक्रकृतविक्रमः प्रभुः ॥ ३३ ॥

भावप्रकाशिका – कुंभकर्णाख्यगजराजमक्षिणोत्। ससहोदरं सरावणं सेन्द्रजितं पृथुसैन्यं भुवो भारायितं धरणीभरं पुथुसैन्यं च कृष्णः पुथुमस्तककर्णगजराज ससहः सौजस्कम्। अदरं निर्भयं सदैत्यम्। इषूणां चक्रेण इषुभिश्चक्रेण च ॥ ३३ ॥

पदार्थदीपिकोद्बोधिका – पृथ्विति ॥ निशिता इषवः शरास्तेषां चक्रेण समूहेन कृतो विक्रमः पराक्रमो येन तादृशः प्रभुः स श्रीरामः। उद्धतं बलादिमदोद्धतम्। सहोदरेण ज्येष्ठेन रावणेन सहितं ससहोदरम्। विबुधेन्द्रस्य पुरन्दरस्य शात्रवश्शत्रुरिन्द्रजित् तेन सहितं सविबुधेन्द्रशात्रवम्। धरणीभरं भूभारायितम्। पृथुलं बहु चक्रं सैन्यं यस्य तम्। पृथुः स्थूलो यः कुम्भकर्णः स एव गजराजो गजश्रेष्ठः तं अक्षिणोत् जघान। अर्थान्तरन्तु निशितेषवो निशितशराः ते च, चक्रं सुदर्शनं तच्च, निशितेषुचक्राणि तैः कृतो विक्रमो येन तादृशः। अर्जुनादिषु स्थितेन रूपेण इषुभिः कृतविक्रमः, स्वयं तु भीष्मं प्रति चक्रेण कृतविक्रम इति भावः। प्रभुः स श्रीकृष्णः। कुम्भाः कुम्भस्थलानि कर्णाश्च, पृथवोऽतिस्थूलाः कुम्भकर्णा येषां तादृशा गजराजा यस्मिंस्तत् उद्धतम्। सहसा सहितं ससहः। न विद्यते दरो भयं यस्य तत् अदरं, अभ्यापततः शत्रून् दृष्ट्वापि भयरहितमित्यर्थः। 'दरस्त्रासश्च साध्वसं' इति हलः। भुवि नृपादिरूपेण जातैर्विबुधेन्द्राणां शात्रवैः शत्रुभिर्दैत्यैः सहितं सविबुधेन्द्रशात्रवम्। अत एव धरणीभरं भूभारभूतं पृथुलचक्रं महत्कौरवसैन्यमक्षिणोत् जघान ॥ ३३ ॥

मन्दोपकारिणी – पृथ्विति ॥ प्रभुः समर्थो रामः। निशितेषुचक्रकृतविक्रमः सन् निशिताः तेजिताश्च ते इषवः शराश्च 'रुक्णं भुग्नेऽथ निशितक्ष्णुतशातानितेजिते' इत्यमरः निशितेषूणां चक्रेण गणेन 'चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः' इति विश्वः। कृतः

व्यक्तीकृतः विक्रमः पराक्रमः येन स तथोक्तः। 'शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता' इत्यमरः। धरिणीभरं धरिण्याः धरित्र्याः भरं भारायमाणं 'भरोऽतिशयभारयोः' इति विश्वः पृथुलचक्रं बहुलराक्षससैन्यं 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियां' इत्यमरः अक्षिणोत् संहृतवान्। कथंभूतं, पृथुकुम्भकर्णगजराजं पृथुः स्थूलकायः स चासौ कुम्भकर्णश्च स एव गजराजः कुञ्जरश्रेष्ठः यस्मिन् तत्। उद्धतं दृप्तं ससहोदरं सहोदरेण कुम्भकर्णभ्रात्रा रावणेन सहितम्। सविबुधेन्द्रशात्रवं विबुधानां इन्द्रः तस्य शात्रवः इन्द्रजित् तेन सहितम्। कृष्णपक्षे तु प्रभुः कृष्णः। निशितेषुचक्रकृतविक्रमः निशितेषुभिः चक्रेण सुदर्शनेन च कृतविक्रमस्सन् धरणीभरं भूभारं पृथुलचक्रं बहुसैन्यं। अक्षिणोत् संहृतवान्। कथंभूतं चक्रं। पृथुकुम्भकर्णगजराजं कुम्भवत् घटवत् कर्णौ येषां ते कुम्भकर्णाः ते च ते गजराजाश्च पृथवः कुंभकर्णगजराजाः यस्मिन् तत्। कुंभः कुंभस्थलं कर्णः श्रोत्रं च पृथू कुम्भकर्णौ येषां ते पृथुकुंभकर्णाः तादृशाः गजराजाः यस्मिन् तदिति वा। 'कुंभौ घटेभ मूर्धांशौ' इत्यमरः। उद्धतं ससहोदरं सहोदरैः स्वभ्रातृभिः सहितम्। सविबुधेन्द्रशात्रवं दैत्यैः सहितम् । क्षिणु हिंसायामित्यतो लङ् परस्मैपदं अक्षिणोत् अक्षिणुताम् अक्षिण्वन्' ॥ ३३ ॥

अथ भार्यया हुतवहं प्रविष्टया सहितः सहोदरपुरःसरैरपि।
अयमाप्य धाम चिरमिष्टदः सतां निजमूलरूपपरमैक्यमेयिवान् ॥ ३४ ॥

भावप्रकाशिका – हुतवहं प्रविष्टया शपथरूपेण स्वर्गारोहणकाले रुक्मिण्या च। धाम अयोध्यां वैकुण्ठं च ॥ ३४ ॥

पदार्थदीपिकोद्बोधिका – अथेति ॥ कुम्भकर्णादिवधानन्तरं हुतवहं वह्निं प्रविष्टया शपथार्थं प्रविष्टया भार्यया सीतया। सहोदरो लक्ष्मणः पुरःसरो मुख्यो येषां सुग्रीवादीनां तैः अपि सहितः धाम अयोध्यामाप्य चिरं सतामिष्टदोऽभीष्टदोऽयं श्रीरामः निजेन मूलरूपेण परमैक्यमुत्तमैक्यमेयिवान् प्राप। अर्थान्तरं तु अथ पृथुलसैन्यक्षपणानन्तरं चिरं सतामिष्टदोऽयं श्रीकृष्णः स्वर्गारोहणकाले हुतवहं अग्निं प्रविष्टया भार्यया रुक्मिण्या सहोदरपुरस्सरैरपि बलभद्रपूर्वकैरपि सहितः सन्। धाम वैकुण्ठमाप्य निजमूलरूपपरमैक्यमेयिवान् ॥ ३४ ॥

मन्दोपकारिणी – अथेति ॥ अथ राक्षससंहारानन्तरं हुतवहं प्रविष्टया अग्निं प्रविष्टया शपथार्थं अग्निं प्रविश्य पातिव्रत्यं प्रकटितवत्या इति यावत् भार्यया पत्न्या सीतया। सहोदरपुरस्सरैरपि सहोदरः सहजः लक्ष्मणः स एव पुरस्सरो येषां तैः हनुमदादिभिः सहितः अयं रामः धाम गृहं अयोध्यानगरं आप्य प्राप्य। चिरं बहुकालं सतां इष्टदः सुखदः सन् धर्मेण बहुकालं राज्यं प्रपालयित्वा सर्वेषां सुखं दत्वा इति यावत्। निजमूलरूपपरमैक्यं निजेन मूलरूपेण परमं अत्यन्तं ऐक्यं संश्लेषं एयिवान् प्राप्तवान्। रामः राक्षससंहारं कृत्वा बहुकालं धर्मेण भूमिं परिपाल्य सतां अभीष्टं दत्वा परं धाम जगाम इति भावः। कृष्णपक्षे तु सतां चिरं इष्टदः अयं कृष्णः। अथ भूभारहणानन्तरं हुतवहं प्रविष्टया अज्ञदृष्ट्या अग्नौ देहं त्यक्त्वा इति यावत् भार्यया रुक्मिण्या सहितः। सहोदरपुरस्सरैरपि सहोदरः बलरामः स एव पुरःसरः आदिः येषां ते तथोक्ताः यादवाः तैश्च सहितस्सन् धाम मन्दिरं वैकुण्ठं आप्य निजमूलरूपपरमैक्यं एयिवान् प्राप्तवान् ॥ ३४ ॥

महिदासपूज्यचरणो द्विजादभूद्विदितात्स विष्णुयशसोऽमलात्मनः।
इह यो दधे जगति पापशान्तये बहुधामहेतिमतिदीप्तगोस्थितिम् ॥ ३५ ॥

भावप्रकाशिका – विदितात् विष्णुयशोनिमित्तादमलात्मनो द्विजान्महिदासनामा पूज्यचरणोऽभूत्। महिभिर्दासैः पूज्यचरणः कल्की विष्णुयशसोऽभूत्। बहुधा प्रकारेण महोपद्रववति जगति स्फुटवाक्यस्थितिं वैष्णवतन्त्रशास्त्रविरचनया बहुधामहेतिं बहुतेजस्कमायुधम्। अतिदीप्तवज्रवत्स्थितिम् ॥ ३५ ॥

पदार्थदीपिकोद्बोधिका – महिदासेति ॥ स भगवान्। विष्णोर्यशसः निमित्तपञ्चमीयम्। विष्णुयशसः श्रवणकीर्तनादिनिमित्तादित्यर्थः। अमलो निर्मल आत्मा मनो यस्य तस्माद्विदितात् प्रसिद्धाद्विजादितरादेव्यां महिदासनामा च असौ पूज्यचरणः पूज्यपादश्च महिदासभगवत्पादाचार्यस्सन्नित्यर्थः। अभूत् अवततार। यो महिदासाभिधः, महती ईतिरुपद्रवोऽस्यास्तीति तस्मिन् महेतिमति इह जगति पापशान्तये पापक्षयाय बहुधा बहुप्रकारेण दीप्ता अतिस्पष्टा या गावो वैष्णवतन्त्रशास्त्ररूपा वाचस्तासां स्थितिमवस्थितिं दधे विदधे। 'महिदासाभिधो जज्ञे इतरायाः तपोबलात्। साक्षात् स भगवान् विष्णुः यस्तन्त्रं वैष्णवं

व्यधात्' इति ब्रह्माण्डे। अर्थान्तरन्तु स भगवान् विदितात् अमलात्मनो विष्णुयश-सस्तन्नामकाद्विजात् अभूत्। कल्किनामाऽवततार। मह उत्सवो येषामस्तीति महिनः ते च ते दासाश्च ब्रह्मादयस्तैः पूज्यौ चरणौ यस्य तादृशो यः कल्की इह जगति पापानां दस्यूनां शान्तये क्षयायातिदीप्तो यो गौः वज्रं तस्य स्थितिर्यस्यां ताम्। बहु धाम तेजो यस्याः सा बहुधामा। 'अनो बहुव्रीहेः' इति ङीबभावः। सा च सा हेतिरायुधं तां दधे निदधे प्रयुयोजेति भावः॥ ३५॥

मन्दोपकारिणी – महिदासेति॥ सः भगवान् नारायणः। विष्णुयशसः विष्णोः यशसः कीर्तेः भगवत्कथायाः श्रवणादिना इति शेषः। अमलात्मनः निर्मलमनसः। 'आत्मा देहो मनो ब्रह्मा' इति विश्वः। विदितात् प्रसिद्धात् द्विजात् इतरानामकदेव्यां महिदासपूज्यचरणः महिदासनामा पूज्यपादः आचार्यः अभूत् प्रादुरासीत्। यः महिदासा-भिधः हरिः। महेतिमति महत्यः बह्व्यः ईतयः उपद्रवाः अस्मिन् सन्तीति महेतिमत् तस्मिन् इह जगति। पापशान्तये अघनाशाय। बहुधा बहुप्रकारेण। दीप्तगोस्थितिं दीप्तानां अतिस्पष्टानां गवां वैष्णवशास्त्ररूपाणां वाचां स्थितिं निर्माणरूपप्रतिष्ठां दधे विदधे। विष्णुः इतरादेव्यां महिदासनामा सन् अवतारं कृत्वा वैष्णवशास्त्रं चकार इति भावः। अनेन महिदासावतारः विष्णुप्रतिपादकशास्त्रनिर्माणं अवतारप्रयोजनं च उक्तं भवति। तदुक्तं 'महिदासाभिधो जज्ञे इतरायाः तपोबलात्। साक्षात् स भगवान् विष्णुः यस्तन्त्रं वैष्णवं व्यधात्' इति। द्वितीययोजना तु अत्र बहुधामहेतिं अतिदीप्तगोस्थितिमिति पदच्छेदः। सः भगवान् विदितात् प्रसिद्धात् अमलात्मनः शुद्धचित्तात् विष्णुयशसः तन्नामकद्विजात् अभूत्। कल्किनामावततार। कथंभूतः महिदासपूज्यचरणः मह उत्सवो येषां अस्तीति महिनः उत्सववन्तः। 'मह उद्धव उत्सवः' इत्यमरः ते च ते दासाः भृत्याश्च तैः देवैः पूज्यौ चरणौ अङ्घ्री यस्य सः दासभूतब्रह्मादिदेवैः उत्सवेन पूजितपाद इत्यर्थः यः कल्किनामा हरिः इह जगति। पापशान्तये पापिष्ठानां दस्यूनां नाशाय। अतिदीप्तगोस्थितिं अत्यन्तं प्रकाशमाना च सा गौश्च वज्रं तद्वत् स्थितिः यस्याः सा ताम्। बहुधामहेतिं बहु बहुलं धाम तेजः यस्याः बहुधाम्नी सा च सा हेतिः शस्त्रं च ताम्। 'रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः' इत्यमरः। वज्रसदृशकान्तियुक्तं खड्गं दधे दधार प्रयुयोज इति भावः। 'डु धाञ्

धारणपोषणयोः इत्यस्मात् लिडात्मनेपदं दधे दधाते दधिरे'। अनेन कल्क्यवतारः दस्युवधप्रयोजनं च उक्तं भवति ॥ ३५ ॥

सुतपोरुचेरयमपापकर्दमान्ननु मानवीतनयतामुपेयिवान्।
समयेन भूरिनिजभक्तिपूरितान् समजीजनत् सुमनसः स देवराट् ॥ ३६ ॥

भावप्रकाशिका – सुतपसो रुचिप्रजापतेः पापपङ्करहितात् अपापात् कर्दमप्रजापतेः सुतपोवाञ्छात्। मानवी आकूतिः देवहूतिश्च। देवराट् इन्द्रः कालेन देवानजीजनत्। स देवश्रेष्ठः सुमनसः सज्जनान् सुभक्तिपूर्णान् अकरोत् साङ्ख्यसमयेन कृतेन ॥ ३६ ॥

पदार्थदीपिकोद्बोधिका – 'सुतपो' इति ॥ अयं भगवान्। न विद्यते पापकर्दमः पापाख्यः पङ्को यस्य तस्मात्। शोभनं तपो यस्य स चासौ रुची रुचिप्रजापतिस्तस्मात्। मनोः स्वायम्भुवमनोस्सुता मानवी आकूत्याख्या तस्यास्तनयः पुत्रस्तस्य भावस्तत्ता तामुपेयिवान् ननु अवाप खलु। स मानवीतनयो यज्ञनामा समयेन कालान्तरेण देवराडिन्द्रः सन्। भूरिः भूयसी या निजभक्तिस्स्वविषयिणी भक्तिः तया पूरिताः पूर्णास्तान्सुमनसो देवान् समजीजनत् दक्षिणाख्यरमायामुत्पादयामास। अर्थान्तरं तु अयं भगवान्। सुतपसि शोभनतपसि रुचिरिच्छा यस्य तस्मात्। 'कामनेच्छा रुचिस्तथा' इति हलः। न विद्यते पापकर्दमो यस्य तस्मात्। अपापश्चासौ कर्दमश्च तस्मादिति वा। कर्दम प्रजापतेः। मनोः सुता मानवी देवहूतिः, तस्यास्तनयस्तस्य भावस्तत्ता तामुपेयिवान्ननु अवाप। देवराड् सर्वदेवोत्तमः स कपिलवासुदेवनामा सन् सुमनसः सुचित्तान् देवमुनिपूर्वकान् सज्जनान् समयेन स्वकृतसाङ्ख्ययोगशास्त्रेण भूरिनिजभक्तिपूरितान् समजीजनत्। तेषामात्मनि निज-भक्तिमुत्पादयामासेति भावः ॥ ३६ ॥

मन्दोपकारिणी – 'सुतपो' इति ॥ अयं नारायणः। अपापकर्दमात् पापमेव कर्दमः पङ्कः 'पङ्कोस्त्रीशादकर्दमौ' इत्यमरः, न विद्यते पापकर्दमो यस्य सः तस्मात्। सुतपोरुचेः शोभनं तपो यस्य सः सुतपः स चासौ रुचिश्च सुतपोयुक्तरुचिप्रजापतेः। मानवीतनयतां मनोः अपत्यं स्त्री मानवी स्वायम्भुवमनुसुता आकूतिः तस्याः तनयतां पुत्रतां उपेयिवान् ननु आप खलु। रुचिप्रजापतेः सकाशात् स्वायम्भुवपुत्र्यां आकूत्यां यज्ञनामा अवततार सः

यज्ञनामा समयेन कालान्तरेण देवराट् देवराजः 'राज्ञिराट्पार्थिवक्ष्माभृत्' इत्यमरः देवेन्द्रपदे स्थितस्सन्। भूरिनिजभक्तिपूरितान् भूरिः बह्वी 'भूरि स्वर्णे बहौ त्रिषु' इति भास्करः निजा नित्या स्वाभाविकी 'निजमात्मीयविश्वयोः इति विश्वः भक्तिः तया पूरितान् पूर्णान् सुमनसः देवान् 'मालायां पण्डिते पुष्पे देवे सुमनसोऽभिधा' इति विश्वप्रकाशे। समजीजनत् दक्षिणाख्यायां रमायां उत्पादयामास। अनेन यज्ञनामावतारः इन्द्रपदस्थितेन तेन दक्षिणायां देवसृष्टिः प्रयोजनं च उक्तं भवति। द्वितीययोजना तु अयं भगवान्। सुतपोरुचेः शोभनतपसि रुचिः रतिः वाञ्छा यस्य सः तस्मात्। अपापकर्दमात् न विद्यन्ते पापानि यस्य सः अपापः स चासौ कर्दमप्रजेश्वरश्च तस्मात्। मानवीतनयतां मानव्याः स्वायम्भुवमनुपुत्र्याः देवहूतेः तनयतां उपेयिवान् ननु। कर्दमप्रजापतेः सकाशात् स्वायम्भुवमनुपुत्र्यां देवहूत्यां कपिलनामाऽवततार। देवराट् देवस्वामी सः कपिलनामा हरिः सुमनसः शोभनमनस्कान् शुद्धान्तःकरणान् देवमुनिपूर्वकान् सज्जनान्। समयेन स्वकृतसाङ्ख्ययोगशास्त्रसिद्धान्तेन तदुपदेशेन इति यावत्। 'समयाः शपथाचार-कालसिद्धान्तसंविदः' इत्यमरः। भूरिनिजभक्तिपूरितान् भूरिणा बह्व्या निजे स्वस्मिन् भक्त्या पूरितान्। समजीजनत् स्वस्मिन् भक्तिं उत्पादयामास इति भावः। अनेन कपिलावतारः साङ्ख्ययोगशास्त्रनिर्माणं च देवादीनां च स्वस्मिन् बहुभक्तिजननं अवतारप्रयोजनं उक्तं भवति। 'जनी प्रादुर्भावे णिजन्तात् लुङ् परस्मैपदम्' ॥ ३६ ॥

सुबृहत्पयोधरमिथःप्रसंहतिप्रकटीभवत्परमयौवनाकृतिः।
असुराहितां वरविलासिनीतनुः प्रददावमुष्य सुरराशये सुधाम् ॥ ३७ ॥

भावप्रकाशिका – वरस्मितादिविलासवती धन्वन्तरितनुः पयसां धरस्य च परस्पर-घट्टनात् प्रकटीभवन्ती नवयौवनाकृतिः विलासिनीतनुः वरस्त्रीमूर्तिः स्तनपरस्परसंहत्या स्पष्टयौवनवती आकृतिरस्याः। असुराणामहितामसुरेष्वाहिताम् ॥ ३७ ॥

पदार्थदीपिकोद्बोधिका – सुबृहदिति ॥ अमुष्य भगवतः। पयः सागरजलम्। धरो मन्दरगिरिः। सुबृहन्तौ अतिमहान्तौ यौ पयोधरौ तयोर्मिथः परस्परं प्रसंहतिः सङ्घटनं तया प्रकटीभवन्ती आविर्भवन्ती परमं यौवनं यस्याः तादृशी या आकृतिः स्वरूपं

सुबृहत्पयोधरमिथःप्रसंहतिप्रकटीभवन्ती परमयौवनाकृतिर्यस्यास्तादृशी। वर उत्तमो विलासः स्मितादिरस्यास्तीति तादृशी तनुः धन्वन्तरिरूपम्। असुराहितामसुराणामयोग्यां सुधां सुरराशये सुरसमूहाय प्रददौ। अर्थान्तरन्तु सुबृहन्तौ यौ पयोधरौ कुचौ तयोर्मिथः प्रसंहतिः परस्परं घट्टनं तया प्रकटीभवन्ती परमयौवनाकृतिर्यस्यास्तादृशी। अमुष्य भगवतो वरविलासिनी तनुरुत्तमस्त्रीतनुः। असुराहितामसुरेष्वाहितां धन्वन्तरिरूपेणात्मनासुरवशे निहितां सुधां तेभ्योऽपहृत्य सुरराशये प्रददौ। अपाययदिति भावः॥ ३७॥

मन्दोपकारिणी – सुबृहदिति॥ अमुष्य नारायणस्य। तनुः मूर्तिः। 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। धन्वन्तरिरूपमित्यर्थः। सुरराशये सुराणां देवानां राशये समूहाय। असुराहितां असुराणां दैत्यानां अहितां अयोग्यां सुधां अमृतं प्रददौ दत्तवान्। कथंभूता तनुः। सुबृहत्पयोधरमिथःप्रसंहतिप्रकटीभवत्परमयौवनाकृतिः पयः समुद्रजलं 'पयः पानीयदुग्धयोः' भास्करः। धरः मन्दरपर्वतः पयश्च धरश्च पयोधरौ। 'अहार्यधरपर्वताः' इत्यमरः। सुबृहन्तौ अतिपृथू च तौ पयोधरौ च तयोः मिथः अन्योन्यं प्रसंहतिः सङ्घट्टनम्। परमं अत्यन्तं यौवनं तारुण्यं यस्याः सा परमयौवना। 'तारुण्यं यौवनं समे' इत्यमरः। परमयौवनोपेता च सा आकृतिश्च सुबृहत्पयोधरमिथः प्रसंहत्या प्रकटीभवन्ती आविर्भवन्ती परमयौवनोपेताकृतिः यस्याः तथोक्ता। वरविलासिनी वरः उत्तमः विलासः मन्दहासादि-क्रियाविशेषः यस्याः सा। अमृतार्थं मन्दरपर्वतेन समुद्रमथने कृते सति तारुण्यविशिष्ट एव प्रादुर्भूतो धन्वन्तरिनामा हरिः अमृतकलशं देवहस्ते ददौ इति भावः। अनेन धन्वन्तर्यवतारः देवहस्ते अमृतदानं च प्रयोजनं उक्तं भवति। द्वितीययोजना अमुष्य श्रीनारायणस्य। वरविलासिनीतनुः उत्तमस्त्रीरूपा तनुः अवतारः। असुराहितां असुरेषु दैत्येषु आहितां निहितां धन्वन्तरीरूपेण स्वेनैव असुरवशे स्थापितां सुधां सुरराशये। प्रददौ पानार्थं दत्तवान् इति भावः। कथंभूता तनुः। सुबृहत्पयोधरमिथःप्रसंहतिप्रकटी-भवत्परमयौवनाकृतिः सुबृहतोः अतिस्थूलयोः पयोधरयोः स्तनयोः। 'वक्षोजौ च पयोधरौ' इत्यमरः। मिथः संहत्या सम्बन्धेन प्रकटीभवन्ती स्पष्टं प्रतीयमाना परमयौवनवती आकृतिः यस्याः सा धन्वन्तरीरूपेण आनीतां देवेभ्यः दत्तां स्वानुमत्यैव दैत्यैः अपहृतां सुधां स्वयं स्त्रीरूपस्सन् असुरान् वञ्चयित्वा देवान् पाययामास इति भावः। अनेन भगवतः स्त्रीरूपावतारः देवानां अमृतपानकरणं प्रयोजनं च उक्तं भवति॥ ३७॥

सुजनाय दत्तपद आत्मशुद्धिदः सुकुमाररूप्यभवदेष शाश्वतः ।
अनसूयया शुचिमनीषया धृतः परमादरेण मुनिपुङ्गवोढया ॥ ३८ ॥

भावप्रकाशिका – दत्तनामा सुजनायात्मशुद्धिदः सुकुमाररूपी भद्रः सुजनाय दत्तं पदं पुनर्येन कुमाररूपी अत्रिणा ऊढया अनसूयया धृतो मृनिश्रेष्ठैर्धृतया असूयारहितया शुद्धमनीषया ध्यातश्च ॥ ३८ ॥

पदार्थदीपिकोद्बोधिका – सुजनायेति ॥ सुजनाय सज्जनाय। आत्मशुद्धिदः चित्तशुद्धिदः एषः शाश्वतो नित्यो भगवान्मुनिपुङ्गवेन अत्रिणा ऊढयोदूढया शुचिः शुद्धा मनीषा ज्ञानं यस्यास्तया अनसूयया तन्नामिकदेव्या परमादरेण अत्यादरेण धृतो गर्भे धृतः। सुकुमारं कोमलं रूपं अस्यास्तीति तादृशः। दत्त इति पदं यस्य तादृशो दत्तात्रेय-नामाऽभवत्। अर्थान्तरं तु एष शाश्वतो भगवान्। न विद्यतेऽसूया यस्यास्तया। मुनिपुङ्गवैः मुनिश्रेष्ठैः ऊढया धृतया शुचिमनीषया शुद्धज्ञानेन परमादरेण परमभक्त्या धृतः। 'अस्माकं ज्ञानमुपदेष्टुमायाहि भगवन्नि'ति ध्यातः। सुजनाय शोभनजनाय दत्तपदः प्रदत्तस्थानः। आत्मशुद्धिदः कुमार इति रूपमस्यास्तीति कुमाररूपी शोभनश्चासौ कुमाररूपी च सनत्कुमाराभिधेय इत्यर्थः अभवत् ॥ ३८ ॥

मन्दोपकारिणी – सुजनायेति ॥ सुजनाय। आत्मशुद्धिदः मनोनैर्मल्यप्रदः तत्त्वोपदेशस्य कृतत्त्वादिति भावः। शाश्वतः सनातनः। 'शाश्वतस्तु ध्रुवो नित्यः सदातनसनातनाः' इत्यमरः। एषः नारायणः। मुनिपुङ्गवोढया मुनिपुङ्गवेन अत्रिणा ऊढया पाणिगृहीतया। शुचिमनीषया शुचिः शुद्धा मनीषा बुद्धिः यस्याः तया। 'शुचिः शुद्धेऽनुपहते' इति विश्वः। अनसूयया तन्नामिकया अत्रिपत्न्या। परमादरेण। धृतः गर्भे धृतः। सुकुमाररूपी सुकुमारं कोमलं च तद्रूपं शरीरं च तत् अस्यास्तीति। दत्तपदः सन् दत्त इति पदं नाम यस्य सः अभवत् अवततार। अनेन दत्तात्रेयावतारः सज्जनानां तत्त्वोपदेशश्च प्रयोजनं उक्तं भवति। द्वितीययोजना तु शाश्वत एषः भगवान्। अनसूयया न विद्यते असूया गुणेषु दोषारोपः यस्याः तया असूयाख्यदोषरहितया। मुनिपुङ्गवोढया मुनिश्रेष्ठैः ऊढया धृतया। शुचिमनीषया शुचिः शुद्धा च सा मनीषा च तया शुद्धज्ञानेन।

परमादरेण अत्यन्तभक्त्या। धृतः ध्यातस्सन् 'हे भगवान् अस्माकं ज्ञानं उपदेष्टुं आयाहि' इति मुनिभिः शुद्धान्तःकरणेन भक्त्या ध्यातः इति भावः। सुकुमाररूपी शोभनं कुमारनामकं रूपं अस्यास्तीति अभवत्। मुनीनां पुरस्तात् प्रादुरभूत्। किंभूतः सुजनाय शोभनजनाय। दत्तपदः दत्तमुक्तिस्थानः। 'पदं व्याजाङ्घ्रि तच्चिह्नस्थाने' इति भास्करः। आत्मशुद्धिदः अनेन कुमारावतारः मुनीनां ज्ञानोपदेशः प्रयोजनं च उक्तं भवति॥ ३८॥

दयितः सतामृषभ एष भूधरो वपुरुद्वहन् परमहंसलक्षणम्।
व्यहरद्वलक्षतमपक्षशोभनं परतत्त्वलिप्सुसनकादिवन्दितः ॥ ३९॥

भावप्रकाशिका – ऋषभो नाम राजा भूत्वा यतीन्द्रलक्षणं वपुरुद्वहन् एष सतां दयितः ऋषभः प्रियः स्वामी धरणीधरः श्रेष्ठश्चेतच्छदलक्षणवपुरुद्वहन्॥ ३९॥

पदार्थदीपिकोद्बोधिका – दयित इति॥ सतां दयितः प्रिय एष नारायणः। ऋषभनामा, भुवं धरति पोषयतीति भूधरो भूपो भूत्वा, वलक्षतमोऽतिशुभ्रो यः पक्षः सिद्धान्तस्तेन शोभनम्। परमहंसानां यतीनां लक्षणं चिह्नं यस्य तादृशं वपुः शरीरमुद्वहन् दधत्सन् परं उत्तमं यत्तत्त्वं परापरवस्तुयाथार्थ्यं तल्लब्धुमिच्छन्तीति परतत्त्वलिप्सवो ये सनकादयस्तैर्वन्दितः स्तुतः नतो वा। 'वदि अभिवादनस्तुत्योरि'ति धातोः। व्यहरत् विजहार। अर्थान्तरं तु सतां दयितः ऋषभः स्वामी भूधरो धरणीधर एष नारायणः। परतत्त्वलिप्सुसनकादिवन्दितः, परतत्त्वं प्रदेष्टुं प्रार्थित इत्यर्थः। वलक्षतमावतिधवलौ यौ पक्षौ पतत्रौ ताभ्यां शोभनं 'वलक्षो धवलोऽर्जुनः' इत्यमरः। परमहंसस्योत्तमहंसपक्षिणो लक्षणं चिह्नं यस्य तद्वपुरुद्वहन्। व्यहरत् तेषां मुनीनां परतत्त्वमुपदिशन्विजहार॥ ३९॥

मन्दोपकारिणी – दयित इति॥ सतां दयितः एष नारायणः। ऋषभः ऋषभनामा। भूधरः राजा सन्। परमहंसलक्षणं परमहंसानां योगिनां लक्षणं चिह्नं यस्य तत् वपुः आश्रमं उद्वहन् भजन् व्यहरत् विजहार। 'वि पूर्वात् हृञ् हरणे लङ् परस्मैपदम्'। किंभूतं वपुः, वलक्षतमपक्षशोभनं वलक्षतमः अत्यन्तधवलः निर्मलश्चासौ पक्षः सिद्धान्तश्च तेन शोभनं विराजमानम्। स्वयं नारायणः कीदृशः, परतत्त्वलिप्सुसनकादिवन्दितः परतत्त्वं उत्तमतत्त्वं

ब्रह्म लिप्सवः लब्धुं ज्ञातुमिच्छन्तः सनकः तन्नामकमुनिः स एव आदिः येषां ते परतत्त्वलिप्सवश्च ते सनकादयश्च तैः वन्दितः स्तुतः नतश्च। अयं ऋषभनामा राजा भूत्वा ततः परमहंसो भूत्वा सनकादिभ्यः तत्त्वं उपदिदेश इति भावः। अनेन ऋषभावतारः ज्ञानोपदेशः प्रयोजनं च उक्तं भवति। द्वितीययोजना तु। सतां सज्जनानां दयितः प्रियः ऋषभः स्वामी भूधरः धरणीधरः एषः नारायणः। परतत्त्वलिप्सुसनकादिवन्दितः परतत्त्वं उपदेष्टुं सनकादिभिः प्रार्थितस्सन् इत्यर्थः। वलक्षतमपक्षशोभनं वलक्षतमौ अतिधवलौ च तौ पक्षौ च। 'गरुत्पक्षच्छदाः पत्रं' इत्यमरः ताभ्यां शोभनं दीप्यमानं परमहंसलक्षणं परमः उत्तमश्चासौ हंसः पक्षी च 'हंसास्तु श्वेतगरुतः' इत्यमरः तस्य लक्षणं चिह्नं यस्य तत् वपुः रूपं च उद्वहन् दधन्। व्यहरत् विजहार। अयं नारायणः ज्ञानार्थं सनकादिप्रार्थितः सन् हंसपक्षिरूपो भूत्वा तेषां तत्त्वं उपदिशन् विजहार इति भावः। अनेन हंसावतारः सनकादीनां ज्ञानोपदेशनं प्रयोजनं च उक्तं भवति॥ ३९॥

उदपादि धर्मतनयो ह्ययं हरिर्नरदेवसोदर उदारविक्रमः।
अपि कृष्ण इत्यभिहितो मुदे सतां स्वयमेव यस्य सहजो व्यजायत॥४०॥

भावप्रकाशिका – अयं हरिनामा उदपादि हरिर्ह्ययं धर्मतनयो नारायणो नाम॥ ४०॥

पदार्थदीपिकोद्बोधिका – उदपादीति॥ उदारो महान्विक्रमः पराक्रमो यस्य तादृशः। 'उदारो महति ख्याते दक्षिणे दानशौण्डके' इति वैजयन्ती। अयं भगवान्। नरश्चासौ देवश्च तस्य सोदरो भ्राता। शेषावतारभूतस्य नरस्य भ्रातेत्यर्थः। सतां मुदे कृष्णेत्यभिहितोऽपि स्वयमेव स्वात्मनैव यस्य हरिनाम्नः सहजो भ्राता व्यजायत। कृष्णनामापि स्वयं यस्य हरेः सहोदरत्वेन धर्मतनयो व्यजायतेति भावः। स हरिः हरिनामा धर्मतनयो धर्मप्रजेश्वरतनयः सन्नुदपादि। अर्थान्तरन्तु नरदेवसोदरः, उदारविक्रमः स्वयमेव सतां मुदे कृष्ण इत्यभिहितोऽपि यस्य नारायणस्य सहजो व्यजायत। अयं पुरोवर्ती, आश्रमे विराजमानो नारायणनामा हरिरपि धर्मतनयो यमतनयः सन्नुदपादि। पद निष्पत्तौ लुङ्। न केवलं हरिकृष्णौ धर्मतनयौ किन्त्वयं नारायणोऽपि धर्मतनयः। अयं भावः।

नरनारायणहरिकृष्णाश्चत्वारो धर्मतनयाः। तत्र नरः शेषः। अन्ये त्रयो भगवदवतारा इति ॥ ४० ॥

पदार्थदीपिकोद्बोधिका – उदपादीति ॥ उदारविक्रमः उदारः महान् विक्रमः कान्तिः शक्तिश्च यस्य सः। 'विक्रमः कान्तिमात्रे स्यात् विक्रमः शक्तिसंपदोः' इति विश्वः। नरदेवसोदरः नरः शेषावतारश्चासौ देवश्च तस्य सोदरः भ्राता शेषावतारभूतनरस्य भ्राता इत्यर्थः। अयं नारायणः हरिः हरिनामा सन् धर्मतनयः यमपुत्रः। 'धर्मः पुण्ययमन्यायस्वभावाचारसोमपाः' इत्यमरः। उदपादि अजायत। 'उत् पूर्वकात् पद गतौ इत्यतो लुङ् आत्मनेपदं अपादि अपत्साताम् अपत्सत'। अयं नारायणः स्वयमेव सतां मुदे सन्तोषाय कृष्णः इत्यभिहितोऽपि सन् कृष्णनामा सन् यस्य हरिनाम्नः सहजः भ्राता व्यजायत। अनेन हरिकृष्णावतारौ उक्तौ भवतः। द्वितीययोजना तु उदारविक्रमः अयं पुरोवर्ती हरिरपि। नरदेवसोदरः नरः शेषावतारश्चासौ देवश्च नरदेवः तस्य सोदरः भ्राता सन् नारायणनामा धर्मतनयः यमस्य तनयः उदपादि । स्वयमेव कृष्ण इति अभिहितोऽपि सन् यस्य नारायणस्य सहजः भ्राता व्यजायत। अनेन नरनारायणावतारौ उक्तौ भवतः। ततश्च नरनारायणहरिकृष्णनामानः चत्वारोऽपि यमधर्मस्य पुत्राः भगवदवताराः । तत्र नरः शेषावतारः भगवतः आवेशावतारः। अन्ये त्रयः भगवतः साक्षात् अवतारा इति ज्ञेयम् ॥ ४० ॥

परमात्मने सततमेकरूपिणे दशरूपिणे शतसहस्ररूपिणे।
अविकारिणे स्फुटमनन्तरूपिणे सुखचित्समस्ततनवे नमो नमः ॥४१॥

पदार्थदीपिकोद्बोधिका – परमात्मन इति ॥ परमश्चासावात्मा च तस्मै मुख्यत आत्मशब्दवाच्याय। सततं सर्वदा । एकं प्रधानं यद्रूपं तदस्यास्तीति तस्मै। एकं स्वगतगुणक्रियादिभिर्भेदवर्जितं रूपमस्यास्तीति तस्मा इति वा। दश च तानि रूपाणि मत्स्यादीन्यस्य सन्तीति तस्मै। शतानि सहस्राणि रूपाण्यस्य सन्तीति तस्मै नारायणादिशतरूपिणे विश्वादिसहस्ररूपिणे चेत्यर्थः। विकाराभावोऽविकारः सोऽस्यास्तीति तस्मै सर्वरूपेष्वपि जननमरणादिविकाररहितायेत्यर्थः। स्फुटं स्पष्टं यथा भवति तथा । न

विद्यतेऽन्तः पर्यवसानं येषां तानि रूपाण्यस्य सन्तीति तस्मै। स्फुटमित्यनेनोक्तरूपवत्वे 'अयं वै हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि चे'त्यादिश्रुतिः सूचिता। सुखं, चिज्ज्ञानञ्च सुखचितौ। तदात्मकास्समस्ततनवो यस्य तस्मै नमो नमः। तात्पर्येण द्विरुक्तिः ॥ ४१ ॥

मन्दोपकारिणी – एवं कांश्चित् अवतारान् ध्यात्वा इदानीं व्यूहभेदेन स्थिताय नारायणाय सामान्याकारेण नमस्करोति इत्याह **परमात्मन इति ॥** सततं सर्वदा। स्फुटं स्पष्टं श्रुतिसिद्धं यथा स्यात् तथेति यावत्। दशरूपिणे मत्स्यादीनि दशरूपाणि अस्य सन्तीति तस्मै। शतसहस्ररूपिणे शतञ्च सहस्रञ्च रूपाणि अस्य सन्तीति तस्मै नारायणादिशतरूपाणि विश्वादिसहस्ररूपाणीति ज्ञेयम्। अनन्तरूपिणे अनन्तानि अमितानि रूपाणि अस्य सन्तीति। अविकारिणे विकारः परिणामः। 'परिणामो विकारो द्वे समे विकृतिविक्रिये' इत्यमरः। अविकारः विकारोपलक्षितदोषाभावः। विकारोऽस्या-स्तीति विकारी स न भवतीति अविकारी तस्मै निर्दोषाय इत्यर्थः। सुखचित्समस्ततनवे सुखं च चिच्च सुखचितौ। 'प्रेक्षोपलब्धिश्चित्संवित्' इत्यमरः। सुखचिदात्मकाः समस्ततनवो यस्य सः तस्मै ज्ञानानन्दस्वरूपाखिलावतारवते। एकरूपिणे एकं स्वगतभेदवर्जितं च तत् रूपं स्वरूपं च तदस्तीति तस्मै प्रधानस्वरूपाय मूलरूपाय इति यावत्। परमात्मने परमः सर्वोत्तमश्चासौ आत्मा परब्रह्म च तस्मै सर्वोत्तमाय परब्रह्मणे नमो नमः। आदरात् द्विरुक्तिः। सततं स्फुटमिति पदद्वयेन दशशतसहस्रादिव्यूहरूपेण स्थितानन्तरूपाणामिति सर्वदा विद्यमानत्वं श्रुतिसिद्धमिति ज्ञापयति। सा च श्रुतिः 'अयं हरयोयं वै दश च शतानि सहस्राणि च बहूनि च अनन्तानि च' इत्यादिका। तथा श्रुतिसिद्धानेकरूपाय नमो नमः इत्युक्तं भवति ॥ ४१ ॥

इति चिन्तयन्नविरलान्तरो हरिं प्रणनाम सप्रणयमादृतोऽमुना।
अजितौ परस्परसभाजितौ स तौ निकषा निषीदति पुरोपवेशिनौ ॥४२॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ इति जगतां चतुर्दशतयमित्यारभ्योक्तप्रकारेण चिन्तयन्नविरलं पूर्णं आन्तरं ज्ञानं यस्य स श्रीमध्वो हरिं नारायणाख्यं भगवन्तं प्रणनाम।

अमुना नारायणेन सप्रणयं सस्नेहमादृतो मानितः स श्रीमध्वः । परस्परं अन्योन्यं सभाजितौ कृतसम्भावनावुपवेशिनौ निषण्णावजितौ श्रीव्यासनारायणौ निकषा समीपे। 'अभितः परितः' इत्यदिना द्वितीया। परस्परं कृतसम्भावनयोर्निषण्णयोस्तयोः समीप इत्यर्थः। निषीदति पुरा न्यषीदत्। 'यावत्पुरानिपातयोर्लडिति लट्॥ ४२ ॥

मन्दोपकारिणी – इतीति॥ इति पूर्वोक्तप्रकारेण। चिन्तयन् ध्यायन्। अविरलान्तरः विरलं न भवतीति अविरलं पूर्णमिति यावत् अन्तरं अन्तःकरणं यस्य सः। 'पेलवं विरलं तनु' इत्यमरः। श्रीमध्वः हरिं नारायणं प्रणनाम नमस्कृतवान्। 'णमु प्रह्वत्वे शब्दे च इत्यतो लिट् परस्मैपदं ननाम नेमतुः नेमुः'। अमुना नारायणेन सप्रणयं प्रणयेन स्नेहेन सहितं यथा भवति तथा आदृतः लालितः सः मध्वः परस्परसभाजितौ परस्परं अन्योन्यं सभाजितौ आनन्दितौ। 'आनन्दनसभाजने' इत्यमरः। उपवेशिनौ आसने निषण्णौ। अजितौ विष्णववतारौ नारायणवेदव्यासौ। निकषा समीपे। 'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इति द्वितीया तयोः समीप इत्यर्थः। निषीदति पुरा न्यषीदत्। 'षदॢ विशरणगत्यवसादनेषु' इत्यतो लट् परस्मैपदं सीदति सीदतः सीदन्ति'। 'यावत् पुरा निपातयोः लट्' इति पुराशब्दयोगे अतीतार्थे लट्। पूर्वोक्तप्रकारेण ध्यात्वा नारायणं प्रणम्य तेन आदृतस्सन् परस्परं आलिङ्गनादिरूपेण सभाजितयोः वेदव्यास-नारायणयोः उपवेशानन्तरं स्वयं तत्समीपे उपविष्टवान् मध्वः इति भावः॥ ४२ ॥

विविधा विधाय किल तत्र सङ्कथा वदनं मुनीन्द्रतनयस्य सुन्दरम्।
अवलोक्य लोकपतिरानतं महासुखतीर्थमाह रहसि स्म गामिमाम्॥ ४३ ॥

पदार्थदीपिकोद्बोधिका – विविधा इति॥ लोकपतिः श्रीनारायणः तत्राश्रमे। विविधाः सङ्कथाः परस्परभाषणानि। 'सङ्कथान्योन्यसंवादः' इति हलः। विधाय। मुनीन्द्र-तनयस्य पराशरसुतस्य श्रीव्यासस्य सुन्दरं वदनं मुखं अवलोक्य आनतं भक्तिनम्रं महासुखहेतुः तीर्थं शास्त्रं यस्मात्तं 'तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः' इति हेमचन्द्रः रहसि इमां वक्ष्यमाणां गां वाचमाह स्म अब्रवीत्किल॥ ४३ ॥

मन्दोपकारिणी – विविधा इति॥ लोकपतिः सकललोकानां स्वामी श्रीनारायणः। तत्र तस्मिन् आश्रमे। विविधाः नानाविधाः सत्कथाः संभाषणानि विधाय कृत्वा।

मुनीन्द्रतनयस्य मुनीन्द्रस्य मुनिश्रेष्ठस्य पराशरमुनेः तनयस्य पुत्रस्य वेदव्यासस्य सुन्दरं मनोहरं वदनं मुखं अवलोक्य दृष्ट्वा आनतं भक्त्या नम्रं महासुखतीर्थं महान् अधिकार्युत्तमश्चासौ सुखतीर्थः आनन्दतीर्थश्च स तथोक्तः तम्। रहसि एकान्ते इमां वक्ष्यमाणप्रकारां गां वाचं आह स्म किल अब्रवीत् खलु। 'ब्रूञ् व्यक्तायां वाचीत्यतो लट् परस्मैपदं आह आहतुः आहुः'। स्म अतीते ॥ ४३ ॥

श्रुणु देवकार्यमवधार्य धैर्यवान् मदुदीर्यमाणमिदमार्यसम्मतम्।
भविताऽन्यदुष्करतरं विधाय यत्तरुणं तवावतरणं महाफलम् ॥ ४४ ॥

पदार्थदीपिकोद्बोधिका – श्रुण्विति ॥ धैर्यमस्यास्तीति धैर्यवत् तद्यथा भवति तथा। सुस्थिरमित्यर्थः। उदीर्यमाणं मया प्रोच्यमानमार्यसम्मतं श्रीव्यासप्रियं यदिदं देवकार्यं तच्छृणु। अन्यस्यातिदुःखेन कर्तुं शक्यमन्यदुष्करतरं देवकार्यमवधार्य श्रुत्वा विधाय कृत्वा तरुणं नूतनं तवावतरणमवतारो, महत्फलं यस्य तादृशं भविता भविष्यति। भू सत्तायां लुट् ॥ ४४ ॥

मन्दोपकारिणी – श्रुण्विति ॥ हे मध्व ! त्वं धैर्यवान् धैर्यं अचाञ्चल्यं अस्यास्तीति धैर्यवान् सावधानमनास्सन्। अवधार्य निर्णयं कृत्वा मदुदीर्यमाणं मया उच्यमानं आर्यसंमतं आर्यस्य श्रेष्ठस्य वेदव्यासस्य 'मुख्यवर्यवरेण्यार्याः' इत्यमरः संमतं अनुमतं प्रियं इदं देवकार्यं देवानां कार्यं प्रयोजनं श्रुणु आकर्णय। 'श्रु श्रवण इत्यतः लोट् परस्मैपदं शृणु, शृणुतात्, शृणुत'। इदं किं, अन्यदुष्करतरं अन्येन त्वदन्येन दुष्करतरं सर्वथा कर्तुमशक्यं यत् देवकार्यं विधाय कृत्वा स्थितस्य तव तरुणं नूतनं अवतरणं अवतारः महाफलं महत् फलं यस्य तत् महाफलं भविता भवेत्। 'भू सत्तायां इत्यतो लुट् परस्मैपदम्'। यस्मिन् देवकार्ये कृते सति तवावतारः सफलः स्यात् तादृशं देवकार्यं निर्धार्य मया उच्यमानं श्रुणु तव भूमौ अवतारप्रयोजनं वक्ष्यामि इति भावः ॥ ४४ ॥

अपिधाय सूत्रहृदयं सतां प्रियं प्रविधाय भाष्यमधुना निजेच्छया।
अपरैः श्रुतिस्मृतिनिजार्थदूषकैः सुतरां तिरोभवति संविदाहता ॥ ४५ ॥

पदार्थदीपिकोद्बोधिका – अपिधायेति ॥ अधुना इदानीम्। श्रुतिस्मृतीनां निजार्थानां साक्षाद्विवक्षितार्थानां दूषकैः अपरैः सज्जनेभ्योऽन्यैः भुवि जातैरसुरैरिति यावत्। सतां सज्जनानां प्रियं सूत्रहृदयं ब्रह्मसूत्राभिप्रायं अपिधाय छादयित्वा। 'अपिधानति-रोधानपिधानाच्छादनानि चे'त्यमरः। निजेच्छया स्वेच्छया स्वाभिमतजगन्मिथ्यात्वादि-प्रतिपादकत्वेनेत्यर्थः। भाष्यं ऋक्सूत्रोपनिषदादिभाष्यं प्रविधाय, आहता नाशिता संवित् तत्त्वज्ञानं सुतरां अतितरां अधुना तिरोभवति निलीना भवति ॥ ४५ ॥

मन्दोपकारिणी – अपिधायेति ॥ अधुना इदानीम् । श्रुतिस्मृतिनिजार्थदूषकैः श्रुतयश्च स्मृतयश्च श्रुतिस्मृतयः तासां निजं स्वाभाविकं अभिप्रेतं अर्थं अभिधेयं दूषयन्ति निराकुर्वन्ति इति तथोक्ताः तैः। अपरैः सद्भ्यः अन्यैः भुवि जातैः असुरैः इति यावत्। आहता नाशिता संवित् तत्त्वज्ञानं सुतरां अत्यन्तं तिरोभवति लीना भवति। किं कृत्वा आहता, सतां सज्जनानां प्रियं संमतं सूत्रहृदयं सूत्राणां ब्रह्मसूत्राणां हृदयं आकूतं अभिप्रायं 'आकूते हृदयं भवेत्' इत्यभिधानं, अपिधाय आच्छादयित्वा। 'अपिधान तिरोधानपि-धानाच्छादनानि च' इत्यमरः। निजेच्छया स्वकीयेच्छया स्वाभिप्रेतजगन्मिथ्यात्वादि-प्रतिपादकत्वेन इति भावः। भाष्यं ऋक्सूत्रोपनिषदादिभाष्यं प्रविधाय निर्माय आहता संवित् तिरोभवतीति संबन्धः ॥ ४५ ॥

अपनेतुमेनमनयं कृतं खलैः प्रतिनेतुमात्मजनतां शुभां गतिम्।
कुरु सूत्रभाष्यमविलम्बितं व्रजेः सुमतेन योजय कवे श्रुतिस्मृतीः ॥४६॥

पदार्थदीपिकोद्बोधिका – अपनेतुमिति ॥ खलैः दुर्जनैः कृतमेनं निजेच्छया भाष्यनिर्माणादिरूपम् । नयो न्यायः सच्छास्त्रन्यायस्तद्विरुद्धोऽनयस्तं कुयुक्तिमच्छास्त्रा-भासमित्यर्थः। अपनेतुं निराकर्तुं आत्मनः जनानां समूहो जनता तां स्वकीयजन-समूहमित्यर्थः। शुभां गतिं मोक्षं प्रति नेतुं प्रापयितुं सूत्रभाष्यं ब्रह्मसूत्रभाष्यं कुरु अविलम्बितं शीघ्रं यथा भवति तथा व्रजेः गच्छ। कवे ज्ञानिन् ! श्रुतिस्मृतीः सुमतेन सत्सिद्धान्तेन योजय सत्सिद्धान्तपरत्वेन व्याकुर्वित्यर्थः ॥ ४६ ॥

मन्दोपकारिणी – अपनेतुमिति ॥ खलैः नीचैः 'क्रूरे नीचेऽधमे खले' इति विश्वः दुर्जनैः कृतं एनं निजेच्छया भाष्यनिर्माणादिरूपं अनयं सच्छास्त्रन्यायविरुद्धं अन्यायं अपनेतुं निराकर्तुं आत्मजनतां आत्मनः स्वस्य जनाः तेषां समूहः आत्मजनता ताम्। शुभां शोभनां गतिं मुक्तिं ज्ञानं वा प्रतिनेतुं प्रापयितुं सूत्रभाष्यं ब्रह्मसूत्रव्याख्यानरूपं भाष्यं कुरु विरचय। 'डु कृञ् करण इत्यतो लोट् परस्मैपदं कुरु, कुरुतात्, कुरुतं कुरुत'। कवेः पण्डितस्य वेदव्यासस्य। 'सङ्ख्यावान्पण्डितः कविः' इत्यमरः। सुमतेन सत्सिद्धान्तेन श्रुतिस्मृतीः योजय संयोजय भाष्यं कृत्वा सर्वाः श्रुतीः सत्सिद्धान्ततपरत्वेन व्याकुरु इति भावः। 'युजिर् योग इत्यतो लोट् परस्मैपदं योजय योजयतं योजयत'। अतः एतदर्थं अविलम्बितं आशु 'अविलम्बितमाशु च' इत्यमरः। व्रजेः भूमिं प्रति गच्छ। 'व्रज गतौ इत्यतो विधिलिङ् परस्मैपदं व्रजेः व्रजेतं व्रजेत' ॥ ४६ ॥

अमितां मितामपि गिरं जगद्गुरोरिति तां निशम्य विरलेतरान्तरः।
वदतां वरस्तमवदत् तदा तयोर्विरहाक्षमः खलु चराचरेशयोः ॥ ४७ ॥

पदार्थदीपिकोद्बोधिका – अमितामिति ॥ वदतां वाग्मिनां वरः श्रेष्ठः। विरलात्कृशादितरत् विरलेतरत् पूर्णमित्यर्थः तादृशमान्तरं ज्ञानं यस्य तादृशः श्रीमध्वः। इति 'शृणु देवकार्यमि'त्याद्युक्तप्रकारां मितामपि शब्दतोऽल्पामप्यमितामर्थतोऽनल्पां बह्वर्थगर्भामिति यावत् जगद्गुरोः श्रीनारायणस्य तां गिरं निशम्य तं श्रीनारायणमवदत् 'भवतोरित' इति वक्षमाणरीत्योवाच। भवतोरित्यारभ्येतो न गच्छामीत्यर्थप्रतिपादकं वचनं ब्रुवतः कोऽभिप्राय इत्यपेक्षायामाह तयोरित्यादि। चराचरेशयोः स्थावरजङ्गमस्वामिनोस्तयोः श्रीव्यासनारायणयोः विरहाक्षमः खलु वियोगेऽसमर्थः खलु वियोगं सोढुं असमर्थ एव, ननु सर्वथा इतो न गमिष्यामीत्यभिप्रायवानिति भावः ॥ ४७ ॥

मन्दोपकारिणी – अमितामिति ॥ तदा नारायणोक्तिकाले। वदतां गुरूणां समीपे मर्यादया वक्तॄणां मध्ये। वरः अतिविनयपूर्वकवचनचतुरः। विरलेतरान्तरः विरलात् अल्पादितरत् आन्तरं मनः यस्य सः मध्वः। इति 'श्रुणु देवकार्यमित्यादिपूर्वोक्तप्रकारेण' मितामपि शब्दतोऽल्पामपि अमितां अर्थतोऽनल्पां बह्वर्थगर्भां जगद्गुरोः जगत्पितुः

'गुरूगीष्पति पित्राद्यौ' इत्यमरः श्रीनारायणस्य तां उक्तां गिरं निशम्य तं श्रीहरिं अवदत्। किंभूतः, चराचरेशयोः चेतनाचेतनजगदीशयोः व्यासनारायणयोः विरहाक्षमः खलु वियोगाशक्तः किल। 'क्षमः शक्ते हिते त्रिषु' इत्यमरः। वियोगं सोढुं असमर्थ एव सन् न तु सर्वथा इतो गमिष्यामीति भाववान् इत्याशयः॥ ४७॥

भवतोरितः सततसेवनामृते मम मंक्तुमस्तु भगवन्ननुग्रहः।
न लभेय वल्लभतमेदृशं सुखं जगतां त्रयेऽपि जगदेकमङ्गलम्॥ ४८॥

पदार्थदीपिकोद्बोधिका – वचनप्रकारमेव दर्शयति **भवतोरिति॥** हे भगवन्! इतोऽत्रैव। सार्वविभक्तिकस्तसिः। भवतोः युवयोः सततसेवनं निरन्तरसेवा तदेवामृतं तस्मिन्मम मुंक्तुं निमज्जनाय अनुग्रहोऽस्तु। वल्लभतम! प्रियतम! जगदेकमङ्गलं जगति मुख्यमङ्गलं ईदृशं सततभगवत्सेवनामृतसदृशं सुखं जगतां त्रयेऽपि न लभेय न प्राप्नुयाम्॥ ४८॥

मन्दोपकारिणी – भवतोरिति॥ भगवन् पूर्णैश्वर्यादिषड्गुण! मम इतः अत्रैव। सार्वविभक्तिकस्तसिः। भवतोः युवयोः सततसेवनामृते निरन्तरसेवैव अमृतं तस्मिन् मंक्तुं मज्जनाय अनुग्रहः अस्तु। 'अस भुवि लोट् परस्मैपदं अस्तु स्तां सन्तु'। कुतः, हे वल्लभतम! अतिप्रिय जगदेकमङ्गलं लोके मुख्यमङ्गलं पुरुषार्थरूपं ईदृशं भवत्सेवामृतमज्जनसदृशं सुखं जगतां लोकानां त्रयेऽपि न लभेय न प्राप्नुयाम्। 'डु लभष् प्राप्तौ विधिलिङ् आत्मनेपदं लभेय लभेवहि लभेमहि'॥ ४८॥

कलिकालकालितगुणे धरातले सुजनो न नूनमधुनाऽस्ति योग्यधीः।
परतत्त्ववर्णनमयोग्यतावते ननु हव्यदानमिव निन्द्यते शुने ॥ ४९॥

पदार्थदीपिकोद्बोधिका – कलीति॥ अधुना कलिकालेन कलिसामर्थ्येनेत्यर्थः कालिता नाशिता गुणा ज्ञानभक्तिवैराग्यादयो यस्मिन् तस्मिन् धरातले योग्या तत्त्वज्ञानयोग्या धीर्बुद्धिर्यस्य स सुजनो नूनं प्रायो नास्ति। अयोग्यतावते योग्यताभाववते योग्यतारहितायेत्यर्थः जनाय परतत्त्ववर्णनं परब्रह्मोपदेशः शुनकाय हव्यदानमिव हविर्दानमिव निन्द्यते ननु। निदि कुत्सायां कर्मणि लट्॥ ४९॥

मन्दोपकारिणी – कलीति ॥ अधुना इदानीं कलिकालकालितगुणे कलिनामक-कालेन तत्सामर्थ्येन इति भावः। कालिता नाशिताः गुणाः भक्तिवैराग्यादयो यस्मिन् तत् धरातले भूतले। योग्यधीः तत्त्वज्ञानयोग्यबुद्धिः सुजनः सचेतनः नूनं प्रायः नास्ति। अयोग्यतावते अयोग्याय अनधिकारिणे परतत्त्ववर्णनं परब्रह्मोपदेशः निन्द्यते ननु गर्हितो हि। 'णिदि कुत्सायां कर्मणि लडात्मनेपदम्'। किमिव, शुने हव्यदानमिव हव्यस्य देवयोग्यान्नस्य दानमिव । कलियुगे प्रायः तत्त्वज्ञानयोग्याः न सन्ति। अयोग्योपदेशो निषिद्धः तस्मात् तत्र प्रयोजनं नास्ति अतः भवत्समीप एव स्थित्वा सेवां करिष्यामि। भवान् तथैव अनुग्रहं करोतु भवत्सन्निधिसुखस्य अन्यत्राभावात् इति मध्वः अवादीत् इति श्लोकद्वयार्थः ॥ ४९ ॥

इति तं ब्रुवाणमयमब्रवीद्विभुर्भुवि सन्ति सौम्य पुरुषा गुणोचिताः ।
विमलान्मणीनिव गुणोज्झितानिमान् दयया विशोधय विशुद्धगोगणैः ॥ ५० ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ अयं विभुः श्रीनारायणः। इति ब्रुवाणं तं श्रीमध्वं हे सौम्य! भुवि गुणोचिता ज्ञानभक्त्यादिगुणानामुचिताः पुरुषाः सन्ति। विमलानिमान् पुरुषान् गुणोज्झितान् केवलं सत्संसर्गाद्यभावात् भक्त्यादिगुणवर्जितान्। दयया कृपया विशुद्धानां गवां वाचां गणैस्समूहैः। गुणोज्झितान् सुषिरवत्त्वेन सूत्रोज्झितान् सूत्रच्युतान् विमलान् मणीन् विशुद्धगोगणैः निर्मलजलसमूहैः इव विशोधय विगता-ज्ञानादिदोषान् कुरु। शुध शौचे लोट्॥ ५० ॥

मन्दोपकारिणी – इतीति ॥ विभुः अयं नारायणः। इति ब्रुवाणं भाषमाणं तं मध्वं प्रति, अब्रवीत् हे सौम्य ! सुन्दर! 'सौम्यं तु सुन्दरः' इत्यमरः मध्व, भुवि धरायां। गुणोचिताः ज्ञानादिगुणयोग्याः पुरुषाः सन्ति। विमलान् शुद्धान् गुणोज्झितान् केवलं सत्सङ्गाद्यभावात् भक्त्यादिगुणवर्जितान् गुणोचितपुरुषान् दयया विशुद्धगोगणैः विशुद्धाः वाक्यदोषरहिताः गावः वाचः तासां गणैः सङ्घातैः विशोधय विगताज्ञानादिदोषान् कुरु इत्यर्थः। कान् कैरिव, कश्चित् परीक्षकः गुणोचितान् सूत्रोचितान् छिद्रवत्त्वेन प्रवेशयितुं योग्यान् गुणोज्झितान् सूत्रच्युतान् विमलान् स्वतः त्रासादिदोषरहितान्

मणीन् विशुद्धगोगणैः विशुद्धैः निर्मलैः गोगणैः जलसमूहैरिव यथा जलेन शोधयति प्रक्षाल्य पङ्करहितान् करोति, तथा त्वमपि शोधय इति भावः। 'इव यद्वा यथा शब्दाः उपमानस्य वाचकाः' इत्यभिधानम्। 'भूवाग्वारिषु गौः' स्मृतः इति विश्वः। 'शुध शौच इत्यतः णिजन्तात् लोट् परस्मैपदं शोधय शोधयतं शोधयत' ॥ ५० ॥

तव कीर्तिरार्तिमतिमात्रमानयेदशुभान् प्रभाकरविभेव कौशिकान्।
कमलाकरानिव शुभान्प्रबोधयेत्परमाज्ञया मम विशेषतोऽनिशम् ॥ ५१ ॥

पदार्थदीपिकोद्बोधिका – तवेति ॥ हे मध्व! तव कीर्तिः, अशुभान् दुष्टान् अनिशं निरन्तरं अतिमात्रं अतितरां आर्तिं दुःखं, प्रभाकरविभा सूर्यप्रभा कौशिकानिव दिवान्धसञ्ज्ञकान्पक्षिविशेषानिव। 'दिवान्धः कौशिको धूकः' इत्यमरः। कौशिका हि सूर्यप्रकाशेऽन्धा भवन्ति। आनयेत् प्रापयेत्। तव कीर्तिः शुभान् सज्जनान् प्रभाकरविभा कमलाकरानिव पद्माकरानिव प्रबोधयेत् विकासमानयेत्। बुध अवगमने लिङ्। तव कीर्तिसामर्थ्यमेवेत्थंभूतं, मम परमाज्ञया उत्तमाज्ञया विशेषतोऽशुभान् आर्तिमानयेत्, शुभान् प्रबोधयेच्च। अत्रोपमालङ्कारः ॥ ५१ ॥

मन्दोपकारिणी – तवेति ॥ हे मध्व ! तव कीर्तिः यशः अशुभान् असज्जनान् अनिशं अतिमात्रं अत्यर्थं आर्तिं दुःखं 'आर्तिः पीडा धनुष्कोट्योः' इत्यमरः आनयेत् प्रापयेत्। 'आङ्पूर्वात् णीञ् प्रापणे विधिलिङ् नयेत् नयेतां नयेयुः'। का कानिव, प्रभाकरविभा सूर्यतेजः 'तेजोधाममहोविभा' इत्यमरः कौशिकानिव पक्षिविशेषानिव 'दिवान्धः कौशिको धूकः' इत्यमरः उलूका हि सूर्यप्रकाशे अन्धाः भवन्ति। तव कीर्तिः शुभान् सज्जनान् प्रबोधयेत् विकासं आनयेत् सन्तोषयेत्। 'बुध अवगमे विधिलिङ् परस्मैपदं बोधयेत् बोधयेतां बोधयेयुः'। का कानिव, प्रभाकरविभा कमलाकरानिव तटाकानिव। 'पद्माकरस्तटाकोऽस्त्री' इत्यमरः। तव कीर्तेः स्वत एव तादृशं सामर्थ्यम्। मम परमाज्ञया विशेषतः अशुभान् दुःखयेत् शुभान् सन्तोषयेच्च ॥ ५१ ॥

इति सा महीधरमुखाद्विनिःसृता जगतां सुखाय विशदा सरस्वती।
द्विजराजगोविषयतातिपूरितं प्रविवेश मध्वपृथुबुद्धिवारिधिम् ॥ ५२ ॥

भावप्रकाशिका – महीधरो गिरिर्हरिश्च। द्विजराजश्चन्द्रो व्यासश्च ॥ ५२ ॥

॥ इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीसुमध्वविजयस्य भावप्रकाशिकाख्यटीकायां अष्टमः सर्गः ॥

पदार्थदीपिकोद्बोधिका – इतीति ॥ जगतां सुखाय। इति महीधरस्य धरणीधरस्य श्रीनारायणस्य मुखात् विनिःसृता निर्गता विशदा शोभना सरस्वती वाक्। द्विजराजस्य श्रीवेदव्यासस्य गवां वचनानां विषयतया गोचरतया अतिपूरितं अतिसमृद्धम्। व्यासोक्तानां अपि एतादृशवचनानां हृदि वर्तमानत्वादिति यावत्। मध्वस्य पृथुबुद्धिरेव विपुलबुद्धिरेव वारिधिः समुद्रस्तं प्रविवेश। महीधरमुखात् गिरिकन्दरात् जगतां सुखाय विनिःसृता विशदा प्रसन्ना सरस्वती नदी द्विजराजगोविषयतातिपूरितं चन्द्रकिरणसम्बन्धात् अतिपूरितं सागरमिवेति श्लेषार्थः ॥ ५२ ॥

मन्दोपकारिणी – इतीति ॥ जगतां सज्जनानां सुखाय इति पूर्वोक्तप्रकारेण महीधरमुखात् मह्याः भूमेः धारकस्य नारायणस्य मुखात् विनिःसृता निर्गता विशदा निर्मला सा सरस्वती गीः। 'गीर्वाग्वाणी सरस्वती' इत्यमरः। मध्वपृथुबुद्धिवारिधिं मध्वस्य पृथ्वी विशाला बुद्धिविषयिणी इति यावत् सा च सा बुद्धिः अन्तःकरणं सैव वारिधिः समुद्रः तं मध्वान्तःकरणरूपसमुद्रं प्रविवेश अन्तर्गतवती। किंभूतं बुद्धिवारिधिं, द्विजराजगो-विषयतातिपूरितं द्विजानां ऋषीणां राजा प्रभुः 'राजा प्रभौ नृपे चन्द्रे' इति विश्वः वेदव्यासः तस्य गावः वाचः तासां विषयतया गोचरतया अतिपूरितं अत्यन्तपूर्णं व्यासोक्तवचसा हृदि वर्तमानत्वं इति यावत्। यथा महीधरमुखात् पर्वतस्य मुखात् गुहायाः विनिःसृता विशदा स्वच्छा सरस्वती नदी 'रोधोवक्त्रा सरस्वती' इत्यमरः। द्विजराजगोविषयतातिपूरितं द्विजराजस्य चन्द्रस्य गावः रश्मयः तासां विषयतया सम्बन्धेन अतिपूरितं अत्यन्तं अभिवृद्धं सागरं प्रविशति तथेति श्लेषार्थः। श्रीमध्वः नारायणोक्तिं मनसा अङ्गीचकार इति भावः ॥ ५२ ॥

मतमित्यवेत्य महितं महतोरभिधाय बाढमिति धीरमतिः।
अनयोर्नियोगमधिरोपितवान् स्वशिरस्यनन्यसुवहं प्रणमन् ॥५३॥

पदार्थदीपिकोद्बोधिका – मतमिति ।। धीरधीः स्थिरबुद्धिः श्रीमध्वः। महतोः श्रीव्यासनारायणयोः महितं सम्मतं मतं सिद्धान्तं इति उक्तप्रकारेण अवेत्य मम गमनमेव तयोरभिमतमिति ज्ञात्वेति यावत्। प्रणमन् सन् बाढं तथास्त्वित्यभिधाय, अनन्यसुवहमन्येन सुखेन सोढुमशक्यं अन्येन कर्तुमशक्यमिति यावत्। अनयोर्नियोगं आज्ञां स्वशिरसि अधिरोपितवान् शिरसि बद्धाञ्जलिर्भूत्वा बाढमित्यभिधाय तदाज्ञामङ्गीकृतवानिति भावः। प्रमिताक्षरावृत्तम्। 'प्रमिताक्षरा सजससैः कथिते'ति तल्लक्षणम्।। ५३ ।।

मन्दोपकारिणी – मतमिति ।। धीरमतिः अचञ्चलमतिः मध्वः। महतोः आर्ययोः वेदव्यासनारायणयोः महितं सर्वपूजितं मतं सिद्धान्तं इति उक्तप्रकारेण अवेत्य मम गमनं एतयोः अभीष्टमिति ज्ञात्वा प्रणमन् नमस्कुर्वन् बाढं भवदाज्ञां करिष्यामीति प्रतिज्ञां अभिधाय उक्त्वा विधाय इति यावत्। 'भृशप्रतिज्ञयोर्बाढं' इत्यमरः। अनन्यसुवहं अन्येन पुरुषेण सुखेन वहं वोढुं शक्यं तन्न भवतीति अनन्यसुवहं अन्येन कर्तुं अशक्यमिति यावत्। अनयोः वेदव्यासनारायणयोः नियोगं आज्ञां स्वशिरसि स्वमूर्ध्नि अधिरोपितवान् स्थापितवान्। शिरसि अञ्जलिं बध्वा भवदाज्ञां करिष्यामि इति वचसापि तदाज्ञां अङ्गीचकार इति भावः। प्रमिताक्षरावृत्तम्। 'प्रमिताक्षरा सजससैः कथिता' इति तल्लक्षणात्।। ५३ ।।

आम्नायास्त्रय इव तत्त्वबोधकास्ते पापघ्नास्त्रय इव पावकाः प्रजानाम्।
लोका वा सकलभृतस्त्रयोऽत्र रेजुः सानन्दा मुनिसुतधर्मसूनुमध्वाः।।५४।।

।। इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीनारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये महाकाव्ये आनन्दाङ्के अष्टमः सर्गः ।।

पदार्थदीपिकोद्बोधिका – आम्नाया इति ।। सानन्दा आनन्दसहितास्त्रय, आम्नाया इव वेदा इव प्रजानां तत्त्वबोधकाः परापरतत्त्वबोधयितारः, त्रयः पावका इव अग्नय इव प्रजानां पापानि घ्नन्तीति तादृशाः। त्रयो लोका इव सकलं बिभ्रतीति सकलभृतः सर्वं दधानाः ते त्रयः, मुनिसुतः पराशरसुतः श्रीव्यासः, धर्मसूनुः धर्मप्रजेश्वरसूनुः श्रीनारायणः,

मध्वश्च, तेऽत्र आश्रमे रेजुः। प्रहर्षणीवृत्तम्। 'म्नौजौगस्त्रिदशयतिः प्रहर्षणीयमि'ति तल्लक्षणात्॥ ५४॥

॥ इति श्रीमद्वेदाङ्गमुनिविरचितश्रीसुमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां अष्टमः सर्गः॥

मन्दोपकारिणी – आम्नाया इति॥ सानन्दाः आनन्देन सहिताः सानन्दाः। ते त्रयः मुनिसुतधर्मसूनुमध्वाः व्यासनारायणमध्वाः। अत्र नारायणाश्रमे रेजुः। 'राजृदीप्तौ लिट् परस्मैपदम्'। कथंभूताः प्रजानां जनानां तत्त्वबोधकाः परब्रह्मतत्त्वोपदेशकाः। के इव जनानां तत्त्वबोधकाः पदार्थप्रकाशकाः त्रयः ऋग्यजुःसामाख्याः आम्नायाः वेदा इव। पुनः किंभूताः। प्रजानां पापघ्नाः पापानि घ्नन्तीति दर्शनस्मरणादिना दुरितसंहारकाः। के इव प्रजानां पापघ्नाः आहवनीयदक्षिणाग्निगार्हपत्याख्याः त्रयः पावकाः अग्नयः इव। पुनः किं भूताः सकलभृतः सकलपोषकाः। के इव भूर्भुवःस्वः नामानः लोका वा भुवनानीव। वेदा इव तत्त्वबोधकाः, अग्नय इव पापदाहकाः, लोका इव प्रजापोषकाः व्यासनारायणमध्वाः सुखेन अस्मिन् आश्रमे अशोभन्त इति भावः। वृत्तं तु प्रहर्षिणी। 'त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्' इति तल्लक्षणात्॥ ५४॥

॥ इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनरसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां अष्टमः सर्गः॥ ८॥

परिशिष्टम् - १

श्रीहृषीकेशतीर्थविरचित सम्प्रदायपद्धतिः

ईशेन्द्रादिसुरेन्द्राणामीशः श्रीरमणप्रियः
यत्र प्रादुरभूद्वायुः क्षेत्रं तत् पाजकं शुभम् ॥ १ ॥

जडस्य गङ्गाद्यभिधस्य केवलं तीर्थस्य मूलं हिमवन्नगाधिपः ।
मत्सौख्यतीर्थस्य जडेतरस्य वै मूलं पवित्रं तदतीव पाजकम् ॥ २ ॥

यत्रत्यतीर्थेषु निमज्जतां सतां धर्मश्चतुर्भिश्चरणैः सहैधते ।
इति प्रबोधाय चकार माधवश्चत्वारि तीर्थानि भृगोः कुलोद्भवः ॥ ३ ॥

परश्वादीन्यायुधानि यथा पापहराणि वै ।
तीर्थानि च तथेत्येवं बोधयन्त्यभिधा इमाः ॥ ४ ॥

श्रीमन्मध्यगृहाख्यविप्रगृहजः श्रीवासुदेवाभिधः
प्राणः प्राप्य वटुत्वमात्मजननीवाचा यदा वारितः ।
स्नानार्थं त्वमृते सहायमधुना नो याहि तातेत्यसौ
तत्काले व्यतनोद् गृहान्तिकगतं स्वाख्यायुतं सत्सरः ॥ ५ ॥

चत्वारि तीर्थानि विधाय पाजके प्राबोधि तन्मोक्षचतुष्टयप्रदम् ।
रामेण नो सार्ष्टिदमित्यसौ मरुत् तीर्थं चकारेति ममावभासते ॥ ६ ॥

श्रीमद्वैष्णवमातनोमि सुमतं तातेति पुत्रोदितो
विप्रः स्माह यदा त्वदीयकरगा यष्टी रुहेच्चेदिदम् ।
स्यादिष्टं खलपूर्णकाल इति तत्काले वटुर्नीरसां
यष्टिं न्यस्य मृदां चयेऽखिलजगत्प्राणप्रदोऽजीवयत् ॥ ७ ॥

सत्वरं वर्धमानः स वृक्षः पन्नगरूपिणा ।
दष्टो मणिमता रोषान्न शुशोष मरुद्बलात् ॥ ८ ॥

यदा विमानाख्यगिरिस्थितां निजां दिदृक्षुरम्बामगमन्महामतिः ।
वटुस्तदा वर्त्मनि पन्नगाकृतिर्ददंश तत्पादमसौ जिघांसया ॥ ९ ॥

स्वाङ्गुष्ठाङ्गुलितुण्डेन वासुदेवाख्यपक्षिराट् ।
मारयामास तं सर्पं तल्लक्ष्माद्यापि दृश्यते ॥ १० ॥

गत्वाऽथ दुर्गां निजभुक्तिमुक्तिदां ननाम भक्त्या मरुतां पतिस्तदा ।
माताऽऽजुहावासकृदत्तुमञ्जसा गिरेस्तदोल्लंघ्य गृहान्तिकेऽभवत् ॥ ११ ॥

अण्वोश्चरणयोरङ्कयुग्ममश्मन्यभूत् तदा ।
पापाचलेंद्रकुलिशमित्यद्यापि गृहान्तिके ॥ १२ ॥

गृहोत्तमं प्राप्य हरेर्निवेदितं शेषासनस्याऽददयं द्विजान्वितः ।
इत्याद्यचिन्त्योरुगुणान् प्रदर्शयन्नदान्मुदं सज्जनवृन्दचेतसाम् ॥ १३ ॥

पारिव्राज्यं ततः प्राप्य कृत्वा सच्छास्त्रसञ्चयम् ।
रूप्ये कृष्णाकृतिं वायुः संस्थाप्यादात् सतां मुदम् ॥ १४ ॥

मध्वाह्वयोऽयं मरुदीश्वरोऽदान्मुदा हृषीकेशनृसिंहतीर्थयोः ।
सीतानुजाभ्यां सहितं रघूत्तमं चतुर्भुजं कालियमर्दनं हरिम् ॥ १५ ॥

जनार्दनोपेन्द्रसुयोगिनोरदात् कृष्णं द्विहस्तं भुजगस्य मर्दनम् ।
श्रीविट्ठलं वामनयोगिनोऽपि तं श्रीविष्णुतीर्थस्य च सूकरात्मकम् ॥ १६ ॥

श्रीरामतीर्थस्य नृसिंहरूपिणं ददौ तथाऽधोक्षजयोगिनः पुनः ।
श्रीविट्ठलं श्रीरघुवंशशेखरं श्रीपद्मनाभाह्वययोगिमौलये ॥ १७ ॥

यः साक्षादनुजः शमादिसुगुणः श्रीविष्णुतीर्थाह्वयः
यः कर्नाटकपूर्वसज्जनगुरुः श्रीपद्मनाभाह्वयः ।
ताभ्यामेष ददौ गुरुः सदयितो विष्णुः स्थितो यासु ता
मूर्तीः शुद्धशिलात्मिकाः स्थलयुगे तस्यानुजोऽस्थापयत् ॥ १८ ॥

ततो दयावारिनिधिर्ग्रामे सेतुतिलाह्वये ।
स्वशास्त्रग्रन्थमकरोद् भूगतं पूर्णशेमुषिः ॥ १९ ॥

तेषां मन्त्रोपदेशव्रतनियमसुरार्चादिके सम्प्रदायं
युग्मे युग्मे प्रभिन्नं कुरुत इति हृषिकेशतीर्थादिकेषु ।
आज्ञाप्याऽरादटंतं व्रतनियमविधौ पद्मनाभं यतीन्द्रं
दृष्ट्वा चाऽज्ञाप्य भिन्नं विधिममितमतिः क्षेत्रतो निर्गतोऽभूत् ॥ २० ॥

तिरोहिते सन्मतेऽस्मिन् विष्णुतीर्थो गुहाचलात् ।
आगत्योद्धृत्य तत्रत्यग्रन्थान् स प्रथयिष्यति ॥ २१ ॥

यस्मात् सर्वहृदिस्थसंशयचयं ज्ञात्वा यतीशो मरुत्
सद्धर्मांश्च तिलांशतोऽप्युपदिशेत्याज्ञानिबन्धं व्यधात् ।
तस्मात् सेतुतिलेति लोकगदितं क्षेत्रं सुतीर्थात्मकं
स्कन्दाद्रेर्बिलतोऽवतीर्णयतिना संशोध्यते कालतः ॥ २२ ॥

तीर्थानां पञ्चके स्नात्वा कृत्वा दुर्गावलोकनम् ।
उपास्य चरणौ वायोः कृतकृत्यो भवेन्नरः ॥ २३ ॥

भक्तितस्त्रितयं कृत्वा प्रयागादिस्थलत्रये ।
सत्कर्मणां फलं यत् स्यात्तत्प्राप्नोति नरो ध्रुवम् ॥ २४ ॥

इति निगदितपूर्णप्रज्ञवागम्बुधारां
हृदयशिरसि कृत्वा सद्धृषीकेशमेघः ।
भुवि सुजनसुसस्यासम्प्रवृद्ध्यै ववर्ष
मुमुदुरमृतसिक्ता ज्ञानिनो ग्लानिमुक्ताः ॥ २५ ॥

श्रीमदानन्दतीर्थीयसम्प्रदायस्य पद्धतिम् ।
श्रुत्वाऽऽचरन्ति ये तेषां भारतीशो भवेत् प्रियः ॥ २६ ॥

॥ इति श्रीहृषीकेशतीर्थविरचिता संप्रदायपद्धतिः समाप्ता ॥

परिशिष्टम् - २

श्रीविष्णुतीर्थविरचिता सुमध्वविजयप्रमेयफलमालिका

श्रीमध्वविजये सर्गाः षोडशानुक्रमादहम् ।
तेषां प्रमेयं वक्ष्यामि संग्रहेण फलं तथा ॥ १ ॥

बळित्थ्येत्यादिसूक्तोक्तं वायो रूपत्रयं परम् ।
प्रथमे प्रथमं प्रोक्तं द्वितीयं तु ततः परम् ॥ २ ॥

सच्छास्त्रे दूषिते दृष्टैः सुरप्रार्थनया हरेः ।
आज्ञया चावतीर्णस्य द्वितीये बाल्यसत्कथाः ॥ ३ ॥

सूपनीतः सुविधिना स्वपित्राऽधीतवान् द्विजात् ।
बहून् वेदान् क्षणेनैव तृतीये कथितं त्विदम् ॥ ४ ॥

तुर्याश्रममनुप्राप्य वेदान्तनिरतोऽभवत् ।
शिष्यानध्यापयामास संप्रदायमहापयन् ॥ ५ ॥

व्याख्यन् भाष्यं मायिकृतं ज्ञापयन् तस्य दुष्टताम् ।
सूचयन्नुत्तरं भाष्यं जिगाय प्रतिवादिनः ॥ ६ ॥

तत्र तत्र विचित्राणि चरित्राणि प्रदर्शयन् ।
चरन् क्षेत्रेषु सर्वेषु हिमवन्तं ददर्श सः ॥ ७ ॥

मनसा मानयन् मुख्यगुरुं व्यासं हृदम्बरे ।
अपश्यच्चक्षुषाऽप्यत्र स्थितं मुनिगणैर्वृतम् ॥ ८ ॥

नारायणं नमस्कृत्य तत्रस्थं गुरुणा सह ।
गतस्ताभ्यामनुज्ञातः भाष्यं कर्तुं सतां मुदे ॥ ९ ॥

स्थानान्तरे व्यासमुखाच्छ्रुत्वा शास्त्रं ततो गतः ।
एकविंशतिदुर्भाष्यखण्डनं भाष्यमातनोत् ॥ १० ॥

यथा हरेः कथालापः सुखाय कृतिनां तथा ।
स्वस्याप्यतिविचित्राणि चरित्राणि चकार सः ॥ ११ ॥

व्याख्यानसमये प्राप्तं फणिराजं सुपूर्णधीः ।
शिष्येभ्यो दर्शयामास स तत्फलमथाब्रवीत् ॥ १२ ॥

बहूपद्रवदं मायिमण्डलं स्वीयमण्डले ।
खण्डयित्वाऽखण्डशक्तिर्विरेजेऽखण्डराजवत् ॥ १३ ॥

एवं मायिगणं जित्वा प्रख्यातं भूमिमण्डले ।
जयसिंहसमाहूतं कविसिंहो ननाम तम् ॥ १४ ॥

सदा श्रीहरिपादाब्जगतमानससम्भ्रमः ।
स्नानव्याख्याभोजनादि करोत्यनुदिनं सुधीः ॥ १५ ॥

व्याख्यात्रा ब्रह्मसूत्राणां पूर्णप्रज्ञेन वादतः ।
जितस्तच्छिष्यतां प्राप्य सोऽकरोत् तत्त्व(भाष्य)दीपिकाम् ॥ १६ ॥

सम्पादितस्वकार्येऽस्मिन् सर्वज्ञे सर्वदेवताः ।
ववृषुः पुष्पवारं खे स्थिताः स्तुतिपरा मुदा ॥ १७ ॥

(इत्थं सुमध्वविजये मेयसङ्ग्रमालिका ।
रचिता भिक्षुणा भूयाद् विष्णुवक्षःस्थलाश्रिता ॥)
सन्निधानं गुणव्यक्तिः स्वरूपस्य वि(नि)बोधनम् ।
साधनैः शौभनैः कीर्तिः शास्त्रराज्याभिषेचनम् ॥ १८ ॥

विचारः साधनौघस्य ज्ञेयरूपप्रबोधनम् ।
उपासायामतिशयो दार्ढ्यं भक्तेर्हरौ गुरौ ॥ १९ ॥

अपेक्षिताखिलावाप्तिर्मोक्षशास्त्रसुलोलता ।
विघ्ननाशः साधनानां स्वीयमाहात्म्यबोधनम् ॥ २० ॥

अपरोक्षदृशेर्विघ्ननाशस्तद्दापनं तथा ।
मोक्षदानमिति प्रोक्तं फलं षोडशकं परम् ॥ २१ ॥

इत्थं सुमध्वविजये प्रमेयफलमालिका ।
रचिता भिक्षुणा भूयाद्विष्णुवक्षःस्थलाश्रिता ॥ २२ ॥

॥ इति श्रीमादनूरु विष्णुतीर्थविरचिता सुमध्वविजय प्रमेयफलमालिका समाप्ता ॥

परिशिष्टम् - ३

श्रीसुमध्वविजयव्याख्यानेषु उदाहृत प्रमाणवचनानि

अ

अगम्यत्वाद्धरिः १/५-वि.
अथ कस्मादुच्यते ब्रह्मेति ६/२६-वि.
अथ हैनमुपाक्रोशात् सत्यं भिदा ६/२९.भा.
अन्धन्तमः प्रविशन्ति ६/३०-वि.छ.
अन्नमशितं त्रेधा विधीयते ४/७-वि.
अप्यच्युतो गुरुद्वारा १/५-वि.छ.
अपरोक्षं परोक्षं वा ४/२७-वि.छ.
अपालामिन्द्रत्रित्व्यकृणोत्सूर्यत्वचम् ६/१७-भा.वि.छ.
अयं वै हरयोऽयं वै ८/४१-वि.छ.
अवैष्णवस्य वेदेऽपि ७/१३-वि.छ.
असौ य एषि वीरका ६/१७-भा.वि.

आ

आकूतिं रुचये प्रादात् (भागवतम्) ७/१५-छ.
आत्मेत्येवोपासीत ६/२९-भा.वि.
आदित्यचन्द्रावनलानिलौ ३/३५-वि.छ.
आपो नारा १/१ वि.
आरब्धान्तगामि १/१३-छ

इ

इतिहास पुराणाभ्याम् ६/२५-वि.छ. ७/१३-छ.
इन्द्रे शौर्यं बलं वायौ १/१०-वि.
इत्युक्ता अपि भीष्माद्याः ६/२८ वि.छ.

उ

उपक्रमोपसंहारावभ्यासो ४/१०-छ.
उपनिषदमावर्तयेत् ४/४७-वि.
उरसा सिरसा दृष्ट्वा ३/६-वि.

ए

एकमात्रो भवेद्ध्रस्वः ६/२-वि.छ.

क

कन्या३वारवायती ६/१७-भा.वि.छ.
कृत्स्नादेव गृहिणः ४/३०-वि.
कल्यावेशेन मोहिताः ६/२८-वि.छ.

ग

गत्यर्थकाश्च ज्ञानार्थकाः २/३-वि.

च

चतुरस्रो घटिकाः प्रातः ६/४३-वि.छ.

त

तत्सृष्ट्वा तदेवानुप्राविशत् ६/७-वि.
तीर्थविघ्नकरं दुष्टम् १/९-वि.
त्रयोऽर्थाः सर्ववेदेषु ६/४-भा.वि.छ.
तृतीयमस्य वृषभस्य दोहसे २/३-वि. & ४/३३ वि.छ.

द

दशप्रमतिं जनयन्त ४/३३-भा.
देवा एव ब्रह्मचारिणो ४/३०-वि.
देवं नारायणं नत्वा ६/३९-वि.छ.
दशेति सर्वमुद्दिष्टम् ४/३३-वि.छ.

ध

धर्मो हि सर्वविदुषामपि ४/५-वि.छ.

न

न केशवे रथे कश्चित् ८/१९-वि.

न वा उ देवा
६/१३-भा.वि.छ.

नास्ति नारायणसमम् ७/३३-वि.छ.

प

पराक्रमे दक्षयशप्रतापैः १/१४-वि.

पराक्रमोत्साहमतिप्रतापैः १/१०-भा.

पराक्रमौदार्ययशः प्रतापैः १/१४-छ.

पुन्नाम्नो नरकात्त्राता २/१७-वि.छ.

प्रजां मिमङ्क्षोरिव १/१४-वि.

प्रातरुत्थाय सन्ध्यामुपासीत ६/२६-वि.छ.

फ

फल्गुनस्यामले पक्षे द्वादशाहं २/२१-वि.

ब

बळित्था तद्वपुषे १/६-छ.

भ

भक्तिर्नाम माहात्म्यज्ञानपूर्वकसुदृढस्नेहः १/५-छ.

भूयिष्ठां ते नम उक्तिं विधेम १/२५-छ.

भूषन्नयोधि बभूषु १/६-छ.

म

मणिर्मुखं प्रधानम् २/१-वि.

मध्वित्यानन्द उद्धिष्टो २/३-वि.

मय्यनन्तगुणेऽनन्ते गुणतो २/१६-वि.छ.

महिदासाभिधो जज्ञे (ब्रह्माण्ड पुराणम्)
८/३५-वि.छ.

माधवश्चतुरो मासान् ६/५६-वि.छ.

मोक्षो हि सर्वपुरुषार्थोत्तमः(विष्णुतत्त्वनिर्णयः)
२/५२-वि

य

यदहरेव विरजेत् ४/२३-भा.वि.

यद्यदाचरति श्रेष्ठः ४/२-वि.

यस्य देवे परा भक्तिः १/५-वि.छ.

युगत्रयावतारत्वात्त्रियुगो विष्णुः २/२-भा.वि.छ.

र

रसोऽप्यस्य परं दृष्ट्वा ७/२६-वि.छ.

व

वायुरस्मा उपामन्थत् २/४१-भा.

वासुदेव धरणीधर चक्रपाणे ६/२९

वासुदेवो वा इदमग्र आसीत् ६/२९-भा.वि.छ.

विश्वमेव हि सर्वम् ६/७-भा.

विश्वो हिरण्यगर्भोऽग्निर्यम ६/७-भा.वि.

विश्वं विष्णुः ६/५, ७-वि.

वृद्धौ च मातापितारौ ४/२२ भा.वि.छ.

श

श्रवणं कीर्तनं विष्णोः १/२१-छ.

स

स इद्भोजेयो गृहवे ६/१३-भा.वि.

सङ्गः सर्वात्मना त्याज्यः ४/३९-भा.वि.

सच्छब्द उत्तमं ब्रूयात् ८/१-छ.

सहस्रार्थान् ऋषीनेको यौगपद्येन ७/३४-वि.छ.

सर्वं पूर्णमिहोच्यते ६/७-भा.

सर्वोत्कर्षे देवदेवस्य विष्णोः ६/२६-छ.

ह

हनुशब्दो ज्ञानवाची १/१०-वि.

ज्ञ

ज्ञाने विरागे १/१०-छ.

परिशिष्टम् - ४

श्री सुमध्वविजये उदाहृत सूक्तयः

अ

अध्यापकाय वितितार विमोक्षबीजं गोविन्दभक्तिमुचितां गुरुदक्षिणां सः ३/५५

अभूदसंगोऽपि स तत्सुसङ्गवानसंगभूषा ननु साधुसंगिता ४/३९

अव्ययं सततमप्युपभुक्त्या वित्तमग्र्यमिव दूरयियासुः । ६/३२

उ

उदयति घनमालालीनभानौ च भानौ ननु जननयनाब्जैर्लभ्यतेऽलं विकासः । २/५४

क

किन्तूत्तमश्लोकशिखामणीनां मनोविशुद्धचै चरितानुवादः । १/७

करतले खलु कन्दुकवत्सदा सकलया कलया सह विद्यया । ३/४२

ग

गोविन्दसुन्दरकथासुधया स नृणामानन्दयन्न किल केवलमिन्द्रियाणि । २/१५

ज

जनमनोनयनाम्बुजभास्करो ३/५

त

तत्पादसेवारतिरेष नैच्छत् तथापि भोगान् ननु सा विरक्तिः । १/२४

त्राता य एव नरकात् स हि पुत्रनामा मुख्यावनं न सुलभं पुरुषादपूर्णात् । २/१७

द

दानं ध्रुवं फलति पात्रगुणानुकूल्यात् २/३०

देवतास्वसुलभा प्रतिभा ते मानुषेषु चपलेषु कथा का। ६/१०

न

नतिर्न शुश्रूषुजनाय शस्यते नतं भवद्भ्यां स्फुटमत्र साम्प्रतम्। ४/१७

नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः ।
नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्तिसदृशं हितरूपम् ॥ ६/४७

न रमापि पदाङ्गुलीलसन्नखधूराजदनन्तसद्गुणान् ।
गणयेद्गणयन्त्यनारतं परमान् कोऽस्य परो गुणान् वदेत् ॥ ७/४६

प

परतत्त्ववर्णनमयोग्यतावते ननु हव्यदानमिव निन्द्यते शुने। ८/४९

ब

बुधोऽभिधानं श्रवणं बुधेतरो ध्रुवं विदध्याद्विमुमुक्षुरात्मनः। यतिर्विशेषादिति ४/४७

म

मुकुन्दभक्तयै गुरुभक्तिजायै सतां प्रसत्त्यै च निरन्तरायै। १/५

मुखरमिच्छति को मृगधूर्तकं प्रकृतहुङ्कृतसिंहशिशौ सति ३/२४

अहो महीयो महतां विडम्बनम् ४/३५

य

यच्छक्तिगुप्तिरहितानलमस्मि हन्तुं लोकेश्वरः स बत बालतमः किलेति २/३४

यदा विरक्तः पुरुषः प्रजायते तदैव संन्यासविधिः श्रुतौ श्रुतः। ४/२३

व

विज्ञातभारतपुराणमहारहस्यं यं भट्ट इत्यभिवदन्ति जना विनीतम् २/१४

विश्वस्य चेष्टितमहो यदनुग्रहेण सर्वं तदस्य पवनस्य विडम्बनं हि २/४४

श

शुभान्तरायं न भवांश्चरेदिति ४/२१

स

समर्प्य कृत्यानि कृती कृतानि व्यासाय भूम्ने सुकृतानि तावत्।
करिष्यमाणानि च तस्य पूजां सङ्कल्पयामास स शुद्धबुद्धिः ॥ १/३३

साक्षादमानवनवाकृतितः स लेभे बीजच्छलेन पुरुषार्थमहो विशिष्टम् २/५२

सन्तो हि गुणांशतोषिणः ५/२६

ह

हेतोः कुतश्चिद्विमनीकृतोऽप्यहो गुणाब्धिलुब्धः सुजनः प्रसीदति ५/२३

परिशिष्टम् - ५

श्री सुमध्वविजयव्याख्यानेषु उदाहृतकोशनामानि

विश्वपतितीर्थ व्याख्यानोदाहृतकोशनामानि

१. श्री विश्वपतितीर्थैः उदाहृतकोशनामानि।

१)	अमरकोशः	-	१/१, ४, १४...इत्यादि
२)	हलकोशः	-	१/१, ९, १३.....इत्यादि
३)	हेमचन्द्रकोशः	-	१/२, ३२, ४१....इत्यादि
४)	विश्वकोशः	-	१/२, ८/१
५)	यादवकोशः	-	१/२, ९। ६/३२....
६)	वैजयन्ती कोशः	-	१/३, १४, १७....इत्यादि

छलारी शेषाचार्य व्याख्यानोदाहृतकोशनामानि

२. श्री छलारी शेषाचार्यैः उदाहृत कोशनामानि।

१)	अमरकोशः	-	१/१, २, ४.....इत्यादि
२)	विश्वकोशः	-	१/१, २, ४...., ७/१
३)	वररुचिकोशः	-	१/१७
४)	हलकोशः	-	३/२८
५)	धनञ्जयकोशः	-	१/३२, ४५, ६/३२....इत्यादि
६)	भास्करकोशः	-	१/४०, ५५, २/७....इत्यादि .
७)	शब्दार्णवः	-	१/३१
८)	विश्वप्रकाशः	-	६/५६
९)	रत्नमाला	-	१/२, ३/३८, ४/३८, ६/३४....इत्यादि
१०)	वैजयन्ती कोशः	-	४/३, ५/३९।
११)	हेमचन्द्र कोशः	-	६/३३, ७/
१२)	अभिधानम्	-	३/५, ४३, ३/३८.....इत्यादि

परिशिष्टम् - ६

पाठभेदाः

सर्गः	श्लोकः	विश्वपतिपाठः	छलारीपाठः
I	३८	उरुतेजसापुः	गुरुतेजसापुः
	४४	ह्रदयं मुकुन्दे	ह्रदये मुकुन्दम्
	४९	कलुषीचिकीर्षुः	कलुषं चिकीर्षुः
II	४	मरुदनर्घम्	मरुदनर्ध्यम्
	६	सकुतूहलिनि	सुकुतूहलिनि
	२३	हिताय	सुखाय
	३१	जगत्यनर्घम्	जगत्यनर्घ्यम्
	३२	पुरालयं तम्	पुराधिवासम्
	३६	रुचितम्	रुचिरम्
III	२५	कथं कथय	कथां कथय
	३४	सुतं सुकुमारकम्	सुतं समलङ्कृतम्
	४४	पवनोऽसकौ	पवनो ह्यसौ
IV	१९	व्रतीश्वरानुव्रतम्	यतीश्वरानुव्रतम्
	२०	सञ्जातकोपाकुलितो	स जातकोपाकुलितो
	३९	साग्रहम्	सादरम्
V	७	विदुषां सभासु	विदुषः सभासु
VI	३०	कृष्णलालित	कृष्णपालित
VII	३	शुभपक्षिभिर्वृतम्	शुभपक्षिभिर्युतम्
	५७	नन्दयन्	मानयन्
VIII	११	प्रकृतितोः महत्	प्रकृतितो गुरुम्
	३१	अभिनन्दितः	अभिवन्दितः
	४३	सङ्कथाः	सत्कथाः
	४४	धैर्यवद्यदुदीर्यमाणम्	धैर्यवान् मदुदीर्यमाणम्
	४६	कवे	कवेः

परिशिष्टम् - ७

भावप्रकाशिकागततुळुपदानि

रजतपीठपुरम् (२/६)	ओडिपु
शिवरूप्यम् (२/१०)	शिवळ्ळी
पूर्वालयः (२/३०)	मूडिल्लायः
बंधुगृहम् (३/१)	नडुवैरी
काननदेवतासदनम् (३/४)	कुडुवूरु
घृतवल्ली (३/२१)	नेयंपळ्ळी
नारिकेलसद्म (३/४)	ताळेकुडे
पूगवनम् (३/४९)	तोटन्तिल्लायः
महानदी (४/१९)	नेत्रावती
ग्रामवरम् (४/१९)	कार्यूरु
मठान्तरम् (४/१९)	कुत्याडि
अप्रांशुनूत्नोपपदाधिवासः (५/३८)	कुदु(दि)पुस्तूरु
धौतपटोद्भवः	मडिनाय

पदार्थदीपिकोद्भोदिकागततुळु नामानि

त्रिकुलानि (२/११)	वडिप्पे, पार्पदाने, कबेकोडे
वृतवल्ली (३/२१)	नेयंपल्ली

परिशिष्टम् - ८

श्रीसुमध्वविजय श्लोकानुक्रमणिका

अ

अक्लिष्टशब्दान्वयमेष सम्भवत्	५/२१
अखण्डितोपन्यसनं विसंशयम्	४/४८
अगणयन्न शिवम्	३/२४
अगणय्यसद्गुणगणो विदूषणः	८/१३
अगणेयगुणैः सुपूरितम्	७/२४
अगणेयगुणार्णवोऽमलः	७/१८
अगाधमात्मन्यतिवेलमुद्धतम्	५/१४
अङ्गुष्ठमात्रं जठरे प्रतिष्ठितम्	५/३३
अचलासनयोगपट्टिका	७/३०
अचाल्यमानः स गुरुः	५/४६
अतिचित्रविचित्रपत्रिणम्	७/१२
अतिदुर्जयेन्द्रियजयादिरूपिणा	८/८
अतिशान्तवपुर्निशाकरः	७/७
अत्र जन्मनि न यत्पठितं ते	४/५३
अत्रस्तमेव सततं परिफुल्लचक्षुः	२/३१
अथ कथां कथयेति तदा	३/२५
अथ कदाचन सुन्दरनन्दन	३/११
अथ कदाचन सोऽध्ययनान्तरे	३/५०
अथ खण्डितेश्वरधनुः	८/२५
अथ तस्य स वेदिकान्तरे	७/१४
अथ बादरायणसहायसम्पदा	८/६
अथ भार्यया हुतवहम्	८/३४
अथ हैमवते तटान्तरे	७/१
अथापि मिथ्या विमतं मतत्वतो	५/५
अथैष सल्लोकदयासुधार्द्रया	४/१
अथैष वेषान्तरभस्मलीनः	१/४०
अथोपगम्यैष गुरुं जगद्गुरुः	४/३०
अदार्यसालावलिदारणेन	१/१३
अधिगतोपनिषच्च सकृच्छ्रुता	३/५४
अधीत्य धर्मेण षडङ्गमागमम्	५/५०
अधुना कलिकालवृत्तये	७/२२
अनधिकैरधिकैश्च वयस्यथो	३/४३
अनन्यसङ्गाद्गुणसङ्गिता हरेः	४/२
अनवलोक्य सुतं सुतवत्सलो	३/८
अनन्तमात्रान्तमुदाहरन्ति	४/३२
अनाकुलं गोकुलमुल्ललास	१/२
अनुग्रहं तं प्रतिगृह्य सादरं	४/३९
अनुत्तरज्ञः स तमर्थयन्	४/१८
अपक्षपाती पुरुषस्त्रिलोक्याम्	१/१६
अपनेतुमेनमनयं कृतं खलैः	८/४६
अपि ततोऽहमुपेत्य	३/१४
अपि त्रिलोक्या बहिरुल्लसन्ती	१/३
अपिधाय सूत्रहृदयम्	८/४५
अपि वामनो ललितबाल्यवानयम्	८/१७
अपि सप्ततया विराजितान्	७/१५
अप्रयातमपि देशमशेषम्	६/२२
अप्रांशुनूत्नोपपदाधिवासजः	५/३८
अभिवन्दितः पवननन्दनादिभिः	८/३१
अभूत्कुशास्त्राभ्यसनम्	४/८
अमरेन्द्रवैरिभुजदण्डमण्डल	८/१५
अमितप्रमतिं श्रुतीश्वरः	७/५२
अमितां मितामपि गिरम्	८/४७
अमुष्य शिष्या विनयेन	७/५६

अमृतात्ममहाफलप्रदम् ७/१३
अयि स्वमिन् दुष्टान् दमय ३/५६
अयि सुतेदमुदाहर तत्त्वतो ३/११
अरिवारिजलक्षणोल्लसत् ७/३५
अरुणाश्मदलान्तरोल्लसत् ७/३९
अर्थं कमप्यनवमं पुरुषार्थहेतुम् २/१२
अवगम्य तं मुनिगणा वरिष्ठतो ७/५८
अवदतीति पितर्यपि चोदिते ३/३०
अवलोकितलक्षणः स तैरिति ७/१०
अविरलैर्गरलोष्मभिराकुली ३/३८
अवैदिकं माध्यमिकम् १/५०
अव्ययं सततमप्युपभुक्त्या ६/३२
अशेषशिष्यैश्च तदाज्ञया तदा ४/५२
असत्पदेऽसन्सदसद्विविक्तम् १/५१
असमेऽनधिके सुसाधिते ७/३४
असावसूयन् द्विनवप्रकारतो ५/१२
अहं स्वयं ब्रह्म न किञ्चिदस्ति ४/१०

आ

आदेशमौलिमणिमुज्ज्वलवर्णमेनम् २/४
आनन्दरूपस्य परस्य पात्रधीः ५/२
आनिवृत्तवपुषा गुरणाऽऽरात् ६/५२
आभाष्य सोऽत्र जनताम् २/८
आम्नायास्त्रय इव तत्त्वबोधकास्ते ८/५४
आरोग्यशालिनि पुरेव तदाऽपि २/४१
आविश्य पूरुषमुवाच महाग्रहोऽसौ २/३४
आविश्य वेश्म निजनन्दनमिन्दुवक्त्रम् २/२८
आविष्टवानकुशलं पुरुषं प्रकृत्या २/७
आश्रमे निजजनानिह दृष्ट्वा ६/५३
आस्यतामित्युदीर्योपविष्टे ७/५७

इ

इत एव पुराणगौरगौ ७/२०
इतस्तृतीये दिवसे द्युनिम्नगा ४/४१
इति चिन्तयता महाधिया ७/४८
इति चिन्तयन्नविरलान्तरो ८/४२
इति तं ब्रुवाणमयमब्रवीद्विभुः ८/५०
इति बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः ४/५४
इति ब्रुवाणे तनये ४/२९
इति ब्रुवाणे प्रतिपादयत्यलम् ५/१९
इति विहरति मह्यां विष्णुदासेऽपि २/५४
इति सा महीधरमुखाद्विनिःसृता ८/५२
इतिहाससुन्दरपुराणसूत्र ८/४
इतीदमादिश्य वचो वचस्विनि ४/१२
इत्थं विचिन्त्य स विचिन्त्यमनन्यबन्धुः २/१९
इत्थं हरेर्गुणकथासुधया सुतृप्तो २/१६
इत्यस्य वाचा शरदेव भासिता ५/२९
इत्युदीरयति विस्तृतचित्ते ६/५
इदमाप शुकोऽपि लालनम् ७/५५
इदमुवाच विचारविचक्षणः ३/२३
इन्द्रायुधं हीन्द्रकराभिनुन्नम् १/२९
इन्दीवरश्रीजयिसुन्दराभम् १/३५

उ

उचितां गुरुतां दधत् ७/२९
उच्चावचा येन समस्तचेष्टाः १/७
उत्तुङ्गभृङ्गलसितस्य महिष्ठमूर्तेः २/४६
उदपादि धर्मतनयो ह्ययम् ८/४०

ऋ

ऋजुपुङ्गवस्य परिजानतः ८/५

ए

एतत्प्रतीपं किल कर्तुकामा १/४६
एतदर्थमतिसूक्ष्ममपि त्वम् ६/४०

ऐ

ऐतरेयमथ किञ्चन सूक्तम् ६/१

क

कथयतां प्रथमे कथयत्यलम् ३/२८
कथयत्यमुं परशुभासमानगो ८/१८
कदाचिदत्रोपययौ यतिः सखा ५/३
कदाचिदाप्यालयबुद्धिरालयम् ४/२७
कदाचिदेनं प्रतिगम्य सौम्यधीः ५/२३
कनकातुलतालसन्निभः ७/६
कन्यकादृतसुरेन्द्रवपुः ६/१७
कमलाकमलासनानिलैः ७/२५
कमलामयं कमलपत्रलोचनाम् ८/२६
करतले खलु कन्दुकवत् सदा ३/४२
करुणाकरः स वसुदेवमोददो ८/१९
कर्णान्तमानीय गुणग्रहीत्रा १/१४
कर्तव्यमौढ्यमभिपद्य निरूप्य २/३८
कर्माणि कुर्वन् परमाद्भुतानि १/११
कलिकालकालितगुणे धरातले ८/४९
कालः स एव समवर्तत २/५
काष्ठमौनमदधादुपवासम् ६/४४
कान्तादृतौ समुचितेऽथ बभार गर्भम् २/२३
कान्ताय कल्याणगुणैकधाम्ने १/१
किं वर्णयामः परमं प्रसादम् १/२६
कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः १/४३
केवलं न सकलाः ६/२०
क नु यियाससि तात न सांप्रतम् ३/३
क्रियाकलापं सकलम् ४/३१
क्षणेन कौपीनधरो निजम् ४/२१

ग

गते दिनानां दशके समासके ४/४३
गरुडतुण्डमिव प्रतिपन्नवान् ३/४०
गिरीशगुर्वमरेन्द्रमुखैश्च ३/४१
गुणनिका चरणादिकगोचरा ३/५१
गुणानुरूपोन्नति पूर्णबोध ४/३३
गुरुभक्तिभरानताकृतिः ७/४९
गुरोरुपान्ते श्रवणे रतैर्द्विजैः ४/४९
गुरोः स्वशिष्यं चतुरं चिकीर्षतः ४/४१
गोभिः समानन्दितरूपसीतः १/१५
गोविन्दसुन्दरकथासुधया २/१५
ग्रहणनिग्रहणे ग्रहणे दृढे ३/४८

च

चतुरश्चतुराननः स्वयम् ७/९
चतुराननाय चतुरः पुरा ८/१४
चिरात् सुतत्त्वं प्रबुभुत्सुना ४/३८
चिन्तामणीन्द्रमिव चिन्तितदम् २/४९

ज

जगतां चतुर्दशतयम् ८/१०
जनकवाचमिमामवधारयन् ३/१२
जनकेन सोऽथ विरहासहिष्णुना ८/२१
जनसदोगतिसूचितवर्त्मना ३/९
जनो नमेन्नापरथेति मत्वा १/४९
जलजायतलोचनस्य ७/४१
जलविहारपराजयिभिः स्पृधा ३/४६
जाज्वल्यमानस्य वने वनेऽलम् १/३८
जाज्वल्यमानोज्वलराघवाग्नौ १/१८
जितकुमारगुणं सुकुमारकम् ३/३६
जेष्यन् कदाचित् किल ५/३०
जैत्रं प्रजिज्ञासु कुतूहलाकुलम् ५/१०
ज्ञानार्थमेव यदभूदसुदेवः २/२९

त

ततस्ततो विस्मितलोचनैः ५/४९
ततः क्रमेण प्रचलन्नुपेयिवान् ५/३६
ततो निवृत्तः परमेव पूरुषम् ५/४८
तत्त्वेऽप्यतत्त्वे विमतेऽनुमाम् ५/७
तत्प्रसङ्गबलतोऽखिलविद्यापाटवम् ६/१६
तत्प्रीतये रजतपीठपुराधिवासी २/६
तत्र तत्र स जगत्त्रयचित्रम् ६/३७
तदाज्ञयोपागतजाह्नवीजले ४/४२
तदाद्यपद्मस्थमवद्यमण्डलम् ४/४५
तदितरायतनात्तु यदागमम् ३/१३
तदिदं वपुरस्य दृश्यते ७/२३
तनुनिम्नसुनाभिशोभिते ७/३२
तमपश्यदाश्रमवरे प्रभूतधीः ८/७
तमाव्रजन्तं यतिवेषधारिणम् ५/४३
तमिमं प्रविशन्तमाश्रमम् ७/५
तमुपगृह्य सुतं सुतपोनिधिः ३/३६
तमोनुदाऽऽनन्दमवाप लोकः १/४
तरस्विनः प्रोच्चलितानधीरान् १/४२
तर्कतन्त्रकुशलानपि पुंसः ६/१२
तव कीर्तिरार्तिमतिमात्रमानयेत् ८/५१
तस्य प्रभोश्चरणयोः २/१४
तस्यैव वायोरवतारमेनम् १/२८
तस्योरुदुर्गर्ववतो जिगीषया ५/९
तं पूर्वपक्षसितबिंबमिव २/२४
तं स्फुटं प्रकटयन् स ६/१४
तां मन्त्रवर्णैरनुवर्णनीयाम् १/६
तीर्वैः पयोव्रतमुखैर्विविधैः २/२१
तेजोऽमृतं नन्दनगात्रपात्रगम् ५/२४
तेन तत्प्रवचने विहितेऽलं शुश्रुवुः ६/४१
त्राता य एव नरकात् स हि २/१७
त्रिगुणाकृतिप्रकृतितो महत्ततः ८/११
त्रिजगत्तिलकालिकान्तरे ७/४४
त्वरितमुद्यतविस्तृतमस्तकः ३/३९
त्वरितमेत्य स काननदेवतासदनमत्र ३/४

द

दग्ध्वा पुरं योगबलात्स १/३२
दयितः सतामृषभ एष भूधरो ८/३९
दुर्गमार्गगतमप्यनुधावन् ६/५१
दुःशासनेनाकुलितान् प्रियायाः १/३७
देवतास्वसुलभा प्रतिभा ते ६/१०
देवादिसद्भिरनुपालितयाऽऽदरेण २/४३
देशमेनमचिरादुपयातः ६/१९
दोषेयुषां सममनेन २/३३
द्विजवृन्दकृतं कुतूहलात् ७/४०

ध

धवलेऽस्य मनःपयोनिधौ ७/१९

न

न कुतूहलिता कुतूहलम् ७/४७
नक्तमेव भगवत्युपयाते ६/४६
नतिर्न शुश्रूषुजनाय शस्यते ४/१७
नत्वा हरिं रजतपीठपुरालयं तम् २/३२
ननु केवलमेव वैष्णवम् ७/२७
ननु सुताविथं कथितम् ३/२७
नन्वस्य सूत्रस्य ५/२०
न पुत्र पित्रोरवनं विना शुभम् ४/२२
नमो नमो नाथ नमो नमस्ते १/२५
नयनद्वयेन नलिनप्रभामुषा ८/९
न रमापि पदाङ्गुलीलसत् ७/४६
नरसिंह एष विददार ८/१६

नवमम्बुधरं विडम्बयत् ७/४५
न हि हरिं सततं न नमत्यसौ ३/७
नलिननाभनिभालनसंमदा ३/५
नाथ नाथ बत नोऽत्र विनाथान् ६/४९
नाथस्य भूरिकरुणासुधया २/२२
नाथं निषेव्य भवनानतिदूरमाप्तः २/२७
नाथः कलौ त्रियुगहूतिः २/२
निगद्यतां गद्यमिहैव पञ्चमे ४/५१
निगमसन्मणिदीपगणोऽभवत् १/५४
निजहृत्कमलेऽतिनिर्मले ७/१७
निजे जने किं नमसीति पृच्छति ४/५
निबध्य सेतुं रघवंशकेतु १/१७
निरवग्रहमुर्वनुग्रहम् ७/२१
निरङ्गरागं मुखराजवर्जितम् ४/३५
निशाचरारेरिव लक्ष्मणः पुरा ४/२६
नीरजा मलयमण्डलवृत्त्या ६/३४
नूनं पिपासुरतिरोदिति हन्त बालो २/३९
नेदृशं स्थलमलं शमलघ्नम् ६/४७

प

पत्न्या समं भगवतः २/२०
पदमुदीर्य जवेन यियासितम् ३/४४
परप्रकारेष्वपि संभवत्सु ४/५०
परमात्मने सततमेकरूपिणे ८/४१
परमाश्रमिणां गतश्रमो ननु ७/८
परिचराग्निगुरू चरितव्रतः ३/३५
परिषदा नितरां परिवारितः ३/२२
पर्याकुलानेकसरस्वतीततीन् ५/३४
पातुं पयांसि शिशवे २/३०
पादसुन्दरपदक्रमभावैर्भासिताम् ६/२५
पादारविन्दप्रणतो हरीन्द्रः १/१२
पादोपान्तनमन्महामुनिगणम् ६/५७
पुच्छान्तमच्छमवलम्ब्य कदाचिदेष २/४५
पुर एव पूरितमपूरयत् ८/३
पुरे कुमारानलसान्विहारान् १/३०
पुरैष कृष्णाकरसिद्धशुद्धिमत् ४/७
पूर्वेऽपि कर्दमपराशरपाण्डुमुख्या २/१८
पृथुकुंभकर्णगजराजमुद्धतं ससहोदरम् ८/३३
पृष्ट्वाऽवगम्य सकलम् २/४०
पौत्रे पवित्राह्वयजामिपौत्रे १/४४
प्रणमामि पदद्वयं विभोः ७/२६
प्रतिभाप्रभाप्रमुखसद्गुणैः ८/१
प्रतीक्षमाणं तमनुग्रहं मुदा ४/१४
प्रत्ययप्रकृतिसङ्गमभङ्गीम् ६/७
प्राग्रिङ्खणं स्वयमथ स्थितिमेष २/४४
प्राज्ञैर्महापूरुषसर्वलक्षणैः ५/४०
प्रादिभेदमविदन् गुणय त्वम् ६/१५
प्रीतयेऽस्य पुरतो वरभाष्यम् ६/३९
प्रियवयस्यशिरोगुरुवेदनामशमयत् ३/५३
प्रेष्ठो न रामस्य बभूव १/२४
प्रैरयत् स्वचरणे रतचित्तम् ६/४५
प्लवनतेजसि हन्त न केवलम् ३/४५

ब

बहुविधैश्चरितैरिति चारुभिः ३/५१
बहुसत्वगुणं सविकम् ६/५५
बालस्य बालपरिलंबनगोचरम् २/४८
बहुश्रुतत्वाद्यदि तत्सहे बलान्न ४/२४
बुद्धिशुद्धिकरगोनिकराढ्यम् ६/३५
बुद्ध्यब्धिना वादिवरेण ५/१६
बुधोऽभिधानं श्रवणं बुधेतरो ४/४७
बुभुत्सत्या मत्सरवर्जितान् ५/२२

भ

भजतां वरतर्कमुद्रया ७/३६
भवतोरितः सततसेवनामृते ८/४८
भवत्प्रवक्तृत्वसमर्थता न मे ४/४६
भिदा सुसाध्येत्यनुमानमत्र तैः ५/४
भिक्षाप्रदात्राऽत्र परिक्षितुम् ५/३१
भिक्षावसाने द्विशताधिकैः फलैः ५/३२
भुक्तं च जीर्णं परिपन्थिदत्तम् १/३१
भुजगेश्वरोऽपि भुवनेश्वरप्रियः ८/२०
भुजङ्गभूतेशविहङ्गपादिकैः ४/३५
भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषम् ६/२४
भोगाधिका भोगवतोऽरुणाक्षान् १/३९

म

मज्जनं व्यधित शीतलगङ्गावारि ६/४३
मतमित्यवेत्य महितम् ८/४३
मम प्रभोर्नापरथा हि शोभते ४/३
मसृणत्वचमुन्नतं ततम् ७/११
महवता स्वजनेन समीरित ३/२१
महागदं चण्डरणं पृथिव्याम् १/३६
महिदासपूज्यचरणो ८/३५
मण्डयन् भरतखण्डमखण्डम् ६/३८
मन्त्रयन्त्र इति ते द्विजवर्या ६/१३
मालाकृतस्तच्चरिताख्यरत्नैः १/८
मुकुन्दभक्तयै गुरुभक्तिजायै १/५
मुदमाप्य तत्र दयितो ८/३२
मुनिमण्डलमध्यवर्तिनम् ७/१६
मुनिसप्ततन्तुकृतवैरबन्धनम् ८/२२
मौलिसंग्रहविकर्षणदूनाम् ६/२७

य

यतिर्यतात्मा भुवि ४/६
यद्यदेव सपदि प्रकृतं स्यात् ६/२१
यदा विरक्तः पुरुषः प्रजायते ४/२३
यदि राजविभूषणैर्युतौ ७/५४
यदेतदात्मैक्यमुपास्ति चोदितम् ४/११
यद्ब्रह्मसूत्रोत्करभास्करं च १/५२
यमजाम्युदवाह ऊर्जितो ७/५३
याति तावदधुनैव जनोऽयम् ६/४८
या याः प्रसक्ताः परिषत्सु ५/४५
यावदर्थशतकं न विशङ्कः ६/८
यियासति स्वस्तटिनीम् ४/४०
ये ये गुणा नाम जगत्प्रसिद्धाः १/१०
यो भूरिवैरो १/४७

र

राजसूयमुखसन्मखवृत्ताम् ६/२६
राज्याभिषेकेऽवसितेऽत्र सीता १/२२
रामाधिवेशितहरिस्वसृमौलिमाला २/११
रामार्चने यो नयतः प्रसूनम् १/१९
रुचिराश्रमाजिरचिताग्रयतेजसा ८/२९
रुचिरेण वरैणचर्मणा ७/३१
रेमेऽच्छयोपनिषदेव महाविवेको २/१३
रोदे क्रियासमभिहारत एव २/३७

ल

लक्षणान्विततया वचनेऽस्मिन् ६/३
लज्जानतः स्वार्थमथार्थयन् ५/४४
लब्धं सुतादिति वदन् २/५२
लिपिकुलं ननु तात ३/१९
लीलाकरेण स करेण २/५१
लीलावसानसमये सहसा २/५०

लीलाविवादे गुरूणा जगद्गुरोः	५/२५	विविधा विधाय किल तत्र	८/४३
लीलां करोति नु	२/४७	विहरतीति पठत्यपि न स्फुटम्	३/४९
व		विहितसाधनसाधितसत्क्रियो	३/३५
वदोत्तरं भाति यदीह कुर्महे	५/३९	विश्वं मिथ्या विभुरगुणवान्	१/५५
वरविमानगिरावपि चण्डिका	३/१७	विष्णोः पदश्रिद्धकसन्निरासी	१/३५
वराश्रमस्ते जरतोरनाथयोर्न	४/१६	विष्णोः पदान्तं भजताऽनिलेन	१/४५
वराश्रमाचारविशेषशिक्षणम्	४/३६	वेदशास्त्रचतुरैरिह विद्या	६/११
वराश्रमाप्तिं मम संवदस्व माम्	४/२८	वेदाद्रिसद्रजतपीठपुरेश्वराभ्याम्	२/१०
वर्णयामि तदहं सकलं वः	६/६	वेदान्तमार्गपरिमार्गणदीनदूना	२/३
वर्णसौष्ठवगरिष्ठमतूर्णम्	६/२	वेदान्तविद्यानिजराज्यपालने	५/१
वानरेन्द्र इव वायुजवोऽसौ	६/५४	वेदान्तसूत्राणि कृतान्तवित्तमो	५/३७
वार्यतां बुधजनैर्ननु	६/३०	वेदिजामिव पुरा भरताग्र्यः	६/३१
वासुदेव धरणीधर	६/२९	वैराग्यवैयात्यसुवाक्त्वपूर्वकैः	५/२७
वासुदेवपदसन्ततसङ्गी	६/३६	व्याख्यान् कदाचिन्मणिमद्विनिर्मितम्	५/१७
वासुदेवमिह वासुदेवता	२/५३	**श**	
विकल्पकोटीरथ खण्डयन् द्रुतम्	५/१३	शब्दभेदमवधार्य	६/४२
विचिन्तयन्नित्थमनन्तचिन्तकः	४/४	शिशुरसौ प्रतिभाम्बुधिरित्यलम्	३/२०
विचिन्त्य विद्वान् स निरुत्तरीकृतः	४/२५	शृणु देवकार्यमवधार्य	८/४४
विज्ञानभानुमति कालबलेन	२/१	शृङ्गारसिन्धुं स भुजङ्गशायिनम्	५/४७
विद्योरुद्युतिधीरतारकतिरस्कारे	५/५२	श्यामं स्मितास्यम्	१/२१
विधानमात्रं तदुपाददे तदा	५/२६	श्रवणामृतगीर्गणैर्द्विजैः	७/३
विधिवायुवीन्द्रशिवकौशिकेशकान्	८/१२	श्रीवल्लभाज्ञां ससुरेन्द्रयाञ्चाम्	१/९
विनयाभरणेन भूषितः	७/५०	श्व एव वादोऽस्त्विति वादिनौ	५/१५
विनीतमाम्नायशिरोविशारदम्	४/९	श्वित्रिणी भवति तत्पदवाच्या	६/१८
विभवाभिभवोद्भवादिकम्	७/४३	**स**	
विरहदूनतयोद्गमनोन्मुखम्	३/१०	सकललक्षणशिक्षणमूलभूः	३/५२
विरहितस्वजनं चरणप्रियम्	३/१५	सकलशब्दमयी च सरस्वती	३/१८
विरोधि वेदान्तकृतान्तसम्पदाम्	५/२८	सकलास्तकलङ्ककालिमस्फुरत्	७/३८
विविधवेदतया विजिहीर्षवो	३/३३	स कृष्णवर्त्मा विजयेन युक्तो	१/४१
विविधशाखिपदार्थनिवदने	३/२९	स चिन्तयन् पुत्रमनोरथम्	४/१९

स जगाम मातृजनतुष्टये	८/२७	सुजनाय दत्तपद आत्मशुद्धिदः	८/३८
स जननीसहितो जनकं गृहे	३/२६	सुतपोरुचेरयमपापकर्दमान्ननु	८/३६
सज्जनैः कतिपयैरतिदीनैः	६/२८	सुतं यतीन्द्रानुचरं विरागिणम्	४/१५
सज्ज्ञानायानन्दविज्ञानमूर्ती	७/५९	सुभक्तिना तेन स भक्तवत्सलो	४/१३
सततं गलता स्वतः	७/३७	सुमनोनिकरेण पूरितम्	७/४
सत्सूत्रभावे प्रविचारिते	५/१८	सुविशेषशेषवदशेषवर्णित	८/२
स दारितारिं परमं पुमांसम्	१/२०	सुबृहुत्पयोधरमिथः प्रसंहति	८/३७
सद्गुरोर्न विरहं सहमानः	६/५०	सुस्मितेन्दुमरविन्दलोचनम्	५/५१
सद्वीपवारिनिधिसप्तकभूतधात्र्या	२/९	सुहयमेधगणातिशयालवो	३/६
स निरीक्ष्य पराशरात्मजः	७/५१	सुहसितकमलाकरोपगूढम्	६/५६
स पटखण्डमकिञ्चनवत्	३/३७	सुन्दरेषु सुरमन्दिरवृन्देषु	६/२३
स निहत्य विश्वभयदम्	८/२८	स्तन्यं मुहुः किल ददौ	२/४२
समर्प्य कृत्यानि कृती कृतानि	१/३३	स्तन्येन बालमनुतोष्य मुहुः	२/३५
समस्तवादीन्द्रगजप्रभञ्जदः	५/८	स्नात्वाऽत्र तीर्थेष्वचिरेण	५/४२
समुचितग्रहयोगगुणान्वितम्	३/३२	स्फिगूदूषणानि प्रतिपादयत्यलम्	५/४१
स रौप्यपीठालयवासिने यदा	४/३७	स्यात्तथेत्थमपि सम्भवितार्थः	६/४
सवने विकस्वरगुणस्वरद्विजे	८/२३	स्वजनतापगमागमसङ्गम	३/२
स वादिसिंहस्य गिरम्	५/११	स्वसूत्रजातस्य विरुद्धभाषी	१/५३
स शनकैर्बलिनो युगपद्गतान्	३/४७	स्वहेलया पातितपार्थिवव्रजाम्	५/३५
सहजान्वितः सकलमित्रसंयुतो	८/२४	स्वानन्दहेतौ भजतां जनानाम्	१/२७
स जातकोपाकुलितो धरासुरो	४/२०	ह	
सन्तुष्यतां सकलसन्निकरैरसद्भिः	२/२६	हरितामधीशनरदेवमण्डलम्	८/३०
सम्पूर्णलक्षणचणं नवराजमान	२/२५	हिमवर्षरविप्रभासहाः	७/२
साक्षादथोपनिषदो विभुरैतरेय्याः	३/५५	हृदये कृतसज्जनोदये	७/३३
सान्नाय्यमव्यक्तहृदाखुभुग्वा	१/४८	हृदोरुसैहार्दभृताऽधिमौलिन्यस्तेन	१/२३
सा बालकं प्ररुदितं परिसान्त्वयन्ती	२/३६	हेतुवादिनि विशङ्कटबुद्धौ	६/३३
साङ्गवेदचतुरा इतिहासे	६/९	हेतोरतिव्याप्तिरवादि तैर्यदा	५/६
सुकुमारतलाङ्गुलीमतोः	७/२८		